

श्रीमत्परमहंसपरिव्राजकाचार्योभयवेदान्तप्रतिष्ठापनाचार्यः

श्रीतोताद्रिरामानुजयतीन्द्राः ।

श्रीमद्यतीन्द्रवरयोगिपदाब्जयुग्मप्रेमाब्धिवानगिरियोगिदयैकपात्रम् ।
वेदान्तयुग्मविशदीकरणप्रवीणं रामानुजं यतिवरं सततं नमामि ॥



श्रीभगवद्भागवताचार्यैकैकर्यैकपरायणः श्रीमत्काञ्चीप्रतिवादिभयंकरसिंहासनाधीश्वरश्रीमदनन्तमहागुरुचरणकमलाश्रितः श्रीमत्परमहंसपरिव्राजकाचार्य-श्रीतोताद्रिरामानुजयतीन्द्रानुगृहीत "वैष्णवकेसरी" बिरुदभूषितः एतन्मुद्रणे दत्तहस्तावलम्बः श्रीकाशीवासरसिकः–

श्रीमान् पन्नालालरामविलासश्रेष्ठिवर्यः

ŚRÎBHÂSHYAM

OF

ŚRÎBHAGAVAD-RÂMÂNUJAMUNI

WITH THE COMMENTARY

ŚRUTAPRAKÂŚIKÂ

BY

MAHÂMAHOPÂDHYÂYA SUDARŚANAVYÂSABHATTA

ACADEMY OF SANSKRIT RESEARCH
MELKOTE-571431.
(KARNATAKA STATE)
Accn. No. 12966

CHATUSSÛTRÎ PORTION

EDITED AND PUBLISHED

BY

T. ŚRÎNIVÂSA ŚARMÂ

IN OBEDIENCE TO THE SACRED COMMAND OF

HIS HOLINESS ŚRÎTOTÂDRI RÂMÂNUJAYATÎNDRA

PRINTED AT THE "NIRNAYA-SAGAR" PRESS.

Bombay.

1910.

Price Rupees Four.

All rights reserved by the publisher.

Published by Toppoor Srinivasa Venkatarama Sarma, 17, 1st Khatarali Lane, Girgaum, Bombay.

---

rinted by Ramchandra Yesu Shedge, at the Nirnaya-sagar Press, 23, Kolbhat Lane, Bombay.

Apply to:—

T. SRINIVASA SARMA,

17, 1st Khatarali Lane, Girgaon, Bombay.

or

NIRNAYA SAGAR PRESS,

23, Kolbhat Lane, BOMBAY.



श्रीभाष्यम् ।

श्रीभगवद्रामानुजमुनिप्रणीतम् ।

महामहोपाध्यायसुदर्शनव्यासभट्टप्रणीत-

श्रुतप्रकाशिकायुतम् ।


विषयानुक्रमणी–अधिकरणसारावली–अधिकरणविषय–अधिकरणविषयवाक्यैः सहितः ।

(चतुःसूत्रीभागः ।)



स च

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीतोताद्रिरामानुजयतीन्द्राज्ञया तच्चरण-
कमलाश्रितश्रीनिवासेन संस्कृत्य मुम्बय्यां निर्णयसागर-
मुद्रणालयेऽङ्कयित्वा प्रकाशितः ।



शाकः १८३८, सन् १९१६.

मूल्यं चतस्रो मुद्राः रु० ४.

अस्य पुनर्मुद्रणादिसर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः।

प्राप्तिस्थानम्

टि. श्रीनिवासशर्मा १७, पहिली खतरआळी गल्ली—गिरगाँव, बंबई.

अथवा—

'निर्णयसागर' प्रेस—२३, कोलभाट लेन—बंबई.

ELPHINSTONE COLLEGE,

BOMBAY,

1st February, 1916.

I have great pleasure in recommending to the Sanskrit public the edition of Râmânuja's Shrî-Bhâshya with the famous commentary Shruta-Prakâshikâ which is being edited by Pandit Shrînivâsa Sharmâ at the Nirṇaya Sagar Press, and the first volume of which containing the first four Sûtras is going to be shortly published. A good edition of Shrî-Bhâshya with Shruta-Prakâshikâ was a long-felt want to the student of Râmânuja, for Shruta-Prakâshikâ is most valuable and absolutely indispensable for the proper study of the great philosopher. I, therefore, heartily congratulate the Pandit on the excellent edition that he is bringing out. Shruta-Prakâshikâ has been published before at Benares many years ago, but the edition is out of print at present and is not well printed and intelligently edited. While lecturing on Shrî-Bhâshya to my Honours Class in this College I often had to refer to the Benares edition of Shruta-Prakâshikâ and I found it a regular task to read the commentary from that unattractive book. Compared with the previous edition of Shruta-Prakâshikâ the one that Pandit Shrînivâsa Sharmâ is publishing at present is immeasurably superior. The Commentary has been most intelligently arranged and punctuated in such a way as to facilitate the work of a student, the Pratîkas from the Bhâshya being printed in bold type. From the few forms which I have carefully read for my Class lectures during the past few days I can safely say that the edition is almost entirely free from the mischiefs of the Printer's Devil. I trust that the first volume containing the first four Sûtras would be of the utmost use to our Honours Students who have to study the first Sûtra for their B. A. Examination. About the printing and the get-up of the book one word is sufficient, *viz.*, that the book is printed at the famous Nirṇaya Sâgar Press here.

I have, however, one or two suggestions to make. I find that the text of the Bhâshya has not been divided in different paragraphs according to the topics dealt with therein. This creates a little difficulty in finding out where we are exactly in Bhâsya and seems to hamper our way a little. The editor, I under-

stand, possesses some manuscripts which he uses for collation. It would have been better if he had given the variants in the foot-notes though the reading of the Shruta-Prakâshikâ which he has adopted in his edition is the best.

The editor, I am told, has undertaken this arduous task at the command of his Guru though he himself does not possess the sinews of the war sufficient to take him to the end of his enterprise. His difficulties have increased on account of the outbreak of the European conflagration and it would be difficult for him to continue the publication of the book, if the first volume that he is offering to the world does not bring him sufficient money to defray the actual expenses. I, therefore, confidently hope that the public in general, and the student world in particular, would lend to this excellent edition the support which it so richly deserves.

A. B. Gajendragadkar, M. A.

Assistant to the Professor of Sanskrit,

Elphinstone College, BOMBAY.

श्रीमते रामानुजाय नमः ।

श्रीमत्परमहंसपरिव्राजकाचार्योभयवेदान्तप्रतिष्ठापनाचार्यैः श्रीतोताद्रि(वानमामलै)-

भगवद्रामानुजमुनिभिरनुगृहीतेयमनुमोदपत्रिकाः—

महतामोदेन निवेद्यत इदं महामनस्विभ्यस्तत्त्वहितपुरुषार्थजिज्ञासुभ्यो महद्भ्यो भौमेभ्यः सुमनोभ्यः ।—संमतं हि सर्वसमयेष्वात्मज्ञानं निःश्रेयसहेतुरिति । श्रूयते च—'**पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति, आत्मानं चेद्विजानीयात्, तरति शोकमात्मवित्, ब्रह्मविदाप्नोति परम्**' इत्यादिः परावरात्मतत्त्वज्ञानस्यापवर्गसाधनत्वं प्रतिपादयन्वेदान्तवाक्यगणः । तथाप्यनादिनिधनेऽनवरतश्रूयमाणेऽपौरुषेये नित्यनिरवद्ये मातापितृसहस्रेभ्योऽपि वत्सलतरे तत्त्वहितपुरुषार्थावेदकेऽस्मिन्शब्दब्रह्मण्यनिष्णातत्वात्परंब्रह्मानधिगम्यानन्तक्लेशभाजने घोरे संसारसागरे जननमरणात्मकनिमज्जनोन्मज्जनाभ्यां दूयमानानां तीरवृक्षप्राप्त्युपायमजानतामन्विदविशेषितानां चेतनानामतिकृपणदशावलोकनेन दयमानमनाः परमकारुणिकः सर्वेश्वरः श्रियःपतिरवाप्तसमस्तकामोऽपि स्वयमेव व्यासरूपेणावतीर्य व्यासींचकार वेदान्सूत्रीचकार च वेदान्तान् । तथा च स्कान्दे व्यक्तमुक्तम्—

"नारायणाद्विनिष्पन्नं ज्ञानं कृतयुगे स्थितम् । किंचित्तदन्यथाभूतं त्रेतायां द्वापरे खिलम् ॥ गौतमस्य ऋषेः शापाज्ज्ञाने लज्ञानतां गते । सङ्कीर्णबुद्धयो देवा ब्रह्मरुद्रपुरःसराः ॥ शरण्यं शरणं जग्मुर्नारायणमनामयम् । तैर्विज्ञापितकार्यस्तु भगवान्पुरुषोत्तमः ॥ अवतीर्णो महायोगी सत्यवत्यां पराशरात् । उत्सन्नान्भगवान्वेदानुज्जहार हरिः स्वयम् ॥ चतुर्धा व्यभजत्तांश्च चतुर्विंशतिधा पुनः । शतधा चैकधा चैव तथैव च सहस्रधा ॥ कृष्णो द्वादशधा चैव पुनस्तस्यार्थवित्तये । चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा ॥ अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥ निर्विशेषितसूत्रत्वं ब्रह्मसूत्रस्य चाप्यतः । सविशेषाणि सूत्राणि ह्यपराणि विदो विदुः ॥ मुख्यस्य निर्विशेषेण शब्दोऽन्येषां विशेषतः । इति वेदविदः प्राहुः शब्दतत्त्वार्थवेदिनः ॥ एवं विधानि सूत्राणि कृत्वा व्यासो महायशाः । ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु । ज्ञानं संस्थाप्य भगवान्क्रीडते परमेश्वरः ॥" इत्यादिना ।

तदेषा संसाराग्निविदीपनव्यपगतप्राणात्मसंजीवनी उपनिषद्दुग्दाब्धिमध्योद्धृता पाराशर्यवचःसुधा पूर्वाचार्यसुरक्षिता '**विरुद्धमतयोऽनेके सन्त्यात्मपरमात्मनोः**' इति परमगुरुभिर्यामुनमुनिभिरभिहितदिशा बहुमतिव्याघातदूरस्थिता भौमानां सुमनसामनवरतपानाय भवभयाभितप्तजनभागधेयवैभवभावितावतरणेन परमकारुणिकेन भाष्यकारेण निजाक्षैरेवानीता । अस्या एव सूत्रव्याख्याया भाष्यमिति निर्विशेषितमेव नाम जोषुष्यते नान्येषाम् । 'मुख्यस्य निर्विशेषेण शब्दोऽन्येषां विशेषत' इति स्कान्दोक्त्याऽवगम्यतेऽस्यैव सूत्रकृदभिमतार्थप्रतिपादकत्वान्मुख्यत्वम् । किं बहुना पाञ्चात्यवाण्यानूदित-श्रीभाष्यशांकरभाष्याः निष्पक्षपाता मतान्तरस्था अपि महामतयो महर्षिव्यासाभिमतसूत्रार्थयाथात्म्यज्ञानजनने श्रीभाष्यमेव शरणमिति स्फुटीचक्रुः । एतद्भाष्यकाराणामाप्ततमत्वं '**भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः संचिक्षिपुः, तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते**, इति प्रतिज्ञानान्महर्षिबोधायनानुसारित्वदर्शनात्स्फुटमवगम्यते । ऋषेरभिप्रायमृषिरेव हि वेत्तुमर्हति; नह्यनृषेः सूक्ष्मदर्शित्वम् । अस्यैव भाष्यकारं इति निरुपपदनामश्रवणात् 'मुख्यस्य निर्विशेषेण शब्दोऽयम्' इति वचनं स्मारितं भवति ।

टीकाचेयं षट्त्रिंशत्साहस्री प्रख्यातयशोभिर्वरदगुरुभिः श्रीकाञ्च्यामुपन्यस्यमानाञ्छ्रीभाष्यार्थाननिमिषं श्रवणयोर्निषेव्य तथैव व्यलेखि श्रीसुदर्शनव्यासभट्टैरित्यस्याः **श्रुतप्रकाशिकेति** नात्रैव सुविदितं सर्वेषाम् । अस्याश्च टीकाया एक एवादर्शः सर्वेषां तत्परंपरागतानामाचार्याणां श्रीभाष्यार्थयाथात्म्यज्ञाने शरणमासीत् । कस्मिंश्चित्कलापे श्रीरङ्गमाक्रम्य यवनैरसिभिश्छिद्यमानेषु द्वादशसहस्रसंख्याकेषु भागवतेषु स्वशरीरं तृणायमन्यमानोऽपि श्रीमद्वेंकटनाथार्यः(वेदान्तदेशिकः)स्वगुर्वाज्ञयैतद्रक्षणे दीक्षितो गतासूनां देहानामधश्छन्नो भूत्वैनां पर्यपालयदित्यस्या वाचामगोचरं वैभवं जानतां किमु वक्तव्यम् । मतान्तरस्थेष्वपि 'अनया भाष्यं भाष्यम्' इति जोषुष्यत्सु किमिवास्याश्छन्नं वैभवम् । अनया च सहितमिदं श्रीभाष्यं बहुधा ग्रन्थान्द्रलिपिभिर्मुद्रितमपि तल्लिपिज्ञानशून्यानां नोपकारायेति गैर्वाणीमिर्लिपिभिः काश्यां प्राक्पञ्चविंशतिवर्षेभ्यो मुद्रितमासीत् । तदिदमप्यस्पष्टैकाकारलिपिभिरयथावद्विन्यस्तवाक्यसमाप्तिचिह्नं बहुत्र चर्वितचर्वणमङ्कितमिति प्रतीकग्रहणायात्यायाससमसहमानानामध्यापकाध्येतृजनानां नोपादेयतममासीत् । एतत्सर्वं कर्णेपरंपरयाधिगम्य अस्माभिः श्रीबदरीनारायणचरणकमलसेवायै निर्गतैर्मोहमयीं प्राप्तैस्तत्रत्यास्मच्चरणसंबन्धिनं निर्णयसागरे शास्त्रिवर्गे नियुक्तं श्रीनिवासमवलोक्य जगति प्रख्यात वैभवे श्रीमन्निर्णयसागराङ्कनालये श्रुतप्रकाशिकया युतं श्रीभाष्यमङ्कनीयमित्याज्ञप्तम् । सोऽप्यस्मदाज्ञादैवेन इव प्रेरितः

सम्यक्संस्कृत्य, निधायोचितचिह्नानि वाक्यसमाप्तिषु, प्रतीकानि स्थूलाक्षरैर्व्यक्तीकृत्य च स्वायसैरक्षरैः सुचिक्कणघनपत्रेषु मुद्राप्य चतुःसूत्र्यन्तं भागं ग्राहकाणां सुग्रहणाय प्रकटीचकार। अयमेव भागः स्वतन्त्रतया तत्रतत्र वेदान्तकलाशालास्व-ध्यापतेऽधीयते परीक्ष्यते च। बहुसंकटेऽप्यस्मिन्कालेऽनल्पवित्तव्ययेन मुद्राप्य प्रकाशितवन्तमकिंचनमिमं जनमेतत्परिश्रम-विदो मनीषिणोऽनुपदमेव ग्राहकीभूयैतादृशैव सरण्याऽपरस्यापि भागस्य मुद्रणप्रकाशनादिषूत्सुकं कुर्युरित्याशास्महेतराम्।

रामानुजन्।

ता. २२ फेब्रुवरी सन् १९१६. } अयोध्या, कनकभुवनम्।

श्रीः।

चिदचिच्छरीरकपरमात्मस्वरूपैक्यसिद्धान्तसर्वस्वं **भगवत्पादश्रीमद्रामानुजाचार्य**विरचितं बादरायणसूत्रभाष्यं भगवत्स्वरूपमिव श्रीयुतमेव सर्वदा विराजतीति **श्रीभाष्य**मपि तन्नाम्नाऽलंकुर्वाणं यथार्थमेवेति सर्वविदितमिदं नोपपादन-मपेक्षते। तदिदमतिप्रसन्नं संक्षिप्तविस्तृतपूर्वोत्तरकल्पादिनिरूपणशैल्या स्थूणानिखननन्यायेन सर्वमपि शास्त्रार्थं यथावदिव श्रावयदुपबृंहयच्छ्रुतप्रकाशिकाख्यानमपि व्याख्यानं तदर्थमधिजिगमिषूणामत्यन्तोपकारकमितीदमवचनसिद्धमेव। तदि-दमुभयमपि काशीनगरमुद्रितमपि प्रमाददूषितं विद्यते इति, **मान्यमान्यगजेन्द्रगडकर**महाशयाभ्यर्थनात्र प्रकटितेन स्फुटमेव प्रकाश्यते। तदत्र महता संरम्भेण महतां पण्डितवर्याणामास्तिकवर्याणां च साहाय्यं प्रतीक्ष्य श्रुतप्रकाशिकासहित-श्रीभाष्यमुद्रणप्रकाशनायार्थं कृतदीक्षान् समीचीनयाऽऽधुनिकसाधारण्येन सर्वहृदयंगमया सरण्या जगतीतलप्रथित**निर्णय-सागर**मुद्रणालये तदुद्रणप्रकाशनादिकमारचयतः पण्डितवर्यश्रीनिवासशर्मणो हस्तावलम्बयन्तु सर्वेऽपीति भगवन्तं रमारमणं प्रार्थयामि। इति—

१५।८।१६
निर्णयसागर प्रेस—बंबई. } वेदान्तविशारदः **अनन्तकृष्णशास्त्री,**
मीमांसोपाध्यायः, तिरुपती.



श्रीरस्तु ।

श्रीभाष्यभूमिका ।

श्रियःकान्ताय नमः ॥

श्रीमते विष्वक्सेनाय नमः ॥

॥ श्रीमते रामानुजाय नमः ॥

श्रीमन्नारायणांशावतारभूतो भगवान् **बादरायणो** जैनबौद्धादिवेदबाह्यमतानि—वैदिकानामेव महर्षीणां केषांचिद्वेदान्तविचारप्रवृत्तानां यथावस्थितवेदान्ततात्पर्याननुकूलानि परस्परविरुद्धानि सर्ववेदान्तप्रत्ययन्यायेन सर्ववेदान्तैककण्ठ्यकरणविधुराणि च मतानि निरस्य यथावस्थितवेदान्ततात्पर्यगर्भितं सर्ववेदान्तैककण्ठ्यकरणगर्भितं **सूत्ररूपं शारीरकमीमांसाशास्त्रं** प्रणिनाय ॥१॥ तदपि शास्त्रमर्वाचीनाः शंकरभास्करयादवाद्याः केचन यथावस्थिततदर्थजातमनवधारयन्तः स्वोत्प्रेक्षामात्रेण स्वस्वाभिनिवेशवशंवदचेतसोऽन्यथैव व्याकुर्वन्तो व्याकुलीचक्रुः ॥ २ ॥ ततो लोकरक्षैकदीक्षपरमकारुणिकभगवन्नारायणप्रचोदित **आदिशेषावतारभूतो** भगवान् **श्रीमद्रामानुजमहामुनिरुक्तार्वाचीनशंकरादिकृततद्विपरीतव्याख्यानानि** परःसहस्रानुपपत्तिप्रदर्शनेन निरस्य यथावस्थितशारीरकमीमांसातात्पर्यगर्भं सर्ववेदान्तैककण्ठ्यनिरूपणगर्भं श्रीभाष्यं नाम शारीरकमीमांसाशास्त्रव्याख्यानं सर्वार्थसामरस्यगर्भं सूत्राक्षरानुगुणं प्राचीनबोधायनटङ्कद्रमिडगुहदेवादिमहर्षिव्याख्यानानुगुणं च प्राणैषीत् ॥ ३ ॥ श्रीभगवद्रामानुजमुनिः किल काश्मीरदेशस्थसरस्वतीपीठस्थलगमनदशायां सरस्वत्या **कृप्यास**श्रुत्यर्थपरीक्षणपूर्वकं तद्योग्यतामभिवीक्ष्य—भवत एव भाष्यकरणयोग्यताऽस्ति—**भाष्यकार**संज्ञापि भवत एव युक्ता—अतः शारीरकमीमांसाशास्त्रस्य भाष्यं त्वं कुरु—विपरीतार्थकरणादन्येषां न तादृशसंज्ञा युक्तेति दत्त**भाष्यकार**संज्ञः पश्चादेव श्रीभाष्यं चकारेति प्रसिद्धम् ॥ ४ ॥ पक्षान्तरानुपपत्तयस्तावदिह किंचित्प्रदर्श्यन्ते प्रेक्षावतां मनस्तुष्ट्यर्थम् ॥ ५ ॥ **शाङ्करपक्षे**—जगतो मिथ्यात्वाभ्युपगमात्—तन्नास्तीत्येव सिद्धम् । ब्रह्मणोऽपि निर्विशेषत्वाभ्युपगमात्—ब्रह्मास्तीत्युक्तौ—अस्तित्वरूपविशेषवत्त्वप्रसङ्गभिया तथाकथनासंभवे—तदपि नास्तीत्येव सिद्धम् । एवंनिर्गुणत्वेनाभ्युपगतस्य ब्रह्मणस्तदनुभवितुर्मुक्तस्य चावाङ्मनसगोचरानवधिकातिशयानन्दवत्त्वं श्रुतिभिर्जोघुष्यमाणं कथमुपपद्येत ? न खलु पाषाणस्य केवलस्य तदनुभवितुर्वाऽवाङ्मनसगोचरानवधिकातिशयानन्दवत्त्वं सुमन्दधियापि केनचित्सुवचम्—तस्माच्छांकरा वेदवादच्छद्मप्रच्छन्नं बौद्धभावं दुरपह्नवमेव भजन्त इति विवेकिभिः सर्वैः सुगमम् ॥६॥ **भास्करपक्षे**—जगतः सत्यत्वाभ्युपगमेऽप्यचिदात्मनोर्द्वयोरेव तत्त्वयोरभ्युपगमादात्मनोऽच्छेद्यवस्तुत्वाच्चोपाधिभेदेऽपि सर्वत्रावस्थितस्यात्मन एकत्वेन सकलसंसारिजीवात्मानुभूयमानाध्यात्मिकादितापत्रयादिलक्षणसर्वदोषाकरत्वस्य ब्रह्मण्येव प्रसङ्गात्—निरस्तनिखिलदोषत्वसमस्तकल्याणगुणाकरत्वयोर्ब्रह्मणि सर्वत्र श्रुतिस्मृतिभिर्जोघुष्यमाणयोरनुपपत्त्या सर्वशास्त्रविरोधोऽपि दुर्वारः । किंच—शरीरलक्षणोपाध्यवच्छिन्नब्रह्मण एव जीवात्मरूपत्वस्वीकारात्—ब्रह्मणो विभुत्वेन गमनागमनाभावात्—शरीरसंसर्गविमोक्षयोरेव बन्धमोक्षरूपत्वाच्च शरीरगमनागमनदशायां प्रतिक्षणं बन्धमोक्षप्रसङ्गोऽपि दुर्वारः । अपिच—आत्मभेदानङ्गीकारेण बद्धमुक्तविभागासंभवान्मुक्तस्यैव पुनःपुनर्बद्धत्वसंभवाच्च मुक्तस्य पुनरावृत्त्यभावशास्त्रविरोधोऽपि दुर्वारः । एवमितस्ततः शरीरापगमदशायां घटाद्यपगमदशायामाकाशस्य पूर्वदेशावच्छेदेन तत्संयोगविमोकवच्छरीरसंयोगवि-

मोक्षसंभवान्मोक्षः सुगम एवेति तदर्थं ब्रह्मविद्याद्यनुष्ठानानावश्यकत्वेन तद्विधायकवेदान्तशास्त्राद्यानर्थक्यप्रसङ्गोऽपि दुर्वार एव। तस्माद्भास्करपक्षोऽप्यनुपपन्न एव ॥ ७ ॥ **यादवपक्षे**—ब्रह्मण एकस्यैव चिदचिल्लक्षणसर्वजगद्रूपेण परिणामाङ्गीकारात्सविकारत्वसकलहेयदोषाकरत्वयोर्ब्रह्मण्येव स्वीकाराच्च—ब्रह्मणो निर्विकारत्वनिरस्तनिखिलदोषत्वसमस्तकल्याणगुणाकरत्वादिप्रतिपादकसर्वशास्त्रविरोधेनेतो जघन्यो न कश्चित्पक्षः ॥ ८ ॥

किंच—प्रतिकल्पं ब्रह्मणैव संकल्पपूर्वकं बहुभवनस्वीकारस्य श्रुतिसिद्धत्वाद्बहुभवनदशायां सकलदुःखाकरत्वस्य ब्रह्मण्येव संभवाच्च ब्रह्मणः सर्वलोकसर्वशास्त्रविरुद्धस्वानर्थैकप्रवृत्तिस्वीकारप्रसङ्गो हि दुरपह्नव एव पक्षत्रयेऽपि ॥ ९ ॥ नहि कश्चित्सुमन्दमतिरपि स्वमस्तक एव महाप्रस्तरप्रपतनप्रसङ्गानुकूलं व्यापारं कुर्यात् ॥ १० ॥ एवं प्रतिकल्पं सृष्टिदशायां बन्धस्य महाप्रलयदशायां मुक्तेश्च स्वत एव संभवान्मोक्षार्थं ब्रह्मविद्याध्ययनादिविधाननैरर्थक्यप्रसङ्गः पक्षत्रयेऽपि तुल्ययोगक्षेम एव ॥ ११ ॥ अत्र केचित्स्वमतस्वरूपयाथात्म्यज्ञानविधुराः पूर्वोत्तरमीमांसयोरैकशास्त्र्यं नास्ति—किंतु भिन्नशास्त्रत्वमेवेति वदन्ति ॥ १२ ॥ तत्त्वविवेकविलसितमेव—शास्तीति शास्त्रमिति व्युत्पन्नस्य शास्त्रशब्दस्य शासनज्ञापकत्वप्रवृत्तिनिमित्तकत्वात्—शासनस्येशेशितव्यरूपचेतनयोर्द्वयोरीशचेतनकर्तृकेशितव्यचेतनकर्मकनियमनरूपत्वात्—एतन्मते चेशेशितव्यरूपचेतनद्वयस्यैवानङ्गीकारेण शास्त्रशब्दार्थस्यैव गगनकुसुमायमानत्वाच्च शास्त्रशब्दार्थसद्भावमङ्गीकृत्य तत्र द्वयोरैकशास्त्र्यप्रतिषेधपूर्वकं भिन्नशास्त्रत्वकथनस्यातिसुग्रजल्पितत्वात् ॥१३॥ प्रपञ्चसत्यत्वस्वतःसिद्धजीवेश्वरभेदवाद्यास्तिकमतेतु शास्त्रप्रसिद्धिरैकशास्त्र्यं च सर्वं सुनिरूपम् ॥ १४ ॥ अक्षरराशिरूपशास्त्रस्य स्वरूपत एकत्वासंभवात्साक्षात्परंपरया वैकपरमफलोद्देश्यकप्रवृत्तिजनकशास्त्रत्वस्य वैकग्रन्थव्याख्यानरूपत्वस्य वैकशास्त्रत्वरूपताया वक्तव्यत्वात्—सर्वकर्मणां तत्तदवान्तरफलामिसन्धित्यागपूर्वकमनुष्ठितानां ज्ञानजनकतायाः, ज्ञानस्य मोक्षजनकतायाश्च शास्त्रेणैव सिद्धत्वात्—कर्मपरपूर्वमीमांसाशास्त्रस्य परविद्यापरोत्तरमीमांसाशास्त्रस्य च साक्षात्परम्परया मोक्षरूपैकपरमफलजनकतायाः संभवाद्वेदरूपैकशास्त्रव्याख्यानरूपत्वाच्च तयोर्द्वयोः शास्त्रयोरेकशास्त्रत्वं सुगममेव आस्तिकमते ॥ १५ ॥ तदिदं स्पष्टमेव निरूपितं श्रीभाष्यश्रुतप्रकाशिकयोः ॥ १६ ॥ तस्मादास्तिकाभासकल्पितमुक्तमतत्रयमसमञ्जसमेव ॥ १७ ॥

भगवद्रामानुजमुनयस्तूक्तपक्षत्रये दर्शितानुपपत्तिप्रभृतिपरःसहस्रानुपपत्तिजालं प्रदर्शयन्तः शारीरकमीमांसातात्पर्यं बोधायनादिमहर्षिप्रदर्शितसरण्या यथावदवधार्य प्रागुक्तशंकरादिपक्षनिरसनपूर्वकं यथावस्थितवेदान्तशास्त्रतात्पर्यगर्भान् **वेदार्थसङ्ग्रह-वेदान्तसार-श्रीभाष्य-वेदान्तदीप-गीताभाष्यादिग्रन्थांश्चक्रुः** ॥ १८ ॥ **शंकरादयो हि**—'तत्त्वमसि' 'सर्वं खल्विदं ब्रह्म' इत्यादिवेदान्तशास्त्रगतसमानाधिकरण्यनिर्देशतात्पर्यं यथावदनवधार्य स्वोत्प्रेक्षामात्रेण जीवात्मपरमात्मनोः स्वरूपैक्यमेव ततो निश्चित्य तदनुगुणं व्याकुर्वन्त एव कृत्स्नं शारीरकमीमांसाशास्त्रं वेदान्तजालं च व्याकुलीचक्रुः ॥ १९ ॥ **श्रीभाष्यकृतस्तु** बोधायनादिमहर्षितात्पर्यमनुसृत्य तदनुगुणमेव व्याख्यानादनुपपत्तिसम्पर्कलेशविधुरं शारीरकमीमांसाशास्त्रं वेदान्तशास्त्रं च समञ्जसमेव विवव्रुः ॥ २० ॥ तथाहि—सूत्रकारेण **भगवता बादरायणेन**—'नेतरोऽनुपपत्तेः' (१ । १ । १७) 'अनुपपत्तेस्तु न शारीरः' (१।२।३) 'नच स्मार्तमतद्धर्माभिलापाच्छारीरश्च' (१ । २ । २०)' उभयेऽपि हि भेदेनैनमधीयते' (१ । २ । २१) 'विशेषणभेदव्यपदेशाभ्यां च नेतरौ' (१ । २ । २३) 'भेदव्यपदेशात्' (१ । ३ । ४) 'इतरपरामर्शात्स इति चेन्नासंभवात्' (१ । ३ । १७) 'सुषुप्त्युत्क्रान्त्योर्भेदेन'

(१ । ३ । ४३) 'अधिकं तु भेदनिर्देशात्' (२ । १ । २२) 'अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्' (३ । ४ । ८) इत्यादिसूत्रेषु जीवात्मपरमात्मनोः स्वरूपतो भेदस्यैवासकृदनेकस्थलेषु स्पष्टं निर्देशात्—तद्विरोधेन चेतनाचेतनयोः स्वरूपाभेदस्य सुतरामेवासंभवेन च—'तदनन्यत्वमारम्भणशब्दादिभ्यः' (२ । १ । १५) इत्यधिकरणे तदभिप्रायेणैव नामरूपव्याकरणश्रुत्या स्थूलचिदचिद्विशिष्टब्रह्मण एव कार्यभूतजगद्रूपतां सूक्ष्मचिदचिद्विशिष्टब्रह्मण एवोपादानकारणतां चाभिसन्धायैव जगद्ब्रह्मणोः कार्यकारणभूतयोरनुप्रवेशनिबन्धनशरीरशरीरिभावलक्षणतादात्म्येनैवानन्यत्वसमर्थनात्—'तत्त्वमसि श्वेतकेतो' (६।६।७) इति छान्दोग्यश्रुतौ—'सन्मूलाः सोम्येमाः सदायतनाः सत्प्रतिष्ठा ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा' इति प्रथमं कार्यकारणभावनिबन्धनशरीरात्मभावलक्षणतादात्म्यस्यैव सामानाधिकरण्यनिर्देशबीजतां प्रदर्श्यैव—तत्त्वमसीति तत्त्वंपदयोः परमात्मजीवात्मपरयोः सामानाधिकरण्येन निर्देशात्—'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' (३ । १४ । १) इति छान्दोग्यश्रुतावपि—सर्वं खल्विदं ब्रह्मेति सामानाधिकरण्यनिर्देशस्य—तज्जलानित्यनेन प्रागुक्तरीत्या कार्यकारणभावनिबन्धनशरीरशरीरिभावलक्षणतादात्म्यमूलकताया एव प्रदर्शनात्—'तत्सृष्ट्वा—तदेवानुप्राविशत्—तदनुप्रविश्य—सच्च त्यच्चाभवत्' (२ । ६) इति तैत्तिरीयकोपनिषद्यपि—सच्च त्यच्चाभवदिति सामानाधिकरण्यनिर्देशस्य तत्तदनुप्रवेशमूलशरीरशरीरिभावलक्षणतादात्म्यनिबन्धनताया एव प्रदर्शनात्—प्रायशः सर्वत्रेत्थमेव—परमात्मनः जीवात्माचेतनयोश्च सामानाधिकरण्यनिर्देशानां तत्र तत्रैव शरीरशरीरिभावलक्षणतादात्म्यनिबन्धनताया एव प्रदर्शनात्—स्वरूपैक्यनिबन्धनताया दुर्वेचत्वाच्च परमात्मजीवात्माचेतनानां त्रयाणामपि तत्त्वानां स्वरूपतो भिन्नत्वं तत्रापि जीवात्मनामणुत्वं च स्वाभाविकमेवानुसन्धाय तदनुगुणमेव व्याख्यानात्प्रागुक्तपक्षान्तरोक्तदोषाणां स्वपक्षे संभवस्यैवानवकाशेन तादृशदोषप्रसङ्गलेशविधुरं सुसमञ्जसमेव श्रीभाष्यादिग्रन्थजातं भगवान् **श्रीरामानुजमुनिः** प्रणिनाय ॥ २१ ॥ परस्परविरुद्धप्राचीनमहर्षिमतनिरसनपूर्वकं भगवद्बादरायणविरचितशारीरकमीमांसाशास्त्रस्याप्यर्वाचीनैः प्राचीनमहर्षिव्याख्यानान्यनुसृत्य स्वकपोलकल्पनाभिरन्यथाव्याख्याय व्याकुलीकरणवत्स्वकृतशारीरकमीमांसाशास्त्रव्याख्यानभूत**श्रीभाष्य**ग्रन्थस्याप्यर्वाचीनैरन्यथाव्याख्याय व्याकुलीकरणप्रसङ्गभिया **सुदर्शनभट्टार्य** नाम मितज्ञमेव कञ्चित्स्वानुग्रहेणामितज्ञानं कृत्वा तस्मा अपि स्वानुप्रविष्टवात्सल्यवरदार्यमुखेन स्वीयश्रीभाष्यादिग्रन्थतात्पर्याणि स्वयमेवोपदिश्य तन्मुखेन स्वकपोलकल्पनावैधुर्यज्ञापक**श्रुतप्रकाशिका**संज्ञालंकृतां प्राचीनाचार्यमुखश्रुतानामेवार्थानां सम्यङ्निरूपणगर्भां व्यख्यां सुविपुलामारचय्य प्रख्यापयामास **भगवान् श्रीभाष्यकार** एवेति, ततश्च सुदर्शनभट्टाचार्यविरचितां श्रुतप्रकाशिकाभिख्यां श्रीभाष्यव्याख्यां श्रीरङ्गनाथगोष्ठ्यां श्रीरङ्गनाथनियमनेनैव श्राविताम आकर्ण्य **श्रीरङ्गनाथो** व्याख्यानिरूपणवैखरीवैलक्षण्यश्रवणपरितुष्टमनाः—ध्रुवमपरो **व्यास** एवायमिति सुदर्शनभट्टार्यस्य व्याससंज्ञामपि ददाविति च प्रख्यातमेव सर्वत इदमैतिह्यम् ॥ २२ ॥ तस्माच्छ्रीभाष्य**श्रुतप्रकाशिका**विवृतशारीरकमीमांसाशास्त्रसिद्धान्त एव पारमार्थिक इति विमत्सरा विद्वांसो विदांकुर्वन्तु ॥ २३ ॥ इतरपक्षेषु चान्या अप्यनुपपत्तयोऽनेकविधाः श्रीभाष्यकारादिभिर्दर्शिताः श्रीभाष्यादिष्वेव द्रष्टव्याः ॥ २४ ॥ अर्वाचीनपक्षान्तराण्यपि श्रीभाष्यकारादिप्रदर्शितानुपपत्तिभिरेव प्रतिहतानि दृश्यन्ते ॥ २५ ॥ तस्मात्संसारिकतापत्रयातुरैर्मुमुक्षुभिर्निर्मत्सरैरवश्यमस्मिन्नेव जन्मनि स्वोज्जीवनकामैरिदमेव सादरमाश्रयणीयमित्यलं बहुना ॥ २६ ॥

श्रीशैलानन्तपुरुषसिंहासनपदाश्रितः । श्रीरङ्गसूरिर्व्यातानीदिमां श्रीभाष्यभूमिकाम् ॥ २७ ॥

समाप्ता चेयं भूमिका ।

॥ श्रीः ॥

श्रुतप्रकाशिकाविषयानुक्रमणी।

	पृ.	पं.
* मंगलश्लोकाः	१	४
१ श्रीभाष्यावतरणम्	१	१८
२ अखिलेतिश्लोकव्याख्या	२	११
३ पाराशर्येतिश्लोकव्याख्या	४	१२
४ प्रतिज्ञावाक्यव्याख्या	५	१५
५ जिज्ञासासूत्रव्याख्या	५	४०
६ अथशब्दार्थः	६	६
७ अतःशब्दार्थः	७	६
८ कर्मविचारपूर्ववृत्तत्वसमर्थनार्थः	७	२८
९ पञ्चार्थः	८	१६
१० ब्रह्मशब्दार्थः	९	२६
११ जिज्ञासाशब्दार्थः	११	३०
१२ यादवप्रकाशीयसूत्रार्थनिरासः	१२	५
१३ ऐकशाख्यसमर्थनम्	१२	२८
१४ कर्मब्रह्मविचारयोः क्रमनियामकोक्तिः	१५	१०
१५ अध्ययनविधिनिरूपणम्	१५	२०
१६ रागतः समर्थनम्	१९	१५
१७ लघुपूर्वपक्षः	२३	२०
१८ लघुसिद्धान्तः	२८	३१
१९ साध्यसाधनद्वित्वनिरासः	२८	३२
२० वाक्यजन्यज्ञानस्य मोक्षसाधनत्व-निरासः	२९	६
२१ भक्तेरुपायत्वसमर्थनम्	३०	३७
२२ भक्तेः कर्माङ्गकत्वसमर्थनम्	३६	२४
२३ साधनसप्तकोक्तिः	३७	२३
२४ साधनचतुष्टयपूर्ववृत्तत्वनिरासः	४१	३३
२५ दुःखत्रयाभिघातज्ञानपूर्ववृत्तत्वनिरासः	४३	२५
२६ महापूर्वपक्षारम्भः	४५	९
२७ ब्रह्मसत्यत्वप्रपञ्चमिथ्यात्वोपपादनम्	४५	१९
२८ अविद्यानिरूपणम्	४८	१८
२९ अविद्याया ऐक्यज्ञाननिवर्त्यत्वम्	४९	२६
३० प्रत्यक्षविरोधे शास्त्रप्राबल्यम्	५०	२३
३१ भेदाभेदश्रुत्योर्विरोधे अभेदश्रुति-प्राबल्यम्	५२	११
३२ सामानाधिकरण्यनिरूपणम्	५३	१६
३३ समानाधिकरणपदानां स्वरूपमात्र-प्रतिपादनपरत्वम्	५४	२
३४ सर्वपदलक्षणासमर्थनम्	५७	२४
३५ प्रत्यक्षस्य सन्मात्रग्राहित्वम्	५८	३६
३६ भेददूषणम्	५९	२८
३७ सदनुभूत्योरैक्यम्	६१	११
३८ अनुभूतेः स्वयंप्रकाशत्वसमर्थनम्	६१	२०
३९ अनुभूतेर्नित्यत्वम्	६६	१०
४० अनुभूतेर्निर्विकारत्वम्	६६	२१
४१ अनुभूतेः सजातीयभेदराहित्यम्	६६	२६
४२ अनुभूतेरेवात्मत्वम्	६७	१४
४३ अहमर्थस्यानात्मत्वम्	६७	३८
४४ महासिद्धान्तारम्भः	६९	१८
४५ सम्यक्शास्त्रज्ञानहेतुभूतभक्तिनिरू-पणम्	६९	२६
४६ निर्विशेषवस्तुनो प्रामाणिकत्वम्	७०	३०
४७ स्वानुभवस्य सविशेषविषयत्वम्	७०	४१
४८ शब्दस्य सविशेषविषयत्वम्	७२	२४
४९ प्रत्यक्षस्य सविशेषविषयत्वम्	७३	१४
५० निर्विकल्पकनिरूपणम्	७३	२०
५१ नैयायिकाभिमतनिर्विकल्पकख-ण्डणम्	७४	१६
५२ भेदाभेदवादनिरासः	७५	१६
५३ अनुमानादेः सविशेषविषयत्वम्	७६	२७
५४ सन्मात्रग्राहिप्रत्यक्षभङ्गः, भेददूषण-निरासश्च	७६	३६
५५ जातेः संस्थानरूपत्वसमर्थनम्	७८	३२
५६ संस्थानस्य भेदरूपत्वसमर्थनम्	८०	१४
५७ मिथ्यात्वानुमानभङ्गः	८१	५
५८ व्यावर्तमानत्वानुमानभङ्गः	८२	२८
५९ अनुवर्तमानत्वानुमानभङ्गः	८३	२८
६० धीसदैक्यनिरासः	८३	३४
६१ अनुभूतेः स्वयंप्रकाशत्वशिक्षणम्	८३	३९
६२ अनुभूतेरनुभाव्यत्वसमर्थनम्	८४	१७
६३ स्वयंप्रकाशानुभूतेर्नित्यत्वनिरासः	८५	१९
६४ निर्विषयानुभूतिनिरासः	८७	१५
६५ अनुभूतेर्निर्विकारत्वनिरासः	८८	३९
६६ संविदो निर्भेदत्वनिरासः	८९	१८
६७ अनुभूतेर्दृश्यधर्मत्वसमर्थनम्	९०	२८
६८ संविदात्मत्वनिरासः	९१	१२

	पृ.	पं.
६९ अहमर्थात्मत्वसमर्थनम्	९२	३९
७० अहमर्थस्य ज्ञानस्वरूपत्वज्ञानगुणक-त्वसमर्थनम्	९५	२०
७१ ज्ञातुर्मिथ्यात्वनिरासः	९९	३६
७२ ज्ञातृत्वस्य विक्रियात्मकत्वान्तःक-रणधर्मत्वनिरासः	१००	२८
७३ परोक्षज्ञातृत्वनिर्वाहनिरासः	१०२	३२
७४ सुषुप्त्यादावहमर्थस्फुरणसमर्थनम्	१०६	२१
७५ मुक्तावहमर्थानुवृत्तिसमर्थनम्	१०८	३८
७६ शास्त्रप्रत्यक्षविरोधे शास्त्रप्राबल्य-निरासः	११२	१०
७७ असत्ख्यात्मत्वप्रतिपत्तिनिरासः	११४	३०
७८ स्फोटवादनिरासः	११६	२२
७९ श्रुतिषट्कः	११८	३१
८० सद्विद्यायाः सविशेषविषयत्वसमर्थनम्	११८	३१
८१ परविद्यायाः सविशेषविषयत्वस्था-पनम्	१२१	१०
८२ अखण्डार्थसामानाधिकरण्यनिरासेन सत्यादिवाक्यस्य सविशेषविषय-त्वस्थापनम्	१२१	२२
८३ निर्गुणसगुणवाक्ययोः विषयविभागे नाविरोधः	१२४	३४
८४ आनन्दवल्याः सगुणविषयत्वम्	१२७	१७
८५ ज्ञेयत्वज्ञातृत्वनिषेधनिरासः	१२९	१३
८६ आनन्दत्वानन्दित्वयोरविरोधः	१३०	२७
८७ भेदतन्निषेधश्रुतीनामविरोधसमर्थनम्	१३०	३८
८८ स्मृतिपुराणघट्टः	१३५	२९
८९ सविशेषपरस्मृतिपुराणवचनानि	१३५	२९
९० परोक्षस्मृतिपुराणवचनानां समी-चीनार्थकथनम्	१४३	२४
९१ उपबृंहणविधिनिरूपणम्	१४६	१७
९२ विष्णुपुराणप्राशस्त्यम्	१४७	२८
९३ प्रकार्यद्वैतप्रकाराद्वैतविवेकः	१५५	३०
९४ द्वासुपर्णेतिश्रुत्यर्थविचारः	१५८	३१
९५ मुक्तौ जीवब्रह्मणोः स्वरूपैक्यनिरासः	१६०	१४

	पृ.	पं.
९६ सप्तविधानुपपत्त्यारम्भः	१६६	३२
९७ आश्रयानुपपत्तिः	१६६	३७
९८ तिरोधानानुपपत्तिः	१६८	२२
९९ स्वरूपानुपपत्तिः	१६८	३६
१०० अनिर्वचनीयत्वानुपपत्तिः	१७०	९
१०१ प्रमाणानुपपत्तिः	१७०	३४
१०२ तमसो द्रव्यत्वसमर्थनम्	१७३	११
१०३ अविद्याप्रत्यक्षनिरासः	१७३	३५
१०४ अविद्यानुमाननिरासः	१७८	३२
१०५ सत्ख्यातिसमर्थनम्	१८३	३१
१०६ अविद्यापरत्वेन परोक्षश्रुतिनिर्वाहः	१८९	१४
१०७ स्मृतिपुराणानामविद्यापरत्वनिरासः	१९१	१५
१०८ निवर्तकानुपपत्तिः	१९८	१९
१०९ तत्त्वमसिवाक्यार्थविचारः	१९८	३०
११० अपर्यवसानवृत्तिनिरूपणम्	२०५	१५
१११ मतान्तरेषु सामानाधिकरण्यानुपपत्तिः	२०८	३३
११२ संग्रहेण सिद्धान्तोपन्यासः	२१०	३७
११३ निवृत्त्यनुपपत्तिः	२१५	३८
११४ महासिद्धान्तसमाप्तिः	२१७	२५
११५ सूत्रकाराभिमतजिज्ञासाधिकरणपू-र्वपक्षः	२१७	३९
११६ अधिकरणसिद्धान्ते सिद्धवस्तुनि श-ब्दव्युत्पत्तिनिरूपणम्	२२०	१६
११७ अपूर्वखण्डनम्	२२२	३१
११८ शेषलक्षणम्	२२४	२
११९ जन्माद्यधिकरणपूर्वपक्षः	२२७	२९
१२० जन्माद्यधिकरणसिद्धान्तः	२३२	३५
१२१ जन्माद्यधिकरणसिद्धान्ते उपलक्षण-पक्षस्य निर्दुष्टत्वम्	२३२	३७
१२२ विशेषणत्वपक्षस्य निर्दुष्टत्वम्	२३३	४१
१२३ शास्त्रयोनित्वाधिकरणपूर्वपक्षः	२३७	१९
१२४ शास्त्रयोनित्वाधिकरणसिद्धान्तः	२४३	३०
१२५ समन्वयाधिकरणपूर्वपक्षः	२४७	१२
१२६ समन्वयाधिकरणसिद्धान्तः	२६७	२०
१२७ चतुःसूत्रीशेषः	२६९	३२

इति श्रुतप्रकाशिकाविषयानुक्रमणी समाप्ता ।

श्रीमते रामानुजाय नमः ॥

अधिकरणसारावली ।

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

स्वस्ति श्रीरङ्गभर्तुः किमपि दधदहं शासनं तत्प्रसत्त्यै सत्यैकालम्बि भाष्यं यतिपतिकथितं श्रध्वदध्याप्य युक्तान् ।
विश्वस्मिन्नामरूप्याण्यनुविहितवता तेन देवेन दत्तां वेदान्ताचार्यसंज्ञामवहितबहुवित्सार्थमन्वर्थयामि ॥ १
श्रीमद्भ्यां स्वादसावित्यनुपधि वरदाचार्यरामानुजाभ्यां सम्यग्दृष्टेन सर्वं सहनिशितधिया वेङ्कटेशेन कृप्तः ।
सेव्योऽसौ शान्तचित्तैः श्रवणरसतया शान्तिलाभार्थिभिर्वा सिद्धः शारीरकार्थे सहजबहुगुणःस्रग्धरादुग्धराशिः ॥ २
त्रस्यन्तस्वान्तवादिन्यधिकरणगणे पौनरुक्त्योक्तबाधौ मन्दत्वासङ्गतत्वे विशयमफलतां मानबाधं च मन्तॄन् ।
दिक्षोहक्षोभदीनान् दिनकरकिरणश्रेणिकेवोज्जिहाना ह्रद्या पद्यावलीयं हृदयमधिगता सावधानान्धिनोतु ॥ ३
गम्भीरे ब्रह्मभागे गणयितुमखिलं कः प्रवीणः प्रमेयं दिक्षात्रं दर्शयन्नप्यहमिह निपुणैः प्राध्वमध्यक्षणीयः ।
मा भून्निःशेषसिद्धिस्तदपि गुणविदः स्फीतनिःसीमरत्ने मध्येहारं निधेयं महति जहति किं मौक्तिकं लम्बमब्धौ ॥ ४
वेदार्थन्यायचिन्ते प्रथममधिगतः कर्मवर्गः प्रमाणैः मेदैरङ्गैः प्रयुक्त्या क्रमविरचनयाऽथाधिकृत्याऽतिदिश्य ।
तत्राशेषैर्विशेषैस्तदनु तदनुवर्त्यूहतः प्राप्तबाधैः तन्त्रेणाथ प्रसक्त्या तत उपरि चतुर्लक्षणी देवतार्था ॥ ५
प्राग्धर्मेऽल्पास्थिरार्थे प्रशमितविशये तादृशाराध्ययुक्तेऽथातःशारीरकांशे बहुविधमहिम ब्रह्म मीमांसितव्यम् ।
कृत्स्नस्वाध्यायसाङ्गाध्ययनसमुदितापातबुद्ध्यैव कर्म त्यक्त्वाऽऽदौ ब्रह्मचिन्तां किमिति न कुरुतां तत्र तुल्योक्त्यबाधात् ॥ ६
प्रावण्यं प्राक्त्रिवर्गे सफलयतनतोपासनाङ्गत्वतोऽपि व्याख्यारूपेऽत्र शास्त्रे क्रमनियतिरसौ स्याच्च मुख्यक्रमेण ।
मानत्वादिर्विचार्यः पुरत इह तथा वाक्यवेद्यात्पदार्थो दृष्टान्तश्चोपमेयाद्यदि मधु सविधे यातु चार्द्रिं किमर्थः ॥ ७
व्याचख्युः केऽपि तापत्रयहतिमितरे साधनानां चतुष्कं काण्डेऽस्मिन् पूर्ववृत्तं कथयति निगमः कर्मचिन्ताफलं तत् ।
साङ्गाधीतिर्हि सूते विशयमवसरः क्वात्र तन्त्रान्तरादेरौचित्यस्थापितोऽयं क्रम इह न पुनश्चोदनासंप्रयुक्तः ॥ ८
नित्यप्राप्तस्य कण्ठस्थितकनकनयान्निर्विशेषस्य लब्धिर्मिथ्याभूतं निवर्त्यं श्रुतिशकलभुवः प्रेक्षणात्तन्निवृत्तिः ।
कर्मैवं क्वोपयुक्तं प्रतिभटमपि तद्वृत्ततोर्क्तिर्मदुक्ते प्राप्तात्रेति प्रलापे प्रतिवचनगतिर्भाषिता विस्तरेण ॥ ९
मीमांसायाः कबन्धं कतिचन जगृहू राहुकल्पं शिरोऽन्ये किन्तैरन्तर्विरोधप्रमुषितमतिभिर्बाह्यकल्पैर्भ्रमद्भिः ।
स्वाध्यायाध्यायकात्स्न्यें स्वविधिपरविधिप्रेरणा तावदास्तां कृत्स्नापातप्रतीतौ किमिति कृतधियः कृत्स्नचिन्तां न कुर्युः ॥
प्राधीतस्यैकरूपप्रयतननियतादेकरूपोपकारादिद्यास्थानैक्यसिद्धौ क्रमनियतियुताकाङ्क्ष्यैकप्रबन्धम् ।
अध्यायादिष्विवावान्तरविषयफलाद्यन्यताऽत्राप्यमेत्री तत्तुल्यः कर्तृभेदः कलिबलकलुषैः कल्पितोऽर्थे विरोधः ॥ ११
तत्तद्वैशिष्ट्यभेदाद्यदपि भिदुरा देवता पूर्वभागे संज्ञावैषम्यमात्रादपि कथमियताऽधीतयष्टव्यभङ्गः ।
उद्देश्याकारभेदोऽस्त्वयमिह हविषामुक्तिभिन्ने प्रयोगे दौर्बल्यं त्वक्षवेद्यान्मितिचरमतया द्रव्यतो देवतायाः ॥ १२
जैमिन्युक्तं विरुद्धं यदिह बहुविधं दर्शितं सूत्रकारैस्तस्मादत्रैकशास्त्र्यं हठकृतमिति न ब्रह्मसंवाददार्ढ्यात् ।
तत्रात्पर्यभेदैर्विहतिपरिहृतिः काण्डवत्काण्डयोः स्याद्वाह्यक्षेपार्थगूढाशयवचनभवभ्रान्तिशान्त्यादिसिद्धेः ॥ १३
आक्षिप्य स्थापनीयाः कतिचिदिह नयाः पूर्वकाण्डप्रणीताः कश्चिद्युत्पादनीयाः कश्चिदपवदनं स्थाप्यमौत्सर्गिकस्य ।
इत्थं सर्वत्र चिन्ताक्रम इति समतां वीक्ष्य मध्यस्थदृश्या शास्त्रैक्ये पौनरुक्त्यप्रभृतिपरिहृतिः सावधानैर्विभाव्या ॥ १४
वृत्तिग्रन्थे तु जैमिन्युपरचिततया षोडशाध्याय्युपात्ता सङ्कर्षः काशकृत्स्नप्रभव इति कथं तत्त्वरत्नाकरोक्तिः ।
अत्र भूमः सदुक्तौ न वयमिह मुधा बाधितुं किंचिदर्हा निर्वाहस्तूपचारात् क्वचिदिह घटते ह्येकतात्पर्ययोगः ॥ १५
सौत्री सङ्ख्या शुभाक्षीरधिकृतिगणना चिन्मयी ब्रह्मकाण्डे तादर्थ्येऽनन्तरत्वेऽप्यधिकरणभिदा नाल्पसारैः प्रकल्प्या ।
अक्षोर्म्याशाहिकाद्यादृदमुनिवसुमन्वंद्रितत्त्वातिशक्वर्यक्षैरक्षैः प्रयाजैरिह भवति रसैः पादनीतिप्रबन्धः ॥ १६
आर्थं त्वेतत्समन्विस्यहितिकरणप्राप्तिचिन्ताप्रधानैरङ्गाद्यैः षोडशाङ्गिद्विकयुगभिदुरं षट्कमेदादिनीत्या ।
तत्रापि क्वचि सिद्धं विषयमपि परन्तत्प्रतिद्वन्द्वियुग्मं स्वप्राप्तेः साधनं च स्वयमिति हि परं ब्रह्म तत्रापि चिन्त्यम् ॥ १७
तत्रापेऽन्तर्गूढाविशदविशदसुस्पष्टजीवादिवाचः पश्चात्स्मृत्यादिकैरक्षतिरहितहतिः कार्यतात्रेन्द्रियादेः ।
दोषादौ तृतीये भवभृदितरयोर्भक्तिकाले चाथोपासारोहप्रभावोत्क्रमसरणिफलान्यन्तिमे चिन्तितानि ॥ १८
चष्टे देही स्वमिष्टो निरवधिमहिमापास्तपापाद्यभिख्यः स्वात्मादेरिन्द्रियादेरुचितजननकूलंसृतौ तत्रवाही ।
निर्दोषत्वादिरस्मो बहुषजनपदं स्वार्हकर्मप्रसाद्यः पापच्छिद्ब्रह्मनाड्यातिकृदतिवहन् सान्यदृश्यात्र वेद्यः ॥ १९

विध्युक्त्याऽधीत्य वेदान्विधिबलविरतावन्यजादेव रागात् कृत्स्नं मीमांसमानाः क्रमत इति परब्रह्मचिन्तां तरन्ति ।
प्राप्ते तुर्ये युगेऽस्मिन् परिमितबलधीप्राणतद्विघ्नदृष्ट्या कालक्षेपाक्षमत्वात् कतिचन कृतिनः शीघ्रमन्ते रमन्ते ॥ २०
रागान्मीमांसते चेत् स्वयमिह यततां किं गुरूक्त्येतिचेन्न ब्रह्मज्ञानाप्तये गुर्वभिगमनविधेस्तेन तत्त्वोपदेशात् ।
सद्विद्याचार्यवत्त्वे प्रथयति च परब्रह्मविच्चि तथान्याप्याचार्यादित्यधीते नियमविधिरसौ निश्चितो नीतिविद्भिः ॥ २१
सिद्धे व्युत्पत्तिराद्या न भवति न च धीर्लक्षणाद्युज्यतेऽस्मिन् किं शास्त्रेणान्यसिद्धे न च निशमयितुः सिद्धबोधे फलं स्यात् ।
ब्रह्मण्येवं न मानान्युपनिषद इति स्मिते तद्विचारे शास्त्रारम्भं चतुःसूत्र्यघटयदुचितैर्न्यायभेदैश्चतुर्भिः ॥ २२
सिद्धे व्युत्पत्त्यभावे स्वरिव फलतया लक्ष्यभङ्गे च लभ्यं ब्रह्मान्योक्त्यानुमानप्रमितमपि भवत्वंशतः शास्त्रवेद्यम् ।
विध्यर्थत्वेऽप्यबाधात्परविषयवचः स्वार्थमानं भवेदित्यन्वारूढोक्तिदैन्यं न हि सहत ऋजुः सूत्रकृद्वावदूकः ॥ २३
द्वाभ्यामादौ प्रतीतिप्रजननमुदितं सिद्धरूपे परस्मिन् द्वाभ्यां वैफल्यशङ्का तदनु परिहृता शास्त्रतज्ज्ञान्यबुद्धोः ।
औचित्यानेकशाष्प्यस्वरसगतिमती प्राक्तनी वर्तनीयं शास्त्रारम्भार्थमेकं त्रितयमपि परं शास्त्रमित्याहुरेके ॥ २४
यत्तत्सेनेश्वरार्यैरगणि वकुलभृत्किङ्करैरक्ष्यकारि व्यासार्यैर्न्यासि च द्विः श्रुतमिति विशदं विष्णुचित्तैर्विवव्रे ।
भश्रौषं शेषकल्पादहमपि विदुषो वादिहंसाम्बुवाहादद्धा निर्द्धार्यतेऽतश्चतुरधिकरणी ब्रह्मचिन्तोपयुक्ता ॥ २५
व्युत्क्रम्यात्राद्यतुर्यावभिदधति नयौ केचिदप्राक्षमेतत् बोधासिद्धौ कथं तत्फलमिह विमृशेत् सिद्धवत्कारमान्द्यात् ।
मध्यौ द्वौ रूपनामप्रजननविषयौ यद्विदुस्तच्च मन्दं सत्युक्तेऽपेक्षितेऽर्थे विफलविभजनं नोचितं नीतिसूत्रे ॥ २६

इति शास्त्रावतारः ॥

अथ जिज्ञासाधिकरणम् ॥ १ ॥

कार्ये व्युत्पत्तिराद्या नियतमिति गिरस्तत्परा एव सर्वा नान्या वेदेऽपि नीतिस्तत उपनिषदामूषरप्रायतैव ।
नातस्तद्वेद्यमीमांसनमुचितमिति प्रत्यवस्थीयमाने सिद्धे व्युत्पत्तिमाद्यां बहुमुखमवयन् ब्रह्म जिज्ञास्यमाह ॥ २७
अङ्गुल्या निर्दिशन्तः किमपिकिमपि तद्वाचकांशैः प्रयुक्तैर्बालान् व्युत्पादयन्ति क्रमभवमिलितज्ञापकत्वं विदन्तः ।
सङ्घातास्ते पदानां विदधति च धियं क्वापि सिद्धे विशिष्टे कर्तव्ये क्वापि चेति क्वचिदिह नियतिः शब्दशक्तेर्न कल्प्या ॥
संसारेऽनादिसिद्धे मुहुरनुभवतः संचिताः संस्क्रियाः स्युः संस्कारोद्बोधकाश्च स्वयमुपनिपतन्त्यप्रकम्प्याल्पवाहात् ।
तत्तज्जातीयभेदग्रहणसमुचिता वृत्तयस्तन्निदानास्तदत्स्याच्छिक्षकादिव्यवहृतिषु शिशोरैदमर्थ्यादिबोधः ॥ २९
दक्षैराघोरणाद्यैरनुमितविविधस्वप्रयासोपयोगैः शिक्षाभेदा विचित्रा गजविहगमुखान् ग्राहयद्भिः प्रयुक्ताः ।
तस्मात्सार्थो मनुष्यप्रभृतिषु च तथाभूतशिक्षाविशेषः कल्पो भाष्योदितो यन्न यदि कथमसौ कल्पतेऽन्योऽपि मार्गः ॥
कस्यैचित्सिद्धमर्थं कमपि कथयितुं चेष्टया चोद्यमानस्तस्मै तं वक्ति तद्धीसमविषयतया शिक्षते तद्वचोऽन्यः ।
आदिष्टो बोधनार्थं यदिह वितनुते तत्तदर्थं हि युक्तं तद्वाक्यात्सिद्धवेदी प्रयतत इति चेदस्त्वनादेशिकं तत् ॥ ३१
पुत्रस्तेऽभूत्र सर्पोऽयमिति वचनतः प्रीत्यभीत्यादिलिङ्गैस्तद्योग्यार्थं तदूहं विषयनियतिरासक्तिपूर्वैः क्वचित्स्यात् ।
आवापोद्वास्पभेदात् प्रतिपदनियता शक्तिरप्यत्र सिद्धेद्भूयोदृष्ट्यादिसाहाय्यकमिह वचसः कार्यपक्षाविशिष्टम् ॥ ३२
कार्ये व्युत्पत्तिराद्या भवतु तदपि किं शक्तितात्पर्यसिद्धेः प्राग्व्युत्पत्तिः क्रियायां नृवचसि नियमे त्वन्यथेत्यम्युपैषि ।
स्थाप्याऽतोऽनन्यथासिद्धानुगमनियतैः सत्प्रयोगैर्हि शक्तिः कोऽसौ पाङ्क्तेय इत्याद्युचितविरतिकं सिद्धमात्रेऽपि वाक्यम् ॥
दुःखासंभिन्नदेशप्रभृतिफलतया चोदनास्वेव सिद्धं श्रौतत्वादार्थवादिक्यपि भवति फलं रात्रिसत्रे प्रतिष्ठा ।
अङ्गीकुर्मो निषेधानुगुणमिति तथाऽनर्थकृत्वं निषेध्ये विध्यर्थैरप्यतः स्यादवितथविषया ब्रह्मधीरर्थवादैः ॥ ३४

इति जिज्ञासाधिकरणम् ॥ १ ॥

अथ जन्माद्यधिकरणम् ॥ २ ॥

जन्माद्यैश्चेद्विशेष्यं भवति बहुलताथोपलक्ष्यं ब्रवीषि ज्ञाताज्ञातादिदोःस्थ्यं व्यतिषजति न चालक्षिते स्यात्परीक्षा ।
उद्दिष्टब्रह्मचिन्ता तत इह कथमित्यल हेतुत्वलक्ष्यः पुंसूक्तादिप्रसिद्धो गुणनिधिरघजिद्ब्रह्मशब्दार्थ उक्तः ॥ ३५
नाना चेल्लक्षणानि स्वरसभिदुरता ब्रह्मणि स्याद्विशेष्ये खण्डो मुण्डश्च गौरित्यभिलपनसमा धर्मिशब्दैकताऽङ्ग ।
तेष्वेकं चेद्यथाऽन्यत्समुदितमफलं स्याद्व्यवच्छेद्यहानेः खण्डत्वादिक्रमाच्चेत्यसदविहतितः खंण्डतादेर्विशेषात् ॥ ३६
तत्तत्स्वप्रत्यनीकव्युदसननियतं भेदकं नान्यबाधि व्याघातः कालभेदान्न भवति जननस्थापनध्वंसनानाम् ।
प्रत्येकं लक्षणत्वं सुवचमिहबहूदाहृतिर्धीमहिम्ने संभूयाप्याहुरेके फलमपि च तदाशङ्कितार्थव्युदासः ॥ ३७

ज्ञातं चेन्नोपलक्ष्यं नच यदि नतरां लक्ष्मयोगाप्रतीतेर्ज्ञातज्ञातांशभेदस्त्विह दुरभिलपो लक्षणेनैव वेद्ये ।
ब्रह्मत्वं ब्रह्मशब्दान्विततिरपि विदितेऽन्यत्र नोचेन्न शङ्का मैवं नानागमोद्यद्विशयशमनतः श्रीमति ब्रह्मतोक्तेः ॥ ३८
यावल्लक्ष्यावबोधं यदवगतिरतो लक्षणात्तद्विशेष्यं यस्याबोधेऽपि पश्चाद्यदवगतिरिदं स्यात्कुतो नोपलक्ष्यम् ।
तस्माद्वेधापि भाष्येऽनुमतिरनुचितेत्याशयाज्ञस्य चोद्यं मोक्षार्थोपास्यभेदे द्वयमपि समन्वेति विद्याविकल्पात् ॥ ३९
चन्द्रे शास्त्रेव शान्ते महसि तटगतं लक्षणं कारणत्वं सत्यज्ञानादिवाक्यैरपमृदितगुणं तद्विभातीति डिम्भाः ।
एकत्रार्थो विशेष्ये प्रतिपदनियतावर्ज्यतत्तन्निमित्तद्वारावृत्ति पदानामिह विदुरुणाद्युक्तिवद्व्ययावृद्धाः ॥ ४०

इति जन्माद्यधिकरणम् ॥ २ ॥

अथ शास्त्रयोन्यधिकरणम् ॥ ३ ॥

वीतावीतप्रयोगक्रमनियतिमती कार्यता विश्वमेतत् सर्वज्ञेन प्रकृप्तं गमयति विकलस्त्वत्र शास्त्रैर्विचारः ।
इत्युक्तौ लघुत्वादनुमितिवशतः कर्मजैश्वर्ययुक्तो विश्वामित्रादिनीत्या स्फुरति विभुमिहासूत्रयच्छास्त्रवेद्यम् ॥ ४१
क्षित्याद्यं कार्यताद्यैः कटकमकुटवत् कर्तृपूर्वं स कर्ता सिद्ध्येदत्राण्वदृष्टप्रभृतिजनकदृक् सर्वशक्तिश्च मैवम् ।
श्रोत्राद्यैः सौरभादिग्रहणरुचिरियं तादृशव्याप्यभावात्सर्वं हेतुं न पश्येत् घटकृदिह न चाकर्तृता तावतोऽस्य ॥ ४२
कार्यत्वात् स्याद्विवादास्पदमिदमखिलं सर्ववित्कर्तृपूर्वं यन्नैवं तद्धि नैवं पुरुषवदिति नानन्यथासिद्ध्यभावात् ।
हेतावेतादृशात्मन्यविदुरभिदुरं व्याप्तसिद्ध्यादिदौःस्थ्यं तद्भङ्गे लक्षणानामगणि गमनिका तत्त्वमुक्ताकलापे ॥ ४३
यद्यप्यात्मान्तरादेरनुमितिरनघा लिङ्गभेदैस्तथाऽपि प्रत्यक्षव्याप्तिशैली न खलु शिथिलिता कुत्रचित्पक्षभेदे ।
आम्नाये त्वद्भुतोक्तिर्न भवति वितथा तादृशाप्तोक्तनीत्या बाधाभावादिसाम्याद्विहतिमति भवेल्लोकवत् गौणतादिः ॥ ४४
नन्वाम्नायप्रधानाः क्वचिदनुकथयन्त्यस्मदादेरशक्याः कार्यैः कर्तोऽनुमेयः पर इति तदभिप्रैतु जन्मादिवाक्यम् ।
तस्मादीशानुमानत्यजनमनुचितं वैदिकस्येति चेन्न क्वाप्यौचित्योपदेशाद्यत इति च सदाद्युक्तिसिद्धानुवादात् ॥ ४५

इति शास्त्रयोन्यधिकरणम् ॥ ३ ॥

अथ समन्वयाधिकरणम् ॥ ४ ॥

कर्तव्ये ह्यर्थ उक्ते निशमयितृफलं सिद्धरूपे तु न स्यात् प्रीत्या साफल्यकृप्तौ वितथमपि वचः किं न दृष्टं तदर्थम् ।
विद्यार्थत्वेऽन्यदृष्टेर्विषयवदनृतं तत् परीक्ष्यन्न भावीत्याक्षेपेऽनन्यशेषे निरवधिकसुखे शास्त्रतात्पर्यमाह ॥ ४६
तात्पर्यं ब्रह्मतत्त्वेऽप्यविहतविधिनाऽप्येकवाक्यत्वपक्षे भेदेऽपि स्यादसिद्धेर्न भवति बलिभुग्दन्तसंख्योक्तिसाम्यम् ।
स्वादार्थत्वं मृषात्वक्षममिति न मृषेत्यूहने प्रीत्ययोगाद्वालोपच्छन्नादिष्वपि विषयतथाभावबुद्ध्यैव हर्षः ॥ ४७
यत्प्रीत्यर्थं वचस्तन्निखिलमनृतमित्यर्भकप्रायवाक्यं सत्योक्त्यानन्दहेतुर्न च विहतिरिहाध्यक्षतः शास्त्रतो वा ।
तेनानन्यार्थसिद्धोक्त्यनृतविषयताशङ्कनस्तम्भनेन त्रय्यन्ताः सत्यनित्याद्भुतपरमपरब्रह्मनिष्ठाः प्रमाणम् ॥ ४८
ब्रह्मैके निष्पपञ्चीकरणविधिपदं ध्यानविध्यर्थमन्ये निर्धर्माद्वैतवाक्योपचरितमितरे सिध्यतीति ब्रुवन्ति ।
तेषामेषां स्वपक्षस्ववचनविहतिव्याकुलानेकजल्पाः कल्पोऽयं बाह्यकल्पः कृतमतिपरिषत्पीठमर्दैरमर्दि ॥ ४९
अन्यार्थो ह्यर्थवादः स्तुतिमुखमुखतः स्थापितः प्रागिदानीं स्वातन्त्र्येण प्रमाणीक्रियत इति ततः काण्डयोः स्याद्विरोधः ।
न स्यात्सामान्यतो हि प्रथममभिदधे मानतास्थापनार्थं केषांचित्स्वार्थतोक्ता स्वत इह सुभगे बोधमात्रात्पुमर्थे ॥ ५०
त्रेधा सर्वत्र वेदे नियतविभजने चोदनाद्यंशभेदैश्चत्वारोऽप्यर्थवादा मुनिभिरभिहिता ब्राह्मणांशस्य शेषाः ।
अत्रातच्छेषतोक्तौ स्मृतिहतिरिति चेद्विद्धि दत्तोत्तरं तत् सामान्योक्तिर्हि सेयं तत उपरि यथामन्त्रविध्यन्यतोक्तिः ॥ ५१
आम्नातैरैहिकार्थैरविगुणसफलैः शाकुनज्यौतिषाद्यैः पारत्रिक्या प्रवृत्त्याऽप्यतिनिपुणधियामागमाश्वाससिद्धौ ।
शब्दे तस्माच्च बोधे सति परविषये दोषबाधव्यपेते मानं तत्र स्वतोऽसौ न कथमितरथा नैगमाध्वापलापः ॥ ५२
शास्त्रारम्भोपपत्त्यै चतुरधिकरणीषेटिकेयं प्रवृत्ता लक्ष्यस्योक्तं विशेषद्वयमिह घटते वक्ष्यमाणोपजीवि ।
सद्ब्रह्माद्युक्तिवेद्याः पर इति हि वदेत्कारणत्वाधिकारे वक्ष्यत्यस्य द्विलिङ्गाद्यधिकृतिषु पुनस्तादृशानन्दतादीन् ॥ ५३
आत्मन्येवं परस्मिन्नय कृत इति मिते विश्वहेतुत्वलक्ष्ये शास्त्रैकस्थापनीये निरुपधिपरमप्रेमयोग्ये प्रसक्ते ।
ईदृक्त्वं स्याद्यथार्हं प्रकृतिपुरुषयोर्नानुमानाद्ययोग्यौ दुःखास्पृष्टौ च तावित्यथ परकथनं दोषवीति क्रमेण ॥ ५४

इति समन्वयाधिकरणम् ॥ ४ ॥

अधिकरणविषयाः ।

(१) जिज्ञासाधिकरणे—

वृद्धव्यवहारादन्यत्राद्यव्युत्पत्त्यसंभवात्, व्यवहारे च कार्यपरतयैव व्युत्पत्तेः, सर्वशब्दानां कार्यार्थबोधकतया सिद्धवस्तुबोधनासंभवात्—सिद्धरूपे ब्रह्मणि वेदान्तानां प्रामाण्यं नास्तीत्यप्रामाणिकमिदं ब्रह्मविचाररूपं शास्त्रमनारम्भणीयमित्याशङ्क्य, अम्बादिशब्दानामङ्गुलिनिर्देशपूर्वकबहुप्रयोगेण सिद्धव्युत्पत्तिः संभवतीति वृद्धव्यवहारादन्यत्रापि शब्दानामाद्यव्युत्पत्तिसंभवात् 'पिता ते सुखमास्ते' इत्यादिवृद्धव्यवहारे च सिद्धव्युत्पत्तिसंभवात्—शब्दानां सिद्धवस्तुबोधनसामर्थ्यात्—वेदान्तवाक्यानां सिद्धरूपे ब्रह्मणि प्रामाण्यमस्तीति—तद्विचाररूपशास्त्रमारम्भणीयमित्युक्तम् ।

(२) जन्माद्यधिकरणे—

यद्यपि परिनिष्पन्नवस्तुबोधनशक्तिरस्ति, तथापि लक्षणतः प्रतिपन्नस्यैव शब्दबोध्यत्वात्—विशेषणानां विशेष्यभेदकत्वेन जगज्जन्मादीनां विशेषणतया ब्रह्मलक्षणत्वासंभवात्—पूर्वप्रतिपन्नाकारान्तरासंभवेन तेषामुपलक्षणतया तदसंभवाच्च—ब्रह्म न वेदान्तवेद्यमित्याशङ्क्य, अविरुद्धविशेषणानां विशेष्याभेदकत्वेन सार्वज्ञ्यादेः पूर्वप्रतिपन्नाकारान्तरस्य संभवेन च जन्मादीनां विशेषणतया उपलक्षणतया च ब्रह्मलक्षणत्वसंभवेन—ब्रह्म वेदान्तवेद्यमित्युक्तम् ।


(३) शास्त्रयोनित्वाधिकरणे—

यद्यपि ब्रह्म लक्षणतः प्रतिपत्तुं शक्यं, तथापि कारणभूतस्य ब्रह्मणोऽनुमानवेद्यत्वेन प्रमाणान्तरागोचरस्यैव शास्त्रवेद्यत्वेन—ब्रह्म न वेदान्तवेद्यमित्याशङ्क्य सामान्यतो दृष्टानुमानस्य जीवविलक्षणविषयत्वाभावेन—ब्रह्मणः प्रमाणान्तरागोचरत्वेन—ब्रह्म वेदान्तवेद्यमित्युक्तम् ।

(४) समन्वयाधिकरणे—

यद्यपि प्रमाणान्तरागोचरं ब्रह्म, तथापि ब्रह्मणः प्रवृत्तिनिवृत्तिरूपत्वाभावेन प्रयोजनरूपत्वाभावात्—शास्त्रप्रमाणकत्वं न संभवतीत्याशङ्क्य, सिद्धरूपस्याप्यनवधिकातिशयानन्दरूपतया निरतिशयपुरुषार्थत्वात्—ब्रह्मणः शास्त्रप्रमाणकत्वं संभवतीत्युक्तम् ।

इत्यधिकरणविषयाः ।



अधिकरणविषयवाक्यानि—

(१) जिज्ञासाधिकरणे— " "

(२) जन्माद्यधिकरणे—

यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति । (तै. ३।१।१)

(३) शास्त्रयोनित्वाधिकरणे— " "

(४) समन्वयाधिकरणे—

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् । कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः । (ई. ८)

अन्यदेव तद्विदितादथो अविदितादधि । इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे । यद्वाचाऽनभ्युदितं येन वागभ्युद्यते । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते । (के. ३।१।१)

इत्यधिकरणविषयवाक्यानि ।





श्रीनिवासाय नमः ।

श्रीभाष्यम् ।

श्रुतप्रकाशिकायुतम् ।

अखिलभुवनजन्मस्थेमभङ्गादिलीले विनतविविधभूतव्रातरक्षैकदीक्षे ।
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे भवतु मम परस्मिन्शेमुषी भक्तिरूपा ॥ १ ॥

श्रुतप्रकाशिका

यतीन्द्रकृतभाष्यार्था यद्व्याख्यानेन दर्शिताः । वरं सुदर्शनार्यं तं वन्दे कूरकुलाधिपम् ॥
वरदं द्विरदाद्रीशं श्रीनिधिं करुणानिधिम् । शरण्यं शरणं यामि प्रणतार्तिहरं हरिम् ॥ १ ॥
वहिरन्तस्तमश्छेदि ज्योतिर्वन्दे सुदर्शनम् । येनाव्याहतसंकल्पं वस्तु लक्ष्मीधरं विदुः ॥ २ ॥
सम्यङ्न्यायकलापेन महता भारतेन च । उपबृंहितवेदाय नमो व्यासाय विष्णवे ॥ ३ ॥
तस्मै रामानुजार्याय नमः परमयोगिने । यः श्रुतिस्मृतिसूत्राणामनन्तर्ज्वरमशीशमत् ॥ ४ ॥
वन्देहं वैरदार्यं तं वत्साभिजनभूषणम् । भाष्यामृतप्रदानाद्यः संजीवयति मामपि ॥ ५ ॥
प्रपद्ये प्रणवाकारं भाष्यं रङ्गमिवापरम् । परस्य ब्रह्मणो यत्र शेषित्वं स्फुटमीक्ष्यते ॥ ६ ॥
श्रुत्यन्तेषु श्रुतं भाष्ये मतं ध्यातं हृदम्बुजे । लक्ष्मीपतिं प्रपद्येहं दृष्टं श्रीरङ्गधामनि ॥ ७ ॥
प्रमाणं च प्रमेयं च प्रमातारश्च सात्त्विकाः । जयन्तु क्षपितारिष्टं सह सर्वत्र सर्वदा ॥ ८ ॥
अविस्तृताः सुगम्भीरा रामानुजमुनेर्गिरः । दर्शयन्तु प्रसादेन स्वं भावमखिलं दृढम् ॥ ९ ॥
श्रीरङ्गेशाज्ञया लब्धव्याससंज्ञं सुदर्शनम् । वाचाविजयिनः पुत्रं भाष्यभक्तिरचूचुदत् ॥ १० ॥
गुरुभ्योर्थः श्रुतः शब्दैस्तत्प्रयुक्तैश्च योजितः । सौकर्याय बुभुत्सूनां संकलय्य प्रकाश्यते ॥ ११ ॥
कः कृत्स्नं वेत्ति भार्ष्यार्थं श्रुतांशस्थितये कृतिः । आद्यैः काकणिकेवैषा नोपेक्ष्या भाष्यवित्तमैः ॥ १२ ॥
भाष्यं चेद्व्यतृणोत्स्वयं यतिपतिर्व्याख्यानवाचां तथा गाम्भीर्यादनवस्थितिर्मितमतिर्दूरे जनस्तद्गिराम् ।
प्रष्टव्यः कथमीश्वरः स हि न नः प्रत्यक्षरूपो दृशां तद्भाष्यं स च भाष्यकृत्स च हरिः सम्यक्प्रसीदन्तु नः ॥१३॥

सर्वेषां पुरुषाणां प्रमाणाधीनप्रमेयनिश्चयानामुपादित्सितजिहासितेष्टानिष्टतत्साधननानामलौकिकपुरुषार्थतत्साधनरूपे वस्तुनि शब्दैकसमधिगम्ये, तत्राप्यपुरुषशेमुषीदोषमषीमालिन्यस्य वेदाख्याक्षरराशेरेव प्रधानतरप्रमाणतयाऽऽश्रयणीयत्वे सिद्धे, तत्र च पशुपुत्रवृष्ट्यन्नस्वर्गादैहिकामुष्मिकावाचीनफलतत्साधनपरेऽवगते पूर्वभागे, परमपुरुषार्थतत्साधनावबोधके च तदुपरिभागे, पूर्वाचार्याभिमतमुक्तिविघ्नटापथकण्टकायमानविविधकुदृष्टिजनदुर्वचनशतोपष्टुते, तदुपदर्शितकुपथप्रवृत्तिनि जगति च मोमुह्यमाने, तदुज्जिजीवयिषया सदसद्विवेचनचतुरपूर्वाचार्यपरिचितं प्राचीनमेव समीचीनमध्वानं निष्कण्टकीकृत्य परमपुरुषार्थाभ्यर्थिजनसार्थं कृतार्थयितुं भवभयाभितप्तजनभागधेयवैभवभावितावतरणेन परमकारुणिकेन भगवता भाष्यकारेण शारीरकशास्त्रं व्याचिख्यासितम् । परमर्षिप्रणीतानि व्याख्येयानि तेषां च महर्षिप्रणीतानि व्याख्यानानि च सन्ति चेत्तान्येवानुरोद्धव्यानि; नह्यनृषेः सूक्ष्मदर्शित्वम् । ऋषेरभिप्रायमृषिरेव च खतो वेदितुमर्हति न तु जडमतिरितरो जनः ॥ ऋषिवचसामे-

---

१ अयं श्लोकः श्रुतप्रकाशिकाकारविषयो तच्छिष्यैरेतदादावनुसन्धीयते । २ वत्सकुलोद्भवैर्वैरदार्यैं रामानुजार्यशिष्याग्रणीभिरुपन्यस्तभाष्यार्थान्श्रुत्वा प्रकाशितवानिति बोध्यम् । अत एवेयं श्रुतप्रकाशिकेति कथ्यते ।

वाभिन्नवक्तृकाणां मिथो विरोधे पूर्वपक्षाभिप्रायवैभववादादिभिरविरोधो नेयः, भिन्नवक्तृकाणां तु विरोधे दुष्परिहरे युक्तियुक्तं ग्राह्यमिति न दोषः । ये पुनः सन्त्यपि तान्यनादृत्य व्याख्येयान्तराणि व्याख्यानान्तराणि च तद्विरुद्धानि रचयन्ति, तेषामाग्रहगृहीतहृदयत्वे, पण्डितमानित्वे, पाण्डित्यख्यापनपरत्वे च तत्प्रवृत्तिरेव प्रमाणम् । इतरेषां च व्याख्यातृणामार्षव्याख्यानातिलङ्घित्वम्–'उपासात्रैविध्यात्, सर्वत्र प्रसिद्धोपदेशात्, भूमा संप्रसादादध्युपदेशात्, दहर उत्तरेभ्यः' इत्यादिषु स्पष्टतरम्, इह तु वृत्त्यनुसारः प्रतिज्ञातः । नच–तत्प्रतिज्ञानमहृदय–मिति शङ्कनीयं; दुष्परिहरबाधकानुपलम्भात् । यद्यपि कर्ममीमांसायां क्वचित्क्वचिदर्वाचीनैर्व्याख्यातृभिराकुलत्वमापादितं, तथापि तत्र प्रयोगमार्गे स्खलनाभावादनुष्ठानमात्राधीनायाः स्वर्गादिफलसिद्धेर्देवतास्वरूपतद्याथात्म्यसत्कार्यवादादिज्ञानैरपेक्ष्यं, परमपुरुषार्थस्य च ज्ञानैकसाध्यतया ज्ञानमार्गे स्खलनस्यात्महानिफलकत्वेन तद्विपरीतज्ञानानामवश्यपरिहर्तव्यत्वम्, उत्तरभागे च तत्तदर्थोपयिकतया प्रसक्तानां पूर्वभागार्थानां प्रदर्शितयैव दिशानुक्तानामपि शिक्षणीयार्थान्तराणां सुकरनिर्वाहत्वं चाभिप्रेत्य ब्रह्मसूत्राण्येव भगवान् भाष्यकारः प्रारभते विवरीतुम् ॥ **एवं** प्रारिप्सितस्य प्रबन्धस्याविघ्नपरिसमाप्तिप्रचयगमनार्थं स्मृत्याचारसिद्धमिष्टदेवतोपासनरूपं मङ्गलं श्रौतमाचरति—**अखिलेत्यादिना** । 'मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम् । जपतां जुह्वतां चैव विनिपातो न विद्यते' इति हि स्मर्यते, आचर्यते च तत्तत्प्रबन्धृभिः । श्रोतृमनःसमाधानार्थं शास्त्रार्थसंक्षेपश्चार्थतः क्रियते; यथा चोदनासूत्रेण धर्मस्वरूपं प्रमाणं च श्रुत्यर्थाभ्यां निरूपितम् । प्रसिद्धं हि श्रोतुः प्रतिपत्तिसौकर्याय वक्तुरर्थप्रतिपादनस्य संक्षेपपूर्वकत्वम् 'इष्टं हि विदुषां लोके समासव्यासधारण' मिति । शास्त्रार्थसंक्षेपेण वस्तुनिर्देशो, **भवत्वि**त्याशीर्वादश्च कृतौ भवतः१ **विनतेति भक्तिरूपे**ति च ब्रह्मणि प्रह्वीभावावगमात् प्रणतिरपि फलिता; 'णमु प्रह्वत्वे' इति हि धातुः । एवं त्रिविधं मङ्गलमाचरितं भवति ॥ श्लोकस्य प्रथमपादेन पूर्वस्याध्यायद्विकस्यार्थः संक्षिप्तः, द्वितीयेन तूत्तरद्विकस्य । कर्ममीमांसायां प्रतिपाद्यभेदेन षट्कभेदवदत्रापि विषयविषयिरूपप्रतिपाद्यभेदेन द्विकभेदः । शास्त्रप्रतिपाद्यमुपायोपेयात्मकम् । सिद्धोपाय उपेयंच ब्रह्म । साध्योपायो भक्तिः । तत्र सप्तम्यन्तैः पदैः सिद्धोपायरूपमुपेयंच ब्रह्मोच्यते । भवतीति भुवनं कार्यवर्गः । रूढिशक्त्या तत्कारणस्य कुलालादेर्व्यावृत्तिः; भुवनशब्दो हि विपुलतरकार्यविशेषे रूढः । अखिलशब्देन सर्वदेशसर्वकालवर्तीन्यण्डजातानि विवक्षितानि, तेन ब्रह्मादिव्यावृत्तिः । खिलं नास्तीत्यखिलम् । कार्येषु ब्रह्मणः सृष्ट्यादिव्यापाराविषयभूतं न किंचिदस्तीत्यर्थः । अनया व्यतिरेकोक्त्या प्रायिकत्वनिवृत्तिः 'अज्ञातं नास्ति ते किंचि' दितिवत् । अतः सकलमित्यन्वयमुखेनानुक्तिः । **अ**कारोपक्रमत्वसिद्धये निखिलेत्यनुक्तिः । '**अ** इति भगवतो नारायणस्य प्रथमाभिधानं, भगवतो वाचकमकारं प्रयुञ्जानेन किन्नाम मङ्गलं न कृत' मिति चाभियुक्तैरभ्यधायि । अत्र भगवद्वाचित्वाविवक्षायामपि भगवद्वाचकत्वशक्तियोगादकारो माङ्गलिकः; 'अइउण्' इत्यत्राकारवत् । नञो निषेधवाचित्वेपि निषेध्यवशात् शुभत्वाशुभत्वे । अतो 'निष्प्रत्यूहमुपास्महे' इत्यादिनिर्देशस्येव शुभतरत्वं; वैकल्यनिषेधेन पौष्कल्यपरत्वात् । अखिलशब्देन चिदचिद्भेदोऽप्यभिप्रेतः । **जन्म** नित्यनैमित्तिकप्राकृतरूपम् । **स्थेमा** स्थितिः । सा चान्तर्यामिविष्ण्ववतारलोकपालमन्वादिनृपमातापित्रादिमुखेन क्रियमाणा बहुविधा विवक्षिता । **भङ्गः** नित्यनैमित्तिकप्राकृतरूपः । मोक्षस्य लयान्तर्भावेपि शास्त्रस्य परमप्रयोजनत्वादत्र स नान्तर्भावितः । अत एवादिशब्देपि नान्तर्भाव्यः; तस्य साधारणतया स्फुटप्रतिपत्तिहेतुत्वाभावात् । पृथगेव हि पूर्वैश्च स्पष्टतरं निर्दिष्टो मोक्षः—'जगदुद्भवस्थितिप्रणाशसंसारविमोचनादय' इति, 'जगज्जन्मस्थितिध्वंसमहानन्दैकहेतव' इति च । भगवान् भाष्यकारश्च तथा निर्दिशति यथा वेदार्थसङ्ग्रहे–'उद्भवस्थितिप्रलयसंसारनिवर्तनैकहेतुभूत' इति, भाष्ये च 'निखिलजगदुदयविभवविलयमहानन्दैककारण' मिति । **विनते**त्यादिपदेन स्थेमान्तर्भूतस्वर्गादिसांसारिकफलप्रदत्वस्य पृथगुक्तिरनपेक्षिता । असाधारणस्य परमप्रयोजनस्य मोक्षस्यैव हि पृथगुक्त्यपेक्षा । आदिशब्देन सृष्ट्याद्यौपयिकमन्तःप्रवेशनियमनादि गृह्यते । तथा च भाष्ये स्वयमेव वक्ष्यति—'जगदुत्पत्तिस्थितिसंहारान्तःप्रवेशनियमनादिलील'मिति । जन्मस्थेमभङ्गोक्त्यैवान्तःप्रवेशनियमनादेरर्थसिद्धत्वाश्रयणमयुक्तम्; अध्यासपरिणामपक्षयोस्तस्यार्थत्वाभावेन तद्व्यावृत्त्यर्थं स्वमते पृथगवक्तव्यत्वात्, शाब्दत्वे संभवत्यार्थत्वकल्पनायोगात्, विस्तरेणोक्तस्यार्थस्य संक्षेपोक्तौ विवक्षितत्वोपपत्तेश्च । **लीला**शब्देन भगवतः परिपूर्णत्वानन्यप्रेर्यत्वस्वच्छन्दचेष्टितत्वादिकमभिप्रेतम् । यथोक्तं महाभारते–'अप्रमेयोऽनियोज्यश्च यत्र कामगमो वशी । मोदते भगवान्भूतैर्बालः क्रीडनकैरिवे'ति । **अप्रमेयत्वं** परिपूर्णत्वम् । **अनियोज्यत्वम**नितरचेतनप्रेर्यत्वम् । **यत्र कामगम** इत्यनेन वायूदकादिप्रेरणाधीना बुद्धिपूर्वकस्पन्दादिचेष्टाव्यावृत्तिः, स्वेच्छाकृतप्रवृत्तिविघातव्युदासो वा । स्वाधीनलीलोपकरणत्वं वशिशब्दार्थः । विश्वं वशे यस्य स **वशी** । इन्द्रियपराधीनचेष्टाव्यावृत्त्यर्थो वशिशब्दः । **बालक**दृष्टान्तेन लीलायाः प्रयोजनान्तरनैरपेक्ष्यमभिप्रेतम् । अनेन राज्ञां पणबन्धपूर्वकद्यूतादिव्यावृत्तिः । कार्यवर्गापेक्षया भगवन्महिम्नो विपुलतरत्वं **क्रीडनकै**रित्यनेन फलितम् ॥ **ननु** प्रयोजकव्यापारोहि लीला, अतो भङ्गस्य लीलात्वे युक्तेपि कथं प्रयोज्यव्यापारभूतयोर्जन्मस्थित्योर्लीलात्वम्; उच्यते–बहु स्यां प्रजायेये'तिहि श्रुतिः, अतः प्रयोजकव्यापारवत् प्रयोज्यव्यापारस्य च लीलात्वकथनेनोपादानत्वं फलितं, लीलाशब्देन निमित्तत्वं च ॥ **भङ्गादी**त्यन्तेन प्रथमाध्यायार्थः संक्षिप्तः ॥ अवाप्तसमस्तकामस्य व्यापारानुपपत्ति परिहरता **लीला**-

शब्देन विरोधपरिहारपरद्वितीयलक्षणार्थः सूचितः ॥ एवं पूर्वद्विकोक्तं कारणत्वरूपं परत्वं संक्षिप्तम् ॥ तस्यैव समाश्रयणीयता-प्रतिपत्त्यर्थमुत्तरद्विकोक्तमभिगम्यत्वमोक्षप्रदत्वलक्षणं सौलभ्यं संक्षिप्यते—**विनतेत्यादिना** । केवलं परत्वं केवलं सौलभ्यं च कनकाचललोष्टशकलयोरिव न समाश्रयणीयत्वाय कल्पत इति तदुभयव्यावृत्त्यर्थमिदं पदद्वयम् । विशेषेण नताः **विनताः** प्रह्वीभूता न्यासोपासनात्मकाशेषविद्याविशेषनिष्ठाः विवक्षिताः । वैविध्यं च—'तदुपर्यपि बादरायणः संभवात्, ऊर्ध्वरेतस्सु'चे'त्यादिना वक्ष्यमाणदेवत्वमनुष्यत्ववर्णाश्रमादिभेदेन जन्मवृत्तगुणैश्चाभिप्रेतम् । भगवज्ज्ञानेन लब्धसत्ताकत्वं भूतशब्दार्थः; 'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदु'रितिहि श्रुतिः । लब्धस्वरूपाणां च—'तेषामेवानुकम्पार्थमहमज्ञानजं तमः । नाश-यामि'त्यात्मभावस्थः, ददामि बुद्धियोगं तम्, अहं स्मरामि मद्भक्त' मित्याद्युक्तप्रकारेण साक्षात्कारविरोधिनिवर्तनादिकं हि भगवतएव भर इति न स्वरूपप्रच्युतिसंभवः । भूतसंबन्धी व्रातो भूतव्रातः । संश्रितसंबन्धिनोपि तत एव कारणाद् भग-वतो रक्ष्या इत्यभिप्रायः । यथा—'आस्फोटयन्ति पितरः प्रनृत्यन्ति पितामहाः । वैष्णवो नः कुले जातः स नः संतारयि-ष्यती'ति 'पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पद' मिति च । **ननु** षष्ठ्य-न्तनिर्दिष्टानतिरिक्तविषयः समुदायशब्दः, यथा—ब्राह्मणसमाज—इति, नैवं; राजपरिषदित्यादिष्वतिरिक्तस्यापि दर्शनात्, समासान्तर्गतायाः षष्ठ्याः संबन्धमात्रविषयत्वात्, षष्ठ्यन्तनिर्दिष्टानतिरिक्तत्वनियमस्यानुशासनाभावाच्च । समुदायशब्दे श्रुते समुदायिनः के इत्यपेक्षायां संनिहितशब्दवाच्यनिष्ठः समुदायः शीघ्रं प्रतीयत इति ब्राह्मणसमुदाय—इत्यादिष्वनति-रिक्तप्रतीतिः, राजपरिषदित्यादिष्वतिरिक्तस्यापि दर्शनात् तत्तत्समुदायग्राहकप्रमाणानुरोधेनार्थवर्णनं युक्तमिति यथोक्त एवार्थः । एवंच सति व्रातशब्दप्रयोगस्यार्थवत्त्वं स्यात् ॥ इष्टप्रापणपर्यन्तानिष्टनिवारणलक्षणा रक्षा । तस्यामेकदीक्षः प्रधानदीक्षः । **दीक्षा** संकल्पः । स्वसत्तायां अपि संश्रितरक्षासंकल्पनिवर्तनस्यात्यन्ताभिमतत्वं प्राधान्यम्; 'अप्यहं जीवितं जह्या' मिति ह्युक्तम्, 'काममात्मानं भार्यां पुत्रं वोपरुन्ध्यान्न त्वेव दासकर्मकर' मिति चापस्तम्बः । ईदृशीयं स्मृतिर्य-स्याज्ञा तस्यापि तथानुष्ठानस्याभिमततरत्वम् 'अप्यहं जीवितं जह्या' मित्यनेनावगम्यते । दीक्षाप्राधान्येन रक्षाप्राधान्यं फलितम् । दीक्षाशब्देनाश्रितसंरक्षणस्य स्वप्रयोजनत्वं दर्शितम् । व्रतभ्रंशसमात्योरनर्थाभ्युदयफलत्वं हि व्रतिन एव । संश्रितरक्षणं च तद्व्रतं यथा—'ददाम्येतद्व्रतं ममे'ति । **विनतरक्षा**शब्दाभ्यां तृतीयचतुर्थाध्यायार्थौ संक्षिप्तौ । एवं जगत्कार-णत्वमोक्षप्रदत्वे कथिते । एते हि राज्ञश्छत्रचामरवद् ब्रह्मणोऽसाधारणं चिह्नम् । परत्वसौलभ्ये च संश्रयणीयतानिमित्तत्व-यावगते; यथा—'य एनं विदुरमृतास्ते भवन्ती' त्युपक्रम्य 'संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन् देव एक' इति 'सर्वलोकमहेश्वरं, सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छती'ति च । प्रमेयशरीरं साधीयः यदि प्रमाणमुपलभाम-हे—इत्यपेक्षायां द्विकद्वयशेषभूतचतुःसूत्र्यर्थं वदन् प्रमेयानुरूपं प्रमाणं दर्शयति—**श्रुतिशिरस्सि विदीप्त इति** । श्रूयते नित्यमिति श्रुतिः । अनेनापौरुषेयत्वान्निर्दोषत्वं विवक्षितम् । अत एव पूर्वमीमांसान्यायानां प्रामाण्याद्युपयोगिनामत्रोपजी-व्यत्वं सूचितम् । **शिरः**शब्देनानन्यपरत्वं विवक्षितं; परतत्त्वप्रधाना मन्त्रब्राह्मणभागा ह्युपनिषदः । **विदीप्ते** पूर्वभागेपि अग्नीन्द्रादिरूपतया ब्रह्मण एव प्रतिपाद्यत्वं 'तदेवाग्निस्तद्वायु'रित्यादिनोपनिषद्वाक्येनैव ज्ञायत इति विशेषेण दीप्तं विदी-प्तम् । यद्वा—क्षुद्रसुखसाधनभूतदुःखात्मकप्रवृत्तिनिवृत्तिरूपं प्रयोजनं पूर्वभागे दीप्तं,ब्रह्म तु स्वयं निरतिशयानन्दरूपतया पर-मपुरुषार्थभूतमुपरितनभागे विशेषेणदीप्तमिति भावः । अनेन समन्वयाधिकरणार्थः सूचितः, तत्पूर्वाधिकरणत्रयार्थश्चात्र द्योतितो भवति; व्युत्पत्तिलक्षणसौष्ठवाभावे श्रुतिशिरोवेद्यत्वायोगात्, श्रुतिशिरःशब्दस्य प्रमाणान्तरव्यावर्तकत्वाच्च । **ब्रह्म-णी**ति सामान्यपदमौपनिषदानां सद्ब्रह्मात्मादिसामान्यशब्दानां प्रदर्शनार्थं, **श्रीनिवास** इति विशेषपदं नारायणादिविशे-षशब्दानां प्रदर्शनार्थं; 'पशुना यजेत, छागस्य वपाया मेदस' इत्यत्र 'छागो वा मन्त्रवर्णो' दिति सूत्रोक्तन्यायेन पशुशब्दस्य छागशब्दपर्यवसायित्वनिर्णयात् । सामान्यवाचिपदानां विशेषवाचिपदे सति तत्पर्यवसायित्वात्, सद्ब्रह्मात्मादिसामान्यश-ब्दानां नारायण एव विशेषे पर्यवसानं सूचितम् । श्रीनिवासशब्दस्यावयवशक्त्या नित्यविभूतित्वं सूचितम् । रूढिशक्त्या त्रिमूर्तिसाम्यं, तदैक्यं, ब्रह्मणस्तदुत्तीर्णत्वं च निषिद्धम् । ईश्वर एव ब्रह्म, स त्रिमूर्त्यतिरिक्तः सदाशिवः, ब्रह्मादयस्त्रयो-प्यनीश्वरा इति पक्षश्च व्युदस्तः । **परस्मिन्निति** 'परमतः सेतून्माने' त्यधिकरणार्थः सूचितः, तेनोपेयान्तरव्यावृत्तिः; 'ब्रह्मविदाप्नोतिपर' मित्यत्र प्राप्यस्य परशब्देनाभिधानात् । यद्वा कारणत्वशङ्कितदोषव्युदासाय 'न स्थानतोपी' त्यधिकरण-सिद्धं शोधकवाक्योक्तमुभयलिङ्गतया वैलक्षण्यं सूचितम् । अथोपायस्वरूपं वदति—**शेमुषीति** । अयं सामान्यशब्दः, **भक्तिरूपे**ति विशेषशब्दः । अत्रापि 'छागो वा मन्त्रवर्णो' दिति न्यायोऽभिप्रेतः । **शेमुषी**शब्दोपादानेन ज्ञानकर्मसमुच्चय-व्यावृत्तिः । **भक्तिरूपे**ति वाक्यार्थज्ञानव्यावृत्तिः । 'शुद्धभावश्चतो भक्त्या शास्त्राद्वेद्मि जनार्दनम्, भक्त्या त्वनन्यया, ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं चे' त्युक्तप्रकारेण ज्ञानदर्शनप्राप्तिसाधनभूता भक्तिरप्यत्र विवक्षिता; अविशेषेण भक्तिरूपेत्युक्तत्वात् । 'अहमस्म्यपराधानामालय' इत्याद्युक्तप्रकारेण स्वात्मानमनुसन्धायाह—**ममेति** । **भवत्विति** भक्तेरेव स्वादुतमतया

पा०—१ समूह. । २ यदाज्ञा । ३ नमति । ४ पृथिवी । ५ आनन्दतया । ६ अर्थसूचनम् ।

पाराशर्यवचःसुधामुपनिषद्गुग्धाब्धिमध्योद्धृतां संसाराग्निविदीपनव्यपगतप्राणात्मसंजीवनीम्[1] ।
पूर्वाचार्यसुरक्षितां बहुमतिव्याघातदूरस्थितामानीतां तु निजाक्षरैः सुमनसो भौमाः पिबन्त्वन्वहम् ॥२॥

प्रार्थनीयता सूचिता । यद्वा, नहि भक्तिः सर्वेभ्योपि खदत—इत्यत्राह—**ममेति** । **मम** प्रतिबन्धकपापरहितस्य । ज्ञानपित्तस्य हि क्षीरे[2] स्वादुतमताबुद्धिरिति भावः । रक्षैकदीक्षे परस्मिन्नित्यन्तैः सप्तम्यन्तैः पदैरुपेयभूत एव सिद्धोपाय उक्तः, भक्तिरूपेति साध्योपायः ॥ अत्र श्लोके शास्त्रप्रतिपाद्यैकदेशभूतः परपक्षप्रतिक्षेपश्चार्थतः सूचितो भवति;—**जन्मस्थे**-ममङ्गादिशब्देन युगपत्सर्गादिकमनभ्युपगच्छन्तो भाट्टप्राभाकरा व्यावर्तिताः । लीलाशब्देन साक्षिमात्रेश्वरवादिहैरण्यगर्भ-व्युदासः । विनतेत्यादिपदेन जीवानां परस्परं ब्रह्मणा च भेदमनभ्युपयन्तो ब्रह्माज्ञानवादिनोऽपास्ताः । श्रुतिशिरसीत्यनेन वेदवाह्यचार्वाकबौद्धार्हतनिरासः । तेनैव पदेनानुमानिकेश्वरवादिनो व्युदस्ताः । ब्रह्मणीत्यनेनाब्रह्मात्मकप्रधानपरमाणुका-रणवादिसांख्यवैशेषिकादिव्युदासः । श्रीनिवासशब्देन पाशुपतादिव्युदासः । अनेनैवेश्वरोत्तीर्णब्रह्मवादिनो भेदाभेदवादिनो व्युदस्ताः । शेमुषीशब्देन ज्ञानकर्मसमुच्चयोपायवादिव्युदासः । भक्तिरूपेति वाक्यार्थज्ञानमात्रोपायवादिव्युदास इत्येव-मनुसन्धेयम् ॥ १ ॥

श्रुतेरेवोपायोपेयावगतौ सत्यां किं भवतो वक्तव्यमित्यत्राह—**पाराशर्येति** । प्रथमश्लोके स्वप्रबन्धस्य परमप्रयोज-ननया सिद्धरूपः परमविषयो दर्शितः, साध्यरूपं प्रयोजनं च रक्षापदेनातिसंक्षिप्तम् । अथ द्वितीयेन श्लोकेन—स्वप्रबन्ध-स्यावान्तरविषयः, परम्परया ब्रह्मविषयत्वं, स्वप्रबन्धं प्रति सम्यग्ज्ञानस्याव्यवहितावान्तरप्रयोजनत्वं, परम्परया मुक्तेः परमप्रयोजनत्वं, स्वव्याख्येयस्य प्रमाणमूलताकथनेन व्याख्येयान्तराणामप्रमाणमूलता, स्वव्याख्येयविषयभाष्यान्तरव्या-वृत्त्यर्थं स्वोक्तार्थस्य साम्प्रदायिकत्व—मित्यादि श्रौतमुच्यते, स्तुत्यात्मकगुरूपासनरूपमङ्गलाचारश्चार्थतः क्रियते । 'जाय-मानं हि पुरुषं यं पश्येन्मधुसूदनः, तद्विद्धि प्रणिपातेन, ददामि बुद्धियोगं त' मित्यादिभिराचार्योपसत्तेरपि भगवत्कटाक्ष-हेतुकत्वावगमात्, परदेवतोपासनानन्तरभावित्वं गुरूपासनस्य युक्तं; तथा च श्रुतिः—'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ'—इति ॥ पूर्वैरपि तथाचरितं, यथा भगवता वैशम्पायनेन—'नमस्कृत्य हृषीकेशम्, नमो भगवते तस्मै व्या-साय'—इति, तथा च द्रमिडाचार्यैः—'नमः प्रवरगुणैकास्पदाय स्थिरव्रतसकुलबीजकुम्भभूताय भुवनकोशस्य गोप्त्रे ब्रह्मणे नमो जैमिनये वेदरहस्यसंपुटनिगूढविस्फारयित्रे न्यायप्रज्वलितचेतसे नमोस्त्वाचार्येभ्य'—इति । पाश्चात्यैश्च—विशुद्ध-ज्ञानदेहाय, अभिवन्द्य गुरूनादौ' इति 'प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः'—इति च ॥ **पाराशर्य**शब्देन जन्मोत्कर्षः 'सह्येवाच व्यासः पाराशर्य' इति श्रुतिप्रसिद्धः । तस्यैव बादरायणसंज्ञत्वं च विवक्षितम्; यथोक्तं महर्षिणैव—'द्वीपे बद-रिकाभिधे बादरायणमच्युतम् । पराशरात्सत्यवती पुत्रं लेभे परंतप' मिति । यद्यपि, ऋष्यन्तरेपि बादरायणशब्दप्रयोगः, तथापि सूत्रकृद्विषयो बादरायणशब्दः पाराशर्यगोचर एव; तथाच स्कान्दे व्यक्तमुक्तं—'नारायणाद्विनिष्पन्नं ज्ञानं कृतयुगे स्थितम् । किंचित्तदन्यथा जातं त्रेतायां द्वापरे खिलम् ॥ गौतमस्य ऋषेः शापाज्ज्ञाने लज्ञानतां गते । संकीर्णबुद्धयो देवा ब्रह्मरुद्रपुरःसराः ॥ शरण्यं शरणं जग्मुर्नारायणमनामयम् । तैर्विज्ञापितकार्यस्तु भगवान्पुरुषोत्तमः ॥ अवतीर्णो महायोगी सत्यवत्यां पराशरात् । उत्सन्नान्भगवान्वेदानुज्जहार हरिः स्वयम् ॥ चतुर्धा व्यभजत्तांश्च चतुर्विंशतिधा पुनः । शतधा चैकधा चैव तथैव च सहस्रधा ॥ कृष्णो द्वादशधा चैव पुनस्तस्यार्थवित्तये । चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा ॥ अल्पा-क्षरमसन्दिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥ निर्विशेषितसूत्रत्वं ब्रह्मसूत्रस्य चाप्यतः । सविशेषाणि सूत्राणि ह्यपराणि विदो विदुः ॥ मुख्यस्य निर्विशेषेण शब्दोऽन्येषां विशेषतः । इति वेदविदः प्राहुः शब्द-तत्त्वार्थवेदिनः ॥ एवंविधानि सूत्राणि कृत्वा व्यासो महायशाः । ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु । ज्ञानं संस्थाप्य भग-वान्मोदते परमेश्वरः ॥' इत्यादिना ॥ **वचःसुधां** वचःशब्दस्यार्थे तात्पर्यं; यथा—वेदवित् शास्त्रवित्—इत्यादौ वेदा-दिशब्दानाम्; अर्थाभिधायकं हि वाक्यम् । वचसः सुधामिति केचिदाचार्याः । रूपकप्रकरणात् सुधाशब्दलक्षणाभयाच्च सुधेव वच—इति 'उपमितं व्याघ्रादिभि' रित्यादिसमासमपरे आचार्या आद्रियन्ते । सुधाशब्देन भोग्यत्वम-भिप्रेतम् । एवमवान्तरविषय उक्तः ॥ तर्हि—कथं ब्रह्मणो विषयत्वमिति शङ्कायां सद्वारकं ब्रह्मविषयत्वमित्याह—**उप-निषदिति** । ब्रह्मण्युपनिषण्णेत्युपनिषद्; 'उपनिषण्णत्वाद्वोपनिष' दिति हि वाक्यम् । 'गहने हीयं विद्या सन्निविष्टे' ति तद्विषयं द्रमिडभाष्यम् । 'गहने ब्रह्मण्युपनिषण्णे' ति तँद्विषया वामनटीका । अद्वारकभगवत्प्रतिपादकत्वम् उपनि-षण्णत्वम् । दुग्धशब्देन पूर्वभागादप्युपनिषदः सारत्वं विवक्षितं; यथा 'आरण्यकं च वेदेभ्य ओषधीभ्यो यथाऽमृत' मिति । **अब्धि**शब्देन आलोचितानामुपनिषदामानन्त्यादि सूचितम् । **मध्य**शब्देन सर्ववाक्यानां मुख्यार्थापरित्या-गोऽभिप्रेतः; मध्यस्य सर्वपर्यन्तदेशापेक्षया तुल्या ह्यासत्तिः । उद्धृतशब्देनातिनिम्नदेशनिमग्नोद्धरणमप्यभिदधता निःशे-

---

पा०—१ संजीविनीम् । २ क्षीरस्वादु० । ३ ग्रन्थस्य । ४ प्रबन्धस्य । ५ तथोक्तम् । ६ ब्रह्मेन्द्रा० । ७ भाष्य० । ८ ब्रह्मण०

भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः संचिक्षिपुस्तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते ॥

जिज्ञासाधिकरणम् ॥ १ ॥

(१) अथातो ब्रह्मजिज्ञासा ॥ १ ॥

अत्रायमथशब्द आनन्तर्ये भवति, अतःशब्दो वृत्तस्य हेतुभावे; अधीतसाङ्गसशिरस्कवेदस्याधिगतात्पा-

षार्थग्रहणं सूच्यते ॥ **स्व**प्रबन्धस्यावान्तरविषयः पाराशर्यसूत्रं, तस्यावान्तरविषय उपनिषत्, तद्विषयभूतं ब्रह्मेति परम्परया ब्रह्मणः प्रतिपाद्यत्वम् । बादरायणसूत्राणामुपनिषन्मूलकत्वकथनेन सांख्यादिग्रन्थानामप्रमाणमूलत्वात्तदनादरेणैतद्व्याख्यानमिति सूचितम् । प्रणाड्या शास्त्रजन्यं परमप्रयोजनमाह—**संसारेति** । संसाराग्निशब्देन संसारस्य कात्स्न्र्येन तापत्रयरूपता विवक्षिता; यथा—'स्वर्गेऽपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिरि'ति । दीपनशब्देनासंकोचान्सदाभिज्वलनवाचिना विद्यालब्धेः पूर्वं कदाचिदप्यनिर्वाप्यत्वमभिप्रेतम् । 'वेविध्यमाध्यात्मिकादिरूपेण, तेषु त्रिष्वेकैकस्यापि शारीरमानसादिरूपेण च । आत्मनां प्राणः परमात्मा; 'सर्वाणि हवा इमानि भूतानि प्राणमेवाभिसंविशन्ति, कोह्येवान्यात्कः प्राण्या' दित्यादिश्रुतेः । गतशब्देन तदलाभः । उपसर्गाभ्यां तस्यानादित्वं, विविधत्वं च विवक्षितम् । ज्ञानदर्शनप्राप्तिष्वन्यतमस्याप्यभावादलाभस्य वैविध्यम् । **संजीवनीमिति** । जीवनमुज्जीवनं संसारोन्मोचनं, समिति कैवल्यव्यावृत्तिः ॥

अथ सांप्रदायिकत्वमाह—**पूर्वेति** । पूर्वशब्देन **शङ्करा**द्यर्वाचीनव्यावृत्तिः । **सुरक्षिताम्** । नोपदेशमात्रेण ग्रन्थरूपेण चेति भावः । पूर्वाचार्यग्रन्थैरर्थस्वरूपं प्रतिपन्नं चेत् किं भवतः कृत्स्नमित्यत्राह—**बहुमतीति** । बह्वयो मतयो बहूनां मतयो वा तासां परस्परव्याघातेन, ताभिः समीचीनार्थव्याघातेन च अर्वाचीनजनैर्दुरवगाहत्वमाह—**दूरस्थितामिति** । न यथावदप्रतीतिमात्रमन्यथा च प्रतिपत्तिरासीदिति भावः । सूत्राद्यवान्तरविषयस्य विषयी स्वग्रन्थ इति न पूर्व कण्ठोक्तं, तदाह—**आनीतामिति** । सुधापक्षे **निजाक्षरै**रर्गाद्यवयवभूतैरमृताक्षरैरिति यावत्; अतो ममाक्षरैरित्यनुक्तिः । **सुमनसः** 'सारासारविवेकज्ञा' इत्याद्युक्ताः । अनेनासदपरिग्रहो न दोषायेत्युक्तं भवति । देवादीनां वृत्तिकारग्रन्थादिभिः सुगमत्वात् भौम इत्युक्तम् । **पिबन्त्वन्वहमिति** । रसतातिशयात्र तृप्तिकरीति भावः । **फलान्तराङ्गवत्प्राप्त्युपाय एव हि स्वादुतमः; यथोक्त—'क्व नाकपृष्ठगमनं पुनरावृत्तिलक्षणम् । क्व जपो वासुदेवेति मुक्तिबीजमनुत्तम'** मिति । यद्वा, गभीरत्वादन्वहं शीलनीयेति भावः ॥ २ ॥

तर्हि पुरातनग्रन्था एव वाचयितव्याः किमपूर्वग्रन्थनिर्माणतत्प्रवर्तनयत्नगौरवेणेति शङ्कायामाह—**भगवदिति** । भगवच्छब्देन शङ्करादिभ्योप्यासप्तमत्वमभिप्रेतम् । **बोधायन**ग्रहणेन पूर्वाचार्यशब्दोप्यर्थाद्विवृतः । **विस्तीर्णां संचिक्षिपु**रित्यनेन वृत्त्यादीनामत्रत्येष्वयतनजनेष्वकार्यकरत्वं सूचितम् । बोधायनेन ह्यतिविस्तीर्णा वृत्तिः कृता, द्रमिडभाष्यकारादयोहि परपक्षप्रतिक्षेपाद्यनादरेणातिसंक्षिप्तान्ग्रन्थानरचयन्, अतिविस्तीर्णातिसंकुचितग्रन्थानां साफल्यमायुष्मद्बुद्धिमज्जनप्रचुरेषु देशकालान्तरेष्वेव भवति, नहीदानीन्तनपुरुषाणां सर्वेषां शतायुष्ट्वं यावज्जीवं ग्रन्थपरिश्रमः सहजधीविशेषाश्च सन्ति, तस्मात्परमतनिरासाद्यर्थमनतिविस्तरतया सुग्रहत्वार्थं च सूत्रं व्याख्यातव्यमिति यावत् ॥ **तन्मतानुसारेण** नतु स्वोत्प्रेक्षितमतान्तरेण । **सूत्राक्षराणि** सूत्रपदानां प्रकृतिप्रत्ययविभागानुगुणं वदामः । न तु स्वोत्प्रेक्षितार्थे सूत्राणि यथाकथंचिद्योजयितव्यानीति भावः । **व्याख्यास्यन्ते** व्याङ्भ्यामुपसर्गाभ्यामपेक्षितविस्तरानपेक्षितसंक्षेपौ द्योतितौ ॥ नतु 'सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदु' रितिहि भाष्यलक्षणम्, अतः सूत्रव्याख्यानरूपत्वाभावादखिलेत्यादिकं न भाष्यान्तर्भावीति चेन्न; सूत्रतात्पर्यार्थपरत्वाद्भाष्यान्तर्भाव्येव । सूत्रतात्पर्यार्थपरत्वं च श्लोकव्याख्याने स्पष्टम् । किंच मङ्गलाचरणं प्रारिप्सितग्रन्थाविघ्नपरिसमाप्त्याद्यर्थतया तदुपयोगीति तदन्तर्भाव्येव । शाबरशाङ्करादिभाष्येषु नमस्कारादर्शनादत्र नमस्कारकथनमयुक्तमिति चेन्न; 'नमः प्रवरगुणैकास्पदाये' ति द्रमिडभाष्ये देवतागुरुनमस्कारश्रवणात् शाबरशाङ्करयोस्त्वीश्वरानभ्युपगमात्, जीवब्रह्मभेदानभ्युपगमाच्च नमस्यानादरः; अत्र तु सिद्धान्तानुरूप्यान्नमस्यात्यन्तोपपन्ना । शाङ्करग्रन्थोपक्रमे च व्याख्यातृभिर्नमस्काराद्यभावात्कुग्रन्थत्वमाशङ्क्य युष्मदस्मदित्यादिग्रन्थे प्रत्यगर्थानुसंधानेनार्थान्मङ्गलाचारः कृत इति परिहृतम् ॥

जिज्ञासाधिकरणम् ॥ १ ॥

अथातो ब्रह्मजिज्ञासा ॥ १ ॥ पूर्व पदानि व्याचिख्यासुः प्रथममथशब्दं व्याचष्टे—**अत्रायमथशब्द आनन्तर्ये भवतीति । 'पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना । आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षण'मिति**

हि व्याख्यानप्रकारः । **ननु**—नैता**वथातः**शब्दौ व्याख्येयौ प्रयोजनाभावात् । अज्ञानसंशयविपर्ययनिवृत्त्यर्थं हि व्याख्यानं, न तावदज्ञानम्: आनन्तर्ये प्रकृतस्य हेतुभावे च तयोः प्रसिद्धत्वात् । नापि संशयः; अर्थान्तरेषु सत्स्वपि तयोरुक्तार्थ-**परत्वेन** प्रसिद्धिप्राचुर्यात् । नहि गोशब्दं शृण्वतः सास्नादिमति संशयो जायते । अतएव विपर्ययोपि दूरोत्सारित—इति ॥ **अत्र ब्रूमः—आनन्तर्य-वृत्तहेतुभाव**परत्वनिर्णयस्य पूर्ववृत्तविशेषावगमसापेक्षत्वात्, तदप्रतीत्या प्रसिद्धिप्राचुर्यस्य सापवादत्वात्, **अथ**शब्दस्या**धिकारादिषु**, तच्छब्दस्य **चैतदुक्तं भवती**त्यादिषु वक्ष्यमाणेर्थे, **तस्ये**श्च सर्वविभक्त्यर्थ-**वाचिन इत** इत्यादिषु पञ्चम्यर्थव्यतिरिक्तेर्थे च प्रयोगदर्शनात्, संशयविपर्ययौ स्यातामिति—तन्निरासाया**थातः**शब्दव्या-**ख्यानं युक्त**मित्यतस्तौ व्याख्यायेते । अत्र तावद्—**अथ**शब्दस्याधिकारार्थत्वमयुक्तम्; अधिकारोहि प्रस्तावः, ब्रह्मजिज्ञासा **प्रस्तूयत** इति वचनं मन्दप्रयोजनः प्रारभ्यत इत्युक्तिं विनापि प्रारम्भादेव प्रारभ्यमाणत्वावगमात् । उच्यमानं हि वचनं ब्रवीमीत्युक्तिमन्तरेणापि संनिहितपुरुषेणोच्यत इत्येवावगम्यते, न तु नोच्यत इति । प्रस्तोतव्यत्वमुच्यत इति-चेन्; तदानीमपि न्यायप्रतिपादकस्य सूत्रस्योपदेशाज्ञापनपरत्वाभावाद्युक्तितः प्रारम्भयोग्येत्यर्थः स्यात्, योग्यत्वमशा-**ब्दम् ॥ ननु**—अध्याहारेण योजना स्यात्, आनन्तर्यपक्षेपि कर्तव्येति ह्यध्याहर्तव्यमिति चेन्न; अधिकारार्थत्वपक्षेऽध्या-**हृतस्यापि पदस्यान्वय**दौर्घट्यात् । यथा **च**योग्येत्युक्ते समुच्चेतुं योग्येत्यर्थो न शक्याभिधानः, एव**मथ**योग्येत्युक्तेप्यधिकर्तुं योग्येत्यभिधानं हि न शक्यम् । अतएव हि महाभाष्ये—**'शब्दानुशासनं शास्त्रमधिकृतं वेदितव्य'** मित्युक्तं, नत्व-धिकर्तुं योग्यमिति । अधिकृतमित्यपि फलितार्थकथनं नतु वाचनिकोक्तिः; चादीनां द्योतकत्वात् । अत्रत्वधिकृतमित्यर्थपर-त्वे वैयर्थ्यमुक्तम्, । शब्दानुशासनोपक्रमे त्वधिकारार्थत्वमगत्याश्रितम् । नह्युपनीतेन वेदमधीयानेनाध्येतव्यस्य तदङ्गभूतस्य व्याकरणस्यासाधारणो वृत्तविशेषः संभवति । इहतु प्रयोजनवदर्थान्तरसंभवादधिकारार्थत्वाश्रयणमयुक्तम् । आनन्तर्यपरत्वे **प्रयोजनवत्त्वं** च वक्ष्यते । मङ्गलं तु नाऽथशब्दवाच्यम्, अपि तु शङ्खस्वनादिवच्छ्रूयमाणोथशब्दो मङ्गलावह इत्योङ्कारस्ये-वार्थान्तरपरत्वेपि मङ्गलं सिद्धमिति । ओङ्कारतुल्यो ह्यथशब्दः स्मर्यते—**ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभा'** विति ॥ मङ्गलवाचित्वाभ्युपगमेऽपि **मङ्गलरूपा ब्रह्मजिज्ञा**सेति **ब्रह्मजिज्ञासा स्तुता स्यात्**, ततश्च सूत्रस्यार्थवादता स्यात्, न तु न्यायनिबन्धनत्वम् ॥ जिज्ञासाविशेषणत्वाभावे मङ्गलं भवतीति **वाक्यभेदः** स्यात् । प्रकृतादर्थादर्थान्तरपरत्वं चायुक्तम्; तद्धि प्रकृतमपेक्ष्य वक्ष्यमाणस्यार्थान्तरत्वज्ञापनं, तच्च कल्पान्तरो-पन्यासविवक्षायामेव दृष्टं, अत्रतु कल्पान्तरोपन्यासाभावात्तदनुपपन्नम् ॥ प्रश्नपरत्वमप्ययुक्तम्; वचनव्यक्तेः प्रश्नप्रतिवच-**ननरूपत्वाभावात्** । तंदा हि—**किं ब्रह्मजिज्ञासा कर्तव्ये**त्युक्तं स्यात्, सा कर्तव्येति वाक्यान्तरेण प्रतिवचनं स्यात्; न च प्रतिवचनरूपं वाक्यान्तरमुपलभ्यते ॥ **अथ**शब्दस्य **कात्स्न्र्य**परत्वे—**कात्स्न्र्येन सा कर्तव्ये**त्यर्थः स्यात्, सोऽनुपपन्नः; **एकदेशकर्तव्यतायाः** शङ्कितत्वाभावात् । कर्तव्यतामात्रं हि संशयपदं तन्निरासार्थं च **सूत्रम्** ॥ **किंच**—अधिकाराद्यर्थान्त-**रपरत्वमतः**शब्दान्वयोऽपि निवारयति; **अतः**शब्दो हि प्रकृतमर्थं हेतुतया परामृश**न्नथ**शब्दोपस्थापितं **ब्रह्मजिज्ञासा-**पदं सामर्थ्याक्षिप्तं परामृशति । तत्र **यद्यथ**शब्दोपस्थापित**मधिकृतत्वं** हेतुतया परामृशेत्, तदा अधिकृतत्वादधिकर्तव्ये-ति हेतोः साध्याविशिष्टत्वं स्यात्; मङ्गलस्यानभिधेयतया न पदान्तरपरामर्शयोग्यता ॥ वाच्यत्वाभ्युपगमेऽपि **तस्य च प्रकृतापेक्षत्वस्य** च **कात्स्न्र्यस्य** च पूर्वपक्षयुक्तिप्रत्यनीकत्वाभावात् तानि न हेतुतया परामर्शनीयानि । न ह्यमङ्गल-**त्वप्रकृतानपेक्षत्वाकात्स्न्र्यैः** पूर्वपक्षोत्थानम् ॥ नयसूत्राणि च विरुद्धार्थव्युदसनपराणि । प्रश्नवाक्यगत**प्रश्नस्तु** तस्मिन्नेव वाक्ये हेतुतया परामर्शनर्ह एव; **किं ब्रह्मजिज्ञासा कर्तव्ये**ति वाक्येऽपरिसमाप्ते कथं किंशब्दार्थो हेतुतया **परामृश्येत** । अतोऽतः**शब्दपरामर्शयोग्यार्थश्चे**द्**थ**शब्दोभ्युपगम्यते, तदाधिकारार्थत्वं न घटते । यदि—ब्रह्मजिज्ञासा-पदसामर्थ्याक्षिप्तस्य पूर्ववृत्तत्वेन तत्तद्व्याख्यात्रभिमतस्य वस्तुनोतःशब्देन परामर्शे इष्येत तदानीं जिज्ञासानुपयोगिनस्त-**दाक्षेप्यत्वा**योगात् उपयोग्यर्थ एव तदाक्षेप्य—इति तत्परामर्शिनातःशब्देन जिज्ञासोपयोगितया तत्पूर्वभाव्यर्थविशेषो-**पस्थापना**दथशब्दस्वारसिकानन्तर्यपरत्वे संभवत्यस्वरसविफलार्थान्तरस्वीकारो न घटते । ततश्चातःशब्दवत् ब्रह्मजिज्ञासा-पदसामर्थ्यमप्यधिकारार्थपरत्वनिवारकं स्यात् ॥ एवमर्थान्तराणामनुपपन्नतामर्थतो दर्शयन्नानन्तर्यार्थत्वमथशब्दस्यो-पपादयति—**अत्रेति । अथ**शब्द आनन्तर्य इति प्रतिज्ञा, तदुपपादक**मत्रायं भवती**ति पदत्रयं तत्र **भवतीति** पदेन आनन्तर्ये स्वारस्यं सूच्यते । स्वारस्यापवादिकां पूर्ववृत्ताप्रतिपत्तिं परिहरति—**अत्रेति । अत्र** वेदस्योत्तरभागविचारू-**पब्रह्ममीमांसारम्भसूत्र** इत्यर्थः । ब्रह्मजिज्ञासापदसामर्थ्यात् पूर्वभागविचारूपवृत्तविशेष आक्षिप्त इत्यभिप्रायः । हेत्वन्तर-मभिप्रयन्नाह—**अयमिति** । अयमथशब्दः— 'अथ शब्दानुशासनं, अथ योगानुशासन' मित्यादिसूत्रान्तर्गताथशब्दव्या-वृत्त इत्यर्थः । अतःशब्दशिरस्क इत्युक्तं भवति । वेदान्तसारे ह्ययमर्थः कण्ठोक्तः । प्रकृतपरामर्शि**नातः**शब्देन पूर्ववृत्त-

---

पा०—१ तथाहि ।२ अनःशब्दः शिरसि अग्रे यस्य स तथा । अत्र सूत्रे 'अथातः' इत्यत्रानाङ्क्वत्यथशब्दोऽतःशब्दशिरस्कः ।

स्थिरफलकेवलकर्मज्ञानतया संजातमोक्षाभिलाषस्यानन्तस्थिरफलब्रह्मजिज्ञासा ह्यनन्तरभाविनी । ब्रह्मणो

मभिहितमित्यभिप्रायः । एवं समभिव्याहृतोभयपदस्वारस्यात्, सामान्यतोऽभिहितं विशेषत आक्षिप्त च पूर्ववृत्तं सिद्धम्—इति वृत्तविशेषाप्रतिपत्तिरूपस्य स्वारस्यापवादकस्याभावादथशब्द आनन्तर्यार्थ एवेति वाक्यार्थः । एवमथशब्दस्योत्तरभागविचारारम्भसूत्रगतत्वम्, अतःशब्दशिरस्कत्वम्, आनन्तर्ये स्वारस्यं च दर्शयद्भिः आनन्तर्योपपादकै-**रत्रायं भवती**ति पदैरेवास्मिन् सूत्रे अर्थान्तराणां गत्यन्ताभावस्वीकार्याणामनादरणीयत्वं फलितम् ॥

अतःशब्दं व्याचष्टे–**अतःशब्दो वृत्तस्य हेतुभाव इति** । वृत्तस्येति प्रकृत्यर्थ उक्तः, हेतुभाव इति प्रत्ययार्थः । इयं प्रतिज्ञा, **अत्रायं भवती**त्यनुषक्तं पदत्रयमुपपादकम् । प्रकृतिप्रत्यययोरुक्तार्थपरत्वेन प्रसिद्धिप्राचुर्यं भवतिना दर्शितम् । अत्रेत्यस्य पूर्ववदर्थः । अनेन वृत्तविशेषस्तस्य हेतुभावार्हत्वं चाक्षिप्तम् । तदर्हत्वं च अनन्तरमेव व्यक्तं भविष्यति । **अयम्** आनन्तर्यस्वरसाथशब्दपूर्वकः । अनेन वृत्तसामान्यमाक्षिप्तम् । नन्वथशब्दार्थनिर्णयोऽतःशब्दार्थनिर्णयसापेक्षः, अतःशब्दार्थनिर्णयश्चाथशब्दार्थनिर्णयसापेक्ष—इत्यन्योन्याश्रयः । नैवम्; अथशब्दस्यानन्तर्ये स्वारस्यं हि नातःशब्दार्थनिर्णयमापेक्षं, अतःशब्दस्य वृत्तहेतुभावपरत्वस्वारस्यं च नाथशब्दार्थनिर्णयमापेक्षम् । अथशब्द आनन्तर्यपरः; स्वस्वारस्यात्, समभिव्याहृतपदान्तरस्वारस्याच्च । अतःशब्दोपि वृत्तस्य हेतुभावपरः; स्वस्वारस्यात्, समभिव्याहृतपदान्तरस्वारस्याच्च–इति **भवत्ययं**शब्दाभ्यां दर्शितं भवति । इमे चाभ्युच्चययुक्तीः; **अत्र**पदाभिप्रेतब्रह्मजिज्ञासापदसामर्थ्यादेव पदद्वयस्योक्तार्थपरत्वसिद्धेः । अतः स्वपरपदस्वारस्यात्, ब्रह्मजिज्ञासापदसामर्थ्याच्चाथातःशब्दौ यथोक्तार्थपराविति न दोषः । अथातःशब्दयोरन्यतरेणालमिति चेन्न; अथशब्दस्यानन्तरकालमुपस्थापयतो वर्तिष्यमाणब्रह्मजिज्ञासाविशेषणतया अतःशब्दस्य वृत्तहेतुभावपरतया चापर्यायत्वात्, प्रतिज्ञाहेतुरूपेण पदयोर्भिन्नप्रयोजनत्वाच्च । ब्रह्मजिज्ञासा कर्तव्येतिहि प्रतिज्ञेति चेन्न; ब्रह्मजिज्ञासेति धर्मिनिर्देशः, अर्थेति साध्यधर्मोक्तिः । न कर्तव्यतामात्रं साध्यधर्मः अपित्वानन्तर्यविशिष्टकर्तव्यत्वम् ॥ एवमथातःपदयोः प्रतिज्ञाहेत्वर्थत्वेन विभागो 'ऽथातो धर्मजिज्ञासे' त्यत्रापि समानः । एवमर्थभेदस्याविवक्षितत्वेन हि 'अथ योगानुशासनम्, अथ शब्दानुशासन' मित्यादिष्वतःशब्दस्याप्रयोगः । ननु ब्रह्मजिज्ञासापदसामर्थ्याक्षिप्ततया बुद्धिस्थस्य कर्मविचारस्य हेतुभावोऽतःशब्दावगन्तव्य इति किमथशब्देन, नैवम्—आनन्तर्योक्तिमुखेन तस्य हेतोः शास्त्रान्तरश्रवणव्यवधाननैरपेक्ष्यद्योतनार्थत्वादथशब्दस्य, ततश्च वेदान्तश्रवणात्पूर्वं शास्त्रान्तरश्रवणेन विना संपादयितुमशक्यत्वात्, शास्त्रान्तराणां चानवसरग्रस्तत्वाच्च, शास्त्रान्तरसापेक्षाणां नित्यानित्यवस्तुविवेकादीनां पूर्ववृत्तत्वव्युदासः फलितः स्यात् । **ननु**—न यत्किंचिदतीतं पूर्ववृत्तत्वेन वक्तव्यम्; अतिप्रसङ्गात्, अतो वर्तिष्यमाणोपयुक्तमेव पूर्ववृत्तमथशब्दोपस्थापितमिति तस्य हेतुत्वमपि शास्त्रान्तरश्रवणनैरपेक्ष्यवत्तैनैव वस्तुसामर्थ्येन सिद्धमिति किमतःशब्देन—नैवम्; अथशब्दाक्षिप्तहेत्वभिद्धिशङ्कापरिहारार्थत्वादतःशब्दस्य । हेतुश्च विशिष्टः, तस्य विशेषणांशविशेष्यांशयोरसिद्धिशङ्कातत्परिहारप्रकारौ सूत्रकाराभिप्रेतौ परस्ताद्दर्शयिष्येते—इति प्रयोजनवत्तरं पदद्वयम् ॥

अत्रेतिपदसूचितब्रह्मजिज्ञासापदसामर्थ्यसिद्धं वृत्तं वर्तिष्यमाणं तयोर्हेतुहेतुमद्भावं च विवृण्वन् उक्तमानन्तर्यमुपपादयति—**अधीतेति** । कर्मज्ञानशब्देन वृत्तमुक्तम् । ब्रह्मजिज्ञासापदेन वर्तिष्यमाणमुक्तम् । अल्पास्थिरफलानन्तस्थिरफलशब्दाभ्यां हेतुहेतुमद्भावो दर्शितः । केवलशब्देन ब्रह्मज्ञानपूर्वककर्मव्यावृत्तिः । कर्मज्ञानस्यैव पूर्ववृत्तत्वं कथम्, अनन्तस्थिरफलापातप्रतीतिश्च कथम्—इति शङ्कायामधीतेत्यादिपदेन तदुपपादनम् । सशिरस्कवेदशब्देन कृत्स्नाध्ययनस्य विवक्षितत्वं, व्याख्यानपौर्वापर्यहेतुभूतव्याख्येयपौर्वापर्यनियमो, भागद्वयस्यैकप्रबन्धत्वं च–सूच्यते । साङ्गशब्देनानन्तस्थिरफलापातप्रतीतिजनकत्वहेतुर्दर्शितः । 'कृष्णपक्षे तथाङ्गानि, उपनीय तु यः शिष्यं वेदमध्यापयेद्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षत' इत्यादिवचनान्यधीतसाङ्गसशिरस्कवेदस्येत्यत्राभिप्रेतानि । एवमधीतेत्यादिषष्ठ्यन्तविशेषणद्वयेन ब्रह्मजिज्ञासापदसामर्थ्यानुगृहीताथातःशब्दोपस्थापितोऽधिकारविशेषः प्रदर्शितो भवति; समधिगतकर्मा सांसारिकफलनिर्विण्णोऽनन्तस्थिरफलाकाङ्क्षी हि शास्त्रमधिकरोति । **अनन्तस्थिरफलब्रह्मजिज्ञासेति** । अनन्तस्थिरफलरूपस्य ब्रह्मणो जिज्ञासेत्यर्थः । अनन्तस्थिरफलत्वस्य जिज्ञासाविशेषणत्वे जिज्ञासायास्तथात्वमागमोत्थविवेकादिजन्यज्ञानद्वारेणेति द्रष्टव्यम् । अनन्तरभाविनीतिपदेनाथातःशब्दफलितं हेतोः शास्त्रान्तरनैरपेक्ष्यं विवक्षितम् । कर्मविचारानन्तरं ब्रह्मविचारस्य कर्तव्यत्वे कर्मणामल्पास्थिरफलत्वनिर्णयसहितानन्तस्थिरफलापातप्रतीतिः—इत्यर्थं विशिष्टो हेतुः; अतःशब्देन वृत्तस्य कर्मविचारस्य हेतुतयोक्तत्वात्, कर्मविचारस्य साङ्गाध्ययनजन्यानन्तस्थिरफलापातप्रतीतिपूर्वत्वात्, आवृत्तिविधानादिभिः कर्मणामल्पास्थिरफलत्वावगमहेतुत्वाच्च । अयं विशिष्टो हेतुः अधिगताल्पास्थिरफलकेवलकर्मज्ञानतया संजातमोक्षाभिलाषस्येत्यनेनोक्तः । अत्राधिगतेति पदेन कर्मणः फलद्वारा हानाय ज्ञातव्यत्वं कण्ठोक्तम् । स्वरूपे-

---

पा०–१ आनन्तर्य० ।

जिज्ञासा **ब्रह्मजिज्ञासा** । ब्रह्मण इति कर्मणि षष्ठी; " **कर्तृकर्मणोः कृति**" (पा. सू. २।३।६५) इति विशेषविधानात् । यद्यपि, संबन्धसामान्यपरिग्रहेपि जिज्ञासायाः कर्मापेक्षत्वेन कर्मार्थत्वसिद्धिः, तथापि आक्षेपतः प्राप्तादाभिधानिकस्यैव ग्राह्यत्वात्कर्मणि षष्ठी गृह्यते । न च—'**प्रतिपदविधाना षष्ठी न**

णोपादानाय ज्ञातव्यत्वमपि कर्मविचारपूर्ववृत्तत्वे हेतुः; अपेक्षितकर्मस्वरूपज्ञानं, केवलकर्मणामल्पास्थिरफलत्वज्ञानं च कर्ममीमांसाऽवसेयमिति हि वक्ष्यते । तत्र स्वरूपेणोपादेयताप्रतीतिरनन्तस्थिरफलापातप्रतीत्यन्तभूता; उपायतदितिकर्तव्यताविशेषैः सहैव ह्यनन्तस्थिरफलापातप्रतीतिः—इति विशिष्टहेत्वन्तर्भावः, उपरितनग्रन्थाविरोधश्च ॥ ननु—कर्मविचारो ब्रह्मविचारस्य निरपेक्षहेतुश्चेत् कृतकर्मविचारैः सर्वैरपि ब्रह्म विचार्येत—इति स्वर्गार्थकर्मानुष्ठात्रभावप्रसङ्गः । मैवम्; अश्रुतमीमांसत्वेऽप्युपाध्यायादिवचनाद्येऽनुतिष्ठन्ति तेषां स्वर्गार्थानुष्ठानाविरोधात्, श्रुत्वापि ये स्वर्गार्थिनस्तेषामदृष्टवैगुण्यात्, असमीचीनव्याख्यानश्रवणमूलस्यामुमुक्षुत्वस्य संभवाच्च । साङ्गाध्ययनं कर्मविचारपूर्ववृत्तं चेदधीतसाङ्गवेदैः सर्वैरपि कर्म विचार्येत, न च तथा क्रियते; वेदेऽधीतेऽप्यश्रुतकर्ममीमांसा हि बहवो दृश्यन्ते । तेषां कर्मविचारानधिगतिरदृष्टदेशकालादिवैगुण्यान्न तु साङ्गाध्ययनस्य पूर्ववृत्तत्वाभावादिति चेत्; तदिहापि तुल्यम् । तथा—साधनचतुष्टयादिलाभेप्यनधिगतब्रह्मविचारानेकपुरुषदर्शनात् साधनचतुष्टयादेर्ब्रह्मविचारं प्रति नियमेन हेतुत्वं कथम्—इति परिचोदिते तत्पूर्ववृत्तत्वादिभिरप्यदृष्टादिवैगुण्यादोष इतिपरिहर्तव्यं, तदिहापि तुल्यं, दुष्परिहरदूषणान्तरसद्भावस्तेषां वैषम्यम् । तस्मात्—घटनिष्पत्तेः कुलालादिवद्ब्रह्मविचारस्य कर्मविचारः पूर्वभावित्वेन नियतः, दृष्टादृष्टप्रतिबन्धकविरहितस्य पुंसः समीचीनः कर्मविचारो ब्रह्मविचारसामग्रीति न कश्चिद्दोषः । एवं**मथातः**शब्दार्थो निरूपितः ॥

(अथ **ब्रह्मजिज्ञासा**पदार्थं विवक्षुस्तदैकपद्यस्य समासनिबन्धनत्वात्प्रथमं समासार्थं निरूपयति—**ब्रह्मण इत्यादिना** । कर्मत्वकरणत्वादिसंबन्धविशेषेष्विनरा विभक्तयः 'कर्मणि द्वितीये' त्यादिभिः सूत्रैर्विहिताः, 'षष्ठी शेष' इति सूत्रेण संबन्धसामान्ये षष्ठी विहिता, अत्र तस्याः सामान्यविषयत्वमाशङ्क्य कर्मविषयत्वं निश्चीयते । तत्र सामान्येन समासस्यानेकविभक्तिसाधारणत्वाद्विभक्त्यन्तरशङ्काव्यावृत्त्यर्थमिह तेषामनुपपत्तिमभिप्रयन्पदं विगृह्णाति—**ब्रह्मणो जिज्ञासेति** । चतुर्थीपरिग्रहे प्रयोजनत्वसिद्धावपि प्रकृतिविकारभावाभावे चतुर्थीसमासायोगात्तदपरिग्रहः । सप्तमीति योगविभागाद्ब्रह्मणि जिज्ञासेति समासेऽपि ब्रह्मणो विषयत्वमात्रं स्यात्, न तु प्रयोजनत्वम्—इति सप्तम्यपरिग्रहः । 'शङ्कुलया खण्ड' इतिवत् तृतीयासमासे विषयत्वप्रयोजनत्वे न सिध्यत इत्यभिप्रायः । ब्रह्मण इति शब्दरूपस्य षष्ठीपञ्चमीसाधारण्यात् षष्ठ्यास्तानेकार्थत्वात्तन्निर्णयार्थमाह—**ब्रह्मण इतीति** । कुत इत्यत्राह—**कर्तृकर्मणोरिति** । षष्ठ्याः कर्तृकर्मसाधारण्येपि जिज्ञासाकर्तृत्वं तापत्रयातुरस्यैव, ब्रह्मणस्तु कर्मत्वमित्यभिप्रायेण **ब्रह्मण इति कर्मणि षष्ठी**त्युक्तम् । कर्मणिषष्ठीस्वीकारे ब्रह्मणो विषयत्वप्रयोजनत्वे सिध्येताम्) । **ननु** तर्हि कथं यद्यपीत्यादेः संबन्धसामान्यपरिग्रहशङ्काविषयस्य भाष्यस्योत्थानं युज्यते; उच्यते—संबन्धसामान्यस्वीकारेपि जिज्ञासापदसामर्थ्याद्ब्रह्मणः कर्मत्वसिद्धेः, परम्परया संबन्धिनामुपायोपासकप्रतिबन्धादीनामपि जिज्ञास्यत्वसिद्धेः, प्रतिपदविहितषष्ठ्याः समासनिषेधाच्च । तत्र सामर्थ्यात्—षष्ठ्याः कर्मार्थत्वसिद्धिं, ब्रह्मानुबन्धिनामपि जिज्ञास्यत्वसिद्धिं च शङ्कते—**यद्यपीति** । संबन्धसामान्यपरिग्रह इत्यत्र परिणा ब्रह्मानुबन्धिनामपि जिज्ञास्यत्वसिद्धिः सूच्यते; परितो ग्रहणेन हि परितः स्थितानामपि ग्राह्यत्वं लभ्यते । अतएव ह्युत्तरत्र गृह्यत इत्युक्तं न तु परिगृह्यत—इति तदुभयं परिहरति—**तथापीति** । अत्रायमर्थः—प्रधानस्य ब्रह्मणोऽप्रधानानामन्येषां च कर्मत्वस्याक्षेपसिद्धत्वादपि प्रधानकर्मत्वस्याभिधानिकत्वम्, इतरेषां प्रधानसंबन्धादाकाङ्क्षावशाच्च कर्मत्वस्य सामर्थ्यसिद्धत्वं च स्वीकर्तुं युक्तम्—इति । अतः प्रतिपदविहिता षष्ठी ग्राह्या; विलम्बितधीहेतोः शीघ्रधीहेतुर्बलीयानिति न्यायात् । षष्ठ्याः संबन्धसामान्यविवक्षायां हि कर्मत्वधीर्विलम्बिता स्यात्, कृद्योगषष्ठीविवक्षायां तु शीघ्रभाविनी ॥ ननु कर्तृकर्मणोरुभयोरप्यर्थयोः सूत्रप्रतिपन्नत्वाद्विलम्बिता कर्मधीः—इति चेन्न; कर्तुर्जिज्ञासोरधिगतकर्मणः प्रतिपन्नत्वात्कर्मार्थत्वमेवहि प्रथमतरं धियमधिरोहेत् । समासनिषेधमाशङ्क्य परिहरति—**नचेति** । चः शङ्कासमुच्चये । प्रतिप्रसवोऽपवादापवादः—'सर्पिषो ज्ञान' मित्यादिप्रयोगेषु 'ज्ञो विदर्थस्य करण' इति सूत्रविहितायां षष्ठ्यां समासनिषेधस्य सावकाशत्वं; सर्पिषा प्रवृत्तिरिति हि तस्य वाक्यस्यार्थः । यद्यपि ज्ञानपदं कृदन्तं, तथापि सर्पिष इति षष्ठी न कृद्योगविहिता, 'सर्पिषो जानीत' इति तिङन्तपदान्वयार्हत्वाद्, धात्वोर्विभक्तेश्च प्रवृत्तितत्करणार्थत्वाच्च । नहि तत्सर्वं कृद्योगविहितत्वे सिध्यति । अतो नात्र प्रतिप्रसवप्राप्तिरिति निषेधस्य सावकाशत्वम् ॥ ननु नेयं षष्ठी व्याख्येया; अप्रयुक्तत्वात्, सूत्रे प्रयुक्त एवहि शब्दोऽर्थबोधकः, न त्वप्रयुक्तः; बोधकशब्द एव हि व्याख्येयः, अप्रयुक्तापि स्मृता विभक्तिर्बोधिकेति सा व्याख्येया इति—चेन्न; तत्स्मरणेन विनाप्यर्थप्रतिपत्तेः, अर्थप्रतिपत्तिश्च प्रातिपदिकेन लक्षणया, लक्षणा च योग्यतादिना, अतोनुशासनेन तद्व्याख्यानमयुक्तम्;

समस्यते' (अष्टा. २।२।१०। वा.) इति कर्मणि षष्ठ्याः समासनिषेधः शङ्कनीयः; **'कृद्योगा षष्ठी समस्यते'** (अष्टा. २।२।८। वा.) इति प्रतिप्रसवसंभवात्। ब्रह्मशब्देन स्वभावतो निरस्तनिखिलदोषोऽनवधिकातिशयासंख्येयकल्याणगुणगणः पुरुषोत्तमोऽभिधीयते । सर्वत्र बृहत्त्वगुणयोगेन हि

उच्यते—अप्रयुक्तविभक्त्यर्थस्य प्रातिपदिकेन लक्षणा हि समासः, अत्र लक्ष्यार्थोपलक्षणतया विभक्तिरनुप्रविष्टा, अतो लक्ष्यार्थविशेषनिर्णयाय विग्रहवाक्यस्था षष्ठी व्याख्येया। तर्हि नानुशासनेन सा व्याख्येया, लाक्षणिकार्थोहि योग्यतादिनावसीयते, नहि गङ्गायां घोष इत्यत्रानुशासनबलात्कूलं लक्ष्यते, अपि तु योग्यत्वादिनैव–इति मैवं; सर्वासु लक्षणासु योग्यतादिनैवार्थनिर्णयनियमाभावात्। सतु नियमः प्रातिपदिकेन प्रातिपदिकान्तरार्थलक्षणायां, प्रातिपदिकेन विभक्त्यर्थलक्षणायां त्वेनद्विभक्त्यर्थो लक्ष्यः न विभक्त्यन्तरार्थ इतिहि नियमो भवति, स च शब्दानुशासनार्धीन इति तदनुरोधेन तन्निरूपणं युक्तम्। तत्र संबन्धसामान्यं लक्षयित्वा तेन कर्मत्वस्याक्षेपादपि प्रथमत एव कर्मत्वस्यैव लक्षणा शब्दानुशासनानुमता युक्ता । अतः समस्तपदलक्ष्यार्थविशेषनिर्णयायानुशासनानुरोधेन लक्ष्यार्थोपलक्षणभूता विग्रहवाक्यस्था षष्ठी व्याख्येयेति ॥ यद्वा, लुप्तविभक्तिकशब्देन विभक्त्यर्थबोधनं मुख्यं स्यात्, संबन्धिनो हि लक्षणा दृष्टा न संबन्धमात्रस्य, विभक्त्यर्थश्च स्वयं संबन्धरूपः। न च संबन्धस्य संबन्धान्तरानपेक्षत्वेन स्वस्मिन् संबन्धिकार्यकरत्वाल्लक्षणा संभवति—इति वाच्यं: संबन्धस्य स्वपरनिर्वाहकत्वानभिज्ञानामपि विभक्त्यर्थप्रतीतेः, नहि संबन्धः स्वमत्तया लक्षणाहेतुः किन्तु ज्ञायमानतयैव, न चेदतिप्रसङ्गात् ॥ एवं लक्षणानुपपत्त्या प्रयोगस्यान्यथासिद्धत्वात्समस्तशब्देन विभक्त्यर्थबोधनं मुख्यम्, असुख्यत्वेपि वा का नः क्षतिः। **ननु** विग्रहवाक्येपि कथं कर्मत्वमभिधानिकं, प्रयुज्यमानापि ह्युपपदविभक्तिर्निरर्थिका, तद्विधानं ' दाराः कलत्र'मितिवत्प्रयोगसाधुत्वाय, अर्थस्त्वर्थसामार्थ्यादाक्षिप्तः। अतएवहि कारकविभक्तेरुपपदविभक्तिर्दौर्बल्यं, समासे ल्यप्रयुक्ताया उपपदविभक्तेः कथन्तरां कर्माभिधायकत्वमिति;उच्यते–आभिधानिकैत्ववत् कृदन्तपदप्रयोगेण शीघ्रधीविषयत्वसाम्यादाभिधानिकत्वोक्तिः, पदान्तरश्रवणापेक्षामात्रान्नाक्षेपादिवद्विलम्बाधिक्यं, सामान्यषष्ठीपक्षे संबन्धसामान्यं प्रतिपद्य जिज्ञासाशब्दार्थगतसकर्मकत्वस्वभावालोचनयाऽर्थविशेषावगमादपि कृदन्तश्रवणमात्रभुवः कर्मत्वधियः शीघ्रत्वात् इति —कश्चित्परिहारः। 'कर्मणि द्वितीया' इतिवत् 'कर्तृकर्मणोः कृति' इति सप्तम्यन्तनिर्दिष्टयोः कर्तृकर्मणोरभिधेयत्वमनुशासनस्वारस्यानुगुणमिति भाष्यकाराभिप्रेतः परिहार–इति संप्रदायः। कारकविभक्तेरुपपदविभक्तिवैपम्यं पदान्तरयोगविहितत्वरूपमस्त्वेव ॥ न च पदान्तरयोगावगम्यत्वमाभिधानिकत्वविरोधि; तस्यकचिन्मुख्यार्थव्यवस्थापकत्वदृष्टेः। यथा—आदित्यस्य गावः प्रकाशयन्ति–इत्यादिषु। नहि तत्रादित्यादिपदान्तरयोगेन गोशब्दस्य किरणपरत्वं लाक्षणिकम् ॥ पदान्तरपरामर्शसापेक्षत्वेन विलम्बितधीहेतुरुपपदविभक्तिः, कारकविभक्तिस्तु तन्निरपेक्षत्वाच्छीघ्रधीहेतुरिति प्रावल्यदौर्बल्यविभाग एव, न तु सार्थकत्वनिरर्थकत्वाभ्यां वैषम्यम्। विभक्त्यश्रवणादमुख्यत्वं तु परिहृतम् ॥ एवं समासान्तर्गतविभक्त्यर्थे निरूपिते समस्तयोः पदयोः प्रथमं ब्रह्मशब्दं व्याचष्टे–**ब्रह्मशब्देन च इति।** ब्रह्मशब्दस्य प्रधानाद्यवर्चीनार्थान्तरेषु प्रयोगदर्शनात्, इतरव्याख्यातृभिरीश्वरातिरिक्तवस्तुपरत्वेन व्याख्यातत्वाद्देवतान्तरपरत्वस्य कैश्चिदभ्युपगमाच्च तद्व्यावृत्त्यर्थं **ब्रह्मशब्देन पुरुषोत्तमोऽभिधीयत** इति प्रतिजानीते। पुरुषोत्तमशब्दस्य रूढ्या ब्रह्मशब्दस्य देवतान्तरपरत्वव्युदासः। अवयवशक्त्या बद्धमुक्तावस्थचेतनवैलक्षण्यमुक्तम्। खेतरवैलक्षण्यमात्रं तृणादेरप्यस्तीति तद्व्यावृत्त्यर्थं **स्वभावत** इत्यादिना विशेषणद्वयेन तद्वैलक्षण्यं विशिनष्टि। इदंच **विशेषणद्वयं** शब्दशक्तेः, अर्थसामर्थ्याच्च ब्रह्मशब्दस्य पुरुषोत्तमपरत्वप्रतिपादनोपयोगितयोक्तं, न तु प्रवृत्तिनिमित्ततयाः गुणतोपि बृहत्त्वे सति शब्दशक्त्यसंकोचसिद्धेः, मुमुक्षोरशेषदोषनिवृत्तिनिरतिशयानन्दप्राप्तिहेतुत्वाच्च। वाग्यन्तरोक्तस्याविद्यादिदोषान्वयस्य, निर्गुणत्वस्य च व्यावृत्त्यर्थम्, उपाध्युपहितब्रह्मस्वरूपस्यैव कर्मवश्यत्वदुःखित्वादिव्यावृत्त्यर्थ, ज्ञानादिशक्तियोग एवास्य स्वाभाविकः सार्वज्ञ्यनिरतिशयानन्दादियोगस्तु कादाचित्क—इति मतस्य च व्यावृत्त्यर्थमिदं **विशेषणद्वयमुक्तम्**। निरस्तकतिपयदोषत्वं, निरस्तनिखिलदोषत्वं च केषांचिद् बद्धानां, मुक्तानां, नित्यानामप्यस्तीति तद्व्यावृत्त्यर्थ **स्वभावतो निरस्तनिखिलदोष** इत्युक्तः नित्यसिद्धानामपि भगवन्नित्यसंकल्पाधीनं हि नित्यनिर्दोषत्वम्। **स्वभावत** इत्युत्तरत्रानुषङ्गः तेन गुणानामप्यविद्याकल्पितत्वपक्षव्यावृत्तिः। 'ते ये शतम्' इत्यत्र पूर्वपूर्वगुणेभ्य उत्तरोत्तरगुणानामतिशयः सावधिरिति तद्व्यावृत्त्यर्थ**मनवधिकातिशय**शब्दः; तत्र हि ब्रह्मगुणातिशयस्य वाङ्मनसागोचरतयाऽनवधिकत्वमुक्तं, सत्यसंकल्पत्वान्तर्भूता वशित्वादिगुणा इति हि वक्ष्यते। अतः कस्मिंश्चिद्गुणे तद्विधाभेदरूपतया गुणानां बहूनामन्तर्भावाभिप्रायो **गण**शब्दः। **नन्वनवधिकातिशयशब्दस्य** गुणविशेषणत्वे गणशब्दसामानाधिकरण्याभावाद् बहुव्रीहिर्न स्यात्, गणविशेषणत्वमप्ययुक्तं; गुणस्वरूपस्य ह्यनवधिकातिशयत्वं न तु गणस्वरूपस्य।—नैवम्; गण एव विशेष्य

---

१ °सङ्गावात्। २ °क्तेर्दौर्बल्यं। ३ इति चेत्। ४ °कवत्। ५ प्रतिपाद्यं। ६ °गतत्वात्। ७ नित्या ... बद्धा ...।

ब्रह्मशब्दः। बृहत्त्वं च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सोऽस्य मुख्योऽर्थः। सच सर्वेश्वर एव। अतो ब्रह्मशब्दस्तत्रैव मुख्यवृत्तः॥ तस्मादन्यत्र तद्गुणलेशयोगादौपचारिकः; अनेकार्थकल्पना-

---

इति बहुव्रीहिसिद्धिः, तथाप्यर्थवशाद्गुणान्तर्भूतैकैकगुणव्यक्तेरनवधिकातिशयत्वं फलितं स्यात्। यथा-'एषा परिषदमिजनवती श्रुतशीलशालिनी' इत्यत्र श्रुतशीलादीनां परिषद्विशेषणत्वे प्रतीतेपि तदन्तर्भूतानामेव श्रुताद्यन्वयः, ननु समूहस्य; ततो निर्गतानां श्रुताद्यभावप्रसङ्गात्॥ असंख्येयत्वमपि गणविशेषणं युक्तं, गणासंख्येयत्वे गुणासंख्येयत्वं कैमुत्यसिद्धम्। **अनवधिकातिशय**शब्देन नित्यसिद्धव्यावृत्तिश्च; तद्गुणानां जगद्व्यापाराननुगुणत्वेन भगवद्गुणापेक्षया सातिशयत्वात्, तेषामीश्वरतद्गुणविभूतिसाक्षात्कारस्यात्यन्तानुकूलस्य निरवधिकातिशयत्वेपि तादृशासंख्येयगुणाभावात्तद्व्यावृत्तिः। अनुषक्तेन **स्वभावत** इति पदेन वा नित्यसिद्धव्यावृत्तिः। तेषां तादृशगुणकत्वं हि भगवन्नित्येच्छाधीनम्। स्वरूपेणानवधिकातिशयत्वाभावाच्च नित्यसिद्धव्यावृत्तिः; ते ह्यणुस्वरूपाः। अत्र स्वरूपस्याप्यनवधिकातिशयत्वं गर्भितम्; विभुत्वस्यापि गुणान्तर्भावात्, 'बृहत्त्वं च स्वरूपेण गुणैश्चे'त्युपपादकग्रन्थोक्तेः। **अभिधीयते** मुख्यवृत्त्या बोध्यते। अस्मिन् ग्रन्थे 'येनाक्षरं पुरुषं वेद सत्य'मिति श्रुतिश्चैतन्मूत्रार्थानुवादिन्यनुसंहिता भवति। तत्र हि 'प्रोवाच तां तत्त्वतो ब्रह्मविद्या'मिति पुरुषपर्यायतया ब्रह्मशब्दः प्रयुक्तः। एवं प्रतिज्ञातार्थं शब्दसामर्थ्यात् प्रथममुपपादयति-**सर्वत्रेत्यादिना।** तत्रार्थान्तरेषु ब्रह्मशब्दप्रयोगस्यान्यथासिद्धिं विवक्षुस्तदुपयुक्तं गुणयोगं दर्शयति-**सर्वत्रेति। सर्वत्र** ब्रह्मशब्दप्रयोगविषयेषु सर्वेषु। बृहत्त्वगुणयोगोस्तीत्यर्थः। पुरुषोत्तमे गौणत्वमन्यत्र मुख्यत्वं च किन्न स्यादित्यत्राह—**बृहत्त्वं चेति।** बृहत्त्वगुणमात्रयोगिषु सर्वेषु ब्रह्मशब्दप्रयोगाभावात् स्वरूपतो गुणतश्चानवधिकातिशयबृहत्त्वं प्रवृत्तिनिमित्तमित्यर्थः। **ननु** 'बृहति बृंहयति तस्मादुच्यते परं ब्रह्म, बृहत्वाद्बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयत' इति श्रुतिस्मृतिभ्यां बृहत्त्वे बृंहणत्वे च प्रवृत्तिनिमित्ततयावगते कथमिह बृहत्त्वमात्रं निमित्तमुच्यते, गुणतो बृहत्त्वे बृंहणत्वस्यान्तर्गतत्वादिति; ब्रूमः—'स चानन्त्याय कल्पत' इति गुणतो श्रुतिप्रसिद्धसकलसंकोचनिवृत्तिपूर्वकनिरवधिकज्ञानविकासरूपानन्त्यावहत्वं हि बृंहणत्वं, तद्धि सकलहेयप्रत्यनीकत्वलक्षान्तिकारुण्यादिमोक्षप्रदत्वौपयिकगुणगणवत्त्वम्, अतएवहि **'स्वभावतो निरस्तनिखिलदोष'** इत्यादिकं प्रतिज्ञावाक्येऽभिहितम्। **ननु** स्वरूपतो बृहत्त्वमेव निमित्तमस्तु किं गौरवेणेति—चेन्न; ब्रह्मगुणादेरपि स्वरूपेण बृहत्त्वाद्ब्रह्मशब्दवाच्यत्वप्रसङ्गात्। तर्हि गुणतो बृहत्त्वमेवास्तु निमित्तमिति चेन्न; शब्दशक्तेरसंकोचस्य स्वतः प्राप्तत्वात्, स्वरूपेण च बृहत्त्वसद्भावात्, 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति हि श्रुतिः। गुणतोबृहत्त्वनाम सद्भारकबृहत्त्वं; गुणद्वाराहि तत्। स्वरूपेण गुणैश्च निरतिशयबृहत्त्ववद्वस्तु पुरुषोत्तमादन्यदपि स्यात् अन्यदेव वा स्यादित्यत्राह—**स चेति।** चः शङ्कानिवृत्तौ। सर्वेश्वरशब्देनैवकारेण च 'तमीश्वराणां परमं महेश्वरम्, न तत्समश्चाभ्यधिकश्च दृश्यत' इति वाक्ययुगलार्थो विवक्षितः। ततः किमित्यत्राह—**अत इति। अतः** अनवधिकातिशयबृहति ब्रह्मशब्दस्य मुख्यत्वात्। सर्वेश्वरस्यैव तादृशबृहत्त्वगुणयोगित्वाच्चेत्यर्थः। कथं तत्रैव मुख्यवृत्तः, अन्यत्रापि ब्रह्मशब्दः प्रयुज्यत इत्यत्राह—**तस्मादिति। तस्मात्** ब्रह्मणः। सर्वत्र मुख्यः कुतो न स्यादित्यत्राह—**अनेकार्थेति।** परब्रह्मणोन्यत्र प्रयोगस्यान्यथासिद्धत्वान्न तत्र शक्तिकल्पनम्; 'अनन्यथासिद्धः प्रयोगः शक्तिं कल्पयती'ति न्यायादित्यर्थः। अनेकशक्तिकल्पनं गौणत्वं वा न स्यात्, बृहत्त्वगुणयोगिसर्वव्यक्तिष्वेकैयैव शक्त्या मुख्यत्वसंभवादित्यत्राह—**भगवच्छब्दवदिति।** तथाच श्रीमति वैष्णवे पुराणे भगवच्छब्दं प्रकृत्योक्तं—'तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः। शब्दोयं नोपचारेण अन्यत्र ह्युपचारत' इति अनेन प्रस्तुतचोद्यस्य कः परिहार उक्तो भवति; उच्यते—बृहतिधातोर्मनिन्प्रत्ययान्ततवेन निष्पन्नस्य ब्रह्मशब्दस्य प्रधानादिषु दृश्यमानः प्रयोगो नावयवशक्तिनिबन्धनः, तथा हि सति बृहन्महच्छब्दादिवदापेक्षिकबृहत्त्वयोगिषु सर्ववस्तुषु प्रयोगः स्यान्न च तथा प्रयुज्यते, त्रसरेणुमपिहि तत्तोणिष्ठतयाऽभिमतद्रव्यान्तरापेक्षया महिमगुणशालीति वदन्ति। नच त्र्यणुकादिषु ब्रह्मशब्दप्रयोगः; एवं सर्वत्र प्रयोगादर्शनात्। पङ्कजशब्दव्यवस्थापककुमुदादिव्यावृत्ततामरसानुवृत्तपद्मत्वजातिवद्ब्रह्मशब्दप्रयोगविषये पद्मषव्यक्त्यनुवृत्तान्यव्यावृत्ताकारादर्शनादनेकशक्तिकल्पने प्राप्ते, अनन्यथासिद्धस्य प्रयोगस्य शक्तिकल्पकब्रह्मशब्दप्रयोगविषयेष्वन्येषु च बृहत्त्वगुणलेशयोगेन प्रयोगस्यान्यथासिद्धत्वाच्च नानेकशक्तिकल्पनं युक्तम्। तस्मात्पुरुषोत्तम एव प्रवृत्तिनिमित्तपौष्कल्यवति मुख्यत्वम् अन्यत्रौपचारिकत्वं च। 'औपचारिकस्तु प्रयोगः संकोचसह इष्टः, ननु सार्वत्रिक' इति तन्निमं न्यायमभिप्रेत्य भगवच्छब्दस्य पुरुषोत्तम एव मुख्यत्वमन्यत्रामुख्यत्वं च भगवता पराशरेणोक्तम्। तथाहि ज्ञानादिमात्रं वा, निरङ्कुशज्ञानादिकं वा भगवच्छब्दप्रवृत्तिनिमित्तम्। आद्ये पिपीलिकादावपि भगवच्छब्दः प्रयुज्येत। द्वितीये तु सर्वत्र निरवधिकज्ञानाद्यभावात् प्रवृत्तिनिमित्तासिद्धेरनेकशक्त्या सर्वत्र मुख्यत्वम्। अनेकशक्तिकल्पनं चायुक्तं; प्रयोगान्यथासिद्धेरिति भगवत्पराशराभिप्रायः॥

ननु 'उत्पत्तिं प्रलयं चैव भूतानामगतिं गतिम्। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिती'ति ग्रन्थोक्तेष्वौपचारिकभग-

---

१ कुतश्चीनाम्। २ °वत्वाच। ३ अतः। ४ उच्यते बृहत्त्वे।

योगात्—भगवच्छब्दवत्। तापत्रयातुरैरमृतत्वाय स एव जिज्ञास्यः। अतः सर्वेश्वरो जिज्ञासाकर्मभूतं ब्रह्म॥ ज्ञातुमिच्छा-जिज्ञासा। इच्छायाः इष्यमाणप्रधानत्वात् इष्यमाणं ज्ञानमिह विधीयते॥

वच्छब्दप्रयोगयोग्येषु यदलौकिकार्थसाक्षात्कारित्वमस्ति तदेव प्रवृत्तिनिमित्तीकृत्य भगवच्छब्दः सर्वत्र मुख्यः स्यात्—नैवम्; अलौकिकार्थसाक्षात्करणमात्रस्य प्रयोगाविषयव्यावृत्तलाभावात्। न हि समाधिपर्यन्तयोगकाष्ठानिष्ठेषु केशिध्वज-खाण्डिक्य-प्रह्लादादिषु भगवच्छब्दः प्रयुज्यते। किंच प्रत्यक्षमूलव्युत्पत्त्या गवादिशब्दानामिवागममूलव्युत्पत्त्या समग्रषाड्गुण्यादिमत्त्वेव तस्य मुख्यत्वावगमात् 'ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः। भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभि'रिति निर्दोषत्वपर्यन्तानां ज्ञानादीनां प्रवृत्तिनिमित्ततया वाच्यत्वमुच्यते, निर्दोषत्वं च निमित्ततया वाच्यत्वेनोच्यतेः अन्यथा तदुक्तिवैयर्थ्यात्। न ह्यवाच्यं सर्वं निषेद्धव्यम्: अनुक्त्यैव ह्यवाच्यत्वं सिद्ध्यति। **नच** ज्ञानशक्त्यादिष्वेकैकस्य प्रवृत्तिनिमित्तत्वं, किंतु ज्ञानादिसमुदायस्यैवः अन्यथा—अशेषत इति पदवैयर्थ्यात्। ऐश्वर्यस्य समग्रस्येत्युक्तत्वात्, गवादिष्वतिप्रसङ्गभयाच्च प्रकर्षविशेषवतां ज्ञानादीनां समुदायस्यैव प्रवृत्तिनिमित्तत्वमुक्तमित्यभ्युपेयम्। एवं न्यायसिद्धार्थस्यागमनिर्द्धोर्थो भाष्ये दृष्टान्तीकृतः 'भगवच्छब्दवदि'ति। तथाच भगवता पाराशर्येण—'परं जैमिनिर्मुख्यत्वात्, स्याच्चैकस्य ब्रह्मशब्दव'दित्यादिसूत्रेषु ब्रह्मगतस्य भगवत्त्वेव मुख्यत्वमुत्तरत्रोक्तम्। अतो यथोक्त एवार्थः। तथाच स्पष्टीकृतं श्रीमति गारुडे पुराणे—'वेदे भूरिप्रयोगाच्च गुणयोगाच्च शार्ङ्गिणि। तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने' इत्यारभ्य—'यस्मिन्प्रयुज्यमाने तु गुणयोगः सुपुष्कलः। तत्रैव मुख्यवृत्तीयमन्यत्र ह्युपचारत' इति। एवं शब्दसामर्थ्यमुपपादितम्। **अथ** ब्रह्मशब्दस्यानेकार्थमुख्यवृत्तत्वेयेतत्सूत्रस्थस्य तस्यार्थस्याभाव्यात्पुरुषोत्तमपरत्वमुच्यते—**तापत्रयातुरैरिति। स एवामृतत्वाय**इति पदैः 'तमेवं विद्वानमृत इह भवति, नान्यः पन्था' इत्यादिश्रुत्यर्थो विवक्षितः: अतएव हि पुरुषोत्तमोऽभिधीयते इत्युक्तम्। श्रुतेरपि पूर्वोक्तहेयप्रत्यनीकत्वकल्याणगुणाकरत्वविशिष्ट एव तापत्रयातुरैरुपास्यः, ननु तेष्वन्यतम इति भावः। नहि कारागारनिगलित एव तन्मोचनार्थिभिरभ्यर्थनीयः। तथा च वैष्णवे पुराणे निर्दोषकल्याणगुणाकरस्यैव मुमुक्षूपास्यत्वमुक्तं—'स सर्वभूतप्रकृति विकारान्, समस्तकल्याणगुणात्मकोसा'वित्यादिना 'तज्ज्ञानमज्ञानमतोन्यदुक्त'मित्यन्तेन॥ ब्रह्मशब्दव्याख्यां निगमयति—**अत इति**। निर्दोषमङ्गलगुणकस्य सर्वेश्वरस्यैव तापत्रयातुर्जिज्ञास्यत्वादत्र तापत्रयातुरजिज्ञास्यतयोक्तं **ब्रह्म** सर्वेश्वर एवेत्यर्थः। यद्वा, **अतः** उक्तशब्दसामर्थ्यात्, अर्थसामर्थ्याच्चेत्यर्थः॥

ननु ब्रह्मशब्दो व्युत्पन्नोऽव्युत्पन्नो वा भगवति मुख्यः, अव्युत्पन्नत्वे बोधकत्वविरहिणस्तस्य न क्वचिन्मुख्यत्वम्। नापि व्युत्पन्नः स मुख्यः: अलौकिकेर्थे व्युत्पत्त्यसंभवात्। कथमप्रतीते व्यवहाराविषये बुद्धिपूर्विका वाऽच्छिकी च व्युत्पत्तिः संभवति; उच्यते—यथा कामिनीचन्दनभवनादिषु प्रयोगेण सुखविषयतया व्युत्पन्नस्य स्वर्गशब्दस्य 'यस्मिन्नोष्ण'मित्यादर्थवादपदसमभिव्याहारेण लौकिकसुखविशेषविषयतया व्युत्पत्तिः। यथा लोके क्वचिदव्युत्पन्नत्वेपि यूपाहवनीयस्फ्यकपालचषालचात्वालादिशब्दानां वाक्यान्तरपदान्तरसमभिव्याहारात्तत्तदर्थविषयतया व्युत्पत्तिः एवं ब्रह्मात्मेश्वरादिशब्दानां च लोके केषुचिदर्थेषु प्रयोगाद् व्युत्पत्तौ सत्यामसत्यामपि 'यतो वा इमानि भूतानि जायन्ते, सत्यं ज्ञानमनन्तं ब्रह्मे'त्यादिप्रसिद्धार्थवाक्यान्तरपदान्तरसमभिव्याहारादलौकिकपरमात्मविषयत्वव्युत्पत्तिरुपपद्यते। अतो ब्रह्मशब्दस्योक्तरीत्या भगवत्येव मुख्यत्वं युक्तम्॥

अथ जिज्ञासाशब्दस्य व्याख्येयत्वस्फोरणाय प्रकृतिप्रत्ययविभागं दर्शयति—**ज्ञातुमिच्छा जिज्ञासेति**। विषयवैलक्षण्याधीनाया इच्छायाः कथं विधेयत्वमित्यत्राह—**इच्छाया इति**। ज्ञानस्य विधानार्हतामाह—**इष्यमाणप्रधानत्वादिति**। सन्वाच्याया इच्छाया धात्वर्थः कर्म, कर्मणश्च क्रिया शेषभूताः तत्सिद्ध्यर्थत्वात्तस्याः, यथा यागीयव्रीह्यादेः प्रोक्षणादिः। कर्तुः क्रियया आप्तुमिष्टतमत्वं हि कर्मत्वम्, अतः प्रकृत्यर्थभूतज्ञानकर्मिकेच्छा तत्सिद्ध्यर्था। अत इच्छाया इष्यमाणज्ञानप्रधानत्वाद् इष्यमाणं ज्ञानं विधेयमित्यर्थः। जिज्ञासायाः कर्तव्यत्वे प्रतीयमाने कथं ज्ञानस्य विधेयत्वम्; उच्यते—यथा 'स्नात्वा भुञ्जीत, प्राङ्मुखो भुञ्जीते'त्यत्र भुजिधातोर्विधिप्रत्ययान्तत्वाद् भोजनस्य कर्तव्यत्वे प्रतीतेपि स्नानप्राङ्मुखत्वनियमयोरेव विधेस्तात्पर्यमित्यर्थस्वभावाद्भ्युपगम्यते, तयोरप्राप्तत्वात्। अप्राप्ते हि शास्त्रमर्थवत्। तत्र भोजनं चान्यतः प्राप्तमनूद्यते, एवमिच्छाया विधेयत्वासंभवात् तद्विषयभूतं विचारात्मकं ज्ञानमेव तात्पर्यतो विधीयते। 'इष्यमाणं ज्ञानमिहाभिप्रेत' मिति हि सारेऽभिहितम्। सन्नन्तनिर्देशश्च 'निदिध्यासितव्यः, विजिज्ञासितव्यः, तद्विजिज्ञासस्वे'त्यादिश्रुत्यनुसारेण क्रियते। श्रुतिश्च उपायदशाप्रभृति भगवज्ज्ञानस्य प्रीतिरूपत्वेन इच्छाविषयत्वात्तथा निर्दिशति। यद्वा, 'ब्रह्मजिज्ञासे'ति सन्नन्तनिर्देशो विचारस्य रागप्राप्तत्वज्ञापनार्थः। एवमेव धर्मजिज्ञासेत्यत्रापि। अत्र तर्करूपं ज्ञानं विधेयं, तर्कानुगृहीतवाक्यजन्यप्रमितिरूपज्ञानं तु फलत्वान्न विधेयम्। प्रमितिरूपं विधेयं, तर्करूपं ज्ञानमार्थमित्यपि परैरुक्तम्। अन्तर्णीतं विचारमाक्षिपतीति ततोपि प्रागुक्तपक्षः साधीयान्। वेदान्तार्थविचारात्मकन्यायनिबन्धरूपं तु शास्त्रं ब्रह्ममीमांसेति प्रसिद्धिः, प्रमितिश्च फलम्। अतएव हि **ब्रह्मविचारः कर्तव्य** इति भाष्ये वक्ष्यते। सन्नन्तस्यास्य ज्ञाधातोर्ज्ञानसामान्यवाचिनो विशेषाकाङ्क्षायां

मीमांसापूर्वभागज्ञातस्य कर्मणोऽल्पास्थिरफलत्वात्, उपरितनभागावसेयस्य ब्रह्मज्ञानस्यानन्ताक्षयफलत्वाच्च पूर्ववृत्तात्कर्मज्ञानादनन्तरं तत एव हेतोः ब्रह्म ज्ञातव्यमित्युक्तं भवति। तदाह वृत्तिकारः—**'वृत्तात्कर्माधिगमादनन्तरं ब्रह्मविविदिषा'** (बो. वृ.) इति। वक्ष्यति च कर्मब्रह्ममीमांसयोरैकशास्त्र्यं—

समुच्चिनविशेषपर्यवसानं हि न्याय्यम्। ब्रह्मणो जिज्ञासा कर्तव्या न तु कपिलसुगताद्यभिमतानां प्रधानादितत्त्वानामिति ज्ञातव्यविशेषनिर्णयपरमिदं सूत्रं व्याख्यातं यादवप्रकाशाचार्यैः, तद्वावृत्त्यर्थमिहशब्दः। इह अस्मिन्नुपक्रमसूत्र इत्यर्थः। ब्रह्मणो जिज्ञास्यत्वमात्रे सिद्धे तस्यैव जिज्ञास्यत्वसिद्धिः, न चोभयं सूत्रप्रतिपाद्यं; ब्रह्म जिज्ञास्यमेव, ब्रह्मैव जिज्ञास्यमिति—वाक्यभेदप्रसङ्गात्॥

ननु मुमुक्षुभिर्नियमेन ब्रह्मणो जिज्ञास्यत्वं **तन्त्रान्तर**सिद्धानां प्रधानादीनाम् अजिज्ञास्यत्वेन विना न सिध्यतीति ब्रह्मजिज्ञास्यत्वसमर्थने प्रधानादेरजिज्ञास्यत्वसमर्थनमर्थादापततीति न वाक्यभेद इति चेन्न; अधीतक्रमेण वेदार्थं निरूप्यमाणे पूर्वभागविचारानन्तरमुत्तरभागविचारस्य प्रधानादिनिरासनिरपेक्षत्वात्। न ह्येकस्य प्रबन्धस्यैकदेशे निरूपिते तदेकदेशान्तरनिरूपणस्य प्रबन्धान्तरप्रमेयनिगमनापेक्षना भवति। न हि पूर्वषट्के निरूपिते उत्तरषट्कनिरूपणं कपिलसुगतादिमतव्युदसनेन विना न संभवति। यदि वेदान्तार्थस्य श्रद्धाद्रढिम्ने तदितरपक्षनिरसनमपेक्षितमिह क्रियत इति मतं, तदनुपपन्नः कृतकरत्वप्रसङ्गात्। एतदुक्तं भवति—इह प्रधानादीनामजिज्ञास्यत्वं किं वेदान्तानामतत्परत्वोपपादनेन समर्थ्यते, उत कपिलसुगतागमाप्रामाण्यनन्तरप्रमेयदौस्थ्यप्रतिपादनेन समर्थ्यते। न प्रथमः; ईक्षत्यधिकरणादिभिर्वेदान्तवाक्यानामतत्परत्वस्य वक्ष्यमाणतयाऽत्र वक्तव्याभावात्। न द्वितीयः; वेदविरुद्धस्मृतीनामप्रामाण्यस्य पूर्वमीमांसायामेव समर्थितत्वात्, सांख्यसौगताद्यभिमतप्रमेयदौस्थ्यस्य तर्कपादे प्रतिपादयिष्यमाणत्वात्। 'विप्रतिषेधाच्चासमञ्जसम्, इतरेषां चानुपलब्धेः, एतेन योगः प्रत्युक्तः, उदासीनानामपि चैवं सिद्धिः, अन्यावस्थितेश्चोभयनित्यत्वादविशेष' इत्यादिभिः सूत्रैस्तदुक्तमोक्षतदुपायनिरासस्यापि कर्तव्यमाणतयात्र वक्तव्याभावात्। किंच 'एतेन सर्वे व्याख्याता व्याख्याता' इत्यत्र, 'अनावृत्तिः शब्दादनावृत्तिः शब्दा'दिति शास्त्रान्ते च सूत्राभ्यासफलमनुक्तांशज्ञापनम्, अनुक्तांशश्च सांख्ययोगावगमत इति वदतां मोक्षस्य सांख्ययोगसमुच्चयसापेक्षत्वं च प्रतिपादयतां सौगतादिवत् सांख्यादिनिरासेन शारीरकस्यैवारम्भणीयत्वप्रतिज्ञानमतीव व्याहतम्। सांख्ययोगयोर्विरुद्धांशामिप्रायमनादरणीयत्वकथनमिति चेन्नः विरुद्धांशानादरणीयत्वस्य विरोधाधिकरणन्यायसिद्धत्वादेव। अतो यादवप्रकाशकृतं सूत्रतात्पर्यवर्णनमनुपपन्नमितीहशब्दाभिप्रायः। **विधीयत इति**। अज्ञातज्ञापनं विधिरिह विवक्षितं, न **लप्रवृत्तप्रवर्तनं**; रागतः प्रवृत्तेर्वक्ष्यमाणत्वात्। रागतः प्रवृत्तस्यापि पूर्वपक्षयुक्त्याऽनारम्भणीयतावुद्भावनात्सत्यारम्भणीयत्वज्ञापनं ह्यज्ञातज्ञापनम्, अतो विधीयत इत्यस्य स्वयमेव प्रवर्तत इति वक्ष्यमाणग्रन्थेनाविरोधः। इत्थं पदार्थौ व्याख्यातौ, अथ सूत्रस्य वाक्यार्थमाह—**मीमांसेति**। अत्र 'पूर्ववृत्तात्कर्मज्ञानादनन्तरं तत एव हेतो'रित्यर्थात्तःशब्दार्थः उक्तः। **ब्रह्म ज्ञातव्यमिति** ब्रह्मजिज्ञासापदार्थः। **ज्ञातव्यम्** विचारयोग्यम्। **तत एवे**त्येवकारेण शास्त्रान्तराधिगमनैरपेक्ष्यमथशब्दफलितमभिप्रेतम्। **उक्तं भवतीति**। शब्दतोऽर्थतश्चेति भावः। कथमस्य सूत्रस्यायमर्थ इति शङ्कायां तदुपपादयति—**मीमांसेत्यादिना**। अथात इत्यादिपदानां यथोक्त एवार्थः **कर्मब्रह्ममीमांसयो**रैकशास्त्र्यात्। ऐकशास्त्र्यं च नियतपौर्वापर्यभागद्वयात्मकवेदाख्यप्रबन्धव्याख्यानरूपत्वादित्यर्थः। अत्र व्याख्येयस्य पूर्वापरभावेनावस्थितभागद्वयरूपत्वं तद्धेतुकं व्याख्यानस्य पौर्वापर्यविशेषविशिष्टभागद्वयरूपत्वं चोभयं पदयोजनायां वाक्ययोजनायां च वक्तव्यं, तथापि ग्रन्थलाघवार्थं पदयोजनायामधीतसाङ्गसशिरस्कवेदस्येति व्याख्येयस्य नियतपौर्वापर्यभागद्वयरूपत्वमुक्तम्, अत्र तु वाक्ययोजनायां व्याख्यानस्य नियतपौर्वापर्यभागद्वयरूपतयैकशास्त्र्यमुक्तम्, उभयत्रोभयमनुसंधेयम्। भागशब्दाभ्यां मीमांसाद्वयस्य एकावयवित्वं सूचितम्। पूर्वोपरितनशब्दाभ्यां क्रमनियम उक्तः। कर्मब्रह्मशब्दाभ्यां वृत्तवर्तिष्यमाणकथनम्। अल्पास्थिरफलत्वानन्तस्थिरफलत्वाभ्यां तयोर्हेतुहेतुमद्भावोपपादनम्। मुक्त्युपायोपयोगितया कर्मणां स्वरूपेणोपादेयताप्रतीतिरनन्तस्थिरफलापातप्रतीत्यन्तर्भूता, अतः पृथगनुक्तिः। एवं क्रमविशेषविशिष्टैकव्याख्येयव्याख्यानरूपतया **कर्मब्रह्ममीमांसयोरैकशास्त्र्यात्** सूत्रस्य यथोक्त एवार्थ इत्यर्थः॥

पूर्वं प्रतिज्ञातं वृत्तिकारमतानुसारं वृत्तिग्रन्थेन संवादयति—**तदाहेति**। कर्माधिगमस्यैव पूर्ववृत्तत्वं न केवलं कण्ठोक्तम्, **ऐकशास्त्र्योक्त्याक्षिप्तं** चेत्यभिप्रायेणाह—**वक्ष्यति चेति**। **वृत्ता**दित्यादिः **संहित**मित्यादिश्च वृत्तिग्रन्थौ। **शारीरकं ब्रह्ममीमांसा; जगच्छरीरकः** परमात्मा शारीरः 'तस्यैष एव शारीर आत्मे'ति श्रुतेः, तद्विषयं शास्त्रं शारीरकमित्युच्यते।

---

१ अतः। २ °चिनार°।

'संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेन इति शास्त्रैकत्वसिद्धिः' (वो. वृ.) इति । अतः प्रतिपिपादयिषितार्थभेदेन षट्कभेदवत्, अध्यायभेदवच्च पूर्वोत्तरमीमांसयोर्भेदः ॥ **मीमांसाशास्त्रं 'अथा-**

षोडशलक्षणेन षोडशाध्यायेन । **संहितमिति** । नियतपौर्वापर्येकव्याख्येयव्याख्यानरूपतया संगतमिति भावः । 'अर्थैकत्वादेकं वाक्य'मिति न्यायेन प्रतिपाद्यैक्याद्याख्येयस्य वेदस्यैकप्रबन्धत्वं भवेत्, तच्चोपपद्यतेः पुरुषार्थपरत्वाद्वेदस्य ब्रह्मपरत्वाद्वा । 'सर्वे वेदा यत्पदमामनन्ति, वेदैश्च सर्वैरहमेव वेद्य' इतिहि श्रुतिस्मृती । वेदार्थविचारस्यानुगतत्वान्मीमांसाया एकप्रबन्धत्वम् । अनेनैकशास्त्रेण कर्माधिगमस्य पूर्ववृत्तत्वमाक्षिप्तम् ॥

ननु यद्येकशास्त्र्यं कर्मब्रह्मविचारयोस्तर्हि उपक्रमे साधारणोर्थः प्रतिज्ञायेत 'अथातो वेदार्थजिज्ञासे'ति–नचैवं प्रतिज्ञातं, किंतु पूर्वभागासाधारण एव प्रतिज्ञातः 'अथातो धर्मजिज्ञासे'तिः अत्र ब्रूमः–'अथातो ब्रह्मजिज्ञासे'त्येवोभयभागसाधारणार्थप्रतिज्ञा, कर्मविचारस्तु ब्रह्ममीमांसातृतीयलक्षणचतुर्थपादे सङ्गतः । ब्रह्मविचारान्तर्भावेपि पृथक्करणमुपपद्यतेः यथा निग्रहान्तर्भूतच्छलजात्योराह्निकभेदेन पृथगुक्तिः, यथा च निग्रहान्तर्भूतहेत्वाभासानामध्यायभेदेन पृथगुक्तिः । पृथक्करणं च बहुग्रन्थप्रतिपाद्यत्वात् । तत्र च पूर्वभावित्वमुपजीव्योपजीवकभावादिवक्ष्यमाणहेतुनिबन्धनम् । एतदुक्तं भवति—अर्थैकमाद् ब्रह्ममीमांसातृतीयलक्षणचतुर्थपादेन कर्मविचारः सङ्गतः, प्रतिपत्तिसौकर्यलक्षणकमात्तु कर्मविचारस्य पूर्वभाव इति । एवंवा साधर्म्यवैधर्म्यसमयोर्जात्योः कथनेन यथा प्रतिधर्मसमोभयानुयायिन्यर्थसिद्धा, एवं भागद्वयासाधारणार्थप्रतिज्ञाद्वये कृते साधारणार्थप्रतिज्ञानमार्थं स्यात्, साधारणार्थे प्रतिज्ञातेऽप्यसाधारणार्थस्तु पृथगेव प्रतिज्ञातव्यः । धर्मजिज्ञासायां प्रतिज्ञातायामपि 'अथातः शेषलक्षणम्, अथातः कत्स्नर्थपुरुषार्थयोर्जिज्ञासे' त्यादौ ह्यसाधारणार्थप्रतिज्ञा कृता, अतो भागद्वयासाधारणार्थप्रतिज्ञानेन तदनुगतसाधारणार्थप्रतिज्ञानमार्थं स्यादिति प्रथमम् 'अथातो धर्मजिज्ञासे'ति प्रतिज्ञातं, ननु वेदार्थजिज्ञासेति । अथवा, 'अथातो धर्मजिज्ञासे'त्येव साधारणप्रतिज्ञाः अलौकिकश्रेयःसाधनं हि धर्मः, तदनुयायि प्रतिपाद्यं, धर्मश्च साध्यसिद्धभेदेन द्विविधः, सिद्धरूपे वस्तुनि धर्मशब्दप्रयोगो महाभारते दृष्टः यथा—'ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः । ते वदन्ति महात्मानं कृष्णं धर्मं सनातन'मिति । तथाभियुक्तैश्चालौकिकत्वे सति श्रेयःसाधनत्वं धर्मशब्दप्रवृत्तिनिमित्तं मन्यमानैः सिद्धरूपेथें धर्मशब्दः प्रयुक्तः—'द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते । तेषामैन्द्रियकत्वेपि न तादूप्येण धर्मते'त्यादौ । तत्र द्रव्यादिसद्भावेपि क्रियाप्राधान्यात् साध्यधर्मपरः पूर्वभागः, उपासनतदङ्गसद्भावेपि ब्रह्मप्रधानत्वात् सिद्धधर्मपर ऊर्ध्वभागः । अत उभयभागविचारसाधारणी प्रथमप्रतिज्ञा । तत्र धर्मशब्दस्य साध्यधर्मविषयतया प्रसिद्धिप्राचुर्येण बुद्धिस्थत्वात्, पूर्वभागप्रतिपन्नत्वेन प्राथम्यात्, धर्मजिज्ञासापदेनैव तत्त्रैणार्थतो वा प्रतिज्ञातत्वोपपत्तेश्च तल्लक्षणमुक्तं चोदनासूत्रे । सिद्धरूपधर्मविशेषस्य च साधारणप्रतिज्ञयैवार्थतः प्रतिज्ञातत्वेपि तस्य बहुग्रन्थव्यवधानात्, शब्दावोधत्वशङ्कापरिजिहीर्षया च पुनः प्रतिज्ञा कृता, तस्य लक्षणमुक्तं जन्मादिसूत्र इति—युक्तमैकशास्त्र्यम् ॥

ननु पूर्वभागस्य साध्यधर्मप्रधानतोक्तिरुदाहृतवचनेन विरुध्यते; तत्र पूर्वभागेपि सिद्धरूपस्य परस्य कर्माराध्यतया प्रधानप्रतिपाद्यत्वाऽवगमात् । तस्मिन्वचने वेदविच्छब्दो हि पूर्वभागाभिज्ञपरः; गोबलीवर्दनयाद् 'विष्णुनामा स वेदेषु वेदान्तेषु च गीयत'इत्यनेनैकार्थ्याच्च । नच गुणभावेन कर्मणां प्रतिपाद्यत्वमित्यविरोधः; प्राधान्येन प्रतिपाद्यत्वस्य जैमिनेरभिमतत्वात्, भवद्भिरपि तथोक्तत्वाच्च ।—सत्यम्, वस्तुतः प्राधान्यं परमात्मन एव, यथा राज्ञस्तात्पर्यगोचरत्वलक्षणं, शाब्दं प्राधान्यं तु कर्मण एव, यथा राजपुरुषस्य, तच्चातिरस्कृतं; तत्र तस्य परमात्माराधनरूपत्वानवगमात् । नच तदवगमोऽवश्यं संपाद्यः; अन्तवत्स्वर्गादिफलदत्वे कर्मणां परदेवताज्ञाननैरपेक्ष्यं हि श्रुतिस्मृतिभ्यामवगम्यते–'यो ह वा एतदक्षरं गार्ग्यविदित्वास्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति' इति, 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च । न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते' इति च । अतस्तन्नैरपेक्ष्यलक्षणमपि प्राधान्यमस्ति कर्मणः, अतः पूर्वभागे कर्मणः प्रागवगतं प्राधान्यं, पश्चादवगन्तव्यं परमात्माराधनरूपत्वं चाविरुद्धम् । अतः प्रतिज्ञोपपत्तेः शास्त्रैक्यं युक्तम् । यद्यपि कर्मब्रह्ममीमांसयोरैकशास्त्र्यमविवक्षितं जैमिनिना, तथापि तदङ्गीकृत्य तदैकशास्त्रतया बादरायणेन ब्रह्मसूत्रप्रणयनं युक्तम् । यतः अतदर्थतया क्षुण्णमपि योग्यमपेक्षितं तादर्थ्यमर्हति ग्रामे कल्पे पूर्वतडागवद्, विवक्षितत्वं संभवश्च दर्शितः । अतः शास्त्रैक्यं युक्तम् । नन्विदमयुक्तमैकशास्त्र्यं शारीरकशब्दसूचितात् प्रधानप्रतिपाद्यभेदात्, जैमिनीयशब्दसूचितात् कर्तृभेदात्, तदुभयफलितात् प्रयोजनभेदात्, अर्थविरोधाच्चेत्याशङ्कां परिहरति–**अतः प्रतिपिपादयिषितेति । अतः** वृत्तिकारोक्तादेकव्याख्येयव्याख्यानरूपत्वसंबन्धादित्यर्थः । **षट्कभेदः** पूर्वमीमांसायाम्; **अध्याय**भेदः तत्रोत्तरत्र च निदर्शनार्थमुक्तौ; अर्थभेदाभावे ह्येकं षट्कमेकोऽध्यायो वा स्यात् । अत एकावयवित्वे सिद्धे सत्यवान्तरार्थभेदो न महावाक्यैकत्वविरोधी । यथा पदार्थभेदो वाक्यार्थैकत्वाविरोधीति भावः । अनेन प्रतिपाद्यभेदः परिहृतः, प्रयोजनभेदश्चार्थात्परिहृतः; षट्कद्वयचिन्तित-

---

१ प्रधानप्र० ।

प्रकृतिविकृतिप्रयोजनभेदस्य शास्त्रभेदकत्वाभावात् । अनेन वृत्तिग्रन्थगतषोडशलक्षणशब्दतात्पर्यं च दर्शितम् । पूर्वोत्तरमीमांसाशब्देन जैमिनीयशारीरकशब्दौ च विवृतौ । प्रतिपिपादयिषितशब्देनार्थविरोधः परिहृतः । प्रतिपादयितुमिष्टं हि प्रतिपिपादयिषितं स च तात्पर्यविषयोर्थः । विरुद्धतया प्रतीयमानेषु देवतानिरासादिषु न तात्पर्यमित्यभिप्रायः । नन्वेवं कथमभिधीयते 'आम्नायस्य क्रियार्थत्वा'दिति सिद्धपरवाक्यानां तच्छेषत्वं हि सूत्रकारेण कण्ठोक्तं, तच्च विरुध्यत एव, अतः शास्त्रभेद इति—नैवं: 'पदं जुहोति, आहवनीये जुहोति, न हिंस्यात् सर्वाभूतानि, पशुमालभेते'ति वत्, शास्त्रान्तरे 'कर्मण्यण्, आतोऽनुपसर्गे क' इतिवच्च उत्सर्गापवादन्यायेन शास्त्रैक्याविरोधात् । सामान्येन सिद्धपरवाक्यानां क्रियाशेषत्वेऽभिहिते सिद्धपरवाक्यविशेषस्य किं विधिशेषित्वं नवेति विचार्य स्वयंपुरुषार्थविरहिणामेव सिद्धपराणां क्रियाशेषत्वं, स्वयंपुरुषार्थपर्यवसायिनां तु सिद्धपरवाक्यानां नैं तच्छेषत्वमिति हि निर्णेतुं युक्तं, यथा होमस्य सामान्येनाहवनीये प्राप्तत्वेऽपि होमविशेषस्य पदे कर्तव्यत्वनिश्चयः, यथा च सामान्यतो हिंसानिषेधेपि हिंसाविशेषस्य कर्तव्यतोक्तिः, यथा च सामान्येन कर्मण्युपपदे धातोरणि प्राप्तेऽप्याकारान्ताद्धातोः कप्रत्ययविधिः, नच तत्र शास्त्रभेदः, तद्वद्देवतानिराकरणे च न तात्पर्यम्; अश्रुतवेदान्तानां कर्मण्यश्रद्धानिवारणाय कर्मप्राधान्यपरत्वात्तस्य । न हि निन्दा निन्द्यं निन्दितुं प्रवर्तते, अपि तु निन्दितादितरत् प्रशंसितुमिति हि न्यायविदः ॥

यद्वा, वेदप्रामाण्यकर्मावश्यकर्तव्यतानात्पर्यातिशयात् तत्प्रतिपक्षनिराचिकीर्षयाऽन्वारुह्यवादो देवतानिरासोक्तिः स्यात्; अभिमततरार्थानादरेणापि हि विपक्षव्युदासो दृश्यते, यथा—'असिष्टार्थव्ययेनापि जयति क्षेत्रहारिणम् । लब्धक्षेत्रैर्न दुष्प्रापः स्यादर्थ इति निश्चयात् ॥' एवमभिमततरेश्वराद्यनादरेणापि वेदप्रामाण्यादिसमर्थने पश्चादभिमतसिद्धिरयत्नलभ्येति जैमिनेरभिप्रायः । तत्सिद्धिप्रकारश्च तदुक्तरात्रिसत्रन्यायाद्यधीन इत्युत्तरत्र व्यक्तीभविष्यति । नच तत्सिद्धिमभ्युपगच्छतस्तदनादरवादव्याघातः: तस्यान्वारुह्य कृतत्वात् । कथमन्वारुह्यवादतनिश्चयः, उच्यते—'संपत्तेरिति जैमिनिः, अन्यार्थं तु जैमिनिः, परं जैमिनिर्मुख्यत्वात्, ब्राह्मेण जैमिनि'रित्यादिब्रह्मसूत्रैरेव जैमिनेर्ब्रह्मस्वरूपतद्गुणतदुपासनतत्फलाद्यभ्युपगमस्य प्रतिपन्नत्वात्, महाभारते च हयशिरउपाख्यानादिषु भगवद्व्यासोपदेशलब्धपरमात्मतत्त्वज्ञानतावगमाच्चेति । अतो विरुद्धार्थे तात्पर्याभावान्नार्थविरोधः । नन्वर्थविरोधो दुष्परिहरः, तथा हि—विशेषातिदेशनिरूपणपरे अष्टमेध्याये विकृतिषु प्रकृतिधर्मातिदेशे कर्तव्ये सति कस्मिन् कर्मणि कस्य कर्मणो धर्मातिदेशः प्राप्त इत्यपेक्षायां यस्य कर्मणो येन कर्मणा द्रव्यसाम्यं देवतासाम्यं वा भवति तस्मिंस्तद्धर्मोऽतिदेष्टव्य इति स्थितं, तत्र यस्य केनचिद् द्रव्यसाम्यं केनचिद्देवतासाम्यं च भवति तस्मिन् द्रव्यसाम्यवत एव कर्मणो धर्मातिदेशः, न तु देवतासाम्यवत इति द्रव्यप्राधान्यमुक्तं जैमिनिना—**'द्रव्यदेवतासाम्ये द्रव्यं बलीय'** इति ॥

न च द्रव्यप्राधान्योक्तिरतिवादलम्: अनुष्ठानविरोधात्, द्रव्यप्राधान्येन ह्यनुष्ठानं दृश्यते, अतोद्रव्यप्राधान्यं वदतो जैमिनेर्देवतानिरासे तात्पर्यमस्तीति; अत्रोच्यते—नात्र द्रव्यदेवतयोः सद्भावासद्भावाभ्यां प्राधन्याप्राधान्ये विवक्षिते, अपि तु विलम्बितविलम्बितप्रवृत्तिप्रमाणविषयताधीने । द्रव्यं ह्यविलम्बितप्रत्यक्षगम्यं देवता तु विलम्बितशास्त्रगम्या । विलम्बाविलम्बावेव हि श्रुतिलिङ्गादिषु प्रत्यक्षानुमानादिषु च पूर्वोत्तरप्राबल्यदौर्बल्यहेतू ॥

ननु हविष्टं शास्त्रैकगम्यमिति न द्रव्यस्यापि प्राधान्यमिति चेत्—नैवं; चरुपुरोडाशादिकद्रव्यं हि प्रत्यक्षं, हविष्ट्वाख्यधर्ममात्रमेव तत्र शास्त्रगम्यं, देवतायास्तु स्वरूपं, श्रेयःसाधनत्वादिधर्मश्चोभयमपि शास्त्रगम्यम् । अतः स्वरूपतो धर्मतश्च विलम्बितमानगम्यत्वाद् देवताया अप्राधान्यं, धर्ममात्रस्य शास्त्रगम्यत्वेपि धर्म्यशेनाविलम्बितमानगम्यत्वाद्धविषः प्राधान्यम् । अतः प्राधान्याप्राधान्ययोः प्रमाणद्वारकत्वेन स्वरूपासद्भावे तात्पर्यं नास्तीति देवतानिरासोक्तिरन्यपरा । एवमर्थान्तराण्यप्यविरोधेन नेतुं शक्यानीति नार्थविरोधः ॥

ननु ब्रह्मसूत्रैरेव जैमिनिपक्षमनूद्य प्रतिक्षेपादर्थविरोधो दुष्परिहरः, तथाहि—'फलमत उपपत्ते'रित्यत्रेश्वरस्य फलप्रदत्वोक्त्या 'धर्मं जैमिनि'रिति धर्मस्य फलप्रदत्वमनूद्य प्रतिक्षिप्तं, न श्रुतत्वोपपत्तिभ्याम्; कालान्तरभाविफलसाधनमात्रे जैमिन्यभिहिते ताभ्यामेवात्र फलसाधनविशेषसिद्धेरुक्तत्वात् ॥

ननु शेषत्वात् पुरुषार्थवादो यथा 'अन्यार्थं तु जैमिनि'रित्यत्र वेदान्तोदितात्मज्ञानस्य कर्मशेषतयाऽऽत्मनां कर्मशेषत्वोक्तिः 'अधिकोपदेशादि'ति सिद्धान्तेन विरुध्यते । न च विकल्पेन निर्वाहः संभवति; वस्तुनि विकल्पायोगात् । न च जैमिनिना परमतमुपन्यस्तमिति वाच्यं; जैमिनिमतत्वेन सिद्धान्तिना प्रतिक्षेपायोगात् ॥ नैवम्; विपक्षनिरासार्थस्य जैमिनेरन्वारुह्यवादस्य तथोपन्यासप्रतिक्षेपोपपत्तेः । अन्यथा 'परं जैमिनि' रित्यादिसूत्राणां मिथो विरोधः, भारतोक्तिविरोधश्च । जैमिनेरन्वारुह्यवादमजानतांतु तदुक्ते तत्त्वबुद्धिः स्यादिति तन्निवारणाय ब्रह्मसूत्रे तदुपन्यासनिरासौ कृतौ । अतएव 'परामर्शं जैमिनि'रित्यत्र नैष्ठिकाद्याश्रमभ्रंशप्रतिक्षेपोपि परिहृतः; 'तद्भूतस्ये' त्यत्र नैष्ठिकाद्याश्रमभ्रंशस्य जैमिन्यनभिमतत्वाभिधानात्।

१ अनच्छे° । २ प्रत्यक्षादिषु ।

तो धर्मजिज्ञासा' (जै. सू. १।१।१) इत्यारभ्य **'अनावृत्तिः शब्दात् अनावृत्तिः शब्दात्'** (ब्र. सू. ४।४।२२) इत्येवमन्तं संगतिविशेषेण विशिष्टक्रमम् । तथाहि—प्रथमं तावत् **'स्वाध्यायो-**

न ह्याश्रमानिमित्तौ तद्भ्रंशानभिमतिसंभवः । अतो वीतरागव्यतिरिक्तानामग्निहोत्रादिष्वश्रद्धानिवारणार्थं आश्रमान्तर-प्रतिक्षेपः पूर्ववदन्वारुह्यवादः, स च पूर्वमीमांसायामसूत्रितः, तथाऽप्यौडुलोम्यादिमतवदनूद्य निरस्तः ॥

न च मधुविद्यायां वस्वाद्यनधिकारोक्तिरधिकारोक्त्या विरुध्यत इति वाच्यम्; अनधिकारोक्तेर्वैश्वादिदेवताभ्युपगमच्छिद्रत्वेन शास्त्रैक्याविरुद्धतया तदुद्घाटनवैयर्थ्यात् । 'भावं जैमिनि'रिति सूत्रोक्ताश्च पक्षाः शास्त्रैक्याविरुद्धाः; कर्मविचारे तेषामसमर्थ-नादिति न तत्पर्यनुयोगावकाशः, तस्मान्नार्थविरोधः । कर्तृभेदपरिहारस्तु प्रसिद्धत्वान्न कण्ठोक्तः, अतएवच-शब्दसूचितो वा । धूर्तस्वामि-कपर्दिकर्तृकस्यापस्तम्बीयसूत्रव्याख्यानस्य व्याख्येयैक्यादेकप्रबन्धकत्वं हि दृष्टं, पाणिनीयसूत्रपूर्वोत्तरवृत्त्योश्च वामन-जयादित्यकर्तृकयोर्व्याख्येयैक्यादेकव्याख्यातत्वं दृष्टं, तस्मादुपपन्नमैकशास्त्र्यम् ॥

अस्त्वैकशास्त्र्यं कथं पौर्वापर्यनियम इत्याशङ्कां परिहरन् वृत्तिग्रन्थस्थं **'संहित'**मिति पदं विवृणोति । **मीमांसेति ।** क्रमविशेषान्वितमैकशास्त्र्यं संहितमित्यनेनाभिप्रेतम् । **आरभ्यैवमन्तमिति** पौर्वापर्यनियम उक्तः । **सङ्गतिविशेषेणेति ।** अत्रमी सङ्गतिविशेषा अभिप्रेताः—पाठक्रमः, चेतनानां त्रिवर्गे प्रथमप्रावण्यसंभवरूपोऽर्थस्वभावः, औपनिषदेष्वङ्गाङ्गिभावप्रति-पादकवाक्येषु यज्ञादिकर्मणः पदार्थत्वेन संबन्धः, कासुचिद्विद्यासु यज्ञतदुपकरणादीनां दृष्टिविशेषणत्वोक्तिः, कर्मब्रह्मविद्ययो-र्दृष्टान्तदार्ष्टान्तिकभावः, विद्याकर्मणोरुत्पाद्योत्पादकभावात् तच्छेषभूतविचारयोस्तु तत्क्रमभावत्वोपपत्तिः, व्याख्यानभूतमी-मांसायां च उत्तरभागस्य पूर्वभागोक्तन्यायसापेक्षत्वं चेति । एवं पौर्वापर्यनियामकसङ्गतिविशेषेण **विशिष्टक्रमं** क्रमवि-शेषवदित्यर्थः ॥

ननु भवतु वेदप्रामाण्यसिद्धये प्रथमाध्यायस्य पूर्वभावित्वं द्वितीयाध्यायात् पूर्वं ब्रह्मविचारः किं न स्यादिति—चेन्न; तत्रतत्रोक्तैः सङ्गतिविशेषैः षोडशलक्षणानुपूर्वीसिद्धेस्तदनन्तरप्राप्तत्वाद् ब्रह्मविचारस्येत्यभिप्रेत्य **संगतिविशेषेण विशिष्ट-क्रममि**त्युक्तम् । एवमत्रैकशास्त्र्यं, पौर्वापर्यनियमः, शास्त्रस्यारम्भणीयत्वं चेति त्रयं प्रतिज्ञातम् । पूर्वोक्तस्य साङ्गशिरस्का-ध्ययनस्य प्रमाणं दर्शयन् साधनचतुष्टयसंपादनस्यानवसरग्रस्तता च दर्शयन् प्रतिज्ञातार्थत्रयमुपपादयितुमाह—**तथाहीति ।** प्रतिज्ञातार्थत्रयोपपादनार्थमध्ययनविधिं निरूपयति—**प्रथममिति ॥**

ननु वेदप्रामाण्यसमर्थनमिव कर्मविचारसिद्धमध्ययनविधिनिरूपणं किन्नोपजीव्यते इति—चेन्न; अर्वाचीनव्याख्यातृभिरर्थ-ज्ञानपर्यन्तायास्तत्रतत्रोक्तत्वात् । अक्षरराशिग्रहणपर्यन्तत्वं हि भगवद्बादरायणाभिमतम्; 'अध्ययनमात्रवत्' इति हि वक्ष्यते, अतस्तत्र वक्ष्यमाणोर्थः शास्त्रारम्भणीयत्वायात्र प्रतिपाद्यते । अध्ययनविधेरक्षरराशिग्रहणमात्रपर्यन्तत्वे निरूपिते शास्त्रार-म्भणीयत्वसिद्धेः, कृत्स्नविषयत्वनिरूपणेन ऐकशास्त्र्यपौर्वापर्यनियमसिद्धेः कथमक्षरराशिग्रहणमात्रपरत्वं आरम्भणीयत्वम्; इत्थम्—अध्ययनविधेरर्थज्ञानपर्यन्तत्वे सत्यर्थज्ञानस्य 'अधीत्य न्यायात्, आचार्यकुलाद्वेदमधीत्याभिसमावृत्ये'ति यज्ञाद्य-नुष्ठानशेषत्वेन विनियोगात्, उपनिषत्सिद्धस्य ब्रह्मज्ञानस्यापि कर्मशेषत्वापत्तेः, तस्य च ज्ञानस्य 'आत्मा वा इदं, ब्रह्म वा इदम्, अयमात्मा ब्रह्मे'ति तत्र्यन्तस्थब्रह्मशब्दस्यात्मपर्यायत्वेनात्मविषयत्वादात्मज्ञानस्य व्रीह्यादिद्वारा प्रोक्षणादिरिवात्मद्वारा कर्मशे-षत्वे सति द्वारभूतव्रीह्यादेरिव द्वारभूतात्मनश्च कर्मशेषत्वं स्यात् ॥

न च समुद्रादिध्यानवदात्मज्ञानस्यादृष्टद्वारा कर्मशेषत्वात् समुद्रवदात्मा न कर्मशेष इति वाच्यम्; कर्मशेषतयाऽवकृ-प्तस्यात्मनो द्वारभावे संभवत्यदृष्टकल्पनाऽयोगात् । समुद्रस्य तु क्रतूपकारकत्वासंभवेन ह्यदृष्टकल्पनम् । नन्वात्मनः फलप्रद-तया शेषत्वमस्विति—चेन्न; संप्रतिपन्नेनात्मनात्मज्ञानस्य कर्मशेषत्वे निरूढेप्यसंप्रतिपन्नात्मकल्पनाऽयोगात् । नहि जीव-विलक्षण आत्मा संप्रतिपन्नः । अतोऽनुष्ठानशेषभूत आत्मा कर्मसु कर्तृभूतो जीव एवेति वेदान्तानां जीवपरत्वेन, तदति-रिक्तेश्वरे प्रमाणाभावादप्रामाणिकेश्वरविचारूपं शास्त्रमनारम्भणीयमिति प्राप्नुयात्, अक्षरराशिग्रहणमात्रपर्यन्तत्वे त्वर्थ-ज्ञानस्यानुष्ठानशेषत्वाभावेन कर्मसु कर्तृभूतजीवातिरिक्तात्मप्रतिपादनसंभवात् प्रामाणिकपरमात्मविचारूपं शास्त्रमारम्भणीयं स्यादिति, अतोऽध्ययनविधिर्निरूप्यते । तत्राध्ययनस्य सक्तुहोमवत् प्रधानकर्मत्वं, स्वरूपेण विधेयत्वम्, अध्यापनविधिप्रयुक्तत्वं, उपनयनस्याध्यापनाङ्गत्वं च प्राभाकराभिमतमनादृत्याध्ययनस्यावघातवद् गुणकर्मत्वं, नियमस्य विधेयत्वं, अध्ययनस्य स्वविधि-प्रयुक्तत्वं, उपनयनस्याध्ययनाङ्गत्वं चेति कौमारिलाभिमतमर्थचतुष्टयं, उभयानभिमतमक्षरराशिग्रहणमात्रपर्यन्तत्वं च सङ्गहेन प्रतिजानीते—**प्रथममिति । प्रथमं तावत्**—प्रथमत एव । 'यावत्तावच्च साकल्येऽवधौ मानेऽवधारण' इति नैघण्टुकाः । प्राथम्यं शास्त्रान्तरश्रवणयोग्यावस्थापेक्षया पूर्वभावित्वम्; गर्भाष्टमोपनीतस्य ह्यध्ययनं, ततः पूर्वं शास्त्रान्तरपरिश्रमानर्हत्वात्,

---

१ मधवादि । २ °त्वोक्त्या । ३ °रिव कर्मशेषत्वे । ४ °यं स्यादिति । ५ °वात्मा° ।

ऽध्येतव्यः' (यजुरा. २।१५) इत्यध्ययनेनैव स्वाध्यायशब्दवाच्यवेदाख्याक्षरराशेर्ग्रहणं विधीयते ॥ तच्चाध्ययनं किं रूपं कथं च कर्तव्यमित्यपेक्षायाम् **'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत'** (शत. ब्रा.) इत्यनेन, **'श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि । युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान् ॥'** (मनुस्मृ. ४।९५) इत्यादिव्रतनियमविशेषोपदेशैश्च—अपेक्षितानि विधीयन्ते । एवं

अध्ययनविधिपरतन्त्रस्य साङ्गाध्ययनानन्तरं कर्मविचारावश्यंभावस्य स्वरससिद्धत्वाच्च । साधनचतुष्टयादिपूर्ववृत्तान्तरनिष्पादनस्यानवसरग्रस्तत्वं **प्रथमंतावद**दित्यनेन फलितम् । लौकिकाक्षरराशिव्यावृत्त्यर्थो वेदाख्यशब्दः । वेदाख्यशब्देन कृत्स्नाध्ययनं च सूचितं; न हि वेदान्तभागमात्रं स्वाध्यायशब्दवाच्यम् । अध्ययनेनेति निर्देशेन गुणकर्मत्वं सूचितं; भावार्थस्यान्यनिष्ठत्वप्रतीतेः । यदि प्रधानकर्मत्वमविवक्षितं तदा हि स्वाध्यायेनाध्ययनं संपाद्यमिति वचनव्यक्तिरभविष्यत् । एवकारेण नियमविधित्वं द्योतितं, न तु पुस्तकनिरीक्षणादिनेत्यर्थः । 'स्वाध्यायोऽध्येतव्य' इत्यध्ययनविधिवाक्योपादानेन स्वविधिप्रयुक्तत्वं सूचितं; न ह्यध्यापयेदिति वाक्यमुपात्तम् । प्राथम्यवचनादध्ययनस्योपनयनाङ्गत्वं च फलितं; शास्त्रान्तरपरिश्रमायोग्यगर्भाष्टमवर्षाभिप्रायेण हि प्राथम्यमुक्तम् । अध्ययनस्य हि प्राथम्यम्—'अष्टवर्षं ब्राह्मणमुपनयीते' त्युपनयनविषयतयोक्तस्य कालस्य उपनयनद्वाराध्ययनशेषत्वे सत्येव ह्युपपद्यते । एवमर्थपञ्चकं संक्षेपेण प्रतिज्ञातं भवति । अस्मिन्नध्ययनविधिवाक्येऽध्ययनस्य प्राथम्यं साङ्गसमुपनयनाङ्गत्वं च न प्रतीतम् 'उपनयीत, तमध्यापयेदि'ति वाक्यान्तरेणाध्ययनस्याध्यापनविधिप्रयुक्तत्वमध्यापनस्योपनयनाङ्गकत्वं च प्रतीयत इति शङ्कायामाह—**तच्चेति** । चः—शङ्कानिवृत्तौ । **तत् स्वाध्यायोऽध्येतव्य** इति वाक्यप्रतिपादितमित्यर्थः । 'आद्ये ह्यध्ययनेनैव कांचिदस्ति फलश्रुतिः । धारणे जपयज्ञे च या साप्येवं निवारिते'ति जपादेरप्यध्ययनशब्दवाच्यत्वात्तेषु प्रसक्ताध्ययनस्याद्याध्ययनत्वनिश्चयायाह—**किंरूपमिति** । किं सकृदुच्चारणरूपमाहोस्विदसकृदुच्चारणरूपं किंवा स्वतन्त्रोच्चारणरूपमुतपरतन्त्रोच्चारणरूपमित्यर्थः । परतन्त्राऽसकृदुच्चारणरूपत्वे ह्याद्याध्ययनत्वसिद्धिः । **कथं** किमङ्गकमित्यर्थः । इत्यपेक्षायाम'पेक्षितानि विधीयन्त' इत्यन्वयः । प्राथम्यं परतन्त्रोच्चारणरूपत्वमुपनयनाङ्गकत्वं च दर्शयितुमाह—**अष्टवर्षमिति** । अनेन प्राथम्यं सिद्धम्; उपनयनद्वाराऽध्ययनशेषत्वात् । कालस्य 'ब्राह्मणमुपनयीते'ति द्वितीयाश्रुत्या माणवकशेषत्वावगमादुपनयनस्य तदूताध्ययनत्वाङ्गसिद्धिः, उपनयनस्याकर्त्रभिप्रायसूत्रविहितत्वाच्च नाध्यापनाङ्गत्वसिद्धिः 'अध्यापयेदि'त्यनेन परतन्त्रोच्चारणरूपत्वसिद्धिः ॥

'द्वादशाहेन प्रजाकामं याजयेत्, अन्नाद्यकामं याजयेत्, निषादस्थपतिं याजयेदि'ति प्रतिपन्नस्य याजनस्येवार्थार्जनार्थतया रागप्राप्तस्याध्यापनस्याविधेयत्वाद्ध्यापनेऽधिकारिविशेषाश्रवणाच्चाध्ययनस्याध्यापयितृपूर्वकत्वमुच्यत, इत्ययमध्ययनाङ्गविधिरिति भावः । उपाकर्मादिव्रतनियमाङ्गकत्वं, साङ्गत्वं च दर्शयितुमाह—**श्रावण्यामिति** । **अर्धपञ्चमान्मासानित्यादीति** । आदिशब्दोपात्तैः 'अतऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत्' । वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु संपठे'दित्यादिवचनैरङ्गाध्ययनस्य कालो दर्शितः । **व्रत**मुपाकर्मकाण्डव्रतादि । **नियमः** 'पशु ह वा एतच्छ्वशानं यच्छ्वद्रस्तस्माच्छ्वद्रसमीपे नाऽध्येतव्य'मित्याद्युक्तदेशकालभक्ष्याभक्ष्यादिव्यवस्थारूपः । अध्यापयेदित्यनेन व्रतनियमविशेषोपदेशैश्चेति पृथङ्निर्देशः श्रुतित्वस्मृतित्वविभागाद्विप्रतिपन्नत्वाविप्रतिपन्नत्वविभागाच्च कृतः । उपाकर्मादिव्रतनियमवदुपनयनमप्यध्ययनाङ्गमिति भावः । किं रूपं कथं च कर्तव्यम् इत्यपेक्षायामेभिरङ्गविधायकवाक्यैरपेक्षितानि विधीयन्ते—इत्यर्थः । ननु 'अष्टवर्षं ब्राह्मणमि'त्यत्रोपनयनस्याऽध्ययनाङ्गत्वमवगम्यते ईत्युक्तं; तस्योपनेयासत्तिद्वाराऽध्येतृसाकाङ्क्षाध्यापनाङ्गत्वं ह्यवगम्यते, 'उपनीय तु यः शिष्य'मित्यादिस्मृतिवचनाच्च तदवगम्यते । उच्यते—'ब्राह्मणमुपनयीते'त्यत्र द्वितीयाश्रुत्योपनयनस्य माणवकशेषत्वमवगम्यते । माणवकशेषमुपनयनम्, अध्ययनं च तद्गतं, तत्रान्तरङ्गबहिरङ्गन्यायादुपनयनमध्ययनाङ्गमेव । ननु 'उपनीय तु यः शिष्यं वेदमध्यापयेद्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षत' इति वचने क्त्वाश्रुत्योपनयनस्याऽध्यापनाङ्गत्वं युक्तम्, अन्तरङ्गत्वं हि वस्तुसामर्थ्यरूपं लिङ्गं ततः क्त्वाश्रुतिर्बलीयसीति—चेन्न; अन्तरङ्गत्वं हि प्रत्यक्षश्रुतिसिद्धं, क्त्वाश्रुतिस्तु स्मृतिगतानुवादवचनस्था च । अतोऽस्याः स्मृतिवचनस्थत्वान्मूलश्रुतिसापेक्षत्वम्, अनुवादरूपवचनगतत्वाद्विध्यन्तरसापेक्षत्वमिति विलम्बद्वयमस्ति । श्रुतिलिङ्गादिषु विलम्बितधीहेतुत्वं हि परदौर्बल्यहेतुः, अतो विलम्बद्वयोपहता क्त्वाश्रुतिर्न बलीयसी । **किंच, श्रोत्रियोपाध्यायगुर्वादिनामविधानवत् तत्प्रकरणस्थमिदं वचनमुपनीयाध्यापयितुराचार्यनामविधानपरमिति न क्त्वाश्रुतिरुपनयनस्याध्यापनाङ्गत्वे प्रमाणं भवितुमर्हति** । किंच, 'स्वरितेनितः कर्त्रभिप्राये क्रियाफल' इत्यात्मनेपदे प्राप्तेपि 'संमानोत्सर्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः' इति पुनर्विधानस्याकर्त्रभिप्रायार्थत्वादुपनयनस्य नाध्यापनाङ्गत्वं युक्तम्; **'अकर्त्रभिप्रायार्थोयमारम्भ' इतिहि तद्वृत्तिकारः** ॥

---

१ °र ग्रहण° । २ कदाचिद° । ३ °म्यं तत्रो° । ४ °संप्रतिपन्नत्व° । ५ इत्युक्तं, तदयुक्तं ।

सत्सन्तानप्रसूत—सदाचारनिष्ठ—आत्मगुणोपेत—वेदविद्—आचार्योपनीतस्य व्रतनियमविशेषयुक्तस्याचार्यो-च्चारणानूच्चारणमक्षरराशिग्रहणफलमध्ययनमित्यवगम्यते । अध्ययनं च स्वाध्यायसंस्कारः; 'स्वाध्यायो-

ननु कर्त्रभिप्रायत्वं कर्तर्येव फलस्याभिप्रेतत्वं, तदवधारणनिषेधार्थं पुनर्विधानम्, अतः फलमुभयान्वयि, अतो माणवकद्वारेणाचार्यान्वय्युपनयनफलमित्यध्ययनाङ्गत्वं युक्तमिति—चेन्न; 'अग्नीनादधीते'त्यत्र कर्त्रभिप्रायसूत्रविहितेष्यात्मनेपदे फलस्योभयान्वयितया पुनर्विधानस्य नियमनिषेधार्थत्वाभावेन कर्त्रभिप्रायत्वमात्रस्य निषेधार्थत्वात्, अतो नाध्यापनाङ्गत्वम् । ननु कर्त्रभिप्रायशब्देन कर्तृव्यतिरिक्तचेतने फलानन्वयो विवक्षितः, अतो नाग्नीनादधीतेति व्यभिचारः, पुनर्विधानस्य तन्निवारणार्थत्वे फलस्याचार्येऽप्यन्वयोपपत्तेरध्यापनाङ्गत्वमिति—चेन्न: 'ऋत्विजो वृणीत' इत्यत्र स्वरितेत्यादिसूत्रविहितेऽप्यात्मनेपदे फलस्य कर्तृव्यतिरिक्तचेतनान्वयदर्शनेन पुनर्विधानस्य नियमनिषेधार्थत्वाभावात्, अतः कर्त्रभिप्रायमात्रनिषेधार्थं पुनर्विधानमिति नाध्यापनाङ्गमुपनयनम् । नैवं क्रियाफलं नाम क्रियानन्तरभाविफलं, तस्य कर्तर्यन्वितत्वं कर्त्रभिप्रायत्वम्, अत आचार्यकस्योपनयनक्रियानन्तरभाविलाभात्, अव्यवहितफलस्य कर्तृगतत्वाभावाच्चात्मनेपदस्याप्रामाण्यव्यवहितफलस्याकर्त्रभिप्रायत्वेऽप्यात्मनेपदं 'संमाननेत्यादिसूत्रेण विधीयते, अतोऽकर्त्रभिप्रायार्थत्वेऽपि व्यवहिताचार्यकनिष्पत्त्यर्थतयाऽध्यापनाङ्गत्वमुपनयनस्याविरुद्धमिति—चेन् नैवम् : 'अग्नीनादधीते'त्यत्र स्वरितेति विहितेष्यात्मनेपदे अग्निसंस्कारव्यवहितस्याहिताग्नित्वापत्तिरूपफलस्य कर्त्रन्वयितदर्शनात्, अतोऽकर्त्रभिप्रायार्थं संमाननेत्यादिसूत्रं फलमात्रस्य कर्त्रन्वयनिवारणार्थम् । संस्कारविशिष्टोग्निः फलमित्याधानकर्तरि न व्यवहितफलान्वय इति चेत्, तर्ह्युपनयनसंस्कारविशिष्टमाणवकसिद्धिरेवाव्यवहितं फलमिति कर्त्रभिप्रायसूत्रेणैवात्मनेपदसिद्धेरकर्त्रभिप्रायसूत्रवैयर्थ्यं स्यात् । यद्येवं व्यवहितमव्यवहितं वा फलमात्रमकर्त्रभिप्रायसूत्रेण निवार्यते, तर्ह्युपनेतुः प्रवृत्तिर्नोपपद्यते यतः 'प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते' इति—नैवम्; उपनयनफलस्य माणवकान्वयित्वेऽपि 'आचार्याय वरो देय' इति विध्यन्तरप्राप्तदक्षिणाफललिप्सया प्रवृत्त्युपपत्तेः ।

नचैतेनाकर्त्रभिप्रायत्वविरोधः; असाधारणफलानन्वयविषयत्वादकर्त्रभिप्रायसूत्रस्य । अव्यवहितक्रियाफलस्य कर्त्रभिमतत्वं कर्त्रभिप्रायत्वं, तदनभिमतत्वमकर्त्रभिप्रायत्वमित्यप्ययुक्तं; क्रियाफलस्य कर्त्रनभिमतत्वव्याघातात्, आचार्यकनिष्पत्त्युपयोगिनो माणवकसंस्कारस्याचार्यानभिमतत्वानुपपत्तेः । अत उपनयनमध्येष्यमाणमाणवकासत्तिमुखेन नाध्यापनाङ्गम्, अपि त्वध्ययनाङ्गमेव । अध्ययनं च नाध्यापनविधिः प्रयुङ्क्ते, 'अध्यापयेदि'ति तु 'द्वादशाहेन प्रजाकामं याजये'दित्यादिवदित्युक्तम् । यद्यपि, 'प्रजाकाममन्नाद्यकाम'मितिवत्प्रयोज्यव्यापारस्याध्ययनस्याधिकारिविशेषणं फलं न श्रूयते—तथापि, स्वाध्यायसिद्धिरधिकारिविशेषणं स्यात्; 'स्वाध्यायोऽध्येतव्य' इति स्वाध्यायस्याध्ययनसाध्यत्वावगमात् । यथा—'अग्नीनादधीते'त्यत्राग्नीनामाधानसाध्यत्वावगमादग्निसिद्धिरधिकारिविशेषणं, तद्वत् ॥

न च स्वविधिप्रयुक्तत्वेऽध्ययनस्यानुष्ठात्रभावः; सन्ति हि प्रबन्धाध्येतारः । तथाच भगवानापस्तम्बः—'तस्मिन्नभिजनविद्यासमुदेतं समाहितं संस्कर्तारमीप्से'दिति । तेषु परविधिप्रयुक्तत्वे सत्यध्ययनं नोपपद्यते; अप्रबुद्धविषयेतु स्वतन्त्रस्याध्ययनविधेर्माणवकविषयत्वं ज्ञात्वा हिनैषिणो माणवकमध्ययनादि कारयन्ति, अतः प्रबुद्धेष्वप्रबुद्धेषु च स्वविधिप्रयुक्तत्वमध्ययनस्य युक्तम् । परविधिप्रयुक्तत्वे नित्यस्याध्ययनस्य काम्यविधिप्रयुक्तत्वं स्यात्, ततश्चानुष्ठाननियमो न स्यात् । आचार्यककामो ह्यध्यापकः; तस्याचार्यककामनाया अभावेऽध्ययनासिद्धेः । अध्यापकबाहुल्यात्तत्सिद्धेरिति—चेन्न; अध्यापकेभ्योप्यध्येतृबाहुल्यदर्शनात् । आधानस्योत्तरकर्तुविधिप्रयुक्तत्वेऽपि न काम्यविधिमात्रप्रयुक्तत्वं 'वसन्ते वसन्ते ज्योतिषा यजेत, यावज्जीवमग्निहोत्रं जुहोती' ति नित्यविधिसद्भावादित्येवमाद्यनुसंधेयम् । अतो यथोक्त एवार्थः ॥

अङ्गविध्युपेतेन प्रधानविधिनाऽङ्गस्वरूपमङ्गिस्वरूपं च कथं प्रतिपन्नमित्यत्राह—**एवमिति । एवम्** अङ्गविधिभिः सह प्रधानविधौ निरूपित इत्यर्थः । **सत्सन्तानेत्यादिना** 'तस्मिन्नभिजनविद्ये'त्यापस्तम्बवचनार्थोऽनुसंहितः । **आत्मगुण** अक्रोधादयः । अनेन **समाहित**शब्दार्थ उक्तः । **वेदविच्छब्देन विद्यासमुदेत**शब्दार्थ उक्तः । **वेदविदाचार्योपनीतस्य** आचार्यविशेषणमुपनयनद्वारा माणवकार्थम् । यथोपनयनस्याध्यापनाङ्गत्वे माणवकविशेषणमाचार्यार्थं तद्वदिति भावः । **व्रतनियमविशेषयुक्तस्य** व्रतनियमविशेषवदाचार्यविशेषणमपि माणवकार्थमिति भावः । **आचार्योच्चारणानूच्चारणमिति** परतन्त्रोच्चारणरूपता दर्शिता । **अक्षरराशिग्रहणफल**मिति पदमसकृदावृत्तिरूपलक्ष्यापेक्षं दर्शयति । यथा—'व्रीहीनवहन्ती'त्यत्र दृष्टफललवस्याप्यपरिलाज्यन्तेनाऽवहननस्य वैतुष्यपर्यन्तत्वाद् अश्रुताप्यावृत्तिः सिद्धा, तद्वदत्रापि सामर्थ्यादावृत्तिः सिद्धा; दृष्टप्रयोजनापरित्यागेनैव नियमस्य विधेयत्वात् । आचार्योच्चारणानूच्चारणमित्यनेन, वेदविदाचार्योपनीतस्येत्यनेन चाध्ययनस्याध्यापयितृसापेक्षत्वेन परतन्त्रोच्चारणरूपत्वं, स्वविधिप्रयुक्तत्वम्, उपनयनाङ्गकत्वं चोक्तम् । आचार्योच्चारणानूच्चारणम-

१ नन्विति नास्ति काशीमुद्रितपुस्तके । २ °तिसूत्रं° । ३ °व्यवहिताग्नित्वं° ।

ऽध्येतव्यः' (यजुरा. २।१५) इति स्वाध्यायस्य कर्मत्वावगमात्। संस्कारो हि नाम कार्यान्तरयोग्यताकरणम् । संस्कार्यत्वं च स्वाध्यायस्य युक्तम्; धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयतत्साधनावबोधित्वात्, जपादिना स्वरूपेणापि तत्साधनत्वाच्च । एवमध्ययनविधिर्मन्त्रवन्नियमवदक्षरराशिग्रहणमात्रे पर्यवस्यति ।

क्षरराशिग्रहणफलमित्यनेन किंरूपमित्याकाङ्क्षा शामिता । वेदविदाचार्योपनीतस्य व्रतनियमविशेषयुक्तस्येत्यनेन कथं च कर्तव्यमित्यपेक्षा पूरिता । अक्षरराशिग्रहणफलमित्यनेन स्वाध्यायग्रहणकामत्वमध्ययनाधिकारिविशेषणमित्यपि सूचितम् ॥

'सकृत् जुहोति' त्यत्र पुरुषस्य सकृज्जुहोमजन्यादृष्टभाक्त्वात् सकृज्जुहोमो यथा पुरुषसंस्कारः, तद्वदध्ययनस्य पुरुषसंस्कारत्वेऽप्यक्षरराशिग्रहणफलत्वं न स्यात्: अपूर्वसिद्ध्यर्थतया स्वाध्यायसिद्ध्यर्थत्वाभावात्, ततश्चाक्षरराशिग्रहणफलत्वाभावेनावृत्त्यसिद्धेः सकृदुच्चारणरूपमेवाध्ययनं स्यादित्याशङ्क्याह—**अध्ययनं चेति** । उपनयनाङ्गकलवत् स्वविधिप्रयुक्तत्ववदिदं चोपपादनीयमिति **चार्थः** । **स्वाध्यायसंस्कारः**, नतु सकृज्जुहोमवदपूर्वविषयतया पुरुषसंस्कार इत्यर्थः । कुत इत्यत्राह—**स्वाध्याय इति** । तव्यप्रत्ययात् कर्मत्वावगमः: स्वाध्यायस्य हि कर्मत्वावगमः, न पुरुषस्य । कर्तुः क्रियायाऽऽप्तुमिष्टतमत्वं हि कर्मत्वम्, अतोऽध्ययनं स्वाध्यायसंस्कारः, नतु पुरुषस्येत्यर्थः ॥ निर्वर्त्यादेरपि साधारणं कर्मत्वं कथं संस्कार्यत्वहेतुनयोच्यते इत्यत्र निर्वर्त्यत्वविकार्यत्वानुपपत्तिमभिप्रेत्य **स्वाध्यायस्येति** पुनः कीर्तनम् । वस्तुसामर्थ्यसन्निवेशकर्मत्वावगमः संस्कार्यत्वे हेतुरिति भावः । फलान्तरे संभवति प्राप्यत्वमात्रपर्यवसानं चायुक्तम् । ननु नैं कर्मत्वमात्रावगमात् संस्कार्यत्वं 'सकृत् जुहोति, सुवर्ण भार्यं'मित्यत्र सकृत्सुवर्णयोः संस्कार्यत्वाभावादिति शङ्कायां संस्कारस्वरूपं शोधयति—**संस्कारोहीति । हिनाम**भ्यां प्रसिद्धिः, प्रतियोग्यभ्युपगमश्च सूच्यते । अपिचेतिवदनेकाव्ययतुल्यरूप एकशब्दो वा । यद्यपि, 'सत उत्कर्षाधानं संस्कार' इति भूतभाव्युपयोगिसंस्कारानुगतलक्षणं तथापि, स्वाध्यायस्य भूतोपयोगित्वासंभवात् भाव्युपयोगिसंस्कारलक्षणमत्रोक्तम् । संस्कारलक्षणानुपपत्त्या 'सकृत् जुहोती'त्यादिषु प्रत्ययस्यारभ्यावगतमपि कर्मत्वं भग्नमिति भावः । अत्र तु न तथाऽनुपपन्नमित्याह—**संस्कार्यत्वं चेति । चः** शङ्कानिवृत्तौ । कुत इत्यत्राह—**धर्मार्थेति । पुरुषार्थचतुष्टयतत्साधने**त्यनेन पूर्वोक्तव्याख्येयैकवाक्यतायै प्रयोजनवदर्थावबोधनमनुगतमिति दर्शितं भवति, पुरुषार्थपरत्वं वानुगतम्। धर्मादिषु हि पुरुषार्थत्वमनुगतं; इष्टतत्साधनयोरुभयोरपि पुरुषार्थत्वात्। यद्यपि, अर्थकामतदुपायेषु केचिल्लोकसिद्धाः तथापि, धनेशसुरेशादिविभूतिरूपातिशयितार्थकामतत्साधनानां, लोकसिद्धपशुपुत्रान्नादिश्रित्रादिसाध्यत्वस्य च लौकिकप्रमाणागोचरत्वात् पुरुषार्थचतुष्टयस्य वेदवेद्यत्वोक्तियुक्ता । **अवबोधित्वात्** । अनुष्ठानोपयिकबोधजनकत्वादिति भावः । अर्थावबोधकत्वस्य हुमादावव्याप्तत्वादाह—**जपादिनेति । स्वरूपेणापि अर्थज्ञानानुष्ठानाभ्यामृते** जप्यमानेनाक्षरमात्रेणापीत्यर्थः । **आदि**शब्दादध्यापनग्रहणम् । अनुष्ठानानुगुणं ज्ञानं, जपादि चाध्ययनसंस्कृतेन स्वाध्यायेनैवेत्युक्तं भवति । यद्वा, पुरुषार्थतत्साधनावबोधित्वेन सह तत्साधनत्वं **च**शब्देन समुच्चीयते । तत्साधनत्वं द्विधा—जपादिना, म्रियमाणेन स्वरूपेण चेति । अतोऽवान्तरसमुच्चेतव्यसमुच्चयपरोऽपिशब्दः ।

एवं नियमविधित्वं चोपपादितं भवति । अर्थज्ञानपर्यन्तत्वं किं शब्दस्वारस्याद्भ्युपगम्यते, उतार्थानुपपत्त्या—इति विकल्पमभिप्रेत्य तत्र शब्दस्वारस्यं प्रतिवदन्नध्ययनविधिनिरूपणमुपसंहरति—**एवमिति । मन्त्रवदिति** पृथङ्निर्देशो व्रतान्तर्भावेन, तदनन्तर्भावेन वाऽध्ययनोपकारकमन्त्राभिप्रायः । अस्ति हि 'शं नो मित्रा'दिमन्त्राणां व्रतानानुप्रवेशेनापि जपमात्रेणोपकारकत्वम्। **नियमाः** पूर्वोक्ताः । यद्वा, यथा बालस्योपनयनकाले सन्ध्योपासनादिकालेच विधीयमानमुच्चारणं नियमवदक्षरपठनमेव, नार्थधीसंपादनम्; नहि बालानां पूर्वमन्त्रार्थावबोधसंभवः, तद्वदिति । **अक्षरराशिग्रहणेति । स्वनियमकोच्चारणमध्ययनशब्दस्य मुख्यार्थः** 'वेदानां किंचिदधीत्य ब्राह्मणः, एकां शाखामधीत्य श्रोत्रियः, अङ्गाध्याय्यनूचानः, कल्पाध्यायी ऋषिः, कल्पसूत्रप्रवचनाध्यायी भ्रूण' इत्यादिप्रयोगात्। नहि स्वशाखैकदेशाध्यायिनोऽर्थज्ञानसंभवः; अङ्गाध्ययनस्य पृथगुपादानेन तद्विरहे अर्थज्ञानप्रसङ्गाभावात् । स्वाध्यायशब्दश्च नार्थज्ञानवाची, अपि तु स्वशाखामात्रवाचीति तत्कर्मत्वं स्वाध्यायस्यैव युक्तं, न तदर्थज्ञानस्य; अध्ययनस्य प्रयोजनाकाङ्क्षायां दृष्टे संभवत्यदृष्टकल्पनाऽयोगात्। अक्षरग्रहणस्यासन्नत्वात्, हुमादिष्वनुगतत्वाच्च तत्स्वीकारो युक्तः; व्यवहितत्वात्, असार्वत्रिकत्वाच्च नार्थज्ञानमित्यभिप्रायः । सकृदुच्चारणावधिकलव्यावृत्त्यर्थमक्षरग्रहणे **पर्यवसानमुक्तम्। मात्रच्चा** विधिव्यापारस्यार्थज्ञानपर्यन्तत्वव्युदासः । **पर्यवस्यतीति । यथा 'अग्नीनादधीते'**ति वाक्यमाधानमात्रपरं, न तूत्तरक्रतुविनियोगपरं, यथा च 'कारीर्यां वृष्टिकामो यजेत' इति वाक्यं वृष्टिसिद्धिपर्यन्तकर्मविशेषपरं, न तु वृष्ट्युपरितनोपयोगपरं तथेति भावः ॥

एवं शब्दस्वारस्यादर्थज्ञानपर्यन्तत्वं निरस्तम्, अथाऽर्थानुपपत्तिं परिहरति । त्रिधा चाऽनुपपत्तिशङ्का—विधेरक्षरग्रहणमात्रपरत्वे **महत्फलेनातया विनियुक्तस्य** स्वाध्यायस्यार्थपरत्वे प्रमाणाभावादविवक्षितार्थत्वं स्यात्, मीमांसायाः प्रवर्तकाभावादनारम्भ-

---

१ शमिता । २ नेति नास्ति आन्ध्रलिपिपुस्तके । ३ धर्मादि° । ४ °पर्यन्तम् ।

अध्ययनगृहीतस्य स्वाध्यायस्य स्वभावत एव प्रयोजनवदर्थावबोधित्वदर्शनात्, गृहीतात् स्वाध्यायादवगम्यमानान् प्रयोजनवतोऽर्थानापाततो दृष्ट्वा तत्स्वरूपप्रकारविशेषनिर्णयफलवेदवाक्यविचाररूपमीमांसाश्रवणीयत्वं स्यात्, अक्षरराशिग्रहणमात्रस्य दुःखरूपतया विधेः प्रयोजनपर्यवसानं न स्यादिति । एतच्छङ्कात्रयनिराकरणमुखेनाध्ययनविधेरर्थज्ञानपर्यन्ततां, तन्निमित्तां ब्रह्मविचारानारम्भशङ्कां च व्युदस्यन् वेदास्यैकप्रबन्धव्याख्यानरूपतया कर्मब्रह्मविचारयोरैकशास्त्र्यमपि दर्शयति—**अध्ययनगृहीतस्येति।** इह साङ्गमध्ययनं विवक्षितम्; **अधीतसाङ्गसशिरस्कवेदस्य, ननु च साङ्गवेदाध्ययनादिति**—पूर्वापरानुगुण्यात् । तेन हि प्रयोजनवदर्थापातप्रतीतिसिद्धिः । **अर्थाः** यज्ञोपासनादयः, ते स्वर्गमोक्षादिप्रयोजनवन्तः । **प्रयोजनवदर्थ**शब्देन काकदन्तवदपरीक्ष्यलशङ्काव्यावृत्तिः । **प्रयोजनवदर्थावबोधित्वदर्शनादिति ।** अनेन विधेः परम्परया पुरुषार्थपर्यवसायित्वमुक्तं भवति । अध्ययनस्य साक्षात्प्रयोजनमक्षरराशिग्रहणमित्युक्तम् **अध्ययनगृहीतस्येति** पदेन । अयमर्थः—किं साक्षात्पुरुषार्थपर्यवसायित्वं विधेर्विवक्षितम्, उत परम्परया । साक्षात्प्रयोजनपर्यवसायित्वं विधेरर्थज्ञानपर्यन्तत्वेपि नोपपद्यते; अनुष्ठानापूर्वद्वारा स्वर्गस्यैव प्रयोजनत्वात्, अध्ययनविधेः स्वर्गपर्यन्तत्वानभ्युपगमाच्च । परम्परया चेद्, अस्मत्पक्षेऽपि संभवतीति । **स्वभावत** इति शब्दस्य बोधकलशक्तिस्वाभाव्यादित्यर्थः । व्युत्पन्नपदपदार्थं प्रति शब्दस्यार्थावबोधकत्वं स्वाभाविकमिति लोकसिद्धम् । **एव**कारो विधिनैरपेक्ष्यपरः । अन्यत्र विनियोगस्तु न स्वाभाविकं शब्दस्यार्थपरत्वं निरुणद्धि, जपविधिवत् । 'याजयित्वा प्रतिगृह्य वाऽनश्नन् त्रिः स्वाध्यायं वेदमधीयीत त्रिरात्रं वा सावित्रीं वेदमेव जपेन्नित्य'मित्यादिविधानं हि न वेदस्यार्थपरत्वं निवारयति । स्वाध्यायः स्वतोऽर्थबोधकश्चेत् किं मीमांसयेत्यत्राह—**गृहीतादिति। गृहीतात्** गृहीतमात्रात्; अध्ययनगृहीतस्येत्युक्तेः । तेन मीमांसाख्येतिकर्तव्यतारहित्यं विवक्षितम् । आपाततः प्रतीतेः संशयविपर्ययसहत्वात्तन्निराकरणाय मीमांसेति भावः । अध्ययनगृहीतस्येत्यादिना वेदस्य बोधकलस्वभावत्वमुक्तं, तत्र **प्रयोजनवदर्थ**शब्दः परम्परया पुरुषार्थपर्यवसानज्ञापनाय । उपरि तन्निमित्तापातप्रतीतिजनकतायाः सहकारिवैकल्यनिबन्धनत्वम् इत्यपौनरुक्त्यम् । नहि वेदस्यापातप्रतीतिजनकत्वं स्वभावः; प्रमितिजनकत्वस्वभावत्वात्, मीमांसाख्यपरिकरशून्यस्य तदभावो न श्रुतेः प्रमितिजनकत्वस्वभावविरोधी । यथा आलोकादिसहकारिविरहे रूपाद्यनुपलम्भश्चक्षुरादीनां रूपादिसाक्षात्कारजनकत्वस्य स्वाभाविकत्वं न विहन्ति, तद्वद् आपातप्रतीतावपि प्रयोजनवत्त्वेन प्रतीतिरस्तीति दर्शयितुं पुनः **प्रयोजनवदर्थ**शब्दः । प्रयोजनवदर्थापातप्रतीतिर्हि तन्निर्णयरागं जनयति, नहि निष्प्रयोजनकाकदन्ताद्यापातप्रतीतिस्तन्निर्णयरागं जनयति । **आपाततोऽवगम्यमानान् दृष्ट्वे**त्यन्वयः । अर्थानामवगम्यमानत्वं दृष्ट्वेत्यर्थः, स्वात्मनो वुद्युत्पत्तिं दृष्ट्वेतिवत् । प्रयोजनवदर्थापातप्रतीतेः स्वानुभवसिद्धत्वान्न तदपह्नवः शक्य इति भावः ॥

व्याकरणादिफलस्वरूपविलक्षणे मीमांसाफलस्वरूपे दर्शयति—**तत्स्वरूपेति। स्वरूपविशेषाः** अङ्गिनः, **प्रकारविशेषाः** अङ्गानि । पूर्वपक्षोक्तस्वरूपप्रकारतः सिद्धान्तितस्वरूपप्रकारयोर्वैषम्यं **विशेष**शब्देन विवक्षितम् । प्रयोजनवदर्थ–स्वाध्याय–वेदमीमांसा–शब्दाः पूर्वोत्तरभागसाधारणाः । **स्वयमेव,** न तु विधिना । तदुपपादक**मधीतवेदः पुरुष** इति पदद्वयम् । **अधीतवेद** इत्यध्ययनविधिव्यापारस्यानुष्ठितांशे पर्यवसितत्वान्मीमांसायां तस्याप्रवर्तकत्वं द्योतितम् । चेतनत्वात् फलवदर्थापातप्रतीत्या स्वयमेव प्रवर्तत इति **पुरुष**शब्दस्याभिप्रायः । नन्वक्षरराशिग्रहणपर्यन्तत्वपक्षे रागतः प्रवृत्तिरपि नोपपद्यते 'वेदाङ्गानि समस्तानि कृष्णपक्षेषु संपठेत्, निष्कारणः षडङ्गो वेदोऽध्येयः, वेदमध्यापयेद्विजः, सकल्पं सरहस्यं चे'त्यादिविहिताङ्गाध्ययनस्याप्यक्षरग्रहणपर्यन्ततया व्याकरणादेरर्थावबोधाभावात्, प्रकृतिप्रत्ययज्ञानाभावेनापातप्रतीत्यभावात्—नैवम्; व्याकरणादीनां वेदाङ्गत्वात्, अकिंचित्करस्याङ्गत्वायोगात्, दृष्टकिंचित्कारे संभवति तत्प्रहाणेनादृष्टकल्पनायोगात्, पदाद्यवबोधरूपदृष्टकिंचित्कार एव स्वीकार्य इत्यङ्गत्वान्यथानुपपत्त्यैव व्याकरणाद्यर्थावगमसिद्धेः प्रयोजनवदर्थापातप्रतीतिसिद्ध्या मीमांसारम्भोपपत्तेः । **अधीतवेदः पुरुषः स्वयमेव प्रवर्तत** इत्यनेन 'अथातो धर्मजिज्ञासे'ति सूत्रमप्यर्थाद्व्याख्यातं भवति । विधेरक्षरराशिग्रहणपर्यन्तत्वे प्रवर्तकाभावात्, स्वाध्यायस्यार्थपरत्वे प्रमाणाभावाच्च मीमांसा नारम्भणीयेति पूर्वः पक्षः, साङ्गाध्ययनानन्तरं शब्दस्य स्वतोऽर्थावबोधित्वदर्शनात्—प्रवर्तकान्तराभावेपि रागात्प्रवृत्युपपत्तेरारम्भणीयेति सिद्धान्त इति ॥

ननु कर्मविचारस्य रागप्राप्तत्वे 'अधीत्य स्नायादि'ति समावर्तनस्मृतिर्बाधिका स्यात्, वैधत्वे स्मृतेरपि श्रुतेर्बलीयस्त्वात् स्मृतिरवकाशप्रदा स्यात्—नैवम्; अध्ययनविधेरक्षरराशिग्रहणपर्यन्तत्वार्थज्ञानपर्यन्तत्वयोः किमभिप्रेत्यैतदुक्तं, यद्यर्थज्ञानपर्यन्तत्वं, तर्ह्यधीत्य स्नायादिति स्मृतिगताध्ययनशब्दस्य तत्तुल्यार्थत्वान्न विरोधः । यद्यक्षरराशिग्रहणपर्यन्तत्वं, ततोऽपि तुल्यार्थत्वान्न विरोधः । किंच–विरोधे सत्यपि प्रत्यक्षश्रुतिरप्यस्ति यथा छान्दोग्ये–'आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्त्य कुटुम्बे शुचौ देश' इत्यादिः, ततश्च स्मृतिवचनोपेता स्नानश्रुतिर्बलीयसी, तस्मात् श्रुतिस्मृतिवचनयोः प्राबल्यदौर्बल्यकथनं निरर्थकम् । नन्वेवं श्रुत्यापि रागतः प्रवृत्तिर्बाध्यत इति चेन्नः समावृत्तस्यापि रागतः श्रवणोपपत्तेः । नन्वध्ययनानन्तरभावित्वे समावर्तनस्य तत्पूर्वकगृहस्थकर्मानुष्ठानानवरुद्धश्रवणावसरालाभान्मीमांसानारम्भः प्रसज्यते—नैवम्;

१ आपातप्र० । २ °न्तितत्व° ।

समावृत्तस्यापि श्रोतुः श्रावयितुश्चावसरसंभवात्। आचार्यस्य ह्यध्यापनं विहितं, न तु गृहस्थस्य श्रवणमिति—चेन्न; अध्यापनस्य याजनप्रतिग्रहवद्गाग्राप्तत्वात्। रागप्राप्तमपि 'प्रतिग्रहादिना धनमर्जये'दित्यादिशास्त्रानुमतमध्यापनमिति चेत्, श्रवणमपि शास्त्रानुमतम्: अनिषिद्धत्वात्, यज्ञानुष्ठानोपयुक्तत्वाच्च॥

ननु 'संवत्सरे संवत्सरे द्वौ द्वौ मासौ समाहित आचार्यकुले वसेन् भूयः श्रुतिमिच्छन्निति श्वेतकेतु'रित्यारभ्य 'तच्छास्त्रैर्विप्रतिषिद्धं निवेशे हि वृत्ते नैयमिकानि श्रूयन्ते अग्निहोत्रमतिथय'इत्यादिना श्रवणं गृहस्थस्य निषिद्धमिति—चेन्न; साकल्येन मासद्वयं गुरुकुलवासस्यानुष्ठानोपरोधित्वेन तस्यैव निषिद्धत्वात्। 'निवेशे हि वृत्ते नैयमिकानि श्रूयन्ते अग्निहोत्रमतिथय'इति ह्युच्यते। आचार्यस्याप्यनुष्ठानानुपरोधेन श्रावणस्य हि शास्त्रानुमतत्वम्, अतोऽनुष्ठानानुपरोधोपरोधप्रयुक्तानुमत्यनुमतिविषयत्वं श्रावणस्य. श्रवणस्य च तुल्यम्। अत एव हि युधिष्ठिरादीनां गार्हस्थ्यनिष्ठानामपि भीष्मादिभ्यः श्रवणं भारतादिषु प्रतिपाद्यते। यद्यपि, श्रावणकाल एव श्रवणकालः तथापि, श्रोतुरुदकाहरणकाष्ठसंपादनादिभिरनुष्ठानोपरोध इति—चेन्न; अध्ययनविधिप्रयुक्तस्योदकाहरणादेस्तन्निवृत्त्या निवृत्तत्वात्। वित्तस्यात्मादिप्रयोजनान्तरस्पृहया, शिष्यस्नेहेन च गुरोः श्रावणमुपपद्यते, श्रावयितुर्ज्ञानार्थत्वादनुष्ठानमुपपद्यते, श्रोतुरज्ञानार्थत्वान्नेति—चेन्न; उपनयनप्रभृत्यनुष्ठानवद्धितैषिवचनादनुष्ठानोपपत्तेः। तर्हि हितैषिवाक्यमेव स्यात्, किमर्थं मीमांसाश्रवणमिति चेत्, हितैषिवचनस्य प्रमाणमूलत्वनिश्चयार्थं, प्रष्टॄणामपरेषां स्वयमुपपादनार्थं च हितैषिवचनादनुष्ठानसंभवे शूद्रादीनामप्यनुष्ठानप्रसङ्ग इति—चेन्नः 'न शूद्राय मतिं दद्यात्, न चास्योपदिशेद्धर्मं नचास्य व्रतमादिशे'दित्यादिनिषेधवचनसद्भावात्। नहि यज्ञादिकं ब्राह्मणाः शूद्रायोपदिशन्ति। न च शुश्रूषाविरहितशूद्रविशेषविषयत्वेनेदृशनिषेधवचनानां संकोचः कार्यः; संकोचकाभावात्। नहि शूद्रस्य यज्ञाद्यर्हत्वविषयं वचनान्तरं दृश्यते। किंच—यजमानेन कृत्स्नवेदस्य, मन्त्रविशेषाणां च जप्यतावचनात्तेषामध्ययनलभ्यत्वात्, अध्ययनस्य चोपनयनसापेक्षत्वात्, उपनयनस्य च त्रैवर्णिकाऽधिकारत्वान्न शूद्राद्यधिकारप्रसङ्गः। ननूपनयनविधिस्त्रैवर्णिकाध्ययनविषयतया नेतुं शक्यते, अतः शूद्रस्याध्ययनमुपनयननिरपेक्षमिति तस्य याजमानाद्युच्चारणसंभव इति—चेन्नः 'तस्माच्छूद्रसमीपे नाध्येतव्यं, अथ हास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम्, उदाहरणे जिह्वाच्छेदो, धारणे शरीरभेद' इत्यादिना शूद्रस्य वेदश्रवणादेर्निषिद्धत्वात्। अध्ययनं चेदुपनयनाङ्गकं तत् त्रैवर्णिकाधिकारमेवेति, न तत्र शूद्राद्यधिकार इति मन्त्रविशेषोच्चारणानुपपत्तेः। न हितैषिवचनाच्छूद्रादेः क्रत्वनुष्ठानप्रसङ्ग इति—नापशूद्राधिकरणविरोधः। किंच यथा 'यावज्जीवमग्निहोत्रं जुहोती'त्यादिविधिः 'न स्नाङ्गं स्वव्यवधायक'मिति न्यायात् स्नोपयोगिनोऽप्यर्थार्जनादेः रागप्राप्तस्याप्यवसरप्रदः, तथाऽनुष्ठानोपयोगिमीमांसाश्रवणस्य समावर्तनविधिरवकाशप्रदः स्यात्। क्त्वाप्रत्ययस्य च समानकर्तृकत्वपूर्वकालीनत्वमात्रमर्थः, न त्वानन्तर्यम्। नन्वानन्तर्यमेव विधेयं, न चेद्विधेयमर्थः; दुःस्वात्मकगुरुकुलवासनिवृत्तेः स्वतः प्राप्तत्वादिति—चेन्न; आनन्तर्यपरत्वेपि विधिवैयर्थ्यात्, तच्च गुरुकुलवासस्य दुःस्वात्मकत्वादेव। अतः सनियमकसंस्कारविशेष एव स्नानमिति तद्विधेयं, नत्वानन्तर्यम्। तस्मादधीत्येति श्रुतेर्न विरोधः। तस्मात्स्वयमेव प्रवर्तते॥

ननु 'यो ह वा अविदितार्षेयच्छन्दोदैवतेन मन्त्रेण यजति याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्तं वाऽऽपद्यते प्रवामीयते पापीयान् भवति यातयामान्यस्य छन्दांसि भवन्ति। अथ यो मन्त्रे मन्त्रे वेद सर्वमायुरेति श्रेयांश्च भवति अयातयामान्यस्य छन्दांसि भवन्ति तस्मादेतानि मन्त्रे मन्त्रे विद्या'दिति श्रुत्या 'अविदित्वा ऋषिं छन्दो दैवतं योगमेव च। योऽध्यापयेज्जपेद्वापि पापीयान् जायते तु स' इति स्मृत्युपबृंहितयाऽर्थज्ञानविधानं फलितम्। मन्त्रप्रतिपाद्यदेवताज्ञानस्यात्र विहितत्वात्, तुल्यन्यायतया दैवतशब्दस्य मन्त्रप्रकाश्यानुष्ठेयार्थप्रकाशनार्थतया च विध्यादिभागार्थज्ञानस्यापि विधेयत्वापत्तेः, **योगो** मन्त्राणां विनियोगः, तज्ज्ञानस्य ब्राह्मणभागार्थज्ञानसापेक्षत्वाच्चेति—चेन्न; प्रतिग्रहर्तुसंवेशनादेरिव रागप्राप्तत्वानिवृत्तेः। नहि ब्राह्मणः प्रतिग्रहादिना धनमार्जयेत्। 'ऋतावुपेया'दिति वचनं रागतः प्राप्तिं प्रतिग्रहादेर्निरुणद्धि॥

किंचानेनैव वाक्येनार्थज्ञानं विहितमित्यध्ययनविधेरर्थज्ञानपर्यन्तत्वं नाश्रयणीयं, यथा क्रतूनां विध्यन्तरसिद्धत्वादाधानविधेरुत्तरक्रत्वपेक्षापर्यन्तत्वं नाश्रीयते तद्वत्। न चेदं[1] वाक्यमध्ययनस्यार्थधीपर्यन्तत्वमवगमयति, नच स्वयमर्थज्ञानं विधत्ते; अर्थज्ञानस्याऽन्यतः सिद्धत्वात्, अत्र मन्त्रमात्रस्य ऋष्यादिविज्ञानविधानप्रतीतेश्च। ततश्च वेदस्य साङ्गतयाऽध्येतव्यत्वं सिध्येत्, न त्वर्थज्ञानम्। छन्दोदेवतादिज्ञानस्य छन्दःकल्पव्याकरणनिरुक्तादिसापेक्षत्वात्, मीमांसानपेक्षत्वाच्च विनियोगविषयसन्देहे सति मीमांसापेक्षा स्यादिति चेत्, तर्हि संदेहापाकरणाय रागतः प्रवृत्तिः स्यात् 'यदधीतमविज्ञातं निगदेनैव शब्दयेत्। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्' इतीदमपि वचनं नार्थज्ञानपर्यन्तत्वमध्ययनविधेरवगमयति; अधीतमविज्ञातमित्यत्रैवाध्ययनार्थज्ञानयोः पृथग्विधेर्दर्शनात्, रागप्राप्तस्य विधानुमशक्यत्वाच्च। 'वेदानां किंचिदधीत्य ब्राह्मणः, एकां शाखामधीत्य श्रोत्रियः, अङ्गान्यध्यनूच्य'[2] इत्यादयः कल्पसूत्रप्रवोपाद्य अध्ययनादर्थज्ञानं पृथग्भूतमवगमयन्ति। अतः श्रवणस्य दुःखरूपत्वेन, तन्निवृत्तितया वा, अर्थार्जनादन्यपरतया वा यो न शृणोति तत्प्ररोचनार्थमिदं **यदधीत**मित्यादिवचनम्। यथा 'अक्षैर्मा दीव्यः

---

१ अनुरोधेन। २ °दर्च°। ३ °तुविधिप°। ४ °वेदत्वा°।

णेऽधीतवेदः पुरुषः स्वयमेव प्रवर्तते। तत्र कर्मविधिस्वरूपे निरूपिते कर्मणामल्पास्थिरफलत्वं दृष्ट्वाध्ययनगृहीतस्वाध्यायैकदेशोपनिषद्वाक्येषु चामृतस्वरूपानन्तस्थिरफलापातप्रतीतेस्तन्निर्णयफलवेदान्तवाक्यविचाररूपशारीरकमीमांसायामधिकरोति। तथाच वेदान्तवाक्यानि केवलकर्मफलस्य क्षयित्वं ब्रह्मज्ञानस्य चाक्षयफलत्वं दर्शयन्ति **'तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते'** (छा. १।८।१।६), **'अन्तवदेवास्य तद्भवति'** (बृ. ३।८।१०), **'नह्यध्रुवैः प्राप्यते ध्रुवं कर्मभिः'** (का. २।१०), **'प्लवाह्येते अदृढा यज्ञरूपाः'** (मु. १।२।७), **परीक्ष्यलोकान्कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्।**

कृषिवित्कृषस्व वित्ते रमस्व बहु मन्यमान' इति वाक्यं तन्द्रालुप्ररोचनार्थम्; प्ररोचनया हि प्रवृत्तिरुत्कटा स्यात्। नह्येतावता कृषेः, अर्थार्जनस्य च रागप्राप्तत्वभङ्गेन सर्वत्र वैधत्वमेव स्यात्, तद्वदिदमपि वचनं श्रवणस्य रागप्राप्तत्वं न विहन्ति, तस्माद्रागत एव प्रवर्तते। एवमन्यतः प्रवृत्तौ संभवन्त्यां शब्दशक्त्युल्लङ्घनेन मीमांसाश्रवणस्य विधेयत्वकल्पनमयुक्तम्॥

ऐकशास्त्र्यं, रागतः प्रवृत्तिश्चास्तु कथं पौर्वापर्यनियम इत्यत्राह—**तत्रेति। तत्र** वेदे। **कर्मविधिस्वरूपे निरूपित इति।** कर्मभागस्य वेदोपक्रमत्वादधीतक्रमेणैव निरूपणं प्राप्तमिति कर्मविचारस्य पूर्वभावित्वमिति भावः। ननु—नहि कर्मणामल्पास्थिरफलत्वं, अनन्तस्थिरफलत्वं च पूर्वपक्षसिद्धान्तरूपेण क्वचिन्निरूपितं, तत्कथमल्पास्थिरफलत्वावगतिरित्यत्राह—**स्वरूपे निरूपित इति।** केवलं कर्मविधिस्वरूपमेव निरूपितम्, अल्पास्थिरफलज्ञानं चावृत्तिविधानादिना फलितमिति भावः। यद्वा—कर्मविधिस्वरूपं निरूपितं, न त्वाराध्यपरदेवतेति भावः। तदाराधनत्वेन कृते ह्यनन्तस्थिरफलत्वसिद्धिः॥

अध्ययनगृहीतस्वाध्यायेति। अध्ययनस्य कृत्स्नस्वाध्यायविषयत्वात्, उपनिषदश्च स्वाध्यायशब्दान्तर्गतत्वादिति भावः। **एकदेश**शब्देनैकप्रबन्धांशत्वं सूचितम्। साधारणवेदशब्दनिर्दिष्टे शब्दराशावनन्यपरं प्रदेशं **पृथङ्निर्दिशत्युपनिष**च्छब्देन। **वेदान्त**शब्देन विचारपौर्वापर्यनियमहेतुर्दर्शितः। **मीमांसा**शब्दोक्ते व्याख्याने प्रदेशभेदं विशिनष्टि **शारीरक**पदेन। 'अन्नवानन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेने'त्याद्युक्तानुषङ्गिकाल्पास्थिरफलव्यावृत्त्यर्थ**ममृतत्वरूप**शब्दः। आनुषङ्गिकाणामल्पास्थिरफलत्वेपि प्रधानफलस्यानन्तस्थिरफलत्वेनापातप्रतीतिरस्तीत्यर्थः। कर्ममीमांसासंस्कृतमनस्कत्वादत्राप्यानुषङ्गिकं, प्रधानं च फलं संभवतीति श्रोतुः प्रतीयत एव॥

ननु फलत्वादिदमप्यनित्यमिति बुद्धिः स्यात्—नैवं; विपक्षे बाधकाभावात्। यथा भौमसुखात् स्वर्गादिसुखं विलक्षणं प्रतिपन्नं, तत्रापि परस्परवैलक्षण्यं देशकालस्वरूपभेदात् प्रतिपन्नं, तथैव तस्मादपि विलक्षणं सुखं संभवतीत्यतीव रागजननायास्यापि प्रतीतिः स्यात्। **अधिकरोति** अधिकारी भवति। एवं कर्मविचारकृदेवाधिकारी भवति, न तु साधनचतुष्टयवानित्यभिप्रायः। एवमैकशास्त्र्यक्रमनियमारम्भणीयत्वान्युपपादितानि, कैर्वेदान्तवाक्यैरारम्भणीयत्वौपयिकापातप्रतीतिरित्यत्राह—**तथाचेति।** यथा सूत्रं व्याख्यातं तथेत्यर्थः। **चः** शङ्कानिवृत्तौ, प्रसिद्धौ वा। केवलशब्देन ज्ञानाङ्गकर्मव्यावृत्तिः॥

ननु कर्मविचारेण निर्णीतेऽपि कर्मफलक्षयिष्णुत्वे पुनश्चाल्पास्थिरफलत्वप्रतीतिजनकवाक्यानि किमर्थमुदाहियन्ते, अनन्तस्थिरफलापातप्रतीतिजनकान्येव हि वाक्यान्युदाहर्तव्यानि; उच्यते—अधिगतकर्मणः पुरुषस्य हि निर्णीतार्थसंवादिवाक्यदर्शनात् कर्मफलास्थिरत्वबह्वज्ञानफलाक्षय्यत्वस्य प्रामाणिकत्वं संभवतीति श्रद्धास्थिरीकरणार्थम्। **तद्यथेति।** लोक्यत इति **लोकः** फलम्। 'अन्तवदेवास्य तद्भवती'त्यनेन ज्ञानविधुरकर्मणोऽनेककालानुष्ठितस्य बहुविधस्यापि क्षयित्वमुक्तं **भवति**; 'यो ह वा एतदक्षरं गार्ग्यविदित्वास्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राणी'त्येतद्वाक्यपूर्वकत्वात्तस्य वाक्यस्य। अन्तवदित्युक्ते क्रियाखरूपस्यान्तवत्त्वं लोकसिद्धतयाऽनुपदेश्यमिति फलस्यैवान्तवत्त्वमर्थसिद्धं स्फुटीकर्तुं पूर्वं **तद्यथेति** वाक्योपादानम्। सांसारिकफलस्याऽध्रुवत्वं स्यात्, कर्मभिरेव ध्रुवं फलं संपाद्यतामिति शङ्कान्युदासायोपादत्ते—**न ह्यध्रुवैः प्राप्यत इति। ध्रुवं त**दिति वाक्यखण्डः। तदुपपादकत्वेन प्रतीयमानं वाक्यान्तरमुदाहरति—**प्लवा ह्येते अदृढा यज्ञरूपा इति।** संसारपारं तारयितुं नालं; मध्ये भङ्गुरत्वादित्यर्थः। सूत्रयोजनानुगुणतरं कर्मणामल्पास्थिरफलत्वं, ब्रह्मोपासनस्यानन्ताक्षयफलत्वं च दर्शयद्वाक्यमुपादत्ते—**परीक्ष्य लोकानिति।** अस्मिन्वाक्ये न्यायसिद्धार्थानुवादेन गुरूपसत्तिर्विधीयते। **कर्मचितान्** कर्मसंचितान्—कर्मसंपाद्यान्। **परीक्ष्य** मीमांसान्यायैर्निरूप्य। **ब्राह्मणः** अधीतसाङ्गसशिरस्कवेदः। य इत्यध्याहार्यं, **स** इत्युत्तत्र श्रवणात्। **अकृतः** नित्यः। अत्र पुरुषो विशेष्यः; लिङ्गवशाद् अक्षरं पुरुषमित्यनन्तरोक्तेश्च। **कृतेन** कर्मणा। **नास्ति** न सिध्यति—न लभ्यते। इतिकरणं द्रष्टव्यम्। **इति** यो निर्वेदमायात् सः तद्विज्ञानार्थं गुरुमेवाभिगच्छेत्। **एव**कारेण नियमविधित्वं गम्यते। **समित्पाणिः** न रिक्तपाणिः। 'रिक्तपाणिस्तु नोपेयाद्राजानं दैवतं गुरु'मिति हि स्मर्यते। **श्रोत्रियं** श्रुतवेदान्तं, **ब्रह्मनिष्ठं** ब्रह्मसाक्षात्कारवन्तम्। श्रुतवेदान्तोऽपि रुचिभेदादब्रह्मनिष्ठो नोपगन्तव्य इति

तस्मै सविद्वानुपसन्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय । येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्' (मु. १।२।१२-१३), **'ब्रह्मविदाप्नोति परम्'** (तै. २।१।१)', **'न पुनर्मृत्यवे तदेकं पश्यति, न पश्यो मृत्युं पश्यति'** (छा ७।१६।२), **'स स्वराड् भवति'** (छा. ७।२५।२), **'तमेवं विद्वानमृत इह भवति'** (नृ. पू. १।६), **तमेवं विदित्वातिमृत्युमेति नान्यः पन्था अयनाय विद्यते** (श्वे. ३।८); **पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति'** (श्वे. १।६) इत्यादीनि । ननु च साङ्गवेदाध्ययनादेव कर्मणां स्वर्गादिफलत्वं, स्वर्गादीनां च क्षयित्वं, ब्रह्मोपासनस्यामृतफलत्वं च ज्ञायत एव, अनन्तरं मुमुक्षुर्ब्रह्मजिज्ञासायामेव प्रवर्ततां, किमर्थो धर्मविचारापेक्षा । एवं तर्हि शारीरकमीमांसायामपि न प्रवर्तताम् ; साङ्गवेदाध्ययनादेव कृत्स्नस्य ज्ञातत्वात् । सत्यम्—आपाततः प्रतीतिर्विद्यत एव, तथापि न्यायानुगृहीतस्य वाक्यस्यार्थनिश्चायकत्वादापातप्रतीतो-

---

भावः । **अभिगच्छे**दित्यन्वयः । **शमो** बाह्येन्द्रियनियमनरूपः; प्रशान्तचित्तायेत्यन्तःकरणनियमनस्योक्ततया पारिशेष्यात् । एतेन श्रवणोपयुक्तमवधानं विवक्षितं, न तृष्णासनोपयुक्तात्यन्तेन्द्रियजयादिः । तस्मै स विद्वान् प्रोवाचेत्यन्वयः । **येनेति** निर्देशो विज्ञानाभिप्रायः: **तद्विज्ञानार्थ**मिति हि प्रकृतम् । सामान्यतः कारणाभिप्रायो वा, लिङ्गव्यत्ययो वा । **अक्षरं** स्वरूपेणाविकारम् । **सत्यं** गुणतोप्यविकारम् । आभ्यामविज्ञीवव्यावृत्तिः । **तां** ब्रह्मविद्याम् । **प्रोवाच** प्रब्रूयादित्यर्थः । इति वेदान्तसारे व्याख्यातम् । छन्दसि लडलङ्लिट इति लिट् ॥

ननु 'प्रशान्तचित्ताय शमान्विताये'ति शमादेः पूर्ववृत्तत्वं प्रतीयते—न; श्रवणोपयोग्यवधानमात्रस्य विवक्षितत्वात् । नात्रोपासनाङ्गभूतात्यन्तविषयवैतृष्ण्यं विवक्षितं; तद्धि शमदमाद्युपेतः स्यादिति निरूपयिष्यते । अतो निरूप्य संपाद्यैस्तैर्निरूपणात् प्रागेव विशिष्टत्वमनुपपन्नम् । श्रुतिश्च शास्त्रजन्यज्ञानवतः पुरुषस्य तदुत्तरभाविशमाद्यङ्गकमुपासनं दर्शयति—'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्ये'दिति । अत्र **ह्येवंविदिति** शास्त्रजन्यज्ञानत्वमुक्तम् । **भूत्वा पश्ये**दित्युपासनस्य शमाद्यङ्गकत्वं स्थापितम् । केवलानन्तस्थिरफलपरवाक्यान्युदाहरति—**ब्रह्मविदिति** ॥

अत्रानुवाके 'यतो वाचो निवर्तन्त' इति श्रवणादनन्तस्थिरफललसिद्धिः । प्राप्यस्य ब्रह्मणोऽनन्तस्थिरत्वेऽपि प्राप्तेः कादाचित्कलशङ्काव्यावृत्त्यर्थमपुनर्निवृत्तिमाह—**न पुनरिति** । यद्वा, विद्ययाऽनन्तस्थिरफलरूपब्रह्मप्राप्तिमाह—**ब्रह्मविदिति** । विद्यया ब्रह्मप्राप्तेः प्रतिबन्धनिवृत्तिपूर्वकत्वमाह—**न पुनरिति** । **मृत्युः** प्रमादः, मोहो वा । 'मोहो मृत्युः संमतो यः कवीनां, प्रमादं वै मृत्युमहं ब्रवीमी' त्युभयत्र मृत्युशब्दव्यपदेशात् । **प्रमादो** यथाऽवस्थितात्मस्वरूपस्याज्ञानम् । **मोहो** भ्रान्तिज्ञानं; दिङ्मोहइत्यादिव्यपदेशात् । न मृत्युनिवृत्तिमात्रमेव, तत्कार्यमपि निवर्तत इत्याह—**न पश्यो मृत्युं पश्यतीति** । अस्य वाक्यस्योपरि 'न रोगं नोत दुःखता'मिति हि श्रूयते । **न पुनरि**त्यादिवाक्यं ब्रह्मणि दृष्टे मृत्युप्रमुखनिवृत्तिरिति ज्ञापनार्थम् । न पश्यो मृत्युमित्यत्रापि **पश्य**—शब्दस्य ब्रह्मदर्शीत्यर्थः; तदेकं पश्यतीत्यनन्तरोदाहृतवाक्ये विषयस्य दर्शितत्वात् । **स स्वराड्भवतीति** । कर्मवश्यो न भवतीत्यर्थः । 'स्वराट् स्वतन्त्रो विज्ञेय' इति नैघण्टुकाः । **तमेव विद्वा**नितिवाक्येन निर्विशेषचिन्मात्रज्ञान-देवतान्तरोपासनाद्युपायान्तरव्यावृत्तिसिद्धिः; पुरुषोत्तमोपासनस्यैवोपायतयोक्तत्वात् । तदुपासनरूपज्ञानं च नात्मैक्यविषयं, अपि तु पृथक्त्वविषयमिति दर्शयति—**पृथगात्मानमिति** । **मत्वा** ज्ञात्वा । **ततः** पृथक्त्वज्ञानात् । **तेन जुष्टः** प्रीतिविषयीकृतः । अनुगृहीतोऽमृतत्वमेतीत्यर्थः । **इत्यादीनि वेदान्तवाक्यानी**ति पूर्वेणान्वयः ॥

उदाहृतस्पष्टार्थवाक्यमात्रतृप्तः कश्चिच्चोदयति—**ननुचेति** । पूर्वत्र चोद्यान्तराणां कण्ठोक्त्यभावेपि परिहारकण्ठोक्त्या तान्यभिप्रेतानि, अतश्चशब्देन तैरर्थसिद्धैः सह समुच्चयो युक्तः । **साङ्गेति** । कर्मज्ञानपूर्ववृत्तत्ववादिनापि साङ्गाध्ययनस्यापेक्षितत्वं स्वीकृतमिति तदधिकव्युदासार्थ **एव**कारः । अध्ययनस्य साङ्गत्वादङ्गानां चार्थज्ञानहेतुत्वान्मीमांसानिरपेक्षं स्वर्गादेरेव केवलकर्मफलत्वं, स्वर्गादेश्च क्षयित्वं, ब्रह्मोपासनस्याक्षयफलत्वं च ज्ञायत इत्यर्थः । **ब्रह्मोपासनस्ये**त्यादिग्रन्थो दृष्टान्ताभिप्रायः । **ज्ञायत एवेत्येव**कारो ज्ञातत्वसंप्रतिपत्तिसूचकः । ज्ञानसामग्री हि सिद्धेति भावः । ततः किमित्यत्राह—**अनन्तरमिति** । कर्मणोऽल्पास्थिरफलत्वज्ञानेन मुमुक्षासिद्ध्यर्थं हि कर्मविचारः, तन्निरपेक्षमेवाल्पास्थिरफललज्ञानान्मुमुक्षासिद्धेर्ब्रह्मजिज्ञासैव कर्तव्या, धर्मविचारे प्रयोजनाभावादित्यर्थः ॥

परिहरति—**एवमिति** । **एवं तर्हि** उदाहृतवाक्यमात्रतृप्तोसि चेत्, **कृत्स्नस्ये**ति । ब्रह्मणोपीति भावः । वेदान्तवाक्यान्यपि स्फुटार्थानि ह्यस्माभिरुदाहृतानि, तेषामर्थोऽपि मीमांसानपेक्षं ज्ञायते, अतोऽनन्तस्थिरफलज्ञानाय न ब्रह्मविचारः कर्तव्य इत्यर्थः । **सत्यमि**त्यर्धाङ्गीकारे । आपातप्रतीतावभ्युपगमः, ब्रह्मविचारनैरपेक्ष्येऽनभ्युपगमः । **आपातेति** । **आपातप्रतीति**रज्ञान-

ऽप्यर्थः संशयविपर्ययौ नातिवर्तते, अतस्तन्निर्णयाय वेदान्तवाक्यविचारः कर्तव्य इति चेन्; तथैव धर्मविचारोपि कर्तव्य इति पश्यतु भवान ।

लघुपूर्वपक्षः ।

ननु च ब्रह्मजिज्ञासा यदेवं नियमेनापेक्षते तदेव पूर्ववृत्तं वक्तव्यम । न धर्मविचारापेक्षा ब्रह्मजिज्ञासायाः; अधीतवेदान्तस्यानधिगतकर्मणोपि वेदान्तवाक्यार्थविचारोपपत्तेः । कर्माङ्गाश्रयाण्युद्गीथाद्युपासनान्यत्रैव चिन्त्यन्ते तदनधिगतकर्मणो न शक्यं कर्तुमिति चेन्; अनभिज्ञो हि भवान शारीरकशास्त्रविज्ञानस्य । अस्मिन् शास्त्रेऽनाद्यविद्याकृतविविधभेददर्शननिमित्तजन्मजरामरणादिसांसारिकदुःखसागरनिमग्नस्य निखिलदुःखमूलभूतमिथ्याज्ञाननिवर्हणायात्मैकत्वविज्ञानं प्रतिपिपादयिषितम् । अस्य हि भेदा-

---

निवृत्तिमात्रेण संशयविपर्ययसहं ज्ञानम् । संशयविपर्ययौ च—कारणवाक्यगत**सद्ब्रह्मात्माकाशप्राणवैश्वानरा**दिशब्दैरर्थतत्त्वस्य दुर्निश्चयत्वात्, 'विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति, असद्वा इदमग्र आसी'दित्यादिभिरात्माऽनिलक्ष्यादिप्रतीतेः, 'अन्नवान्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेने'त्यादिनाऽन्यास्थिरफलत्वावगमाच्च स्याताम् । अतः साङ्गाध्ययनमात्रेण तयोरनतिवृत्तेः, तद्व्युदासस्य न्यायागृहीतवाक्यफलत्वाच्च ब्रह्मविचारः कर्तव्य इति चेदित्यर्थः । **भवान्** अनुदाहृतवाक्यान्तरपर्यालोचनायामपि प्रवृत्तस्त्वमिति भावः । **तथैव** एतया दृष्ट्याऽऽपि संशयविपर्ययनिरासस्यापेक्षितत्वं जानन्ननुदाहृतवाक्यानि पश्येदित्यर्थः । 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति, पूर्णाहुत्या सर्वान् कामानवाप्नोति, सर्वान् लोकान् पशुबन्धयाज्यभिजयति, अपाम सोममभूता अभूम, अनन्तं ह वा अपारमक्षय्यं लोकं जयति योऽग्निं नाचिकेतं चिनुते, नास्येष्टापूर्ते क्षीयेते, योऽग्निं नाचिकेतं चिनुत' इत्यादीनि हि 'अमृतत्वं भजन्ते, सोऽश्नुते सर्वान् कामान्, इमान् लोकान् कामान्नी कामरूप्यनुसंचर'न्नित्यादिब्रह्मवेदनफलवाक्यैस्तुल्यानि वाक्यानि दृश्यन्ते । अत औपनिषदवाक्येष्विवानुदाहृतवाक्येषु संशयविपर्ययबाहुल्यात्तन्निरासाय कर्मविचारः कर्तव्य इत्यर्थः ॥

एवं फलद्वारा हानाय कर्मज्ञानापेक्षा दर्शिता, अथ स्वरूपेणोपादानाय च नियमेन कर्मज्ञानापेक्षास्तीति दर्शयितुं मुमुक्षोः कर्मणो नियमेनानपेक्षितत्वलक्षणं परपक्षमुपक्षिपति—**ननु चेति** । नियमेनापेक्षितत्वस्य विवक्षितेतरगामित्वव्युदासार्थः प्रथम **एव**कारः, द्वितीयस्तु नियमेनानपेक्षितस्य पूर्ववृत्तत्वनिवृत्त्यर्थः । ततः किमित्यत्राह—**न धर्मेति** । कुत इत्यत्राह—**अधीतेति** । ये ब्रह्मविद्याधिकारिणस्तेषां सर्वेषामवश्यापेक्षितं हि नियमेनापेक्षितं, वेदान्तमात्राध्यायिनस्तु तत्रैवापातप्रतीतिर्बुभूत्सा च स्यात्; तस्य कर्मविषयापातप्रतीत्यभावात्, न कर्मविचारस्य नियमेनापेक्षेत्यर्थः । यद्वा, अधीतकृत्स्नवेदस्यापि जन्मान्तरसुकृतवशाद्वेदान्तवाक्य एव बुभुत्सा जायते चेत्तस्य न कर्मविचारापेक्षेति । तदा **अधीतवेदान्तस्ये**ति पदमयोगव्यवच्छेदपरं, नत्वन्ययोगव्यवच्छेदपरम् । कृत्स्नवेदाध्ययनादपेक्षितवेदान्तभागोप्यधीत एवेत्यर्थः ॥

एवं हानार्थमपि कर्मणो ज्ञातव्यत्वं निषिद्धम्, उपादानार्थमपि न ज्ञातव्यमित्युपपादयितुं वेदान्तमात्रबुभुत्सोरपि कर्मविचारापेक्षां शङ्कते—**कर्माङ्गेति** । एकस्य साम्नः पञ्च भागाः सन्ति, ते प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनाख्याः, एते भागा भक्तिशब्दाभिधेयाः, तासु पञ्चसु भक्तिषु प्रस्तावो हिङ्कारपूर्वङ्गीयते, उद्गीथः प्रणवपूर्वङ्गीयते, तत्र पञ्चविधसामोपासनं क्वचिद्विधीयते 'लोकेषु पञ्चविधं सामोपासीते'ति, क्वचित्सामावयवेषु पञ्चस्वेकैकावयवोपासनं विधीयते, (क्वचिच्चावयवावयवभूतप्रणवाद्युपासनं विधीयते), तत्रोद्गीथावयवभूतप्रणवोपासनं विधीयते 'ओमित्येतदक्षरमुद्गीथमुपासीते'ति । **कर्माङ्गाश्रयाणि** कर्माङ्गभूतोद्गीथादिविषयाणि । अनधिगतकर्मण उद्गीथाद्युपासनचिन्तनं न शक्यं कर्तुमिति प्रतिज्ञा । **कर्माङ्गाश्रयाणीति** हेतुगर्भविशेषणम् । कर्माङ्गोद्गीथाद्याश्रयाण्युपासनानीत्युक्ते सति हेतावुद्गीथशब्दस्य वैयर्थ्यं स्यात्, उपासनमात्रस्य च पक्षीकारः प्रतीयेत, अतो यथोक्तैव वचनव्यक्तिर्युक्ता । अनधिगते कर्मण्युद्गीथादिविषयोपासनचिन्ताया अशक्यत्वात् कर्मविचारोऽपेक्षित इति चेदित्यर्थः । सोपालम्भं परिहरति—**अनभिज्ञ इति** । शास्त्रे प्रधानतया प्रतिपाद्यं ज्ञानमिति त्वया न ज्ञातमित्यर्थः ॥

अत्र किं प्रधानप्रतिपाद्यं ज्ञानमित्यत्राह—**अस्मिन्निति । भेदो** ज्ञातृज्ञेयज्ञानरूपः । **वैविध्यं** तदवान्तरभिदा बाहुल्यम् । एवं विविधभेददर्शनस्य हेतुरविद्या, तस्याः को हेतुरित्यनवस्थापरिहारार्थ**मनादि**शब्दः । एवमविद्याकृतभेददर्शननिमित्तकं जन्मजरामरणादिकमेव सांसारिकदुःखम् । **आदि**शब्देन नरकगर्भवासादिग्रहणम् । **संसारः** प्रकृतिसंबन्धः, तत्प्रभवं सांसारिकं, तन्निरसनीयत्वाय दुःखस्वरूपलोक्तिः । **सागर**शब्दस्तदानन्त्यपरः । **निमग्नस्येति** 'दुःखनिवृत्त्युपायापेक्षाहेतुतयोक्तमधिकारिस्वरूपमुक्तम् । प्रयोजनमाह—**निखिलेति । मिथ्याज्ञानं** भ्रान्तिज्ञानं; 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापाया'दिति प्रयोगात् । भ्रान्तिज्ञानं च भेददर्शनम् । यद्वा, मिथ्याभूतमज्ञानं मिथ्याज्ञानम्, ज्ञाननिवर्त्यत्वाय **मिथ्या**शब्दः, तस्य निवर्हणाय । तन्निबर्हणमेव मोक्ष इत्यभिप्रायः । तत्साधनं किमित्यत्राह—**आत्मैकत्वविज्ञानमिति । सर्वभ्रमस्य**

वलम्बि कर्मज्ञानं कोपयुज्यते, प्रत्युत विरुद्धमेव, उद्गीथादिविचारस्तु कर्मशेषभूत एव ज्ञानस्वरूपत्वाविशेषादिहैव क्रियते स तु न साक्षात्संगतः, अतो यत्प्रधानं शास्त्रं तदपेक्षितमेव पूर्ववृत्तं किमपि वक्तव्यम् । वाढम्, तदपेक्षितं च कर्मविज्ञानमेव; कर्मसमुच्चिताज्ज्ञानादपवर्गश्रुतेः । वक्ष्यति च

रज्जुयाथात्म्यज्ञानं हि निवर्तकं न तु कर्मविशेष । एवं भेददर्शनस्याविद्याकृतत्वादैक्यज्ञानमेव तन्निवर्तकमिति तत्रैव तात्पर्यं वेदान्तवाक्यानामित्यर्थः । ततः किमित्यत्राह—**अस्यहीति । कोपयुज्यते,** न कुत्रचित् । ज्ञानस्वरूपोत्पत्तौ, तत्फलोत्पत्तौ, ज्ञानोत्पत्तिसाधनानुग्रहे वा नोपयुज्यत इत्यर्थः । न केवलमुपयोगाभावः, प्रतिकूलत्वमपीत्याह—**प्रत्युतेति ।** द्वैतवासनाजनकत्वादित्यभिप्रायः ॥

तथाप्युपनिषत्स्वधीतत्वात्, ब्रह्ममीमांसायांनिरूप्यमाणत्वाच्चोद्गीथाद्युपासनं ब्रह्मविद्यापेक्षितमित्युद्गीथादिविचारः साक्षात्सङ्गत इत्यत्राह—**उद्गीथादीति ।** तर्हि कथमुपनिषत्स्वध्ययनं, ब्रह्मविचारे तद्विचारश्चेत्यत्राह—**ज्ञानस्वरूपत्वाविशेषादिति।** ज्ञानस्वरूपत्वसाम्याद्बुद्धिस्थतया कृतः, न तु प्रधानार्थोपयोगित्वादित्यर्थः । तत किमित्यत्राह—**सत्विति । तु**शब्दद्वयं शङ्काद्वयव्यावर्तकम् । प्रधानप्रतिपाद्योपयुक्तस्यैव पूर्ववृत्तत्वं निगमयति—**अत इति। किमपि** कर्मविचारादन्यदिति भावः । **प्रधानार्थोपयोगित्वेन सङ्गतिः** साक्षात्सङ्गतिः, येन केनाप्याकारेण साम्याद्बुद्धिस्थत्वं प्रसङ्गात्सङ्गतिः, अतः प्रासङ्गिकोद्गीथाद्युपासनचिन्तापेक्षितस्य प्रधानार्थविरुद्धस्य कर्मविचारस्य न पूर्ववृत्तता युक्ता, अपि तु प्रधानप्रतिपाद्यात्मैकत्वविज्ञानापेक्षितमेव किमपि पूर्ववृत्तं वक्तुं युक्तमित्युक्तं भवति । अत्र भास्करीयाः प्रत्यवतिष्ठन्ते—**वाढमिति ।** वाढमित्यर्धाङ्गीकारे । यत्प्रधानं शास्त्रं तदपेक्षितमेव पूर्ववृत्तमित्येतावन्मात्रविषयेऽङ्गीकारे, तदपेक्षितं चेति प्रतिज्ञा । तया यदनपेक्षितमित्युक्तं तदेवापेक्षित मित्येवकारार्थप्रायः । कुत इत्यत्राह—**कर्मसमुच्चितादिति । समुच्चित**शब्दः साहित्यमात्रपरः, न समसमुच्चयपरः । 'अस्मद्विद्या आत्मविद्या चेति समुच्चित्योपदेशा'दित्यत्र समुच्चित्यशब्दवत् । कर्मज्ञानाभ्यामिति न निर्दिष्टम्, अपि तु कर्मसमुच्चिताज्ज्ञानादिति विशेषणविशेष्यभावेन निर्दिष्टम्, अतो ज्ञानप्राधान्यमवगम्यते । कर्माङ्गकाज्ज्ञानादित्यर्थः । श्रुतिश्च 'यज्ञेन दानेन' इत्यादिर्विवक्षिता ॥

कर्मणो विद्याङ्गत्वे सूत्रकारामिमति दर्शयति—**वक्ष्यतिचेति । चः** प्रतिपादकसमुच्चये । अङ्गतया कर्मणोऽनुष्ठानमपेक्षितमस्तु तज्ज्ञानस्य कथं पूर्वभावित्वं, कर्मज्ञानं ब्रह्मविचारपाश्चात्यं किं न स्यात्—इत्यत्राह—**अपेक्षितेचेति ।** प्रयाजादिवन्निष्पन्नस्य करणस्य फलोत्पत्तिदशायामनुग्राहकलेनाङ्गतयापेक्षा विवक्षिता । तृतीयस्य चतुर्थे पादे समावृत्ताकृतदारमृतदारादीनाम्, आश्रमविशेषवर्तिनां च ब्रह्मविद्यानिष्ठानां कर्मस्वनुष्ठेयाननुष्ठेयविभागस्य निरूपयिष्यमाणत्वमभिप्रेत्योक्तं—**केन समुच्चयः केन नेतीति ।** यद्वा नित्यनैमित्तिकयोः समुच्चयः, न तु काम्यनिषिद्धयोरिति विभागो न ज्ञायत इत्यर्थः । अयमर्थः—पदार्थज्ञानपूर्वकं हि वाक्यार्थज्ञानं, 'यज्ञेन दानेने'त्यादिवाक्ये यज्ञादिकर्मणां पदार्थीभूतत्वात्, वाक्यार्थज्ञानस्य च पदार्थज्ञानपूर्वकत्वाद्यज्ञादिकर्मविचारस्य पूर्वभावित्वम् । नहि 'व्रीहीनवहन्ती'त्यादिवाक्यार्थज्ञानं व्रीह्यादिपदार्थज्ञानेन विनोपपद्यते; पदार्थसंसर्गरूपत्वाद्वाक्यार्थस्य ॥

ननु गामानयेत्यादिवाक्याद्व्युत्पत्तौ गवानयनादिरूपं वाक्यार्थं पूर्वं प्रतिपद्यावापोद्वापमुखेन पश्चात्पदार्थप्रतिपत्तेर्न पदार्थधीपूर्वकत्वनियमो वाक्यार्थज्ञानस्य; उच्यते—व्युत्पन्नाच्छब्दादर्थप्रतिपत्तौ सर्वत्र पदार्थज्ञानपूर्वकमेव वाक्यार्थज्ञानं, व्युत्पत्तिदशायां तु प्रमाणान्तरेण शब्दान्तरेण वा वाक्यार्थावगमः पूर्वं स्यात्, न तु तस्मादेव शब्दात्; तस्यागृहीतसंबन्धत्वेन बोधकत्वायोगात् । व्युत्पत्तावपि न वाक्यार्थधियः पूर्वभावनियमः; अम्बातातमातुलादिपदानां पदान्तरासंसृष्टानामेव प्रथमव्युत्पत्तिदर्शनात्, अस्य शब्दस्यायमर्थ इति व्युत्पत्तौ वाक्यार्थज्ञानस्य पूर्वभावाभावाच्च । नचास्मिन्नेव वाक्ये यज्ञादिशब्दव्युत्पत्तिसंभवः; विविदिषानिष्पत्तिरूपवाक्यार्थस्याप्रत्यक्षत्वेन गवानयनादाविव व्युत्पत्त्यनुपपत्तेः । अतः पदार्थज्ञानपूर्वकं वाक्यार्थज्ञानमित्युक्तम् ॥ **वाढ**मित्यादिकं सिद्धान्तिनश्चोद्यपरमिति च व्याख्यातृभिर्व्याख्यातं, तदानीमपि पदार्थवाक्यार्थभावः क्रमविशेषहेतुतया विवक्षितः । किंच—**अपेक्षिते** चेत्यज्ञतयापेक्षितत्वस्य विवक्षितत्वात्, कर्मणां च ज्ञानोत्पादकतया तदङ्गत्वात्, **उत्पादकोत्पाद्ययोः** पौर्वापर्यनियमाद्विचारविषययोः कर्मज्ञानयोः पूर्वापरभावेन तच्छेषभूतयोर्विचारयोरपि तत्क्रमभाक्त्वं न्याय्यमिति चाभिप्रायः । **शेषभूतस्य** शेषिक्रमानुरोधित्वं हि न्यायसिद्धम् । यथा—'सारस्वतौ होमौ भवत' इति युगपदुत्पन्नयोरपि सारस्वतहोमयोर्याज्यापुरोनुवाक्यामन्त्रानुसारेण सरस्वतीयागस्य पूर्वभावे, सरस्वद्यागस्य पश्चाद्भावे च प्राप्ते तदङ्गानामपि तेनैव क्रमेणानुष्ठानं निर्णीतं दृष्टान्ते, दार्ष्टान्तिके च शेषिणोः क्रमनिश्चायकहेतुवैषम्यमेव, तयोः क्रमे निश्चिते शेषस्य शेषिक्रमानुरोधित्वं तत्र चात्र च तुल्यम् । एवंचोपासनस्यैव विचारं प्रति शेषित्वात् तृतीयलक्षणे कृतस्योपासनचिन्तनस्यैव कर्मविचारापेक्षया पश्चाद्भाव इति—न वाच्यं; विद्याविषयतत्फलचिन्तनस्यापि तदपेक्षितत्वेन कृत्स्नाया अपि ब्रह्ममीमांसायाः कर्मविचारपश्चाद्भावप्राप्तेः । निगमयति—**अत इति ।** वाढमित्यादेः सिद्धान्तिचोद्यपरत्वादपि भास्करमतपरत्वमुचितम्; **कर्मसमुच्चिताज्ज्ञानादपवर्गश्रुते**रित्यस्य ग्रन्थस्य भास्करीयभाष्ये श्रूयमाणत्वात्, अङ्गभावस्य तदभ्युपगतत्वेन तद्विषय-

१ व्युत्पत्यं° । २ प्रतिपाद्यं° ।

'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' (ब्र. सू. ३।४।२६) इति। अपेक्षिते च कर्मण्यज्ञाते केन समुच्चयः, केन नेति विभागो न शक्यते ज्ञातुम्, अतस्तदेव पूर्ववृत्तम्—नैतद्युक्तम्; सकलविशेषप्रत्यनीकचिन्मात्रब्रह्मविज्ञानादेवाविद्यानिवृत्तेः। अविद्यानिवृत्तिरेव हि मोक्षः, वर्णाश्रमविशेषसाध्यसाधनेतिकर्तव्यताद्यनन्तविकल्पास्पदं कर्म सकलभेददर्शननिवृत्तिरूपाज्ञाननिवृत्तेः कथमिव साधनं भवेत्।

सूत्रोपादानविरोधाच्च। शब्दतोर्थतश्च भास्करमतप्रत्यभिज्ञानात्, सिद्धान्तिचोद्यस्यापि तदन्तर्भावाच्च—भास्करपक्षं यादवप्रकाशपक्षं चोपजीव्य—**बाढमि**त्यादिना पार्श्वस्थश्चोदयतीति च निर्वाहः साम्प्रदायिकः। तत्रैवं योजना—**कर्मसमुच्चितादिति** समसमुच्चयो विवक्षितः। **कर्मसमुच्चिताज्ज्ञानादिति** विशेषणविशेष्यभावेन निर्देशो ज्ञानस्य मोक्षोपायत्वप्रसिद्धिप्रानुर्यनिबन्धनः। श्रुतिश्च 'विद्यां चाविद्यां चे'त्यादिः। अस्मिन्वाक्ये **मृत्यु**शब्द उपेयप्राप्तिविरोधिकर्मवाची। प्रतिबन्धनिवृत्तिः, ब्रह्मप्राप्तिश्चेति साध्यद्वयं; क्रमेण कर्म, ज्ञानं चेति साधनद्वयमपि हि **यादवप्रकाशीयै**रभ्युपगतम्, अतो 'विद्यां चाविद्यां चे'ति वाक्ये पूर्वखण्डः साधनद्वित्वपरः, उत्तरखण्डस्तु साध्यद्वित्वपर इति तेषां निर्वाहः। **वक्ष्यतिचेति च**शब्दः प्रतिपाद्यसमुच्चये। अङ्गभावं च वक्ष्यतीत्यर्थः। ज्ञानोत्पत्तेः पश्चान्कर्मणो ब्रह्मप्राप्तिप्रतिबन्धनिवर्तकत्वं, ज्ञानोत्पत्तेः पूर्वं कर्मणो ज्ञानोत्पादकतया तदङ्गत्वमपि हि तदभ्युपगतम्। अङ्गभावपरं सूत्रमुपादत्ते—**सर्वापेक्षेति। सर्वापेक्षे**ति सूत्रमङ्गाङ्गिभावपरं, **सहकारित्वेन चे**ति सूत्रं समसमुच्चयप्रतिपादकमिति हि तेषां प्रक्रिया। अङ्गभावे, समुच्चये च श्रुतिवाक्ये, सूत्रे चोदाहर्तव्येऽपि ग्रन्थलाघवार्थं समुच्चये श्रुतिः, अङ्गभावे सूत्रं चोदाहृतम्। अङ्गभावप्रतिपादकवाक्यविषयसूत्रोपादानेन भास्करमतं चावलम्बितं भवति। एवमुभयथा कर्मणोपेक्षा दर्शिता।—ततः किम्। इत्यत्राह—**अपेक्षितेचेति**। समप्रधानतया, अङ्गतया चापेक्षित इत्यर्थः। अन्यत्सर्वं पूर्ववत्। यद्यपि, यादवप्रकाशमते कर्मविचारस्य पूर्ववृत्तत्वमनभिमतं—तथापि, समुच्चयेन, अङ्गतया च कर्मणोपेक्षितत्वस्य तदुपपादितत्वात्तावन्मात्रमुपजीव्य पार्श्वस्थेन मतद्वयावलम्बिना चोदयित्रा पूर्ववृत्तत्वापादनमुखेन चोदितमिति न निगमनग्रन्थविरोधः। **समुच्चय**शब्दस्य प्रधानतयान्वये स्वारस्यात्, अङ्गत्वपरसूत्रोपादानात्, तदनन्तरं साध्यद्वित्वस्य साधनद्वित्वस्य च निराकरिष्यमाणत्वाच्च मतद्वयावलम्बनमुखेन चोदितमिति पूर्वाचार्यैर्निर्वाहः कृतः॥

अत्र प्रतिवदति—**नैतद्युक्तमिति।** हानार्थं कर्मणां ज्ञातव्यत्वं प्रागेव प्रतिक्षिप्तम्; वेदान्तमात्राध्यायिनः कर्मविषयापातप्रतीत्यभावेन कर्मनैरपेक्ष्यवचनात्, सुकृतवशाद्वेदान्तमात्रबुभुत्सावतः कर्मज्ञानानपेक्षावचनाच्च। अत्रोपादानार्थं कर्मणो ज्ञातव्यत्वं निराचिकीर्षुः समसमुच्चयेन, अङ्गभावेन च द्विविधेष्युपादाने समसमुच्चयार्थमुपादानं प्रथममपाकर्तुं साधनद्वित्वं, साध्यद्वित्वं च वाक्यद्वयेन प्रतिक्षिपति—**सकलविशेषेत्यादिना।** यदा **बाढ**मित्यादिग्रन्थो भास्करमतेन, सिद्धान्तिमतेन वा चोद्यपरः, तदानीं पूर्वपक्षी संभावितसमस्तप्रकारेण कर्मणोऽपेक्षां प्रतिक्षेप्तुकामः—किं त्वया समसमुच्चयो विवक्षितः, उताङ्गभाव—इति विकल्पमभिप्रेत्य प्रथमं समुच्चयपक्षं प्रतिक्षिपतीति निर्वाह्यम्। **सकलविशेषाः** सजातीयविजातीयस्वगतव्यावृत्त्यन्वयरूपविशेषाः। **तेषां प्रत्यनीकं** सर्पाद्याकाराणां रज्जुलमिव तेषां निवर्तकमिति भावः। **चिन्मात्रमिति मात्रचा** ज्ञातृज्ञेयत्वव्यावृत्तिः, यद्वा, **सकलविशेषप्रत्यनीक**शब्देन सजातीयविजातीयभेदप्रत्यनीकत्वं, **चिन्मात्रमिति मात्रचा** स्वगतभेदशून्यत्वं च विवक्षितम्। **प्रत्यनीक**शब्देन नित्यानर्हत्वं विवक्षितम्। न हि शुक्तिशकलं कदाचिद्रजतत्वसंबन्धार्हं; नित्यानर्हत्वादेव हि शुक्तिज्ञानस्य रजतत्वनिवर्तकत्वम्। **ब्रह्मविज्ञानादेवाविद्यानिवृत्तेरिति।** रज्जुलज्ञानादेव हि सर्पत्वनिवृत्तिः, न तु कर्मणेति भावः। एवं साधनद्वित्वं निरस्तम्। कथं साधनद्वित्वव्युदासः, साध्यद्वित्वं हि विद्यत इति शङ्कायां साध्यद्वित्वं व्युदस्यति—**अविद्यानिवृत्तिरेव हि मोक्ष इति।** ब्रह्मणो नित्यप्राप्तत्वात् प्रतिबन्धनिवृत्तिरेव साध्या, न तत्प्राप्तिः। **हि**शब्दस्यायमभिप्रायः—या प्रतिबन्धनिवृत्तिः कर्मसाध्यत्वेन त्वयोक्ता सैव ज्ञानसाध्या श्रुतिस्मृतिसूत्रैरभिहिता—'तमेव विदित्वातिमृत्युमेति, ज्ञात्वा देवं मुच्यते सर्वपाशैः, निचाय्य तं मृत्युमुखात् प्रमुच्यते, क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे, एवमेवंविदि पापं कर्म न श्लिष्यते, ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा, तदधिगम उत्तरपूर्वाघयो'रित्यादिभिः। तस्माद्वाक्यद्वयेन न साध्यसाधनद्वित्वमर्स्तात्युक्तं भवति। अविद्यानिवृत्तिरेव मोक्षोस्तु ततः किं कर्मनैरपेक्ष्यस्येत्यत्राह—**वर्णाश्रमेति।** अनेन पदेन पूर्वोक्तं कर्मणो भेदावलम्बित्वं विवृतं भवति। **आदि**शब्देन निषिद्धानि प्रायश्चित्तकर्माणि च विवक्ष्यन्ते। **अनन्त**शब्देन वर्णादीनां बाहुल्यम्। **विकल्पो** भेदः। **सकलभेददर्शननिवृत्तिरूपाज्ञाननिवृत्तेरिति** मूलाज्ञाननिवृत्तेः फलं हि भेददर्शननिवृत्तिः, अतो भेददर्शननिवृत्तिरज्ञाननिवृत्यन्तर्गतेत्यर्थः। **कथमिव साधनं,** न कथंचिदपीति यावत्॥

---

१ भास्करमतेति नास्ति आ. मु. पु.। २ कर्मविचार°। ३ °क्षे°। ४ °रज्ञाना°।

श्रुतयश्च कर्मणामनित्यफलत्वेन मोक्षविरोधित्वं ज्ञानस्यैव मोक्षसाधनत्वं च दर्शयन्ति—**'अन्तवदेवास्य तद्भवति'** (बृ.३।८।१०), **'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते'** (छा. ८।६।१), **'ब्रह्मविदाप्नोति परम्'** (तै. १।१।१), **'ब्रह्म वेद ब्रह्मैव भवति'** (मु. ३।२। ९), **'तमेव विदित्वातिमृत्युमेति'** (श्वे. ३।८) इत्याद्याः। यद्यपि चेदमुक्तं यज्ञादिकर्मापेक्षा विद्येति, तद्वस्तुविरोधात्. श्रुत्यक्षरपर्यालोचनया चान्तःकरणनैर्मल्यद्वारेण विविदिषोत्पत्तावुपयुज्यते, न फलोत्पत्तौ: विविदिषन्तीति श्रवणात्। विविदिषायां जातायां ज्ञानोत्पत्तौ शमादीनामेवान्तरङ्गोपायतां श्रुतिरेवाह—**'शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत्'** (बृ. ४।४।

'न हि वचनविरोधे न्यायः प्रभवतीति' न्यायात् श्रुतिसिद्धं कर्मणोपेक्षितत्वं न बाध्यमिति शङ्कायामुक्तोपपत्तये श्रुत्यानुकूल्यं दर्शयति—**श्रुतयश्चेति**। न केवलोपपत्तिः तदनुग्राह्यमप्यस्तीति **च**शब्दस्य भावः। पूर्वं भेदावलम्बितया विरोध उक्तः, अत्र तु फलानित्यतया विरोधश्च युक्त्यन्तरत्वेन दर्शितः। **अनित्यफलत्वेनेति**। नित्यफलस्य मोक्षस्य कथमनित्यफलदं कर्म साधनमित्यर्थः। **श्रुतय** इत्येकस्मादनेकवाक्यानां प्राबल्यं विवक्षितं, **दर्शयन्ती**त्यनेनास्फुटार्थात् स्फुटार्थानाम्। **अन्तवदेवास्येति**। कर्मसाध्यत्वे मोक्षस्यानित्यत्वं, नित्यत्वे कर्मणस्तत्साधनत्वं वा न स्यात्; कर्मणोन्तवत्फलत्वनियमादिति भावः। अनेन वाक्येन कर्मणामनित्यत्वमुक्तम्। **तद्यथेत्यनेन** कर्मक्षयस्य फलद्वारकत्वमुक्तम्। पूर्ववाक्यमनेककालानुष्ठितसकलकर्मणामन्तवत्त्वज्ञापनार्थम्; 'अस्मिन् लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवती'ति हि श्रूयते। तत एव कर्मनैरपेक्ष्यवादे अस्य वाक्यस्य प्रथमत उपादानम्। **ब्रह्मविदाप्नोतीति** ज्ञानस्य मोक्षसाधनत्वमुक्तम्। प्राप्यप्राप्तृभेददनिषेधार्थं **'ब्रह्म वेद ब्रह्मैव भवती'**त्युपात्तम्। **तमेवेति** प्रतिबन्धनिवृत्तेर्ज्ञानफलत्वं ज्ञापितम्। ज्ञानव्यतिरिक्तस्यकर्मादेरुपायत्वनिषेधश्चानेन सिद्धः; **नान्यः पन्था** इति ह्यनन्तरवाक्यम्। एवं ज्ञानस्यैव मोक्षोपायत्वपरतर्कानुगृहीतसप्तार्थानेकवाक्योपपादनेन **विद्यां चाविद्यां चेति** समसमुच्चयपरत्वेन परोक्ता श्रुतिश्चातदर्थत्युक्तं भवति; तस्या एकत्वात्, अस्फुटार्थत्वात्, अतः**कोपेतत्वाच्च**—श्रुत्यन्तराविरोधेन वर्णनीयत्वात्॥

एवं ज्ञानस्यैव मोक्षोपायत्वे प्रमाणतया श्रुतयः, उपपत्तयश्च दर्शिताः, अथ यज्ञादिश्रुतेः कर्मापेक्षितत्वपरतां व्युदस्यति—**यदपिचेत्यादिना**। सिद्धान्तिभास्करयादवप्रकाशानां त्रयाणामपि कर्माभिमतमितीदृशं प्राधान्यं सूचय**त्यपि**शब्दः। **समुच्चयपरवाक्यस्य** श्रुत्यन्तरानुगुण्येन निर्वाहें सति यज्ञादिश्रुतिश्च निर्वाह्येति समुच्चयाभिप्राय**श्च**शब्दः, **अपिचे**त्यखण्डोऽयं **च**न्दो वा, तदानीमप्युक्तप्रकारेण समुच्चयपरः। **यदुक्तं** 'यज्ञादिकर्मापेक्षाविद्ये'ति अनया वचनव्यक्त्या समुच्चयेन विद्यापेक्षितं यत्कर्मोक्तमित्यर्थः। **वस्तुविरोधो** द्वैतवासनाजनकत्वम्, अनित्यफलदत्वं च। **श्रुत्यक्षरपर्यालोचना** सन्प्रत्ययार्थनिरूपणम्। **चः** समुच्चये। विविदिषोत्पत्तावुपयोगप्रकारमाह—**अन्तःकरणेति। न फलोत्पत्तौ** न मोक्षोत्पत्तौ। 'यज्ञेन दानेन तपसाऽनाशकेन ब्राह्मणा विविदिषन्ती'ति हि श्रुतिः, न तु मुच्यन्त इतीति भावः। अक्षरपर्यालोचना कथमित्यत्राह—**विविदिषन्तीति। श्रवणादिति**। एवं च यज्ञादिश्रुतिपर्यालोचनया च ज्ञानकर्मणोः समुच्चयः प्रत्युक्तः। **न फलोत्पत्ताविति। फल**शब्दस्य मोक्षे स्वारस्यादेवं योजना कृता। यद्वा, यज्ञादिकर्मापेक्षा विद्येति वचोभङ्ग्याऽङ्गतयापेक्षितं यत्कर्मोक्तमित्यर्थः। **न फलोत्पत्तौ** न वेदनोत्पत्तावित्यर्थः; विविदिषापेक्षया हि फलं वेदनम्। अन्यत्सर्वं पूर्ववत्। अस्यां योजनायां यज्ञादिकर्मापेक्षा विद्येति निर्देशस्वारस्यमस्ति; अङ्गाङ्गिभावसूत्रस्मारकत्वादस्य निर्देशस्य। अथवा, यज्ञादीति प्रयाजादिवन्निष्पन्नस्य करणस्य फलोत्पत्तिदशायामनुग्राहकतयाङ्गं यत्कर्मोक्तं तन्नोपयुक्तमित्यर्थः। **न फलोत्पत्तौ** न मोक्षोत्पत्तौ। करणभूतविद्यानुग्राहकत्वेन नोपयुक्तमित्यर्थः। अस्यां योजनायामङ्गाङ्गिभावसूत्रस्मारकनिर्देशस्य, फलोत्पत्ताविति निर्देशस्य च स्वारस्यमस्ति। **विविदिषन्ती**त्युक्ति'रसिना जिघांसती'तिवदिति—यज्ञादेर्वेदनोपयोगित्वं स्यादिति—**शङ्कायां, वेदनोत्पत्तौ** हेतुत्वे कर्मण इतिकर्तव्यतात्वं करणत्वं चानुपपन्नमित्याह—**विविदिषायामित्यादिना वाक्यद्वयेन**। तत्र **शमादिभिः सह** समुच्चयेन, विकल्पेन चेतिकर्तव्यतात्वं प्रथमं व्युदस्यति—**विविदिषायामित्यादिवाक्येन। एवकारद्वयेन कर्मणः समुच्चयो**, विकल्पश्च व्युदस्यते। शमादीनामिन्द्रियव्यापारोपरतिरूपत्वेन, यज्ञादिकर्मणस्तत्प्रवृत्तिरूपत्वेनान्योन्यविरोधित्वान्नसमुच्चय **उपपद्यत** इत्यभिप्रायेण **शमादीनामेवे**त्युक्तम्। तुल्यबलयोर्हि विकल्पः, **भूत्वात्मानं पश्येदिति शमादीनामात्मदर्शनं प्रति** साक्षात्साधनत्वस्य न्यायनैरपेक्ष्येण शीघ्रप्रतिपन्नतया बलीयस्त्वात्, **विविदिषन्तीति** यज्ञादेरिच्छासाधनत्वे स्वरसतः प्रतिपन्नेपि स्वारस्यभङ्गेना**सिना जिघांसती**त्यादिदृष्टान्तपर्यालोचनरूपन्यायसापेक्षतया कर्मणो विद्यासाधनत्वस्य विलम्बेन प्रतिपन्नतया दुर्बलत्वाच्च न विकल्प इत्यभिप्रायेणाह—**श्रुतिरेवाहेति**॥

तथापि विविदिषापेक्षितत्वात् कर्म च ज्ञानं प्रत्युपयोगि, तत्कथमेतत्त्यज्यते, शमादिरुपादीयते इति—शङ्कायां, कर्मणः

२३) इति । तदेवं जन्मान्तरशतानुष्ठितानभिसंहितफलविशेषकर्ममृदितकषायस्य विविदिषोत्पत्तौ सत्यां **'सदेव सोम्येदमग्र आसीत् । एकमेवाद्वितीयम्'** (छा. ६।२।१), **'सत्यं ज्ञाननमन्तं ब्रह्म'** (तै. २।१।१) **'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्'** (श्वे. ६।१९), **'अयमात्मा ब्रह्म'** (बृ. २।५।१९), **'तत्त्वमसि'** (छा. ६।८।७) इत्यादिवाक्यजन्यज्ञानादेवाविद्या निवर्तते । वाक्यार्थज्ञानोपयोगीनि च श्रवणमननिदिध्यासनानि । **श्रवणं** नाम वेदान्तवाक्यान्यात्मैकत्वविद्याप्रतिपादकानीति तत्त्वदर्शिन आचार्यान्न्याययुक्तार्थग्रहणम् । एवमाचार्योपदिष्टार्थस्य स्वात्मन्येवमेव युक्तमिति हेतुतः प्रतिष्ठापनं **मननम्** । एतद्विरोध्यनादिभेदवासनानिरसनायास्यार्थस्यानवरतभावना **निदिध्यासनम्** । एवं श्रवणादिभिर्निरस्तसमस्तभेदवासनस्य वाक्यार्थज्ञानमविद्यां निवर्तयतीत्येवंरूपस्य श्रवणस्यावश्यापेक्षितमेव पूर्ववृत्तं वक्तव्यम् । तच्च नित्यानित्यवस्तुविवेकः, शमदमादिसाधनसंपत्, इहामुत्रफलोपभोगविरागः, मुमुक्षुत्वं चेत्येतत्साधनचतुष्टयम् । अनेन विना जिज्ञासानुपपत्तेरर्थस्वभावादेवेदमेव पूर्ववृत्तमिति ज्ञायते ।

शमादैर्वैषम्यमाह—**अन्तरङ्गोपायतामिति । भूत्वा पश्येदि**त्यन्तरङ्गत्वं स्पष्टम् । विविदिषायाः पूर्वं हि कर्मोपयोगः, शमादि तु पश्चादप्युपयुज्यत इत्यभिप्रेत्य **जातायामि**त्युक्तम् । ज्ञानं प्रति कर्मणः करणत्वमपि नास्तीत्याह—**तदेवमिति ।** करणत्वं संभवतीत्याशङ्क्य निरस्यते, न तन्भ्युपगतत्वात् । विशुद्धमनो हि करणं 'मनसा तु विशुद्धेने'ति श्रुतेः । **तत्** उक्तेभ्यो हेतुभ्यः । **एवं** समुच्चयेन विकल्पेन चेतिकर्तव्यतालेनुपपत्ते । स्वर्गादिसाधनस्य कर्मणोविविदिषासाधनत्वानुपपत्तिपरिहारायाह—**नभिसंहितफल**शब्दः । विविदिषाया अपि तत्साध्यत्वेन फलत्वात्तस्यानभिसंहितत्वव्यावृत्त्यर्थं **फलविशेषे**त्युक्तम् । विविदिषासिद्ध्यर्थमिदानीमनुष्ठानाय कर्मज्ञानापेक्षाशङ्काव्यावृत्त्यर्थ **जन्मान्तर**शब्दः । 'अनेकजन्मसंसिद्ध' इति वचनादिदानीमप्यनुष्ठेयमित्याशङ्कापरिहारार्थः **शत**शब्दः । कार्यकल्प्यं हि कारणम्, इदानीं विविदिषोत्पत्तिदर्शनेन जन्मान्तरशतानुष्ठानं कल्पनीयमिति भावः । **तेन** कर्मणा । **मृदितकषायस्य** नष्टपापस्य । **'कषायपक्तिः** कर्माणि ज्ञानं तु परमा गतिः, कषाये कर्ममिः पक्के ततो ज्ञानं प्रवर्तते' इति स्मृतिः । एवं विविदिषोत्पत्तौ सत्यां ज्ञानोत्पत्तौ कारणमाह—**सदेवेति । सदेवेत्यादि** कारणवाक्यम् । **सत्यं ज्ञान**मिति शोधकवाक्यम् । सत्यज्ञानादिवाक्यफलितव्यावृत्तिविशदीकरणाय **निष्कल**मित्यादिवाक्यमुपात्तम् । **अयमात्मा ब्रह्मे**त्यैक्यवाक्यम् । उपक्रमादिषड्विधतात्पर्यलिङ्गोपेतमैक्यवाक्यं दर्शयति—**तत्त्वमसीति ।** अस्मिन्वाक्ये ब्रह्मणा जीवविशेषस्यैक्यं श्रुतं, श्रुतमैक्यं सर्वात्मनामिति ज्ञापनार्थं**मयमात्मा ब्रह्मे**ति वाक्यम् । इत्यादिवाक्यं ज्ञानोत्पत्तौ करणं, न कर्मेत्यर्थः । वाक्यजन्यज्ञानमविद्यानिवर्तकं चेत् श्रवणादिपूर्वकध्यानविधिवैयर्थ्यमित्याशङ्क्याह—**वाक्यार्थेति । चः** शङ्काव्यावर्तकः । तेषां स्वरूपमाह—**श्रवणं नामेति । प्रतिपादकानि** निष्पादनक्षमाणि; वाक्यजन्यज्ञानादिति ह्युक्तम् । **एतद्विरोधि** आत्मैकत्वविद्याविरोधि । श्रवणादीन्येवंरूपाणि स्युः कथमेषां वाक्यार्थज्ञानोपयोगः—इत्यत आह—**श्रवणमननादिमिरिति ।** वाक्यार्थज्ञानोत्पत्तिविरोधिनिरसनमुपयोग इत्यर्थः । **इति** उक्तहेतोः । ज्ञानकर्मसमुच्चयाङ्गाङ्गिभावानुपपत्तिहेतुन्भ्य इत्यर्थः । **एवंरूपस्य** बन्धनिवृत्तौ कर्मनिरपेक्षवाक्यार्थज्ञानोपक्रमभूतस्य श्रवणस्य, न तु प्रासङ्गिकार्थस्य । **अवश्यापेक्षितं** नियमेनाऽपेक्षितम् । अपेक्षितं च किमित्यत आह—**तच्चेति** । कुत एतदपेक्षितमित्यत्राह—**अनेन विनेति । जिज्ञासानुपपत्तेः** विचारानुपपत्तेः । अनुपपत्तिमुपपादयति—**अर्थस्वभावादिति ।** कथमर्थस्वभावः, इत्थं—नित्यानित्यवस्तुविवेकादनित्यसांसारिकफलोभोगविरागो, नित्यपुरुषार्थेच्छा च स्यात्ततः श्रवणादौ प्रवृत्तिः, मनोवधानहेतुतया तदुपयोगिनी शमादिसंपत्तिरिति । **अर्थस्वभावादेव** पूर्वप्रकृतादेवेत्येवकाराभिप्रायः । ज्ञानस्यैवोपायत्वं, कर्मणोनपेक्षितत्वं चार्थस्वभावाद्धि पूर्वमुक्तम् । यद्वा, **अनेन विना जिज्ञासानुपपत्तेरिति ।** शमाद्यर्थस्वभावादित्यर्थः । शमादि पूर्ववृत्तमस्तु, कर्म च पूर्ववृत्तं स्यादित्यत्राह—**अर्थस्वभावादेवेति ।** येनार्थस्वभावेन शमादेः पूर्ववृत्तत्वं तेनैवार्थस्वभावेनान्यस्य पूर्ववृत्तत्वनिषेध इति प्रथम**स्यैव**कारस्य भावः । पूर्ववृत्तान्तरस्य व्यावृत्त्यर्थ द्वितीय **एव**कारः । **अत्रार्थस्वभाव**शब्देन शमाद्यर्थस्वभाव उक्तः । ज्ञानार्थस्वभावः, कर्मार्थस्वभावश्चाभिप्रेतः; ज्ञानस्य कर्मनिरपेक्षोपायत्वस्वाभाव्यात्, कर्मणो भेदावलम्बित्वेन विरुद्धस्वभावत्वाच्च । शमादेर्निवृत्तिरूपत्वेन, प्रवृत्तिरूपकर्मविरोधिस्वभावाच्च—साधनचतुष्टयमेव पूर्ववृत्तं न त्वन्यदित्युक्तं भवति । **इदमेव पूर्ववृत्तमिति ज्ञायत इति । इदमेव**शब्दावयोगान्ययोगव्यवच्छेदपरौ; **इदं**शब्दो हि साधनचतुष्टयपूर्ववृत्तत्वपरः, **एव**कारः कर्मव्युदासपरः, शमाद्यर्थस्वभावात्तदयोगव्यवच्छेदः, तस्माज्ज्ञानकर्मणोरर्थस्वभावाच्चान्ययोगव्यवच्छेदः ॥

---

१ इत्यादि° ।

एतदुक्तं भवति—ब्रह्मस्वरूपाच्छादिकाविद्यामूलमपारमार्थिकं भेददर्शनमेव वन्धमूलम्, बन्धश्चापारमार्थिकः, स च समूलोऽपारमार्थिकत्वादेव ज्ञानेनैव निवर्त्यते, निवर्तकं च ज्ञानं तत्त्वमस्यादिवाक्यजन्यम्, तस्यैतस्य वाक्यजन्यज्ञानस्य स्वरूपे तदुत्पत्तौ कार्ये वा कर्मणो नोपयोगः, विविदिषायामेव तु कर्मणामुपयोगः, स च पापमूलरजस्तमोनिवर्हणद्वारेण सत्त्ववृद्ध्या भवतीति, इममुपयोगमभिप्रेत्य **'ब्राह्मणा विविदिषन्ति'** (बृ. ४।४।२२) इत्युक्तमिति । अतः कर्मज्ञानस्यानुपयोगादुक्तमेव साधनचतुष्टयं पूर्ववृत्तमिति वक्तव्यम् ।

लघुसिद्धान्तः ।

अत्रोच्यते—यदुक्तम् अविद्यानिवृत्तिरेव मोक्षः सा च ब्रह्मविज्ञानादेव भवतीति, तदभ्युपगम्यते । अविद्यानिवृत्तये हि वेदान्तवाक्यैर्विधित्सितं ज्ञानं किंरूपमिति विवेचनीयम् । किं वाक्याद्वाक्यार्थज्ञा-

---

सकलविशेषप्रत्यनीकं ब्रह्म चेत् कथं संसारप्रवृत्तिः, कथं वाक्यार्थज्ञानादेवाविद्यानिवृत्तिः, अन्तःकरणस्य केन वा मालिन्यम्, कथं कर्मणा नैर्मल्यम्, ते चायोगान्ययोगव्यवच्छेदहेतुभूतार्थस्वभावाः कथमिति—शङ्कायाम्, उक्तार्थं संकृलय्य दर्शयन् शङ्काश्च परिहरति—**एतदुक्तमिति । ब्रह्मस्वरूपाच्छादिका**शब्देन सकलविशेषप्रत्यनीकलेपि स्वरूपतिरोधानाद्भेददर्शनं संभवतीत्युक्तम् । **भेदः** ज्ञातृज्ञेयादिः । **अपारमार्थिकं भेददर्शनमेव वन्धमूलं,** न कर्मेत्यर्थः । कर्मापि भ्रान्तिमूलकमिति भावः । यद्वा, **अपारमार्थिकं भेददर्शनमेव,** न सत्यभूतं किंचिदपीति भावः । तथा सति हि कर्मापेक्षा । **बन्धो** जन्मजरामरणादिः । **वन्धश्चापारमार्थिक इति ।** अविद्यामूलापारमार्थिकभेददर्शनकार्यत्वादिति भावः । ततः किं कर्मनैरपेक्ष्यस्येत्यत्राह—**स चेति । अपारमार्थिकत्वादेवेति ।** पूर्वोक्तादेवापारमार्थ्यात् कर्मनैरपेक्ष्यसिद्धिरित्येवकाराभिप्रायः । **ज्ञानेनैव,** न कर्मणेत्यर्थः । नह्यपरमार्थसर्पनिवृत्तेः रज्जुज्ञानेन विना वैनतेयोपासनकर्मापेक्षा ॥ **एवं** समसमुच्चयः प्रत्युक्तः, ज्ञानं प्रत्यपि कर्मणो न साधनत्वमित्याह—**निवर्तकं चेति । निवर्तकबोधः** प्रमाणजन्य इति यावत्; प्रमाणजन्यं शुक्तिज्ञानं हि रजतनिवर्तकम् । अत्र क्षमादेरितिकर्तव्यतात्वेन कर्मण इतिकर्तव्यतात्वमपि विरोधान्नेत्यभिप्रेतम् । ततः किमित्यत्राह—**तस्येति । तस्य** कर्मनिरपेक्षस्य । **एतस्य** अद्वैतविषयस्य । तदेतच्छब्दयोः प्रस्तुतवाचित्वाविशेषेपि दूरस्थान्तिकस्थविशेषणविशिष्टपरामर्शित्वं ह्युचितम् । अद्वैतविषयत्वे हेतुमाह—**वाक्यजन्यस्येति ।** तत्त्वमस्यादिवाक्यजन्यत्वादद्वैतविषयत्वमित्यर्थः । **कार्ये** मोक्षे । तर्हि कुत्रोपयोग, इत्यत्राह—**विविदिषायामिति । तु**शब्देन करणेतिकर्तव्यतात्वव्युदासः । उपयोगः कथमित्यत्राह—**स चेति । पापमूलेत्यादिना** अन्तःकरणनैर्मल्यद्वारेणेति पूर्वोक्तं विवृतं भवति । रजस्तमोनिबर्हणादिकं नास्मिन्वाक्ये श्रुतमित्यत्राह—**इतीममिति । अभिप्रेत्य**शब्देन शङ्कापरिहारः । **इतिहेतौ** । वस्तुविरोधादितिकर्तव्यतात्वकरणत्वाद्यनुपपत्तिहेतुभ्य इत्यर्थः । **इममुपयोगं** रजस्तमोनिबर्हणसत्त्वविवर्द्धनरूपं परम्परयोपयोगमित्यर्थः । **विविदिषन्तीत्युक्तमिति । एतदुक्तं भवती**त्यन्वयः । प्रकृतमुपसंहरति—**अतः कर्मज्ञानस्येति । अतः** हानार्थमुपादानार्थं च कर्मज्ञानस्यानपेक्षितत्वादित्यर्थः । अत्र व्याख्यातृभिरुक्तौ सङ्ग्रहश्लोकौ—'विरोधादप्रमाणत्वाच्चित्तशुद्ध्युपयोजनात् । ज्ञानमात्रस्य [१]हेतुत्वश्रुतेः सामर्थ्यतोपि च ॥ १ ॥ क्षमाद्यङ्गकतान्नानान्न धीकर्मसमुच्चयः । श्रवणादिक्रमोन्निद्रवाक्यजा धीर्विमोचिका ॥ २ ॥' इति । **विरोधादिति ।** कर्मणामनित्यफलतया, भेदवासनाजनकतया च विरोधो विवक्षितः । **सामर्थ्यत इति** ज्ञानस्य मिथ्यार्थनिवर्तकत्वे कर्मनिरपेक्षत्वरूपं वस्तुसामर्थ्यं विवक्षितम् ॥

राद्धान्तमारभते—**अत्रोच्यत इति ।** अस्मिन् पूर्वपक्षे सिद्धान्त उच्यत इत्यर्थः । पूर्वपक्षोक्तेष्वर्थेष्वविरुद्धांशाभ्युपगमेन प्रतिवदति—**यदुक्तमिति । अविद्यानिवृत्तिः** प्रतिबन्धनिवृत्तिः । साधनद्वित्वसाध्यद्वित्वनिरासोऽभिमत इत्यर्थः । यः **प्रतिबन्धनिरासः** कर्मसाध्य उक्तः, तस्य 'तमेव विदित्वातिमृत्युमेती'त्यादिषु ज्ञानसाध्यत्वमुक्तं, ब्रह्मप्राप्तिस्तु स्वतःसिद्धा । **एव**काराभ्यां साध्यान्तरं, साधनान्तरं च व्यावर्त्यते । यद्यपि, अनिष्टनिवृत्तिरिष्टप्राप्तिश्च द्वयमस्ति तथापि, इष्टतमब्रह्मप्राप्तेः स्वतःसिद्धायाः पृथगुपायसाध्यत्वाभावात्; प्रतिबन्धनिवृत्तिरेव हि साध्या । स्वत एव सर्वसाक्षात्कारक्षमं ज्ञानं प्रतिबन्धके निवृत्ते सति **ब्रह्मस्वरूपरूपगुणविभवादिकं** सर्वं साक्षात्करोति, यथा सेतौ भग्ने जलं स्वयमेव गच्छति न केनचिन्नेतव्यं तद्वत्, **यथाऽम्रानयने** मार्गसमीकरण—तत्प्रापणे उभे अपि पृथग्यत्नसाध्ये न, तथेत्यर्थः । यद्वा, भावान्तरस्यैवाभावत्वाद्-**विद्यानिवृत्तिरेव ब्रह्मप्राप्तिरित्यर्थः** । साध्यसाधनद्वित्वनिरासोभ्युपेतश्चेत् प्रतिपत्तिविषयः कः, इत्यत्राह—**अविद्येति ।** साधनस्वरूपविशेषे **विप्रतिपत्तिरित्यर्थः** । **किंरूपं** किं कर्माङ्गत्वानर्हं भवदुक्तं ज्ञानम्, उत कर्माङ्गत्वार्हमस्मदुक्तं ज्ञानमित्यर्थः । **किंरूपमित्यभिप्रेतं विवृणोति—किमिति । किं वाक्या**दित्यादिना परमतं स्वमतं च वदति, न तु परमतविकल्पः । प्रथमं

---

१ कर्मणो ज्ञानस्य । २ हेतुत्वे श्रुतेः ।

नमात्रम्, उत तन्मूलमुपासनात्मकं ज्ञानमिति । न तावद्वाक्यजन्यं ज्ञानम्; तस्य विधानमन्तरेणापि वाक्यादेव सिद्धेः, तावन्मात्रेणाविद्यानिवृत्त्यनुपलब्धेश्च । नच वाच्यं—भेदवासनायामनिरस्तायां वाक्यमविद्यानिवर्तकं ज्ञानं न जनयति, ज्ञाने जातेपि सर्वस्य सहसैव भेदज्ञानानिवृत्तिर्न दोषाय, चन्द्रैकत्वे ज्ञातेपि द्विचन्द्रज्ञानानिवृत्तिवदनिवृत्तमपि छिन्नमूलत्वेन न बन्धाय भवतीति; सत्यां सामग्र्यां ज्ञानानुत्पत्त्यनुपपत्तेः । सत्यामपि विपरीतवासनायामाप्तोपदेशलिङ्गादिभिर्बाधकज्ञानोत्पत्तिदर्शनात्, सत्यपि

परपक्षप्रतिक्षेपः क्रियते, स्वपक्षस्थापनं तु पश्चादित्याभिप्रेत्याह—**न तावदिति,** न तु दूष्यशिरसोरन्यतरदूषणं क्रियते । कुत इत्यत्राह—**तस्येति । विधानमन्तरेणापीति ।** प्रमाणज्ञानं वस्तुतन्त्रं न पुरुषतन्त्रं; कर्तुमकर्तुमन्यथा कर्तुं चाशक्यत्वात् । अतः पुरुषतन्त्रत्वाभावात्र तद्विधेयमिति तैरेवोक्तमिति भावः । **वाक्यादेव** ब्रह्मस्वरूपपरवाक्यादेव । व्युत्पत्तिमन्तं पुरुषं प्रति न्यायानुगृहीतस्य वाक्यस्यार्थबोधकत्वं स्वतःसिद्धं, न तु विध्यधीनं, तच्छ्रवणे पुरुषस्य प्रवृत्तिश्च रागादेवेत्युपपादितम् । यद्यपि, न रागात्तथापि, अध्ययनविधिरेवाधीतकृत्स्नवेदस्य वाक्यविचारे प्रवर्तक इति **'प्रज्ञां कुर्वीते'**त्यादिविधिर्निरर्थक एव । न च—प्रमाणज्ञानस्य श्रेयःसाधनत्वमलौकिकमिति तादृप्येण तस्य विधेयत्वं: शुक्तिरूप्यादिभ्रमनिवर्तकज्ञानस्येव बन्धनिवर्तकज्ञानस्य दृष्टार्थत्वाभ्युपगमात् । अतो विधिवैयर्थ्यम् । तेनासकृदावृत्तिसाक्षात्कारभक्तिरूपत्व–यावज्जीवानुष्ठेयत्वपराणां 'यावन्न विमोक्ष्येऽथ संपत्स्ये' इत्यादीनां, मुक्तेः शरीरपातानन्तरभावित्वपराणां नाडीविशेषनिष्क्रमणवादिनीनां, मार्गपराणां चानेकश्रुतीनां नैरर्थक्यं प्रसज्येतेति ॥

एवमनेकश्रुतिविरोधस्य प्रदर्शनार्थं **तस्य विधानमन्तरेणा**पीत्युक्तम्, अथ प्रत्यक्षविरोधं दर्शयति—**तावन्मात्रेणेति ।** तावदंशस्ततोधिकेप्यस्तीति तद्व्यावृत्त्यर्थं **तावन्मात्रेणे**त्युक्तम् । बहुशास्त्रविरोध–प्रत्यक्षविरोधरूपमिदं दूषणद्वयं वदता भगवताचापस्तम्बेनापि वाक्यार्थज्ञानमात्रस्य मोक्षसाधनत्वं निरस्तम् । यथा—'बुद्धे क्षेमप्रापणं तच्छास्त्रैर्विप्रतिषिद्धम्, बुद्धे चेत् क्षेमप्रापणमिहैव न दुःखमुपलभेत, एतेन परं व्याख्यात'मिति । **शास्त्रै**रिति बहुवचनेन पूर्वोदाहृतानेकश्रुतिविरोधोऽभिप्रेतः । विप्रतिषेधोधिकबलेन प्रतिषेधः, नतु प्रकरणसमवत्तुल्यबलेन प्रतिषेधः । बहुशास्त्रविरोधः प्रबलतरः; 'भूयसां स्यात् बलीयस्त्वमि'ति न्यायाभिप्रायेण विप्रतिषिद्धमित्युक्तम् । यत्तु परैरस्य दूषणस्य प्रतिवचनं द्विधा कृतं तदनुभाष्य दूषयति—**न च वाच्यमिति ।** वाक्यं ज्ञानोत्पत्तिमिदानीं न जनयतीति कश्चिन्निर्वाहस्तमाह—**भेदेति ।** इदानीमपि ज्ञानोत्पत्तिर्दृश्यत इति चेत् तत्परिहारायाह—**अविद्यानिवर्तकमिति ।** पश्चादपि वाक्यादेवाविद्यानिवर्तकविशदज्ञानोत्पत्तिश्चेदिदानीमेव जनयत्वित्यत्राह—**भेदवासनायामिति ।** प्रतिबन्धकाभावश्च सामग्यन्तर्भूतः, अतः सामग्रीवैकल्यात् ज्ञानमनुत्पन्नं, ध्यानादिविधयः प्रतिबन्धनिरासौपयिका इति भावः । अनेन शास्त्रप्रत्यक्षविरोधौ परिहृतौ भवतः ॥ सनकादीनां ज्ञानाधिकत्वेन श्रुतिस्मृतिप्रसिद्धानामपि ज्ञानानुदयोऽनुपपन्न इति—शङ्कायां निर्वाहान्तरमाह—**जातेपीति ।** अविद्याया एकत्वात्, प्रपञ्चप्रतिभासस्यैकस्य ब्रह्मणः स्वरूपत्वाच्च **सर्वस्ये**त्युक्तम् । न **दोषाय** अनिवर्तकत्वं दोषाय न भवति । ज्ञानोदयेपि विभ्रमानिवृत्तौ दृष्टान्तं दर्शयति—**चन्द्रैकत्व इति ।** अनिवृत्तं चेद् भेददर्शनं बन्धकं स्यात् इत्यत आह—**अनिवृत्तमपीति । छिन्नमूलत्वेन** छिन्नाविद्याख्यमूलत्वेन । **अकार्यकरम्** यथा दग्धः पटः पूर्वसंवेशेन प्रतीयमानोप्याच्छादनादिकार्ययोग्यः क्रमेण विनश्येत्, यथा कुलालभ्रमितं चक्रं भ्रमयितृव्यापारोपरमेपि पूर्ववेगवशात् किंचित्कालं स्वयमेव भ्रमत् क्रमेणोपरमेत तद्वदिति भावः । अत्रे**ति**करणस्य न वाच्यमित्यिनेनान्वयः । प्रथमं ज्ञानानुत्पत्तिं दूषयति—**सत्यामिति ।** न्यायानुगृहीतवाक्यमेव सामग्री, प्रतिबन्धिका भेदवासनास्तीति चेत्तत्राह—**सत्यामपीति ।** निवर्त्या वासना निवर्तकोत्पत्तिप्रतिबन्धिका न भवतीत्यर्थः । **आदि**शब्दादिन्द्रियं गृह्यते । यथा चिरतरतिमिरवासितगुहायां प्रदीपो न नोत्पद्यते, तस्मिन् दीपिते सद्य एव तमो विनश्येत्, यथा क्रकिदेशे सर्प इति वाक्याच्चिरं भ्रमितः पुरुषो न तत्र सर्पं इत्याप्तोपदेशाज्जानाति, यथा च वनं न दग्धमिति श्रुत्वा चिरं भ्रान्तस्य पश्चात्तत्र गत्वाङ्गारादिलिङ्गदर्शनेन दग्धमिति ज्ञानं जायते, यथा चिरं सर्पत्वेन वासिते वस्तुनि समीपगमनानन्तरमिन्द्रियव्यापारेण रज्जुज्ञानं सहसैव जायते, तद्वदित्याभिप्रायेणाप्तो**पदेशलिङ्गादिभिर्बाधकज्ञानोत्पत्तिदर्शना**दित्युक्तम् । वेदान्तवाक्यं हि दार्ष्टान्तिकम्, अत आप्तोपदेशस्य प्रथमोपादानम् ॥

अथ द्वितीयनिर्वाहकमनूद्य निरस्यति—**सत्यपीति । मात्रया** अल्पमित्यर्थः । **भवता** ब्रह्मव्यतिरिक्तकृत्स्नमिथ्यात्ववादिनेति भावः । भवतेति सूचितमर्थं विवृणोति—**भेदेति ।** वासनाया अपि मिथ्यात्वाविशेषात्तस्या अपि ज्ञानेन निवर्त्यत्वमवश्याश्रयणीयमिति भावः । किं ज्ञानोत्पत्तावपि वासना न निवृत्तेत्युच्यते, उत तन्निवृत्तावपि निर्हेतुकं भेददर्शनं भवतीति—शङ्काद्वयं हृदि निधाय प्रथमां परिहरति—**ज्ञानोत्पत्तावपीति ।** ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य मिथ्यात्वाद्वासनापि ज्ञानैकनिवर्त्या, नोचेन्निवर्तकान्तरमपि ज्ञानत्वाविशेषान्न निवर्तयेदित्यर्थः । स्वयमेव वासना नश्यतीति चेत्तदयुक्तम्; स्वयमेवेति

---

१ °पो नोत्प° ।

वाक्यार्थज्ञानेऽनादिवासनया मात्रया भेदज्ञानमनुवर्तत इति भवता न शक्यते वक्तुम्; भेदज्ञानसामग्र्या अपि वासनाया मिथ्यारूपत्वेन ज्ञानोत्पत्त्यैव निवृत्तत्वात्। ज्ञानोत्पत्तावपि मिथ्यारूपायास्तस्या अनिवृत्तौ निवर्तकान्तराभावात्कदाचिदपि नास्या वासनाया निवृत्तिः। वासनाकार्यं भेदज्ञानं छिन्नमूलम्, अथ चानुवर्तत इति बालिशभाषितम्। द्विचन्द्रज्ञानादौ तु बाधकसंनिधावपि मिथ्याज्ञानहेतोः परमार्थतिमिरादिदोषस्य ज्ञानबाध्यत्वाभावेनाविनष्टत्वात्, मिथ्याज्ञानानुवृत्तिरविरुद्धा, प्रबलप्रमाणबाधितत्वेन भयादिकार्यं तु निवर्तते। अपि च भेदवासनानिरसनद्वारेण ज्ञानोत्पत्तिमभ्युपगच्छतां कदाचिदपि ज्ञानोत्पत्तिर्न सेत्स्यति; भेदवासनाया अनादिकालोपचितत्वेनापरिमितत्वात्, तद्विरोधिभावनायाश्चाल्पत्वादनया तन्निरसनानुपपत्तेः। अतो वाक्यार्थज्ञानादन्यदेव ध्यानोपासनादिशब्दवाच्यं ज्ञानं वेदान्तवाक्यैर्विधित्सितम्। **तथा च श्रुतयः**—**'विज्ञाय प्रज्ञां कुर्वीत'** (बृ. ४।४।२१)। **'अनुविद्य विजानाति'** (छा. ८।७।१), **'ओमित्येवात्मानं ध्यायत'** (मु. २।२।६), **'निचाय्य तं मृत्युमुखात्प्रमुच्यते'** (का. ३। १५), **'आत्मानमेव लोकमुपासीत'** (बृ. १।४।१५), **'आत्मा वारे द्रष्टव्यः श्रोतव्यो**

बाधकज्ञानानैरपेक्ष्यस्य विवक्षितत्वे, वासनाया नश्यन्त्या अपि सत्त्वप्रसङ्गात्। स्वयमेव नश्यतीति स्वेनैव स्वनाशकरणं विवक्षितं चेद्व्याघातः। फलोपान्त्यकारणनाशादिनाश्यत्वेऽपि सत्त्वप्रसङ्गोऽवर्जनीय एव; **कर्म**शब्दादिषु तथैव वैशेषिकैर्वर्णितत्वात्, तेषां च पारमार्थ्यादर्शनात्। किंच—स्वाप्रार्थोत्पत्त्यादिवद् वासनाया अपि मिथ्यात्वेन तदुत्पत्तिस्थिती अपि मिथ्याभूते **इति** तद्विनाशोऽपि मिथ्याभूतः, अतो विनाशविषयभ्रमः पुनस्तिष्ठतीति निःशेषभ्रमनिवृत्तिर्न स्यात्॥ **अथ** द्वितीयां शङ्कां परिहरति—**वासनेति। छिन्नमूलं**-छिन्नवासनास्थमूलम्। **बालिशभाषितमिति।** अकारणकार्योत्पत्तिप्रसङ्ग इत्यर्थः। **बन्धकारणं भेददर्शनं भवति** तर्हि मुक्तिरपि ज्ञाननिरपेक्षा स्यात्, श्रवणादिभिर्विना वाक्यार्थज्ञानं स्यात्, अविद्यया विना **बन्धश्च** स्यात्, **अधिष्ठानेन** विना अविद्यापि कार्यकरी स्यादिति भावः। ननु तर्हि कथं सत्त्वेऽपि बाधकज्ञाने चन्द्रद्वित्वा**निवृत्तिरित्यत्राह—द्विचन्द्रेति।** तुशब्दो विवक्षितार्थवैषम्यपरः। **बाधकसन्निधावपि** तज्ज्ञानसन्निधावपि। तिमिरा**दिदोषस्य** पारमार्थ्याज्ज्ञानबाध्यत्वादिति भावः। तत्पारमार्थ्यं च व्यावहारिकतयापि परेणाभ्युपगन्तव्यम्; अन्यथाप्तोपदेशानन्तरं रज्जुसर्पव्यवहारोच्छेदवदोषोपि मिथ्येति वचनानन्तरं दोषनिवृत्त्या चन्द्रद्वित्वादिव्यवहारोच्छेदप्रसङ्गात्। अतो दोषस्य **विद्यमानत्वाद्भेदभ्रमस्य** समूलत्वम्। अनेन बाधकसन्निधौ बाध्यसद्भावः, अकारणककार्योत्पत्तिश्चेति दूषणद्वयं दृष्टान्ते परिहृतं **भवति, परमते तु दूषणद्वयं** तिष्ठत्येव। तर्ह्याप्तोपदेशादिवैयर्थ्यमित्यत्राह—**प्रबलेति।** रज्जुसर्पभ्रान्तिमत्पुरुषापेक्षया भयादि**कार्यनिवृत्तिः फलत्वेनोक्ता। आदि**शब्दात् पलायनादि गृह्यते। द्विचन्द्रज्ञाने च स्वस्यादुष्टकरणत्वधीनिवृत्तिः, औषधादिप्रवृत्तिश्च फलम्। ऐन्द्रजालिकभ्रमादिषु भ्रमहेतोः प्राबल्यात्, वस्तुतो भ्रमलेप्यसत्यविषयत्वनिश्चयप्रतिबन्धः स्यादिति तद्व्यावृत्त्यर्थः **प्रबलप्रमाण**शब्दः। **निवर्तत इति।** प्रतिभासे विद्यमानेपि विषयसत्त्वाभावनिश्चयद्वारा भयादिनिवृत्तिहेतुरासोपदेशादि**रित्यर्थः। यद्वा,** यथावदर्थस्वरूपापरोक्ष्यप्रवृत्तिद्वारा भयादिनिवृत्तिहेतुरित्यर्थः। **तु** शब्दः शङ्काव्यावर्तकः॥

ज्ञानानुत्पत्तिपक्षस्य बह्वभिमतत्वात् सिंहावलोकितकेन तं दूषयति—**अपि चेति।** नायं सर्पो रज्जुरितिवद्दृष्टद्वारा हि भेदनिरासः; अदृष्टमुखेन चेद् भेदसत्त्वप्रसङ्गात्। अतो भूयस्या भेदवासनाया अल्पीयस्याऽद्वैतवासनया निरासोऽनुपपन्न इत्यर्थः। नन्वदृष्टद्वारा निवर्त्यत्वे निवर्त्यस्य सत्त्वं नानिष्टं; ध्याननिवर्त्यसर्पवद्व्यवहारदशायां वासनायाः सत्त्वाभ्युपगमात्, उत्पन्ने तु ज्ञाने तदुत्पत्तिस्थितिविनाशाश्च बाधिताः स्युरिति—नैवम्; ध्याननिवर्त्यसर्पस्यानित्यत्वमेव, न कदाचिदपि **बाध्यत्वं सिद्धमिति,** तद्वदेवादृष्टनिवर्त्यवासनाया अपि वास्तवसत्त्वप्रसङ्गात्। नैन्वैक्यभावनारूपं निदिध्यासनं प्रतिबन्धनिवर्तकं **चेदुक्तदोषः** स्यात्, तँत्तु न प्रतिबन्धनिवृत्त्यै, किं तु वाक्यार्थज्ञानोदयसहकारीति—मैवम्; स्मृतिरूपस्य निदिध्यासन**स्यानुभवसापेक्षतया तस्य वाक्यार्थज्ञानजननसहकारित्वायोगात्। ननु** यद्यपि, परोक्षानुभवस्य ध्यानमनुपकारकं—तथापि, निदिध्यासनसहकृतं **वाक्यमपरोक्षधीहेतुः** स्यात्—नैवम्; निदिध्यासनसहकृतत्वेपि शब्दत्वादेवापरोक्षधीहेतुत्वायोगात्, **ज्योतिष्टोमवाक्यवत्। एवं शाब्दप्रत्यक्षविरोधात्तदविरोधनिर्वाहानुपपत्त्या** वाक्यार्थज्ञानमात्रस्य निवर्तकत्वासंभवात्, पारिशे**ष्याद् वाक्यार्थज्ञानादन्यदेव मुक्त्युपायज्ञानं** विधित्सितमित्याह—**अत इति।** न केवलं पारिशेष्यम्, अनुग्राहिकाः श्रुतयश्च **सन्तीत्याह—तथाचेति। विज्ञायेत्यादिवाक्यद्वये** ज्ञानसामान्यशब्दः। वाक्यद्वयोपादानं च, उपसर्गभेदेपि विधिप्रत्ययान्त**तदाहितत्वोत्थार्थभेदो नास्तीति ज्ञापनार्थम्। ध्यायतेति** विशेषशब्दः। **निचाय्येति** ध्यानस्य प्रत्यक्षसमानाकारता

---

१ नन्वैं। २ चेत्तु।

मन्तव्यो निदिध्यासितव्यः' (बृ. २।४।५), **'सोन्वेष्टव्यः। स विजिज्ञासितव्यः'** (छा. ८।७।१) **इत्येवमाद्याः**। अत्र **निदिध्यासितव्य इत्यादिनैकार्थ्यात्** 'अनुविद्यविजानाति, विज्ञाय प्रज्ञां कुर्वीते'त्येवमादिभिर्वाक्यार्थज्ञानस्य[1] ध्यानोपकारकत्वात् **अनुविद्य, विज्ञायेत्यनूद्य प्रज्ञां कुर्वीत, विजानातीति** ध्यानं विधीयते। श्रोतव्य इति चानुवादः; स्वाध्यायस्यार्थपरत्वेनाधीतवेदः पुरुषः प्रयोजनवदर्थाववोधित्वदर्शनात्तन्निर्णयाय स्वयमेव श्रवणे प्रवर्तत इति श्रवणस्य प्राप्तत्वात्। श्रवणप्रतिष्ठार्थत्वान्मननस्य मन्तव्य इति चानुवादः। तस्माद्ध्यानमेव विधीयते। वक्ष्यति च **'आवृत्तिरसकृदुपदेशात्'** (ब्र. सू. ४।१।१)

दर्शिता; 'चायृ दर्शन' इति हि धातुः। **उपासीते**त्यनेन ज्ञानस्योपासनशब्दवाच्यत्वं सिद्धम्। **अन्वेष्टव्य इति** मननशिरस्कश्रवणोक्तिः। **निदिध्यासितव्यः, विजिज्ञासितव्य** इत्युपादानेन सन्नन्तत्वेपीष्यमाणज्ञानपरं वाक्यमिति दर्शितम्। सन्नन्तपदद्वयस्योपादानं, सामान्यविशेषशब्दत्वात्। **इत्येवमाद्या इति। इति**शब्द उपात्तश्रुतिवाक्यस्वरूपमात्रपरः। **एवं**-शब्दः सन्नन्तत्व-विधिप्रत्ययान्तत्व-तद्राहित्य-उपसर्गभेदादिप्रकारपरः। उदाहृतवाक्येषु ज्ञानसामान्यवाचिपदानां विशेषाकाङ्क्षायां वाक्यार्थज्ञानस्वरूपो विशेषः पर्यवसानभूमिः स्यादिति-शङ्कानिवृत्त्यर्थमाह—**अत्रेति। अत्र** उपात्तेषु वाक्येषु। इत्येवमादिभिर्ध्यानं विधीयत इत्यन्वयः। **निदिध्यासितव्य इत्यादिना इति। आदि**शब्देन सन्निहितज्ञानविशेषवाचिवाक्यान्तरं विवक्षितम्। ऐकार्थ्यं च सर्वशाखाप्रत्ययन्यायात्; स हि अनुक्ताकाङ्क्षितस्वीकारफलः। तत्र 'छागो वा मन्त्रवर्णादि'ति न्यायात् सामान्यवाचिशब्दानां विशेषपर्यवसानम्। 'अनुविद्य विजानाति, विज्ञाय प्रज्ञां कुर्वीते' त्यत्र **केन पदेन** वाक्यार्थज्ञानमनूद्यते, केन वा ध्यानं विधीयते, इत्यपेक्षायामाह—**अनुविद्य, विज्ञायेत्यनूद्येति**। अनुवादः **किमर्थः**, इत्यत्राह—**ध्यानोपकारकत्वादिति। प्रज्ञां कुर्वीत, विजानाती**ति वाक्यद्वयोपादानस्य पूर्वोक्तमेव फलम्। एवं स्मृतिष्वपि सामान्यशब्दः सति विशेषोपस्थापके तत्पर्यवसितो दृष्टः—'निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतम्। रजखलामुखास्वादः सुरापानसमानि तु' इत्यत्र निषिद्धसामान्यस्य भक्षणसामान्यं पातित्यहेतुरवगतं, 'छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम्। पलाण्डुं गृञ्जनं चैव मत्वा जग्ध्वा पतेद्द्विज' इत्यत्र निषिद्धविशेषस्य भक्षणविशेषः पातित्यहेतुर्दृष्टः, अत्र पूर्वग्रन्थश्चरमग्रन्थार्थे पर्यवस्यति॥

भवतु सामान्यशब्दो विशेषपर्यवसायी, अत्र तु ज्ञानसामान्यवाचिशब्दः **श्रोतव्य** इति श्रवणरूपज्ञानविशेषे पर्यवस्यतीत्यत्राह।—**श्रोतव्य इति चेति। चः** शङ्कानिवृत्तौ, समुच्चये वा। विज्ञायानुविद्येतिवदयं चानुवाद इत्यर्थः। तत्संक्षेपेणोपपादयति—**स्वाध्यायस्येति**। आपातप्रतीत्या स्वतःप्राप्तिः श्रवणस्य स्यात्, मननस्य तादृशहेतुभावात्तत्र पर्यवसानं मास्तीत्यत्राह—**श्रवणप्रतिष्ठार्थत्वादिति। चः** पूर्ववत्। **तस्माद्ध्यानमेवेति**। न तु वाक्यार्थज्ञानमित्यर्थः। **ननु श्रोतव्य** इति पुस्तकनिरीक्षणादिव्यावृत्त्यर्थो विधिः किं न स्यात्, नैवम्; वेदान्तवाक्यानामपि पुस्तकनिरीक्षणादिव्युदासस्याध्ययनविधिसिद्धत्वात्, ब्रह्मभीमांसाया विलेखनपठनादेरप्रतिषिद्धत्वात्, गुरूपसत्तौ श्रवणशब्दस्य मुख्यार्थलाभावात्, तस्याश्चात्राविहितत्वेपि 'गुरुमेवाभिगच्छे'दिति वाक्यान्तरसिद्धत्वाच्च। **ननु** न्यायोपेतवाक्यमात्रानवगम्यकेवलोपदेशगम्यार्थविशेषश्रवणं **श्रोतव्य** इति विधेयमिति—**चेत्र**; मननपूर्वभावितयाऽस्य श्रवणस्य न्यायानुगृहीतवाक्यजन्यज्ञानरूपतावगमात्, शब्दस्वारस्याच्च। **नच** मन्तव्य इत्यालम्भनसंज्ञीलनरूपमननविधिरिति वाच्यम्; श्रवणशब्दस्य न्यायोपेतवाक्यजन्यज्ञान इव मन्तव्यशब्दस्य तत्प्रतिष्ठापने प्रसिद्धिप्राचुर्यात्, तस्य चापवादाभावात्, उभयोरप्राप्तार्थद्वयविधायित्वे वाक्यभेदप्रसङ्गात्, सति गत्यन्तरे विशिष्टविधानाश्रयणस्यान्याय्यत्वाच्च। विधिर्हि पदावगतेष्वर्थेष्वेकत्रोपक्षीणशक्तिर्लाघवाय तदितरेषु स्वतोनुवादमपेक्षमाणः प्रापकाभावाद्विशिष्टे तात्पर्यं भजते, अत्र त्वनुवादसंभवान्न विशिष्टविषयत्वकल्पनं युक्तं, तस्मादनुवादः। अनेन **श्रवण**शब्दस्य यादवमिश्रोक्तनिर्वाहो निरस्तः। अत्र **द्रष्टव्य**शब्द उपायोपेयदशासाधारण्यादुपरि नियामकस्फुटार्थवाक्यान्तरेण सह व्याख्यास्यते। **ननु** न साधारणत्वं द्रष्टव्य इति तव्यताः दर्शनस्य विधेयत्वप्रतीतेः, फलस्य चाविधेयत्वात्; उच्यते—निदिध्यासनवद्दर्शनस्य च विधाने वाक्यभेदप्रसङ्गात्, निश्चितानुवादश्रवणमननसाहचर्याच्च विधित्वनिश्चयप्रतिबन्धात्, उपायस्य दर्शनरूपैत्वविषयप्रमाणादर्शने विशिष्टविधित्वाश्रयणायोगात्, 'मनसैतान् कामान् पश्यन् रमते, य एते ब्रह्मलोके परात्परं पुरिशयं पुरुषमीक्षते' इत्यादिभिः फलदशायां दर्शनस्य प्रामाणिकत्वाच्च **श्रोतव्य** इतिवत्तव्यदर्थमनादृत्य फलसमर्पकत्वं **द्रष्टव्य**शब्दस्य शङ्कितुं युक्तमिति—अत उपरिष्टाद्व्याख्येयत्वम्॥

अथोपासनस्य विधित्वितत्वद्रढिम्ने सूत्रकारोक्तिं दर्शयति—**वक्ष्यति चेति।** तादृशसूत्रासंभवव्युदासाय सूत्रमुपादत्ते—**आवृत्तिरिति।** उपासनशब्दाश्रवणात् सूत्रस्य तत्परत्वमस्फुटमिति तस्यार्थमाह—**तदिदमिति।** आवृत्तिद्वयत्रयव्या-

---

१ ज्ञानम्। २ °रूपस्त्व°।

इति। तदिदमपवर्गोपायतया विधित्सितं वेदनमुपासनमित्यवगम्यते; विद्युपास्त्योरव्यतिरेकेणोपक्रमोपसंहारदर्शनात्। **'मनो ब्रह्मेत्युपासीत'** (छा. ३।१८।१) इत्यत्र **'भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद'** (छा. ३।१८।३), **'न स वेद। अकृत्स्नो ह्येषः—आत्मेत्येवोपासीत'** (बृ. १।४।७), **'यस्तद्वेद यत्स वेद स मयैतदुक्तः'** (छा. ४।१।४) इत्यत्र **'अनु म एतां भगवो देवतां शाधि यां देवतामुपास्से** (छा. ४।२।२) इति। ध्यानं च—तैलधारावदविच्छिन्नस्मृतिसंतानरूपम्; **'ध्रुवा स्मृतिः। स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः'** (छा. ७।२६।२) इति ध्रुवायाः स्मृतेरपवर्गोपायत्वश्रवणात्। सा च स्मृतिर्दर्शनसमानाकारा; **'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे'** (मुं. २।२।८) इत्यनेनैकार्थ्यात्। एवंच सति **'आत्मा वारे द्रष्टव्यः'** (बृ. २।४।५) इत्यनेन निर्दिध्यानस्य

वृत्त्यर्थं **मसकृ**दिति सौत्रं पदम्। कस्यावृत्तिरित्यपेक्षायामाह—**तदिदं वेदनमिति। तदिदं** तृतीयाध्यायावसाने 'एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृते'रिति प्रस्तुतं मोक्षफलं ज्ञानमित्यर्थः। यद्वा **प्रज्ञां कुर्वीते**त्यादिसामान्यशब्दोक्तं वेदनमसकृदावृत्तिरूपमुपासनमित्यर्थः। **'अवगम्यत' इत्यन्ते**नावृत्तिरसकृदिति सूत्रांशो व्याख्यातः। **उपदेशादि**ति पदं व्याचष्टे—**विद्युपास्त्योरिति। स्थलत्रयमुदाहरति—मन इति।** 'मनो ब्रह्मे'ति वाक्यं 'रात्रीरुषेया'दितिवत्—'प्रतितिष्ठन्तीह वा एते य एता रात्रीरुपयन्ती'त्यत्र 'य एता रात्री' रिति सत्रानुवाद ब'द्य एवं वेदे' ति पूर्वविहितोपासनस्य फलार्थमनुवादः। वितरणविकमादिहेतुभेदात् कीर्ति–यशसोर्भेदः। 'मनो ब्रह्मेत्युपासीते'त्यादिप्रकरणे, 'यस्तद्वेदे'त्यादिप्रकरणे च वेदनोपासनवाचिशब्दयोर्विप्रकर्षात् प्रकरणैकलज्ञापना**यात्रे**युक्तम्। **अनु म इति।** यां देवतामुपास्से एतां देवतामनुशाधि। अनुपूर्वैः शासिर्विविच्य ज्ञापनार्थः। विविच्य ज्ञापयेत्यर्थः। 'व्यवहिताश्चे'ति सूत्रेण छन्दस्युपसर्गाणां व्यवहितप्रयोगः। 'न स वेदे'त्यत्र **सन्निकर्षोदत्र**शब्दाप्रयोगः। 'न स वेदे'त्यस्या'थ योऽन्यां देवतामुपास्त' इत्येतद्वाक्योपक्रमत्वादुपक्रमोपसंहारयोरुपासनशब्दः, मध्ये वेदनशब्दः। इदं च पूर्वस्मिन्वाक्ये **उपक्रमोपसंहारदर्शनादि**त्यनेनाभिप्रेतम्। **यस्तद्वेद** तस्य ब्रह्मणो वेदिता यो रैकः। **यत् स वेद** तस्य रैकस्य वेद्यं यद् ब्रह्म। **स** वेदिता रैकः, **एतत्** वेद्यं च, उभयं तव मयोक्तमित्यर्थः। सामान्यविशेषन्यायेन प्रकरणान्तरोक्तज्ञानसामान्यवाचिनां शब्दानां प्रकरणान्तरोक्तविशेषे पर्यवसायित्वं पूर्वमेव स्वयमेव भाष्यकारेण दर्शितं, सूत्रव्याख्याने त्वेकैकप्रकरणे व्यतिकरेणोपक्रमोपसंहारदर्शन**मुपदेशा**दिति पदस्यार्थत्वेनोक्तम्, उभयत्रोभयं हेतुत्वेन वाच्यं, तथाप्यविस्तरार्थमेकैकमुक्तम्। अत एव हि चतुर्थाध्याये उभयमपि हेतुत्वेन वक्ष्यते॥ **तदिद**मित्यादिकं सूत्रव्याख्यानम्; अन्यथा **तदिदमपवर्गोपायतया विधित्सितं वेदन**मिति नोच्येत, किं तु ध्यानमुपासनमित्येवोच्येत; इतरथा शुङ्गलिनोक्तिप्रकरणानौचित्यात्। पश्चादपि ध्यानं च तैलधारावदविच्छिन्नस्मृतिसंतानरूपमिति पूर्वप्रकृतध्यानशब्देन निर्देशात् पूर्वग्रन्थे ध्यानस्योपासनरूपत्वं विवक्षितं चेत्, पश्चादुपासनमविच्छिन्नस्मृतिसंतानरूपमित्युपासनशब्देनोच्येत॥

एवं प्रकृतसूत्रार्थे[1] विवृते, पूर्वप्रकृतस्य ध्यानस्य ध्रुवानुस्मृतिरूपमुपादयति—**ध्यानं चेति।** वेदनस्यासकृदावृत्तिं वदतः सूत्रकारस्यायंभावः—यथा ज्ञानसामान्यवाचिनां शब्दानां विशेषपर्यवसायित्वेनासकृदावृत्तिरूपज्ञानपरत्वं सिद्धम्, एवं विशेषान्तरोपस्थापकेषु सत्सु तद्विशेषपर्यवसायित्वं न्याय्यमिति। तस्मात्सूत्रकारेण कण्ठोक्तां ज्ञानस्यासकृदावृत्तिरूपतामुपपाद्य, तेनाभिप्रेतं श्रुत्यन्तरोपस्थापितं विशेषान्तरमाह—**ध्यानं चेति।** अनेन ग्रन्थेनासकृदावृत्तेर्व्यवहितत्वशङ्कानिरासार्थं विजातीयप्रत्ययान्तराव्यवहितत्वमुक्तम्। अत्र विच्छिन्नाविच्छिन्नस्मृतिसंततिसाधारणो ध्यानशब्दश्चेत् **ध्यानं चे**त्यादिना विशेषान्तरे पर्यवसानमुक्तं भवति, ध्यानशब्दस्याविच्छिन्नस्मृतिसंततत्वसाधारणत्वे ध्यानशब्दो व्याख्यातो भवति, अविच्छिन्नस्मृतिसंततित्वे[2] **वचनमाह—ध्रुवेति।** स्मृतेर्ध्रुवत्वं नाम विजातीयप्रत्ययान्तराव्यवहितं संततित्वं; स्मृतिव्यक्तीनां क्षणिकत्वात्। **अपवर्गोपायत्वश्रवणादिति।** तत्रापवर्गोपायभूतवेदनस्यासकृदावृत्तिरुक्ता, अत्रापि तदुपायत्वप्रत्यभिज्ञानात्तस्या एवाविच्छिन्नस्मृतिसंततिरूपत्वं विवक्षितमिति भावः। तस्या दर्शनरूपत्वमुच्यते—**साचेति।** न केवलं विषयैक्यतः साम्यम्, **अपित्वापरोक्ष्येणापीत्याकारशब्दस्य** भावः। **हृदयस्य** मनसः। **ग्रन्थयो** रागादयः। यद्वा, 'मच्चाः क्रोशन्ती'तिवद्धृदयशब्दस्तत्स्थजीवपरः, हृत्स्थानमवतीति व्युत्पत्तेर्वा, तस्य **ग्रन्थिः** प्रकृतिसंबन्धः, हृदयशब्दोपलक्षितं वा शरीरं ग्रन्थिः। **संशयशब्दो** विपर्ययस्यापि प्रदर्शनार्थः। देहात्माभिमानादिरूपाऽविद्येत्यर्थः। **कर्माणि** पुण्यपापरूपाणि। अविद्यासंचित-कर्मकृतप्रकृतिसंबन्धनिवृत्तिर्दर्शनसमानाकारोपासनेनेत्यर्थः। **एवं च सतीति।** उपायदशापन्नज्ञानस्य दर्शनरूपत्वे स्फुटार्थ-

---

१ अवधृते। २ °संतानसा°।

वाक्यान्तरसिद्धे सतीत्यर्थः। **च**शब्दो द्रष्टव्यशब्दस्य फलदर्शनाभिप्रायत्वशङ्कानिवृत्त्यर्थः। **दर्शन**शब्दस्य ज्ञानसामान्यपरत्वसंभवेपि 'द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदित'मिति श्रवणादीनां पृथगुक्तत्वाद्**द्रष्टव्य** इति पदं साक्षात्काररूपत्वपरम्। **दृष्ट**शब्दश्च तत्तुल्यार्थः, स चोपायदर्शनाभिप्रायः; **तस्मिन् दृष्टे हृदयग्रन्थिर्भिद्यत** इत्युक्तत्वात्, 'येनाहं नामृता स्याम्, अमृतत्वस्य तु नाशास्ति वित्तेन, एतावदेवारे खल्वमृतत्व'मिति पूर्वापरवाक्येषु फलस्य निर्दिष्टत्वात्, प्रकरणान्तरोक्तस्य साक्षात्कारत्वस्येहापि वक्तुमपेक्षितत्वात्, अपेक्षितविधेरनपेक्षितविधानदौर्बल्याच्च॥

ननु ध्रुवानुस्मृतेरेव दर्शनरूपत्वविधिरयुक्तः: ध्रुवानुस्मृतिदर्शनयोर्भिन्नप्रकरणान्नातयोर्दहर-शाण्डिल्यादिवेदनानामिव परस्परानपेक्षोपायत्वप्रतीतेः—नैवम्: **द्रष्टव्यो, निदिध्यासितव्य** इत्येकवाक्यविहितत्वात्। नच तत्रापि विद्याद्वयविधानं शङ्क्यं; रूपभेदाभावात्, तत एव वाक्यैकत्वे संभवति वाक्यभेदाश्रयणायोगात्, विद्यान्तरगणामिव तयोर्विकल्पप्रसङ्गाच्च। तयोर्निरपेक्षोपायत्ववादिनो विकल्प इष्ट इति—चेन्नः तस्याष्टदोषदुष्टस्य सति गत्यन्तरेभ्युपगन्तुमयुक्तत्वात्। दृश्यते हि व्रीहियवशास्त्रयोः तस्याष्टदोषदुष्टत्वम्—१ व्रीह्यनुष्ठाने यवशास्त्रस्य प्रामाण्यत्यागः, २ अविद्यमानाप्रामाण्यकल्पनं, ३ यवानुष्ठाने तस्य त्यक्तप्रामाण्यस्वीकारः, ४ स्वीकृताप्रामाण्यत्यागश्चेति यवशास्त्रे चत्वारो दोषाः; १ यवानुष्ठानवेलायामेव प्रथमप्रयोगस्वीकृतव्रीहिशास्त्रप्रामाण्यत्यागः, २ तदप्रामाण्यकल्पनं च, ३ तृतीयप्रयोगे व्रीहिपूपादीयमानेषु द्वितीयप्रयोगे स्वीकृतव्रीहिशास्त्रप्रामाण्यत्यागः, ४ त्यक्तप्रामाण्यस्वीकारश्चेति व्रीहिशास्त्रे चत्वारो दोषाः। इहापि यथासंभवं दोषप्राप्तिः। यद्वा, १ प्रतिपत्तिबाधः, २ अनुष्ठानबाधः, ३ अपूर्वबाधः, ४ फलबाधश्चेति—एकैकशिरसि दोषचतुष्टयादष्टदोषदुष्टत्वम्। अतो गत्यन्तरे सति विकल्पायोगाच्च न ध्रुवानुस्मृतिदर्शनयोः पृथगुपायत्वम्, नापि समुच्चयः; **च**शब्दाश्रवणात्, दर्शपूर्णमासयोरिव द्वन्द्वनिर्देशाभावाच्च। परमात्मनोतीन्द्रियत्वात्, तत्साक्षात्कारस्य चक्षुषा शब्दश्रवणस्येव प्रक्रान्तयोगं प्रत्यशक्यविधानत्वाच्चशब्दविषययोः स्मरणचाक्षुषज्ञानयोरिव समुच्चयोनुपपन्नः॥ ननु—परमात्मनो योगपरिशुद्धमनोग्राह्यत्वान्न दर्शनस्य चक्षुषा शब्दज्ञानतुल्यतेति तद्दर्शनोपायभूतव्यापारस्य विधेयत्वोपपत्तेः समुच्चयः संभवतीति—सत्यं; कस्तद्दर्शनोपायः, ततस्तु 'तं पश्यते निष्कलं ध्यायमान' इति श्रुतेर्ध्यानमेवेति चेत्, तर्हि द्रष्टव्यनिदिध्यासितव्यपदयोः पुनरुक्तिः स्यात्; उभयोरपि दर्शनोपायध्यानविधिपरत्वाविशेषात्। **द्रष्टव्य** इति दर्शनोपाये विहिते क उपाय, इत्यपेक्षायां—निदिध्यासनं विधीयते, द्रष्टव्यपदाभावे निदिध्यासनस्य तदुपायत्वं न ज्ञायत इति तज्ज्ञापनार्थत्वान्न पुनरुक्तिरिति—चेन्न; द्रष्टव्यपदश्रवणेपि दर्शनस्य ध्यानसाध्यत्वाप्रतीतेः, न हि दर्शनकामेनेति श्रूयते, तथा सति हि स्वर्गयागयोरिव साध्यसाधनभावावगमः स्यात्, नच ध्यानं प्रति श्रवणमननयोरिव दर्शनं प्रति ध्यानस्य दृष्टकिंचित्कारः, अतो न मानान्तरेण तयोः साध्यसाधनभावावगम इति वैयर्थ्यम्। किंच—ध्यानसाध्यं दर्शनं चेत् ध्यान-दर्शनयोः समुच्चयश्च न संभवतिः दर्शनं प्रति समुच्चये दर्शनस्य दर्शनं साधनमित्यात्माश्रयप्रसङ्गात्। नच मोक्षं प्रति समुच्चयसंभवः; ध्यानस्य स्वसाध्यदर्शनव्यवहितस्य मोक्षं प्रति दर्शनेन सहाव्यवहितकिंचित्कारायोगात्, न हि यागनिष्पत्त्यर्थानां प्रोक्षणावघातादीनामपूर्वनिष्पन्नैः यागेन सह समुच्चयः। यदि साक्षात्कारं प्रति ध्यानेन सहाव्यवहितकिंचित्कारोपपत्तये दर्शनसमानाकारं ज्ञानान्तरं विधेयमित्युच्यते—तदयुक्तम्; स्वर्गं प्रति ज्योतिष्टोमस्येव निदिध्यासनस्य स्वसाध्यं प्रति निरपेक्षोपायताप्रतीतिस्वारस्यभङ्गप्रसङ्गात्, न हि 'ज्योतिष्टोमेन स्वर्गकामो यजेते'ति वाक्यप्रतिपन्नं ज्योतिष्टोमस्य स्वर्गसाधनत्वं कर्मान्तरसापेक्षमवगम्यते, नचात्र—**च**शब्दो द्वन्द्वसमासो वा, अतो दर्शनसमानाकारतारूपविशेषणस्य किं विशेष्यमित्याकाङ्क्षायां—विशेष्यान्तरं च न दृश्यते, निदिध्यासनं च सन्निहितम्, अतस्तदेव दर्शनसमानाकारतया विधित्सितमिति युक्तमभ्युपगन्तुम्। ततश्च वाक्यभेदोपि न स्यात्, निदिध्यासनस्य **निरपेक्षोपायता**प्रतीतिस्वारस्यं च न बाध्येत॥

ननु विशिष्टविध्याश्रयणं चेदुपदेशैकगम्यार्थश्रवण-शुभाश्रयमनन-दर्शनरूपता-विशिष्टनिदिध्यासनविधिः किं न स्यात्—नैवम्; चतुर्ष्वंशेषु तात्पर्यकल्पनादपि द्वयोस्तत्कल्पनस्य लघुत्वात्, लघुपक्षसंभवे गुरुपक्षाश्रयणायोगाच्च। नचास्मिन्वाक्ये विधानाभावादौपदेशिकार्थाधिगमालम्बनसंज्ञीलनयोरसिद्धिः शङ्कनीयाः 'तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनि'रित्यनन्यथासिद्धवाक्यान्तरसिद्धत्वात्। तद्धि निरूपयिष्यते—'सहकार्यन्तरविधि'रिति सूत्रेण, तस्माद्दर्शनसमानाकारत्वगुणविशिष्टनिदिध्यासनविधिः॥ नन्वेवमपि न सर्वोपासनानां दर्शनसमानाकारनिदिध्यासनरूपतासिद्धिः, 'द्रष्टव्यो निदिध्यासितव्य' इति वाक्यस्य मैत्रेयीब्राह्मणे सत्वात्, अतस्तत्र प्रतिपाद्यस्यैवोपासनविशेषस्य तादृग्रूपता प्रतिपाद्या स्यात्—नैवम्; आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदित'मिति तत्रत्येनैव वाक्येन जगत्कारणविषयसर्वोपासनानां दर्शनसमानाकारनिदिध्यासनरूपतावगमात्। नहीदं वाक्यं विद्याविशेषविधायकम्; कारणज्ञानेन सर्वज्ञातता-

१ शक्यं।

दर्शनरूपता विधीयते । भवति च स्मृतेर्भावनाप्रकर्षाद्दर्शनरूपता । वाक्यकारेणैतत्सर्वं प्रपञ्चितम् । **'वेदनमुपासनं स्यात्तद्विषये श्रवणात्'** (बो. वृ.) इति । सर्वोपनिषत्सु मोक्षसाधनतया विहितं वेदनमुपासनमित्युक्तम् । **'सकृत्प्रत्ययं कुर्याच्छब्दार्थस्य कृतत्वात्प्रयाजादिवत्'** (बो. वृ.) इति पूर्वपक्षं कृत्वा **'सिद्धं तूपासनशब्दात्'** (बो. वृ.) इति वेदनमसकृदावृत्तं मोक्षसाधनमिति निर्णीतम् । **'उपासनं स्याद्ध्रुवानुस्मृतिर्दर्शनान्निर्वचनाच्च'** इति तस्यैव वेदनस्योपासनरूपस्यासकृदावृत्तस्य ध्रुवानुस्मृतित्वमुपवर्णितम् । सेयं स्मृतिर्दर्शनरूपा प्रतिपादिता । दर्शनरूपता च प्रत्यक्षतापत्तिः । एवं प्रत्यक्षतापन्नामपवर्ग-

---

प्रतिज्ञापरत्वात् । कारणमेव सर्वविद्योपास्यम्; 'कश्च ध्येय' इत्युपक्रम्य 'कारणं तु ध्येय' इति कारणस्यैव ध्येयत्वविधानात् । कारणविषयं चोपासनमत्र दर्शनसमानाकारनिदिध्यासनरूपमवगम्यते । अस्मिन्वाक्ये **विज्ञात**शब्दो हि निदिध्यासनपरः; 'द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, दृष्टे श्रुते मते विज्ञात' इति स्थानप्रमाणात् । अतोस्य वाक्यस्य सर्वविद्यासाधारणकारणमात्रविषयत्वात् जगत्कारणोपासनं चेत्–दर्शनसमानाकारनिदिध्यासनरूपमित्यवगम्यते । किंच—नानाविद्यानां विकल्पस्य वक्ष्यमाणत्वात्, गुरुपक्षविषयशास्त्रवैयर्थ्यप्रसङ्गेन गुरुलघुयत्नविकल्पायोगात्, वस्तुसामर्थ्यस्य प्रकरणाद्बलीयस्त्वेन च ध्रुवानुस्मृतिरूपत्वं, दर्शनरूपत्वं, वक्ष्यमाणभक्तिरूपत्वं च सर्वविद्यासाधारणाकारं भवितुमर्हन्ति । नन्विन्द्रियजन्मनोऽनुभवस्य ह्यपरोक्षरूपत्वं, तत्कथं स्मृतेः संभवतीत्यत्राह—**भवति चेति । भावना** वासना । **दर्शनरूपता** दर्शनसमानाकारता । 'वृक्षे वृक्षे च पदयामी'त्यादिष्वपि दर्शनसमानाकारत्वं स्मृतेश्च दृष्टमिति भावः । तच्च विशदतराभासरूपत्वम् । नचैतदनुभवासाधारणं; स्मृतेरपि तत्सम्भवस्य प्रामाणिकत्वात् । ननु दर्शनसमानाकारत्वविधानमयुक्तं; दर्शनवाचिशब्देन तत्समानाकारोपस्थापनस्यामुख्यत्वात्, 'न विधौ परः शब्दार्थं' इति न्यायविद इति—चेन्न;तैरेव 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते' त्यत्र दर्शपूर्णमासशब्दयोर्लक्षणया, इयेनादिवाक्ये इयेनादिशब्दानां गौण्या वृत्त्या कर्मनामधेयत्वाभ्युपगमात्, **'अर्धमन्तर्वेदि मिनुयादर्धं बहिर्वेदी'**त्यत्रापि मध्यदेशलक्षणाया अङ्गीकृतत्वाच्च । विशदतरत्वस्य फलरूपत्वादपुरुषतन्त्रस्य कथं विधानमिति—चेन्न; आज्यावेक्षणस्येव विधानोपपत्तेः । तत्राज्यसाक्षात्कारहेतुभूतव्यापारविषयो विधिरिति चेन्न; इहापि विशदतरत्वावहस्मृतिसंततिविषयमनोव्यापारविधिरित्युपपन्नम् ॥

अथ सूत्रकाराभिप्रायविदां वचनं दर्शयति—**वाक्यकारेणेति । एतत्सर्वमिति** । सूत्रकारेण कण्ठोक्तम्, अभिप्रेतं चेत्यर्थः । **प्रपञ्चितमिति** । पूर्वपक्षसिद्धान्तरूपेणोक्तमित्यर्थः । **प्रपञ्चनं** च 'वेदनमुपासनं स्या'दित्यादिना वाक्यचतुष्टयेन । वाक्यमेकैकं व्याचष्टे—**सर्वोपनिषत्स्विति** । न केवलं छान्दोग्य इत्यर्थः । **मोक्षसाधनतया विहितं वेदन**मिति घटादिज्ञानव्यावृत्तिः । **विहित**मित्यनुदितश्रवणादिव्यावृत्तिः । अस्यार्थस्य पूर्वपक्षसिद्धान्तरूपेण स्फुटीकरणार्थं, **सकृत्प्रत्ययं कुर्या**दिति वाक्यश्रवणेन **वेदनमुपासनं स्यादिति** वाक्यस्य पूर्वपक्षपरत्वशङ्काव्यावृत्त्यर्थं च सकृदित्यादिकं व्याचष्टे—**सकृदिति ।** सकृदित्यादिवाक्यमेव पूर्वपक्षपरं, न तु वेदनमुपासनं स्यादिति वाक्यम्; अनन्तरमेवोपासनरूपत्वस्य सिद्धान्ततयादिति भावः । तथा सिद्धान्ततत्वं दर्शयति—**सिद्धं त्विति । सिद्धन्तु** सिद्धान्तस्त्वित्यर्थः, यद्वा वेदनमुपासनं सिद्धमित्यर्थः । उपासनशब्दादित्येतद्व्याचष्टे—**वेदनमसकृदावृत्तमिति** । अस्याविच्छिन्नस्मृतिसंतानरूपत्वं सूत्रकाराभिप्रेतं, वाक्यकारेण कण्ठोक्तं च दर्शयति—**उपासनं स्यादिति । दर्शनात्** लोके दर्शनात् । **निर्वचनात्** श्रुतिवाक्यात् । **तस्यैवेति** । मोक्षसाधनतया विहितस्येत्यर्थः । **उपासनरूपस्येति** हेतुगर्भम् । **उपासनरूपत्वात्** उपासनशब्दवाच्यत्वादसकृदावृत्तस्येत्यर्थः; असकृदावृत्तं ज्ञानं ह्युपासनम् । एवमविच्छिन्नस्मृतिसंततिरूपत्वमुपपादितम् । सूत्रकारकण्ठोक्तमसकृदावृत्तिरूपत्वं, तदभिप्रेतं ध्रुवानुस्मृतित्वं च वदतो वाक्यकारस्यायं भावः—एतत्तुल्यन्यायतया विशेषान्तरोपस्थापकवाक्ये सति वेदनादिशब्दास्तत्पर्यन्ताः स्युरिति, तस्मात् पूर्वोक्तं दर्शनसमानाकारत्वमपि वाक्यकाराभिप्रेतमित्यभिप्रयन्नाह—**सेयमिति । सेयमसकृदावृत्तिरूपा, ध्रुवानुस्मृतिरूपा** चेत्यर्थः । दर्शनशब्दस्या'र्थदर्शी तत्त्वदर्शी'त्यादिप्रयोगात् परोक्षापरोक्षसाधारण्यमाशङ्क्याह—**दर्शनरूपता च प्रत्यक्षतापत्तिरिति** । प्रत्यक्षसमानाकारतापत्तिरित्यर्थः । 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्, आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति श्रवणादिपरोक्षज्ञानवेद्यस्यापि पृथग्विदेशादिति भावः । सूत्रकारवाक्यकारयोः कतिपयविशेषं वदतोः सति विशेषान्तरोपस्थापके तत्पर्यवसायिनि तात्पर्यान्तरस्याभिप्रेतत्वाच्चोत्तरसिद्धं विशेषान्तरमस्तीत्याह—**एवमिति** । अनेन श्रवणादीनां मुक्त्युपायत्वनिषेधान्नोपासनस्य मोक्षोपायत्वमिति शङ्काव्युदासश्च भवति । **एवम्** उक्तेन प्रकारेण । सामान्यविशेषन्यायेन प्रत्यक्षतापन्नामित्यर्थः । **अपवर्ग-**

---

१ दर्शनसमानाकारता । २ 'पूर्वसूत्रेष्वपि' का. मु. पु. ।

साधनभूतां स्मृतिं विशिनष्टि—**'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्'** (का. २।२३) इति। अनेन केवलश्रवणमननिदिध्यासनानामात्मप्राप्त्यनुपायत्वमुक्त्वा **यमेवैष आत्मा वृणुते तेन लभ्य** इत्युक्तम्। प्रियतम एव हि वरणीयो भवति। यस्यायं निरतिशयप्रियः स एवास्य प्रियतमो भवति। यथायं प्रियतम आत्मानं प्राप्नोति तथा स्वयमेव भगवान्प्रयतत इति भगवतैवोक्तम्। **'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥'** (गी. १०।१०) इति, **'प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रियः।'** (गी. ७।१७) इति च। अतः साक्षात्काररूपा स्मृतिः स्मर्यमाणात्यर्थप्रियत्वेन स्वयमत्यर्थप्रिया यस्य स एव परेणात्मना वरणीयो भवतीति तेनैव लभ्यते पर आत्मेत्युक्तं भवति। एवंरूपा ध्रुवानुस्मृतिरेव भक्तिशब्देनाभिधीयते; उपासनपर्यायत्वाद्भक्तिशब्दस्य। अत एव

साधनभूतामिति प्रतीकोपासनव्यवच्छेदः। **नायमात्मेति। प्रवचन**शब्दो मननं लक्षयति; मननफलत्वात् प्रवचनस्य, मननस्याचार्यप्रवचनफलत्वाद्वा। प्रोच्यतेनेनेति करणव्युत्पत्त्या वा **प्रवचनं** मननम्। **मेधा** निदिध्यासनं; परिशेषात्। अस्मिन्वाक्ये श्रवणादीनामनुपायत्वं प्रतीतं, ध्रुवानुस्मृतिविशेषणत्वेन न किंचित्प्रतिपन्नम् अतस्तद्व्याचष्टे—**अनेनेति। केवलश्रवणमननिदिध्यासनानां** वक्ष्यमाणविशेषणविरहितानामित्यर्थः। यथा—'न पृथिव्यामग्निश्चेतव्य' इत्यत्र हिरण्योपधानरहितपृथिव्यां चयनं निषिध्यते, न तु पृथिवीमात्रे—तद्वदिति भावः। विवक्षितविशेषणं वाक्यतात्पर्यनिरूपणेन दर्शयिष्यन्वाक्यस्यार्थान्वयं दर्शयति—**यमेवैष आत्मा वृणुते तेनैव लभ्य इत्युक्तमिति॥**

वरणीयेन लभ्योस्तु ततः कथं ध्रुवानुस्मृतेर्विशेषितत्वमिति शङ्कायां तद्दर्शयितुं लोकसिद्धप्रतीतिमाह—**प्रियतम एव हीति।** प्रीतिविषयमात्रस्य न वरणीयत्वं किंतु स्वयमुपस्थितस्य स्वीकार एव, अतस्तद्व्यावृत्त्यर्थं **प्रियतम** इत्युक्तम्। ततः किमित्यत्राह—**यस्येति।** यस्योपासकस्यायं परमात्मा निरतिशयप्रीतिविषयः स एवास्य परमात्मनो निरतिशयप्रीतिविषयो भवति। चेतनत्वे सति भगवता वरणीयत्वं भगवति निरतिशयप्रीतिमत एव भवति, यद्वा—स्वतःप्रियत्वं, वरणीयत्वं च स्वस्मिन् प्रीतिमत एव। पुण्यक्षेत्रादिषु भगवतः प्रीतिः स्वस्मिन् प्रीतिमत्पुरुषवरणार्था, पत्रपुष्पफलादिषु तत्संबन्धनिबन्धना। **स एवेति। एव**कारेण केवलश्रवणादिमद्व्यावृत्तिः। भगवति प्रीतिमति भगवत्प्रीतिविषयत्वमिति कथमिदमवगम्यत इत्यपेक्षायामत्र प्रमाणतया स्मृतिवचनमर्थोपन्यासपूर्वकं दर्शयन्वरणप्रकारमपि विवृणोति—**यथेति। अयं** भगवति निरतिशयप्रीतिमान्। **प्रियतमः** निरतिशयभगवत्प्रीतिविषयो भवन्नित्यर्थः। 'ददामि बुद्धियोगं त' मित्यस्यार्थविवक्षया **स्वयमेव भगवान् प्रयतत** इत्युक्तम्। अनेन वरणप्रकारो दर्शितः। **भगवतैवोक्तमित्येव**कारेण भगवदाप्त्यतिशयः सूचितः। **सततयुक्तानां** सततयोगं काङ्क्षमाणानाम्। 'आशंसायां भूतवच्चे'ति कर्तरिक्तः। **प्रीतिपूर्वकं ददामी**त्यन्वयः। अनेन परस्परविषयप्रीतिरुपास्योपासकयोर्दर्शिता। **सततयुक्त**शब्दार्थस्फुटीकरणायाह—**प्रियो हीति। अत्यर्थम्** अतिक्रान्तामिधेयम्। प्रियत्वं वाचामगोचरमित्यर्थः। ध्रुवानुस्मृतिं विशिनष्टीति हि पूर्वमुक्तम्, अत्र यो भगवति प्रीतिमान् भवति तस्मिन्नुपासके भगवतः प्रीतिमत्त्वमुक्तम्, तत्कथं ध्रुवानुस्मृतेर्विशेषितत्वमित्यत आह—**अत इति। अतः** उक्तार्थस्य लोकस्मृतिभ्यां सिद्धत्वादित्यर्थः। यद्वा, ध्रुवानुस्मृतिवचनात्, वरणीयत्ववचनात्, वरणीयस्य च भगवति निरतिशयप्रीतिमत्त्ववचनाच्चेत्यर्थः। **साक्षात्काररूपा स्मृति**रित्यनेन पूर्वोक्ताकारविशिष्टाया विशेषान्तरमिति दर्शितम्। **स्मर्यमाणात्यर्थप्रियत्वेन स्वयमप्यत्यर्थप्रियेति।** 'अर्थेनैव विशेषो हि निराकारतया धियामि'ति भावः। **स्वयमप्यत्यर्थप्रिया** अनुभूयमानोऽनुभव इतिवदयं निवेश औपचारिकः। अत्यर्थप्रीतिरूपेत्यर्थः। यद्वा, **अत्यर्थप्रिया** अत्यर्थानुकूलरूपा; स्मर्यमाणस्य भगवद्विषयस्य निरुपाधिकनिरवधिकानुकूलत्वेन तद्विषयानुस्मृतिरपि हि निरतिशयानुकूला भवति। यद्वा, ध्रुवानुस्मृतिः स्वयमत्यन्तानुकूलत्वादयुक्तावस्थायामपि प्रीतिरूपज्ञानेन प्रतिसंधीयत इति—**प्रिया**। अत एव हि—'या प्रीतिरविवेकाना'मित्यादिना सा प्रार्थ्यते। प्रीतिरूपध्रुवानुस्मृतेरपवर्गोपायत्वमुक्तम्, अन्यत्र भक्तेरुपायत्वं दृश्यते कथमनयोरैकार्थ्यमित्यत्राह—**एवंरूपेति।** यद्वा—**'शेमुषी भक्तिरूपे'**ति भक्तिरूपज्ञानस्योपायत्वं प्रागुक्तम्, कथमिदानीं प्रीतिरूपध्रुवानुस्मृतेरुपायत्वं प्रतिपाद्यत इत्यत्राह—**एवंरूपेति। एवंरूपा** साक्षात्कारप्रीतिरूपत्वपर्यन्ता ध्रुवानुस्मृतिरेव—भक्तिशब्दवाच्येत्यर्थः। कुत इत्यत्राह—**उपासनपर्यायत्वादिति।** उपासनादिशब्दानां भक्तिशब्दस्य चैकार्थवृत्तित्वं विवक्षितं, न तु घटकुम्भशब्दयोरिव पर्यायत्वम्। एकार्थवृत्तित्वं च 'सेवा भक्तिरुपास्ति'रिति नैघण्टुकोक्तेरवगम्यते। 'स्नेहपूर्वमनुध्यानं भक्ति'रित्यभिधीयते। **भज**

---

१ इतः पूर्वं 'तेषामिति' का. मु. पु.।

श्रुतिस्मृतिभिरेवमभिधीयते—**'तमेव विदित्वाति मृत्युमेति'** (श्वे. ३।८), **'तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते'** (नृ. पू. १।६), **'नाहं वेदैर्न तपसा न दानेन न चेज्यया । भक्त्या त्वनन्यया शक्य अहमेवं विधोऽर्जुन ॥ ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप । पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ॥'** (गी. ११।५३–५४) इति एवंरूपाया ध्रुवानुस्मृतेः

इत्येष धातुर्वै सेवायां परिकीर्तितः । तस्मात्सेवा बुधैः प्रोक्ता भक्तिशब्देन भूयसी'त्यादि चानुसंधेयम् । यद्यपि, साक्षात्कार-रूपत्वभक्तिरूपत्वादिपरगणां वाक्यानां विद्याविशेषविषयप्रकरणगृहीतत्वेपि सर्वोपासनसाधारणत्वं लघुगुरुयत्नविकल्पानुपपत्तेः प्राप्तं—तथापि, प्रपदने तु लघुगुरुयत्नविकल्पानुपपत्तिरूपन्यायो वचनबलप्रतिक्षिप्तः; न हि वचनविरोधे न्यायः प्रभवति, वचनविरोधाभावादुपासनेषु तस्य प्रवृत्तिः ॥

वेदान्तेषूपासनपराणां वाक्यानामैकार्थ्यनिर्ज्यर्थं भक्तिदशापन्नस्यैवोपासनस्यापवर्गोपायवेदनत्वमुक्तं, स्मृतिवचनप्रदर्शनं च श्रुत्यर्थवैशद्याय कृतम्, इदानीं तु श्रुतिस्मृत्योरैकार्थ्येन मुक्त्युपायवेदनस्य भक्तिरूपोपासनत्वमुपपाद्यते—**अत एवेति ।** अपवर्गोपायवेदनस्य भक्तिरूपोपासनत्वादेवेत्यर्थः । **तमेव विदित्वेति** वाक्यं श्वेताश्वतरोपनिषदि श्रूयते, तत्र–'तस्मात्सर्वंगतः शिव' इति शिवशब्दग्रहणाच्छिवस्य परमात्मत्वविषयभ्रमः कस्यचिन्मन्दधियः स्यादिति तन्निवृत्त्यर्थं 'वेदाहमेतं पुरुषं महान्तम्, महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तक' इत्युपक्रमोपसंहारयोरवगतपरमपुरुषपरैव सोपनिषदिति—पुरुषसूक्तैकार्थ्यं दर्शयितुं **तमेवं विद्वानिति** वाक्यमुपात्तम् । **तमेवं विद्वानिति** वाक्येन 'नान्यः पन्था' इति परमपुरुषवेदनव्यतिरिक्तोपायनिषेधः कृतः, **नाहं वेदैरित्यादिना** तद्भक्तिव्यतिरिक्तोपायनिषेधः कृतः, उभयोरप्युपबृंहणोपबृंहणीयवचनयोः प्रमाणतमत्वेन सर्वाविगीतयोरैकार्थ्यं **वेदना**दिशब्दानां भक्तिपर्यन्तत्वे सिद्ध्यतीति भावः । उपायान्तरनिषेधकण्ठोक्त्या, ज्ञान-दर्शनप्राप्तीनां भक्तिसाध्यत्वकण्ठोक्त्या च **नाहं वेदैरिति** वचनमुपात्तम् । **ननु** 'भक्त्या मामभिजानाति, ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तर'मिति भक्तिजन्यज्ञानस्यैवाव्यवहितोपायत्वमवगम्यते, न तु भक्तेरिति—शङ्का च **नाहं वेदै**रित्यनेन परिहृता भवति; अत्र ज्ञानदर्शनयोरिव प्राप्तेरपि भक्तिसाध्यत्वावगमात् । **भक्त्याप्रवेष्टुं च शक्य** इति ह्यन्वयः । **भक्त्या मामिति** वचनेपि **ततो मां विशत** इति तच्छब्दपरामृष्टाया भक्तेरेव प्राप्त्युपायत्वमवगम्यते; **तत** इति भक्तिपरामर्शाभावे **तदनन्तर**मित्यनेन पौनरुक्त्यप्रसङ्गात्, अतश्च भक्तिरेवाव्यवहितोपायः । **पुरुषः स परः पार्थ**त्यत्र च **भक्त्या लभ्य** इति भक्तेः प्राप्तिसाधनत्वं स्वरसतोवगम्यते । अनेन पुरुषशब्दप्रत्यभिज्ञापितपुरुषसूक्तप्रतिपाद्यवस्तैक्यवत् तत्प्रतिपाद्योपायैक्यं न्याय्यमिति सूचितम् ॥

अस्त्वेवं वेदनस्य भक्तिरूपोपासनत्वसिद्धिः, ततः प्रकृतस्य कर्मापेक्षित्वस्य किमायातमित्यत्राह—**एवमिति । एवंरूपाया** आपरोक्ष्यप्रीतिरूपत्वविशेषणविशिष्टायाः । वाक्यकार–सूत्रकाराभ्यामभिप्रेताः, कण्ठोक्ताश्च मोक्षोपायज्ञानावस्था-विशेषाः कर्मसाध्या इति भावः । **ध्रुवानुस्मृतेः साधनानीति** । यथा—'असिना जिघांसती'त्यत्रासेर्हननसाधनत्वं न लिच्छासाधनत्वं, तथा—'यज्ञेन विविदिषन्ती'त्यत्रापि विद्यासाधनत्वमेवोक्तं, न तु तदिच्छासाधनत्वं; यज्ञादेर्वेदनेच्छासाधनत्वेन विनियोगायोगादिति भावः । तथा हि—सर्वेषां पुरुषाणामवान्तरसाध्योपाये प्रवृत्तिः परमसाध्येच्छया विना नोपपद्यते, यथा यागाद्युपायभूतद्रव्यार्जनादौ प्रवृत्तिः यागादिसाध्यापूर्वादिविषयेच्छया विना नोपपद्यते, तथेच्छासिद्ध्यर्थमनुष्ठानमिच्छासंपाद्य-वेदनेच्छया विना नोपपद्यते, अतो वेदनेच्छायां जातायां वेदनोपायभूतेच्छासिद्ध्यर्थानुष्ठानं–तस्यां जातायां च तदर्थमनुष्ठानमपेक्षितमिति तदनुष्ठानविधिवैयर्थ्यं स्यात् ॥ किंच—'स्वसिद्धिसापेक्षा स्वसिद्धि'रित्यात्माश्रयः, वेदनेच्छया इच्छासिद्ध्यर्थ-कर्मानुष्ठानम्–इच्छासिद्ध्यर्थकर्मानुष्ठानाद्वेदनेच्छासिद्धिरित्यन्योन्याश्रयणं वा, अतो विविदिषासाधनत्वं कर्मणां नैव युक्तम् । **ननु**–इच्छासिद्ध्यर्थकर्मानुष्ठानस्यात्माश्रयादिग्रस्तत्वे क्वचिदपीच्छा न संभवेत्; इच्छाहेतुभूतकर्मानुष्ठानायोगात्, न 'चेच्छाया विषयवैलक्षण्यज्ञानमात्राधीनत्वं; वैलक्षण्यज्ञानेपि कस्यचिदिच्छानुत्पत्तिदर्शनात्, अतः कस्यचिदिच्छोत्पत्तेः कर्महेतुकत्वमाश्रयणीयं, तच्च तवानुपपन्नम्—नैवं; भोगादृष्टोद्बोधितपूर्ववासनासचिवाद्विषयवैलक्षण्यज्ञानादिच्छोत्पत्त्युपपत्तेः । न चाज्ञात-सुकृतवशाद्धर्मरुचिवद्यज्ञादिना वेदनेच्छासिद्धिरिति—वाच्यम्; बह्वर्थव्ययायाससाध्यानां यज्ञादीनामज्ञातसुकृतरूपलासंभवात्, यज्ञेन विविदिषन्तीति वाक्यस्य ह्यर्थश्चिन्त्यते, अतो बुद्धिपूर्वकमेव यज्ञाद्यनुष्ठानं तत्र मोक्षोपायवेदनेच्छाया अभावे बह्वर्थयत्न-साध्यकर्मेच्छा फलान्तरामिसंधिपूर्वकत्वनियमान्न विविदिषां साधयति, फलान्तरामिसंधिविधुरं तु यज्ञादिकं वेदनेच्छया विना नोपपद्यते; प्रयोजनानुद्देशेन प्रेक्षावतः प्रवृत्त्ययोगात्, प्रकृष्टप्रयोजनतदुपायेच्छाविरहे क्षुद्रप्रयोजनपरित्यागायोगाच्च, अतोवा-

---

१ 'वृत्तम्' आ. मु. पु. ।

साधनानि यज्ञार्दानि कर्माणीति **'यज्ञादिश्रुतेरश्ववत्'** (ब्र. सू. ३।४।४६) इत्यभिधास्यते। यद्यपि विविदिषन्तीति यज्ञादयो विविदिषोत्पत्तौ विनियुज्यंते, तथापि तस्यैव वेदनस्य ध्यानरूपस्याहरहरनुष्ठीयमानस्याभ्यासाधेयातिशयस्याप्रायणादनुवर्तमानस्य ब्रह्मप्राप्तिसाधनत्वात्तदुत्पत्तये सर्वाण्याश्रमकर्माणि यावज्जीवमनुष्ठेयानि। वक्ष्यति च **'आ प्रयाणात्तत्रापि हि दृष्टम्'** (ब्र.सू.४।१।१२), **'अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्'** (ब्र. सू. ४।१।१६), **'सहकारित्वेन च'** (ब्र.सू.३।४।३३) इत्यादिषु। वाक्यकारश्च ध्रुवानुस्मृतेर्विवेकादिभ्य एव निष्पत्तिमाह—**'तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः; संभवान्निर्वचनाच्च'** (वो.वृ.) इति। विवेकादीनां स्वरूपं चाह—**'ज्ञात्याश्रयनिमित्तादुष्टादन्नात्कायशुद्धिर्विवेक'** (वो. वृ.) इति। अत्र निर्वचनम्—**'आहारशुद्धौ सत्त्वशुद्धिः**

न्तरसाध्येच्छासिद्ध्यर्थमनुष्ठानं परमसाध्यवेदनेच्छया विना नोपपद्यत इति—स्वसिद्ध्यर्थकर्मानुष्ठानस्य स्वसिद्धिसापेक्षत्वादात्माश्रयादिदोषः स्यादेव। **अभिधास्यत इति**। तत्रोपपादयिष्याम इत्यर्थः॥

विविदिषासाधनत्वे यज्ञादेरात्माश्रयादिदोषाभावमभ्युपगम्याह—**यद्यपीति। तस्यैव** इच्छाविषयभूतस्य। **ध्यानरूपस्येति** वाक्यार्थज्ञानव्युदासः। ध्यानस्याप्येकदिनानुष्ठेयत्वव्युदासार्थमाह—**अहरहरिति**। अहरहरनुष्ठानफलमाह—**अभ्यासेति**। अहरहरनुष्ठानेपि मासर्तुसंवत्सराद्यवधित्वव्यावृत्त्यर्थमाह—**आप्रयाणादिति**। आप्रयाणादनुवर्तमानत्वेपि एकद्वित्रिदिनान्तरितव्यावृत्त्यर्थ**महरहरनुष्ठीयमानस्ये**त्युक्तम्। तत्रापि स्मृतिविच्छेदव्युदासार्थं **ध्यानरूपस्ये**त्युक्तम्। **तदुत्पत्तये** विविदिषोत्पत्तये। वेदनस्याव्यवहितप्रकृतत्वेप्यर्थवशा**त्तच्छब्दो** विविदिषापरः; विविदिषासाधनत्वं ह्यभ्युपगम्योच्यते। आप्रयाणादहरहरुपासनानुवृत्तौ, यावज्जीवं कर्मणोपेक्षितत्वे च किं प्रमाणमित्यत्राह—**वक्ष्यतिचेति। चः** शङ्कानिवृत्तौ। सूत्रसंदर्शनेन तद्विषयभूतश्रुतिवाक्यमपि दर्शितं भवतीत्यभिप्रायेणोपासनानुवृत्तिपरं सूत्रं दर्शितम्—**आप्रयाणादिति**। 'स खल्वेवं वर्तयन्यावदायुष'मिति श्रुतिः। यावच्छब्दस्य साकल्यार्थत्वादहरहरनुष्ठानसिद्धिः, तावत्कर्मापेक्षामाह—**अग्निहोत्रेति**। आश्रमधर्माणामाश्रमशेषत्वेपि विद्याङ्गत्वमप्यस्तीत्याह—**सहकारित्वेन चेति**। इत्यादिषु सूत्रेष्विममर्थं वक्ष्यतीत्यर्थः। उक्तं कर्मणो विद्याङ्गत्वम्, उपासनस्य शमाद्यङ्गत्वविरोधान्नोपपद्यत—इत्याशङ्क्य विरोधं परिजिहीर्षुः, तद्विषयश्रुतिवाक्यप्रदर्शनेनाप्रमाणतां च निराचिकीर्षुराह—**वाक्येति**। सूत्रकारामिप्रायज्ञैरप्येवमुक्तमिति भावः। **ध्रुवानुस्मृति**शब्देन **तल्लब्धि**रित्यत्र **तच्छब्दो** व्याख्यातः। **विवेकादिभ्य एव** न तु केवलकर्मणा, केवलशमादिना वेत्यर्थः। वाक्यकारग्रन्थ उपादीयते—**तल्लब्धिरिति**। 'उपासनं स्याद् ध्रुवानुस्मृति'रिति हि प्रकृतम्, अतो ध्रुवानुस्मृतिलब्धिरित्यर्थः। **विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्य** इति द्वन्द्वसमासः; स चेतरेतरयोगार्थः; एष्वन्यतमेन तल्लब्धेर्दुष्करत्वात्, समुच्चये संभवति पाक्षिकबाधगर्भविकल्पोद्यायुक्तः; तस्याष्टदोषदुष्टत्वात्, समुच्चयस्य चात्र संभवात्। एवं विवेकादिविधायिनां वाक्यानां समुच्चये तात्पर्यमिति दर्शयितुमितरेतरयोगद्वन्द्वेन वाक्यकारनिर्देशः। **ननु**—समुच्चयादर्थान्तरमितरेतरयोगः तत्कथमितरेतरयोगद्वन्द्वेन समुच्चयलाभः; उच्यते—अन्वाचयादिसहपठितात् समुच्चयाद् विकल्पप्रतिसंबन्धिसमुच्चयोर्थान्तरम्। एकस्मिन्नेव कार्ये मिथोनिरपेक्षसाधकानामन्वयोऽन्वाचयसहपठितः, विकल्पसमभिव्याहृतसमुच्चयस्त्वेकस्मिन् कार्ये मिथः सापेक्षाणामन्वयः, स एव चेतरेतरयोग इत्यविरोध—इति। निवृत्तिरूपशमादेः प्रवृत्तिरूपयज्ञादेश्च विरोधान्न समुच्चय—इति चेन्न; भिन्नविषयत्वेन विरोधाभावात्, अविहिताप्रतिषिद्धनिषिद्धकाम्यविषया हि शमादयः। **संभवात्** उपपन्नत्वात्, **निर्वचनात्** श्रुतिवचनाच्च। प्रमाणोपपत्तिभ्यामित्यर्थः। विवेकादयः किं रूपाः, कथं वा शमादेः कर्मणश्चाविरोधः, इत्यत्राह—**विवेकादीनां स्वरूपं चाहेति**। न केवलं परिगणनामात्रं, तत्स्वरूपं च वाक्यकार एवाहेत्यर्थः॥

प्रथमं विवेकस्वरूपविषयवाक्यमुदाहरति—**ज्ञात्याश्रयेति**। आहारविषयविवेचनं **विवेक**शब्देन विवक्षितं भवति; दुष्टाहारात् सात्त्विकाहाराणां विवेचनं विवेकः। **ज्ञातिदुष्टाः** कलञ्जगृञ्जनादयः। **आश्रयो** द्रव्यस्वामिपुरुषः, अभिशस्तपतितचण्डालादिद्रव्य**माश्रय**दुष्टम्। उच्छिष्टकेशाद्युपहतं **निमित्त**दुष्टम्। एतत्त्रिविधदोषरहिताहारविवेचनफलभूतकायशुद्धौ **विवेक**शब्द उपचरितः। यद्वा, विविक्ताहारसेवया राजस-तामसाहाराप्यायितदेहात् स्वदेहस्य विवेचनं विवेकः; अशुद्धेभ्यो विवेचनं हि शुद्धिः। **इति**शब्दो भाष्यकारीयः। **अत्र निर्वचन**मिति च भाष्यग्रन्थः। **निर्वचनं** निष्कृष्टं वचनम्। अप्रमाणेभ्यो निष्कृष्टं प्रमाणभूतं वचनमित्यर्थः। 'आहारशुद्धा'वित्यादि निर्वचनम्। **विमोकः** कामानभिष्वङ्गः, विषयमभुक्त्वा **स्थातुं** न शक्नोति येन स विकारोऽभिष्वङ्गः। 'कामान् क्रोधोऽभिजायत' इत्यादिवचनात् क्रोधाद्यभावश्चात्र फलितः। 'शान्त उपासी-

सत्त्वशुद्धौ ध्रुवास्मृतिः' (छा.७।२६।२) इति। 'विमोकः कामानभिष्वङ्गः' (बो.वृ.) इति। 'शान्त उपासीत' (छा.३।१४।१) इति निर्वचनम्। 'आरम्भणसंशीलनं पुनः पुनरभ्यास' (बो.वृ.) इति। निर्वचनं च स्मार्तमुदाहृतं भाष्यकारेण–'सदा तद्भावभावितः' (गी. ८।६) इति। 'पञ्चमहायज्ञाद्यनुष्ठानं शक्तितः क्रिया' (बो.वृ.) इति। निर्वचनं–'क्रियावानेष ब्रह्मविदां वरिष्ठः' (मु.३।१।४), 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन' (बृ. ४।४।२२) इति च। 'सत्यार्जवदयादानाहिंसानभिध्याः कल्याणानि' (बो. वृ.) इति। निर्वचनं–'सत्येन लभ्यः (मु.३।१।५), तेषामेवैष विरजो ब्रह्मलोकः' (प्र. १।१६) इत्यादि। 'देशकालवैषम्याच्छोकवस्त्वाद्यनुस्मृतेश्च तज्जं दैन्यमभास्वरत्वं मनसोऽवसादः' (बो. वृ.) इति। तद्विपर्ययेणावसादः। निर्वचनं–'नायमात्मा बलहीनेन लभ्यः' (मु. ३।२।४) इति। 'तद्विपर्ययजा तुष्टिरुद्धर्षः' (बो.वृ.) इति। तद्विपर्ययेणोद्धर्षः। अतिसंतोषश्च विरोधीत्यर्थः। निर्वचनमपि 'शान्तो दान्तः' (बृ. ४।४।२३) इति। एवं नियमयुक्तस्याश्रमविहितकर्मानुष्ठानेनैव विद्यानिष्पत्तिरित्युक्तं भवति। तथा च श्रुत्यन्तरं 'विद्यां चाविद्यां च यस्त-

---

ते'ति निर्वचने **शान्त**शब्देन रागद्वेषाद्यभावो विवक्षितः। **आरम्भणम्** आलम्बनं—शुभाश्रयः, तस्य संशीलनम्। कथमेतत्साधनं, साध्यं हीदं नैः; 'शुचौ देशे प्रतिष्ठाप्ये'त्याद्युक्तदेशकालविशेषाभ्यसनीयैर्योगशब्दवाच्या ध्रुवानुस्मृतिर्हि साध्या, इदं तु योगकालकर्तव्यध्यानानुग्राहकं सदा संशीलनम्, 'सदा तद्भावभावित' इति हि वक्ष्यति, सदा भगवत्संशीलनाभावे योगकालेषु कालान्तरसंशीलितं विषयान्तरं बुद्धिस्थं स्यात्, अतो न साध्याविशिष्टत्वम् आरम्भणसंशीलनस्य। **निर्वचनं च स्मार्तमुदाहृतं भाष्यकारेणे**त्यनेन—पूर्वोपात्तनिर्वचनान्यपि द्रमिडभाष्योक्तानीति ज्ञायते। **अथ मुनिरिति** श्रौतनिर्वचनम्। तस्य न्यायोपन्याससापेक्षत्वेन 'सहकार्यन्तरविधि'रित्यधिकरणे व्याख्येयत्वात्, स्मार्तनिर्वचनस्य च सपाठार्थत्वाच्च स्मार्तनिर्वचनमुदाहृतम्। 'तस्मात्सर्वेषु कालेषु मामनुस्मरे'त्येवमन्तं वचनजातमिहाभिप्रेतम्। **पञ्चमहायज्ञेति**। शक्तित[1]; न हि शास्त्रमशक्यं विदधाति। **क्रियावानेष इति**। सैत्रहितवाक्यम्। **ब्रह्मविदां वरिष्ठः** ब्रह्मविदां मध्ये वरिष्ठः; न हि ब्रह्मविविदिषूणामित्युक्तम्। **क्रिया** शब्दार्थविशदीकरणायाह—**तमेतमिति। सत्यं** भूतहितम्। **आर्जवं** मनोवाक्कायानामैकरूप्यम्। **दया** स्वार्थनिरपेक्षपरदुःखासहिष्णुत्वम्। **अहिंसा** करणत्रयेणापि परपीडानिवृत्तिः। **दानं** लोभराहित्यम्। **अभिध्या** परकीये स्वत्वबुद्धिः, यद्वा निष्फलचिन्ता, अथवा परैकृतापकारचिन्ता तद्राहित्यमनभिध्या। **सत्येनेति। इत्यादीत्यादि**शब्देन आर्जवादिप्रतिपादकवाक्यजातं क्रोडीकृतम्। **देशेत्यादि**। अनवसाद–अनुद्धर्षयोः अवसाद–उद्धर्षविपर्ययरूपत्वादवसाद–उद्धर्षलक्षणमात्रमुक्तं वाक्यकारेण, तद्विपर्ययरूपो नञर्थोऽर्थात्सिध्यतीति वाक्यकाराभिप्रायः। **शोकवस्तु** शोकनिमित्तवस्तु–अतीतपुत्रमरणादि। **आदि**शब्देन भयनिमित्तमागामि विवक्षितम्। अतीतविषयो हि शोकः, आगामिविषयं च भयम्। **अभास्वरत्वमिति** दैन्यशब्दविवरणम्। अभीष्टकार्यप्रवृत्त्यक्षमत्वरूपं दैन्यमित्युक्तं भवति, भास्वरत्वविरोधीति वा दैन्यविशेषणम्। **च**शब्दो भिन्नक्रमः। **तज्जं च** दैन्यजदैन्यं चेत्यर्थं; बन्धुजनदैन्ये दृष्टेपि हि दैन्यं स्यात्। देशकालवैगुण्यशोकवस्त्वाद्यनुस्मृतिहेतुकं मनसो भास्वरत्वाभावरूपं, भास्वरत्वविरोधि वा दैन्यं, दैन्यजदैन्यं च मनसोवसाद इत्यर्थः। यद्वा—भिन्नवाक्यतया योजनीयं—देशकालवैगुण्यशोकवस्त्वाद्यनुस्मृतिजनितं मनसो भास्वरत्वमवसादः। किमुक्तं भवतीत्याह—**तज्जं दैन्यमिति। तच्चाभास्वरत्वं, तज्जम्** उक्तहेतुजं दैन्यमिति व्याख्येयव्याख्यानरूपं वाक्यद्वयमिति। **तद्विपर्यय** इत्यादि भाष्यग्रन्थः। **बलहीनेन** मनोबलहीनेन। **तद्विपर्ययजा** देशकालसाद्गुण्यप्रियवस्त्वाद्यनुस्मृतिजा तुष्टिरुद्धर्ष इत्येतावदेव वाक्यं, तद्विपर्ययेणोनुद्धर्ष इत्यर्थसिद्धम्। कथं 'स्वाध्यायशौच**संतोष**तपसि नियतात्मवा'नित्यपेक्षितस्य संतोषस्य त्याज्यत्वमित्यत्राह—**अतिसंतोषश्च विरोधी इत्यर्थ इति।** न केवलं संतोष एव विरोधी, **अतिसंतोषश्च** विरोधीति चार्थः। यथान्यविषयेष्वेव प्रवृत्तिः स्यात्तथा संतोषोऽतिसंतोषः स त्याज्य इत्युक्तं भवति। **निर्वचनमपीत्यपिशब्दः सर्वेनिर्वचनसमुच्चये॥** एवं पदार्थौ व्याख्याताः, तल्लब्धिरित्यादेर्वाक्यकारग्रन्थस्य वाक्यार्थमाह—**एवमिति। एवं नियमयुक्तस्याश्रमविहितकर्मानुष्ठानेनेति।** पृथङ्निर्देशेन प्रवृत्तिनिवृत्तिरूपकोटिद्वयविभागो दर्शितः। **एतेन पदद्वयेन** केवलशमादि, केवलकर्म च व्यावर्तितम्। शमादिः, कर्म च समुच्चित्याङ्गमित्यर्थः। यद्विविदिषासाधनमिति त्वनोक्तं **तेनैव विद्यानिष्पत्तिरित्येवकाराभिप्रायः। इत्युक्तं भवति** इति वाक्यार्थौ भवतीत्यर्थः।

'विद्यां चाविद्यां चे'ति श्रुतेः शङ्कर–यादवप्रकाशाभिमतयोजनाव्युदासार्थं तां व्याचिख्यासुरुपादत्ते—तथाचेति। अनेन

---

१ तज्जत्वं। २ नेति नास्ति का. मु. पु.। ३ °था योग°। ४ सन्निहित°। ५ °पराकृत°। ६ °नुष्ठानेति०।

द्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते' (ई. ११) इति। अत्राविद्याशब्दाभिहितं वर्णाश्रमविहितं **कर्म। अविद्यया** कर्मणा। **मृत्युं** ज्ञानोत्पत्तिविरोधि प्राचीनं कर्म। **तीर्त्वा** अपोह्य। **विद्यया** ज्ञानेन। **अमृतं** ब्रह्म। **अश्नुते** प्राप्नोतीत्यर्थः। मृत्युतरणोपायतया प्रतीता**विद्या विद्येतरद्विहितं कर्मैव**। यथोक्तम्—**'इयाज सोपि सुबहून्यज्ञान् ज्ञानव्यपाश्रयः। ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युम-**

कर्मणोऽपेक्षितत्वे सन्निहितश्रुत्यन्तरं च दर्शितं भवति। तथाच–श्रुत्यन्तरं यदन्यथा भवद्भिर्व्याख्यातं तच्चास्मदुक्तार्थानुगुणमिति **तथा**शब्दमन्तरशब्दं च प्रयुञ्जानस्य भावः। सन्निहिनतया यज्ञादिवाक्यवैलक्षण्यं **चान्तर**शब्दाभिप्रेतम्। अस्मिन्वाक्ये न कर्मवाची शब्दः श्रूयत इत्यत्राह—**अत्रेति। अत्र** श्रुतिवाक्ये, न तु 'अनात्मन्यात्मबुद्धिर्ये'त्यादिषु। अविद्याशब्दाभिहितं वर्णाश्रमविहितं कर्मास्तु ततः किमुक्तं भवतीत्याशङ्क्यां, पदान्तराण्यपि विवृण्वन् वाक्यार्थमाह—**अविद्ययेति। अविद्यया** कर्मणा, **विद्यया** ज्ञानेनेति। अत्र च कर्मज्ञानशब्दाभ्यां 'कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः। कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तत' इति स्मृतिः स्रोपजीव्यार्था स्मारिता भवति। **कर्माणि कषायपक्तिः** कषायपक्तिनिमित्तानि। **कषाय**शब्दः पापपरः; 'धर्मेण पापमपनुदती'त्यनेनैकार्थ्यात्। कषायशब्दस्य रागादिपरत्वेपि तत्पक्तिहेतुत्वं पापनिबर्हणद्वारा। **ज्ञानं परमा गतिः** परमगत्युपायः। उभयत्र कारणे कार्योपचारः। **कर्मभिः कषाये पक्के ततो ज्ञानं प्रवर्तते**–प्रसरतीत्यर्थः॥ अत्रोपायविरोधिनिरासकत्वं कर्मणः स्पष्टं; न हि विविदिषा प्रवर्तते, मोक्षः प्रवर्तत इति वोक्तम्, अपितु ज्ञानं प्रवर्तत इत्येवोक्तम्। अस्य वाक्यस्यार्थमुपजीव्याह—**मृत्युं ज्ञानोत्पत्तिविरोधीति।** न तु ब्रह्मप्राप्तिविरोधि, न च विविदिषाविरोधीत्यर्थः। उपेयविरोधिकर्मणो ज्ञाननिवर्त्यत्वं श्रुतिस्मृतिशतसिद्धम्, यथा—'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्थाः, एवमेवं विदि पापं कर्म न श्लिष्यते, क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे, निचाय्य तं मृत्युमुखात् प्रमुच्यते, ज्ञात्वा देवं मुच्यते सर्वपाशैः, ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथे'ति। एवमुपेयविरोधिनो ज्ञाननिवर्त्यत्वश्रवणेन परिशेषा'न्नान्यः पन्था' इत्युपेयविरोधिनिरासे उपायान्तरनिषेधस्वारस्यात्, समसमुच्चयपक्षे कर्मणोप्युपायतया वेदनव्यतिरिक्तकृत्स्नगोचरान्यशब्दस्य संकोचप्रसङ्गात्, 'यज्ञेन विविदिषन्ती'ति कर्मण उपायहेतुत्वस्य कण्ठोक्त्या, 'कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तत' इति स्मृत्यानुगुण्याच्च–सामान्येन **मृत्यु**शब्देन प्रतिपन्नमपि निरसनीयम् उपायविरोधिकर्मरूपे विशेषे पर्यवस्यति। तथा विविदिषासाधनत्वस्य प्रागुक्तान्योन्याश्रयणादिनिरस्तत्वेन परिशेषाद्विविदिषन्तीत्यत्र च प्रकृतिप्रत्ययार्थयोर्वेदनतदिच्छयोरविशेषेण यज्ञादीनां साधनत्वे प्रतीतेपि, 'ततो ज्ञानं प्रवर्तत' इति स्मृत्याद्यानुगुण्यात्, इष्यमाणप्रकृत्यर्थप्राधान्यस्य नीतिविद्भिर्निर्णीतत्वाच्च प्रकृत्यर्थभूतवेदनसाधनत्वं सिद्धम्। तस्मादुपायविरोधि **कर्मैवात्र मृत्यु**शब्दवाच्यमविद्यानिवर्त्यमित्यभिप्रायः॥ उपासनरूपं, न्यासरूपं चोपेयविरोधिनिरासकं ज्ञानम् उत्तरपूर्वाघयोरुभयोरपि निरासकं स्यादिति तद्व्यावृत्त्यर्थं **प्राचीन**मित्युक्तम्। उपायविरोधिनिरासककर्म प्राचीनमेव पापं शमयति, न तूत्तराघमित्यर्थः। **तीर्त्वेति** पदं व्याचष्टे—**अपोह्येति।** न तु 'एतं सेतुं तीर्त्वे'तिवत् प्राप्तिवचन इत्यर्थः। **अविद्यया तीर्त्वेति** पदद्वयव्याख्यानेन शङ्करमतयोजनाव्यावृत्तिः अज्ञानेन संसारं प्राप्य स्थित इति तद्योजना, तन्मते अविद्याया ज्ञातव्यत्वं च हेयत्वेन। **अविद्या**शब्दो विविदिषाविरोधिनिवर्तककर्मवाचीति वा **शङ्करा**भिमतयोजना स्यात्, **अविद्या**शब्द उपेयविरोधिनिवर्तककर्मवाचीति **यादव**प्रकाशाभिमतयोजना, **ज्ञानोत्पत्तिविरोधीति-मृत्यु**शब्दव्याख्यानेन तदुभयव्युदासः॥

अयम**विद्या**शब्दः संसारहेतुभूताज्ञानपरः किं न स्यात्, कथं च तस्य कर्मवाचित्वमित्यत्राह—**मृत्युतरणेति।** तरतेरुत्तरणवाचित्वं स्वरससिद्धम्, प्राप्तिवाचित्वे तु स्वारस्यभङ्ग इत्यभिप्रेतम्। **अविद्या**शब्दस्य कर्मवाचित्वं दर्शयति—**विद्येतरदिति।** तदन्यार्थे नञिति भावः। विहितं कर्मैवे**त्येव**कारेणाज्ञानम्, अविहितं कर्म च व्यावर्त्यते। अत्र 'विद्यां चाविद्यां चे'ति **च**शब्दावनुक्तसमुच्चयपरौ। विद्यानुबन्धि, कर्मानुबन्धि च यदनुक्तं तत्समुच्चेतव्यं, विद्यानुबन्धि—शमदमादिकं, कर्मानुबन्धि—फलाभिसंधिकर्तृत्वाभिमानराहित्यादिकं, तदुभयं **च**शब्दसमुच्चेतव्यम्। यद्वा—'धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ' इत्यत्र **च**शब्दवदत्राप्युक्तार्थविरोधिसमुच्चयपरौ **च**शब्दौ स्यातां, विद्याविरोधि, कर्मविरोधि च **च**शब्दाभ्यां हानार्थं ज्ञातव्यतया समुच्चिते भवतः। **विद्या** ब्रह्मविद्या, **तद्विरोधि** तदितरविषयज्ञान-तद्विषयरागद्वेषादिकम्; **अविद्या** विद्याङ्गं कर्म, तद्विरोधि संसरणहेतुभूतं फलाभिसंध्यादिसहितं कर्म, पार्श्व–तदुभयं हानार्थं ज्ञातव्यमिति **च**शब्दयोरभिप्रायः। यद्वा प्रतिपदद्योतकौ **च**शब्दौ स्याताम्, यथा 'धर्मे चार्थे च कामे चे'ति प्रतिपदं यदभिधेयं तस्य समुच्चयद्योतकत्वं प्रतिपदद्योतकत्वं, तदत्रापि स्यात्। अस्मिन्वाक्ये **अविद्या-तरण**शब्दयोरुक्तार्थपरत्वस्थापनायोपबृंहणवचनं च दर्शयति—**यथोक्तमिति। ज्ञानव्यपाश्रयः** आगमोत्थज्ञानवान्। **ब्रह्मविद्यामधिष्ठाय** उपासनात्मकज्ञानं साध्यत्वेनावलम्ब्येत्यर्थः। **ज्ञान-विद्या**शब्दयोरर्थभेदबुभुत्सायाम् आगमोत्थविवेकादिजन्यज्ञानयोः प्रकृतत्वात् तत्परत्वाश्रयणं हि युक्तम्। **तर्तुं मृत्यु**मित्यनेन तरतेः प्राप्तिवाचित्वशङ्का व्युदस्ता; नै हि संसारं प्राप्तुं ब्रह्मविदा केशिध्वजेन नृपेण यज्ञादिकर्मा-

१ °शब्दावुक्त°। २ °विषय-तद्विषय°। ३ नहिसंसारप्राप्तं का. मु. पु.।

विद्यया[1] (वि. पु. ६।६।१२).इति । ज्ञानविरोधि च कर्म पुण्यपापरूपम् । ब्रह्मज्ञानोत्पत्तिविरोधित्वेनानिष्टफलतयोभयोरपि पापशब्दाभिधेयत्वम् । अस्य च ज्ञानविरोधित्वं ज्ञानोत्पत्तिहेतुभूतशुद्धसत्त्वविरोधिरजस्तमोविवृद्धिद्वारेण । पापस्य च ज्ञानोदयविरोधित्वम्—**'एष एवासाधु कर्म कारयति तं**

नुष्ठीयते । **मृत्यु**शब्दस्य विविदिषाविरोधिकर्मपरत्वमपि न शङ्कनीयम्; **ज्ञानव्यपाश्रय** इत्यनेन शास्त्रजन्यज्ञानवत्ताया अभिहितत्वात्, ब्रह्मविद्यामधिष्ठायेत्युक्तत्वाच्च । न हि ब्रह्मविवेच्छामधिष्ठायेत्युक्तम् ॥ कथं ज्ञानोत्पत्तिविरोधि प्राचीनं कर्मेति पुण्यपापसाधारणकर्मशब्देन कर्ममात्रं निरसनीयमित्युक्तं, श्रुतिर्हि 'धर्मेण पापमपनुदती'ति पापरूपकर्मविशेषस्य निरसनीयत्वमाहेति शङ्कायां—तत्रापि पापशब्दस्य पुण्यपापपरत्वं दर्शयितुं पुण्यपापयोरुभयोरपि पापशब्दवाच्यत्वोपपादनाय तयोर्ज्ञानोत्पत्तिविरोधित्वमाह—**ज्ञानविरोधि चेति । चः** शङ्कानिवृत्तौ । पुण्यपापे उभे अपि ज्ञानविरोधिनी चेत् कथं तयोरन्यतरस्य पापस्य निरसनीयत्वम्, अन्यतरस्य पुण्यस्य निरासकत्वं च श्रूयत इत्यत्राह—**उभयोरपीति** । तयोर्द्वयोरपि निवर्त्यत्वं, फलाभिसंध्यादिरहितस्य धर्मान्तरस्यैव निवर्तकत्वं च विवक्षितमिति भावः । कथमुभयोः पापशब्दवाच्यत्वमित्यत्राह—**ब्रह्मज्ञानोत्पत्तीति । अनिष्टफलतयेति** प्रवृत्तिनिमित्तसूचनम् । अलौकिकत्वे सत्यनिष्टफलासाधारणकारणत्वं **पापत्व**मिति भावः । अत एव शैवादीश्वरे च नातिव्याप्तिः ॥ 'वासुदेवे मनो यस्य जपहोमार्चनादिषु । तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम् ॥ एते वै निरयास्तात स्थानस्य परमात्मन' इत्यादिभिः पुण्यस्यापि मुमुक्षुं प्रत्यनिष्टफलप्रदत्वं सिद्धम् । श्रुतिश्च दुष्कृतेन सह पूर्वनिर्दिष्टं **सुकृत**मपि **पाप्म**शब्देन निर्दिशन्ती निगमयति—'नैतं सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्ते' इति । न चानुक्तपापान्तरविषयः पाप्मशब्दः; दुष्कृतशब्दस्य संप्रतिपन्नसमस्तपापसाधारण्यतयानुक्तपापान्तरासंभवेन तद्विषयत्वायोगात्, संभवेपि न तन्मात्रपापान्तरविषयः पाप्मशब्दः; उक्तसर्वहेयनिवृत्तिसंवादितयोपात्ते 'अपहतपाप्मा ह्येष ब्रह्मलोक' इत्यनन्तरवाक्ये **पाप्म**शब्दस्य सर्वहेयविषयत्वदर्शनात्, न ह्यनुक्तकतिपयपापनिवृत्त्युक्तौ उक्तसर्वहेयनिवृत्तिसंवादसिद्धिः, शोकादिषु पापशब्दस्यामुख्यत्वेपि सुकृतदुष्कृतयोः प्रवृत्तिनिमित्तसंभवान्न मुख्यत्वं त्याज्यम्; क्वचिदमुख्यस्य सर्वत्रामुख्यत्वनियमाभावात्, अतः सर्वे पाप्मान इत्यत्राजहल्लक्षणा—**छत्रिन्यायात्**, 'धर्मेण पाप'मित्यत्र तु मुख्यत्वमेव ॥

कथं पापस्य ज्ञानविरोधित्वं, रजस्तमसोर्हि तदवगम्यत—इति शङ्कायां—द्वारद्वारिभावादविरोधमाह—**अस्येति** । पापस्य, रजस्तमसोश्च ज्ञानविरोधित्वे प्रामाणिके सति द्वारद्वारिभावः कल्प्यत इत्यत्राह—**पापस्य चेति** । नन्वियं श्रुतिर्निरयनिनीषाविषया किं न स्यात्; उन्नयनप्रत्यनीकत्वादधोनयनस्येति; ब्रूमः—अत्र विवक्षितमुन्नयनहेतुत्वं ह्युपासननिष्पादनरूपम्, न चोन्नयनमपि नाकादिनयनमिति शङ्कनीयं; 'यमेभ्यो लोकेभ्य उन्निनीषती'त्यवगतस्य समस्तलोकेभ्य उन्नयनस्यापवर्गप्रापणरूपत्वात्, तर्हि गर्भजन्मजरामरणादिसंसारप्रापणमधोनयनं स्यात्, न तूपासननिरोध इति—चेन्न; उन्नयनस्य ज्ञानोत्पादनद्वारकत्वावगमात्, 'यं त्वं मनुष्याय हिततमं मन्यस'इत्युपक्रमवाक्येन मामुपास्खेति विधित्सितस्य उपासनस्य ह्यव्यवहितोपायत्वमवगतं, 'नान्यः पन्था' इत्यादीनि च श्रुत्यन्तराणि तथावगमयन्ति, तच्च कर्मणामपवर्गं प्रत्यव्यवहितोपायत्वे विरुध्येत, अतः—उपक्रमाद्यविरोधात् साधुकर्मणामपवर्ग प्रत्युपायत्वमुपासनद्वारकमवसीयते । अतः कर्मणामुन्नयनहेतुत्वमुपासननिष्पादनरूपमिति, तद्विपरीतमधोनयनमुपासनप्रतिबन्धरूपमिति स्फुटतरमवगम्यते ॥ किं च—यद्यप्युन्नयनाधोनयने स्वर्गनरकप्रापणरूपे, तथाप्यसाधुकर्मणां ज्ञानविरोधित्वं सिद्ध्यति; तथा हि—उन्निनीषाधोनिनीषयोर्निर्हेतुकत्वे परमात्मनो वैषम्यनैर्घृण्यप्रसङ्गात् नेतव्यचेतनगोचरं यद्वृत्तद्वयं गतिद्वयनिनीषानिमित्तातिप्रभूतपुण्यपापकर्तृविषयं विज्ञायते, तत्र गतिद्वयपर्यायोत्तरोत्तरसाध्वसाधुकर्मकारयितृत्वमीश्वरस्य न भूतावेशादिवज्जीववुद्ध्यनपेक्षितं भवति; तथा सति—ज्ञानचिकीर्षाद्यभावाद्वायूदकादितृणादेरिव संसारिणां शास्त्रवश्यलाभावेन कर्मफलभोगानुपपत्तेः । एवं संसारिणां कर्मफलभोक्तृत्वान्यथानुपपत्तिरूपं न्यायानुगृहीतम् 'एष एवे'त्यादिकं वाक्यद्वयं ज्ञानप्रदानद्वारककारयितृत्वविषयमवसीयते, तथा सति स्पृत्यनुग्रहश्च भवति—'न देवा यष्टिमादाय रक्षन्ति पशुपालवत् । यं हि रक्षितुमिच्छन्ति बुध्या संयोजयन्ति तम् ॥ यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम् । बुद्धिं तस्यापकर्षन्ति सोपनीतो विनश्यति' इति ह्युच्यते । तथा—पुण्यं प्रज्ञां वर्धयति क्रियमाणं पुनः पुनः । वृद्धप्रज्ञः पुण्यमेव नित्यमारभते नरः ॥ पापं प्रज्ञां नाशयति क्रियमाणं पुनः पुनः । नष्टप्रज्ञः पापमेव नित्यमारभते नरः ' इति च तत्र **बुद्धिमपकर्षन्ति, प्रज्ञां नाशयतीति** च सम्यग्ज्ञानहानिपूर्वकतद्विपरीतज्ञाननिवृत्तिरिह विवक्षिता; अन्यथा—कर्मान्तरप्रारम्भानुपपत्तेः । यद्यपीदं वचनजातं सर्वकर्म-देवतासामान्यविषयं, तथापि **मामेवज्ञानस्य सम्यग्ज्ञानसामान्यावद्दिर्भावादसाधुकर्मणस्तद्विरोधित्वसिद्धिः** । तथा विशेषतश्चोच्यते—'ददामि बुद्धियोगं तं येन **मामुपयान्ति ते । आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गति'मिति च । एवं

---

१ शास्त्रादौ का. मु. पु. ।

यमधो निनीषति' (कौ. ३।८) इति श्रुत्यावगम्यते। रजस्तमसोर्यथार्थज्ञानावरणत्वं सत्त्वस्य च यथार्थज्ञानहेतुत्वं भगवतैव प्रतिपादितम्—**'सत्त्वात्संजायते ज्ञानम्** (गी. १४।१७) इत्यादिना। अतश्च ज्ञानोत्पत्तये पापं कर्म निरसनीयम्। तन्निरसनं चानभिसंहितफलेनानुष्ठितेन धर्मेण। तथाच श्रुतिः—**'धर्मेण पापमपनुदति'** (म. ना. २२।१) इति। तदेवं ब्रह्मप्राप्तिसाधनं ज्ञानं सर्वाश्रमकर्मापेक्षम्। अतोपेक्षितकर्मस्वरूपज्ञानं, केवलकर्मणामल्पास्थिरफलत्वज्ञानं च कर्ममीमांसावसेयमिति सैवापेक्षिता ब्रह्ममीमांसायाः पूर्ववृत्ता वक्तव्या। अपिच नित्यानित्यवस्तुविवेकादयश्च मीमांसाश्रवणमन्तरेण न संपत्स्यन्ते; फलकरणेनेतिकर्तव्यताधिकारिविशेषनिश्चयादृते कर्मस्वरूपतत्फलतत्स्थिरत्वास्थिरत्वात्मनित्यत्वादीनां दुरव-

---

न्यायस्मृत्युपबृंहितया अनया श्रुत्या सामान्येन ज्ञानविरोधित्वमसाधुकर्मणां सिद्धम्। अस्मादपि निर्वाहात् पूर्वोक्त उपपत्तरः; प्रकरणानुगुण्यात्।

एवं पापस्य ज्ञानविरोधित्वे प्रमाणं दर्शितम्, अथ रजस्तमसोर्ज्ञानविरोधित्वे, सत्त्वस्य ज्ञानहेतुत्वे च प्रमाणं दर्शयति—**रजस्तमसोरिति**। ततः किं प्रस्तुतस्य कर्मापेक्षितत्वस्येत्यत्राह—**अतश्चेति**। **अतः** पापस्य ज्ञानविरोधित्ववचनात्। ततोपि किमित्यत्राह—**तन्निरसनं चेति**। पापशब्दाभिधेययोः पुण्यपापयोरुभयोरपि निरसनीयत्वेन पापनिरासककर्मासंभवमाशङ्क्योक्तम्—**अनभिसंहितफलेनेति**। अनेन स्वर्गादिफलप्रदकर्मव्यावृत्तिः। **अनुष्ठितेन,** न तु ज्ञातमात्रेणेति भावः। तत्र किं प्रमाणमित्यत्राह—**तथा च श्रुतिरिति**। इदानीं निरासकविशेषे प्रमाणतयोदाहृतस्य वाक्यस्यार्थनिर्णयोपयोगितयैतद्वाक्यस्थनिरसनीयवाचिपदस्यार्थः पूर्वमेव शिक्षितः, निरासकवाचिपदस्यार्थोनन्तरमुक्तः। नन्वयं धर्मशब्दः कृच्छ्रचान्द्रायणादिप्रायश्चित्तरूपधर्ममात्रविषयः किं न स्यात्, अनभिसंहितफलधर्मविषयरतिः कुतो निर्णीयते; उच्यते—'यज्ञेन दानेन तपसाऽनाशकेन, शान्तो दान्त उपरतस्तितिक्षुः, कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते, यज्ञदानं तपः कर्म न त्याज्यं कार्यमेव तत्, यज्ञो दानं तपश्चैव पावनानि मनीषिणां, शमो दमस्तपः शौच'मित्यादिश्रुतिस्मृतिभिर्मुमुक्षोरपेक्षितत्वेनोक्तानां यज्ञदानतपःशमादीनामत्र श्रूयमाणत्वात्, **'विज्ञानानन्दो ब्रह्मयोनि'**रित्यादिनात्र प्रकरणस्य ब्रह्मविद्याविषयत्वावगमाच्चायं धर्मशब्दो मुमुक्ष्वपेक्षितानभिसंहितफलधर्मविषय इत्यवगम्यते। अत्र यज्ञदानादिपर्यायेषु—'दानेन द्विषन्तो मित्रा भवन्ती'त्यादिना सांसारिकफलकीर्तनम्—'अन्नवानन्नादो भवती'त्यादिवत् ब्रह्मवेदनानुगुणानुषङ्गिकफलविषयं मन्तव्यं; 'भूयो न मृत्युमुपयाहि विद्व'न्निति प्रधानफलश्रवणात्। किंच—यद्यपीदं वाक्यं न मुमुक्षुमात्रविषयं, तथाप्यमुमुक्षुमात्रविषयं च न भवेत्; प्रवृत्तिनिमित्तसाधारण्यात्। न हि काम्यफलदत्वं धर्मशब्दार्थः अलौकिकेष्टसाधारणसाधनेनालौकिकमनिष्टासाधारणकारणमपनुदेदिति ह्यर्थः स्यात्, ततश्च मुमुक्षुं प्रति काम्यकर्मणोऽनिष्टफलत्वेन धर्मशब्दवाच्यत्वायोगात्, पापशब्दवाच्यान्तर्भावाच्च। पक्षधर्मतावलादनभिसंहितफलेन धर्मेण पुण्यपापयोरुभयोरपनोद्यत्वमुक्तं स्यात्। ज्ञानस्य कर्मसापेक्षत्वं निगमयति—**तदेवमिति। तत्** श्रुतिस्मृतितदनुग्राहकोपपत्तिसूत्रवाक्यकारवचनेभ्यः। एवमुपायप्रतिबन्धनिरासनार्थं सर्वाश्रमिणां तत्तदाश्रमधर्माङ्गकोपासनाधिकारस्य वक्ष्यमाणत्वं हृदि निधाय **सर्वाश्रमकर्मापेक्षमित्युक्तम्**। ततः किं कर्मविचारस्य ब्रह्मविचारपूर्ववृत्तत्व इत्यपेक्षायामनुष्ठानस्य ज्ञानापेक्षत्वात्, ज्ञानस्य मीमांसाधीनत्वाच्च तदधिगमः पूर्ववृत्त इत्याह—**अत इति। अतः** ब्रह्मज्ञानस्य फलाभिसन्धिरहिताश्रमकर्मसापेक्षत्वात्। ज्ञानं हि हानार्थम्, उपादानार्थं वा, अत्र तूभयार्थमित्यत्राह—**अपेक्षितेति**। फलद्वारकं हानं, स्वरूपेणोपादानम्। मीमांसाशब्दस्य पूर्वोत्तरसाधारणत्वात् कर्ममीमांसावसेयमित्युक्तम्। **सैव** या त्वया विरुद्धेति निरस्ता सैवेत्यर्थः॥

यदनपेक्षितं परेणोक्तं तदेवापेक्षितमित्युक्तं, यत्तु परेणापेक्षितमित्युक्तं तस्यानपेक्षितत्वमुच्यते—**अपि चेत्यादिना। नित्यानित्यविवेकादयश्चेति। चस्त्वर्थः**। प्रत्युतेति यावत्। **मीमांसाश्रवणमन्तरेण** कर्मब्रह्ममीमांसाश्रवणमंतरेणेत्यर्थः। **न संपत्स्यन्त** इत्यनेन पश्चाद्भावित्वमुक्तम्। कुत इत्यत्राह—**फलेति। फलविशेषो** भोगमोक्षरूपः। **करणविशेषो** यज्ञोपासनादिः। **इतिकर्तव्यताविशेषः** प्रयाजादिः, साधनसप्तकं च। **अधिकारिविशेषो** बुभुक्षुः, मुमुक्षुश्च। एषां **निश्चयादृते। कर्मस्वरूपं** साङ्गं, यज्ञात्मकम्, उपासनात्मकं च; भाष्यकारश्च यागात्मकम्, उपासनात्मकं च कर्मेति हि वक्ष्यति। 'प्रकाशश्च कर्मण्यभ्यासा'दिति च सूत्रम्, 'उपासनात्मके कर्मणी'ति च तस्य भाष्यम्। उपासनस्य कर्मत्वं स्मृतिसन्तातिरूपतया; तस्य प्रयत्नसाध्यत्वात्। 'वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्। शरीरजैः कर्मदोषैर्याति स्थावरतां नर' इत्यत्र **मनुश्च** 'मानसैः कर्मदोषै'रित्युक्तवान्। **फलं** चोभयं भोगो, मोक्षश्च। **आत्मनित्यत्वादीनामिति। आदि**शब्देन आत्मनो 'निर्वाणमय एवाय'मित्युक्तज्ञानानन्दस्वरूपत्वादिकं विवक्षितम्। अत्र साध्यविशिष्टत्वं हेतोः प्रतीयत इति—

---

१ °साधनभूतम्। २ °वैकर्मा°। ३ अतोपेक्षितम्। ४ °साधन°। ५ यज्ञो दानम्. आ. मु. पु.। ६ °फलाविषयं।

चेत् नैवं. मीमांसायां फलकरणेतिकर्तव्यतादीनां प्रत्यधिकरणं तत्तन्न्यायैर्यो निर्णयः क्रियते स हेतुः। एवं तत्तदधिकरणन्यायानुगृहीतश्रुतिवाक्यसमुदायजन्या या प्रमितिरुपायोपेयविषया सा साध्या। तत्तदवान्तरवाक्यार्थनिश्चयैस्तत्तत्समुदायरूपमहावाक्यार्थनिश्चयः साध्य इत्यर्थः। यथा पदार्थनिश्चयैर्वाक्यार्थनिश्चय इत्युक्ते सति न साध्याविशिष्टता, तद्वत्। अत एव हि **करणेतिकर्तव्यतादि**शब्दैः पूर्वं पृथगुक्त्वा पश्चात्**कर्मस्वरूप**शब्देनोक्तम्। **फलकरणे**त्यादिभाष्यस्य कर्ममीमांसामात्रविषयत्वे तत्फलनश्वरत्वाश्वरत्वात्मनित्यत्वादीनामिति वक्तुमयुक्तम्। निरुपपदमीमांसाशब्दस्य **मीमांसाशास्त्र**मित्यादिभाष्ये भागद्वयविषयतया प्रयुक्तत्वाच्च यथोक्त एवार्थः। तस्मात्–कर्मब्रह्मविचारानन्तरभावी नित्यानित्यवस्तुविवेकः, तत इहामुत्र फलभोगविरागो, मुमुक्षुत्वं च। शमदमादिसाधनसंपच्च 'शमदमाद्युपेतः स्यादि'ति ब्रह्ममीमांसायां हि शमदमादिस्वरूपं निरूप्यते। अस्मिन् चतुष्टये सिद्धे ब्रह्मविचारः–ब्रह्मविचारात् तत्सिद्धिः–इत्यन्योन्याश्रयः स्यात्। अतः पश्चाद्भाविनः पूर्ववृत्तत्वमनुपपन्नम्॥ साङ्गाध्ययनजापातप्रतीतेरेव नित्यानित्यविवेक इति चेत्–तदयुक्तः; न ह्यापातप्रतीतिरिहामुत्रफलभोगविराग—मुमुक्षुत्वयोर्हेतुः; नित्यानित्यविपर्ययप्रतीतेः। किंच—आपातप्रतीतिरुभयभागविचारसाधारणी, तत्र प्रथमं कर्मविचार एव प्रवृत्तियुक्ताः उभयत्र बुभुत्साया अविशिष्टत्वात्, प्रथमातिक्रमे कारणाभावाच्च। शास्त्रान्तरेणापि नित्यानित्यविवेकादिर्नोपपद्यते: प्रथममेवाध्ययनविधिवश्यतया पुरुषस्य शास्त्रान्तरानवकाशात्। किंच—शास्त्रान्तरेषु परमाणुकारणत्व–अब्रह्मात्मकप्रधानकारणत्व–गगनादिनित्यत्व–निमित्तमात्रेश्वरादयो वेदान्तविरुद्धा एवार्था बहव उपलभ्यन्ते, अतः शास्त्रान्तरजन्यो नित्यानित्यवस्तुविवेको वेदान्तविरुद्धत्वान्न तद्विचारं प्रति पूर्ववृत्तो भवितुमर्हति। किंच—शास्त्रान्तरेषु षट्पदार्थषोडशपदार्थज्ञानादीना मोक्षसाधनत्वप्रतिपादनेन वेदान्तश्रवणनैरपेक्ष्याच्च न तज्जन्यविवेकस्य पूर्ववृत्तत्वं युक्तं; 'यतोऽभ्युदयनिश्रेयससिद्धिः स धर्मः, छल–जाति–निग्रहस्थानानां तत्त्वज्ञानान्निश्रेयसाधिगम' इति हि तत्र तत्रोच्यते। किंच—'तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्ये'दिति श्रुतिरे**वंविच्**छब्देन शास्त्रजन्यज्ञानमनूद्य **पश्येदिति** प्रतिपन्नस्योपासनस्याङ्गतया शमादीनुपदिशति, अतः शमादीनां श्रवणपूर्ववृत्तत्वं श्रुतिविरुद्धम्। **प्रशान्तचित्तायो**त्यादिश्रुतिस्तु श्रवणौपयिकावधाननिष्पादनार्थत्वयुक्तम्। इतिहासपुराणादिश्रवणान्नित्यानित्यविवेक इति चेत्, तर्हि–तत एव ब्रह्मस्वरूपावगमात् ब्रह्मविचारस्य अनारम्भणीयत्वं स्यात्। इतिहासपुराणयोरपि संशयविपर्ययबाहुल्यात् तन्निरासाय ब्रह्मविचारोऽपेक्षित इति चेत्–संशयविपर्ययबाहुल्याविव नित्यानित्यविवेकोपि तत्र दुःसंपाद इति न साधनचतुष्टयस्य पूर्ववृत्तत्वं युक्तम्। यत्तु 'नित्यानित्ययोर्वस्मन्तीति नित्यानित्यवस्तूनि तद्धर्मा'इत्यारभ्य वाचस्पतिनोक्तं—'नित्यस्य धर्मिणोनित्यत्वं सत्यत्वं तत एवोपादेयत्वम्, अनित्यस्य धर्मिणोऽनित्यत्वम् असत्यत्वं तत एव हेयत्वमित्येवं नित्यानित्ययोर्धर्मिणोस्तद्धर्माणां च विवेको नित्यानित्यवस्तुविवेक' इति, तत्र ब्रूमः—अनित्यस्य तावदसत्यत्वं वक्ष्यमाणप्रकारेण निरस्तं वेदितव्यम्। यन्नित्यं तदुपादेयं, यदनित्यं तद्धेयमिति उभयमप्यनुपपन्नम्: सुखदुःखनिवृत्तितत्साधनतदुपयोगिनामेवोपादेयत्वबुद्धिदर्शनात्, तद्व्यतिरिक्तस्यैवानुपादेयतावुद्धिदर्शनाच्च। नित्यमपि दुःखरूपं दुःखनिमित्तं वा यदि स्यात् तद्धेयमित्येव प्रतीयेत, अनुभयं चेदुपेक्ष्येत। अनित्यमपि सुखरूपं वा, सुखनिमित्तं वा भवति चेत्तदुपादीयते। निरुपकस्य तु हेयम्—इति चेन्न; प्रकृष्टसुखान्तरादर्शनात्यन्तदुःखासाध्यत्वदुःखोदर्कत्वविरहे सति निरुपकस्यापि तत्रोपादेयतावुद्धिदर्शनात्। क्षीरौदनलाभात् कणस्त्यज्यते, अन्धकूपपतिता वराटिका तदुद्धरणक्लेशम्य तल्लाभसुखातिशायित्वात् त्यज्यते, विषमिश्रमन्नं मरणभयात् त्यज्यते, स्वच्चन्दनादि तु ततः प्रकृष्टसुखौलाभात् आद्यन्तयोस्तीव्रदुःखानुबन्धाभावाच्च परिमितमप्युपादीयते—तस्मादनित्यस्य हेयत्वं नानित्यत्वमात्रप्रयुक्तम्। यद्युच्येत—नित्यस्य दुःखासंभिन्नसुखरूपत्वादुपादेयत्वं, तदसंभवादनित्यस्य च हेयत्वमिति; उच्यते—नित्यस्य दुःखासंभिन्नसुखरूपत्वं किं व्याप्त्यावगम्यते, उत शास्त्रात्। न प्रथमः; नित्यस्य कालादेः सुखरूपत्वादर्शनात्, नित्यस्यात्मनो दुःखासंभिन्नसुखरूपत्वादर्शनाच्च। आत्मनो हि दुःखमुपलभ्यते 'अहं दुःखी'ति। शास्त्रतश्चेत्; यदि वेदात्, वेदजन्यं च—किमापातज्ञानम्, उत प्रामाणिकरूपम्। प्रथमे–कर्मब्रह्मभागसाधारण्यात् कर्मविचारातिक्रमेण ब्रह्मविचारं प्रति तस्य पूर्ववृत्तत्वानुपपत्तिः। निश्चयरूपं चेत्—मीमांसाद्वयफलम् स्यात्। आगमान्तरमूलत्वे विरुद्धतयानुपयोगात्, तस्यैतन्नैरपेक्ष्याच्च पूर्ववृत्तत्वानुपपत्तिः। अथोच्येत–यन्नित्यं तदुपादेयमिति नैवं प्रतीतिः, किं तु नित्यं सुखं संभवति चेत्तदुपादेयम्, सति तस्मिन् अनित्यमनुपादेयमिति तत्र तावन्नित्यसुखसंभवज्ञानस्य ब्रह्मविचारोपयोगो नित्यफलोपादित्साद्वारेणेति वक्तव्यम्। शास्त्रान्तरेषु कर्मकाण्डे च नित्यफलसंभावनाया निवारकाभावात्, नित्यानित्यविवेकानन्तरं तेषामप्यारम्भणीयता स्यात् तेषु हि नित्यं फलं प्रतीयते, तदसदिति चेत्—नदसत्त्वमप्रामाण्यात्, अन्यपरत्वाद्वा भवेत्, तदुभयं कर्ममीमांसया विना न सिद्ध्यतीति—तस्मात् पूर्ववृत्तत्वमभ्युपेतव्यम्। आद्यसूत्रं तज्ज्ञापनपरम्—इति चेन्न; तस्य स्वशास्त्रारम्भौपयिकविषयप्रयोजनपरत्वेन शास्त्रान्तराप्रामाण्यादिप्रतिपादनपरत्वाभावात्। स्वार्थोपयोगित्वात् तदप्रामाण्यादिकमभिप्रेतम्–इति चेत् तर्हि–तस्य स्वोपजीव्यज्ञानमपेक्षितमिति कर्मविचारस्य, तर्कपादस्य च पूर्ववृत्तत्वमापद्येत। तथाहि–शास्त्रान्तरप्रामाण्यं हि कर्ममीमांसाप्रथमपादावसेयम्,

---

१ °त्ववस्तु°। २ °मुखान्तरद° आ. मु. पु.। ३ °सुखलाभात् का. मु. पु.। ४ °पाद्येत। शास्त्रान्तर°।

बोधत्वात्। एषां साधनत्वं च विनियोगावसेयम्। विनियोगश्च श्रुतिलिङ्गादिभ्यः। स च तार्तीयः। उद्गीथाद्युपासनानि कर्मसमृद्ध्यर्थान्यपि ब्रह्मदृष्टिरूपाणि ब्रह्मज्ञानापेक्षाणीतीहैव चिन्तनीयानि। तान्यपि

अन्यपरत्वं वाक्यान्तरविरोधादिभिः, नित्यफलाविवक्षाध्यवसायश्च तत्रत्यन्यायाधीनः, शास्त्रान्तरप्रमेयदौस्थ्यं च तर्कपादे दर्शयिष्यते॥ किं च—आद्यसूत्रादेव शास्त्रान्तरगतनित्यफलासत्त्वावगमः—चेन्, अन्योन्याश्रयः—ब्रह्मविचारे[1] प्रवृत्तस्यान्यत्र नित्यफलासत्त्वावगमः, तदवगमात् ब्रह्मविचारे प्रवृत्तिरिति। न चैवं सति—धर्मजिज्ञासासूत्रेप्यन्योन्याश्रयः शङ्कनीयः:: पित्रादिप्रेरणया कृतसाङ्गाध्ययनस्य पुरुषस्य प्रयोजनवदर्थापातप्रतीत्यैव प्रवृत्त्युपपत्तेः, येषां धर्मविचारो वैधः तेषामेवान्योन्याश्रयः-वैधत्वज्ञानाद्विचारो, विचाराद्वैधत्वज्ञानमिति। **किंच**—अनित्यफलहेयतज्ञानस्य च स्वर्गादिफलजिहासाद्वारेण ब्रह्मविचारोपयोगो वक्तव्यः, स्वर्गादिफलस्यानित्यत्वं दुःखसंभिन्नत्वं च कथमवगम्यते, शास्त्रान्तरेणेति चेन्, तत्रैव नित्यपुरुषार्थसिद्धेर्नैराकाङ्क्ष्येण ब्रह्मविचारप्रवृत्त्ययोगात् तत्पूर्ववृत्तत्वानुपपत्तिः। यत्सुखं तदनित्यमिति स्वोत्प्रेक्षितनर्कमात्रेण चेन्, तेनैव निरस्तनित्यपुरुषार्थसंभावनाया ब्रह्मविचारः प्रतिबध्येत। दुःखनिवृत्तेरन्तराहित्यात्, स्वाभाविकसुखस्यानादिभावत्वात्, अन्तविरहोपपत्तेश्च न नित्यपुरुषार्थासंभावना—इति चेन्नः दुःखनिवृत्तिश्चेत् दुःखानुबन्धिनी—दुःखनिवृत्तित्वात् संप्रतिपन्नवत्, सुखं चेन सुखत्वादेव कृतकम्—इत्येवंरूपकृतकौत्प्रेक्षासंभवेन केवलतर्कशरणानां नित्यपुरुषार्थसंभावनाया दुरुपपादत्वात्। शास्त्रसिद्धनित्येतरविषया व्याप्तिः—इति चेन्न; वेदान्तश्रवणपूर्वको व्याप्तिनिश्चयः, तत्पूर्वकं वेदान्तश्रवणम्—इत्यन्योन्याश्रयप्रसङ्गात्। अतो ब्रह्मविचारं प्रति नित्यानित्यगतधर्मविवेकोपयोगाय नित्यानित्यविभागे प्रत्यक्षाप्रवृत्तेः, तर्कस्यातिप्रसक्तेः, शास्त्रान्तराणां ब्रह्मविचारैर्नैराकाङ्क्ष्यापादकत्वात्, तद्विरोधेनानुपयोगाच्च—वेद एव प्रमाणीकर्तव्यः। तत्रापातप्रतीतेरुभयभागम्याधारण्यात्, नित्यानित्यनिश्चयस्य मीमांसाद्वयफलत्वेनान्योन्याश्रयणस्य दुस्तरत्वाच्च—नित्यानित्यगतहेयोपादेयत्वज्ञानं नित्यानित्यवस्तुविवेक ईत्यूक्तम्॥

ननु शास्त्रान्तरेषु नित्यफलसंभावनाया निवारकाभावान्नित्यविवेकादिमतस्तत्रापि प्रवृत्तिप्रसङ्गः—इति यदुक्तं—तन्नः शास्त्रान्तरनिवारकत्वादाद्यसूत्रस्य। ब्रह्मैव। जिज्ञास्यं न प्रकृतिपुरुषाविति हि सूत्रार्थ—इति—तदयुक्तः साधनचतुष्टयपूर्ववृत्तत्ववादिभिरस्यार्थस्यानङ्गीकृतत्वात्। तापत्रयज्ञानपूर्ववृत्तत्ववादिभिर्ह्यमर्थ उक्तः, न चायमर्थ उपपन्नः। तथाहि—न तावदयमर्थः सूत्रकृतोपदिश्यते, न चाज्ञाप्यते, किं तूपपाद्यत इति वक्तव्यम्; न्यायनिबन्धनत्वात् सूत्राणाम्। उपपत्तिश्च—शास्त्रान्तरदौर्बल्यमेव वा, स्वशास्त्रप्राबल्यमेव वा, समुचितमुभयं वा। न प्रथमः; स्वशास्त्रस्य दौर्बल्ये ब्रह्मणोप्यजिज्ञास्यत्वात्। न द्वितीयः: शास्त्रान्तरस्य च प्राबल्ये ब्रह्मण एव जिज्ञास्यत्वासिद्धेः। तृतीये सूत्रवैयर्थ्यं; पूर्वमीमांसायामेव चोदनासूत्रप्रभृतिभिस्तदुभयसिद्धेः। तत एव च तस्याः पूर्ववृत्तत्वापत्तिः॥ अवश्यापेक्षितत्वादेव वेदप्रामाण्यमात्रे सिद्धेपि, ब्रह्मणि प्रामाण्यं न तावता सिध्यति—इति चेत्, तर्हि—यैर्हेतुभिर्ब्रह्मणि प्रामाण्यासंभवशङ्काः ते परिहर्तव्याः स्युः, ते च **'सिद्धे व्युत्पत्त्यनुपपत्त्यादय'** इति तत्परिहारेण ब्रह्मणि वेदान्तप्रामाण्यसमर्थनपरत्वेऽस्मदीय एव पक्षः परिगृहीतः स्यात्। अत एव दुःखत्रयाभिघातज्ञानस्य पूर्ववृत्तत्वमपि निरस्तम्। तथाहि—किमैहिकदुःखज्ञानं पूर्वम्, उत नारकदुःखज्ञानम्, उत स्वर्गादेरप्यल्पास्थिरतया तापत्रयान्तर्गतत्वज्ञानम्। न प्रथमः: आयुर्वेदादिभिस्तन्निरसनोपायावगमात्—वेदान्तविचारनैरपेक्ष्यात्। न द्वितीयः; नित्यदुःखहेतुभूतपापापनोदकरव्रतनियमविधायकशास्त्रबाहुल्यात्—वेदान्तनैरपेक्ष्यात्।.तृतीये तु कर्मविचारापेक्षा स्यादेवः प्रथमत एवाध्ययनविधिवश्यस्य शास्त्रान्तरावगमावसरविधुरत्वात्, सत्यप्यवसरे स्वर्गाद्यल्पास्थिरत्वज्ञापकैस्तैरेव शास्त्रैर्मुक्त्युपायस्यावगतत्वेन वेदान्तनैरपेक्ष्यात्, वेदान्तविरुद्धार्थाभिधायिनां तेषामवगमस्य वेदान्तज्ञानपूर्ववृत्तत्वायोगात्, आपातप्रतीतेरिति-हासपुराणयोश्चाल्पास्थिरत्व—अनन्तस्थिरत्व—विपर्ययप्रतीतिहेतुत्वाच्च॥

पूर्वं व्याख्येयस्वभावात् क्रमनियम उक्तः, व्याख्यानस्वभावादपि तत्सिद्धिरिदानीमुच्यते—**एषामिति। एषां**—शमादीनाम्, साधनत्वम्। **चः** समुच्चये। **विनियोगावसेयं-विनियोगः** अङ्गत्वज्ञापनम्। ततः किमित्यत्राह—**विनियोगश्चेति।** ततोपि किमित्यत्राह—**स च तार्तीय इति।** तृतीयाध्यायोक्त इत्यर्थः। इदं प्रदर्शनार्थमुक्तः कर्मविचारोक्तकृत्स्नन्यायसापेक्षत्वाद्ब्रह्मविचारस्य। एतानि हि कर्ममीमांसाध्यायानां प्रमेयाणि—प्रथमे अध्याये प्रमाणलक्षणं वृत्तम्। द्वितीयेऽध्याये शास्त्रभेदः, कर्मभेदो वा—भेदहेतुश्च शब्दान्तराभ्याससंख्यागुणप्रक्रियानामधेयानि। तृतीयेऽङ्गनिरूपणम्—अङ्गत्वज्ञापकानि प्रमाणानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानानि। चतुर्थे क्रत्वर्थपुरुषार्थभेदनिरूपणेन पुरुषार्थैः क्रत्वर्थानां प्रयुक्तिर्निरूपिता। पञ्चमे क्रमः—क्रमप्रमाणानि श्रुत्यर्थपाठप्रवृत्तिमुख्यकाण्डानि। षष्ठेऽधिकारिनिरूपणम्। सप्तमे सामान्यातिदेशो निरूपितः। अष्टमे विशेषातिदेशः। नवमे ऊहः। दशमे बाधः। एकादशद्वादशयोस्तन्त्रप्रसङ्गौ। यथोक्तं—'धर्मधीमानभेदाङ्गप्रयुक्तिक्रमकर्तृभिः। सातिदेशविशेषोहबाधतन्त्रप्रसक्तिभिः॥' इति। एतन्न्यायसापेक्षत्वं, संकर्षसापेक्षत्वं च ब्रह्मविचारे तत्र तत्र द्रष्टव्यम्। तस्मात् **स च तार्तीय** इति प्रदर्शनार्थमुक्तम्॥ अथ कर्मविचारापेक्षत्वे अभ्युच्चययुक्तिरुच्यते—**उद्गीथादीति।** परेण प्रसङ्गात् सङ्गतिरुक्ता, अत्र तु साक्षात्सङ्गतिरुपपाद्यते। **कर्मसमृद्ध्यर्थान्यपीति।** कर्मसमृद्ध्यर्थत्वे तत्प्रयोजनं 'तन्निर्व-

---

१ °रूपाणीति। २ अन्तर°। ३ °रानैराका°। ४ इत्युक्तम्। ५ °क्रत्व°।

कर्माण्यनभिसंहितफलानि ब्रह्मविद्योत्पादनानीति तत्साद्गुण्यापादनान्येतानि सुतरामिहैव संगतानि । तेषां च कर्मस्वरूपाधिगमापेक्षा सर्वसंमता ॥

चना'दिति वाक्यकारवचनं स्मारितम् । **ब्रह्मदृष्टिरूपाणीति** । अत्रह्मणि ब्रह्मत्वेन दृष्टिर्ब्रह्मदृष्टिः, ब्रह्मदृष्टिरूपत्वात् ब्रह्मज्ञानसापेक्षाणीत्यर्थः । **इति**र्हेतौ । **इहैव चिन्तनीयानि,** न तु कर्मविचारे । **तान्यपि कर्माणि** यत्समृद्ध्यर्थान्युद्गीथाद्युपासनानि तान्यपीत्यर्थः ॥ **अनभिसंहितफलानि** अनभिसंहितफलत्वात् ब्रह्मविद्योत्पादकानीत्यर्थः । **इति**र्हेतौ । **तत्साद्गुण्यापादनानि—साद्गुण्यं**—प्रबलप्रतिबन्धके सत्यपि शीघ्रफलप्रदत्वं, तदा**पादनानि** । ब्रह्मविद्यां शीघ्रं संपादयन्तीत्यर्थः । **एतानि**-उद्गीथाद्युपासनानि, अत इहैव सुतरां सङ्गतानि । प्रधानोपयोगित्वेन साहश्यादिना धीस्थत्वं प्रसङ्गात् सङ्गतिः, अन्यतरापेक्षया उभयापेक्षया वा सङ्गतिः साक्षात्सङ्गतिः, अत्र तूभयोरपेक्षितत्वं प्रतिपादितम् । **ब्रह्मदृष्टिरूपाणी**त्युद्गीथाद्युपासनस्य ब्रह्मज्ञानापेक्षाभिहिता । **ब्रह्मविद्योत्पादकानीति** ब्रह्मज्ञानस्य उद्गीथाद्युपासनापेक्षाभिहिता । एतदभिप्रायेण **सुतरा**मित्युक्तम् । **इहैवे**त्युभयापेक्षया अत्रैव विद्यमानत्वात् सुतरां सङ्गतिरिहैव, न तु कर्मविचारे इत्यर्थः । ननु कथमुद्गीथादिविचारस्य ब्रह्मविचार एव सुतरां सङ्गतिः, कर्मविचारेपि हि सुतरां सङ्गतिरस्ति, उभयापेक्षया सङ्गतिर्हि सुतरां सङ्गतिः, कर्माङ्गाश्रयत्वात् उद्गीथादिधियां तद्विचारस्य कर्मापेक्षास्ति, कर्मणामपि स्वसमृद्ध्यर्थोद्गीथाद्युपासनापेक्षास्ति इत्युभयापेक्षाया विद्यमानत्वात्: उच्यते—कर्मस्वसमृद्ध्यर्थोद्गीथाद्युपासनापेक्षा केवलकर्मणां विद्याङ्गकर्मणां च तुल्या, अतः कर्मस्वसमृद्ध्यर्थत्वहेतुः साधारणः, कर्माङ्गाश्रयत्वं पूर्वभागविचारसङ्गतेरसाधारणो हेतुः, ब्रह्मज्ञानसापेक्षत्वमुत्तरभागविचारसङ्गतेरसाधारणो हेतुः, एवं साधारणासाधारणहेतुद्वयवत्तासाम्येपि, ब्रह्मदृष्टिरूपोद्गीथाद्युपासनानां ब्रह्मज्ञानसापेक्षत्वात् तेन विना तच्चिन्तनमशक्यं पूर्वभागविचारे । न हि कर्मविचारात् पूर्वं ब्रह्मविचार उपपद्यते; प्रागुक्तसङ्गतिविशेषविशिष्टत्वात्तयोः । उत्तरभागे तु ब्रह्मज्ञानस्य मुलभत्वात् निवृत्तकर्मविचारस्योद्गीथाद्युपासनचिन्तनं कर्तुं शक्यम्, अत एव शक्यत्वादुद्गीथाद्युपासनानि उपनिषद्भागे विहितानि, अत एव ब्रह्ममीमांसायां निरूपितानि च । एवं वेदान्तभागविहितत्व-मीमांसायां विचारितत्व-शक्यत्वरूपवैषम्यत्रयविशेषिताया उभयापेक्षाया उत्तरभागे एव विद्यमानत्वात्तन्निबन्धना सुतरां सङ्गतिस्त्रैवेत्यभिप्रायेण—**सुतरामिहैव सङ्गतानीत्युक्तम्** । अयं चाभ्युच्चयहेतुः—यदप्रधानस्यास्यार्थस्य साक्षात्सङ्गतत्वात्तस्याप्यवश्यापेक्षितः कर्मविचार—इति । प्रधानप्रतिपाद्यस्य नियमेनापेक्षितत्वरूपः प्रधानहेतुः पूर्वमेवोक्तः ॥

ततः किं प्रकृतानन्तर्यस्येत्यत्राह—**तेषां चेति** । उद्गीथाद्युपासनानाम् । **सर्वसंमता** तत्साक्षात्सङ्गतत्वे हि विगानम्, उद्गीथाद्युपासने चिन्त्ये सति तस्य कर्मज्ञानापेक्षा सर्वाविगीता । यत्त्वधीतवेदान्तस्य कर्माधिगमापेक्षा नास्तीत्युक्तं, तदसङ्गतं; वेदान्तेष्वपि उपायपर-मुक्तिपरवाक्यमात्राध्यायिनः पुरुषस्य ब्रह्मविचारेपि तृतीयचतुर्थाध्यायमात्रश्रवणप्रसङ्गात् । तृतीयचतुर्थयोः प्रथमद्वितीयोक्तन्यायसापेक्षत्वमस्ति-इति चेत्, तर्हि-कृत्स्नस्य ब्रह्मविचारस्य कर्मविचारन्यायसापेक्षत्वात्तस्यैव पूर्ववृत्तत्वम् । जन्मान्तरसुकृतविशेषेण कस्यचिद्ब्रह्मविचारमात्रापेक्षा-इति चेत्, तस्य सुकृतविशेषेण तृतीयचतुर्थमात्रापेक्षा किं न स्यात्, अथवा सुकृतातिशयात् कृत्स्नब्रह्मविचारनिरपेक्षता किं न स्यात् । **किंच**—वेदान्तेषूपायफलपरवाक्यमात्राध्ययनमशास्त्रीयमिति त्वयापि वक्तव्यं, तद्वेदान्तमात्राध्ययनस्यापि तुल्यं; कृत्स्नस्वाध्यायाध्ययनस्य विहितत्वात् । अतो-विध्यतिलङ्गिनां यदपेक्षितं तदेव पूर्ववृत्तम्-इत्यसङ्गतम् । कृत्स्नाध्यायिनोपि सुकृतवशात् क्वाचित्कश्रवणापेक्षायां—पूर्वमेव दत्तमुत्तरम् ॥ **विरोधादप्रमाणत्वादि**त्यादिग्रन्थसंगृहीतानि दूषणानि **अत्रोच्यते** इत्यादिना सिद्धान्तभाष्येण परिहृतानि । तथा हि-कर्मणामनित्यफलत्वेन विरोधोऽनभिसंहितफलत्वात् परिहृतः, भेदवासनाजनकत्वेनैक्यज्ञानविरोधस्तु 'पृथगात्मान' मिति पृथक्त्वज्ञानस्य मोक्षोपायत्वश्रुत्या परिहृतः । अयं विरोधो वक्ष्यमाणवस्तुसामर्थ्यान्तर्गतश्च । मोक्षस्य सकलभेददर्शननिवृत्तिरूपतायाः प्रपञ्चमिथ्यात्वोपपादनसापेक्षत्वात् ऐक्यज्ञानस्योपायत्वेपि कर्मणामदृष्टद्वारेणोपयोगादविरोधः ॥ अप्रमाणत्वं 'क्रियावानेष ब्रह्मविदां वरिष्ठ' इत्यादिसंज्ञहितविनियोजकप्रमाणदर्शनात् परिहृतं, विविदिषार्थचित्तशुद्ध्युपयोगस्तु वेदनोत्पत्त्युपयुक्तमनोनैर्मल्यहेतुत्वोपपादनेन विविदिषार्थत्वेपि तस्याहरहरुत्पत्त्यपेक्षोपपादनेन च प्रत्युक्तः । ज्ञानमात्रस्य हेतुत्वश्रवणं च साधनद्विज्ञानभ्युपगमाद्दत्तोत्तरम् । **सामर्थ्यं** नाम-मिथ्याभूतस्य बन्धस्य ज्ञानैकनिवर्त्यत्वरूपं वस्तुसामर्थ्यं, तत्तु प्रपञ्चमिथ्यात्वदूषणेन प्रतिवक्ष्यते । शमायङ्गकताप्राप्तकृतो विरोधश्च प्रवृत्तिरूपयज्ञादेः, निवृत्तिरूपशमादेश्च भिन्नविषयत्वेनाविरोधात् परिहृतः; शमादयो ह्यविहिताप्रतिषिद्धनिषिद्धकाम्यविषया इत्युक्तम् । वाक्यार्थज्ञानस्यैव मोक्षोपायत्वं प्रत्यक्षविरोधाद्यविरोधाभ्यां निरस्तम् । तत्र निवर्त्यवासनाया निवर्तकोत्पत्तिप्रतिबन्धकत्वाभावेन श्रवणादेर्मैदवासनानिरासार्थमनपेक्षितत्वात्तद्वैयर्थ्यपरिहारस्यानुपपन्नत्वात् 'श्रवणादिकमोन्निद्रवाक्यजा धीर्विमोचिके'त्येतदपि परास्तम् ।

साधनचतुष्टयस्य पूर्ववृत्तत्वे वस्तुसामर्थ्यं नाम हेतुरुक्तः, स पूर्वं ब्रह्मस्वरूपाच्छादिकेत्यादिना प्रतिज्ञातः, तदुपपादनदूष-

१ "सहितं" ।

महापूर्वपक्षः।

यदप्याहुः—अशेषविशेषप्रत्यनीकचिन्मात्रं ब्रह्मैव परमार्थः, तदतिरेकि नानाविधज्ञातृज्ञेयतत्कृतज्ञानभेदादि सर्वं तस्मिन्नेव परिकल्पितं मिथ्याभूतम्; **'सदेव सोम्येदमग्र आसीत्। एकमेवाद्वितीयम्'** (छा. ६।२।१), **'अथ परा यया तदक्षरमधिगम्यते। यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम्। नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः'** (मु. १।१।५–६), **'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै. २।१।१), **'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्'**। (श्वे. ६।१९), **'यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां**

णयोर्बहुग्रन्थकार्यत्वात्तदुभयं पूर्वं न कृतम्, अथ तदुपपादनायोपक्रमते। पूर्वमुशायोपदेशपरवाक्यपर्यालोचनया वस्तुसामर्थ्यव्यतिरिक्तहेतव उपन्यस्ताः, निरस्ताश्च। **विधित्सितं ज्ञानमिति** ह्युक्तं, **वस्तुसामर्थ्यं** तु सिद्धपरवाक्यसिद्धं; **वस्तुस्वरूपोपदेशपरैरिति** हि वक्ष्यते, अतः स्वरूपपरवाक्यपर्यालोचनामुखेन तदुपपादयितुमारभते—**यदप्याहुरिति**। अपिना उपपादयिष्यमाणस्यार्थस्य प्राधान्यं सूच्यते। **आहुरिति** ग्रन्थकारबहुलम्। अनेनास्य ग्रन्थस्य तत्तत्प्रबन्धोक्तसकलार्थगर्भितत्वं दर्शितम्। **सर्वे वेदान्ता आरभ्यन्त इति यदप्याहुः—तदनादरणीयमित्युपर्यन्वयः**। प्रथमं ब्रह्मैकमेव सत्यमिति प्रतिजानीते—**अशेषेति। अशेषविशेषा** वक्ष्यमाणज्ञात्रादयः, विजातीयसजातीयस्वगता वा। स्वगतेष्वप्यन्वयिनः, व्यावृत्तिरूपाश्च विशेषाः **अशेष**–शब्देन विवक्षिताः। **तत्प्रत्यनीकं** स्वज्ञानेनैव निवर्तकं, शुक्तिरिव रजतस्येत्यर्थः। निर्विशेषत्वे शून्यतास्यादित्याह—**चिन्मात्रमिति। चिच्छब्देन** तुच्छत्वव्यावृत्तिः; स्वयंप्रकाशत्वं हि चित्त्वम्। **मात्रचाज्ञेयत्वव्यावृत्तिः**, यद्वा–प्रत्यनीकत्वरूपधर्मोपि **मात्रचा** व्यावर्त्यते, यद्वा–**मात्रचा** वस्तुतः समस्तविशेषविरहो **विवक्षितः। ब्रह्मैवेत्येवकारेण** सगुणब्रह्मव्यावृत्तिः। **परमार्थः** तत्त्ववेदकप्रमाणविषयः। सगुणवाक्यानां न तत्परत्वं; फलविशेषार्थमुपासनेऽन्यपरत्वादिति भावः। कथं ब्रह्मण एव सत्यत्वमन्यदपि हि प्रतीयत–इति शङ्कायां–ब्रह्मण एव परमार्थत्वसिद्धये तद्व्यतिरिक्तस्य तज्ज्ञाननिवर्त्यत्वाय च विश्वस्य मिथ्यात्वं प्रतिजानीते—**तदिति**। 'अथात आदेशो नेति नेती'त्यादौ 'प्रकृतैतावत्त्व'मिति सूत्रविषये कृत्स्नस्य मिथ्यात्वेन ब्रह्मणोपि मिथ्यात्वं परैः पूर्वपक्षीकृत्य निरस्तमिति तदभिप्रायेणोक्तं—**तदतिरेकीति**। 'नेह नानास्ती'त्यादिनिषेधवाक्यस्य ब्रह्मव्यतिरेकेपि निषेध्यनानात्वं सिद्ध्यतीति दर्शितं—**नानाविधेति। पूर्वमशेषविशेषशब्दोपात्तविशेषविवरणार्थं, 'नेह नानास्ती'त्यादिवाक्यगतनानाशब्दविवरणार्थं च नानाविधशब्दवाच्यभेदो विवृतः—ज्ञातृज्ञेयेति। तत्कृतज्ञानभेदः** ज्ञातृज्ञेयावच्छिन्नवृत्तिज्ञानभेदः। अनेन वृत्तिस्फुरितचैतन्यभेदस्य स्वरूपप्रयुक्तताव्यावृत्तिः। **भेद**शब्देनैककोटिषु अवान्तरभेदा विवक्षिताः। **आदि**शब्देन निरसनीयदुःखस्वरूपजन्ममजरामरणान्युच्यन्ते। **सर्वम्**–इति वक्ष्यमाणश्रुतिगत**सर्व**शब्दस्यायमर्थ इति भावः। **तस्मिन्निति** निरधिष्ठानभ्रमपक्षव्युदासः। **एव**कारेणाधिष्ठानबहुत्वनिषेधः। तथा सति हि प्रपञ्चस्य तज्ज्ञाननिवर्त्यत्वसिद्धिः। यद्वा, **तस्मिन्नित्येकवचनेनाधिष्ठानैकत्वसिद्धिः**। नानाऽध्यासा नानाधिष्ठानका दृष्टाः, तत्कथमेकाधिष्ठानकत्वमिति विरोधं, स्वयंप्रकाशवस्तुनोऽधिष्ठानत्वविरोधं च स्फोरयत्येवकारः। **मिथ्याभूतं** मिथ्याभाववत्, वक्ष्यमाणमिथ्यात्वलक्षणवदित्यर्थः॥

ब्रह्मण एव सत्यत्वे व्यतिरिक्तमिथ्यात्वे च किं प्रमाणमित्याह—**सदेवेति। सदेवेति** विजातीयभेदो व्यावर्त्यते। **एकमेवेति** सजातीयभेदः। **अद्वितीयमिति** स्वगतभावाभावरूपभेदः। षड्विधतात्पर्यलिङ्गोपेतसद्विद्यागतत्वादिदं वाक्यं प्रथममुपात्तम्, अथैवकारफलितनिषेधकण्ठोक्तिमत्परविद्यावाक्यमुपादत्ते—**अथेति**। इदं च कारणत्वशङ्कितदोषव्युदासोपक्रमककारणवाक्यं; भूतयोनिमित्युक्त्वा अनन्तरं तस्यैव प्रपञ्चनात्। **अद्रेश्यम्, अग्राह्यं** प्रत्यक्षागोचरम्, अनुमानाद्यगोचरम्। अथवा चक्षुरगोचरम्, इन्द्रियान्तरागोचरम्। **अगोत्रम्** अनामकम्। **अवर्णम्** अनैल्यादिकम्। **अचक्षुःश्रोत्रम्, अपाणिपादं** ज्ञान–कर्मेन्द्रियरहितम्। **नित्यं विभुं** कालदेशाभ्यामनवच्छिन्नम्। **सर्वगतं** सर्वेण जगताधिष्ठानतया गतम्–आश्रितम्। वस्तुपरिच्छेदरहितमित्यर्थः। **सुसूक्ष्मम्** अदृश्यत्वं न तुच्छत्वादिदूरत्वादिना, किंतु सुसूक्ष्मत्वादित्यभिप्रायः। वाक्यभेदादनेकयत्तच्छब्दान्वयोपपत्तिः॥ अथ शोधकवाक्यमुपादत्ते—**सत्यमिति**। अवृतजडपरिच्छिन्नव्यावृत्तनिर्विशेषवस्तुपरमिदं वाक्यं; कारणवाक्यैकार्थ्यात्, शोधकवाक्यान्तरैकार्थ्यात्, सामानाधिकरण्यान्यथानुपपत्त्या चेति वक्ष्यते। **निष्कलं** कला—अवयवाः, निरवयवमित्यर्थः। तत्र लिङ्गं निष्क्रियत्वम्। **शान्तम्** ऊर्मिषट्करहितम्। अशनाया–पिपासे च शोक–मोहौ जरा–मृत्यू चोर्मयः। **निरवद्यं, निरञ्जनं** कर्मसंबन्धतत्फलरहितम्। अनेन सत्यज्ञानादिवाक्यगर्भितव्यावृत्तिः स्फुटीकृता। अथ **चिन्मात्र**शब्दाभिप्रेतां ज्ञेयत्वव्यावृत्तिमाह—**यस्येति। अमतमविज्ञातमिति**

---

१ अथेत्यादि विषयत्वोक्तिरित्यन्तं द्विवारं का. मु. पुस्तके उपलभ्यते।

विज्ञातमविजानताम् ॥' (के. ११), **'न दृष्टेर्द्रष्टारं पश्येर्न मतेर्मन्तारं मन्वीथाः'** (बृ. ३।४।२), **'आनन्दो ब्रह्म'** (तै. ३।६।१), **'इदं सर्वं यदयमात्मा'** (बृ. २।४।५), **'नेह नानास्ति किंचन । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति'** (बृ. ४।४।१६), **'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति । यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं विजानीयात्'** (बृ. २।४।१४), **वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्** (छा. ६।१।४), **'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति'** (तै. २।७।१), **'न स्थानतोपि परस्योभयलिङ्गं सर्वत्र हि'** (ब्र. सू. ३।२।११), **'मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्'** (ब्र. सू. ३।२।३), **'प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् । वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥'** (वि. पु. ६।७।५३), **'ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः । तदेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ॥'** (वि. पु. १।२।६), **'परमार्थस्त्वमेवैको नान्योस्ति जगतः पते ।'** (वि. पु. १।४।३८), **'यदेतदृश्यते मूर्तमेतज्ज्ञानात्मनस्तव । भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः ॥ ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः । अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसंप्लवे ॥**

श्रवणमननादिरूपज्ञानाविषयत्वोक्तिः । अथ ज्ञातृत्वनिषेधपरं वाक्यमाह—**न दृष्टेरिति** । अत्रापि पूर्वोक्तज्ञानावस्थाभेदो विवक्षितः । अस्य पुरुषार्थत्वायासुखाद्यावृत्तिरुच्यते—**आनन्दो ब्रह्मेति** । **आनन्द**शब्दोऽसुखाद्यावृत्तिमात्रपरः; अत एव त्यानन्दीत्यनुक्तिः ॥

इत्थं ब्रह्मणो निर्विशेषचिन्मात्रत्वे श्रुतिवाक्यजातमुपन्यस्तम्, अथ व्यतिरिक्तमिथ्यात्वे प्रमाणमुपन्यस्यते, तत्र प्रथमं मिथ्याभूतस्य जगतो ब्रह्मण्यधिष्ठानेऽध्यस्तत्वं दर्शयति—**इदं सर्वं यदयमात्मेति** । सामानाधिकरण्येन अधिष्ठानेनाध्यस्तसामानाधिकरण्यं हि बाधार्थं यथा दृष्टं रज्जुः सर्प इति । पूर्वं सर्वं तस्मिन्नेवेति प्रतिज्ञातं ब्रह्मणः सर्वाध्यासाधिष्ठानत्वं चानेन वाक्येन दर्शितम् । व्यतिरिक्तनिषेधकण्ठोक्ति दर्शयति—**नेह नानास्ति किंचनेति** । नाना पश्यन्नित्यन्ताच्च इति दर्शयति **मृत्योरिति** । अत्रमृत्युरविद्या 'तमसो वा एष तमः प्रविशतीतिवत् । **इव**शब्देन नानात्वस्यापारमार्थ्यं दर्शितम् । मिथ्याभूतं चेत् कदाचिन्निवृत्तिः स्यादित्यत्राह—**यत्र हीति । यत्र** यदा । द्वैतमिव भवति, **इव**शब्दः पूर्ववत् । तदा इतर इतरमिनरेण पश्यतीत्यर्थः । **केनेति** विश्यमाणत्वादितरेणेत्यध्याहारः । **यत्र त्विति । यत्र** यदा । अस्य सर्वमात्मैवाभूत् तदा कः केन कं पश्येत् । **क** इत्यध्याहार्यम्; **इतर** इत्युक्तत्वात् । **पश्येद्विजानीयादिति** ज्ञानपर्वभेदोक्तिः । इदं कृत्स्नमिथ्यात्वं दृष्टान्तेनोपपादयन्तीं श्रुतिमुदाहरति—**वाचेति । विकारो** घटादिसंस्थानं, **नामधेयं** च **वाचारम्भणं** वागालम्बनं, व्यावहारिकमित्यर्थः । तस्मा**न्मृत्तिकेत्येव सत्यम्** । ब्रह्मणि नानात्वं पश्यतः पूर्वोक्तमृत्युशब्दाभिहिताज्ञानकार्यं भयं च दर्शयति—**यदा हीति । उदरम्**-उ-अवधारणे—'तदेवैतं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीना'मितिवत् । **दरम्** अल्पम् । यद्वा, **उत्-अरम्** उदित्यस्य भवतीत्यनेनान्वयः; व्यवहिताश्चेति सूत्रात् । **अरं**-शीघ्रम् । **यदाह्येवे**त्यादेः पश्चादुपादानं—सिद्धान्ते परिहारसौकर्यार्थं, तच्च पूर्वोक्तवाक्यानामेकवाक्यत्वरूपन्यायपरिहार्यत्वात् । ब्रह्मणो निर्विशेषचिन्मात्रत्वे, व्यतिरिक्तमिथ्यात्वे च श्रुतिर्दर्शिता, तत्र निर्विशेषत्वे सूत्रं प्रदर्श्यते—**न स्थानत इति । उभयलिङ्गं** साकारत्वं, साकारनिराकारत्वं च । सर्वत्र स्थितस्यापि ब्रह्मणो नास्ति निराकारमित्यर्थः । अन्यमिथ्यात्वे सूत्रमाह—**मायेति** । स्वाप्नमर्थजातं कात्स्न्र्येन मायामात्रं, कुत इति चेत्; अनभिव्यक्तस्वरूपत्वात्, दुर्निरूपत्वात्, बाधितत्वादित्यर्थः । **स्वाप्नार्थमिथ्यात्ववज्जगन्मिथ्यात्वं** दृष्टान्ततया दर्शितम्, अस्मिन्नर्थद्वये उपबृंहणवचनानि दर्शयति—**प्रत्यस्तमितभेदमिति । प्रत्यस्तमितभेदम्** सजातीयविजातीयभेदरहितम् । **सत्तामात्रं** स्वगतभेदरहितम् । अत एव **वचसामगोचरम् । तर्हि तुच्छत्वं स्यान्न** सत्तेत्यत्राह—**आत्मसंवेद्यमिति** । स्वयंप्रकाशमित्यर्थः । **ब्रह्मसंज्ञितमिति । ब्रह्मेति** संज्ञामात्रमेव, न तु बृहत्त्वादिगुणयोग इति भावः । निर्विशेषं चेत् कथं जगदवभास—इत्याकाङ्क्षायामुपादत्ते—**ज्ञानस्वरूपमित्यादि । प्रपञ्चमिथ्यात्वमनेन श्लोकेनोच्यते । अत्यन्तनिर्मलं** सकलविशेषरहितम् । **अर्थस्वरूपेण** जडस्वरूपेण । अर्थनानात्वस्य भ्रान्तिसिद्धत्वादेक एव परमार्थ इति दर्शयति—**परमार्थस्त्वमिति** ।

एतद्विवृणोति श्लोकद्वयेन—यदेतदित्यादिना । भ्रान्तिश्चेत् कस्यचिन्निवर्ततेत्याकाङ्क्षायां केषांचित्तन्निवृत्तिं दर्शयति—

१ तदेव त्वं । २ अरम् ।

ये तु ज्ञानविदः शुद्धचेतसस्तेखिलं जगत्। ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वर ॥' (वि. पु. १।४।३९-४०-४१), **'तस्मात्मपरदेहेषु सतोप्येकमयं हि यत्। विज्ञानं परमार्थो हि [1]द्वैतिनोऽतथ्यदर्शिनः ॥'** (वि. पु. २।१४।३१), **'यद्यन्योस्ति परः कोपि मत्तः पार्थिवसत्तम। तदैपोहमयं चान्यो वक्तुमेवमपीष्यते ॥'** (वि. पु. २।१३।८५), **'वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः। अभेदव्यापिनो वायोस्तथासौ परमात्मनः ॥'** (वि. पु. २।१४।३२), **'सोहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम्। इतीरितस्तेन स राजवर्यस्तत्याज भेदं परमार्थदृष्टिः ॥'** (वि. पु. २।१६।२४), **'विभेदजनके ज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥'** (वि. पु. ६।७।९४), **'अहमात्मा गुडाकेश सर्वभूताशयस्थितः।'** (गी. १०।२०), **'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत।'** (गी. १३।२), **'न तदस्ति विना यत्स्यान्मया भूतं चराचरम्।'** (गी. १०।३९) इत्यादिभिर्वस्तुस्वरूपोपदेशपरैः शास्त्रैर्निर्विशेषचिन्मात्रं ब्रह्मैव सत्यमन्यत्सर्वं मिथ्येत्यभिधानात्। मिथ्यात्वं नाम प्रतीयमानत्वपूर्वकयथावस्थितवस्तुज्ञाननिवर्त्यत्वं, यथा रज्ज्वाद्यधिष्ठानकसर्पादेः। दोषवशाद्धि तत्र तत्कल्पनम। एवं चिन्मात्रवपुषि परे ब्रह्मणि दोषपरिकल्पितमिदं

ये तु ज्ञानविद इति। ज्ञानसत्त्वं, जडमिथ्यात्वं चोक्तम्, अथ ज्ञानाकाराणामात्मनामैक्योक्ति दर्शयति—**तस्येति। एकमयम्** एकम्। आत्मपरनिर्देशकृते भेदशङ्कामपि व्युदस्यति—**यद्यन्योस्तीति**। अत्र दृष्टान्तमाह—**वेणुरन्ध्रेति।** अस्योपपादितस्यार्थस्योपदेशं दर्शयति—**सोऽहमिति।** यथोपदिष्टमकरोदित्याह—**तत्याजेति।** अथात्मनां ब्रह्मणैक्योक्ति दर्शयति—**विभेदजनक इति**। अथ भगवद्गीतायां सर्वात्मनां परस्परं, ब्रह्मणा च सहैक्योक्तिमुदाहरति—**अहमात्मेति। सर्वभूत**शब्देन शरीराण्युच्यन्ते। एतत् स्फुटयति—**क्षेत्रज्ञंचेति। सर्वक्षेत्रेष्वि**त्यनेन भूतशब्दस्य **शरीर**परत्वं स्फुटीकृतम्। तत्रैव व्यतिरिक्तमिथ्यात्वोक्ति दर्शयति—**न तदस्ति विना यदिति। वस्तुस्वरूपोपदेशपरैः**, न तूपायपरैः। अनन्यपरैरिति भावः। **निर्विशेषचिन्मात्रमिति** पूर्ववदर्थः। अभिधानादित्यस्याशेषविशेषेत्यादिपूर्वप्रतिज्ञावाक्येन सहान्वयः। ननु किमन्यत्र सतोऽन्यत्र स्यातत्वं मिथ्यात्वम्, उतात्यन्तासत्त्वम। पूर्वस्मिन् कल्पे—क्वचित् पारमार्थ्यमभ्युपगतं स्यात्। द्वितीये तु—निवर्त्यमेव नास्तीति शास्त्रवैयर्थ्यम्। अत्यन्तासत्त्वं चानुपपन्नम्। स्यातेः स्वयंप्रकाशस्य वस्तुनो भ्रमाधिष्ठानत्वं नोपपद्यते; स्वयाथात्म्याप्रकाशमूलो ह्यध्यासः पराधीनप्रकाशस्य जडस्यैव तत्संभवः। अतः प्राक् प्रतिज्ञातं प्रपञ्चमिथ्यात्वं, ब्रह्मणो भ्रमाधिष्ठानत्वं चायुक्तमित्यस्मिन् चोद्यद्वये—प्रथमं परिहर्तुं मिथ्यात्वलक्षणमाह—**मिथ्यात्वं नामेति।** निवर्त्यत्वमित्युक्ते मुद्गरादिनिवर्त्यघटादावतिव्याप्तिः, तत्परिहाराय ज्ञानशब्दः। तावतापि शक्तिमदीश्वरादिसंकल्परूपज्ञाननिवर्त्ये वस्तुन्यतिव्याप्तिः, सापि यथावस्थितवस्तुज्ञानमात्रनिवर्त्यत्वस्य विवक्षितत्वात् परिहृता भवति। प्रबलभ्रान्तिज्ञाननिवर्त्यसत्यरजतादिष्वतिव्याप्तिपरिहाराय **यथावस्थित**शब्दः। यथावस्थितज्ञाननिवर्त्यमित्युक्ते समानाधिकरणधीर्जायेत तदा भ्रान्तिज्ञाननिवर्त्ये व्यभिचारस्तदवस्थः; तत्र ज्ञानस्वरूपं हि यथावस्थितं, विषयस्यैव ह्ययथार्थत्वम्, अतो यथावस्थितज्ञानमिति सामानाधिकरण्यशङ्काव्यावृत्त्यर्थं **यथावस्थितवस्तुज्ञाननिवर्त्यत्व**मित्युक्तम्। ज्ञानप्रागभावे व्यभिचार इति तद्व्युदासार्थं **प्रतीयमानत्वपूर्वक**पदम्। ज्ञानप्रागभावोपि कदाचित् प्रतीयमानत्वपूर्वको निवर्त्यत इति—चेन्न; नियमस्य विवक्षितत्वात्। यथा 'सिद्धे शब्दार्थसंबन्ध' इत्यत्र सिद्धे एवेत्यवधारणस्य विवक्षितत्वान्नित्यत्वसिद्धिः, यथा 'अब्भक्षो वायुभक्ष' इत्यादौ अप एव भक्षयतीत्यवधारणसिद्धिः, तद्वत्। भूदलनज्ञाननिवर्त्यस्य रज्जुसर्पस्य यथावस्थितवस्तुज्ञाननिवर्त्यलाभावादव्याप्तिरिति चेन्न; तस्यापि यथावस्थितवस्तुज्ञानेन निवर्तयितुं योग्यत्वात्, अत एव हि निवर्त्यत्वमित्युक्तं, न तु निवृत्तत्वमिति ॥

नच—सर्पभ्रमजनिते रज्जुधीनिवर्त्ये परमार्थभूते भयेऽतिव्याप्तिः—इति वाच्यं: भयस्य क्षणिकतया स्वयमेव निवृत्तस्य रज्जुज्ञाननिवर्त्यत्वाभावात्, रज्जुज्ञानं ह्युत्तरभयोत्पत्ति प्रतिबध्नाति। अतः प्रतीयमानत्वनियमपूर्वकयथाऽवस्थितवस्तुगोचरज्ञानमात्रनिवर्तनीयत्वं मिथ्यात्वमित्यर्थः। अनेन लक्षणेन सदसद्वैलक्षण्यं फलितम्। तत्र प्रतीयमानत्वपूर्वकेत्यसद्व्यावृत्तिः, शेषेण सद्व्यावृत्तिः। अस्य मिथ्यात्वलक्षणस्य संप्रतिपन्नमिथ्याभूतेष्वनवगतत्वं दर्शयति—**यथेति**। अथोक्तलक्षणस्य पक्षेऽतिदेशे कर्तुमुचितेऽपि स्वप्रकाशे वस्तुन्यध्यासानुपपत्तिरूपद्वितीयं चोद्यं परिहर्तुमाह—**दोषवशाद्धि तत्र तत्कल्पनमिति।** अजडत्वज्जडत्वमपि नाध्यासप्रयोजकं; जडेऽपि दोषाभावे सत्यध्यासादर्शनात्, अतो दोष एव हि सर्वत्र कल्पकः। कल्पने दोषवशाधीने स्वतः परतो वा प्रकाशो भ्रमाधिष्ठानत्वोपयोगी, पुरोवर्तिनि भासमाने हि रजतभ्रमः। इति दार्ष्टान्तिके परिहर्तुं

१ द्वैतमिथ्यात्वद°। २ स्वप्रकाशवस्तुनो।

देवतिर्यङ्मनुष्यस्थावरादिभेदं सर्वं जगद्यथावस्थितब्रह्मस्वरूपावबोधबाध्यं मिथ्यारूपम् । दोषश्च स्वरूपतिरोधानविविधविचित्रविक्षेपकरी सदसदनिर्वचनीयानाद्यविद्या । **'अनृतेन हि प्रत्यूढाः'** (छा.८।३।२), **'तेषां सत्यानां सतामनृतमपिधानम्'** (छा. ८।३।१), **'नासदासीन्नो सदासीत्तदानीम् । तम आसीत्तमसा गूढमग्रे प्रकेतम्'** (तै. ब्रा. २।८।९), **'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्'** (श्वे. ४।१०), **'इन्द्रो मायाभिः पुरुरूप ईयते'** (बृ. २।५।१९), **'मम माया दुरत्यया'** (गी. ७।१४), **'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते'** (गौ. पा. का. १।१६) इत्यादिभिर्निर्विशेषचिन्मात्रं ब्रह्मैवानाद्यविद्यया सदसदनिर्वाच्यया तिरोहितस्वरूपं स्वगतनानात्वं पश्यतीत्यवगम्यते । यथोक्तम्—**'ज्ञानस्वरूपो भगवान्यतोसावशेषमूर्तिर्न तु वस्तुभूतः । ततो हि शैलाब्धिधरादिभेदान् जानीहि विज्ञानविजृम्भितानि ॥ यदा तु शुद्धं निजरूपि सर्वकर्मक्षये**

दृष्टान्ते कल्पनस्य दोषाधीनत्वमुक्तम् ॥ इत्थं प्रतीयमानत्वपूर्वकं यथावस्थितवस्तुज्ञाननिवर्त्यत्वं मिथ्यात्वं, मिथ्याभूतार्थकल्पनं च दोषवशादिति दृष्टान्ते शिक्षितमर्थद्वयं दार्ष्टान्तिकेऽतिदिशच्छङ्काद्वयं चार्थान्निराकरोति—**एवमिति** । अत्यन्तवैसादृश्यरहितकतिपयाध्यास एकाधिष्ठाने दृष्टः, यथा सर्पभूदलनाम्बुधाराद्यध्यासो रज्जुमात्रे, कथमेकस्मिन्नधिष्ठाने युगपन्मिथोऽत्यन्तविसदृशानन्तप्रपञ्चाध्यास—इत्येका शङ्का, यः सर्वज्ञ इत्यादिषु सर्वज्ञतादिगुणकत्वेन प्रतीते ब्रह्मणि कथं बाध्यास—इति द्वितीया । **चिन्मात्रवपुषीत्यनेन** पूर्वोक्तां स्वयंप्रकाशत्वकृतामध्यासानुपपत्तिं स्फोरयति—**परे ब्रह्मणीति** । शङ्काद्वयं परिहृतं भवति; विलक्षणाधिष्ठानत्वात् कृत्स्नाध्यास उपपन्न इति । वैलक्षण्यं च सर्वसाधारणसन्मात्ररूपत्वम् । सर्वज्ञत्वादिगुणा अपरे ब्रह्मणि, परे ब्रह्मणि तु चिन्मात्ररूपतया सर्वज्ञत्वादिगुणानन्वयादध्यास उपपन्न इति चाभिप्रायः । **इदमिति** प्रतीयमानताकारपरामर्शेना पदेन, **यथावस्थितब्रह्मस्वरूपावबोधबाध्यमिति** पदेन च पूर्वोक्तमिथ्यात्वलक्षणमनूदितं भवति । **दोषपरिकल्पितमित्यनेन दोषवशादित्यादिनोक्तमतिदिष्टम्** । विविधकृत्स्नाध्यासं दर्शयति—**देवेति** । **मिथ्यारूपं** मिथ्यात्वलक्षणोपेतत्वात् रज्जुसर्पवन्मिथ्येत्युक्तं भवति । दोषः कः—स किं परमार्थः, उतापरमार्थः । परमार्थत्वे, ज्ञाननिवर्त्यत्वं न स्यात् । अपरमार्थत्वे, प्रपञ्चवत् कल्पकान्तरापेक्षायामनवस्था स्यात् । स किं ब्रह्मण्यतिरोहिते कल्पयति, उत तिरोहिते । अतिरोहिते चेदनुपपन्नः; रज्जुत्वे प्रकाशमान इवाध्यासोदयविरोधात् । अविरोधे पश्चादप्यनिवृत्तिः । तिरोहिते चेत्—तिरोधानं किं स्वतः, किं वा परतः । यदि स्वतः, अनिवर्त्यत्वं, निवृत्तौ स्वरूपोच्छेदो वा । यदि परतः, तत्परं वाच्यम् । किं च—नानाध्यासानां नानादोषमूलत्वं दृष्टम्, अतोऽनेकदोषा अभ्युपगन्तव्या—इतीमाः शङ्काः परिहर्तुमाह—**दोषश्चेति** । **चः** शङ्कानिवर्तकः । **को दोष** इत्यस्य प्रतिवचनम् **अविद्येति** । तस्याः पारमार्थ्यापारमार्थ्यविकल्पे, **सदसदनिर्वचनीयेत्यपारमार्थ्याभ्युपगमः** । अनवस्थापरिहारः—**अनादीति** । तिरोहितातिरोहितविकल्पस्य प्रतिवचनं **स्वरूपतिरोधान**शब्देन । तच्च किं—स्वतः, परत इत्यत्र परत इत्यङ्गीकृतं; तिरोधानस्य हेतुनिर्देशात् । नानाध्यासस्यैकदोषमूलत्वमुक्तं—**विविधेत्यादिना** । **विक्षेपोऽध्यासः** । आच्छादिकाऽविद्या, विक्षेपिकाऽविद्येत्यविद्याया एकस्या एवावस्थाद्वयं तदभिमतं तिरोधानविक्षेपहेतुत्ववचनात् सूचितम् ॥

एवंभूतामविद्यां प्रतिज्ञाय, एतदनुगुणं प्रमाणमाह—**अनृतेनेत्यादिना** । **प्रत्यूढाः** प्रतीपं नीताः । **प्रत्यूढ**शब्दवैशद्यार्थमुपादत्ते—**तेषामिति** । नात्र बहुवचने तात्पर्यम् 'अदितिः पाशान् प्रमुमोक्ष्ये'तिवत् । अस्याः सदसदनिर्वचनीयत्वमुच्यते—**नासदासीन्नोसदासीदिति** । किमासीदित्यत्राह—**तम आसीदिति** । **तमः**शब्देनाच्छादकत्वं विवक्षितम् । तमो नामाऽक्षरं तमसि लीयत' इति प्रकृतिरुच्यत इति शङ्कायामुदाहरति—**मायां तु प्रकृतिमिति** । विविधाध्यासहेतुत्वं दर्शयति—**इन्द्रो मायाभिरिति** । अस्या ऐक्यज्ञानेन विना अनिवर्त्यत्वमाह—**ममेति** । अनादित्वमाह—**अनादीति** । अत्रेक्षितव्यसापेक्षमहेश्वरत्वेन्द्रत्वबहुवचनश्रवणाद्विजातीयसजातीयस्वगतभेदसाहित्यं प्रतिपन्नमिति तदपनुत्तये व्याचष्टे—**निर्विशेषेति** । सगुणत्वे प्रतिपन्नेऽपि स्वरूपपरवाक्यानुगुण्याद्दोषप्रतिपादनतत्पराणां वाक्यानां न प्रतिपन्नभेदे तात्पर्यमिति भावः । **ब्रह्मैव** इन्द्रादिशब्देन प्रतिपन्नमपि स्वरूपपरवाक्योपदिष्टं ब्रह्मैवेति भावः । अनादित्व-सदसदनिर्वचनीयत्व-तिरोधायकत्व-विविधाध्यासकरत्वान्युपात्ततत्तद्वाक्यप्रतिपन्नान्याह—**अनाद्यविद्ययेत्यादिना** । **स्वगत**शब्देनाधिष्ठानतया संबन्धो विवक्षितः, न तु सजातीयविजातीयसहपठितस्वगतनानात्वम् । **एवं** दोषवाचिवाक्यगतमिन्द्र-महेश्वरादिपदजातमर्थस्वारस्येन स्वरूपपरवाक्यप्राबल्यान्निर्विशेषवस्तुपरं व्याख्यातम्, अथ दोषवाचिभिरेवोपबृंहणवाक्यैर्निर्विशेषस्य वस्तुन एव दोषसंबन्धित्वमुक्तमिति दर्शयति—**यथोक्तमिति** । चिन्मात्रब्रह्मणो ज्ञानविजृम्भितत्वं जगतः प्रतिज्ञायते—**ज्ञानस्वरूप इति** । **न वस्तुभूतः** वक्ष्यमाणशैलाब्धिधरादिवस्तुभूतो न भवतीत्यर्थः । **विज्ञानविजृम्भितानीति** । **विज्ञान-**

ज्ञानमपास्तदोषम् । तदा हि संकल्पतरोः फलानि भवन्ति नो वस्तुषु वस्तुभेदाः ॥' (वि. पु. २।१२।३९-४०), **'तस्मान्न विज्ञानमृतेस्ति किंचित्कचित्कदाद्विज वस्तुजातम् । विज्ञानमेकं निजकर्मभेदविभिन्नचित्तैर्बहुधाभ्युपेतम् ॥ ज्ञानं विशुद्धं विमलं विशोकमशेषलोभादिनिरस्तसङ्गम् । एकं सदैकं परमः परेशः स वासुदेवो न यतोन्यदस्ति ॥ सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत् । एतत्तु यत्संव्यवहारभूतं तत्रापि चोक्तं भुवनाश्रितं ते ॥'** (वि. पु. २।१२।४३-४४-४५) इति । अस्याश्चाविद्याया निर्विशेषचिन्मात्रब्रह्मात्मैकत्वविज्ञानेन निवृत्तिं वदन्ति— **'न पुनर्मृत्यवे तदेकं पश्यति । न पश्यो मृत्युं पश्यति'** (छा. ७।२६।२), **'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोभयं गतो भवति'** (तै. २।७।१) **'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥'** (मु. २।२।८), **'ब्रह्म वेद ब्रह्मैव भवति'** (मु. ३।२।९), **'तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेयनाय'** (श्वे. ३।८) इत्याद्याः श्रुतयः । अत्र मृत्युशब्देनाविद्यामिधीयते, यथा सनत्सुजातवचनम्—**'मोहो वै मृत्युः संमतो यः कवीना'मिति, 'प्रमादं वै मृत्युमहं ब्रवीमि । सदाप्रमा-**

शब्देन विविधं ज्ञायतेऽनेनेति करणव्युत्पत्त्याऽविद्याऽभिधीयते । प्रतिज्ञातं प्रपञ्चस्याविद्याकल्पितत्वं व्यतिरेकमुखेनोपपादयति—**यदेति । शुद्धम्** अविद्यारहितम् । **निजरूपि** भेददर्शनरहितं, तन्निमित्तकर्मक्षये अपास्तरागादिदोषम् । समन्तात् कल्प्यतेऽनेनेति **संकल्पः—अविद्या । वस्तुषु** धर्मिभूतपदार्थेषु । **वस्तुभेदाः** देवाद्याकारभेदाः । मध्ये **वस्त्वस्ति किं, मही घटत्वमिति** श्लोकद्वयं जगदुपलब्धिप्रकारेण वस्तुभेदासत्यलोपपादकलेनोपपाद्य प्रमेयाधिक्याभावादत्रानुपात्तं, तच्च सिद्धान्ते दर्शयिष्यते । विजातीयभेदाभावमुपसंहरति—**तस्मादिति** पूर्वार्धेन ॥

अथात्मबहुत्वस्य काल्पनिकत्वमुच्यते—**विज्ञानमि**त्यर्धेन । पूर्वोक्तमात्मैक्य**मेकं, सदैक**मित्यत्र **एक**शब्देनानूद्य स्वगतनानात्वं निषिध्य परमंपरेशादिशब्दानामपि वस्तुमात्रपरत्वं प्रतिपादयति—**ज्ञानमिति । विशुद्ध**मित्यादिपदैरविद्याराहित्यं, तत्कृतभेददर्शनवैधुर्यं, तन्मूलशोकलोभादिविधुरता चोच्यते । **सदैकं** जन्मवृद्ध्यादिरहितम् । **यतोन्यन्नास्ति** तद्यथोक्तस्वरूपमित्यर्थः । एतन्न परमतमित्याह—**सद्भाव इति** । एत**द्भुवनाश्रितं** भुवनेनाधिष्ठानतयाऽऽश्रितं ज्ञानम् । **संव्यवहारभूतं** समन्ताद्व्यवहारविषयभूतं यद्वर्तते तत्रापि कारणमविद्येत्युक्तम् । तच्च न परमतं सद्भाव एवोच्यत इत्यर्थः ॥

एवं सिद्धपरवाक्यपर्यालोचनया ब्रह्मण एव सत्यत्वं, व्यतिरिक्तस्याविद्यापरिकल्पितत्वं च तत्त्वमित्युक्तम् । ततः **किं प्रस्तु**तस्य कर्माङ्गकल्यानर्हवाक्यार्थज्ञाने मोक्षोपायत्वमेयेति शङ्कायामुपायपरवाक्यानामपि सिद्धपरवाक्यप्रतिपन्नार्थानुगुणोपायपरत्वमाह—**अस्या इति । चः** शङ्कानिवर्तकः । **अस्या** इत्यनेन सदसदनिर्वचनीयत्वादिविशेषणविशिष्टता विवक्षिता । तस्या निवृत्तौ प्रमाणं दर्शयति—**न पुनरिति । मृत्यु**रत्राविद्या तन्निवृत्तिश्चैक्यज्ञानादित्याह—**तदेकं पश्यतीति** । मृत्युकार्यस्य रोगादेरपि निवृत्तिं ज्ञापयति—**न पश्यो मृत्युमिति** । 'न रोगं नोत दुःखता'मिति तच्छेषः । निर्विशेषवस्तुज्ञानानन्तरमेवाभयप्राप्तिं दर्शयति—**यदा हीति । अदृश्ये** प्रत्यक्षाद्यविषये । **अनात्म्ये** आत्म्यं व्याप्यं अशरीरं शरीरे । **अनिरुक्ते** अनिर्वचनीये । **अनिलयने** अनाधारे । **अभयम्** अभयार्थम् । अव्ययीभावसमासः । प्रतिष्ठानिष्ठावादिभिर्बन्धमूलत्वेनाभ्युपगतस्य कर्मणोऽप्यविद्याकल्पितत्वात् तस्यापि ज्ञानेन निवृत्तिमाह—**भिद्यत इति । हृदयग्रन्थि**रविद्या । पूर्ववाक्येषु किंचिद्भेदः प्रतीत[1] इव भवतीति तद्व्यावृत्तये ज्ञानस्य ऐक्यविषयत्वज्ञापनाय ऐक्यापत्तिं फलं दर्शयति—**ब्रह्म वेदेति ।** यथोपासनं हि फलम्, अत ऐक्यज्ञानमेव बन्धनिवर्तकमिति भावः । उपायान्तरनिषेधार्थमुदाहरति—**तमेवेति** । नात्राविद्यानिवृत्तिः प्रतीयते तद्वाचिशब्दाश्रवणादित्याह—**अत्रेति** । 'मृत्युर्धावति पञ्चम' इत्यादेर्मृत्युशब्दस्य यमादिषु प्रयोगदर्शनात्तद्व्यावृत्त्यर्थमुक्त**मत्रेति । बन्ध**निवृत्तिपरवाक्येष्वित्यर्थः । तत्र प्रयोगं दर्शयति । **यथेति । प्रमादं वै** इति वचनात् पूर्वत्र 'मोहो मृत्युः संमतो यः कवीना'मित्युक्तम् । **मोहो** विपरीतज्ञानं तन्मृत्युरिति परमतम्, सनत्सुजातस्य तु प्रमादो मृत्युर्मतः । **प्रमादो** यथावदप्रतिपत्तिः । स्वरूपाग्रहणे हि अन्यथा प्रतिपत्तिः, तस्मान्मोहस्यापि हेतुरात्मन्यनवधानरूपः प्रमाद इति तद्धेतुभूताविद्यैव **प्रमाद**शब्देन विवक्षितेति सैव मृत्युरित्यभिप्रायः । उपात्तेषु वाक्येषु ज्ञानस्याविद्यानिवर्तकत्वं

१ °स्यापि वावि° । २ सिद्धान्तः । ३ प्रतीयत इव भातीति ।

दममृतत्वं ब्रवीमि' (स. १।४) इति। 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २।१।१), 'विज्ञानमानन्दं ब्रह्म' (बृ. ३।९।२८) इत्यादिशोधकवाक्यावसेयनिर्विशेषचिन्मात्रस्वरूपब्रह्मात्मैकत्वविज्ञानं च 'अथ योन्यां देवतामुपास्ते अन्योसावन्योहमस्मीति न स वेद' (बृ. १।४।१०)। 'अकृत्स्नो ह्येषः, आत्मेत्येवोपासीत' (बृ. १।४।७)। 'तत्त्वमसि' (छा. ६।८।७)। 'त्वं[1] वाहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते' (जा.)। 'तद्योहं सोसौ योसौ सोहम्' (ऐ.) इत्यादि वाक्यसिद्धम्। वक्ष्यति चैतदेव 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च (ब्र. सू. ४।१।३) इति। तथा चाहु वाक्यकारः—'आत्मेत्येव तु गृह्णीयात्सर्वस्य तन्निष्पत्तेः' (वाक्यं) इति। अनेन च ब्रह्मात्मैकत्वविज्ञानेन मिथ्यारूपस्य सकारणस्य बन्धस्य निवृत्तिरुक्ता। ननु च—सकलभेदनिवृत्तिः प्रत्यक्षविरुद्धा कथमिव शास्त्रार्थजन्यविज्ञानेन क्रियते, कथं वा रज्जुरेषा न सर्प इति ज्ञानेन प्रत्यक्षविरुद्धा सर्पनिवृत्तिः क्रियते। तत्र द्वयोः प्रत्यक्षयोर्विरोध इह तु प्रत्यक्षमूलस्य शास्त्रस्य, प्रत्यक्षस्य चेति चेत्—तुल्ययोर्विरोधे कथं वाध्यबाधकभावः?। पूर्वोत्तरयोर्दुष्टकारणजन्यत्वतदभावाभ्यामिति चेत्—शास्त्रप्रत्यक्षयोरपि समानमेतत्। एतदुक्तं भवति—बाध्यबाधकभावे तुल्यत्व-सापेक्षत्व-निरपेक्षत्वादि न

प्रतिपन्नं, ब्रह्मणो निर्विशेषचिन्मात्रत्वं, तेनात्मन एकत्वविज्ञानं निवर्तकमिति च न प्रतिपन्नमित्यत्राह—**सत्यं ज्ञानमिति**। सत्यज्ञानादिवैवाक्यं सर्वतो व्यावृत्तलप्रदर्शनार्थमुपात्तम्। पुरुषार्थलायासुखाद्यावृत्तिज्ञापनार्थमुपात्तं—**विज्ञानमानन्दमिति**। **आदि**शब्देनास्थूलमित्यादि गृह्यते॥

एवं ब्रह्मणो निर्विशेषत्वे शोधकवाक्यान्युदाहृतानि, अथ ब्रह्मैक्यप्रतिपत्तौ श्रुतिमुपादत्ते—**अथ य इति**। 'अथ योऽन्या'मित्यैक्योपासनविधिर्भेदवासनानिरासार्थः। विहितोपासनस्यैक्यविषयतां ज्ञापयितुमैक्योपदेशं दर्शयति—**तत्त्वमसीति**। उपदेशानुगुणमुपासको देवतां प्रत्याह—**त्वं वेति**। उपदिष्टार्थमात्मन्यनुसंधत्ते—**तद्योऽहमिति**। अस्यार्थस्य श्रुतिविवक्षितत्वसिद्धये सूत्रं दर्शयति—**वक्ष्यति चेति**। 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' आत्मेत्येवोपासीत, तथाह्युपगच्छन्ति मुमुक्षव उपासन इत्यर्थः। **ग्राहयन्ति च** ज्ञापयन्ति च तथा शास्त्राणि। सूत्रकाराभिप्रायविदां वाक्यं दर्शयति—**तथा चेति**। तन्निष्पत्तेस्तत्र कल्पितत्वादित्यर्थः। न केवलं श्रुतिस्तदनुग्राहकतर्कोऽप्यस्तीत्याह—**अनेन चेति। चः** समुच्चये। कर्मनिरपेक्षज्ञाननिवर्त्यलायाह—**मिथ्यारूपस्येति**। हेतुत्वं गर्भितम्। **सकारणस्या**विद्याभेददर्शनसहितस्य **बन्धस्य निवृत्तिर्युक्ता**; न हि मिथ्यासर्पनिवृत्तौ नायं सर्पो रज्जुरेषेति ज्ञानादृते कर्मापेक्षेति भावः। अथानुमानागमयोर्व्याप्रहणलिङ्गदर्शनधर्मिप्रतिपत्त्यर्थं व्युत्पत्त्यर्थं च प्रत्यक्षसापेक्षत्वा'दनुष्णोऽग्निर्द्रव्यत्वात्, आदित्यो यूपः, यजमानः प्रस्तर' इत्यादिषु अनुमानागमौ प्रत्यक्षविरुद्धार्थप्रतिपादनाशक्तौ दृष्टौ, तस्मान्न प्रत्यक्षविरुद्धार्थप्रतिपादनक्षमा श्रुतिरित्यभिप्रायेण **भेदवादी** चोदयति—**ननु चेति**। श्रुतिवाक्येष्ववान्तरचोद्येषु परिहृतेष्विदमपि चोद्यमस्तीति **चा**र्थः। स्वाप्रादिषु, सर्पभूदलनादिषु च कतिपयभेदनिवृत्तिर्दृष्टा तद्व्यावृत्त्यर्थः **सकल**शब्दः। अत्र किं प्रत्यक्षत्वान्न बाध्यत्वम्, उत परोक्षत्वान्मूलिलाच्च न बाधकत्वम् इति शङ्काद्वयं हृदि निधाय प्रथमं प्रत्यक्षत्वादबाध्यत्वमित्येतत्परिहरति।—**कथं वेति**। स तु प्रत्यक्षाभास इति—चेन्न; प्रतीतिदशायामाभासत्वानवगमात्। पश्चात्प्रमाणबाधेन ज्ञायत इति चेत्, तत् प्रपञ्चग्राहिप्रत्यक्षस्यापि तुल्यम्। भेदस्य श्रुतिबाधादित्येतदत्रामिप्रेतम्। मूलिलात्, परोक्षत्वाच्च न बाधकं शास्त्रमिति शङ्कते—**तत्रेति। इहत्विति**। तुल्यत्वव्यावृत्तये **तु**शब्दः। **प्रत्यक्षमूलस्येति**। मूलिलान्न शास्त्रं बाधकमिति भावः। **शास्त्रस्येति**। परोक्षत्वान्न बाधकमिति भावः। **तुल्यत्वे** प्रयोजके सति बाध्यबाधकभावो विपर्ययेणापि स्यादिति तदप्रयोजकम्, अतस्तत्र बाध्यबाधकभावे प्रयोजकान्तरं त्वया वक्तव्यं तदेवास्माकमपि प्रयोजकमित्यभिप्रायेणाह—**तुल्ययोरिति**। बाध्यबाधकभावानियमव्यावृत्तये भेदवादीमितत्वेन **प्रयोजकान्तरं** शङ्कते—**पूर्वोत्तरयोरिति**। पूर्वोत्तरयोर्बाध्यबाधकयोस्त्वदुक्तं प्रयोजकमत्रापि तुल्यमित्याह—**शास्त्रेति**। मूलमूलिलादिसद्भावे मूलस्य प्रत्यक्षस्य बाधकत्वमितरस्य बाध्यत्वं च दृष्टम्, अतो मूलमूलिल-परोक्षत्वापरोक्षत्वादिवैषम्याराहित्वे सति दुष्टकारणजन्यत्व-तदभावौ बाध्यबाधकभावे प्रयोजकाविति शङ्कायामाह—**एतदुक्तमिति। तुल्यत्वे** सति दुष्टकारणजन्यत्व-तदभावावप्रयोजकावित्यभिप्रायेण **तुल्य**शब्दः प्रयुक्तः। विशिष्टस्य हेतुत्वे विशेषांशस्यापि हेतुत्वात्तुल्यशब्देनैकदेशोपादानम्। दुष्टकारणजन्यत्वतदभावविशेषणीभूतं तुल्यत्वं विवक्षितम्। **तुल्यत्वे सति विपरीतप्राबल्यदौर्बल्यैककारणभावे सति, दुष्टकारणजन्यत्व-तदभावौ** न प्रयोजकावित्यर्थः। **सापेक्षत्वं, निरपेक्षत्वं** मूलमू-

---

१ त्वं चाहं। २ °सर्ववाक्यव्याकृ°। ३ °बाधा°।

कारणम् ; ज्वालाभेदानुमानेन प्रत्यक्षोपमर्दायोगात्, तत्र हि ज्वालैक्यं प्रत्यक्षेणावगम्यते । एवं सति द्वयोः प्रमाणयोर्विरोधे यत्संभाव्यमानान्यथासिद्धि तद्बाध्यम्, अनन्यथासिद्धमनवकाशमितरद्बाधकमिति-सर्वत्र बाध्यबाधकभावनिर्णय इति । तस्मादनादिनिधनाविच्छिन्नसंप्रदायासंभाव्यमानदोषगन्धानवकाश-शास्त्रजन्यनिर्विशेष-नित्य-शुद्ध-मुक्त-बुद्ध-स्वप्रकाश-चिन्मात्र-ब्रह्मात्मभावाववोधेन संभाव्यमानदोषसावका-शप्रत्यक्षादिसिद्धविविधविकल्परूपबन्धनिवृत्तिर्युक्तैव । संभाव्यते च विविधविकल्पभेदप्रपञ्चग्राहिप्रत्यक्ष-स्यानादिभेदवासनादिरूपाविद्याख्यो दोषः । ननु—अनादिनिधनाविच्छिन्नसंप्रदायतया निर्दोषस्यापि

लिभावः । आदिशब्देन परोक्षापरोक्षभावविलम्बाविलम्बा विवक्षिताः; श्रुतिलिङ्गादिषु विलम्बाविलम्बाभ्यां हि प्राबल्यदौर्बल्ये । यद्वा, अप्रयोजकत्वेनोक्तं तुल्यत्वं दृष्टान्ततयाऽनूदितम् । वैषम्यान्तराभावे सति दुष्टकारणजन्यत्व-तदभावावप्यादिशब्देन विवक्षितौ । एतेषामप्रयोजकत्वमेकेन दृष्टान्तेनोपपादयति—ज्वालेति । अन्यथेत्यध्याहर्तव्यम् । प्रत्यक्षोपमर्दायोगा-दिति । अयोगप्रसङ्गादित्यर्थः । ज्वालाभेदानुमाने हि मूलमूलिभावोऽस्ति, विलम्बाविलम्बौ च प्रत्यक्षसापेक्षत्वादनुमानस्य । तुल्यत्वे सति दुष्टकारणजन्यत्व-तदभावयोः प्रयोजकत्वमप्यनेन व्युदस्तं भवति; तद्राहित्येपि बाध्यबाधकभावदर्शनात् । तत्र किंविषयं प्रत्यक्षं बाध्यमित्यत्राह—तत्र हीति । ऐक्यग्राहिप्रत्यक्षं बाध्यमित्यर्थः । तर्हि किं प्रयोजकमित्यत्राह—एवं चेति । तुल्यत्वादीनां प्रयोजकत्वेऽनुपपन्ने सति । द्वयोरिति । प्रत्यक्षयोः—अनुमानयोः—आगमयोः—प्रत्यक्षानुमानयोः—आगमानु-मानयोः—प्रत्यक्षागमयोर्वा इत्यर्थः ॥

यत्संभाव्यमानान्यथासिद्धीति । सावकाशत्वादन्यथासिद्धमित्यर्थः; अनन्तरमनन्यथासिद्धमनवकाशमित्युक्तेः । विषयान्तरलाभोऽप्रमाणकोटिनिवेशो वा सावकाशत्वम् । तेन स्वोपस्थापितार्थविषयप्रामाण्यं विनापि संभावितोदयत्वमन्यथा-सिद्धत्वं, विरुद्धार्थप्रमाणाबाधेनापि संभवदुदयत्वमिति यावत् । अनन्यथासिद्धमनवकाशमिति । अनन्यथासिद्धत्वं नाम तदर्थप्रमाणतां विनाऽनुदयत्वं, विरुद्धार्थप्रमाणाबाधेनानुदयत्वमिति यावत् । तच्चानवकाशत्वात् । अनवकाशत्वं नाम विषया-न्तरालाभोऽप्रमाणकोटिनिवेशाभावो वा । अप्रमाणकोट्यनन्तर्भाव—विषयान्तरलाभाभ्यां विरुद्धार्थोपस्थापकप्रमाणाबाधेनानुद-यत्वमित्यर्थः । इति सर्वत्र उक्तप्रकारेण सजातीययोर्विजातीययोर्वा प्रमाणयोर्विरोध इत्यर्थः । एवं बाध्यबाधकभावे प्रयोजक-मस्तु ततः किं प्रस्तुतशास्त्रप्राबल्यस्येत्यत्राह—तस्मादिति । तस्मात् अन्यथासिद्धत्वानन्यथासिद्धत्वयोरेव बाध्यबाधकभावे प्रयोजकत्वात् । अनादिनिधनाविच्छिन्नसंप्रदायेति । अविच्छिन्नसंप्रदायत्वादनादिनिधनम् । संप्रदायाविच्छेदे सति अस्मर्यमाणकर्तृकत्वं ह्यपौरुषेयत्वसाधकम् । 'अनादिनिधना ह्येषा वागुत्सृष्टा स्वयंभुवा । आर्षं वेदमयी दिव्या यतः सर्वाः प्रसूतयः, अनादि निधनं ब्रह्मे'त्यादिवचनानि चानादिनिधनशब्देन स्मारितानि, अत एवासंभाव्यमानदोषगन्धं; पौरुषेयत्वप्रयुक्तं हि भ्रमविप्रलिप्साप्रमादाशक्तिरूपदोषचतुष्टयवत्त्वम् । अत एवानवकाशम् । शास्त्रजन्यशब्दस्यावबोधशब्देनान्वयः । बाध्य-बाधकभावाङ्गीकारस्य विरोधसापेक्षत्वाद्विरोधं दर्शयति—निर्विशेषेत्यादिना । नित्यं कालापरिच्छिन्नम् । शुद्धम् अविद्यारहितम् । अत एव मुक्तशब्दोऽविद्याकृतजन्मादिराहित्यपरः । बुद्धम् भासमानम् । स्वप्रकाशशब्दः पूर्वं बुद्धशब्दोक्तभासमानत्वस्य पराधीनत्वव्युदासार्थः । स्वयमेव प्रकाशस्वभावत्वं स्वप्रकाशत्वं, तच्च चिन्मात्रशब्दवाच्य-त्वात् । स्वयंप्रकाशत्वं हि चित्त्वं, चित्स्वरूपत्वं च श्रुतिसिद्धम् । मात्रशब्दो ज्ञेयत्वव्युदासपरः । ब्रह्मात्मभावाववोधेन एवंभूतस्य ब्रह्मणः स्वस्य चैक्यावबोधेनेत्यर्थः । संभाव्यमानेति । संभाव्यमानदोषत्वात् सावकाशं अप्रमाणकोटौ लब्ध-निवेशम् । अत एवान्यथासिद्धत्वमपि फलितम् । अन्यथासिद्धत्वं विपरीतप्रमाणमबाधित्वाप्युदयसंभवः । प्रत्यक्षादीत्ति। आदिशब्दादनुमानादिकमुच्यते । विविधेति। देवादिरूपेण, स्वकार्यजन्मजरामरणादिरूपेण च विविधो ज्ञातृज्ञेयादिविकल्पः, स एव बन्धस्तन्निवृत्तिरित्यर्थः । संभाव्यमानदोषश्च क इत्यत्राह—संभाव्यते चेति । भेदप्रपञ्चो भेदसमुदायः, यद्वा भेदरूपः प्रपञ्चः । विविधविकल्पशब्दः प्रपञ्चविशेषणं, भेदविशेशणं वा । भेदो ज्ञातृज्ञेयादिः, स च ब्राह्मणादिरूपेण विविधः, देवमनुष्यादिरूपेण विकल्पवान् । अर्वाचीनाः केचित्काचतिमिरादिकं दोषमाचक्षते—तदयुक्तं; तस्य क्वाचित्कत्वात् । काचा-दिदुष्टं प्रत्यक्षं सपक्षीकृत्य व्यतिरिक्तस्य काचादिदुष्टत्वमनुमीयत इति—चेन्न; अतिप्रसङ्गात् । अनादिनिधनत्वेन यच्छा-स्त्रमुक्तं तस्यापि शब्दत्वादित्यादिना दुष्टकर्तृकत्वानुमानं हि सुशकम् । तत्र कर्ता योग्यानुपलम्भनिरस्त इति चेत्, तद-त्रापि तुल्यमिति काचादेर्दोषत्वकल्पनाऽनुपपत्त्या तद्व्यावृत्त्यर्थमाह—अनादीत्यादिना । भेदवासनादिरूपा —आदिशब्देन भेदवासनाहेतुभूतं भेददर्शनं विवक्षितम् । अनयोर्हेतुहेतुमद्भावादन्योन्याश्रयपरिहाराय अनादिशब्दः । बीजाङ्कुरन्यायादिति भावः । भेददर्शनं, भेदवासना च हि कार्याविद्या, अत उक्तं—भेदवासनादिरूपाविद्येति ।

---

१ °लाभाभावाभ्यां ।

शास्त्रस्य ज्योतिष्टोमेन स्वर्गकामो यजेतेत्येवमादेर्भेदावलम्बिनो बाध्यत्वं प्रसज्येत, सत्यम्; पूर्वापरापच्छेदे पूर्वशास्त्रवन्मोक्षशास्त्रस्य निरवकाशत्वात्तेन बाध्यत एव । वेदान्तवाक्येष्वपि सगुणब्रह्मोपासनपराणां शास्त्राणामयमेव न्यायः; निर्गुणत्वात्परस्य ब्रह्मणः । ननु च **'यः सर्वज्ञः सर्ववित्'** (मु. १।१।९), **'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च'** (श्वे. ६।८), **'सत्यकामः सत्यसंकल्पः'** (छा. ८।१।५) इत्यादिब्रह्मस्वरूपप्रतिपादनपराणां कथं बाध्यत्वं; निर्गुणवाक्यसामर्थ्यादिति ब्रूमः । एतदुक्तं भवति—**'अस्थूलमनण्वह्रस्वम्'** (बृ. ३।८।८), **'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै. २।१।१), **'निर्गुणम्'** (चू. ७।२), **'निरञ्जनम्'** (श्वे. ६।१९) इत्यादिवाक्यानि निरस्तसमस्त-

---

'आदित्यो यूप' इत्यादिषु यूपादित्यैक्यादिप्रतिपादनं न प्रत्यक्षविरोधात्, किं त्वन्यपरत्वात्; 'यत्परः शब्दः स शब्दार्थ' इति हि न्यायविदः । अन्यपरत्वं च तात्पर्यलिङ्गाभावादवगम्यते । 'आदित्यो यूप' इति वाक्यं यूपाञ्जनविधिशेषत्वादन्यपरमिति परस्यामिप्रायः ॥

यन्निर्दोषमुक्तं तत्रापि बाध्यबाधकत्वनिमित्तभूतोऽर्थविरोधोऽस्ति, अतोऽवश्यमन्यतरस्य बाध्यत्वं स्यात्, तत्र यद् बाध्यत्वे प्रयोजकं दुष्टकारणजन्यत्वं तत्तु नास्ति कथमत्रनिर्वाह इत्याशयेन चोदयति—**नन्विति** । प्रावल्यदौर्बल्यहेतुर्नास्तीत्याह—**अनादीति** । अपिर्विरोधसूचकः । अर्थविरोधं दर्शयति—**भेदावलम्बिन इति** । **सत्यमि**त्यर्धाङ्गीकारे । भेदावलम्बिनो बाध्यत्वमङ्गीकृतं, दुष्टकारणजन्यत्वेऽनङ्गीकारः । अन्यथासिद्धत्वानन्यथासिद्धत्वयोरेव बाध्यबाधकभावे प्रयोजकत्वम् । पूर्वोक्तं दुष्टकारणजन्यत्वमपि हि अन्यथासिद्धिप्रकारविशेषः । अत्रापि मुखभेदेनान्यथासिद्धिमुपपादयति **पूर्वापरेत्यादिना** । अपच्छेदन्यायात् बाध्यत्वं प्रत्यक्षस्यापि तुल्यं, तत्र दोषमूलत्वं च बाध्यत्वेऽधिकहेतुः । अपच्छेदे पूर्वापरशास्त्रयोः पौर्वापर्यं प्रमित्युत्पत्तिक्रमात्, न पाठक्रमात् । 'पञ्चर्त्विजः समन्वारब्धाः प्रसर्पन्ति—अध्वर्यु प्रस्तोतान्वारभते, प्रस्तोतारं प्रतिहर्ता, प्रतिहर्तारमुद्गाता, उद्गातारं ब्रह्मा, ब्रह्माणं यजमान' इति विहितस्यान्वारम्भणस्य विच्छेदे प्रायश्चित्तमुच्यते—'बहिष्पवमानं प्रसर्पतां यद्युद्गाताऽपच्छिद्येत अदक्षिणः स यज्ञः संस्थाप्यस्तेन पुनर्यजेत तत्र तद्दद्यात् यत् पूर्वस्मिन् दास्यन् स्यात्, अथ प्रतिहर्ताऽपच्छिद्येत सर्ववेदसं दद्या'दिति—तादिदं शास्त्रद्वयं विषयः । अत्रोद्गातृप्रतिहर्त्रोः प्रयोगभेदेनापच्छेदे स्वं स्वं प्रायश्चित्तशास्त्रं प्रवर्तते, एकस्मिन् प्रयोगे यौगपद्येनापच्छेदे सति उद्गातुः प्रायश्चितं प्रवर्तते; तस्य वर्गप्रधानत्वात्, प्रधानापच्छेदस्यैव समाधेयत्वात्, विकल्पेनानुष्ठानं वा । एकस्मिन्नेव पौर्वापर्येणापच्छेदे पूर्वस्य प्रायश्चित्तशास्त्रस्य दौर्बल्यं, परस्य प्राबल्यं च कर्ममीमांसायामुक्तं 'पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिव'दिति । अत्रानुपसंजातविरोधित्वेन पूर्वमुदयात् पूर्वस्य प्राबल्यं, परस्य सत्प्रतिपक्षतयैवोदयाद्दौर्बल्यमिति पूर्वः पक्षः । राद्धान्तस्तु—पूर्वस्योत्पत्तिकाले विरोध्यभावात्तदबाधेनाप्युत्पत्तिः संभवति, उत्तरस्य तु स्वोत्पत्तिकाले विरोधिसद्भावात्तदबाधेनोत्पत्त्यनुपपत्त्या पूर्वमबाधित्वैवोत्पन्नमित्यनन्यथासिद्धत्वादुत्तरस्य प्राबल्यमिति । 'पूर्वाबाधेन नोत्पत्तिरुत्तरस्य सिद्ध्यती'ति हि न्यायविदः । ननूत्तरशास्त्रमुदयेत चेत् पूर्वाबाधेनाऽनुदयः स्यात्, पूर्वशास्त्रमुत्तरोत्पत्तिप्रतिबन्धकं किं न स्यात्—नैवं; निमित्तस्योत्पन्नत्वात् । नैमित्तिकं हि शास्त्रमुदितमेवेति तत्रोत्तरस्योदयतः पूर्वाबाधेनोत्पत्त्यनुपपत्त्या पूर्व बाधितमेव । किंच—यथोदितदक्षिणाकत्वेन कर्मसमापनं हि शास्त्रेण पूर्वमेव स्वतः प्राप्तं, तत्तु प्रायश्चित्तशास्त्रेणान्यथाकृतम् । एवं पूर्वसिद्धार्थान्यथाकरणप्रकरणत्वादत्रापि पूर्वमेव बाध्यत इति कर्मविचारे निश्चितम् । एवमुत्तरशास्त्रस्यैव मोक्षशास्त्रस्य निरवकाशत्वात् भेदावलम्बि शास्त्रं पूर्वशास्त्रवत् बाध्यत इत्यर्थः । **परत्वं च** पाठक्रमादर्थक्रमाच्च; त्रिवर्गफलत्वेन हि कर्मणि प्रथमप्रावण्यं, निरूपकस्य तत्त्वपरस्य हि मुमुक्षा । तादृशपौर्वापर्यरहितेषु **विरोधिगर्भेषु** वेदान्तवाक्येषु सगुणोपासनपरेषु कथं निर्वाह इत्यत्राह—**वेदान्तवाक्येष्वपीति । अपिः** समुच्चये । **पूर्वोत्तरभागयोर्विरोधः** परिहृतः, उत्तरभागे च विरोधः परिहियत इत्यर्थः । कथमत्रापच्छेदन्यायावतार इत्यत्राह—**निर्गुणत्वादिति । परशब्देनार्वाचीनसगुणब्रह्मव्यावृत्तिः** । अपच्छेदन्यायावतरणफलभूतनिर्गुणावबोधदर्शनादपच्छेदन्यायोऽवतीर्ण **इति बोद्धव्यमि**त्यर्थः । 'जक्षत्क्रीडन्रममाण' इत्यादिफलश्रुतेस्तात्त्विकत्वात्तात्त्विकत्वनिरूपणानादरेण **प्रथमं सगुणोपासने प्रावण्यम्** । **निरूपको** हि निर्गुणपरवह्मवेदनाधिकारीति तत्र पौर्वापर्यमिति भावः । उपासनपरसगुण-**निर्गुणवाक्ययोः** फलद्वारा पौर्वापर्यमुक्तं, तत्तु स्वरूपपरसगुणनिर्गुणवाक्ययोर्नास्तीति—कथं तत्र बाध्यबाधकभाव—इति **चोदयति—ननु चेति । विधिनिषेधरूपं** पौर्वापर्यं **हि** निधायाह—**निर्गुणेति** । कानि निर्गुणवाक्यानि, कथं तेषां **बाध्यत्वमित्याह—एतदुक्तमिति । अस्थूलेत्यादिवाक्यं** गुणविशेषनिषेधपरं, **सत्यज्ञानादि**वाक्ये व्यावृत्तिर्गर्भिता, **निर्गुणमित्यादिवाक्यं गुणसामान्यनिषेधपरम् । आदि**शब्देन यत्तददृश्यमित्यादि गृह्यते । विरोधं स्फोरयति—**निरस्तेति ।**

विशेषकूटस्थनित्यचैतन्यं ब्रह्मेति प्रतिपादयन्ति, इतराणि च सगुणम्, उभयविधवाक्यानां विरोधे तेनैवापच्छेदन्यायेन निर्गुणवाक्यानां गुणापेक्षत्वेन परत्वाद्बलीयस्त्वमिति न किंचिदपहीनम्[1]। ननु च 'सत्यं

कूटस्थशब्दो निर्विकारत्ववाची, सर्वाधिष्ठानत्ववाची वा; कूटवत्तिष्ठतीति हि कूटस्थः। **नित्यचैतन्य**मित्यन्तैः पदैरुदाहृतनिर्गुणश्रुत्यर्थः संक्षिप्तः। **इतराणि** 'यः सर्वज्ञ' इत्यादीनि पूर्वोपात्तानि वाक्यानि। **चः** समुच्चये। सगुणनिर्गुणपरत्वादुभयविधवाक्यविरोधः। **तेनैव** पूर्वोत्तरभागविरोधे य उत्तरस्य प्राबल्यहेतुरुक्तस्तेनैवेत्यर्थः। निर्गुणवाक्यानां बलीयस्त्वं कुत इत्यत्राह—**गुणापेक्षत्वेन परत्वादिति**। निषेध्यविषयोहि निषेध उदेति, न हि निर्विषयो निषेधः, प्रागेव प्रसक्तस्य विषयस्य प्रतिषेध्यत्वम्। अतो निषेध्यसापेक्षत्वेन निषेधस्य परत्वमित्यर्थः। सगुणवाक्यवैयर्थ्यमप्युपासनशेषत्वात् परिहृतमित्यभिप्रायेण **न किंचिदपहीन**मित्युक्तम्। यद्वा, 'यः सर्वज्ञ' इत्यादिवाक्यानामप्युपासनशेषत्वाभिप्रायेणाह—**वेदान्तवाक्येष्वपीत्यादिना। उपासनपराणामिति**। तान्यपि वाक्यानि फलविशेषार्थमुपासनपराणि, न तु तत्त्वपराणीति भावः। अपच्छेदन्यायावतारमुपपादयति—**निर्गुणत्वादिति**। पूर्ववदर्थः॥

निर्गुणत्वमसिद्धं पूर्वपरभावाभावेनापच्छेदनयानवकाशात्—गुणानां बाध्यत्वासिद्धेः, अत एव सगुणवाक्यानां वैयर्थ्यपरिहारश्च न घटते, स्वरूपपरतयैव प्रतिपन्नानामुपासनपरत्वकल्पनं हि बाध्यत्वसिद्ध्यधीनमिति चोदयति—**ननु चेति**। परिहरति—**निर्गुणेति**। अन्यत्सर्वं पूर्ववदेव। निर्गुणवाक्यैः सहोपात्तस्य सत्यज्ञानादिवाक्यस्य सगुणपरत्वबुध्या चोदयति—**ननु चेति। चः** चोद्यसमुच्चये। **सत्यज्ञानादयो गुणाः प्रतीयन्त** इत्त्र **सत्य-ज्ञान**शब्दौ सत्यत्वज्ञानत्वपरौ, यथा 'द्व्येकयोर्द्विवचनैकवचने' इति पाणिनीयसूत्रस्थद्व्येकशब्दौ द्वित्वैकत्वपरौ; अन्यथा द्व्येकेष्विति हि वक्तव्यम्। तथा श्रीवत्साङ्कमिश्राः—'गुणाः सत्यज्ञानप्रभृतय उते'ति॥ एतद्वाक्यवैशद्याय प्रथमं सामानाधिकरण्यं निरूप्यते, तद्धि विशदतरमुपन्यस्तं प्रमेयमालायामाचार्यपादैः, तथा हि भगवता पतञ्जलिना—'लटः शतृशानचावप्रथमासमानाधिकरणे, तत्पुरुषः समानाधिकरणः कर्मधारय' इत्यादि सूत्रस्थसमानाधिकरणशब्दविवरणार्थं सामानाधिकरण्यलक्षणमुक्तं—'भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्य'मिति। अस्यायमर्थः—प्रवृत्तेर्निमित्तं प्रवृत्तिनिमित्तं, प्रकृष्टा वृत्तिः प्रवृत्तिः, शब्दस्यार्थे वृत्तिर्नाम तद्बोधनं, तत्र विशेष्यभूतप्रधानार्थविषया वृत्तिः प्रवृत्तिः, विशेष्यप्राधान्यं च 'गुणानां प्रतिपत्तिर्हि गुणिप्रतिपत्त्यर्थै'त्यनेन सिद्धं, तस्याः प्रवृत्तेर्निमित्तं द्वारं; 'निमित्तमात्रं भव सव्यसाचिन्' इत्यादिप्रयोगात्, तच्च विशेषणीभूतं जातिगुणादिकं, समानमेकमधिकरणं—विशेषणानामाधारभूतं विशेष्यम्। **एकस्मिन्नर्थे वृत्तिरित्येक**शब्देन **समान**शब्दस्य सदृशार्थपरत्वं व्युदस्तम्। **समान**शब्दसामर्थ्यादेक**शब्दः** साधारणपरः, **समान**शब्दो हि साधारणे प्रयुज्यते—'समानकर्तृकयोः पूर्वकाल' इति। **अर्थ**शब्दश्च विशेष्यभूतप्रधानाभिधेयपरः। अने**नाधिकरण**शब्दोविशेष्यपरत्वेन व्याख्यातः। एतदुक्तं भवति—त्रिविधाः शब्दाः—केचिद्विशेषणतो विशेष्यतश्चैकार्थाः, यथा—घटः, कुम्भः, नीलं, कृष्णमित्यादयः। केचिच्चोभयतश्च भिन्नार्थाः, यथा—गौः, अश्वः, पुरुषो, महिषः, नीलं, शुक्लं, पीतमित्यादयः। केचिच्च विशेषणतो भिन्नार्थाः, विशेष्यतश्चैकार्थाः, यथा—नीलमुत्पलं, देवदत्तः श्यामो युवा लोहिताक्ष—इत्यादयः। तत्र पूर्वकोटिद्वयव्यावृत्ततृतीयकोटिनिविष्टानां शब्दानां सामानाधिकरण्यम्। तत्र **भिन्नप्रवृत्तिनिमित्तानां**मित्यनेन विशेषणतो विशेष्यतश्चैकार्थानां घटः कुम्भ इत्यादीनां न सामानाधिकरण्यमित्युक्तम्। **एकस्मिन्नर्थे वृत्तिरित्यनेन** चोभयतो भिन्नार्थानां गौरश्वो महिष इत्यादीनां न सामानाधिकरण्यमित्युक्तम्। तस्माद्विशेषणतो भिन्नार्थानां विशेष्यतश्चैकार्थानां नीलमुत्पलमित्यादीनामेव सामानाधिकरण्यमिति। तत्र **प्रवृत्तिनिमित्त**शब्दयोरेवं वार्थः—**प्रवृत्तिर**भिधानं, निमित्तमभिधेयम्। **अर्थ**शब्दश्चाभिधेयवचनः। भिन्नाभिधेयानां शब्दानामेकस्मिन्नभिधेये वृत्तिः सामनाधिकरण्यमिति—भिन्नविशेषणाभिधायिनां शब्दानामेकस्मिन्विशेष्ये **वृत्तिः** पर्यवसानं सामानाधिकरण्यमित्युक्तं भवति। **भिन्न**पदसामर्थ्येन **निमित्त**शब्दनिर्दिष्टं विशेषणभूतमभिधेयम्, **एक**शब्दसामर्थ्येन **चार्थ**शब्दनिर्दिष्टं विशेष्यभूतमभिधेयमित्यवगम्यते, अत उभयथाप्यनेकविशेषणाभिधायिनां शब्दानामेकस्मिन्विशेष्ये पर्यवसानं सामानाधिकरण्यमिति—भिन्नप्रवृत्तिनिमित्तानामित्यादिना सामानाधिकरण्यलक्षणवाक्येनोक्तं भवति। उक्तादर्थादपि पूर्वोक्तः साधीयान्। समानाधिकरणपदेषु प्रातिपदिकं विशेषणान्वयपरम्। तत्स्थसमानविभक्तिर्विशेष्यैक्यपरा। समानविभक्त्यैक्यबोधनं वृत्तिशब्देन विवक्षितम्। तेन—'राजा तस्य पुत्रश्च दर्शनीयौ' इत्यत्र राजतच्छब्दयोः सामानाधिकरण्यव्यावृत्तिः; तत्र हि प्रकृतपरामर्शितच्छब्दप्रातिपदिकादैक्यावगमः, न तु समानविभक्त्या। **ननु**—नीलान्युत्पलानीत्यत्र सामानाधिकरण्यं न स्यात्; विशेष्यबहुत्वादेकार्थवृत्तित्वानुपपत्तेः, नैवम्; **एकस्मि**न्निति पदस्य समभिव्याहृतपदान्तरोपस्थापिताकारानधिकरणत्वव्यावृत्त्यर्थत्वात्; तत्तत्पदोपस्थापितानेकविशेषणापेक्षया साधारणत्वं ह्येकशब्दार्थः, न हि नीलान्युत्पलानीत्यत्र नीलत्वानधिकरणेषूत्पलत्वं वर्तते, अतस्तत्र सामानाधिकरण्यमुपपन्नम्, अतः

---

१ °वहीनम्।

सामानाधिकरण्यलक्षणग्रन्थस्य यथोक्त एवार्थ इति। अत्र [१]मृषावादिन आहुः—सामानाधिकरण्यवाक्यमखण्डार्थं, तथा हि सामानाधिकरण्यस्य तावदेकार्थपरत्वमविगीतं,[२] तत्र समानाधिकरणपदानि किं विशेषणमात्रपराणि, उत तत्तद्विशेषणविशिष्टपराणि, उत स्वरूपमात्रपराणीति विवेचनीयम्। न तावद्विशेषणमात्रपराणि; विशेषणानामनेकत्वादेकार्थत्वासिद्धेः। नापि विशिष्टपराणि; विकल्पासहत्वात्, किं क्रमेण युगपद्वा विशिष्टार्थप्रतिपादनं पदानां, न तावत् क्रमेण; तत्र किं प्रथमपदप्रतिपन्नस्य विशिष्टस्य पदान्तरं स्वोपस्थापितविशिष्टेन तादात्म्यं विदधाति, उत विशेषणान्तरान्वयं, प्रथमे—विशिष्टैक्ये विधीयमाने विशेष्यांशयोरिव विशेषणांशभूतयोर्जातिगुणयोरप्यैक्यं प्रसजेत्, द्वितीये च—विशेषणानामन्योन्यसमवायप्रसङ्गः, प्रथममेकेन विशेषणेन विशिष्टतयाऽवगतस्य वस्तुनः पश्चाद्विशेषणान्तरविशिष्टतया बोधनं हि विशेषणान्तरान्वयप्रतिपादनं, तत्र विशिष्टं प्रति विशेषणतयान्वीयमानं पूर्वविशेषणस्यापि विशेषणं भवतीति विशेषणानामन्योन्यविशेषणविशेष्यभावप्रसङ्गो हि दुर्वारः। अवर्जनीयं च पदानां क्रमेणार्थप्रतिपादनं—कुतः, उद्देश्योपादेयविभागवत्त्वात् सर्ववाक्यानाम्। नापि युगपत्; उद्देश्योपादेयविभागहानिप्रसङ्गेन युगपत्प्रतिपादनासंभवात्, संभवेऽपि विशेषणानां परस्परैक्यप्रसङ्गाच्च। तथा हि—प्रातिपदिकानां विशिष्टार्थपरत्वे प्रातिपदिकार्थैक्यपरस्य समानविभक्तिनिर्देशस्य विशिष्टैक्यपरत्वमवश्याश्रयणीयमिति—विशिष्यैक्यवद्विशेषणानामप्यैक्यं प्रतिपाद्यं स्यात्, तदनुपपत्त्या विशेष्यस्यापि नैक्यं प्रतिपादयितुमलं समानविभक्तिनिर्देशः। किंच-विशिष्टपरत्वं विशेषणविशेष्याभ्यामनेकार्थत्वं, विशेषबहुत्वाच्चानेकार्थत्वं, ततश्च सामानाधिकरण्यं न सिध्यति। किंच—विशेषणानां व्यावर्तकत्वस्वाभाव्याद्विशेषणभेदेन विशेष्यभेदप्रसङ्गो दुर्वारः, तथा हि—भेदकं विशेषणं, भेद्यं विशेष्यमिति विशेषणविश्लेष्ययोः स्वरूपविवेकः, दृश्यते च विशेषणानां विशेष्यभेदकत्वं, यथा—खण्डः, मुण्डः, घटः, पट इत्यादिषु॥

ननु नीलमुत्पलं, देवदत्तः श्यामो युवेत्यादिषु विशेषणभेदेपि विशेष्यैक्यं दृश्यते, नैष दोषः; अत्र हि स्वतः प्राप्तं विशेषणानां विशेष्यभेदकत्वं प्रत्यक्षविरोधेनापोद्यते, प्रत्यक्षागोचरे तु ब्रह्मणि विशेषणभेदप्रयुक्तो विशेष्यभेदः केन वार्यते। तस्माद्वस्तुमात्रपरमेव सामानाधिकरण्यवाक्यम्। नीलमुत्पलमित्यादिवाक्य इव सत्यादिवाक्येष्वेकवचनान्तधर्मिवाचिपदैक्येन विशेष्यैक्यसिद्धिरिति—चेन्न; खण्डो मुण्डः पूर्णशृङ्गो गौरित्यत्र विशेष्यभेदात्॥ **ननु**—विशेषणभेदो न विशेष्यैक्यविरोधी प्रत्यक्षमेव तु तद्विरोधि, प्रत्यक्षागोचरे ब्रह्मण्येकवचनान्तधर्मिवाचिपदैक्येन स्वतः प्राप्तमेकत्वं दुर्निवारमिति—चेन्न; खण्डो, मुण्डः, पूर्णशृङ्गो गौरिति परोक्षविषयवाक्येऽपि विशेष्यभेदप्रतीतेः। अतो न धर्मिवाचिपदैक्यं परोक्षे ब्रह्मण्यैक्यप्रतिपादनक्षमं, तस्माद्विशेषणभेदप्रयुक्तो विशेष्यभेदो दुर्वारः, ततश्चैकार्थत्वं न सिध्यति, अतः पारिशेष्यात् समानाधिकरणपदानां स्वरूपमात्रप्रतिपादनपरत्वमेवास्थेयम्॥ एवं तर्हि पदानां पर्यायत्वम्, एकेनैव पदेन स्वरूपं प्रतिपन्नमिति—पदान्तरप्रयोगवैयर्थ्यं, प्रवृत्तिनिमित्तभेदाभावेन सामानाधिकरण्यलक्षणहानिश्च प्रसज्येत—नैवम्; एकस्यैवार्थस्य तत्तत्पदार्थविरोधिप्रत्यनीकत्वपरत्वेन पदानामर्थवत्त्वम्, अपर्यायत्वं, निमित्तभेदलाभात्—सामानाधिकरण्यलक्षणसिद्धिश्च। अत एव जगत्कारणत्वशङ्कितानृतत्व—जडत्व—परिच्छिन्नत्व—दोषव्यावृत्तिः सत्यज्ञानादिवाक्येन क्रियते॥ **न च**—व्यावृत्तिरूपधर्मवत्त्वं ब्रह्मणः प्रसज्येतः ब्रह्मस्वरूपस्यैव सकलेतरव्यावृत्तिरूपत्वात्, यथा—शौक्ल्यादेः कार्ष्ण्यादिव्यावृत्तिस्तत्पदार्थस्वरूपमेव, न धर्मान्तरं; धर्मान्तरानुपलम्भात्, तदभ्युपगमेऽनवस्थानाच्च, अतः कार्ष्ण्यव्यावृत्तं, रक्तिमव्यावृत्तं, शौक्ल्यमिति पदानां शौक्ल्यस्वरूपमात्रविषयाणां व्यावर्त्यभेदेन यथा न पर्यायत्वम्, अर्थवत्त्वम्, एकार्थत्वं च। अत एव सामानाधिकरण्यलक्षणवत्त्वं च, तथा **सत्यादि**पदानामपि व्यावर्त्यभेदेन न पर्यायत्वादिदोषप्रसक्तिः॥ **नन्वेवं** तत्तत्पदार्थविरोधिव्यावृत्तपरत्वे लक्षणा स्यात्, नैवम्; अवाच्योपस्थापने हि लक्षणा, यथा 'गङ्गायां घोषः प्रतिवसती'त्यत्र गङ्गापदस्य कूलोपस्थापने, न हि कूलं गङ्गापदवाच्यम्, अत्र तु **सत्या**दिपदानां वाच्यैकदेशभूतविशेषणपरित्यागेऽपि, वाच्ये प्रधानांशभूतविशेष्यस्वरूपप्रतिपादनान्न लक्षणाप्रसङ्गः, तथाऽपि विशिष्टवाचिनः शब्दस्य विशेष्यमात्रपरत्वे स्वारस्यभङ्ग इति—चेन्नैष दोषः; समानाधिकरणवाक्येष्वेकार्थपरत्वबलात् विशेषणपरित्यागेन स्वरूपमात्रपरत्वमेव पदानां स्वारसिकं; तथा व्युत्पत्तेः। व्यधिकरणवाक्येषु तु पदानां विशिष्टपरता स्वारसिकी। लक्षणाऽभ्युपगमेऽपि न दोषः: वाक्यतात्पर्यानुगुणा हि लक्षणा तद्विरोधिमुख्यवृत्तेर्बलीयसी दृष्टा यथा—गङ्गापदे समानाधिकरणवाक्यस्य हि ऐक्य एव तात्पर्यमिति सर्वसंमतम्॥

ननु सर्वपदानां लक्षणा न दृष्टा, अयुक्ता च; केनचिन्मुख्यवृत्तेन तात्पर्ये निश्चिते हि पदान्तरलक्षणा युक्ता, सर्वपदलक्षणाऽङ्गीकारे किं तात्पर्यनिश्चायकम्; उच्यते—दृष्टा तावद्'द्विषं भुङ्क्ते'त्यादिषु सर्वपदलक्षणा, तत्र **विष**पदं निषिद्धभोज्यं **लक्षयति, भुङ्क्ष्वेति** भोजननिवृत्तिं, तत्र योग्यतादिवशाद्वाक्यतात्पर्यनिश्चयः, सत्यादिवाक्येषु समानविभक्तिबलादैक्यतात्पर्यनिश्चयः, तदविरोधाय प्रातिपदिकानां लक्षणा स्वीकृता, एकपदलक्षणायामपि वाक्यतात्पर्यविरोध एव हेतुः, यथा 'गङ्गायां घोष' इत्यादिषु, तदविरोधे एकस्यापि न दृष्टा, यथा 'गङ्गायां मत्स्याः प्रतिवसन्ती'त्यादिषु, अतो वाक्यतात्पर्याविरोधाय

(१) अत्र मृषावादिपदेन जगन्मृषात्ववादिनः शाङ्करा अभिधीयन्ते। २ इति करणं द्रष्टव्यम्। ३ तद्विरोधाय।

ज्ञानमनन्तं ब्रह्म[1] (तै. २।१।१) इत्यत्र सत्यज्ञानादयो गुणाः प्रतीयन्ते, नेत्युच्यते; सामानाधिकरण्येनैकार्थत्वप्रतीतेः। अनेकगुणविशिष्टाभिधानेप्येकार्थत्वमविरुद्धमिति चेत्—अनभिधानज्ञो हि देवानांप्रियः। एकार्थत्वं नाम सर्वपदानामर्थैक्यं, विशिष्टपदार्थाभिधाने विशेषणभेदेन पदानामर्थभेदोऽवर्जनीयः, तैतश्चैकार्थत्वं न सिध्यति। एवं तर्हि सर्वपदानां पर्यायता स्यात्; अविशिष्टार्थाभिधायित्वात्। एकार्थाभिधायित्वेप्यपर्यायत्वमवहितमनाः शृणु—एकत्वतात्पर्यनिश्चयादेकस्यैवार्थस्य तत्तत्पदार्थविरोधिप्रत्यनीकपरत्वेन सर्वपदानामर्थवत्त्वम्, एकार्थत्वम्, अपर्यायता च। एतदुक्तं भवति—लक्षणतः प्रतिपत्तव्यं ब्रह्म सकलेतरपदार्थविरोधिरूपं, तद्विरोधिरूपं सर्वमनेन पदत्रयेण फलतो व्युदस्यते। तत्र **सत्य-**

एकस्येव सर्वपदानां लक्षणा न दोषः, तस्मात्समानाधिकरणवाक्यं वस्तुमात्रपरमेवेति—एतदभिप्रायेण प्रत्यवतिष्ठते—**नेत्युच्यत इति। सत्यज्ञानादयो गुणाः प्रतीयन्त** इति परिचोदिते **नेत्युच्यत** इति वदतोऽयं भावः—**प्रतीयन्त** इति आपातप्रतीतिमात्रविवक्षा चेत्तया न किंचित्प्रयोजनं, प्रमितिविवक्षा चेत्, न तु प्रमितिर्जायतेत्युपपाद्यत इति। कुत इत्यत्राह—**सामानाधिकरण्येनैकार्थत्वप्रतीतेरिति**। शङ्कते—**अनेकेति**। यथा—व्यधिकरणवाक्येषु भिन्नार्थपर्यवसायिकारकपदार्थापरित्यागेऽपि प्रधानार्थस्य कार्यस्यैकत्वम्। अर्थैक्यादेकं वाक्यमित्यत्र निश्चीयते, तथा—समानाधिकरणवाक्येष्वपि विशेषणभूतगुणवाचिशब्दार्थापरित्यागेऽपि विशेष्यैक्यं सिध्यतीत्यर्थः। चोदयन्तमुपालभते—**अनभिधानज्ञ इति**। व्यधिकरणसमानाधिकरणवाक्ययोरभिधानविशेषानभिज्ञ इत्यर्थः। **देवानांप्रियो** मेषः, अज्ञ इत्यर्थः। परिहरति—**एकार्थत्वमिति। एकार्थत्वं** नाम—सर्वपदानामेकस्मिन्नेये पर्यवसानं, नतु वाक्यस्येत्यर्थः। पृथक्पृथगर्थपर्यवसायिनां पदानामेकप्रधानार्थान्वयादर्थैकत्वं व्यधिकरणवाक्य एव, समानाधिकरणवाक्ये तु पदानामेवैकार्थपर्यवसायित्वमित्युक्तं भवति। ततः किमित्यपेक्षायां—समानाधिकरणपदानां विशेषणमात्रपरत्वे विशिष्टपरत्वे च दूषणमेकग्रन्थेनाह—**विशिष्टेति। विशिष्टे**त्यादिना कृत्स्नवाक्येन विशिष्टपक्षे दूषणमुक्तम्। **विशेषणभेदेन** विशेषणानामन्योऽन्यतः, विशेष्याच्च भेदेन। विशेषणैर्विशेष्येण चानेकार्थत्वं स्यादित्यर्थः। किंच अर्थशब्दो विशेष्यपरतया च विवक्षितः, तेन विशेषणभेदेन विशेष्यभेदः स्यादिति दूषणान्तरमुक्तं भवति। किं च—विशेषणभेदेन विशेष्यभेद इत्युक्ते व्यतिरेकवशाद्विशेष्याभेदे विशेषणाभेदश्च स्यादित्युक्तं भवति। विशिष्टैक्यप्रतिपादिका समानविभक्तिर्हि अविशेषेण विशेषैक्यवद्विशेषणैक्यमपि प्रतिपादयतीत्यर्थः॥ एवं विशिष्टपरत्वे युगपदभिधानपक्षे दूषणमुक्तं भवति। उद्देश्योपादेयविभागहानिप्रसङ्गश्चार्थसिद्धः। **क्रमेणाभिधाने अन्योन्यसमवाय आनन्दमयाधिकरणे** वक्ष्यते। **विशेषणभेदेनार्थभेद** इत्येतावतांऽशेन विशेषणमात्रपरत्वे च दूषणमुक्तं भवति। विशेषणानामनेकत्वादेकार्थत्वहानिरित्यर्थः॥

एवं पदानां प्रतिपाद्यभेदः प्रसञ्जितः, ततः किमित्यत्राह। **ततश्चैकार्थत्वं न सिध्यतीति**। सामानाधिकरण्यलक्षणाऽसिद्धिरित्यर्थः। अतो **वस्तुमात्रपर**मिति परिशेषसिद्धं, तदनुवादेन चोदयति—**एवमिति। एवं तर्हि** वस्तुमात्रपरत्वे। कुत इत्यत्राह—**अविशिष्टार्थाभिधायित्वादिति**। अनेन **ततश्चैकार्थत्वं न सिद्ध्यती**त्यत्र फलितार्थो विवृतः। अत्र पर्यायत्वे चोद्ये प्रवृत्तिनिमित्तभेदाभावात् सामानाधिकरण्यलक्षणहानिः, एकतरपदवैयर्थ्यं चेति चोद्यद्वयमभिप्रेतं; परिहरिष्यमाणत्वात्। उक्तं चोद्यं परिहर्तुमाह—**एकार्थेति। अवहितमनाः शृणु** प्रतिवचनस्यानेकवाक्यसाध्यत्वान्मध्ये न चोदनीयं, किंत्वर्थस्य गहनत्वादवधातव्यमिति भावः। अनुपपत्तित्रयं परिहरति—**एकत्वेत्यादिना। एकत्वतात्पर्यनिश्चय**समानविभक्त्या अर्थवत्त्वं, प्रयोजनवत्त्वं, व्यावर्त्यभेदकृतव्यावृत्तिभेदादपर्यायत्वं, व्यावृत्तिरूपप्रवृत्तिनिमित्तलाभात् सामानाधिकरण्यसिद्धिः, व्यावर्त्यबहुत्वात् पदानां तद्व्यावृत्तिरूपप्रयोजनवत्त्वं चेत्यर्थः। **ननु तत्त्वमस्या**दिवाक्यवदन्वयमुखेनोपलक्षणं स्यात् किमर्था व्यावृत्तिः, व्यावृत्तिबहुत्वादनेकार्थत्वमापतितं, व्यावर्त्याकारानन्त्यात् कतिपयपदैर्न तद्व्यावृत्तिः शक्यते कर्तुं, ब्रह्मणो येभ्यो व्यावृत्तिः कानि च तानि वस्तूनि, ब्रह्मणोऽनेकव्यावृत्तिमत्त्वात् सधर्मकत्वं, व्यावृत्तीनां धर्मत्वानभ्युपगमे पदानां पर्यायत्वमित्याद्यनेकशङ्कापरिहारार्थमाह—**एतदुक्तं भवतीति। लक्षणतः** स्वरूपलक्षणतः, न तु तटस्थलक्षणतः। अनेन जगत्कारणत्वशङ्कितदोषव्यावृत्तये ब्रह्मणः सकलेतरविरोधित्वं प्रतिपादयदिदं शोधकवाक्यं व्यावृत्तिपरं भवितुं युक्तमित्युक्तं भवति। बहुव्यावृत्तिभिरनेकार्थत्वप्रसङ्गं परिहरति—**तद्विरोधिरूपमिति। फलतो व्युदस्यत इति**। इदं वाक्यं स्वरूपमात्रपरमेव, अत ऐकार्थ्यं, व्युदासस्तु फलित इति भावः। व्यावर्त्याकारबहुत्वात् कतिपयपदैर्व्यावृत्तिरशक्येत्येतत्परिहरति—**सर्वमनेन पदत्रयेण फलतो व्युदस्यत इति**। प्रयोजकरूपेण व्युदासे सर्वमपि व्युदस्तं भवतीत्यर्थः। विरोधीनि कानीत्यत्राह—**तत्रेति**। तर्हि जगत्कारणत्वेन तुच्छता व्यावृत्ता, किमर्थमसत्याद्यावृत्तिरित्यत्रोक्तं—

---

१ ततश्चैकत्वं न। २ °भेदे वि°।

पदं विकारास्पदत्वेनासत्याद्वस्तुनो व्यावृत्तब्रह्मपरम्। **ज्ञान**पदं चान्याधीनप्रकाशाज्जडरूपाद्वस्तुनो व्यावृत्तपरम्। **अनन्त**पदं च देशतः कालतो वस्तुतश्च परिच्छिन्नाद्व्यावृत्तपरम्। नच व्यावृत्तिर्भावरूपोऽभावरूपो वा धर्मः, अपि तु सकलेतरविरोधि ब्रह्मैव—यथा शौक्ल्यादेः कार्ष्ण्यादिव्यावृत्तिस्तत्तत्पदार्थस्वरूपमेव न धर्मान्तरम्, एवमेकस्यैव वस्तुनः सकलेतरविरोध्याकारतामवगमयदर्थवत्तरम्, एकार्थम्, अपर्यायं च पदत्रयमिति। तस्मादेकमेव ब्रह्म स्वयंज्योतिर्निर्धूतनिखिलविशेषमित्युक्तं भवति। एवं वाक्यार्थप्रतिपादने सत्येव **'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्'** (छा. ६।२।१) इत्यादिभिरैकार्थ्यम्। **'यतो वा इमानि भूतानि जायन्ते'** (तै. ३।१।१), **'सदेव सोम्येदमग्र आसीत्'** (छा. ६।२।१), **'आत्मा वा इदमेक एवाग्र आसीत्'** (ऐ. १।१) इत्यादिभिर्जगत्कारणतयोपलक्षितस्य ब्रह्मणः स्वरूपमिदमुच्यते—**'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै. २।१।१) इति। तत्र सर्वशाखाप्रत्ययन्यायेन कारणवाक्येषु सर्वेषु सजातीय-विजातीयव्यावृत्तमद्वितीयं ब्रह्मावगतं, जगत्कारणतयोपलक्षितस्य ब्रह्मणोऽद्विती-

---

विकारास्पदत्वेनासत्यादिति। स्तब्धशीतादिसाधारणजडशब्दविवरणार्थं **मन्याधीनप्रकाश**शब्दः। यद्यपि—सत्यादिष्वेकैकपदेन समस्तव्यावृत्तिसिद्धिः, तथाऽपि—ब्रह्मणि शङ्कितस्वेतरपदार्थगतविरोध्याकारस्यैकपदेनानिवर्तनात् पदत्रयसाफल्यम्। व्यावृत्तिभिः सधर्मकत्वं परिहरति—**न चेति।** प्राभाकरपक्षे, सिद्धान्तिमते च भावरूपधर्मः, वैशेषिकादिमतेऽभावरूपधर्मः, तस्माद्भावरूपोऽभावरूपो वेत्युक्तम्। व्यावृत्तिर्धर्मो न चेत् किं स्यादित्यत्राह—**अपित्विति।** श्रुत्यादौ हि धर्मस्य व्यावृत्तित्वं रजतादिविरोधिलादभ्युपगम्यते, एवं ब्रह्म च सकलेतरविरोधिलात्स्वयमेव व्यावृत्तिरित्यर्थः। स्वरूपस्यैव व्यावृत्तित्वे दृष्टान्तमाह—**यथेति।** शौक्ल्यादेः कार्ष्ण्यादिव्यावृत्तिर्न धर्मान्तरम्; अनुपलम्भात्, धर्मान्तरत्वेऽनवस्थानाच्चेत्यभिप्रायः। तर्हि पदानां पर्यायत्वं स्यादित्याशङ्क्य—कार्ष्ण्यव्यावृत्तं पीतिमव्यावृत्तं रक्तिमव्यावृत्तं शौक्ल्यमिति दृष्टान्तवाक्याभिप्रायेण परिहरति—**एकस्येति।** व्युदसनीयव्युदासभेदेन पदानां प्रयोजनवत्त्वं, तत एवापर्यायत्वमित्यर्थः। प्रतियोग्यवच्छिन्नवेषेण प्रवृत्तिनिमित्तलाभात् सामानाधिकरण्यलक्षणसिद्धिश्चेत्यभिप्रेतम्। पर्यायत्वादिप्रसङ्गपरिहार ऐकार्थ्यविरोधेन कृत इत्यभिप्रायेणोक्तमेकार्थमिति। स्वरूपमात्रपरत्वादैकार्थ्यं हि रक्षितम्। **अर्थवत्तर**मिति तरप्प्रत्ययेन दृष्टान्ताच्छौक्ल्यात्, भेदवादभिमतसगुणपरत्वाच्च प्रयोजनाधिक्यममिप्रेतम्। अपरोक्षभूतो हि शौक्ल्यादिदृष्टान्तः, तत्र स्पष्टार्थं **कार्ष्ण्यादिव्यावृत्त**मित्यादिपदप्रयोगः, प्रत्यक्षगोचरे तु परे ब्रह्मणि सकलेतरव्यावृत्तिवचनमधिकप्रयोजनमिति दृष्टान्तात् प्रयोजनाधिक्यम्। जगत्कारणभूतस्य ब्रह्मणः शङ्कितदोषव्यावृत्तिरेवापेक्षिता, न तु गुणान्तरमिति भेदवादिपक्षात् प्रयोजनाधिक्यम्। एवं सत्यज्ञानादिवाक्यस्यानुग्राहकस्तर्क उक्तः, तर्कानुगृहीतेन वाक्येन कोऽर्थः प्रतिपन्न इत्यत्राह—**तस्मादिति। तस्मादुक्तन्यायानुगृहीतत्वादस्य वाक्यस्येत्यर्थः। एकमिति।** समानविभक्तिनिर्देशफलितमैक्यमुक्तम्। **एव**कारेण स्वरूपत ऐक्यं गुणतो भेद इत्यंशतोऽनेकार्थत्वव्यावृत्तिः। एतद्विशदयति—**निर्धूतनिखिलविशेषमिति।** निर्विशेषस्य तुच्छताव्यावृत्त्यर्थं **स्वयंज्योतिरिति** पदम्। **इत्युक्तमिति। सत्यज्ञानादिवाक्येनेति** शेषः॥

इत्थं सामानाधिकरण्यान्यथानुपपत्त्या सत्यज्ञानादिवाक्यस्य वस्तुमात्रपरत्वमुपपादितम्, अथ कारणवाक्यैकार्थ्येन, शोधकवाक्यान्तरैकार्थ्येन च हेतुद्वयेन वस्तुमात्रपरत्वमुपपाद्यते—**एवमित्यादिना।** तत्र प्रथमं कारणवाक्यैकार्थ्यं हेतुरुच्यते—**एवमिति। एवं** निर्विशेषपरत्वेन निर्वाहे सत्येव कारणवाक्यैकार्थ्यमित्यर्थः। कारणवाक्यैकार्थ्यं कुतोऽपेक्षितम्, ऐकार्थ्ये सति कथं वा निर्विशेषपरत्वमित्यत्राह—**यत इत्यादि। यतो वा इमानी**त्यादि लक्षणवाक्यम्; एतस्य कारणत्वानुवादेन लक्षणपरत्वात् कारणत्वप्रापकं वाक्यमाह—**सदेवेति। उपलक्षितस्योपलक्षणं** नाम—चन्द्रस्य शाखेव तटस्थज्ञापकम्। **सत्यं ज्ञानमनन्तं ब्रह्मेति**त्यनेन वाक्येनेत्यर्थः। कारणवस्तुनः स्वरूपशोधकत्वात् कारणवाक्यैकार्थ्यमस्यापेक्षितमित्युक्तं भवति। अस्तु कारणवाक्यैकार्थ्यं तत्तु सगुणब्रह्मकारणत्ववादिभिर्यैः सर्वज्ञः सर्ववित्, यस्य ज्ञानमयं तपः, तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते, तमीश्वराणां परमं महेश्वरम्, स कारणं करणाधिपाधिप' इत्यादिवाक्यैरेव स्यादित्यत्राह—**तत्रेति। तत्र कारणवाक्यैकार्थ्येऽपेक्षिते—सर्वज्ञाखाप्रत्ययन्यायो** ह्यनुक्तार्थस्वीकारफलः, तेनात्रानुक्तस्योपनिषदन्तरोक्तस्याप्यर्थस्य सौक्ल्यैक्यादि सति सगुणमात्रपरासूपनिषत्सु निर्गुणमपि ब्रह्मोक्तं भवति, तत्रापच्छेदन्यायेन निर्गुणवाक्यानां बलीयस्त्वात् सर्वत्र सजातीय-विजातीयव्यावृत्तमद्वितीयं ब्रह्मैव प्रतिपादितं भवतीत्यभिप्रायः। ततः किमित्यत्राह—**जगदिति। जग-**

---

१ व्यावृत्तयं। २ °शिला°।

यस्य प्रतिपिपादयिषितं स्वरूपं तदविरोधेन वक्तव्यम्, अद्वितीयत्वश्रुतिर्गुणतोपि सद्वितीयतां न सहते; अन्यथा निर्गुणं निरञ्जनमित्यादिभिर्विरोधश्च, अतश्चैतल्लक्षणवाक्यमखण्डैकरसमेव प्रतिपादयति । **ननु च**—सत्यज्ञानादिपदानां स्वार्थप्रहाणेन स्वार्थविरोधिन्यावृत्तवस्तुस्वरूपोपस्थापनपरत्वेन लक्षणा स्यात्, नैष दोषः; अभिधानवृत्तेरपि तात्पर्यवृत्तेर्बलीयस्त्वात्, सामानाधिकरण्यस्य ह्यैक्य एव तात्पर्यमिति सर्वसंमतम् । **ननु च**—सर्वपदानां लक्षणा न दृष्टचरी, ततः किम्, वाक्यतात्पर्याविरोधे सत्येकस्यापि न दृष्टा, समभिव्याहृतपदसमुदायस्यैतत्तात्पर्यमिति निश्चिते सति द्वयोस्त्रयाणां सर्वेषां वा तदविरोधायैकस्येव लक्षणा न दोषाय, तथाच शास्त्रज्ञैरभ्युपगम्यते–कार्यवाक्यार्थवादिभिर्लौकिकवाक्येषु सर्वेषां पदानां

त्कारणेत्यादिपदैः कारणवाक्योक्तमर्थमनुवदति । **प्रतिपिपादयिषितं** तात्पर्यभूमिः । वस्तुमात्र एव तात्पर्यमित्यर्थः । **तदविरोधेन वक्तव्यं** कारणवाक्यप्रतिपन्नब्रह्मस्वरूपशोधकत्वात्तदविरोधेनानेन वाक्येन वक्तव्यमित्यर्थः । 'नरपतिरद्वितीय' इत्यादिवत्समान्यधिकराहित्येऽप्यद्वितीयत्वमुपपन्नमिति—तदेकार्थेऽपि न निर्गुणपरत्वसिद्धिरित्याह—**अद्वितीयत्वश्रुतिरिति । सदेव, एकमेवेति** विजातीय–सजातीयव्यावर्तकावधारणद्वयसमभिव्याहृतत्वादिदमद्वितीयपदं गुणतोऽपि सद्वितीयतां न सहत इत्यभिप्रायः । एवं कारणवाक्यैकार्थ्यात् सत्यज्ञानादिवाक्यस्य वस्तुमात्रपरत्वमुपपादितम्, अथ शोधकवाक्यान्तरैकार्थ्यं हेतुरुच्यते—**अन्यथेति । अन्यथा** सत्यादिवाक्यस्य विशिष्टपरत्वे 'निरञ्जनं निर्गुण'मित्यादिभिर्विरोधः स्यात्, अतस्तदविरोधायेदं वाक्यं निर्विशेषवस्तुमात्रपरमित्यर्थः । **अन्यथा 'निर्गुणं निरञ्जन'मित्यादिभिर्विरोधश्चे**त्यनेनाद्वितीयत्वश्रुतेर्गुणतोऽपि सद्वितीयतानिषेधपरत्वं चार्थादुपपादितं भवति । हेतुत्रयेणोपपादितमर्थं निगमयति—**अतश्चेति । अतः** पूर्वोक्तसामानाधिकरण्यान्यथाऽनुपपत्त्या, पश्चादुक्तकारणवाक्यशोधकवाक्यान्तरैकार्थ्यरूपहेतुद्वयेन चेत्यर्थः । **एतल्लक्षणवाक्यं** स्वरूपलक्षणवाक्यम् । **अखण्डैकरसं** निर्विशेषतैकस्वभावमेव प्रतिपादयतीत्यर्थः ॥

अथ मुख्यार्थपरित्यागेन लक्षणास्वीकारदोषमुद्घाटयति—**ननु चेत्यादिना । स्वार्थप्रहाणेन** स्वार्थो हि विशेषणद्वारकं विशेष्यं, तत्प्रहाणेनेत्यर्थः । लक्षणात्वमभ्युपगम्यादोषतां प्रतिजानीते । **नैष दोष इति ।** मुख्यार्थत्वमुत्तरत्राभिधास्यते । हेतुमाह—**अभिधानवृत्तेरपीति ।** तात्पर्यवृत्तिर्नाम–तात्पर्यादागता वृत्तिः, तत्परत्वरूपा वा, सा चात्र लक्षणावृत्तिर्विवक्षिताः वाक्यतात्पर्यविरोधिमुख्यवृत्तेरपि वाक्यतात्पर्यानुगुणलक्षणावृत्तेर्बलीयस्त्वादित्यर्थः । कस्मिन्नर्थे तात्पर्यं यदनुरोधाय लक्षणास्वीकार इत्यत्राह—**सामानाधिकरण्यस्येति । ऐक्य एव तात्पर्यमिति ।** तात्पर्यनिश्चायिका समानविभक्तिरिति भावः । आनन्दमयाधिकरणे सिद्धान्तिना द्योतयिष्यते । **सर्वसंमतं** विशिष्टैक्यवादिभिः, अन्यैश्च संमतमित्यर्थः ॥

'गङ्गायां घोष' इत्यादिषु सर्वपदलक्षणा न दृष्टेति चोदयति—**ननु चेति ।** तात्पर्यनिश्चायककतिपयमुख्यवृत्त्या तदनुगुणमन्येषां पदानां लाक्षणिकत्वमाश्रयणीयं, सर्वपदलक्षणायां तु तत्र संभवतीत्यभिप्रायः । तात्पर्याविरुद्धपदमुख्यार्थस्वीकारस्तात्पर्यविरुद्धपदलक्षणास्वीकारस्याविरुद्ध इत्याशयेनाह—**ततः किमिति । ततः किमि**त्यभिप्रेतं विवृण्वन् **प्रतिबन्दी**मुखेन विवक्षितार्थं दर्शयित्वा परिहर्तुं विपक्षे बाधगर्भां प्रतिबन्दीमाह—**वाक्यतात्पर्येति ।** यद्यविरुद्धपदमुख्यार्थत्वं विरुद्धपदलक्षणाविरोधि–तर्हि, 'गङ्गायां मत्स्याः प्रतिवसन्ती'त्यादिषु अविरोधेन एकस्यापि पदस्य लक्षणानङ्गीकारात्, 'गङ्गायां घोष' इत्यादिष्वप्येकस्यापि पदस्य लक्षणा न स्यात्—इत्यभिप्रायः । 'गङ्गायां मत्स्या' इति वाक्ये विरोधाभावाल्लक्षणानङ्गीकारः, गङ्गायां घोष इत्यत्र विरोधाल्लक्षणा न दोष इति चेत्, तदत्रापि तुल्यमित्याह—**सममिव्याहृतेति ।** सर्वपदलक्षणा च 'विषं भुङ्क्ष्वे'त्यादिषु दृष्टेत्यभिप्रायः । **एतत्तात्पर्यमिति निश्चिते सतीति ।** अपवादकरहितसमानविभक्तिनिर्देशो निश्चायक इति भावः । **द्वयोस्त्रयाणामित्यादि ।** अविरोध–विरोधावेव मुख्यलक्षणावृत्तिस्वीकारे प्रयोजकौ, न तु पदानामेकत्व–द्वित्वादिकमित्यर्थः । न केवलं 'विषं भुङ्क्ष्वे'त्यादिषु लौकिकप्रयोगेष्वेव सर्वपदलक्षणाऽत्याश्रिता, अन्यैरपि परीक्षकैराश्रितेत्याह—**तथा चेति ।** तथा सर्वपदलक्षणाया अदोषत्वमभ्युपगम्यते । अभ्युपगमे हेतुसद्भावादभ्युपगमः फलित इति भावः । कैः परीक्षकैः केषु वाक्येषु सर्वपदलक्षणाश्रितेत्यत्राह—**कार्यवाक्यार्थेति ।** लौकिकवाक्येषु सर्वपदलाक्षणिकत्वमुपपादयति—**अपूर्वकार्य एवेति ।** क्रियाकार्य लाक्षणिकमस्तु ततः कथं सर्वपदलक्षणेत्यत्राह—**कार्यान्वितेति ।** पदानामन्विताभिधायित्वेन कारकपदानामपूर्वकार्यान्विताभिधायिनां तदन्वित एव मुख्यार्थ—इति तदन्वयपरित्यागे लक्षणैवेत्यर्थः । ननु 'गङ्गायां घोषः प्रतिवसती'त्यादिषु **गङ्गा**पदस्य लाक्षणिकत्वेऽपि तदन्विताभिधायिनां पदान्तराणाममुख्यत्वं न दृष्टमिति चेन्न; गङ्गापदलक्षितस्य कुलस्य वाक्यार्थत्वाभावात्, इह तु वाक्यस्य प्रधानप्रतिपाद्यभूतकार्यार्थसमर्पकपदस्य लाक्षणिकत्वात्तदन्विताभिधायिनां पदानां लक्षणा स्यादेव, अत एव **कार्यवाक्यार्थवादिभि**रित्युक्तम् । ननु 'कमलानि निमीलन्ति, कुमुदान्युन्मिषन्ति चे'ति वाक्यार्थभूतनिमीलनादेर्लाक्षणिकत्वेऽपि तदन्विताभिधायिनां कमलादिपदानां न लाक्षणिकत्वं

लक्षणा समाश्रीयते, अपूर्वकार्य एव लिङादेर्मुख्यवृत्तत्वाल्लिङादिभिः क्रियाकार्यं लक्षणया प्रतिपाद्यते, कार्यान्वितस्वार्थाभिधायिनां चेतरेषां पदानामपूर्वकार्यान्वित एव मुख्योऽर्थ इति, क्रियाकार्यान्वितप्रतिपादनं लाक्षणिकमेव।—अतो वाक्यतात्पर्याविरोधाय सर्वपदानां लक्षणापि न दोषः, अत इदमेवार्थजातं प्रतिपादयन्तो वेदान्ताः प्रमाणम् । प्रत्यक्षादिविरोधे च शास्त्रस्य बलीयस्त्वमुक्तम्, सति च विरोधे बलीयस्त्वं वक्तव्यं, विरोध एव न दृश्यते; निर्विशेषसन्मात्रब्रह्मग्राहित्वात्प्रत्यक्षस्य । **ननुच**—'घटोऽस्ति, पटोऽस्ती'ति नानाकारवस्तुविषयं प्रत्यक्षं कथमिव सन्मात्रग्राहीत्युच्यते, विलक्षणग्रहणाभावे सति सर्वेषां ज्ञानानामेक-

---

दृष्टमिति चेत्, अनभिप्रायज्ञश्चोदयति भवान्, सर्वपदानां निर्मीलनरूपवाक्यार्थपरत्वस्य कैश्चिदवस्थापितत्वाभावात्, निर्मीलनोपस्थापकपदलक्षणायामपि न तदन्विताभिधायिनां लाक्षणिकतापत्तिः, त्वया तु सर्वपदानां कार्यपरत्वाऽभ्युपगमात्तत्कार्यसमर्पकपदलाक्षणिकत्वे तदन्वितार्थाभिधायिनां लक्षणा प्राप्नोति। तथा हि—कार्यवाक्यार्थवादिना पदानां किं विशिष्टकार्यैकदेशे पदशक्तिर्निश्चीयते, उत विशिष्टस्थायिकार्यैकदेशे । प्रथमे–विशिष्टकार्यैकदेशत्वाविशेषात् स्वार्थेषु कारकपदानामिव लिङादेः क्रियाकार्ये मुख्यत्वप्रसङ्गः । द्वितीये–विशिष्टस्थायिकार्यैकदेशपरत्वप्रहाणस्य सर्वपदानामविशिष्टत्वात् लिङादेः क्रियाकार्य इव कारकपदानां क्रियाकार्यान्वितपरत्वे लक्षणा स्यात् । पदानां विशिष्टकार्यैकदेशपरत्वे तुल्येऽपि लिङादेः क्रियाकार्ये लाक्षणिकत्वं, कार्यान्वितमात्रे कारकपदानां मुख्यत्वमिति चेत्, यदि कार्यान्वितमात्रे कारकपदानां मुख्यत्वमिष्टं क्रियाकार्ये लिङादेर्लाक्षणिकत्वं कथं; स्थायिकार्यपरत्वेन वेदप्रयुक्तत्वनिश्चयाल्लक्षणापि क्रियाकार्यबोधनसंभवादिति चेत्, कारकपदानामपि स्थायिकार्यान्वितपरत्वेन वेदप्रयोगदर्शनात्–लक्षणयापि क्रियाकार्यान्वितपरबोधनोपपत्तेः क्रियाकार्यान्वितप्रतिपादनं लाक्षणिकं स्यात् ॥

ननु—गोपदस्य सास्नादिमन्मात्रमुख्यत्वेऽपि प्रमाणान्तरेण खण्डत्वादिविशेषसिद्धिवत्, लिङादेः कार्यमात्रपरत्वे कार्यविशेषस्य प्रमाणान्तरेण सिध्यभावात्, उभयत्र एकशक्तिकल्पनायोगात्, शक्तिद्वयकल्पने गौरवाच्च लिङादेरपूर्वकार्ये मुख्यत्वमिति क्रियाकार्यप्रतिपादनं लाक्षणिकम्, अन्यथा शब्दशक्तेः कार्यमात्रविषयत्वात्, प्रत्यक्षाद्यविषयत्वाच्च कार्यविशेषो निष्प्रमाणकः स्यादिति चेन्न; कार्यविशेषस्य प्रामाणिकत्वे तत्र शक्तिकल्पनं, शक्तिकल्पने तस्य प्रामाणिकत्वम्–इत्यन्योन्याश्रयप्रसङ्गात् । **किं च**—यदि कार्यविशेषस्याप्रामाणिकत्वपरिहाराय तत्र शक्तिः कल्प्यते, तर्हि–कारकपदानां कार्याऽन्वितमात्रपरत्वे कार्यविशेषान्वयस्य प्रमाणान्तरागोचरत्वात्, उभयत्र शक्तिकल्पने गौरवाच्च कार्यविशेषान्वये प्रमाणं न स्यादिति तत्परिहाराय कार्यविशेषान्वये कारकपदानां मुख्यत्वमिति क्रियाकार्यान्वितपरत्वं लाक्षणिकं स्यात् । लिङादिसमभिव्याहारबलात्कारकपदानां कार्यविशेषान्वयपरत्वसिद्धिरिति चेत्, तर्हि–स्वर्गकामपदसमभिव्याहारबलाल्लिङादेः कार्यविशेषपरत्वसिद्धिरिति—लिङादि कार्यमात्रपरं स्यात्। तस्माल्लिङादेरपूर्वकार्य एव मुख्यवृत्तत्वेन क्रियाकार्यस्यामुख्यत्वे–कारकपदानामपि क्रियाकार्यान्वितपरत्वं लाक्षणिकमित्येवाभ्युपगन्तव्यम् । कारकपदानामन्वयांशे लक्षणा न सर्वत्रेति चेत्, समानाधिकरणवाक्येऽपि पदानां प्रातिपदिकांश एव लक्षणा, न समानविभक्तावितिं तुल्यम् । सर्वपदलक्षणानुपपत्तिपरिहारमुपसंहरति—**अत इति । अतः** सर्वपदलक्षणाया उपपत्तिसिद्धत्वात्, लौकिकैः परीक्षकैश्चाङ्गीकृतत्वाच्चेत्यर्थः । यदप्याहुरित्यारभ्य कृतां शास्त्रेण स्वामिमतार्थसिद्धिमुपसंहरति—**अत इदमेवेति । अतः** निर्विशेषवस्तुनि तस्यैव पारमार्थ्ये, व्यतिरिक्तस्य मिथ्यात्वे, तस्य दोषपरिकल्पितत्वे, दोषस्य च सदसदनिर्वचनीयत्वे, ज्ञानमात्रनिवर्त्यत्वे चोक्तैरुपपत्तिसहितैः श्रुतिवाक्यैरित्यर्थः । **इदमेवार्थजातं** पूर्वोद्दिष्टमेवार्थजातं, न तु सगुणवस्त्वादिकम् । **प्रतिपादयन्तो वेदान्ताः प्रमाणमिति** । वाक्यान्तराणां काल्पनिकार्थपरत्वेन तत्त्ववावेदकत्वाभावादुक्तार्थविषयमेव वाक्यजातं तत्त्वे प्रमाणमित्यर्थः ॥

पूर्वं प्रत्यक्षविरोधे शास्त्रप्राबल्यं, शास्त्रे च मेदाबलम्बिनां बाध्यत्वं चोक्तम्, अथ प्रत्यक्षविरोधो नास्तीत्युपपादयितुं प्रक्रमते—**प्रत्यक्षादीति** । शास्त्र-प्रत्यक्षविरोधे शास्त्रप्राबल्यप्रतिपादकग्रन्थेन वक्ष्यमाणार्थसङ्गतिरिति भावः । **चः** समुच्चये। अविरोधपक्षस्य च बुद्धिस्थत्वात्, तस्य चान्वारुह्योक्तस्य समुच्चयः । विरोधाभ्युपगमेऽपीत्यर्थः । **सति चे**त्यत्र **च**शब्दो **इ**शब्दार्थः । अविरोधं प्रतिजानीते—**विरोध एव न दृश्यत इति** । हेतुमाह—**निर्विशेषेति** । विषयविषयिभावव्यावृत्त्यर्थं सन्मात्रब्रह्मेत्युक्तम् । प्रतीतिविरोधेन चोदयति—**ननु चेति** । विरोधमुपपादयति—**घटोऽस्तीत्यादिना । न हि केवलमस्तीति प्रतीतिः**, अपि तु घटोऽस्ति पटोऽस्तीत्येव हि प्रतीतिरित्यर्थः । प्रतीतेर्भ्रान्तिरूपत्वसंभवात्तद्व्युदासार्थं व्यवहारविशेषाद्—**विलक्षणेति** । परिहरति—**सत्यमिति** । 'घटोऽस्ति पटोऽस्ती'त्यत्रास्तिव्यवहारस्यैकरूपत्वात्ताव-

---

१ °ति न । २ प्रामाणान्तर° काशीमु. पु. । ३ कार्यविशेषान्वय° ।

विषयत्वेन धारावाहिकविज्ञानवदेकव्यवहारहेतुतैव स्यात्, सत्यम्; तथैवात्र विविच्यते—कथं घटोऽस्तीत्यत्रास्तित्वं तद्भेदश्च व्यवह्रियते, न च द्वयोरपि व्यवहारयोः प्रत्यक्षमूलत्वं संभवति; तयोर्भिन्नकालज्ञानफलत्वात्। प्रत्यक्षज्ञानस्यैकक्षणवर्तित्वात् तत्र स्वरूपं भेदो वा प्रत्यक्षस्य विषय इति विवेचनीयं, भेदग्रहणस्य स्वरूपग्रहणतत्प्रतियोगिस्मरणसव्यपेक्षत्वादेव स्वरूपविषयत्वमवश्याश्रयणीयमिति न भेदः प्रत्यक्षेण गृह्यते, अतो भ्रान्तिमूल एव भेदव्यवहारः। **किं च**—भेदो नाम कश्चित्पदार्थो न्यायविद्भिर्निरूपयितुं न शक्यते। भेदस्तावन्न वस्तुनः स्वरूपम्; वस्तुस्वरूपे गृहीते स्वरूपव्यवहारवत्सर्वस्माद्भेदव्यवहारप्रसक्तेः। न च वाच्यं—स्वरूपे गृहीतेपि भिन्न इति व्यवहारस्य प्रतियोगिस्मरणसव्यपेक्षत्वात्तत्स्मरणाभावेन तदानीमेव न भेदव्यवहार इति; स्वरूपमात्रभेदवादिनो हि प्रतियोगिसव्यपेक्षा च नोत्प्रेक्षितुं क्षमाः स्वरूपभेदयोः स्वरूपत्वाविशेषात्। यथा स्वरूपव्यवहारो न प्रतियोग्यपेक्षः, भेदव्यवहारोपि तथैव स्यात्, 'हस्तः कर' इतिवद्घटो भिन्न' इति पर्यायत्वं च स्यात्। नापि धर्मः;

न्मात्रे, भेदावभासमात्रे चाङ्गीकारः, भेदव्यवहारस्य प्रत्यक्षमूलत्वे, भेदावभासस्य प्रत्यक्षत्वे चानङ्गीकारश्च सूच्यते—**सत्यम्** इत्यर्धाङ्गीकारेण। **तथैव** यथा सन्मात्रस्यैव प्रत्यक्षत्वम्, एकव्यवहारहेतुतैव च स्यात् तथैवेत्यर्थः। **अत्र** घटादिविषय-स्वरूपविषयव्यवहारसमुदाये। **विविच्यते** यथा-'इदं रजत'मित्यत्र **इदं**व्यवहारस्य प्रत्यक्षमूलत्वं, **रजत**व्यवहारस्य भ्रान्तिमूलत्वं, तथा—**विविच्यत** इत्यर्थः। तत्रेदमंश-रजतांशव्यवहारयोर्बाधितत्वाबाधितत्वाभ्यां विवेकः, अत्र स्वरूपविषय-भेदविषयव्यवहारयोरुभयोरपि अबाधितत्वाविशेषे कथं विवेक-इत्यभिप्रायेणाह—**कथमिति**। यौक्तिकबाधोऽस्तीत्याशयेनाह—**घटोऽस्तीति**। किमस्तित्वं, भेदश्चैकः पदार्थः, उत द्वौ; द्वित्वे च किं तदुभयव्यवहारयोः प्रत्यक्षमूलत्वम्, उतान्यतरस्य; द्वयोरपि प्रत्यक्षमूलत्वे प्रत्यक्षं किं युगपत् उभयग्राहि, उत क्रमेण-इति विकल्पान् हृदि निधाय-अस्तित्वलक्षणस्वरूपतद्भेदयोरैक्यं न संभवति; भेदग्रहणस्य स्वरूपग्रहणप्रतियोगिस्मरणसापेक्षत्वात्, सन्मात्रग्रहणस्य तन्निरपेक्षत्वाच्चेत्यभिप्रयन्नाह—**अस्तित्वं तद्भेदश्चेति। भिन्न इति** व्यवहार इव **घट** इत्यसाधारणव्यवहारेऽपि घटस्य पटाद्यावृत्ततया प्रतीतौ प्रतियोगिसापेक्षत्वात् घटव्यवहार एव भेदव्यवहार इत्युच्यते। द्वित्वे च द्वयोरपि प्रत्यक्षमूलत्वं नेत्याह—**न च द्वयोरपीति। द्वयोरपि व्यवहारयोः** स्वरूपविषय-भेदविषयव्यवहारयोः। **प्रत्यक्षं** युगपद्वा, क्रमेण वा **मूलं स्यादिति** विकल्पमभिप्रेत्य यौगपद्यं दूषयति—**तयोरिति। प्रतियोग्यपेक्षानपेक्षारूपवैषम्या**दित्यभिप्रेतं क्रमपक्षं प्रतिक्षिपति—**प्रत्यक्षज्ञानस्य चेति। चः** समुच्चये। एवं युगपत्, क्रमेण चोभयव्यवहारस्य प्रत्यक्षमूलत्वमनुपपन्नमिति तयोरन्यतरस्य प्रत्यक्षविषयत्वमाह—**तत्रेति**। भेदः प्रत्यक्षविषयः स्यादित्यत्राह—**भेदेति**। अस्तित्व-भेदयोरैक्ययोगे, तद्व्यवहारयोर्भिन्नकालज्ञानफलत्वे च य एव हेतुः **तेनैवेत्येव**कारोभिप्रायः। प्रत्यक्षस्य स्वरूपमात्रविषयत्वे कथं भेदव्यवहारसंभव इत्यत्राह—**अतो भ्रान्तीति**। तथा च संविदसिद्धौ **'यौगपद्यक्रमायोगाद्व्यवच्छेदविधानयोः। ऐक्ययोगाच्च भेदो न प्रत्यक्ष इति यो भ्रम'** इति। **व्यवच्छेदो** भेदग्रहणम्। **विधानं** स्वरूपग्रहणम्॥

एवं भेदे प्रमाणानुपपत्तिरुक्ता, अथ प्रमेयानुपपत्तिमाह—**किंचेति। किंचेत्यादिना** प्रमाणानुग्राहकतर्काभावोऽप्युपपादितोभवति। दुर्निरूपत्वं प्रतिजानीते—**भेदो नामेति**। विकल्पासहत्वादिति भावः। **न्यायविद्भिः**, न लापातप्रतीतिमात्रतृप्तैरिति भावः। स्वरूपधर्मविकल्पं हृदि निधाय स्वरूपपक्षं दूषयति—**भेदस्तावदिति**। कुत इत्यत्राह—**वस्तुस्वरूपे इति। स्वरूपव्यवहारवत् सर्वस्माद्भेदव्यवहारप्रसक्तेरिति**। प्रतियोगिनिरपेक्षभेदव्यवहारप्रसक्तेरित्यर्थः। स्वरूपग्रहणस्य शब्दव्युत्पत्तिव्युत्पन्नशब्दस्मरणनिरपेक्षत्वेऽपि भिन्न इति व्यवहारस्तु तत्सापेक्षो यथा भवति, तथा प्रतियोगिग्रहणमपि भेदव्यवहारसामग्यन्तर्भूतम्, अनस्तत्स्मरणाभावात् तदानीमेव भेदव्यवहाराभावः, न तु भेदाग्रहणात्-इति परमतमाशङ्क्याह—**न चेति**। कुत इत्यत्राह—**स्वरूपेति**। यथा न स्वरूपग्रहणे प्रतियोग्यपेक्षा, तथा भेदव्यवहारे चेति **च**शब्दार्थः। **हि**शब्दो हेतौ स्वरूपग्रहण इव भेदव्यवहारे प्रतियोग्यपेक्षाया असंभवादित्यर्थः। असंभवः कुत इत्यत्राह—**स्वरूपेति**। स्वरूपभेदयोः स्वरूपत्वमविशिष्टमस्तु ततः किं प्रतियोगिनिरपेक्षभेदव्यवहारप्रसक्तेः—इति शङ्कायां तद्विवृणोति—**यथेति**। स्वरूपपक्षे दूषणान्तरमप्याह—**हस्तः कर इति**। पर्यायत्वे सति सह प्रयोगस्याज्यः स्यादिति भावः। स्वरूपपक्षे मृषावादिभिर्दूषणान्तराण्यप्युक्तानि उदाहृतदूषणपरिहारेण तान्यपि प्रत्युक्तानि भवन्ति—इति भाष्ये न कण्ठोक्तानि, तान्युच्यन्ते—स्वरूपपक्षे **भिन्न** इति व्यवहर्तुं न युक्तं; भिन्नो हि भेदयोगी। एतद्व्यवहारसिद्धये यदि स्वरूप-

---

१ प्रतियोगिभव्य°। २ स्वरूपभूतभूत°।

धर्मत्वे सति तस्य स्वरूपाद्भेदोऽवश्याश्रयणीयः; अन्यथा स्वरूपमेव स्यात्। भेदे च—तस्यापि भेदस्तद्धर्मस्तस्यापीत्यनवस्था। किंच—जात्यादिधर्मविशिष्टवस्तुग्रहणे सति भेदग्रहणं—भेदग्रहणे सति जात्यादिधर्मविशिष्टवस्तुग्रहणमित्यन्योन्याश्रयणम्। अतो भेदस्यापि दुर्निरूपत्वात्सन्मात्रस्यैव प्रकाशकं प्रत्यक्षम्। किंच—'घटोऽस्ति पटोऽस्ति, घटोनुभूयते पटोनुभूयत' इति सर्वे पदार्थाः सत्तानुभूतिघटिता एव दृश्यन्ते, अत्र सर्वासु प्रतिपत्तिषु सन्मात्रमनुवर्तमानं दृश्यत इति तदेव परमार्थः, विशेषास्तु व्यावर्तमानतयाऽपरमार्थाः—रज्जुसर्पादिवत्। यथा रज्जुरधिष्ठानतयानुवर्तमाना सती परमार्था, व्यावर्तमानाः सर्पभूदलनाम्बुधारादयोऽपरमार्थाः। **ननु च**—रज्जुसर्पादौ रज्जुरियं न सर्प इत्यादिरज्ज्वाद्यधिष्ठानयाथार्थ्यज्ञानेन बाधितत्वात्सर्पादेरपारमार्थ्यं न व्यावर्तमानत्वात्, रज्वादेरपि पारमार्थ्यं नानुवर्तमानतया, किं त्ववाधितत्वात्, अत्र त्वबाधितानां घटादीनां कथमपारमार्थ्यम्; उच्यते—घटादौ दृष्टा व्यावृत्तिः सा किंरूपेति विवेचनीयम्—किं घटोऽस्तीत्यत्र पटाभावः, सिद्धं तर्हि घटोऽस्तीत्यनेन पटादीनां बाधितत्वम्,

---

भूतभेदान्तरं स्वीक्रियते–तत्रापि **मिश्र** इति व्यवहारस्यायुक्तत्वात्–तत्स्वरूपभेदान्तरमाश्रयणीयमित्यनवस्था। **किंच**—शब्दान्तरेण धर्मं इत्युक्तं स्यात्, तदा च धर्मपक्षदूषणान्यापतेयुः। **किंच**—भेदः किमनुवृत्तः, उत व्यावृत्तः; व्यावृत्तश्चेत्–स किं स्वरूपम्, अत धर्मः। प्रथमे–घटस्य भेदव्यवहारे कृते पटविषयभेदव्यवहारो न स्यात्; व्यावृत्तत्वात्। धर्मश्चेत्–पूर्वदोषः, धर्मत्वप्रयुक्तदूषणानि च स्युः। यद्यनुवृत्तः–स च स्वरूपं चेत्, शब्दान्तरेण सन्मात्रमङ्गीकृतं स्यात्। धर्मपक्षे–पूर्ववत्। **किंच**—मिदिधातोर्हि विदारणमर्थः, एकस्य वस्तुनो **भेदो** नाम–द्विधाभावः, तत्खण्डस्यापि तथा स्यात्, अतो वस्तुनि भेदाभ्युपगमे विदारणपरम्परया वस्तुनाश एव स्यात् इत्येवमादीनि॥ अथ धर्मपक्षं दूषयति **नापीति**। कुत इत्यत्राह—**धर्मत्व इति**। स्वरूपाद्धर्मस्य भेदाभावेऽनिष्टमाह—**अन्यथेति**। स्वरूपधर्मयोर्भेदोऽस्तु ततः किमित्यत्राह—**भेदे चेति। तस्यापि भेदस्तद्धर्मः** तस्य धर्मतया स्वीकृतस्यापि भेदस्य स्वरूपापेक्षया यो भेदः सोऽपि तस्य धर्मतया स्वीकृतस्य भेदस्य धर्मः। यद्वा, स्वरूपाद्धर्मस्य यो भेदः स्वीकृतः तस्य धर्मिभूताद्धर्मात् भेदोऽपि धर्मः; अन्यथा स्वरूपमेव स्यात्, तदा स्वरूपपक्षदूषणानि स्युः। सोऽपि भेदो धर्मः, तस्यापि स्वरूपाद्भेदः—इत्यनवस्थेत्यर्थः। एवं धर्मपक्षेऽनवस्थामुक्त्वाऽन्योन्याश्रयणमाह—**किं चेत्यादिना**। त्रेधा च तत्–धर्मिणि, प्रतियोगिनि च गृहीते भेदग्रहणं, भेदे गृहीते धर्मि–प्रतियोगिग्रहणमिति; धर्मे, धर्मिणि च गृहीते भेदग्रहणं, भेदे गृहीते धर्मं–धर्मिग्रहणमिति; **अयं घट** इत्यत्रेदंशब्दनिर्दिष्टस्य घटजातीयत्वविशिष्टग्रहणं पटजातीयाद्भेदग्रहणपूर्वकम्; अन्यथा घटजातीयत्वविरोधात्, पटाद्भेदग्रहणमिदंशब्दनिर्दिष्टस्य घटजातीयत्वग्रहणपूर्वकम्; अन्यथा पटत्वप्रसङ्गादिति। एवं धर्मिधर्मग्रहणे, धर्मितया प्रतियोगितया च ग्रहणे, तत्तत्सजातीयत्वग्रहणे च, त्रिधाऽन्योन्याश्रयणमुक्तम्। साधकप्रमाणाभावमुपसंहरति—**अत इति। अतः** स्वरूपधर्मपक्षोक्तैर्दूषणैर्दुर्निरूपत्वादित्यर्थः। इत्थं साधकप्रमाणाभाव उक्तः, प्रमेयानुपपत्तिरुपतर्कश्च तच्छेषभूतः; सामग्रीविषयेण वा, अर्थस्वभावविषयेण वा निरूपणेन विषयविशेषे प्रमाणव्यवस्थापनं हि तर्कफलम्॥

अथ बाधकप्रमाणमुपन्यस्यति—**किं चेति**। तत्रानुमानं विवक्षुर्व्याप्तिं दर्शयति—**घटोऽस्तीत्यादिना**। 'वैधर्म्याच्च न स्वप्नादिवदि' त्यत्र सूत्रकारेणैव दृश्यत्वानुमानस्य निराकरिष्यमाणत्वाच्च, तन्निरासस्य मिथ्यात्वानुमानानां सर्वेषां दूष्यत्वप्रदर्शनार्थत्वात् पूर्वपक्षे व्यावर्तमानत्वे हेतुरुपन्यस्यते। अनुवृत्तत्वप्रदर्शनाय **घटोऽस्ति पटोस्ती**त्युक्तम्। सदनुभूत्योरेकत्वं वक्ष्यमाणं हृदि निधायानुभूतेरनुवृत्तिं दर्शयति—**घटोऽनुभूयते पटोऽनुभूयत इति**। ततः किमित्यत्राह—**अत्रेति। व्यावर्तमानतया** उत्तरोत्तरप्रतीतिविषयेष्वविद्यमानतया। **रज्जुसर्पादिवत्** रज्वादिवत् सर्पादिवेत्यर्थः। **तद्विवृणोति**—**यथेत्यादिना**। बाधितत्वाबाधित्याभ्यां द्वयोरपि हेत्वोः सोपाधिकत्वं दर्शयंश्चोदयति **ननु चेति** उपाधिनिवृत्त्या पक्षे साध्यनिवृत्तिमाह—**अत्रत्विति**। विपरीतोपाधिसद्भावाच्च व्याघात इति चाऽभिप्रायः। परिहरति **उच्यत इत्यादिना। प्रथमं** संप्रतिपन्नांशमाह—**घटादौ दृष्टा व्यावृत्तिरिति**। सपक्षेषु सर्वेषु विद्यमानः पक्षे विद्यमानो ह्युपाधिः, तत्र परेणोपाधित्वेनोक्तस्य धर्मस्य पक्षे विद्यमानत्वकथनेन व्यावर्तमानत्वहेतोः सोपाधिकत्वं दूषयिष्यंस्तदुपयोगित्वेन—घटादिषु दृष्टा व्यावृत्तिः किं संवादफलभूता, उत बाधफलभूतेति विवेचनीयमित्याह—**सा किं रूपेति। बाधफलभूतत्वं** दर्शयितुं व्यावृत्तिस्वरूपमाह **किं घटोऽस्तीत्यत्रेति**। घटोस्तीति प्रतीते विषये पटाभाव इत्यर्थः। **सिद्धं तर्हीति**। रज्वौ मूढज्ञानादीनामभावो हि बाधितत्वमिति भावः। तस्मात् बाधफलभूतैवेत्याह—**अत**

---

१ घटत्वजातिविशिष्टग्रहणम्। २ °प्रमाणभाव।

अतो बाधफलभूता विषयनिवृत्तिर्व्यावृत्तिः, सा व्यावर्तमानानामपारमार्थ्यं साधयति, रज्जुवत्सन्मात्रमबाधितमनुवर्तते, तस्मात्सन्मात्रातिरेकि सर्वमपरमार्थम्। प्रयोगश्च भवति—सत् परमार्थम्; अनुवर्तमानत्वात्—रज्जुसर्पादौ रज्ज्वादिवत्, घटादयोऽपरमार्थाः; व्यावर्तमानत्वात्—रज्ज्वाद्यधिष्ठानसर्पादिवदिति। एवं सत्यनुवर्तमानानुभूतिरेव परमार्था, सैव सती। ननु च—सन्मात्रमनुभूतेर्विषयतया ततो भिन्नम, नैवम; भेदो हि प्रत्यक्षविषयत्वात्, दुर्निरूपत्वाच्च पुरस्तादेव निरस्तः। अत एव सतोनुभूतिविषयभावोपि न प्रमाणपदवीमनुसरति, तस्मात्सदनुभूतिरेव। सा च स्वतःसिद्धा; अनुभूतित्वात्, अन्यतः सिद्धौ घटादिवदनुभूतित्वप्रसङ्गः। किंच—अनुभवान्तरापेक्षा चानुभूतेर्न शक्या कल्पयितुम; स्वसत्तयैव प्रकाशमानत्वात्, न ह्यनुभूतिर्वर्तमाना घटादिवदप्रकाशा दृश्यते, येन परायत्तप्रकाशाभ्युपगम्येत।

इति। बाधो नामादुष्टकारणजा निषेधबुद्धिः, तेन पुरोवर्तिन्यभावो व्यावृत्तिः। एवं निरुपाधिकत्वाद्यावर्तमानत्वमपारमार्थ्यसाधकमित्याह—**सेति**। अबाधितत्वफलभूतानुवृत्तेः परमार्थत्वे प्रयोजकत्वात् अनुवर्तमाने पारमार्थ्यं दर्शयति **रज्जुवदिति। अबाधो** नामाविरोधित्वम्। **अनुवृत्ति**र्नाम तत्कृतो विषयतयाऽन्वयः, पुरोवर्तिनि सद्भावो वा। इत्थं व्याप्तिः शिक्षिता। न केवलं तर्कः, अनुग्राह्यमप्यस्तीत्याह—**प्रयोगश्च भवतीति**। मायावेदान्तिनो हि ज्ञानमात्रपारमार्थ्यवादिनः, तत्कथं सतः पारमार्थ्यसाधनमित्यत्राह—**एवं सतीति। एवं सति** व्यावर्तमानत्वानुवर्तमानत्वयोरपारमार्थ्ये, पारमार्थ्ये च प्रयोजकत्वे सिद्ध इत्यर्थः। तर्हि परमार्थद्वयं स्यादित्यत्राह—**सैव सतीति**। अथ सदनुभूत्योर्विषयविषयिभावरूपं भेदमुद्घाटयंश्चोदयति—**ननु चेति**। भिन्नत्वं साध्यं, विषयतयेति हेतुः। परिहरति—**नैवमिति**। तत्र साध्यांशं दूषयति—**भेदोहीति। पुरस्तादेव** ज्ञेयभेदनिषेधादेव, ज्ञानभेदोऽपि निरस्तः इत्यर्थः। हेत्वंशं दूषयति **अत इति। न प्रमाणपदवीमनुसरतीति**। विषयविषयिभावो भ्रान्तिसिद्ध इत्यर्थः। भेदस्य भ्रान्तिसिद्धत्वमपिना समुच्चीयते। श्रुतिप्रतिपन्नार्थास्तर्केणापि साधयन्, विषयविषयिभावे निरस्ते ग्राहकाभावात् शून्यत्वशङ्कां च व्यावर्तयन्, स्वप्रकाशत्वमुपपादयति—**सा चेति। चः** शङ्कानिवृत्तौ। तत्र व्यतिरेकिणं हेतुमाह—**अनुभूतित्वादिति**। विपक्षे बाधं दर्शयति—**अन्यतः सिद्धाविति**। यदन्यतः सिद्धं तदनुभूति दृष्टं—यथा घटः, इति व्याप्तिरर्थादृशिता॥

अस्य व्यतिरेकिणः परामिमतं प्रत्यनुमानं सोपाधिकमिति दर्शयन् अर्थादनुमानान्तरमप्याह—**किं चेत्यादिना**। अनुमानान्तरं कण्ठोक्तम्, आर्थः प्रत्यनुमाननिरासो वा स्यात्। अनुमानान्तरस्य कण्ठोक्तत्वे **किंच**शब्दस्वरसः। प्रत्यनुमाननिरासस्य कण्ठोक्तत्वे **न शक्या कल्पयितु**मिति निर्देशस्वरसः। **किंचेति**। न केवलं स्वमतोपपत्तिः परमतानुपपत्तिश्चेत्यर्थः, अनुमानान्तरं चेति वार्थः। **अनुभवान्तरापेक्षा चेति**। पूर्वोक्तसमुच्चेतव्यद्वये। **किंच**शब्दसमुच्चितादन्यसमुच्चयपरश्चशब्दः। **न शक्या कल्पयितुं** ज्ञानं परप्रकाश्यं वस्तुत्वात्, भासमानत्वाद्वा घटादिवत्—इति प्रत्यनुमानम्, एवमादिभिः परप्रकाश्यत्वं न शक्यं वक्तुमित्यर्थः। कुत इत्यत्राह—**सत्तयैवेति**। सत्तयैव प्रकाशमानत्वादिति हेतोरसिद्धिशङ्कानिवृत्तये तं विवृणोति—**न हीति**। विद्यमानदशायां कदाचिदप्रकाशमानत्वं पराधीनप्रकाशत्वे प्रयोजकम्, अतः प्रत्यनुमानं सोपाधिकमित्यर्थः। विद्यमानदशायां सर्वदा भासमानत्वादिति व्यतिरेक्यनुमानान्तरमिति स्फुटतरं, यथा संवित्सिद्धौ—**'यद्यप्रकाशमाना धीः कदाचिदवतिष्ठते'** इत्यारभ्य **'घटादाविव तत्रापि कल्पनीयं प्रकाशन'**मिति। अनेन ग्रन्थेन स्वसत्तयैव प्रकाशमानत्वादिति हेतोरसिद्धिशङ्का परिहृता। विद्यमानत्वे सर्वदा प्रकाशमानत्वं सुखादावप्यस्तीत्यनैकान्त्यमिति—चेन्न; **सुखादिव्यतिरिक्तत्वे सती**ति विशेषणस्यामिप्रेतत्वात्, सिद्धान्तिमते सुखादेरपि ज्ञानविशेषत्वेन पक्षेऽन्तर्भावात् नानैकान्त्यम्॥

एवमनुमानान्तरमुक्तं, शङ्कितप्रत्यनुमानस्य सोपाधिकत्वं च दर्शितम्, अथ प्राकव्याप्तुमेयपक्षं निराचिकीर्षुरनुवदति—**अथैवं मनुष इत्यादिना**। प्रथमं स्वसत्तयैव प्रकाशमानत्वादिति हेतोरसिद्धिमुपपादयति—**उत्पन्नायामिति**। अनेन श्लोकस्य **वस्तुत्वात्, भासमानत्वा**दित्यादिप्रत्यनुमानस्य सोपाधिकत्वव्युदासश्च सेत्स्यतीति भावः। **उत्पन्नायामप्यनुभूतौ विषयमात्रमवभासत** इत्यत्र घटोऽयमितीत्यध्याहर्तव्यम्। **घटोऽयमिति** विषयमात्रमवभासत इत्यर्थः; 'घटोऽयमिति जानन्निति हि वक्ष्यते। यथा संवित्सिद्धौ **'घटोऽयमिति विज्ञाने घटमात्रं प्रकाशते। न वित्तिरिति युष्माकं गोष्ठीषु ननु घुष्यत'** इति। **घटोऽनुभूयत** इत्यस्योत्तरत्रान्वयः; पूर्वत्रान्वयश्चेत् **विषयमात्रमवभासत** इत्यनेन विरोधः स्यात्। कथं विषयमात्रस्यावभासः, घटोऽनुभूयत इत्यनुभवोऽपि प्रकाशत—इति शङ्कायां विषयमात्रस्यैवावभासमुपपादयति—

१ अनुभवापेक्षा। २ अबाधिफलभूत°।

अथैवं मनुषे—उत्पन्नायामप्यनुभूतौ विषयमात्रमवभासते घटोनुभूयत इति, नहि कश्चिद्घटोयमिति जानंस्तदानीमेवाविषयभूतामनिदंभावामनुभूतिमप्यनुभवति, तस्माद्घटादिप्रकाशनिष्पत्तौ चक्षुरादिकरणसंनिकर्षवदनुभूतेः सद्भाव एव हेतुः, तदनन्तरमर्थगतकादाचित्कप्रकाशातिशयलिङ्गेनानुभूतिरनुमीयते। एवं तर्ह्यनुभूतेरजडाया अर्थवज्जडत्वमापद्येत—इति चेन्, किमिदमजडत्वं नाम—न तावत्स्वसत्तायाः प्रकाशाव्यभिचारः; सुखादिष्वपि तत्संभवात्, न हि कदाचिदपि सुखादयः सन्तो नोपलभ्यन्ते, अतोनुभूतिः स्वयमेव नानुभूयते; अर्थान्तरं स्पृशतोप्यङ्गुल्यग्रस्य स्वात्मस्पर्शवदशक्यत्वादिति।—तदिदमनाकलितानुभवविभवस्य स्वमतिविजृम्भितम्; अनुभूतिव्यतिरेकिणो विषयधर्मस्य प्रकाशस्य रूपादिवदनु-

---

घटोऽनुभूयत इत्यादिना। यदा 'घटोऽयं'मिति जानाति न हि तदानीमेव 'घटोऽनुभूयत' इति जानाति। कुत इत्यत्राह—**अविषयभूतामनिदंभावामिति**। **अविषयभूतां** घटशब्दार्थव्यतिरिक्ताम्। **अनिदंभावाम्** अयंशब्दार्थव्यतिरिक्ताम्। घटत्वविशिष्टं पृथुवृत्तोदराकारद्रव्यं **घट**शब्दार्थः, सन्निहितदेशवर्तमानकालविशिष्टत्वम् **इदं**शब्दार्थः, उभयव्यतिरिक्तो ह्यनुभवः, स तु 'घटोऽयं'मित्यनुभववेलायां नानुभूयत इत्यर्थः। **अविषयभूतामिति** साधारणनिर्देशः पटादीनामपि प्रदर्शनार्थः; अत एवाघटभूतामित्यनुक्तिः। यद्वा, **घटोऽनुभूयत** इति पूर्वेणान्वयः। **इति**हैतौ। यतो घट एवानुभूतिकर्म, न त्वनुभूतिरपि तदानीमनुभूतिकर्म भवति, तस्माद्विषयमात्रमवभासत इत्यर्थः। अस्यैव विवरणं **न हीति**। शब्दलिङ्गालोकादीनां प्रकाशकानां ज्ञाततयैव प्रकाशकत्वं दृष्टम्, अतोऽनुभूतिरप्रकाशा चेत् प्रकाशकत्वमपि न स्यादित्यत्राह—**तस्मादिति**। सत्तया प्रकाशकं, ज्ञायमानतया प्रकाशकमिति द्विविधं प्रकाशकं, तत्र सत्तया प्रकाशककोटिनिविष्टं ज्ञानमित्यर्थः। क एवं नियामक इत्यत्राह—**तस्मादिति**। स्वसत्तयैव प्रकाशमानत्वहेतोरसिद्धेः, अस्मदुक्तहेतोः सोपाधिकत्वनिरासाच्चेत्यर्थः। यद्यनुभूतिः स्वयमेव न प्रकाशते तर्हि—किं तस्यां प्रमाणमित्यत आह—**तदनन्तरमिति। अर्थगतकादाचित्कप्रकाशातिशयलिङ्गेन** कादाचित्कत्वात्—कार्यं, कार्यत्वात् सहेतुकम्—इत्यनुमानेन ज्ञायत इत्यर्थः। विषयगतप्राकट्यलिङ्गेन कथं स्वगतज्ञानमनुमीयत इति चेत्—स्वस्मै प्रकाशमानत्वात्—स्वगतज्ञानानुमानमुपपद्यते, यदि ज्ञानपक्षाद्भावेन प्रकाशलिङ्गेन ज्ञानमनुमीयते, तर्हि—**घटोऽनुभूयत** इति वक्तुमयुक्तं, घटोऽन्वभावीत्येव तु वक्तुं युक्तमिति शङ्कायामुक्तं—**तदनन्तरमिति**। प्रत्यासत्त्यतिशयाद्वर्तमानत्वव्यपदेश इत्यर्थः; अर्थेन्द्रियसंप्रयोगसमनन्तरमेव **घटोऽनुभूयत** इति प्रतीतेः। प्राकट्यलिङ्गेन ज्ञानानुमानानवकाशत्वशङ्का चानेन परिहृता। **तदनन्तरमिति**। शतपत्रवेधवदनुमानशैघ्र्यात्तथा प्रतीतिरुपपद्यत इति भावः। मृषावादी स्वदर्शनसिध्याऽनिष्टं प्रसञ्जयति—**एवं तर्हीति**। **जडत्वं** ज्ञानव्यतिरिक्तत्वम्, अचित्त्वमित्यर्थः। इह चानुभूतिरजडेति विपर्यये पर्यवसानं, प्रसञ्जनीयस्य जडत्वस्यानिष्टत्वं च प्रतिक्षेप्तुमजडत्वं विकल्प्य दूषयति—**किमिदमिति। किमिदं** न किमपि, दुर्निरूपमित्यर्थः। अनन्तरं शिरोद्वयप्रदर्शनाभावात् **दुर्निरूपत्व**विवरणमुत्तरग्रन्थः। विकल्पपरो वा **किं**शब्दः। अजडत्वं नाम किं हेतुत्वेनोक्तं विद्यमानदशायां सर्वदा प्रकाशमानत्वम्, उत साध्यतयाऽभिमतं स्वयमेव स्वस्य प्रकाशकत्वम्—इति विकल्पोऽभिप्रेतः। तत्र प्रथमे कल्पे—किमुत्पत्तिकालेऽपि प्रकाशाव्यभिचारो विवक्षितः, उतोत्पत्तिक्षणादूर्ध्वं प्रकाशाव्यभिचारः—इति विकल्पोऽभिप्रेतः। तत्राद्ये शिरस्यसिद्धिः पूर्वमेवोक्तेति मत्वा द्वितीयेऽनैकान्तिकत्वमाह—**सुखादिष्विति**। तद्विवृणोति—**न हीति**। शिरोऽन्तरं दूषयति—**अत इति। अतः** हेतोरसिद्ध्यनैकान्तिकत्वाभ्यां साध्यमपि नेत्यर्थः। अनेन जडत्वं नानिष्टमिति दर्शितम्। अनुमानान्तरेण साधयिष्यत इत्यत्राह—**अर्थान्तरमिति**। व्याहतत्वान्न किंचिदपि प्रमाणमिममर्थं साधयितुमलमित्यर्थः। यथाहुः—'अङ्गुल्यग्रं यथात्मानं नात्मना स्प्रष्टुमर्हति। स्वांशेन ज्ञानमप्येवं नात्मानं ज्ञातुमर्हती'ति॥

एवं जडत्वप्रसङ्गरूपतर्कस्य विपर्यये पर्यवसानाभावो, व्याप्त्यभावः, इष्टप्रसङ्गत्वं, व्याघातलक्षणप्रतितर्कपराहतत्वं च दर्शितम्। **इति–अथैवं मनुष** इति पूर्वत्रान्वयः। अथ स्वयंप्रकाशत्ववाद्याह—**तदिदमिति। अनाकलितानुभवविभवस्य** स्वव्यतिरिक्तस्य **कृत्स्नस्य** प्रकाशकः सन्ननुभवः स्वात्मन्यन्यापेक्ष इति एको विभवः, प्राकट्यहेतुको यो व्यवहारः **प्रकाशत इति** तं च जनयितुमवमेव क्षम इत्यपरः, एवं द्विविधोऽनुभवविभवोऽनाकलितो येन सोऽनाकलितानुभवविभवः तस्य। **स्वमतिविजृम्भितं** प्रमाणतर्कनिरपेक्षस्वोत्प्रेक्षामात्रविजृम्भितमित्यर्थः, स्वमतिमाहात्म्यमित्यधिक्षेपो वा। पारिशेष्यात्स्वंप्रकाशत्वमभ्युपगमयितुं प्रथमं प्राकट्यलिङ्गं प्रतिक्षिपति—**अनुभूतीत्यादिना। अनुभूतिव्यतिरेकिण** इत्यनेनासाधारण्यप्रतिक्षेपः **फलितः। विषयधर्मश्**ब्देन आत्मधर्मव्युदासः, तेन रूपादिवत् साधारण्यं फलितम्। अनुभूतिव्यतिरेकिविषयधर्मः प्रकाशः प्रत्यक्षयोग्यो, न वा। न चेत्–लिङ्गज्ञानाभावात् अनुमानानुदयः। योग्यश्चेत्–अन्यैरप्युपलभ्यः स्यात्

पलब्धेः, उभयाभ्युपेतानुभूत्यैवाशेषव्यवहारोपपत्तौ [1]प्रकाशाख्यधर्मकल्पनानुपपत्तेश्च। अतो नानुभूतिरनुमीयते, नापि ज्ञानान्तरसिद्धा, अपि तु सर्वं साधयन्त्यनुभूतिः स्वयमेव सिध्यति। प्रयोगश्च—अनु-

रूपादिवदिति भावः। अपेक्षाबुद्धिजन्यस्य द्वित्वादेर्यथा तत्तदेकपुरुषवेद्यत्वं—तद्वत् प्राकट्यमपि तदेकपुरुषवेद्यमिति चेन्न; द्वित्वादिसंख्याः प्रागेव सन्ति, यथैकत्र सर्वा दिशस्तत्तदुपाध्यपेक्षाबुद्ध्याभिव्यज्यन्ताहिताः, एवमपेक्षाबुद्ध्याभिव्यज्यद्वित्वादि तस्यैव प्रकाशते यद्गतमभिव्यञ्जकम्, अत्र तु रूपादिवज्जन्यधर्मत्वाभ्युपगमात् सर्वैरुपलभ्येत। अभिव्यज्यत्वेऽभिव्यञ्जकवन एवावभासते सिद्धाञ्जनवतो निधिरिव, न तु जन्यं जनकस्यैवावभासतेः न हि कुलालस्यैव घटः प्रकाशते। **किंच—रूपादिवदिति** धर्मस्य निराश्रयोत्पत्त्ययोगादतीतानागतयोरर्थयोर्ज्ञायमानयोरपि प्राकट्यायोगात्—प्राकट्याभावेऽपि ज्ञानं प्रतीयत इति, तत्र रूपादिवत् प्राकट्यानुपलब्धेः प्राकट्येन ज्ञानानुमानं न संभवतीति भावः। यथा संविन्सिद्धौ—**'अतीतेऽनागते चार्थे कथं प्राकट्यसम्भवः। न हि धर्मिण्यसत्येव धर्मः सम्भवमृच्छती'ति**। अतीतानागतयोरपि द्वित्वादिवत् प्राकट्यं जन्यत—इति चेन्न; द्वित्वादेरपि निराश्रयोत्पत्त्ययोगात्, तत्र द्वित्वाद्यनुत्पत्तावपि घटादेरिव द्वित्वादेरपि धीस्थतया व्यवहारोपपत्तेश्च। ये पुनर्द्वित्वादिकं नाभ्युपयन्ति न तान् प्रति द्वित्वादिकं प्रतिबन्दीकार्यम्। विषयविषयिभावसंबन्धस्य विद्यमानाश्रयत्वनियमाभावात् विषयविषयिभाव एव प्राकट्यमिति चेन्नः संबन्धस्य संवन्धिभ्यां विना प्रतीत्यनुपपत्त्या संबन्धिज्ञानं च प्रतीयत इत्यनुमेयमेव न स्यादिति प्राकट्यं लिङ्गं न भवति। एवं प्राकट्याख्यं वस्त्वनुपलब्धमप्यन्यथाऽनुपपत्त्या कल्प्यत इत्याशङ्क्य कल्पकस्यान्यथासिद्धिं दर्शयति—**उभयेति**। अनुभूत्येत्युक्ते प्राकट्यस्य नामान्तरमुक्तं स्यादिति शङ्कानिरासार्थम् **उभयाभ्युपेत**शब्दः। यां प्राकट्यजनकत्वेन ह्यभ्यधाः, तयैवेत्येवकाराभिप्रायः। **अशेषव्यवहारो** ह्यनोपादानादिव्यवहारः। तस्यानुभूत्यैव सम्भवान्न तेन प्राकट्यं कल्प्यम्। 'ज्ञातो घटः, प्रकटो घट' इति व्यवहारश्च 'इष्टो घटः, द्विष्टो घट' इति व्यवहारवदन्यथासिद्ध **इत्यशेष**शब्दाभिप्रायः। न हीच्छाजन्येन वस्तुगतेष्टत्वेन इच्छाऽनुमीयते। 'घटः प्रकाशत' इति घटकर्तृकतया प्रकाशः प्रतीयते, 'घटमनुभवती'ति घटकर्मकतया अन्यकर्मकर्तृकतयाऽनुभवः प्रतीयते, एवमेककर्मैव कर्मकर्तृव्यवहारानुपपत्त्या कल्प्यत इति चेन्न; कारकभेदस्य धातुभेदनिबन्धनत्वेनार्थभेदनिबन्धनत्वाभावात्। यथा—'परशुमुद्यम्य वृक्षे निपातयति, परशुना वृक्षं छिनत्ती'त्युक्तौ परशोः कर्मत्वकरणत्वे श्रुते अथापि नार्थभेदः, वृक्षस्याधिकरणत्वकर्मत्वे श्रुते तथापि नार्थभेदः, तथा—व्यवहारभेदस्य धातुभेदनिबन्धनत्वेनार्थभेदनिबन्धनत्वाभावान्न व्यवहारः प्राकट्यकल्पक इत्यभिप्रायेण चा**शेषव्यवहारोपपत्ता**वित्युक्तम्। घटः प्रकाशत इति व्यवहारो घटगतातिशयेन विना नोपपद्यते; अन्यथा पटेऽपि तस्य व्यवहारस्य प्रसङ्गात्। स चातिशयः प्राकट्यमिति चेन्न; योऽतिशयो व्यवस्थापकः स कथं घट एव स्यात् न पटे। इन्द्रियसंप्रयोगवशादिति चेत्, तेन ज्ञानमेव व्यवस्थाप्यतां किमतिशयान्तराभ्युपगमेनेत्यसमर्थोऽप्य**शेषव्यवहार**शब्देनाभिप्रेतः॥ यत्तु **'घटोऽय'मित्यनुभववेलायां नानुभूत्यनुभव** इति तन्नः **अनुभूयत** इति शब्दाप्रयोगस्याविवक्षानिबन्धनत्वेनानुभवप्रयुक्तलाभावात्। लोको ह्यनुभूतकर्तृत्वार्थविवक्षाऽस्ति चेत् तं सर्वं वदति, एकदेशविवक्षा चेदनुभूतैकदेशं वदति, एकदेशविवक्षाऽपि नास्ति चेत् न किंचिदपि वदति, अतोऽ**नुभूयत** इति शब्दाप्रयोगो न तदप्रकाशत्वहेतुः। इदमप्य**शेषव्यवहार**शब्देनाभिप्रेतं; विकलस्याविकलस्यापि व्यवहारस्याशेषशब्देन क्रोडीकर्तुं शक्यत्वात्। एवं व्यवहारस्यान्यथासिद्धत्वात्—अनन्यथासिद्धस्यैव कल्पकत्वात् न प्रकाशः कल्प्य इत्यर्थः॥

प्राकट्यानुमेयत्वानुपपत्ति निगमयति—**अत इति। अतः** अनुपलब्धिव्यवहारान्यथासिद्धिभ्यां प्राकट्याभावात्। अनुभूतिर्न प्राकट्यानुमेयेत्यर्थः। मानसप्रत्यक्षवेद्यत्वानुपपत्तिमभिप्रेत्याह—**नापि ज्ञानान्तरसिद्धेति**। इदमत्र परोक्तमनुमानं—ज्ञानं मानसप्रत्यक्षग्राह्यं; क्षणिकत्वे सत्यात्मविशेषगुणत्वात्—सुखदुःखप्रयत्नादिवदिति। **आत्मविशेषगुणत्वा**दित्युक्ते धर्माद्यनैकान्त्यं स्यादिति तद्व्यावृत्त्यर्थं **क्षणिकत्वे सती**त्युक्तम्। **क्षणिकविशेषगुणत्वा**दित्युक्ते शब्दादौ व्यभिचारः, क्षणिकात्मगुणत्वादित्युक्ते आत्मनः संयोगे व्यभिचारः स्यादिति तत्परिहारार्थमा**त्म-विशेष**शब्दौ। तदिदमनुपपन्नं; क्षणिकत्व-गुणत्वयोरन्यतरासिद्धत्वात्। दृष्टान्तश्च साधनविकलः। किंच—यत् मानसप्रत्यक्षवेद्यं तदबुभुत्सितग्राह्यं दृष्टं—यथा सुखादि, अतश्च तद्विषयज्ञानं नियतमिति वक्तव्यं, तस्मात् घटादिज्ञानविषयं यत् ज्ञानं तस्याप्यबुभुत्सितग्राह्यत्वात् मानसप्रत्यक्षवेद्यत्वं स्यात्, तद्विषयज्ञानस्यापि तथेत्यनन्तसंविदावलिस[3]मुदयस्यावर्जनीयत्वात् ज्ञानान्तरानवकाशः स्यात्। मानसप्रत्यक्षग्राह्यत्वस्याबुभुत्सितग्राह्यत्वव्याप्यत्वं नास्ति, खापादाबुच्छ्वासनिश्वासप्रयत्ने सत्यपि तद्ग्रहणाभावादिति—चेन्न; तदानीं जीवात्मनि प्रयत्नस्यैवा[4]भावात्। देहधारणादयः परमात्मसङ्कल्पाधीनास्तदानीमिति हि [5]वेदान्तिनः। **अन्तराभूतग्रामवत्** इत्यधिकरणेऽयमर्थः सुनिर्णयः। स्वापे देहपरिवर्तनादिस्वाङ्गप्रत्यङ्गतोदात्, दंशमशकादिजन्यदुःखादिना वाऽल्पबोधे सति भवति, तदानीं च प्रयत्नो धीविषयः, अतो हेतोरव्यभिचारात् मानसग्राह्यं सर्वमबुभुत्सितग्राह्यमिति अनवस्था

१ प्रकाशाख्यार्थ धर्म°। २ °कृतस्वार्थ°। ३ °समुदाय°। ४ °वासंभवात्। ५ वेदान्तवादिनः।

भूतिरनन्याधीनस्वधर्मव्यवहारा; स्वसंबन्धादर्थान्तरे तद्धर्मव्यवहारहेतुत्वात्। यः स्वसंबन्धादर्थान्तरे

स्यादेव। यदि बुभुत्सितग्राह्यं, तर्ह्यन्योन्याश्रयणं—ज्ञाने सतीच्छा, इच्छायां सत्यां ज्ञानमिति। किंच—मानसप्रत्यक्षवेद्यस्य बुभुत्सितग्राह्यत्वेऽपि सुखादिषूपलब्धिनियमदर्शनात् बुभुत्सानियमः कल्प्य इति—तद्वदेव ज्ञानेऽपि बुभुत्सानियमसिद्धिः, उपलब्धिश्च नियता स्यात्, अतो बुभुत्सान्तरितज्ञानपरम्परायां अविरतिः स्यात्। ज्ञानं बुभुत्सितग्राह्यं, सुखादि तु न तथेति चेन्न; मानसप्रत्यक्षवेद्यत्वाविशेषे नियामकाभावात्। सुखादिषु, घटादिविषयप्रथमज्ञाने च बुभुत्सा, द्वितीयादौ तु नेति चेन्न; नियामकाभावात्। मानसग्राह्यत्वाविशेषात् प्राप्तां बुभुत्सां को वारयेत्; मानसग्राह्यत्वे सति हि बुभुत्सा। सुखादिकम्, घटादिविषयप्रथमज्ञानं च मानसग्राह्यं, द्वितीयादिज्ञानं न मानसप्रत्यक्षवेद्यमिति—चेन्न; तत्रापि नियामकाभावात्। किंच—क्षणिकात्मविशेषगुणत्वे सत्यपि द्वितीयादिज्ञानं न मानसग्राह्यं चेत्, हेतोरनैकान्त्यम्। यदा प्रत्यक्षेण गृह्यते तदा मानसग्राह्यमिति चेत्, तर्हि—पक्षः, हेतुश्च प्रत्यक्षग्राह्यशब्देन विशेष्यौ स्याताम्। किंच अन्यैरप्युक्तानि दूषणान्तराण्युच्यन्ते—यदि, द्वितीयज्ञानं न मानसग्राह्यं, तस्य द्वितीयस्य निष्प्रमाणकत्वेन शून्यता च स्यात्, ततश्च प्रथमस्य, ततस्तद्विषयघटादेरपि शून्यता स्यात्, द्वितीयादिज्ञानं स्वतःसिद्धं चेत्, प्रथमज्ञानमपि तथा स्यादिति एवमाद्यभिप्रायेण **नापि ज्ञानान्तरसिद्धेरि**त्युक्तम्॥

अथ पारिशेष्यात् स्वयंप्रकाशत्वं सिद्धमित्याह—**अपि त्विति। सर्वमिति।** अन्यथा संविदः शून्यत्वेन तदधीनसिद्धि सर्वं शून्यं स्यादिति तत्परिहाराय स्वयंप्रकाशत्वमवश्याभ्युपगन्तव्यमित्यभिप्रायेण **सर्वं साधयन्त्यनुभूतिः स्वयमेव सिद्ध्यतीत्युक्तम्।** यथा संवित्सिद्धौ—**'तदेवापश्यतां सर्वशून्यत्वात् बिभ्यतां सताम्। गतिः स्वयंप्रकाशत्वादृते नान्योपलभ्यत'** इति। अथ तर्कानुग्राह्यं स्वयंप्रकाशत्वे प्रमाणमुपन्यस्यति—**प्रयोगश्चेति।** न केवलं पारिशेष्यात् स्वतःसिद्धत्वं, साधकप्रमाणमप्यस्तीति चार्थः। **अनुभूति**रित्यादिना अनुमानद्वयं ग्रन्थलाघवार्थमविभागेनोक्तम्। अनुभूतिरनन्याधीनस्वधर्मा; स्वसंबन्धादर्थान्तरे तद्धर्महेतुत्वात्, अनुभूतिरनन्याधीनस्वव्यवहारा; स्वसंबन्धादर्थान्तरे तद्व्यवहारहेतुत्वात्—इत्येवं विभागः। अत एव हि **'परत्र व्यवहारविशेषहेतोः स्वस्मिन्नपि तद्व्यवहारहेतुत्व'**मित्युत्तरत्र वक्ष्यते। प्राकट्यमभ्युपगम्य तदुपजीवनेन प्रथममनुमानमुक्तं, तदनुपजीव्य तु द्वितीयम्। प्राकट्याभ्युपगमस्य न स्वयंप्रकाशताविरोधित्वं; तस्य ज्ञानानुमापकत्वानभ्युपगमात्। धर्मवत्त्वे, अनन्याधीनधर्मवत्त्वे च साध्ये सिद्धसाध्यता स्यात्, अनुभूतित्वादिधर्माणां हेत्वन्तरनैरपेक्ष्यात्। न ह्यनुभूतित्वजातिर्हेत्वधीना; नित्यत्वात्। जात्यनभ्युपगमेऽप्यनुभूतित्वस्यानुभूतिसामग्र्यव्यतिरिक्तहेत्वनपेक्षत्वात् सिद्धसाध्यता अतोऽ**नन्याधीनस्वधर्मे**त्युक्तम्। **स्वस्य धर्मः** स्वोत्पाद्यतया संबन्धी धर्मः स्वधर्मः, परत्र स्वसाध्यधर्मात्यन्तसजातीयधर्म इत्यर्थः **अर्थान्तरे तद्धर्महेतुत्वा**दिति हेतूक्तेः। स्वधर्मशब्दनिर्दिष्टधर्मो हि तच्छब्दोक्तः। परत्र स्वसाध्यधर्मात्यन्तसजातीयः स्वस्मिन्नवश्यं भावी धर्मः स्वधर्मत्वेन विवक्षितः। अत एव स्वस्मिन् रूपिलानापादनात् रूपस्य दृष्टान्तस्य साध्यविकलत्वाशङ्का व्युदस्ता स्यात्, दण्डान्तरनिरपेक्षं स्वस्मिन् दण्डित्वमनापादयति दण्डे व्यभिचारश्च परिहृतः स्यात्। **अन्य**शब्दश्च स्वात्यन्तसजातीयान्यपरः; अन्यथा हेतुमात्रनिरपेक्षत्वे दृष्टान्तस्य साध्यविकलत्वं स्यात्। चक्षुरायपेक्षं हि रूपस्य चाक्षुषत्वम्। तादृशहेत्वपेक्षानियमराहित्यमनन्याधीनशब्देन विवक्षितम्; अन्यापेक्षामात्रविरहे साध्ये परज्ञानस्यानुमेयत्वदर्शनेन बाधितत्वप्रसङ्गात्। न हि ज्ञानान्तरागोचरत्वमेतदनुमानसाध्यम्, अपि तु स्वात्यन्तसजातीयानपेक्षप्रकाशार्हत्वमात्रं, तच्च परज्ञानस्य संभवतीति न बाधितविषयत्वम्। **अनन्याधीनस्वव्यवहारे**त्रापि व्यवहारवत्त्वे साध्ये सिद्धसाध्यता, अतोऽ**नन्याधीन**शब्दः। **अन्य**शब्दस्यात्यन्तसजातीयपरत्वाद्वाग्वायपेक्षया बाधितत्वशङ्का परिहृता स्यात्। घटादीनां हानादिव्यवहारे स्वात्यन्तसजातीयानपेक्षो हेतुरनुभूतिरिति सिद्धसाध्यत्वव्युदासाय **स्व**शब्दः। स च परत्र स्वसाध्यव्यवहारात्यन्तसजातीयपरः, व्यवहारस्यात्यन्तसजातीयत्वं नाम—अभिन्नप्रवृत्तिनिमित्तकत्वम्। व्यवहारानुगुण्यमात्रं हि प्रकाशत इति व्यवहारस्य निमित्तम्। परज्ञानव्यवहारे कालात्ययापदेशपरिहारायापेक्षानियमराहित्यं विवक्षितम्। **हेतुमाह—स्वसंबन्धादिति।** धर्महेतुत्वे, व्यवहारहेतुत्वे च हेतौ विवक्षितेऽनैकान्त्यं स्यादिति तत्परिहाराय **तच्छब्दः। स्वस्य** यो धर्मो, व्यवहारश्च तदत्यन्तसजातीयो धर्मो, व्यवहारश्च **तच्छब्द**विवक्षितः। स्वस्यात्मसम्बन्धात् स्वस्मिन् पूर्वरूपसजातीयरूपान्तरतद्व्यवहारहेतुर्घटोऽग्निसापेक्ष—इति तत्र व्यभिचारपरिहारा**यार्थान्तर** इत्युक्तम्। किं**चार्थान्तर**शब्दो निर्दिष्टजातीयाद्विजातीयपरः, तेन परस्मिन् द्रव्ये संयुक्ततद्व्यवहारहेतोर्द्रव्यस्य परद्रव्यसापेक्षतयाऽनैकान्त्यं परिहृतं स्यात्। द्रव्यं हि द्रव्यस्यात्यन्तसजातीयम्॥ ननु—घटो हि पटे संयुक्तत्वादिकमापादयन् स्वस्य तथात्वे घटान्तरापेक्ष इत्यनैकान्त्यं चैवं; स्वसजातीयापेक्षानियमविरहरूपस्य साध्यधर्मस्य तत्र विद्यमानत्वात्। नहि—घटः स्वसंयुक्तत्वादौ स्वात्यन्तसजातीयं घटमेवापेक्षत इति—नियमोऽस्ति। पुत्रे पुत्रत्वतद्व्यवहारहेतौ पितरि स्वस्य पुत्रत्वतद्व्यवहाराय पित्रन्तरसापेक्षे

---

१ °प्रत्यक्षत्वविशेषे। २ साध्यविकल्पत्वं स्यात्।

तद्धर्मव्यवहारहेतुः स तयोः स्वस्मिन्ननन्याधीनो दृष्टः। यथा—रूपादिश्चाक्षुषत्वादौ। रूपादिर्हि पृथिव्यादौ स्वसंबन्धाच्चाक्षुषत्वादि जनयन्स्वस्मिन्न रूपादिसंबन्धार्धीनश्चाक्षुषत्वादौ। अतोनुभूतिरात्मनः प्रकाशमानत्वे, प्रकाशत इति व्यवहारे च स्वयमेव हेतुः। सेयं स्वयंप्रकाशानुभूतिर्नित्या च; प्रागभावाद्य-

व्यभिचारपरिहाराय—**स्वसंबन्धादित्युक्तम्।** विद्यमानः स्वसंबन्धो विवक्षितः। परत्र स्वसंबन्धतुल्यकालस्वगतधर्मात्यन्तसजातीयधर्म—तत्सापेक्षव्यवहार—हेतुत्वादित्यर्थः। न हि पित्रादिप्रवासनिधनयोः पुत्रादौ पुत्रत्वं, तद्व्यवहारश्चापगच्छति। अत एव स्वस्मिन्नन्यापेक्षद्वैधीभावमनापादयति परत्र द्वैधीभावहेतौ द्रव्ये व्यभिचारश्च दूरोत्सारितः॥

ननु—सिद्धान्तिनोऽप्यभिमतमिदमनुमानं—चेतनः स्वसंबन्धतुल्यकालं शरीरत्वं शरीरे जनयन् स्वस्मिन् शरीरत्वतद्व्यवहारयोर्नान्यानपेक्षः, अपि तु परमात्मसापेक्षः, परमात्मा च चेतनत्वादत्यन्तसजातीयः, अतस्तत्रानैकान्त्यमिति—नैवं; स्वव्यापकधर्महेतुत्वस्य विवक्षितत्वात्। न हि चेतनत्वव्यापकं शरीरत्वम्; ईश्वरस्य चेतनस्यापि शरीरत्वाभावात्। अतः स्वधर्मशब्दाभिप्रेतेन स्वावश्यंभावित्वेन परिहारः। एतदुक्तं भवति—**धर्म**शब्दः प्रकाशपरो वा, धर्ममात्रपरो वा; **अन्य** शब्दश्च अन्यमात्रपरो वा, स्वात्यन्तसजातीयभूतान्यपरो वा। तत्र हेतुमात्रानपेक्षप्रकाशत्वे—दृष्टान्तस्य साध्यविकलत्वं; रूपं हि चक्षुरादापेक्षप्रकाशम्। स्वात्यन्तसजातीयानपेक्षप्रकाशत्वे साध्ये—व्यर्थविशेषणत्वं हेनोः; हेतुत्वमात्रेण साध्यसिद्धेः। नहि यस्य[1] कस्यचिद्धेतुः सन् घटादिः स्वप्रकाशे घटान्तरमपेक्षते। हेत्वनपेक्षधर्मत्वे—अनुभूतित्वादिना सिद्धसाध्यता, परश्वधादिष्वनैकान्त्यं च; काष्ठद्वैधीभावहेतोः परश्वधस्य स्वद्वैधीभावे हेत्वन्तरसापेक्षत्वात्। स्वात्यन्तसजातीयानपेक्षधर्मत्वे—चानुभूतित्वादिना सिद्धसाध्यता, विषयप्रकाशके परज्ञाने लिङ्गापेक्षप्रकाशत्वदर्शनात् बाधश्च। रूपे रूपान्तरानपेक्षस्वगतरूपत्वहेतुत्वाभावात् दृष्टान्तस्य साध्यविकलता। पुत्रगतपुत्रत्वहेतौ—पित्रन्तरसापेक्षपुत्रत्वधर्मे पितरि अनैकान्त्यं च। परद्रव्यगतसंयुक्तत्वहेतौ—द्रव्यान्तरसापेक्षसंयोगे द्रव्ये चानैकान्त्यम्। अत एवमादिदोषपरिहारार्थमित्थं प्रयोक्तव्यम्—अनुभूतिः स्वजन्यपरगतधर्मात्यन्तसजातीयधर्मभाक्त्वे स्वात्यन्तसजातीयापेक्षानियमरहितेति प्रतिज्ञा, स्वविसजातीये स्वावश्यंभावधर्मात्यन्तसजातीयस्वसम्बन्धतुल्यकालधर्महेतुत्वादिति हेतुः, तथा—अनुभूतिः स्वजन्यपरगतव्यवहारात्यन्तसजातीयव्यवहारभाक्त्वे स्वात्यन्तसजातीयापेक्षानियमरहितेति प्रतिज्ञा, स्वविसजातीये स्वावश्यंभाविव्यवहारात्यन्तसजातीयस्वसंबन्धतुल्यकालव्यवहारहेतुत्वादिति हेतुः। व्यवहारस्य स्वावश्यंभावित्वं नामावश्यं भाविधर्मनिबन्धनत्वम्। व्याप्तिदर्शनपूर्वकं दृष्टान्तमाह—**य इति।** साध्यसाधनधर्मौ सपक्षे दर्शयति—**रूपादिर्हीति।** पक्षधर्मतावत्सिद्धमर्थमाह—**अतोऽनुभूतिरिति। प्रकाशत इति व्यवहार इति।** 'अनुभूतिः प्रकाशत' इति व्यवहारे, 'इत्यनुभूति'रिति व्यवहारे चेत्यर्थः। ननु स्वसंबन्धादर्थान्तरे तद्धर्मव्यवहारहेतुत्वं सोपाधिकं; संबन्धविशेषादर्थान्तरे तद्धर्मव्यवहारहेतुत्वस्यैव स्वस्मिंस्तद्धर्मव्यवहारयोरनन्याधीनत्वे प्रयोजकत्वात्, सच सम्बन्धविशेष आश्रयाश्रयिभावरूपः, सच रूपादावस्ति, न तु पक्ष इति—नैतत्; अस्य साध्यसमव्याप्त्यभावेनानुपाधित्वात्। आश्रयाश्रयिभावविरहेऽपि संबन्धमात्रादर्थान्तरे प्रकाशत इति व्यवहारहेतोर्दीपस्य **स्वस्मिन्नपि** तद्व्यवहारेऽत्यन्तसजातीयानपेक्षत्वं हि दृष्टम्। पूर्वं ज्ञानस्य परप्रकाशत्ववादिभिः **स्वसत्तयैव प्रकाशमानत्वा**दिति हेतोरसिद्धिर्व्याहतिश्चोक्ते, तत्र घटोऽयमित्यनुभववेलायां**मनुभूयत** इति शब्दस्याप्रयोगात् असिद्धिरुक्ता, शाब्दव्यवहारे वैकल्यपौष्कल्ययोर्विवक्षाविशेषहेतुकत्वेनार्थानुभवे, अननुभवे च प्रयोजकत्वाभावकथनादसिद्धिः परिहृता, व्याहतिश्च नास्ति। तथाहि—अङ्गुल्यग्रस्य स्वात्मसदृशीदिषु व्याहतिरूपलब्धिनिबन्धना, दीपादिषु च प्रकाश्यत्व-प्रकाशकत्वे दृश्येते, निरूप्यमाणे कर्मकर्तृभावे विरोध एव नास्ति, निरासको दीपः—निरसनीयं तमः, दीपउत्पादकः—ज्ञानमुत्पाद्यं, ज्ञानमुत्पादकं—व्यवहार उत्पाद्यः इति। **किंच**—यद्यपि कर्मकर्तृभावस्य स्वतो विरोधात् भेदकत्वमुपलब्धिसिद्धं, तथापि ज्ञापकेषु विरोधनियमाभावश्चोपलब्धिसिद्धः—**ज्ञातरि** मनसि, शब्दशब्दे, पदमिति पदे, तथेदशार्थान्तरेष्वविरोधो हि उपलभ्यते, उत्पादकेष्वेव तु विरोधनियमः, तत्र चाकारान्तरेण चेदविरोधः। ननु—घटादिषु व्यवहारार्हत्वं स्वव्यतिरिक्तज्ञानहेतुकं दृष्टं, ज्ञाने व्याप्तिर्भज्यते चेत्, व्यवहारस्य ज्ञानपूर्वकत्वव्याप्तिभङ्गेन अज्ञातस्यैव ज्ञानस्य व्यवहारास्पदत्वं स्यात्—नैवं: घटादिषु ज्ञेयव्यतिरिक्तज्ञातृदृश्यत्वेऽपि स्वेनैव ज्ञात्रा ज्ञातरि दृश्यत्वमिति सर्वाविगीतमिति तत्र परेणापि कर्मकर्तृविरोधव्याप्तिभङ्गोऽभ्युपगन्तव्यः, तथा घटादौ स्वव्यतिरिक्तकरणजन्यज्ञानदृश्यत्वेऽपि मनसि तद्भ्रमः स्वानुमाने मनस एव करणत्वात्, तथा सर्ववाच्यानां स्वव्यतिरिक्तशब्दवाच्यत्वेऽपि शब्दशब्दे, पदपदे च तद्भ्रमं, घटादीनां स्वव्यतिरिक्तवाग्व्यवहार्यत्वेऽपि वागिन्द्रिये तद्भ्रमम्, अतः कर्मकर्तृभावस्य [1]विरोधव्याप्तिर्नास्ति। व्यवहारस्य ज्ञानपूर्वकत्वं तु न कैश्चिदपि भ्रमं, ज्ञानव्यवहारस्य ज्ञानकर्मतापूर्वकत्वविरहः प्रसज्यते चेन्नानिष्टः; अवभासपूर्वकत्वविरहस्याभ्रमव्याप्तिकत्वान्न तद्विरहप्रसङ्गः। तस्मादवभासमानस्यैव ज्ञानस्य व्यवहारास्पदत्वम्, अतः स्वविषयपरविषयव्यवहारानुगुण्यं ज्ञानस्य युक्तम्॥

१ विरोधि°।

भावान् । तदभावश्च स्वतःसिद्धत्वादेव । न ह्यनुभूतेः स्वतःसिद्धायाः प्रागभावः स्वतोन्यतो वावगन्तुं शक्यते । अनुभूतिः स्वाभावमवगमयन्ती सती तावन्नावगमयति; तस्याः सत्त्वे विरोधादेव तदभावो नास्तीति कथं सा स्वाभावमवगमयति । एवमसत्यपि नावगमयति; अनुभूतिः स्वयमसती कथं स्वाभावे प्रमाणं भवेत् । नाप्यन्यतोवगन्तुं शक्यते; अनुभूतेरनन्यगोचरत्वात् । अस्याः प्रागभावं साधयत्प्रमाणमनुभूतिरियमिति विषयीकृत्य तदभावं साधयेत् । स्वतःसिद्धत्वेनेयमिति विषयीकारानर्हत्वात्तत्प्रागभावो नान्यतः शक्यावगमः । अतोस्याः प्रागभावाभावादुत्पत्तिर्न शक्यते वक्तुमिति, उत्पत्तिप्रतिबद्धाश्चान्येपि भावविकारास्तस्या न सन्ति । अनुत्पन्नेयमनुभूतिरात्मनि नानात्वमपि न सहते; व्यापकविरुद्धोपलब्धेः । न ह्यनुत्पन्नं नानाभूतं दृष्टम् । भेदादीनामनुभाव्यत्वेन च रूपादेरिवानुभूतिधर्मत्वं न संभवति । अतोनुभूतेरनुभवस्वरूपत्वादेवान्योपि कश्चिदनुभाव्यो नास्या धर्मः । यतो निर्धूतनिखिलभेदा संविदत एव

अथ ज्ञातृज्ञेयनिरसनं, ज्ञानस्य स्वयंप्रकाशत्वं च बौद्धपक्षेऽपि समानमिति तद्व्यावर्तकं ज्ञानस्य नित्यत्वं साधयति—**सेयमिति । सेयं** परमार्थभूतसन्मात्रैक्या, प्रमाणाविषयभूता चेत्यर्थः । यद्वा, स्वयंप्रकाशत्वहेतुभूतधर्मवत्तया प्रसिद्धेत्यर्थः । स्वयंप्रकाशत्वस्य नित्यताहेतुत्वविवक्षया **स्वयंप्रकाशे**त्युक्तम् । **चः** साध्यसमुच्चये, सौगतसाम्यशङ्कानिवृत्तौ वा । कुत इत्यत्राह—**प्रागभावादिति** । सच कथमिति शङ्कायां ग्राहकाभावादित्यभिप्रायेणाह—**तदभावश्चेति** । स्वतःसिद्धत्वेन प्रागभावाद्यभावं विकल्पमुखेन प्रतिपिपादयिषुर्विकल्पशिरोद्वयेऽनुपपत्तिं प्रतिजानीते—**न हीति** । स्वतःपक्षे अनुभूतिः किं सती स्वाभावमवगमयति, उतासतीति-विकल्पमभिप्रेत्य सत्त्वपक्षं दूषयति—**अनुभूतिरिति** । कुत इत्यत्राह—**तस्या इति** । ग्राह्याभावादित्यर्थः । अनुभूतिः किमनुभूमित्यादिरूपा स्वाभावमवगमयति, उत प्रत्यक्षरूपेति-विकल्पे लिङ्गाद्यभावात् प्रथमः कल्पो न संभवतीत्यभिप्रेत्य, द्वितीयः कल्पो ग्राह्याभावादूषितः, पूर्वाभिप्रेतविकल्पशिरसोरसत्त्वपक्षं ग्राहकाभावेन दूषयति—**एवमिति** । पूर्वतरामिप्रेतयोर्विकल्पशिरसोरन्यत इति पक्षं दूषयति—**नापीति** । अनुभूतिरनन्यगोचरा स्यात् ततः किमभावाग्रहणस्य, अभावो ह्यन्यगोचरत्वमर्हतीत्यत्राह—**अस्या इति । अस्याः** न ह्यन्यस्य प्रागभावो ग्राह्यः, अपि त्वनुभूतेरेव । तस्मात् तां विषयीकृत्यैव तदभावो ग्राह्यः, तस्या विषयीभावानर्हत्वात् न तत्प्रागभावग्रहणं शक्यमित्यर्थः । एवं प्रागभावाभावादुत्पत्त्यभावः, ततश्च परिणामादिसर्वविकारान्तराभावमप्युपपादयति—**अतोऽस्या इति । अतः** स्वतःपरतःपक्षयोरुभयोरप्यभावस्य दुर्ग्रहत्वादित्यर्थः । विकारमात्रविरहे साध्येऽनुत्पन्नत्वम्, अन्तवति प्रागभावेऽनैकान्तिकं स्यात्, अतो भावरूपविकारविरहस्य साध्यत्वज्ञापनाय **भाव**शब्दः । यद्वा, भावस्य विकार इति षष्ठीसमासः, ततश्च भावाभावरूपविकारमात्रविरहे साध्ये प्रागभावे व्यभिचारशङ्कानिवृत्त्यर्थं **भावत्वे सत्यनुत्पन्नत्वं** विकारान्तराभावे प्रयोजकमिति फलितम् । अनुभूतिर्नान्तवती, भावरूपत्वे सत्यनुत्पन्नत्वात्, यदन्तवत् तद्भावरूपत्वे सत्यनुत्पन्नं न भवति—यथा घट इति ॥

बौद्धाभ्युपगतक्षणिकत्वव्यावृत्त्यर्थं नित्यत्वायानुत्पत्तिः, तद्व्यापकविकारान्तराभावश्च साधितौ, अथ तदभ्युपगतानेकत्वव्यावृत्त्यर्थं सजातीयभेदं व्युदस्यति—**अनुत्पन्नेयमिति । व्यापकविरुद्धोपलब्धेः** नानात्वव्यापकोत्पत्तिविरुद्धानुत्पत्त्युपलब्धेरित्यर्थः । अथ व्याप्तिं दर्शयति—**न हीति** । अस्य ग्रन्थस्य—यदनुत्पन्नं तदनानाभूतं दृष्टम्-इत्यर्थो वक्तुं न युज्यते; ब्रह्मव्यतिरेकेणानुत्पन्नस्य अनानाभूतस्य कस्यचिन्मायावेदान्तिभिरनभ्युपगमात् । यदनानाभूतं तदनुत्पन्नमित्युक्ते—व्यापकजन्मनिवृत्त्या व्याप्यनानात्वनिवृत्तिरुक्ता न स्यात्, तस्मादयमर्थः—यन्नानाभूतं तदनुत्पन्नं न दृष्टम्, अपि तूत्पत्तिमदेव दृष्टमिति—जन्मनो नानात्वव्यापकत्वं दर्शितम् । अनेनोत्पत्तिनिवृत्त्या नानात्वनिवृत्तिरित्यर्थसिद्धम् । यद्वा यथा 'न ह्यग्निं धूमवदृष्ट'मित्युक्ते—अग्निमदेव धूमवदित्युक्तं स्यात्, तद्वदिहाप्यनुत्पन्नं नानाभूतं न दृष्टमित्युक्ते—उत्पत्तिमदेव नानाभूतमित्युक्तं स्यात्, ततश्चोत्पत्तिर्व्यापिकेत्युक्तं भवति । अनुभूतिर्नाना न भवति—अनुत्पन्नत्वात्, यन्नानाभूतं तदुत्पत्तिमदृष्टं—यथा घट इति व्यतिरेक्यनुमानमनुभूति पक्षीकृत्योक्तम् । गगनादिषु व्यभिचारो दुर्वचः; तेषामुत्पत्तिमत्त्वेन वेदान्तिभिरभ्युपगमादिति भावः । एवं सजातीयभेदो निषिद्धः, अस्मिन्नर्थे, विकारान्तराभावे च-भेदं, विकारान्तरं च पक्षीकृत्यान्वय्यनुमानमाह—**भेदादीनामिति । आदि**शब्देन उत्पत्त्यादयो विवक्षिताः । भेदादयो नानुभूतिधर्माः; अनुभाव्यत्वात्—रूपादिवदिति व्यावृत्तिरूपधर्मोऽपि नास्तीत्युपपादयति—**अतोऽनुभूतेरिति । अन्योऽपि**—व्यावृत्तिरूपोऽपीति भावः । यद्वा, विकारः नानात्व-जडत्वनिषेधान्नित्यत्व-कत्व-स्वयंप्रकाशत्वरूपधर्मवत्त्वशङ्काव्युदासार्थं, पूर्वोक्तनानात्वादिनिरासार्थं च व्यतिरेक्यनुमानमाह—**अतोऽनुभूतेरिति । अन्योऽपि** नित्यत्वादिरूपोऽपीत्यर्थः । अनुभूतिर्न व्यावृत्तिरूपधर्मभाक्; अनुभवस्वरूपत्वात्, यद्व्यावृत्तिरूपधर्मभाक् तदनुभूति दृष्टं—यथा घटादीति व्यतिरेकि । यदि—व्यावृत्तिरूपधर्मं पक्षीकृत्यानुभूतिधर्मत्वाभाव-

---

१ कथं स्वाभा० । २ स्वाभावे कथ । ३ प्रागभावाद्यभावा० ।

नास्याः स्वरूपातिरिक्त आश्रयो ज्ञाता नाम कश्चिदस्तीति स्वप्रकाशरूपा सैवात्मा। अजडत्वाच्च, अनात्मत्वव्याप्तं जडत्वं संविदि व्यावर्तमानमनात्मत्वमपि हि संविदो व्यावर्तयति॥ ननु च—अहं जानामीति ज्ञातृता प्रतीतिसिद्धा—मैवम्; सा भ्रान्तिसिद्धा, रजततेव शुक्तिशकलस्य। अनुभूतेः स्वात्मनि कर्तृत्वायोगात्, अतो मनुष्योहमित्यत्यन्तबहिर्भूतमनुष्यत्वादिविशिष्टपिण्डात्माभिमानवज्ज्ञातृत्वमप्यध्यस्तम्। ज्ञातृत्वं हि ज्ञानक्रियाकर्तृत्वम्, तच्च विक्रियात्मकं जडं विकारिद्रव्याहंकारग्रन्थिस्थमविक्रिये साक्षिणि चिन्मात्रात्मनि कथमिव संभवति। दृश्यधीनसिद्धित्वादेव—रूपादेरिव कर्तृत्वादेर्नात्मधर्मत्वम्। सुषुप्तिमूर्छादावहंप्रत्ययाभावेप्यात्मानुभवदर्शनेन नात्मनोहंप्रत्ययगोचरत्वम्। कर्तृत्वे, अहंप्रत्ययगोचरत्वे चात्मनो-

---

साध्यः स्यात्तदा—अनुभाव्यत्वं हेतुः, **यथारूपादीति** सपक्षः, इदमन्वयि। एवं खगतभेदो निरस्तः, पूर्वमेव ज्ञेयभेदो निरस्तः। 'अत्रायं पुरुषः स्वयं ज्योतिर्भवती'त्यादिषु वेदान्तवाक्येष्वात्मनो नित्यत्वस्वयंप्रकाशत्वादयः प्रतिपन्नाः, अत्र तु संविदो नित्यत्वादिरुच्यते तत् कथं सङ्गच्छत इत्यत्राह—**यत इति। निर्धूतनिखिलभेदा** सकलभेदनिषेधेन विजातीयभेदोऽपि निषिद्ध इति—विजातीयभेदस्य ज्ञातृमिथ्यात्वेन न स आत्मा, अपि तु परमार्थभूता संविदेवात्मेत्यर्थः। यद्वा—वेदान्तैरात्मनः प्रतिपादितं सजातीय-विजातीय-स्वगतनानात्वराहित्यं संविद एवोपपन्नमिति सैवात्मेत्यर्थः॥ **स्वरूपेति।** स्वरूपातिरिक्त आश्रयो हि ज्ञाता स नास्ति संवित्स्वरूपातिरिक्तत्वादेवापरमार्थ इति स नात्मेति—परमार्थभूता संविदेवात्मेत्यर्थः। स्वप्रकाशरूपा सैवात्मेति वेदान्तैरात्मनः प्रतिपादितं स्वयंप्रकाशत्वं संविद उपपन्नमिति—सैवात्मेत्यर्थः। यद्वा—तुच्छत्वशङ्कानिरासार्थमुक्तं—**स्वप्रकाशरूपेति।** स्वयंप्रकाशत्वं स्वतत्रसाधकं चेत्याह—**अजडत्वाच्चेति।** इदं व्यतिरेकि, संवित् आत्माः अजडत्वात्, यन्नात्मा तज्जडं—यथा घटादीति। एतद्विवृणोति—**अनात्मत्वेति। अनात्मत्वव्याप्तं—व्याप्तमिति** कर्तरि क्तः, व्यापकमित्यर्थः। प्राप्त इतिवत्॥

तर्केण ज्ञातृत्वे प्रतिक्षिप्ते आत्मनोऽहंप्रत्ययगोचरत्वस्य स्वानुभवप्रत्यक्षसिद्धत्वेन चोदयति—**ननु चेति। च**श्चोद्यसमुच्चये। **प्रतीतिसिद्धा** स्वानुभवरूपप्रतीतिसिद्धेत्यर्थः। अत्राह—**नैवमिति।** प्रतीतेर्भ्रान्तित्वमाह—**सा भ्रान्तिसिद्धेति।** अनुभवविषयत्वेन पूर्वं प्रतीता रजतता यथा शुक्तिज्ञानबाधितत्वात् भ्रान्तिसिद्धा भवति, तथेत्यभिप्रायेणाह—**रजततेव शुक्तिशकलस्येति।** भ्रमाधिष्ठानत्वोपपत्तये **शकल**शब्दः; अविकलवपुषः शुक्तेर्भ्रमास्पदत्वायोगात्। यद्वा ज्ञातृत्वे प्रतीयमाने—तत्र ज्ञानांशस्य पारमार्थ्ये, कर्त्रंशस्यापारमार्थ्ये च दृष्टान्ततया **रजततेव शुक्तिशकलस्येत्युक्तम्।** तत्र हीदमंशः परमार्थः, रजततैवापरमार्थेति। भ्रान्तिसिद्धत्वमुपपादयति **अनुभूतेरिति।** ततः किमित्यत्राह—**अतो मनुष्य इति।** कर्तृत्वायोगमुपपादयति **ज्ञातृत्वं हीति।** यद्वा, ज्ञातृत्वं नाम कि ब्रह्मस्वरूपभूतज्ञानाश्रयत्वम्, उतान्तःकरणक्रियारूपज्ञानाश्रयत्वमिति-विकल्पमभिप्रेत्य प्रथमं शिरो दूषयति—**अनुभूतेरिति।** पूर्वोक्तयुक्तिभिरनुभूतेरेव पारमार्थ्ये सिद्धे तस्या ज्ञातृत्वं स्वात्मनि कर्तृत्वं स्यात्, तत्तु व्याहतमित्यर्थः। **कर्तृत्वम्** आश्रयत्वम्। ज्ञातृत्वं, भ्रान्तपुरुषप्रतीतिसिद्धत्वाच्चाध्यस्तमित्यभिप्रायेणाह—**अत इति।** पिण्डस्योत्पत्त्यादिमत्वव्यतिरिक्तत्वस्य संप्रतिपन्नत्वादित्यन्तबहिर्भूतेत्युक्तम्। अथ न केवलं स्वापेक्षया कर्तृत्वमनुपपन्नम्, अपि तु स्वपरविभागनिर्विशेषं कर्तृत्वमात्रमेवानुपपन्नमित्यभिप्रायेण द्वितीयं शिरो दूषयति—**ज्ञातृत्वं हीति।** ततः किमित्यत्राह—**तच्चेति। विक्रियात्मकम्** उत्पत्तिविनाशयोगात् क्रियायास्तदाश्रयत्वमपि कादाचित्कमिति तद्विकारूपमित्यर्थः। **जडं** ज्ञेयम्। अत एव **विकारिद्रव्याहङ्कारग्रन्थिस्थं**, जडत्वविक्रियात्मकत्वसाम्यादिति भावः। **ग्रन्थि**र्नामबन्धनस्याशैथिल्यकरो ग्रथनविशेषः। अहङ्कारस्य सर्वभ्रमाश्रयत्वात् **ग्रन्थि**रित्युक्तम्। एतद्विरोधिरूपमाह—**अविक्रिय इति।** साक्षित्वाभ्युपगमेन ज्ञातृत्वमभ्युपगतं भवतीति-शङ्कायां साक्षित्वमपि ज्ञानस्वरूपत्वानुगुणमित्यभिप्रायेण—**साक्षिणीत्युक्तम्।** अविद्यानुभवरूपत्वमेव साक्षित्वमिति ज्ञानत्वाविरोध इति भावः। चिन्मात्राऽऽत्मनि स्वयंप्रकाशे जडं ज्ञातृत्वमजडस्य न संभवतीति भावः। कर्तृत्वादिर्नात्मधर्मः; दृश्यधीनसिद्धित्वात्—रूपादिवदित्यन्वयिनमभिप्रेत्याह—**दृश्यधीनसिद्धित्वादेवेति। कर्तृत्वादेरित्यादि**शब्देनाहंप्रत्यये गोचरत्वं गृह्यते। य एव भेदादीनामनुभूतिधर्मत्वाभावहेतुः, तेनैवेत्येवकाराभिप्रायः। अहमर्थो ह्यात्मा तेन समानाधिकरणतया प्रतीतो ज्ञाता आत्मा स्यादित्याह—**सुषुप्तिमूर्छादाविति।** 'नाह ख'त्वित्यादिश्रुत्युपजीवनेनाहंप्रत्ययाभाये ऽपीत्युक्तम्। आत्मनः कर्तृत्वाहंप्रत्ययगोचरत्वाभावे व्यतिरेक्यनुमानत्रयं प्रसङ्गरूपेणाह—**कर्तृत्व इति।** आत्मा न कर्ता, न चाहंप्रत्ययगोचर इति प्रतिज्ञाद्वयम्, अजडत्वात्, प्रत्यक्त्वात्, आत्मत्वादिति हेतुत्रयं, यत्कर्तृ, यदहंप्रत्ययगोचरं, तज्जडं, पराक्,

---

१ अनुभवसिद्धे विषयत्वेन। २ विकल°। ३ ग्रन्थनवि°।

भ्युपगम्यामने देहस्येव जडत्व–पराक्त्वा–नात्मत्वादिप्रसङ्गो दुष्परिहरः । अहंप्रत्ययगोचरात्कर्तृतया प्रसिद्धादेहा[1]त्तत्क्रियाफल[2]स्वर्गादे[3]र्भोक्तुरात्मनोन्यत्वं प्रामाणिकानां प्रसिद्धमेव । तथाहमर्थाज्ज्ञातुरपि विलक्षणः साक्षी पत्यगात्मेति प्रतिपत्तव्यम् ॥ एवमविक्रियानुभवस्वरूपस्यैवांभिव्यञ्जको जडोप्यहंकारः स्वाश्रयतया तमभिव्यनक्ति । आत्मस्थतयाभिव्यङ्ग्याभिव्यञ्जनमभिव्यञ्जकानां स्वभावः । दर्पण-जल-खण्डादिर्हि मुख–चन्द्रबिम्ब–गोत्वादिकमात्मस्थतयाभिव्यनक्ति। तत्कृतोयं 'जानाम्यह'मिति भ्रमः । स्वप्रकाशाया अनुभूतेः कथमिव तदभिव्यङ्ग्यजडरूपाहंकारेणाभिव्यङ्ग्यत्वमिति मा वोचः; रविकरनिकराभिव्यङ्ग्यकरतलस्य तदभिव्यञ्जकत्वोपदर्शनात् । जालकरन्ध्रनिष्क्रान्तद्युमणिकिरणानां तदभिव्यङ्ग्येनापि करतलेन स्फुटतरप्रकाशो हि दृष्टचरः । यतो'ऽहं जानामी'ति ज्ञातायमहमर्थश्चिन्मात्रात्मनो न पारमार्थिको धर्मोऽत एव सुषुप्तिमुक्त्योर्नान्वेति । तत्र ह्यहमर्थो[4]ल्लेखविगमेन स्वाभाविकानुभवमात्ररूपेणात्मावभासते । अत एव सुप्रोत्थितः कदाचि'न्मामप्यहं न ज्ञातवा'निति परामृशति । तस्मात्परमार्थतो निर-

---

अनात्मा च दृष्टं–यथा शरीरमिति । यद्वा आत्मा न कर्ता, न चाहंप्रत्ययगोचरः; जडत्वादिप्रसङ्गात्–देहवदिति । **जडत्वं** दृश्यतैकस्वरूपत्वम् । **पराक्त्वं** परस्मै भासमानत्वम् । **आत्मत्वं** पुरुषार्थप्रतिसंबन्धित्वं, देहं प्रति नियन्तृतया व्यापिलं वा, तदभावोऽनात्मत्वम् । **आदि**शब्देन क्षयिष्णुत्वादिकं विवक्षितम् ॥

अहंप्रत्ययगोचरस्य देहस्यानात्मत्वे सिद्धे ह्यहंप्रत्ययगोचरस्य कर्तुरनात्मत्वप्रसक्तिरित्यत्राह—**अहंप्रत्ययगोचरादिति । क्रियाफलस्वर्गादेर्भोक्तु**रित्यनेन देहातिरिक्तत्वं सिद्धम् । **प्रामाणिकानां** चार्वाकातिरिक्तानाम् । अनात्मनोऽहङ्कारस्य कर्तृत्वे कथमात्मनः संसारभोक्तृत्वम्—इति च शङ्का शरीरप्रतिबन्धा निरस्ता । स्वर्गादिभोक्तुरात्मत्वे सिद्धे ज्ञातैवात्मा स्यादित्यत्राह—**तथेति** । शरीरातिरिक्तात्मनोऽभ्युपगमो हि प्रमाणबलात्क्रियते, तथा ज्ञातुरपि विलक्षणत्वेन प्रमाणसिद्धत्वात्तथाभ्युपगन्तव्यमित्यर्थः । यद्वा अप्रामाणिकाहंप्रत्ययगोचरत्वेन हि शरीरस्यानात्मत्वादि, प्रामाणिकाहंप्रत्ययगोचरस्य तु कथमनात्मत्वादीत्यत्राह—**अहंप्रत्ययगोचरादिति** । देहस्याप्रामाणिकाहंप्रत्ययगोचरत्वं प्रमाणबाधादेव हि ज्ञायते । एवं कर्मफलभोक्तृरौपाधिकाकारवतो ज्ञातुरप्यात्मत्वं प्रमाणबाधितं चेदात्मनस्तद्विलक्षणत्वं स्वीकार्यमित्यर्थः । अतः प्रामाणिकाप्रामाणिकविभागाभावेनाहंप्रत्ययगोचरत्वमात्रमेवानात्मत्वसाधकमिति भावः । अविक्रियात्मनः कथं ज्ञातृत्वसंभव इत्यत्राह—**एवमिति** । यद्वा, ज्ञातृत्वमहङ्कारग्रन्थिस्थमिति पूर्वमुक्तं कथमहङ्कारस्य ज्ञातृत्वसंभव–इत्यत्राह—**एवमिति** । अभिव्यञ्जकत्वप्रयुक्तोऽयमहङ्कारस्य संविदाश्रयभाव इत्यर्थः । अभिव्यञ्जकत्वहङ्कारः कथमस्य स्वाश्रयतयाऽभिव्यञ्जकत्वमित्यत्राह—**आत्मस्थतयेति** । **स्वभाव**शब्देनौत्सर्गिकत्वं विवक्षितम् । क्वचित्तु प्रमाणबाधश्चेन्न तथेति भावः । दृष्टान्तं दर्शयति—**दर्पणेति** । आत्मस्थतयाऽभिव्यञ्जनं न दर्पणत्वप्रयुक्तम्, न च प्रतिबिम्बत्वप्रयुक्तम्, अभिव्यञ्जकत्वमात्रप्रयुक्तमिति दर्शयितुं **खण्डा**दिग्रहणम् । **आदि**शब्देन मुण्डादिः । एवं व्यङ्क्तव्यङ्ग्याभावकृतो ज्ञातृत्वावभासः संविद इत्यत्राह—**तत्कृत इति** । जडस्याभिव्यञ्जकत्वमयुक्तं, स्वप्रकाशस्य वस्तुनोऽभिव्यङ्ग्यत्वं चायुक्तं, संविदभिव्यङ्ग्यस्य च विशेषेण तदभिव्यञ्जकत्वमयुक्तमितीमामाशङ्कां स्वयमेवोत्थाप्य प्रतिक्षिपति—**स्वप्रकाशाया इति** । कुत इत्यत्राह—**'रविकरेति**। करतलस्य किरणाभिव्यञ्जकत्वं क्व दृष्टमित्यत्राह—**जालकेति**। एवं ज्ञातृत्वस्यापारमार्थिकत्वमुक्तम्, एतदेव परमार्थवस्तुभासनवेलायामनवभासनप्रतिपादनेन उपपादयति—**यत इति** । अनेनाहं**प्रत्ययायापायेपीति** पूर्वोक्तार्थो विवृतो भवति । **यत** इति साध्यस्य हेतुतया निर्देशः–अग्निमत्त्वेन धूमवत्त्वमितिवत् । मुक्तिसमभिव्याहारेण सुषुप्तावप्यहंप्रत्ययापायस्यागमसिद्धत्वं सूचितम् । तदा कथं भासत इत्यत्राह—**तत्र हीति**। 'नाह[5] खल्वयमेवं संप्रत्यात्मानं जानाति नायमहमस्मी'ति स्वापविषया श्रुतिः । 'अहङ्कारं बलं दर्पं कामक्रोधं परिग्रहम् । विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पत' इति मुक्तिविषया स्मृतिः । 'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव चे'ति क्षेत्रान्तर्भावश्चोच्यते । अहङ्कारस्य 'अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यत' इति तस्य भ्रान्तिसिद्धत्वमुच्यते । **हि**शब्दः श्रुतिस्मृतिप्रसिद्धियोतनार्थः । न केवलं श्रुतिः सुषुप्तिविषया, परामर्शश्च तथाऽतीत्याह—**अत एव चेति । अत एवेति** साध्यस्य हेतुत्वेन परामर्शः । कथं साध्यसाधनयोर्विपरीतनिर्देशः, इत्थं–ह्यहौ यत्साध्यं तदुत्पत्तौ साधनं, यदुत्पत्तौ साधनं तज्ज्ञप्तौ साध्यं तस्मात् अग्निमत्त्वादेव हि धूमोत्थम इतिवदुत्पत्तौ हेतुत्वमपेक्ष्य **अत एवे**त्युक्तम् । ततः किं प्रस्तुतपूर्ववृत्तचिन्ताया इत्यत्राह—**तस्मादिति । तस्मादित्यनेन यदप्याहुरशेषविशेषेत्यारभ्योक्तप्रमाणतर्काभ्यां स्वमतोपपादनमभिप्रेतम् । निरस्तसमस्तभेदविक-**

---

१ देहात्मिका० । २ फलस्य स्वर्गा० । ३ ह्यहमुल्ले० । ४ तदाभावो । ५ गुणादिः । ६ नाहं ।

स्तसमस्तभेदविकल्पनिर्विशेषचिन्मात्रैकरसकूटस्थनित्यसंविदेव भ्रान्त्या ज्ञातृज्ञेयज्ञानरूपविविधविचित्रभेदाक्विवर्तत–इति तन्मूलभूताविद्यानिवर्हणाय नित्य-शुद्ध-बुद्ध-मुक्त-स्वभावब्रह्मात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इति ॥

महासिद्धान्तः।

तदिदमौपनिषदपरमपुरुषवरणीयताहेतुगुणविशेषविरहिणामनादिपापवासनादूषिताशेषशेमुषीकाणामनल्पेति। **भेदविकल्प**शब्देन ज्ञातृज्ञेयादिभेदस्यावान्तरवैविध्यं विवक्षितम्। **निर्विशेष**शब्देन स्वगतनित्यत्वादिभेदव्यावृत्तिः। कुत इत्यत्राह—**चिन्मात्रैकरसेति**। चिन्मात्रत्वादित्यर्थः। अनेन शून्यत्वव्युदासश्च। **कूटस्थं** निर्विकारं, सर्वाधिष्ठानं वा। **नित्यसंविदेवेति। चिन्मात्र**शब्दः स्वयंप्रकाशत्वपरः, संविच्छब्दो विशेष्यपर इत्यपौनरुक्त्यम्। **चिन्मात्रस्य** कथं भेदसंभव इत्यत्राह—**भ्रान्त्येति**। भ्रान्त्या विवर्तत इति करिकलभवन्निर्देशः। **शुद्धम्** अविद्यारहितम्। **बुद्धं** स्वयंप्रकाशम्। **मुक्तम्** परमार्थतो भेददर्शनजन्मादिरहितम्। एवंविध**ब्रह्मात्मैकत्वविद्यालब्धये सर्वे वेदान्ता आरभ्यन्त** इत्यर्थः। वेदान्तानामारम्भणीयत्वं नाम–तद्विचारस्यारम्भणीयत्वम्। **सर्वे वेदान्ता आरभ्यन्त इति–यदप्याहुरिति** पूर्वेणान्वयः। ब्रह्ममीमांसाशास्त्रं किमनारम्भणीयम्, उतारम्भणीयमिति विचारे–बन्धस्य परमार्थत्वेन ज्ञाननिवर्त्यत्वाभावात् ज्ञानप्रतिपादकवेदान्तवाक्यविचाररूपं शास्त्रमनारम्भणीयम्–इति पूर्वपक्षं कृत्वा, बन्धस्य मिथ्यात्वेन ज्ञानमात्रनिवर्त्यत्वात् ज्ञानार्थं वेदान्तविचाररूपं शास्त्रमारम्भणीयम्–इति हि ब्रह्मज्ञानपक्षे प्रथमाधिकरणार्थः शिक्षितः। अतो बन्धस्य मिथ्यात्वेन ज्ञानमात्रनिवर्त्यत्वात् ज्ञानप्रधानस्य शास्त्रस्य कर्मविचारो न पूर्ववृत्त इत्युक्तं भवतीति वैषम्यम्। **उपाय** आत्मैकत्वविज्ञानम्, **उपेयं** निर्विशेषचिन्मात्रं ब्रह्म, **निवर्त्यं** च मिथ्याभूतम्–एतत्त्रयं कर्मविचारस्यानपेक्षितत्वाय पूर्वं विस्तरेणोपपादितं निगमनेन ग्रन्थेन संक्षिप्तं भवति ॥

अथ कर्मविचारपूर्ववृत्तत्वविरोधिवस्तुसामर्थ्यनिरासार्थं परोक्तानामुपायोपेयनिवर्त्यानां प्रमाणतर्काभासमूलत्वं प्रतिजानीते **तदिदमिति**। स्वाभिमतानामेव तेषां प्रमाणतर्कोपपन्नतां च संक्षेपेण प्रतिजानाति। अर्थाद्बहुशास्त्रज्ञानां बहुग्रन्थकाराणामपि परेषां स्खलनानुपपत्तिशङ्कां च सम्यग्ज्ञानोत्पत्तिसामग्रीवैकल्यप्रतिपादनमुखेन परिहरति–**तदिदमित्यादिना। परमपुरुष**शब्देनोपेयं, **वरणीयते**त्यादिनोपायम्, **अनादी**त्यादिना निवर्त्यम्, **अनधिगते**त्यादिना परपक्षनैर्मूल्यं, **न्यायानुगृहीते**त्यादिना स्वपक्षस्य समूलताम्, अर्थतोऽनेकविद्वत्परिग्रहं च प्रतिजानीते–**तदिदमिति**। अनन्तरवाक्यप्रकृतं परोक्तोपायोपेयनिवर्त्यत्रयं विवक्षितम्। **औपनिषदपरमपुरुष**शब्देन 'तं त्वौपनिषदं पुरुषं पृच्छामी'ति श्रुतिं स्मारयति। एतेनास्मदभिमतः प्रमाणप्रमेयविशेषसंबन्धः श्रुत्यैव वक्तव्य इति सूचयति। **परम**शब्देनेश्वरातिरिक्तत्वव्यावृत्तिः। **वरणीयताहेतुगुणविशेषविरहिणा**मित्यनेन 'यमेवैष वृणुते तेन लभ्य' इत्यभिमतोपायविशेषकथनं फलितम्। अनेन पदेन बहुशास्त्रज्ञबहुग्रन्थकाराणां भ्रमानुपपत्तिशङ्का च परिहृता भवति; सम्यक्छास्त्रार्थज्ञानोत्पत्तौ भगवद्भक्तेरपि सामग्र्यन्तर्भावेन केवलशास्त्रपरिश्रमस्य विकलहेतुत्वात् यथा–'यस्य देवे परा भक्ति'रित्यादिका श्रुतिः, स्मृतिश्च—'विद्या राजन्न ते विद्या मम विद्या न हीयते। विद्याहीनस्तमोध्वस्तः नाभिजानासि केशवम् ॥' धृतराष्ट्रः—'गावद्गणे ते का विद्या या ते विद्या जनार्दने। यया त्वमभिजानासि त्रियुगं मधुसूदनम् ॥' संजयः—'मायां न सेवे भद्रं ते न वृथा धर्ममाचरे। शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम् ॥' इति। अत्र **भक्त्या शुद्धभावङ्गतः, शास्त्राद्वेद्मि जनार्दनमित्यनेन** यथावच्छास्त्रार्थज्ञानोदयस्य भक्तिसापेक्षत्वं सिद्धम्। 'जायमानं हि पुरुषं यं पश्येन्मधुसूदनः। सात्त्विकः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः ॥ पश्यत्येनं जायमानं ब्रह्मा रुद्रोऽथवा पुनः। रजसा तमसा चास्य मानसं समभिप्लुतमिति वचनाच्च तत्त्वार्थज्ञानस्य भक्तिप्रीतैभगवत्कटाक्षसापेक्षत्वं ज्ञाप्यते। **ननु यथात्वमभिजानासि, भक्त्या वेद्मी**ति प्रश्न-प्रतिवचनाभ्यां विद्या-भक्तिशब्दयोरैकार्थ्यं प्रतीयते, भक्तिरूपा च विद्या मोक्षायेति प्रागुपपादितं, ततश्च—शास्त्रज्ञानमूला भक्तिः, भक्तिमूलं शास्त्रज्ञानम्—इत्यन्योन्याश्रय इति चेत्—नैवं; श्रवणवेलायामेव पदार्थतयाऽवगम्यमानेषु परमात्मगुणादिष्वनुकूलबुद्धिगोचरत्वात् विद्या-भक्तिशब्दयोः, तेन सम्यग्वाक्यार्थनिर्णयलाभः। पूर्वपक्षतयोपन्यस्यमानेऽपि सुगतामिमतवेदाप्रामाण्यादौ हि भवति प्रद्वेषो वैदिकानां, भगवद्गुणादिषु त्वनुरक्तचित्तता भवति, न चैषा साक्षात्कारकल्पनिरन्तरध्यानरूपा भक्तिः, अतो नान्योन्याश्रयः। अथ शास्त्रार्थयाथात्म्यज्ञानोत्पत्तिहेतुभूतभक्तिविरोधिनमाह—**अनादीति**। यद्वा, सम्यग्ज्ञानहेतुभूतभक्त्यभावात् सम्यग्ज्ञानविरोधिपापानुबन्धमाह—**अनादीति। वासना**शब्देन पापस्य दृढमूलत्वेन दुर्निवारत्वमुक्तम्। वासनया पापं–पापेन वासना, अज्ञानेन पापवासना–पापवासनया अज्ञानम्—इति चान्योन्याश्रयपरिहारा**यानादि**शब्दः। **शेमुषी** मोक्षोपयोगिज्ञानम्। **अशेष**शब्दस्योपायोपेयनिवर्त्य-

१ °निश्चयः। २ °ति°।

धिगतपदवाक्यस्वरूपतदर्थयाथात्म्यप्रत्यक्षादिसकलप्रमाणवृत्ततत्तदितिकर्तव्यतारूपसमीचीनन्यायमार्गाणां विकल्पासहविविधकुतर्ककल्ककल्पितम्—इति न्यायानुगृहीतप्रत्यक्षादिसकलप्रमाणवृत्तयाथात्म्यविद्भिरमादरणीयम्। तथाहि—निर्विशेषवस्तुवादिभिर्निर्विशेषे वस्तुनीदं प्रमाणमिति न शक्यते वक्तुम्; सविशेषवस्तुविषयत्वात्सर्वप्रमाणानाम्। यस्तु—'स्वानुभवसिद्धम्' इति स्वगोष्ठीनिष्ठः समयः सोप्यात्मसाक्षिक-

---

विषया विश्वशेमुषी दूषितेति भावः। अनेनार्थात् स्वपक्षे निवर्त्य चोक्तं भवति; कर्मण एव मोक्षप्रतिबन्धकत्वात्। दूषितशेमुषीकत्वफलं सम्यग्ज्ञानाभावमाह—**अनधिगतेति**। प्रत्यक्षविरोधे शास्त्रप्राबल्यस्य परेणोक्तत्वात्, पदशः, समुदायेन च, सविशेषपरत्वप्राधान्येन च प्रथमं शब्दप्रमाणमाह—**पदेति**। प्रकृतिप्रत्यययोगेन पदत्वमिति न ज्ञातमिति **पद**शब्दस्य भावः। **वाक्यस्वरूपेति**। वाक्यम्—अनेकपदार्थसंसर्गविशेषाभिधायि—इति न च ज्ञातमिति भावः। **तदर्थयाथात्म्यं** तात्पर्यविषयः। **प्रत्यक्षादीति**। **आदि**शब्दादनुमानम्। **सकल**शब्देन स्मार्शनचाक्षुषादिप्रत्यक्षावान्तरभिदा विवक्षिता, अन्वयव्यतिरेकाद्यनुमानावान्तरभिदा च विवक्षिता। यद्वा, तत्तद्वाद्यभिमतार्थापत्त्यादिप्रमाणान्तरविषयः **सकल**शब्दः। **वृत्तं** बोधनम्। **तदितिकर्तव्यतारूपेति**। तर्केण प्रमाणबाधवचनात् **प्रमाणानुग्राहकस्तर्क** इति च न ज्ञातमिति भावः। प्रमाणानुग्राहकत्वेव वयं तर्कमङ्गीकुर्म इत्यत्राह—**समीचीनन्यायेति**। अनुग्राहकवुद्ध्या स्वीकृतस्यापि तर्कस्य प्रमाणविरुद्धत्वात् सोऽसमीचीन—इति भावः। अपच्छेदनयादिसमीचीनन्याया एव हि स्वीकृता इत्यत्राह—**न्यायमार्गाणामिति**। अयमपच्छेदन्याय्यविषयः, अयं सामान्यविशेषन्याय्यविषय इति तत्तन्न्याय्यसंचारविषयविभागोऽनवगत—इति भावः। तर्हि किमवलम्ब्य प्रबन्धाः कृता इत्यत्राह—**विकल्पासहेति। कुतर्काः** प्रमाणविरुद्धाः। मूलशैथिल्यमिथोविरोधादिदोषान्तराक्रान्ताश्च तर्काः, ते च त्रिचतुरपदस्थायिनो न भवन्ति किंतु विकल्पितान्यतरशिरःपरिग्रह एव भङ्गुरा इत्यत्राह—**विकल्पासहेति**। तर्कस्य विकल्पासहत्वं नाम तद्विषयसाधनादिविकल्पासहत्वमेव। **विविधेति** ब्रह्मणोऽनुभाव्यत्वेऽननुभूतित्वं, प्रत्यक्षं सन्मात्रग्राहि, वेदान्तवेद्यं ब्रह्म प्रमाणान्तरागोचरमित्यादिरूपं कुतर्काणामन्योन्यव्याहतिवैविध्यं विवक्षितम्। ईदृशकुतर्क एव **कल्कम्** असारभूतं—बौद्धैरात्तसारम्, ऋजीषमित्यर्थः। एतेन **कल्पितम्** उत्कीर्णम्। **इतिहेतौ**। केषांचित्समीचीनार्थान्तरविषयज्ञानेऽसति ह्यस्यासमीचीनत्वनिश्चयः कथम् इत्यत्राह—**न्यायानुगृहीतप्रत्यक्षादिसकलप्रमाणवृत्तयाथात्म्यविद्भिरिति**। अनेन पूर्वोक्तविपरीताकार उक्तः। **बहुवचनेन** स्वपक्षस्य भगवद्बोधायनाद्यनेकशिष्टपरिग्रहः सूचितः। **अनादरणीयमिति**। शिष्यशिक्षासु पूर्वपक्षोपन्यासकौशलार्थमप्यादर्तुमयोग्यमित्यर्थः। **अशेषविशेषप्रत्यनीकचिन्मात्र**मित्यारभ्य **सर्वे वेदान्ता आरभ्यन्त** इत्यन्तेन **यदप्याहुः—तदनादरणीयमि**त्यन्वयः॥

एवं सङ्क्षेपेण प्रतिज्ञातमर्थमुपपादयितुमुपक्रमते—**तथा हीति**। ननु पूर्वपक्षिणा प्रथमं वेदान्तवाक्यविशेषानुदाहृत्य तत्र निरूपणीयं सर्वं निरूप्य, ततश्च तद्व्यतिरिक्तप्रमाणतर्काः प्रदर्शिताः, अतः सिद्धान्ते च तेन क्रमेण तत्प्रतिक्षेपो युक्तः, तत्कथं प्रथमं सकलप्रमाणाविषयत्वनिरूपणं सङ्गच्छते, उत्तरत्र च कथं प्रत्यक्षादिनिर्विशेषविषयत्वनिरासपूर्वकं वेदान्तवाक्ययोजना क्रियते; उच्यते—प्रत्यक्षविरोधे शास्त्रप्राबल्याभ्युपगमात्—परेण वेदान्तवाक्यानि प्रथममुदाहृत्य पश्चात्तदन्यद्वक्तव्यं सर्वमुक्तं, प्रबलतयाऽभिमतप्रमाणपुरस्कारो ह्युचितः, सिद्धान्तिना तु प्रत्यक्षविरोधे शास्त्रप्राबल्यानभ्युपगमात्—प्रत्यक्षादेर्निर्विशेषविषयत्वव्युदसनपूर्वकं तदविगेधेन वेदान्तवाक्यानि स्वरसतो व्याख्यास्यन्ते। तत्र निर्विशेषचिन्मात्रपारमार्थ्यस्य परेण प्रथमप्रतिज्ञातस्य सामान्येन सकलप्रमाणबहिष्कृतत्वरूपं दूषणं प्रथमं प्रतिजानीते—**निर्विशेष इति**। अर्थात्प्रमाणैस्वभावश्च स्वपक्षानुगुणो निरूपितो भवति। स्वपुष्पमपि स्वानुभवसिद्धमिति वक्तुं शक्यमिति तद्व्यावृत्त्यर्थमि**दं**शब्दः। परसंप्रतिपत्तिपदं प्रमाणं न किंचिदपीति भावः। यद्वा, न कांचिदपि प्रमाणव्यक्तिर्निर्विशेषगोचरेत्येकवचनाभिप्रायः। कुत इत्यत्राह—**सविशेषेति**। ननु विशेषा हि निर्विशेषाः, तत् कथं निर्विशेषवस्तुनोऽप्रामाणिकत्वम्; उच्यते—धर्मेण धर्मी **सविशेषः**, धर्मिणा च धर्मः सविशेषः, कस्यचिद्धर्मभूतं, धर्मि वा यन्न भवति तत्प्रमाणशून्यमिति हि ग्रन्थार्थः। **विशेषो व्यावर्तकः। धर्मी च स्वगतधर्मस्याश्रयान्तरगतधर्माद्व्यवच्छेदक** इति **विशेष**शब्दवाच्यः। किंच—विशेषः, निर्विशेष—इति शब्दौ किं पर्यायौ, न वा। आद्ये—सहप्रयोगानुपपत्तिः। द्वितीये तु—न निर्विशेषत्वं; बोध्यभेदमन्तरेणापर्यायत्वायोगात्। ननु कथं सर्वप्रमाणानां सविशेषविषयत्वं, न हि गन्धादिग्राहिप्रमाणं गन्धादिकं साश्रयमावेदयति—नैवम्; **आश्रय** एव **विशेष इति** नियमाभावात्, संविदोऽपि सर्वविशेषणतया सर्वार्थवैशिष्ट्यमुपपद्यते; 'अयं गन्धोऽनुभूयत' इति कालादिविशेषावच्छिन्नतयैव गन्धादिप्रतीतेश्च सविशेषविषयतोपपत्तिः, तथा प्रतीतिश्च वक्ष्यते। तर्हि, न वयं प्रमाणान्तरेण निर्विशेषवस्तुसिद्धिमभ्युपगच्छामः, स्वानुभवसिद्धं हि तदित्यत आह—**यस्त्विति**। **तु**शब्देन समयं विशिषन् समयवैशिष्ट्यमूलं

---

१ गृहीतवाक्यत्व०। २ °णाभावश्च।

सविशेषानुभवादेव निरस्तः; 'इदमहमदर्शमिति केनचिद्विशेषेण विशिष्टविषयत्वात्सर्वेषामनुभवानाम् । सविशेषोप्यनुभूयमानोनुभवः केनचिद्युक्त्याभासेन निर्विशेष इति निष्कृष्यमाणः सत्तातिरेकिभिः स्वासाधारणैः स्वभावविशेषैर्निष्कृष्टव्य–इति निष्कर्षहेतुभूतैः सत्तातिरेकिभिः स्वासाधारणैः स्वभावविशेषैः सविशेष एवावतिष्ठते । अतः कैश्चिद्विशेषैर्विशिष्टस्यैव वस्तुनोन्ये विशेषा निरस्यन्त इति न क्वचिन्निर्विशेषवस्तुसिद्धिः । धियो हि धीत्वं, स्वप्रकाशता च; ज्ञातुर्विषयप्रकाशनस्वभावतयोपलब्धेः । स्वापमदमूर्छासु च सविशेष एवानुभव इति स्वावसरे निपुणतरमुपपादयिष्यामः । स्वाभ्युपगताश्च नित्यत्वा-

स्वानुभवलक्षणप्रमाणवैषम्यममिप्रैति । **स्वगोष्ठीनिष्ठ** इति परवाद्यसंमतत्वं दर्शयति । आत्मसाक्षिकानुभवस्य सविशेषत्वं दर्शयति—**इदमहमिति । विशिष्टविषयत्वादिति** । विशिष्टो विषयः स्वयमनुभव एव, 'शिलापुत्रकस्य शरीर'मितिवदयं निर्देशः । अन्यथा स्वानुभवनिर्विशेषत्वनिरासे घटादिसविशेषत्वसाधनस्यानुपयोगात् । **अनुभूयमानोऽप्यनुभव** इत्युपरितनग्रन्थस्याप्येवमेवार्थः, **स्वानुभवसिद्धमित्यनेनैवकार्थात्** । न चानुभवशब्दोऽनुव्यवसायपरः न ह्यनुव्यवसायरूपं प्रत्यक्षमिष्टम्; अतीतविषयतया प्रत्यक्षत्वानुपपत्तेः । परज्ञानं, प्रमुषितसंस्कारं स्वज्ञानं चानुमेयम्, अन्यत्तु स्मृतिविषयम् । न च स्मृतिस्विषयत्वमिह विवक्षितम्; अनुभवशब्दस्यानर्थक्यात् । अतोऽनुभूयमानत्वम् अवभास्यमानत्वम् । **इदमहं**शब्दाभ्यां सकर्मकर्तृक एवानुभव इत्युक्तम् । **अदर्शमित्यनेनापरोक्षत्वविशेषान्वयोऽभिप्रेतः**, अतीतत्वं त्वविवक्षितं; तदा स्वतःसिद्धत्वायोगात् । **केनचिद्विशेषेणेति** । उक्तेष्वप्यन्यतमविशेषणमन्ततोगत्वाप्यवर्जनीयमिति भावः । यद्वा **अदर्शमित्यत्रेति**–शब्दः प्रकारवचनः प्रकृतसजातीयरूपं विशेषं यावत्संभवं गृह्णाति । तेन परोक्षत्ववर्तमानत्वादिकं **केनचिदि**ति विवक्षितं स्यात् । **परोक्षत्वं**—विषयद्वारा । ननु—नहि वयं 'मिदमहमदर्श'मिति प्रतीतिमपलपामः, सा तु तर्कव्यवस्थापितविषया निर्विशेषे प्रमाणमित्यत्राह—**सविशेषोऽपीति** । स्वव्याघातस्य दर्शयिष्यमाणत्वात् **युक्त्याभासेने**त्युक्तम् । **निर्विशेष इति निष्कृष्यमाण इति** । यदा निर्विशेष इति निष्कृष्यते तदानीमेवं हि निष्कृष्टव्य—इत्यर्थः । कथं निष्कृष्टव्य इत्यत्राह—**सत्तातिरेकिभिः स्वासाधारणैरिति** । सत्तानतिरेकी चेत्, पक्षाविशिष्टो हेतुः स्यात् तदयुक्तः पक्षव्यावर्तकोहि हेतुः । किंच—अन्यस्य द्रव्यान्तराद्यावर्तकधर्मस्यैव स्वव्यावृत्तिरूपत्वसंभवः, स्वरूपे प्रतिपन्ने स्वस्य, अन्यनादात्म्यभ्रमविरोधिनश्च स्वरूपमेव व्यावृत्तिः—यथा शुक्तित्वादेः, ब्रह्मणस्तु वस्त्वन्तरस्यान्यसाद्व्यावृत्तिरूपधर्मत्वाभावात्, स्वरूपे भासमाने भ्रमसहत्वाच्च न स्वरूपमेव व्यावृत्तिः—इति वक्ष्यमाणशौक्ल्यादिदृष्टान्तवैषम्याभिप्रायेण **सत्तातिरेकिभि**रित्युक्तम् । साधारणश्चेत्—हेतुश्चानैकान्तिको, भ्रमाविरोधी च स्यात्–यथा शौक्ल्यादि । असाधारणं शुक्तित्वमेव हि रजतभ्रमविरोधि, अतः **स्वासाधारणै**रित्युक्तम् । **स्व**शब्देन व्यधिकरणासिद्धिपरिहारः । **स्वभावविशेषैः** धर्मविशेषैः । एवं सामान्येनार्थशरीरमुक्तम्, अतस्त्वयाऽपि निरासकहेतुनयाऽभिमतानां सत्तातिरेकित्व–स्वासाधारणधर्मत्वे अवर्जनीये—इत्यभिप्रायेण **सत्तातिरेकिभिः स्वासाधारणै**रिति पुनः कथनम् । ये ये हेतवः सविशेषघटादिवस्तुव्यावृत्ताः सामान्येन सकलविशेषाभावसाधकाः तेऽर्थसामर्थ्यात् सामान्यान्तर्गतं स्वात्मानमपि निवर्तयेयुरेवेत्यत्राह—**अतः कैश्चिदिति । अतः** तेषां सत्तातिरेकित्व-स्वासाधारणत्वयोरवश्याभ्युपगन्तव्यत्वादित्यर्थः । **कैश्चिदिति** स्वासाधारणैः प्रामाणिकैरित्यर्थः । **विशिष्टस्यैवेति** । निर्विशेषत्वसाधकनिवृत्तौ निर्विशेषत्वासिद्धेः, तदनिवृत्तौ तैरेव सविशेषत्वप्रसङ्गात्रेत्यभिप्रायः । **अन्य इति** । निर्विशेषत्वसाधकहेतवो येभ्यो घटादिभ्यो व्यावृत्ताः तद्वन्त इहाप्रामाणिका रूपादयो विशेषा अस्मिन्निरस्यन्ते, न तु सर्वविशेषाः । अनग्निमत्त्वव्यावृत्तो धूमः पक्षेऽनग्निमत्त्वमेव निवर्तयति न त्वाकारान्तरमित्यर्थः । **न क्वचिदिति** । स्वानुभवे, प्रत्यक्षादिप्रमाणान्तरेष्वपीत्यर्थः । स्वव्याघातप्रसङ्गेन सकलविशेषनिवृत्तेः साधयितुमशक्यत्वात्र निर्विशेषवस्तुसिद्धिरित्युक्तं भवति ॥

एवं कर्मकर्तृव्युदासमभ्युपगम्य सविशेषत्वमापादितम्, अथ कर्मकर्तृनिरास एव दुःशक इत्याह—**धियो हीति । धीत्वं** विषयप्रकाशकत्वम् । **स्वप्रकाशता** अनन्याधीनप्रकाशत्वम् । एतदुभयं स्वप्रकाशवादे साधनतया, साध्यतया च परेणोपन्यस्तम् । **ज्ञातुर्विषयप्रकाशनस्वभावतयोपलब्धेरिति** । नियमेन स्वाश्रयं प्रति विषयप्रकाशकतयाऽवभासमानत्वाद् धीत्व–स्वप्रकाशत्वे सिध्यत इत्यर्थः । **धीत्वं** विषयसाधनत्वं; तथाऽवभासमानत्वात्–इति न साध्याविशिष्टतापत्तिः । यद्युपलब्धिसिद्धं सकर्मकर्तृत्वं नाङ्गीकुरुषे ततः सकर्मकर्तृत्वहेतुकं स्वप्रकाशत्वमपि न सिध्येत्—इति भावः । यद्वा, **धीत्वं** धीस्वरूपमात्रम् । **हि**शब्दः उपलब्धेः सर्वसंप्रतिपत्तिं दर्शयति । ननु—न कर्मकर्त्रवच्छिन्नं ज्ञानमात्मभूतम्, अन्यदेव तु स्वापाद्यवस्थाऽनुभूतं निर्विशेषं साध्यत इत्यत्राह—**स्वापेति । अनुभवः** आत्मस्फुरणं; न हि तदा धर्मभूतज्ञानस्फुरणम् । **स्वावसरे** अहमर्थस्यैवात्मत्वसमर्थने । **निपुणतरं** परप्रयुक्तयुक्त्यैवेति भावः । **'सुखमहमस्वाप्सं, माम-**

---

१ स्वयंप्र० ।

दयो ह्यनेकविशेषाः सन्त्येव। ते च न वस्तुमात्रमिति शक्योपपादनाः; वस्तुमात्राभ्युपगमे सत्यपि विधाभेदविवाददर्शनात्, स्वाभिमततद्विधाभेदैश्च स्वमतोपपादनात्। अतः प्रामाणिकविशेषैर्विशिष्टमेव वस्त्विति वक्तव्यम्। शब्दस्य तु विशेषेण सविशेष एव वस्तुन्यभिधानसामर्थ्यम्; पदवाक्यरूपेण प्रवृत्तेः। प्रकृतिप्रत्ययययोगेन हि पदत्वम्। प्रकृतिप्रत्ययययोरर्थभेदेन पदस्यैव विशिष्टार्थप्रतिपादनमवर्जनीयम्। पदभेदश्चार्थभेदनिबन्धनः। पदसंघातरूपस्य वाक्यस्यानेकपदार्थसंसर्गविशेषाभिधायित्वेन निर्वि-

---

प्यहं न ज्ञातवा'नित्यादिना परोक्तपरामर्शेनैवेति यावत्। यद्वा **निपुणतरं** विशदतरम्। एतदुक्तं भवति—किं त्वया स्वानुभवाधीनं निर्विशेषत्वं कर्मकर्त्रवच्छिन्नस्य ज्ञानस्योच्यते, उताहमिति भासमानस्यात्मस्वरूपभूतज्ञानस्य, उत तदुत्तीर्णस्य वा। आद्ये–कर्मकर्त्रवच्छेदनियमादेव न निर्विशेषत्वम्। द्वितीये–प्रत्यक्षानुकूलत्वादिभिः सविशेषत्वमवर्जनीयमिति वक्ष्यते। तृतीये–शून्यत्वादेव न निर्विशेषत्वं साध्यम्—इति मुखान्तरेण सविशेषत्वमाह—**स्वाभ्युपगताश्चेति। आदि**शब्देन स्वप्रकाशत्वैकत्वानन्दत्वादयोऽपि विवक्षिताः। ते वस्तुमात्रमिति ह्युक्तमित्यत्राह—**ते चेति**। उपपादयति—**वस्त्विति। बौद्धैः** क्षणिकत्वमुक्तम्, अनेन तु नित्यत्वं; वैशेषिकादिभिश्च जडत्व–बहुत्वे, अनेन तु स्वप्रकाशत्वैकत्वे; स्वरूपं तु तैः सर्वैरभ्युपगतम्। अतो विप्रतिपत्तिविषयः, संप्रतिपत्तिविषयश्चैक एवेति वक्तुमयुक्तमित्यर्थः। विमत्यनन्तरभाविना, तदुपपादनेन च स्वरूपातिरिक्तानां द्रढयति—**स्वाभिमतेति**। क्षणिकत्वादिनं प्रति वैस्तुनित्यत्वं साधयता त्वया स्वरूपमात्रातिरैकेण किंचित्साधितमस्ति वा, न वा। अस्ति चेत्–सिद्धसाधनत्वं; स्वरूपमात्रस्याभिमतत्वात्। **संविद्नित्येति** प्रतिज्ञावाक्यगतौ धर्मधर्मिशब्दौ किं पर्यायौ, न वा। आद्ये—साधनायासो निष्फलः। द्वितीये–स्वरूपातिरिक्तधर्मान्तराङ्गीकार इति भावः। **स्वमतोपपादनात्–न वस्तुमात्रमिति शक्योपपादना** इत्यन्वयः। पूर्वं सविशेषत्वनिरासकहेतुभिः सविशेषत्वमुक्तम्, अनन्तरं साध्यधर्मैः, ततः कतिपयविशेषसाधकहेतुभिः। एते निरासकसाध्य–साधनधर्मा अपरमार्था इत्यत्राह–**अत इति। अतः** विशेषव्युदासकत्वेन, साध्यत्वेन, साधनत्वेन च केषांचिद्धर्माणां त्वयोक्तत्वात्। परमार्थभूतैस्तैर्विशिष्टमित्यर्थः। **प्रामाणिकै**रित्यनेन **कैश्चि**दिति पूर्वोक्तस्यार्थस्यापि विशेषो दर्शितः। **विशिष्टमेवेति**। पूर्वोक्तसत्तातिरेकिस्वासाधारणलाभावे भ्रमोच्छेदो न स्यात्, निरासकधर्मापारमार्थ्ये–शुक्तिलापारमार्थ्ये रजतसत्यत्ववन्निरसनीयाकारसत्यत्वं प्रसजेत्, साध्यधर्मापारमार्थ्ये च—नित्यत्वादिविपरीताकारस्य सत्यत्वप्रसङ्गः, साधनापारमार्थ्ये च—साध्यनित्यत्वादिविपरीताकारस्य सत्यत्वमापद्येत—इति भावः॥

इत्थं स्वानुभवप्रसङ्गात् तत्रापि सविशेषत्वमुपपादितम्, अथ प्रथमप्रतिज्ञातं सर्वप्रमाणानां सविशेषविषयत्वं वक्तुमारभते। तत्र परेण प्रत्यक्षाद्बलीयस्त्वेनोक्तत्वात्, सविशेषबोधकत्वातिशयस्य स्वाभिमतत्वाच्च प्रथमं शब्दस्य सविशेषविषयत्वमाह—**शब्दस्य त्विति। तु** शब्दः परोक्तबलीयस्त्वस्य सूचकः। **विशेषेणेति**पदेन सविशेषवस्तुबोधकत्वातिशय उच्यते। यद्वा, सर्वप्रमाणानां सविशेषगोचरत्वे प्रतिज्ञाते चिद्वस्तुन्यन्तरङ्गतया स्वप्रकाशवृत्तिं निरूप्य तदनन्तरमात्मनि प्रत्यक्षादिभ्योऽन्तरङ्गत्वेनोभयवादिसंमतस्य शास्त्रस्य सविशेषविषयत्वमाह—**शब्दस्य त्विति।** सविशेषगोचरत्वे प्रमाणान्तरेभ्योऽतिशयो **विशेषेणे**त्युच्यते। **तु**शब्देन तदौपयिकं शब्दस्य सविशेषगोचरप्रत्यक्षादिपूर्वकत्वं विशेष उच्यते। प्रतिज्ञातस्य हेतुमाह–**पदवाक्यरूपेणेति**। ततः किं सैविशेषविषयत्वमेति शङ्कायां पदरूपेण प्रवृत्ति विवृणोति—**प्रकृतीति**। ततः किमित्यत्राह—**प्रकृतिप्रत्यययोरिति। पदस्यैवेति**। वाक्यं तावदास्तां पदमेव सविशेषपरमिति भावः। वाक्यरूपेण प्रवृत्तिं विवृणोति। **पदभेदश्चेति। पदभेदः** पदानां परस्परभेदः। न केवलं प्रकृतिप्रत्ययभेद एवार्थभेदहेतुकः, पदभेदोऽपीति **चार्थ**ः अन्यथा पदान्तरवैयर्थ्यादिति भावः। पदभेदस्यार्थभेदनिबन्धनत्वेऽपि वाक्यैकत्वात् निर्विशेषत्वसिद्धिरिति शङ्कायां–वाक्यस्य सविशेषविषयत्वं वदन्निर्विशेषे प्रमाणाभावमुपसंहरति—**पदसंघातेति**। तत्तत्पदाभिधेयानां संसर्गविशेष एव **वाक्यप्रतिपाद्य**ः, न तु तत्तत्पदार्थप्रहाणेनार्थान्तरमित्यर्थः। ननु—**निर्विशेष**शब्देन निर्विशेषं वस्तु किं प्रतिपन्नं, उताप्रतिपन्नम्, उत **सविशेषं** वस्तु प्रतिपन्नम्। आद्ये—निर्विशेषवस्तुनः शब्देन प्रतिपादनान्निषेधोऽनुपपन्नः। द्वितीये तु–निषेध्याप्रतिपत्तेर्निषेधोऽनुपपन्नः। तृतीये तु–सविशेषनिरासः कृतः स्यात्। नैवं; भ्रान्तिप्रमितिविभागात्—निर्विशेषवस्तुनि शब्दस्य प्रमाणभावो हि निषिध्यते **न तु** भ्रमहेतुत्वम्, अतो निर्विशेषशब्दजनिता मिथोऽन्वयानर्हार्थगोचरा भ्रान्तिः प्रमितिजनकैः **शब्दै**र्बाध्यत इति युक्तम्। **अधिकरण**तदसाधारणनिषेध्यप्रतिपक्षधर्मतो **विशेष**शब्दस्य संकोचानभ्युपगमे ह्यधिकरणालाभान्निषेधकशब्दस्यानन्वय एव स्यात्। न हि निर्विभक्तिकः पदान्तरान्वितो निर्विशेषशब्दोऽर्थाभिधायी, अतः संकोचाभावे व्याघातः॥ **यद्यपि—कथंचिद्विभक्त्यर्थो** न विवक्षितः, तथाऽपि–निर्विशेषपदस्य बहुव्रीहित्वादन्यपदार्थाभिधानमवर्जनीयं, **तत्पुरुषपदप्रयोगे चाधिकरणा**भिधानमवर्जनीयम्। अतो–यदि निर्विशेषशब्दः प्रमाणभूतवाक्यस्थः, तदा विषयविभागो

---

१ [illegible]। २ सविशेषपर°।

शेषवस्तुप्रतिपादनासामर्थ्यान्न निर्विशेषवस्तुनि शब्दः प्रमाणम् । प्रत्यक्षस्य निर्विकल्पकसविकल्पकभेदमिन्नस्य न निर्विशेषवस्तुनि प्रमाणभावः । सविकल्पकं जात्याद्यनेकपदार्थविशिष्टविषयत्वादेव सविशेषविषयम् । निर्विकल्पकमपि सविशेषविषयमेव; सविकल्पके स्वस्मिन्ननुभूतपदार्थविशिष्टप्रतिसंधानहेतुत्वात् । निर्विकल्पकं नाम केनचिद्विशेषेण वियुक्तस्य ग्रहणं, न सर्वविशेषरहितस्य; तथाभूतस्य कदाचिदपि ग्रहणादर्शनात्, अनुपपत्तेश्च । केनचिद्विशेषेणेदमित्थमिति हि सर्वा प्रतीतिरूपजायते; त्रिकोणसास्नादिसंस्थानविशेषेण विना कस्यचिदपि पदार्थस्य ग्रहणायोगात् । अतो निर्विकल्पकमेकजातीयद्रव्येषु प्रथमपिण्डग्रहणम्, द्वितीयादिपिण्डग्रहणं सविकल्पकमित्युच्यते । तत्र प्रथमपिण्डग्रहणे गोत्वादेरनुवृत्ताकारता न प्रतीयते, द्वितीयादिपिण्डग्रहणेष्वेवानुवृत्तिप्रतीतिः । प्रथमप्रतीत्यनुसंहितवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिधर्मविशिष्टत्वं द्वितीयादिपिण्डग्रहणावसेयम्—इति द्वितीयादिग्रहणस्य सविकल्पकत्वम् । सास्नादिवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिर्न प्रथमपिण्डग्रहणे गृह्यत इति—प्रथमपिण्डग्रहणस्य निर्विकल्पकत्वं, न

द्रष्टव्यः; सकलविशेषशून्यप्रतिपादनासामर्थ्यात् । 'नगरे को विशेषः' इत्युक्ते 'न कश्चिदपी'त्यादिषु वाक्येषु सविशेषनिषेधः संकुचितविषयो दृष्टः, तथा शास्त्रेष्वपि—'अविशेषास्ततो हि तं' इति गन्धादिगुणान्वितानामपि पृथिव्यादीनां शान्तत्व—घोरत्व—मूढत्वरूपकतिपयविशेषविरहविवक्षया **अविशेष**शब्दः प्रयुज्यते ॥

एवं ज्ञानस्वरूप आत्मन्यन्तरङ्गतया **स्व—अनुभव**शब्दौ निरूपितौ, अथ व्यतिरिक्तप्रमाणेषु मूलभूतस्य प्रत्यक्षस्य सविशेषविषयत्वमुपपादयति—**प्रत्यक्षस्येत्यादिना** । निर्विकल्पकानुभूतार्थस्य सविकल्पके प्रतिसंधानस्य वक्ष्यमाणत्वात्तदुपयोगित्वेन च सविकल्पकस्वरूपं प्रदर्शितम्, अथ निर्विकल्पकस्य सविशेषविषयत्वं प्रतिजानीते—**निर्विकल्पकमपीति** । एकजातीयपिण्डेषु द्वितीयादिपिण्डग्रहणस्य सविकल्पकत्वं, प्रथमपिण्डग्रहणस्य निर्विकल्पकत्वं च हृदि निधाय हेतुमाह—**सविकल्पक इति** । विशिष्टप्रतिसंधानमिति षष्ठीसमासः, कर्मधारयो वा । **स्वस्मिन्** निर्विकल्पके; अनुभूतजात्यादिपदार्थविशिष्टवस्तुविषयस्य सविकल्पके प्रतिसंधानस्य हेतुत्वादित्यर्थः । प्रथमपिण्डस्य विशिष्टतयाऽवगतत्वमर्थलब्धं, प्रथमपिण्डे जातिविशिष्टतया प्रतीते हि द्वितीयादिषु जात्यनुवृत्तिबुद्धिलक्षणं प्रतिसंधानं घटते । कथं प्रतिसंधानं, सकलविशेषशून्यविषयं हि निर्विकल्पकमिति हेत्वसिद्धिमाशङ्क्याह—**निर्विकल्पकं नामेति** । सकलविशेषवैधुर्याभावमुपपादयति—**तथाभूतस्येति** । सकलविशेषशून्यग्रहणं किं दर्शनादभ्युपगम्यते, किं वा अनुपपत्त्या कल्प्यत—इति विकल्प्य न तावद्दर्शनमित्याह—**कदाचिदपीति** । कल्पनं व्युदस्यति—**अनुपपत्तेरिति** । निर्विशेषज्ञानबाधिकैवानुपपत्तिर्दृश्यते तत्कल्पिका तु दूरतो निरस्तेति भावः । अदर्शनं विवृणोति—**केनचिदिति** । प्रकारविशेषनियमो नेति भावः । उत्तरत्र **ग्रहणायोगा**दिति पञ्चम्या हेतुत्वं स्फुटम् । अत्र पञ्चमीस्थाने **हि**शब्दः । इदमित्थमिति प्रतीतिमेव विवृण्वन् अर्थात् सकलविशेषशून्यग्रहणकल्पनामपि व्युदस्यति—**त्रिकोणेति** । अनुपपत्तिं विवृणोति—**ग्रहणायोगादिति** । अध्याहृतशङ्कावाक्येन ग्रहणायोगादिति पञ्चम्यन्तान्वयः । **त्रिकोणं** गोमुखम् । **ग्रहणायोगात्** दृष्टव्याप्तिविरोधेन सकलविशेषशून्यग्रहणकल्पनस्यानुपपन्नत्वादित्यर्थः । **अनुपपत्ते**रित्यनेन विपक्षे बाधकतर्कोऽभिप्रेतः—सविशेषविषयत्वाभावे प्रत्ययत्वमेव हीयेतेति । अस्य तर्कस्यानुग्राह्यं प्रमाणं—प्रत्यक्षं, योग्यानुपलम्भश्च । यद्वा—अनुपपत्तेरित्यनेन सविशेषविषयत्वे साधकप्रमाणं विवक्षितं—प्रथमाक्षसन्निपातजं ज्ञानं सविशेषविषयं; ज्ञानत्वात्, संप्रतिपन्नवदिति । एवं साधकप्रमाणाभाव—बाधकप्रमाणसद्भावाभ्यां विवक्षितकतिपयविशेषशून्यग्रहणं निर्विकल्पकमिति सिद्धम् । अनेन निर्विकल्पकशब्दस्य संकुचितवृत्तित्वं फलितं, स च संकोचः कस्मिन्विषये, इत्यत्राह—**अत इति** । **अतः** उक्तार्थ—दर्शनानुपपत्तिभ्यामित्यर्थः । प्रथमद्वितीयपिण्डयोर्निर्विकल्पक—सविकल्पकशब्दौ न संकेतितौ अतस्तयोः पिण्डयोर्वैषम्यं वक्तव्यमिति शङ्कायां, ग्राह्याकारभेदं दर्शयति—**तत्रेत्यादिना** वाक्यद्वयेन । गोत्वानुवृत्तिप्रतीत्य—प्रतीत्योः सविकल्पक—निर्विकल्पकशब्दयोः प्रवृत्तिनिमित्ततां दर्शयति—**प्रथमप्रतीतीत्यादिना** वाक्यद्वयेन । पूर्वग्रन्थोक्तं गोत्वं **संस्थान**शब्देन विशेषितं, तेन पराभिमतविलीनाज्यगतघृतत्वादेरिव प्रत्यक्षत्वे व्यञ्जकापेक्षया विलम्बो नास्तीति दर्शितम् । तदेव **संस्थान**मनन्तरग्रन्थे **सास्नादि**शब्देन निर्दिश्यते ॥

एवमनुवृत्तिग्रहाग्रहाभ्यां सविकल्पकत्वं निर्विकल्पकत्वं चोक्तं, नानुवृत्तिमात्राग्रहणान्निर्विकल्पकत्वं, किंतु जात्यग्रहणाच्च; अनुवृत्त्यग्रहणे हि जातिरेवानुगृहीता स्यात्—इति शङ्कायामाह—**न पुनः संस्थानेति** । अत्राग्रहणानुपपत्तियोतकः **संस्थानरूप**शब्दः । गोत्वादेरसाधारणधर्मभूताऽनुवृत्त्यग्रहणात् गोत्वादिर्न गृहीत—इति शङ्कायामग्रहणानुपपत्तिमेव विवृ-

पुनः संस्थानरूपजात्यादेरग्रहणात्; संस्थानरूपजात्यादेरप्यैन्द्रियकत्वाविशेषात्। संस्थानेन विना संस्थानिनः प्रतीत्यनुपपत्तेश्च प्रथमपिण्डग्रहणेपि ससंस्थानमेव वस्त्विवत्थमिति गृह्यते। अतो द्वितीयादिपिण्ड-

---

णोति—**संस्थानरूपजात्यादेरपीति**। ग्रहणकारणभूतेन्द्रिययोग्यतायामपि स एव हेतुरिति द्योतनाय–पुनः **संस्थान**–शब्दोक्तिः। निर्विकल्पकस्य सविशेषविषयत्वे प्रमाणत्वेन सविकल्पके निर्विकल्पकानुभूतार्थविषयप्रत्यभिज्ञानं पूर्वमुक्तम्। परामिमननिर्विकल्पकाभावे योग्यानुपलम्भः, प्रत्यक्षं च प्रमाणम्। तयोरनुग्राहकतर्कश्चानेनोक्तो भवति। किं प्रमाणाऽनुपपत्त्या, प्रमेयानुपपत्त्या वा वस्तुमात्रग्रहणाभ्युपगम—इति विकल्पमभिप्रेत्य प्रमाणानुपपत्ति **प्रथमं** व्युदस्यति—**ऐन्द्रियकत्वाविशेषादिति**। अनेन पृथिव्यपृथक्सिद्धगन्धव्यावृत्तिः। कथमैन्द्रियकत्वं–समवायस्यानैन्द्रियकत्वात्तदयुक्तमिति चेत्–तर्हि, सविकल्पकेऽपि विशिष्टग्रहणमनुपपन्नम्, अतो न मित्रेन्द्रियग्राह्यत्वमिति न प्रमाणानुपपत्तिः। **असंनिहितत्वं** प्रमेयानुपपत्तिः, अपृथक्सद्धत्वेन तन्नास्तीति परिहरति—**संस्थानेनेति**। अनेन चाक्षुषत्वेऽपि पृथक्सिद्धदण्डादिव्यावृत्तिः। एकेन्द्रियग्राह्यत्वे सत्यपृथक्सिद्धत्वात् प्रमाणप्रमेयानुपपत्तिर्नास्तीति–ससंस्थानमेव वस्तु गृहीतमित्यर्थः। एवं पूर्वं संस्थानरूपशब्देनाभिप्रेतोऽर्थो विवृतो भवति। अनुवृत्त्यग्रहणान्न संस्थानरूपजात्यग्रहः शङ्कनीयः; प्रकार–प्रकारिभावेन ग्रहणोपपत्तेरिति भावः। प्रथमपिण्डग्रहणेऽनुवृत्त्यग्रहणात् गोत्वं न गृहीतं चेत्, द्वितीये पिण्डेऽपि गोत्वं दुर्ग्रहम्; अनुवृत्त्यग्रहणात्। अनेकव्यक्त्यन्वयरूपा ह्यनुवृत्तिः, सा चान्वयिनः पदार्थस्य पूर्वव्यक्तिनिष्ठतापरामर्शेनैव द्वितीयादिषु गृह्यते, अतः प्रथमपिण्डे गोत्वाग्रहात्तदन्वयापरामर्शेन—द्वितीयव्यक्त्यन्वयरूपाऽनुवृत्तिर्द्वितीयेऽपि दुर्ग्रहेति—तत्रापि गोत्वमगृहीतम्। एवं प्रथमद्वितीयव्यक्त्यन्वयापरामर्शाच्च–तृतीयेऽप्यनुवृत्तिरगृहीतेति गोत्वमगृहीतम्। एवं व्यक्त्यन्तरेष्वपि गोत्वं दुर्ग्रहं स्यात्, अतः प्रथमपिण्डग्रहण एव गोत्वग्रहणमभ्युपेतव्यम्॥ एवं सकलविशेषशून्यवस्तुग्रहणं व्युदस्तं, जात्यादयो, विशेष्यं च पृथक् पृथक् निर्विकल्पके गृहीतं, सविकल्पक एव विशिष्टतया ग्रहणम्–इति पक्षश्चार्थान्निरस्तो भवति। विशेषणं विशेष्यं च पृथक् पृथग्गृहीतमिति कथमवगतं, दण्डकुण्डलादिषु विशेषणविशेष्ययोः पृथक् पृथग्ग्रहणपूर्वकत्वदर्शनादिति चेत्–तत्र किमपृथक्स्थितिवेलायां पृथग्ग्रहः, उत पृथक्स्थितिवेलायाम्। न प्रथमः; विशिष्टत्वेनैव ग्रहणात्। पृथक्स्थितिवेलायां तु–विशिष्टग्रहणमेव नास्तीति न तत्प्रतीतिहेतुत्वम्। अतः पृथग्ग्रहणस्य विशिष्टग्रहणहेतुत्वाभावान्न गोत्वादौ पृथग्ग्रहणप्रसङ्गः॥

ननु—विशेषणविशेष्यभावस्य सप्रतियोगिकत्वात् तज्ज्ञानस्य प्रतियोगिस्वरूपज्ञानमपेक्षितमिति–विशिष्टप्रतिपत्तेर्जात्यादिपदार्थस्वरूपमात्रग्रहणपूर्वकत्वं स्वीकार्यम्; उच्यते—प्रतियोगिज्ञानापेक्षा नाम किं विशिष्टज्ञाने प्रतियोग्यवभासनियमः, उत तत्तज्ज्ञानस्य विशिष्टज्ञानहेतुत्वम्। प्रथममभ्युपगच्छामः। द्वितीये च जात्यादयः पदार्थाः प्रथमं मिथो व्यावृत्ततया गृहीताः, न वा। न चेत्–अव्यावृत्ततया गृहीतानां पूर्वोत्तरज्वालानामिव–विशेषणविशेष्यभावप्रतियोगिताप्रतीतिर्नोपपद्येत। यदि—व्यावृत्ततया गृहीताः, तदा–व्यावृत्तिश्च विशेषणविशेष्यभावेन, पारतन्त्र्यादिलक्षणेन, तदौपयिकाकारान्तरेण वा यदि न स्यात्–विशेषणविशेष्यभावव्यत्यासप्रतीतिः प्रसज्येत। वस्तुसामर्थ्याद्धास्त्व एव विशेषणविशेष्यभावः प्रतीयत—इति चेत्, तर्हि वस्तुसामर्थ्य नाम–विशेषणविशेष्यभावरूपं, तदौपयिकाकारान्तररूपं वा स्यात्। वस्तुस्वभावस्य सत्तयोपकारकत्वे—वस्तुस्वभावादेव विशिष्टप्रतीतिसंभवात् स्वरूपमात्रग्रहणकल्पनमयुक्तम्। ज्ञाततयोपकारकत्वे–तेन स्वभावेन व्यावृत्ततया विशेषणस्य प्रागवगतिरस्तीति प्रथमत एव विशिष्टप्रतीतिरभ्युपगता स्यात्, ततो वरं द्रव्यस्यैव प्रथमं विशिष्टतया प्रतीत्यभ्युगमः। तस्यापि स्वभावस्य स्वविशेष्यभूतं विशेषणं प्रति विशेषणत्वं न प्रथममवगतं, किंतु स्वरूपमात्रमिति चेत्, तर्हि–विशेषण–तत्स्वभावयोर्विशेषणविशेष्यभावव्यत्यासः प्रतीयेत। तत्परिहाराय तस्य वस्तुस्वभावस्याकारान्तराभ्युपगमे–अनवस्था। यदि–व्यत्यासविशिष्टप्रतीतिप्राथम्यप्रसङ्गपरिहाराय जात्यादीनां स्वरूपमेव विशेषणभावो, विशेष्यभावश्च, न त्वाकारान्तरमित्यभ्युपगम्यते, तदा–प्रथमप्रतिपत्तिर्विशेषणतया विशेष्यतया च स्यात्; तदप्रतिपत्तौ स्वरूपस्यागृहीतत्वप्रसङ्गात्। तथैव प्रतीतौ–प्रथमत एव विशिष्टप्रतीतिः स्यात्; एकस्यां प्रतीतौ विशेषणतया, विशेष्यतया च जात्यादीनां प्रतिपन्नत्वात्। अतः–**प्रथमत एव** परस्परप्रतियोगिकविशेषणविशेष्यभावप्रतिपत्तिः संभवति–इत्यभ्युपगन्तव्यम्। एवं सति विशिष्टग्रहणस्य पृथग्ग्रहणपूर्वकत्वे मित्रसामग्रीवेद्यवस्तुगोचरत्वमुपाधिः स्यात्। पक्षव्यतिरिक्तव्यवच्छेद्याभावेऽप्युक्ततर्कबलात् पक्षव्यवच्छेद्यत्वसिद्धेरुपाधित्वं युक्तं, यथा–प्रध्वंसाभावस्यादिमत्त्वादन्तवत्त्वे भावरूपादिमत्त्वमुपाधिर्भवति भावोन्मज्जनप्रसङ्गरूपतर्कबलात्, यथा–वह्निमत्त्वाद्धूमानुमाने आर्द्रेन्धनवत्त्वमुपाधिः सर्वत्राग्निमिति धूमोपलम्भप्रसङ्गतर्कबलाद्भवति–तद्वत्। अतः–प्रथमपिण्डग्रहण एव गोत्वं गृह्यते, द्वितीयादिष्वनुवृत्तिग्रहणम्–इत्यभ्युपेत्यम्। अतो यथोक्तस्वरूपे एव निर्विकल्पक–सविकल्पके॥ **अनुवृत्तिग्रहणयोग्यौ हि सविकल्पकनिर्विकल्पकयोः** प्रयोजकौ कथितौ, तत्कथं द्वितीयादिग्रहणस्य सविकल्पकत्वमित्यत्राह—**अत इति। अतः प्रथमग्रहण एव ससंस्थानवस्तुग्रहणात्**। अनुवृत्तिग्रहणविधुरप्रथमेतरग्रहणेषु कथं सविकल्पकत्वमित्यत्राह—

---

१ पक्षनिरूपितत्वेन।

ग्रहणेषु गोत्वादेरनुवृत्तिधर्मविशिष्टता संस्थानिवत्, संस्थानवच्च सर्वदैव गृह्यत–इति तेषु सविकल्पकत्वमेव। अतः प्रत्यक्षस्य कदाचिदपि न निर्विशेषविषयत्वम्। अत एव सर्वत्र भिन्नाभिन्नत्वमपि निरस्तम्; इदमित्थमिति प्रतीताविदमित्थंभावयोरैक्यं कथमिव प्रत्येतुं शक्यते। तत्रेत्थंभावः–सास्नादिसंस्थानविशेषः, तद्विशेष्यं–द्रव्यमिदमंश इत्यनयोरैक्यं प्रतीतिपराहतमेव। तथाहि–प्रथममेव वस्तु प्रतीयमानं सकलेतरव्यावृत्तमेव प्रतीयते। व्यावृत्तिश्च–गोत्वादिसंस्थानविशेषविशिष्टतयेदमित्थमिति प्रतीतेः। सर्वत्र विशेषणविशेष्यभावप्रतिपत्तौ तयोरत्यन्तभेदः प्रतीत्यैव सुव्यक्तः। तत्र दण्डकुण्डलादयः पृथक्संस्थानसंस्थिताः, स्वनिष्ठाश्च कदाचित्कचिद्द्रव्यान्तरविशेषणतयावतिष्ठन्ते, गोत्वादयस्तु द्रव्यसंस्थानतयैव पदा-

---

द्वितीयादीति। द्वितीयादिपिण्डग्रहणेषु द्वितीयादित्वेन पिण्डग्रहणेषु। अनेन–संस्कारमचिवग्रहणं सविकल्पकम्, इतरत् निर्विकल्पकम्–इति सिद्धम्। एतेन न केवलं जात्यनुवृत्त्यैव सविकल्पकत्वं जातिगुणादिचान्यतमानुवृत्तिविशिष्टग्रहणमपि सविकल्पकमिति सिद्धम्। सर्वविधानुवृत्तिविकलग्रहणमेव निर्विकल्पकं, यथा—एकव्यक्तौ प्रथमाक्षसन्निपातजं ज्ञानम्। ननु—एकव्यक्तावपि संस्कारजन्यं देशकालाद्यनुवृत्तिविशिष्टग्रहणं सविकल्पकं स्यात्, स्यादेव; संस्कारजन्यत्वानुवृत्तिगोचरत्वाविशेषात्। **एकजातीयद्रव्येषु प्रथमपिण्डग्रहणमित्युक्तिस्तु** जात्यननुवृत्तिप्रदर्शनार्था। **संस्थानिवत्, संस्थानवदिति** दृष्टान्तद्वयप्रदर्शनं सष्टीकरणार्थम्। **पिण्डधर्मः** संस्थानं, **तद्धर्मोऽनुवृत्तिरिति** धर्म–धर्मिभावरूपसाम्यनिबन्धनं च दृष्टान्तद्वयोपादानम्। एवं सविकल्पकनिर्विकल्पकयोः संस्कारसचिवत्व–तद्विरहौ सामग्रीवैषम्यं, गोत्राद्यनुवृत्ति—तद्विरहौ ग्राह्याकारवैषम्यमित्युक्तं भवति॥

द्विविधस्यापि प्रत्यक्षस्य सविशेषविषयत्वं निगमयति—**अत इति।** प्रसङ्गात् भेदाभेदं निराकरोति—**अत एवेति। अत एव** प्रथमपिण्डग्रहणस्य विशिष्टविषयत्वसमर्थनेन। **सर्वत्र** पिण्डद्वय–जातिव्यक्ति–गुणगुणि–क्रियातद्वत्–कार्य–कारणेष्वित्यर्थः। कथमित्याह—**इदमित्थमिति।** भेदाभेदवादिनापि पिण्डानामन्योन्यभेदाभेदसमर्थने—इदमिदं न भवतीति भेदः, इदमिदं भवतीत्यभेद इत्येकस्यैव युगपद्भावाभावरूपव्याहतिपरिहारार्थं—जात्यात्मनाऽभेदो, व्यक्त्यात्मना भेद इत्याकारद्वयेन भेदाभेद उपपादितः। जातिगतोऽभेदः, व्यक्तिगतश्च भेद इति नैकस्य द्व्यात्मकता—इति शङ्कापरिहाराय जातिव्यक्त्योश्चान्योन्यभेदाभेद उक्तः, तन्निर्वहणायाकारान्तरान्वयादर्शनात् प्रतीतिरेव शरणमित्याश्रिता, अतः–तन्निरासाय प्रथमं जातिव्यक्त्योर्भेदेनैव प्रतीतेः–अभेदस्य प्रतीतिविरोधं दर्शयति—**इदमित्थमिति। इदं**भावो विशेष्यम्, **इत्थं**भावो विशेषणम्। **इत्थमंशः** कः, **इदमंशः** क इत्यत्राह—**तत्रेति।** अत्र जातिव्यक्त्योर्भेदाभेदे चत्वारो हेतवः परोक्ताः–प्रथमपिण्डग्रहणे अभेदेन ग्रहणम्, एकशब्दानुविद्धप्रत्ययो, मत्त्वर्थीयप्रत्ययनिरपेक्षसमानाधिकरणपदप्रयोगः, सहोपलम्भनियमश्चेति। अत्र सहोपलम्भनियम–समानाधिकरणप्रत्ययौ भेदाभेदसाधकौ, अन्यौ द्वावभेदसाधकौ। इदं हेतुचतुष्टयमाशङ्क्याह—**तथा हीति।** तान् हृदि कृत्वा प्रथमपिण्डग्रहणे अभेदेन ग्रहणं व्युदस्यति—**प्रथममेवेत्यादिना। सकलेतरव्यावृत्तं** सकलविजातीयव्यावृत्तमित्यर्थः। ततः किं भेदेन ग्रहणस्येत्यत्राह—**व्यावृत्तिश्चेति।** गोत्रादिसंस्थानविशेषविशिष्टतया इत्थमिति प्रतीतेर्व्यावृत्तिश्च निश्चीयते इत्यर्थः। अनेनाखण्डवाक्यार्थभङ्गश्चार्थतः कृतो भवति; शौक्ल्यादिवैधर्म्यस्येहाभिप्रेतत्वात्, तच्च पूर्वं दर्शितम्। गोत्रादिविशिष्टतया प्रतीतिरस्तु, तथाप्यभेदश्च स्वप्रमाणेन प्रसज्यते चेन्न निवार्यत–इत्यत्राह—**सर्वत्रेति। सर्वत्र** गोत्र–तदाश्रयादिषु, दण्डकुण्डलादिषु च। दण्डदण्डिनोरिव जातितद्वतोरपि विशेषणविशेष्यभाव एवाभेदविरोधीत्यर्थः। **विशेषणविशेष्यभावेति।** गोत्र–व्यक्त्योरनुवृत्ति-व्यावृत्त्यग्रहेऽपि, विशेषण-विशेष्यभावरूपेणाकारान्तरेण भेदो गृहीतः। न ह्येकेनैवाकारेण भेदग्रह इत्यस्ति नियम इति भावः। उभयत्रात्यन्तभेदोऽस्ति चेत्, मत्वर्थीय प्रत्ययनिरपेक्षसामानाधिकरण्यम्, एकशब्दानुविद्धप्रत्ययः, सहोपलम्भनियमश्च कथमेकत्र दृश्यते नान्यत्रेत्यत आह—**तत्रेति। तत्र** गोत्रतदाश्रय–दण्डदण्ड्यादिवर्गे। पृथक्संस्थानविशिष्टस्वपर्यवसितकादाचित्कविशेषणभावो मत्वर्थीयप्रत्ययसापेक्षसामानाधिकरण्यप्रत्यये प्रयोजकः। द्रव्यसंस्थानतयैव पदार्थत्वेन तत्पर्यन्तत्वात् तद्विशेषणतयैव स्थितिर्मत्वर्थीय प्रत्ययनिरपेक्षसामानाधिकरण्ये प्रयोजिका। सहोपलम्भनियम–तदभावयोरप्यपृथक्सिद्धत्व–पृथक्सिद्धत्वे एव प्रयोजके, नतु भेदाभेदाविति[1]यर्थः। सहोपलम्भनियमे द्वयोरेव सहभावात्—सहोपलम्भो द्वित्वसाधकः, तन्नियमस्तु भिन्नयोरेकस्मिन्नपि नास्तीत्यसाधारणनैकान्तिकत्वादनुभयसाधकः। किंच—विरुद्ध एव; द्वित्वसाधकसहोपलम्भनियमो हि द्वित्वस्य नियमं दर्शयति, एकशब्दानुविद्धप्रत्ययस्त्वेको दण्डीत्यादिषु दण्ड्यन्तरव्यावर्तकत्वदर्शनेन—धर्म्यन्तरनिषेधपरत्वान्न धर्मधर्मिणोरभेदसाधक इति भावः॥

---

१ अत्रेत्थं°। २ संस्कारजन्यदेशकालाद्यनुवृत्तिविशिष्टग्रहणं सविकल्पकं स्यात्, स्यादेव संस्कारजत्वानुवृत्तिगोचर°। का.मु.पु.।

र्थभूताः सन्तो द्रव्यविशेषणतयावस्थिताः, उभयत्र विशेषणविशेष्यभावः समानः । तत एव तयोर्भेदप्रतिपत्तिश्च । इयांस्तु विशेषः—पृथक्स्थितिप्रतिपत्तियोग्या दण्डादयः, गोत्वादयस्तु नियमेन तदन्तर्हा इति । अतो, वस्तुविरोधः प्रतीतिपराहत—इति प्रतीतिप्रकारनिह्नवादेवोच्यते । प्रतीतिप्रकारो ह्ययं 'दमित्थ' मित्येव सर्वसंमतः । तदेतत्सूत्रकारेण **'नैकस्मिन्नसंभवात्'** (ब्र. सू. २।२।३१) इति सुव्यक्तमुपपादितम् । अतः प्रत्यक्षस्य सविशेषविषयत्वेन प्रत्यक्षादिदृष्टसंबन्धविशिष्टविषयत्वादनुमानमपि सविशेषविषयमेव । प्रमाणसंख्याविवादेपि सर्वाभ्युपगतप्रमाणानामयमेव विषय इति—न केनापि प्रमाणेन निर्विशेषवस्तुसिद्धिः । वस्तुगतस्वभावविशेषैस्तदेव वस्तु निर्विशेषम्—इति वदन् जननीवन्ध्यात्वप्रतिज्ञायामिव स्ववाग्विरोधित्वमपि न जानाति । यत्तु प्रत्यक्षं सन्मात्रग्राहित्वेन न भेदविषयं, भेदश्च विकल्पासहत्वाद्दुर्निरूप—इत्युक्तं तदपि जात्यादिविशिष्टस्यैव वस्तुनः प्रत्यक्षविषयत्वात्, जात्यादेरेव प्रति-

---

यद्येवं जातिकुण्डलादैर्वैषम्यं, यदि—विशेषणविशेष्यभावसाम्याद्दुभयत्र भेदः साध्यते तर्हि—सहोपलम्भनियमादिदैर्वैषम्येणैकत्वमपि स्यादित्यत आह—**उभयत्रेति** । विशेषण—विशेष्यभावादिविशेषात्तत्प्रयुक्तभेदप्रतिपत्तिरनिवार्या; विशेषण—विशेष्यभावे सति भेदस्योभयसंप्रतिपत्तेः । सहोपलम्भनियमे ऐक्यं हि विमतम्, अतो न संप्रतिपन्नभेदविरुद्धाभेदः कल्प्यः, यथा—शीतोष्णलाद्यवान्तरवैषम्यं न द्रव्यत्वादिसाधारणाकारविरोध्यद्रव्यत्वकल्पकम्, एवं सहोपलम्भनियमो न भेदविरोध्याकारकल्पक इति भावः । यद्वा, पृथक्स्थितानां दण्डादीनामविशेषणानामेव सतां कदाचित् सहभावमात्राद्विशेषणत्वमभ्यस्तमित्यत्यन्तमित्रेषु विशेषणत्वाभावाद्विशेषणत्वं नात्यन्तभेदसाधनसमर्थम्—इत्यत्राह—**उभयत्रेति** । व्यावृत्तप्रतीतौ व्यावर्तकतयोपयुज्यमानत्वं विशेषणत्वं, तच्च दण्डादिष्वपि मुख्यमिति विशेषणत्वादत्यन्तभेदो युज्यत—इति भावः । गोत्वतदाश्रयादिष्वेव सहोपलम्भनियमो नान्यत्रेति व्यवस्थासिद्ध्यर्थमैक्यं कल्पनीयमिति चेत् तत्राह—**इयांस्त्विति** । इयानेव, न ह्यधिकं कल्पनीयमित्यर्थः । यदि सहोपलम्भनियमव्यवस्थार्थमैक्यं कल्प्यते तदयुक्तं; तत्रैवैक्यं नान्यत्रेति व्यवस्थार्थमर्थान्तरकल्पनाप्रसङ्गात् । यद्वैक्यं तत्र स्वाभाविकं, तर्हि सहोपलम्भनियमः स्वाभाविक इति न प्रतिपन्नविरुद्धार्थान्तरकल्पनागौरवमाश्रयणीयमिति भावः । यद्वा, विशेषणविशेष्यभावप्रसक्तभेदप्रतिपत्तिर्यथोभयत्र तुल्या तथा सहोपलम्भनियमो दण्डदेवदत्तादावपि स्यात्, जातिव्यक्त्योर्वा स न स्यादित्यत्राह—**इयानिति** । न हि साधारणाकारेऽभ्युपगतेऽवान्तरभेदस्याज्य इत्यर्थः । घटे पटस्याभावो भेदः, तत्र तस्य सद्भावोऽभेद इति भावाभावविरोधस्य 'न हि दृष्टेऽनुपपन्नं नामे'ति न्यायात् प्रतीतिपराहतत्वमाशङ्क्याह—**अत इति** । **अतः** इत्थं भेदसामानाधिकरण्येनाभेदस्य प्रतीत्यभावात् । कथं प्रतीतिप्रकारः, इत्यत्राह—**प्रतीतिप्रकारोहीति** । यदि विशेषणविशेष्ययोरैक्यमस्ति तर्ह्यन्यतरदेव प्रतीयेत, अन्यतरप्रतीतिर्वाऽस्तु तथाऽपि नैक्यं; यथा—पूर्वानुभूतयोः पुरुषयोरेकस्मिन् दृष्टे न हि पुरुषैक्यम् । जातिव्यक्त्योः संबन्धनियम एवैक्यमिति—चेत्र; भेदसाधकसंबन्धनियमस्य भेदनियतसाधकत्वात् । द्वयोर्हि संबन्धः, तन्नियम एवैक्यं चेत्, संबन्धस्वरूपभङ्गप्रसङ्गः । एवं भेदाभेदनिरासस्य सूत्रकारामिमतत्वमाह—**तदेतदिति** । अथ प्रमाणान्तराणां प्रत्यक्षमूलत्वात् तेषामपि सविशेषविषयत्वमाह—**अत इति** । प्रत्यक्षादिदृष्टधूमादिसंबन्धविशिष्टाग्न्यादिविषयत्वादित्यर्थः । स्वाभिमतमुक्तं प्रमाणत्रयं, प्रमाणान्तराभ्युपगमेऽपि तेषां सविशेषविषयत्वमाह—**प्रमाणसंख्येत्यादिना** । प्रमाणानि सविशेषविषयाणि स्युः तानि तर्कपराहतानीति शङ्कायाम्—अस्मिन् सर्वप्रमाणसविशेषविषयत्वविस्तरोक्तिसमयेऽपि पूर्वं तत्संग्रहोक्ताविव बुद्धिस्थस्वसिद्धिवादेऽपि न निर्विशेषत्वसिद्धिरिति ज्ञापनाय—सविशेषत्वबाधकतया परोक्तयुक्त्यभ्युपगमेऽपि युक्तिरूपविशेषैः सविशेषत्वमवर्जनीयमिति पूर्वोक्तं स्मारयन्विरोधं दर्शयति **वस्तुगतेति** । यद्वा पूर्वं स्वानुभवसिद्धे विशिष्टे निर्विशेषत्वनिष्कर्षो निष्कर्षकैर्धर्मैः सविशेषत्वापादनेन दूषितः, तत्सर्वं प्रमाणनिर्विशेषविषयत्वनिष्कर्षेऽप्यतिदिशति—**वस्तुगतेति** ॥

एवं **निर्विशेषचिन्मात्र**पारमार्थ्यव्यतिरिक्तापारमार्थ्यप्रतिज्ञाबाधः सामान्येन सर्वप्रमाणसविशेषगोचरत्वेन दर्शितः, अथ परोक्तं प्रमाणतर्कजातं **विशेषतो** दूषयितुमुपक्रमते । शास्त्रबलीयस्त्वमिच्छता परेण प्रथमं शास्त्रमुपन्यस्तं, तदनिच्छता **प्रत्यक्षाविरुद्धेऽर्थे शास्त्रं प्रमाणम्**यता सिद्धान्तिना प्रत्यक्षस्य सन्मात्रविषयत्वं निराक्रियते—तत्र प्रत्यक्षस्य सन्मात्रविषयत्वे, **भेदस्य दुर्निरूपत्वे** च परोक्तं कुतर्कमनूद्य निरस्यति—**यत्त्विति** । यत्त्वित्यादिना ग्रन्थद्वयेन प्रमाणानुपपत्ति—प्रमेयानुपपत्त्वमनुभाष्यम् । **तदपीति** । न केवलं सविशेषविषयत्वलोपपादनं, निर्विशेषविषयत्वलोपपादनानुपपत्तिश्चेत्यपिशब्दस्य भावः । यद्वा, न केवलं **मित्र**विषयत्वं स्थापितं सन्मात्रविषयत्वमपि दूरोत्सारितमित्यपिशब्दस्य भावः । **जात्यादेरेवेति** । स्वपर-

---

१ अतः । २ **मल्लिकावत्** । ३ °वैषम्ये एकत्वमपि । ४ शीतोष्ण° । ५ दण्डादावपि । ६ भेदनियतसंबन्धनियतत्वात् ।

योग्यपेक्षया वस्तुनः स्वस्य च भेदव्यवहारहेतुत्वाच्च दूरोत्सारितम्। संवेदनवद्रूपादिवच्च परत्र व्यवहारविशेषहेतोः स्वस्मिन्नपि तद्व्यवहारहेतुत्वं युष्माभिरभ्युपेतं भेदस्यापि संभवत्येव। अत एव नानवस्था, अन्योन्याश्रयणं च। एकक्षणवर्तित्वेपि प्रत्यक्षज्ञानस्य तस्मिन्नेव क्षणे वस्तुभेदरूपतत्संस्थानरूपगोत्वा-

---

निर्वाहकत्वाद्यावृत्तिरूपधर्मान्तरनिरपेक्षस्य, प्रतियोगिनिरपेक्षस्यैव चेति भावः। **दूरोत्सारितं** प्रतियोगिसरणकृतविलम्बे सत्यपि ज्ञानस्य यावत्कार्यसिद्धिस्थत्वं कल्प्यम्, तथाऽपि प्रतियोगिनिरपेक्षजात्यादेर्भेदत्वेनैकक्षणवर्तित्वेऽपि प्रत्यक्षस्य भेदस्य सुग्रहत्वात् दूरोत्सारितमिति भावः। **जात्यादेरेवे**त्यभिप्रेतं भेदस्य स्वपरनिर्वाहकत्वं परोक्तयुक्त्यैव दर्शयति—**संवेदनवदित्यादिना। संवेदनवत् रूपादिवच्चे**त्यनेन परोक्तपक्ष—सपक्षौ द्वावपि सपक्षीकृतौ। अनेन परोक्तदूषणस्य परिहृतत्वं दर्शयति—**अत एवेति।** अत्र प्रथमच्चशब्दस्य स्वपरनिर्वाहकत्वोपपादनेन दूषणपरिहारश्च सिद्ध इति भावः। द्वितीयश्चशब्दो दूषणद्वयसमुच्चये। अनवस्थापरिहारसिद्धौ तदर्थस्वपरनिर्वाहकत्वसिद्धिः, तदर्थस्वपरनिर्वाहकत्वसिद्धावनवस्थापरिहार—इत्यन्योन्याश्रय—इति चेन्न; भ्रमनिवृत्त्यन्वयव्यतिरेकाभ्यामेव स्वपरनिर्वाहकत्वसिद्धेरनवस्थापरिहारात्। प्रत्यक्षज्ञानस्य त्रिचतुरक्षणमात्रवर्तित्वेऽप्येकक्षणवर्तित्वमभ्युपगम्य परिहरति—**एकक्षणवर्तित्वेऽपीत्यादिना**। अत्रैवमनुसंधेयम्—किं प्रतीतिरनभ्युपगता, उताङ्गीकारेऽपि मूलं नास्ति, किं वा मूलं दुर्निरूपमिति: विषयो वा किं नास्ति, उत सन्नपि दुर्निरूप इति। तत्र प्रथमं प्रतीत्यनभ्युपगमो नोपपद्यते; वेदान्तानामनारम्भणीयत्वप्रसङ्गात्, वादिप्रतिवादिरूपेण कथाऽनुपपत्तेश्च। मूलमप्यस्ति; कार्यस्य संप्रतिपन्नत्वेन कारणस्य कल्पनीयत्वात्। 'कार्यं हि प्रतीतं कारणकल्पनायां प्रमाणं, न पुनः स्फुटावधारितं कार्यं कारणनिरूपणायाऽपह्नवमर्हती'ति नीतिविदः। दुर्निरूपत्वमपि नास्ति; कार्योत्पत्त्यनुरूपत्वं हि कारणस्य सुनिरूपत्वं, कार्योत्पत्त्या कारणस्य तदनुरूपत्वं सिद्धमिति न दुर्निरूपत्वम्। विषयोऽप्यस्त्येव; यदि न विषयः, तर्हि त्वयैतदनुयुक्तेन वक्तव्यं—प्रपञ्चस्य बाध्यत्वज्ञानं किं सविषयम्, उताविषयमिति। सविषयत्वे विषयोऽङ्गीकृत एव, नो चेत्—बाध्यत्वमपि नेति प्रपञ्चपारमार्थ्यं स्यात्, अतोऽस्त्येव विषयः। न च बाध्यविषयत्वं; तथा सति भेदबाधकप्रमाणजन्यप्रतीतेरपि मिथ्याविषयत्वेन भेदपारमार्थ्यप्रसङ्गात्। एतान् प्रत्याहुः—**'स्वशास्त्रनिर्णये सत्ये सत्याः स्युर्लोकनिर्णयाः। स्वशास्त्रनिर्णयेऽसत्येऽसत्याः स्युर्लोकनिर्णयाः'** इति॥

उक्तविकल्पेषु पूर्वे चत्वारः पक्षा **अपिचे**त्यादिना भाष्येण वक्ष्यमाणेनाभिप्रेता—इति तेषां निरस्तत्वं तत्र ज्ञास्यते, अत्र प्रथमं—पञ्चमं बाध्यविषयत्वपक्षं प्राधान्यात् परिजिहीर्षता भाष्यकारेण प्रत्यक्षबाधस्तावत्र दृष्ट इति यौक्तिकबाधः परिहियते—तत्र प्रतियोगिनिरपेक्षजात्यादेरेव भेदत्वेन तद्विशिष्टविषयतया क्षणान्तरग्राह्याभावात् क्रमयौगपद्यविकल्पायोगरूपा प्रमाणानुपपत्तिः परिहृता। एवं[3] प्रत्ययानुपपत्तौ—स्वरूपपक्षे प्रतियोगिनिरपेक्षभेदव्यवहारप्रसक्तिश्चेष्टतया परिहृता; हानोपादानरूपस्य, गोत्वादिशब्दावलम्बिनश्च—व्यवहारस्य, प्रतीतेश्च प्रतियोगिनिरपेक्षत्वात्। शाब्दव्यवहारविशेषे प्रतियोगिसापेक्षत्वस्य 'दाराः' कलत्रम्, आपः' इत्यादिषु स्त्रीत्व—नपुंसकत्व—बहुत्वादिवच्छब्दस्वभावायत्तत्वान्नार्थदूषणत्वम्। व्यावृत्तादिशब्दप्रयोगेष्वेव प्रतियोगिसापेक्षत्वदर्शनात्, गोत्वादिप्रतिपत्तिव्यवहारेषु तदभावाच्च—शाब्दस्य व्यवहारविशेषस्य प्रतियोगिसापेक्षत्वं शब्दविशेषस्वभावाधीनमित्यन्वयव्यतिरेकाभ्यां निश्चीयते। शब्दस्वभावश्च प्रवृत्तिनिमित्तसाधारण्यात्तदवच्छेदकोपाधिपुरस्कारेणार्थविशेषप्रतीतिहेतुत्वम्। गोत्वशब्दो ह्यसाधारणो गोत्वं स्वरूपेण दर्शयति, भेदशब्दस्तु व्यावृत्तिबुद्धिहेतुतुल्यरूपप्रवृत्तिनिमित्तसाधारण्यात्तदवच्छेदकमहिषादिपदार्थान्तररूपोपाधिपुरस्कारेण गोत्वं दर्शयति। पर्यायत्वप्रसक्तिश्च परिहृता; व्यावृत्तिरूपे परे ब्रह्मणि ब्रह्मशब्देन सह स्वरूपशब्दवदधिकार्थाविवक्षायामपि भिन्नशब्दस्य प्रयोगसंभवात्। उपाधिशब्दानां हि वाच्यानतिरेकेऽपि तटस्थोपाधिमेदादपर्यायत्वमुपपद्यते तत्रेच्छौ प्रयोगाप्रयोगौ। भेदस्य व्यावृत्त्यनुवृत्तिविकल्पोऽपि परिहृतः; व्यावृत्तत्वमभ्युपगमे स्वरूपव्यावृत्तशब्दयोरिव भेदशब्दस्यानुवृत्तप्रयोगसंभवात्। **भिन्नो हि भेदयोगी**त्येतच्च स्वरूपस्यैव जात्यादिभेदविशिष्टत्वेन भिन्नशब्दप्रयोगसंभवात् परिहृतम्। धर्मभूतजात्यादौ हि भिन्न इति प्रयोगो भवन्मते व्यावृत्तिरूपे ब्रह्मणि व्यावृत्तशब्दवदौपचारिकः। धर्मान्तरराहित्येऽपि तद्योगकार्यव्यावृत्तिबुद्धिहेतुत्वात् धर्मपक्षेऽनवस्था—अन्योन्याश्रयणे च परिहृते; प्रतियोगिनिरपेक्षजात्यादेरेव भेदत्वात्, तस्यैव स्वपरनिर्वाहकत्वाभ्युपगमाच्च। अविद्याया ब्रह्मणो भेदोऽस्ति वा, न वा। न चेत्—ब्रह्मणो जडत्वादिप्रसङ्गः। अस्ति चेत्, स भेदः—स्वरूपं वा, धर्मो वेति विकल्पे दूषणपरिहारसाम्यं द्रष्टव्यम्। किंच—स्वरूपधर्मविकल्पदूषणपरिहारा अभेदेऽपि तुल्याः—अभेदः स्वरूपं चेत्, प्रतियोगिनिरपेक्षाभेदव्यवहारप्रसङ्गः; **'परमात्मना भवत्यभेदी। घटध्वंसे घटाकाशो न भिन्नो नभसा यथे'**त्यादिष्वभेदः सप्रतियोगिको ह्यवसीयते. **ब्रह्माद्वितीय**मिति पदानां पर्यायत्वं स्यात्, धर्मश्चेत् सविशेषत्वं ततश्चापसिद्धान्त इति॥

---

१ °संस्थानगोत्व°। २ यावत्कार्यसिद्धि स्थिरत्वं कल्प्यम्। ३ एवं प्रमेयानुपपत्तौ।

देर्गृहीतत्वात्क्षणान्तरग्राह्यं न किंचिदिह तिष्ठति। अपि च सन्मात्रग्राहित्वे 'घटोस्ति, पटोस्तीति विशिष्टविषया प्रतिपत्तिर्विरुध्यते। यदि च सन्मात्रातिरेकिवस्तुसंस्थानरूपजात्यादिलक्षणो भेदः प्रत्यक्षेण न गृहीतः किमित्यश्वार्थी महिषदर्शने निवर्तते। सर्वासु प्रतिपत्तिषु सन्मात्रमेव विषयश्चेत्तत्प्रतिपत्तिविषयसहचारिणः सर्वे शब्दा एकैकप्रतिपत्तिषु किमिति न स्मर्यन्ते। किंच—अश्वे हस्तिनि च संवेदनयोरेकविषयत्वेनोपरितनस्य गृहीतग्राहित्वात्, विशेषाभावाच्च स्मृतिवैलक्षण्यं न स्यात्। प्रतिसंवेदनं विशेषाभ्युपगमे प्रत्यक्षस्य विशिष्टार्थविषयत्वमेवाभ्युपगतं भवति, सर्वेषां संवेदनानामेकविषयतायामेकेनैव संवेदनेनाशेषग्रहणादन्धबधिराद्यभावश्च प्रसज्येत। न च चक्षुषा सन्मात्रं गृह्यते; तस्य रूपरूपिरूपैकार्थसमवेतपदार्थग्राहित्वात्। नापि त्वचा; स्पर्शवद्द्रस्तुविषयत्वात्। श्रोत्रादीन्यपि न सन्मात्रविषयाणि, किंतु शब्दरसगन्धलक्षणविशेषविषयाण्येव। अतः सन्मात्रस्य ग्राहकं न किंचिदिह दृश्यते। निर्विशेषसन्मात्रस्य च प्रत्यक्षेणैव ग्रहणे तद्विषयागमस्य प्राप्तविषयत्वेनानुवादकत्वमेव स्यात्, सन्मात्रब्रह्मणः प्रमेयभावश्च। ततो जडत्वनाशित्वादयस्तयैवोक्ताः। अतो वस्तुसंस्थानरूपजात्यादिलक्षणभेदविशिष्टविषयमेव प्रत्यक्षम्। संस्थानातिरेकिणोनेकेष्वेकाकारबुद्धिबोध्यस्यादर्शनात्, तावतैव गोत्वादि-

---

इत्थं विषयदुर्निरूपत्वपक्षे प्रतिक्षिप्ते, भेदप्रतीत्यनभ्युपगम एव परेषां शरणमिति तन्निराकरोति—**अपि चेत्यादिना**। प्रथमं प्रतिपत्तिविरोध उच्यते—**सन्मात्रेति। यदि चे**त्यादिना व्यवहारविरोधः। **सर्वास्वि**त्यादिना शब्दविरोधः। नन्वेकत्र स्मर्यन्त एव सर्वे शब्दाः सर्वप्रतीतीनां सन्मात्रविषयत्वाभ्युपगमात्—नैवं; घटे प्रतिपन्ने तत्र पटव्यवहाराप्रसङ्गस्याभिप्रेतत्वात्। अत्र प्रतिदूषणं सन्मात्रशब्दानुवृत्तिर्दूष्योर्थोऽन्यमेवेति स्मरणार्था। **किंचेत्यादिना** प्रतीत्यवान्तरजातिविशेषविरोध उक्तः। अत्र सन्मात्रशब्दाप्रयोगः; **किंच**शब्देन दूष्यार्थप्रतिसंधानात्। धारावाहिकज्ञानेषु कालभेदोऽस्तीति तद्व्यावृत्त्यर्थं **विशेषाभावा**दित्युक्तम्। **स्मृतिवैलक्षण्यं न स्यादिति**। ज्ञाततयैव परामर्शप्रसङ्ग इत्यर्थः। धारावाहिकबुद्धिष्विव ज्ञाततापरामर्शाभावोपपत्तिरिति—चेन्न; तत्राप्रतिसंधानस्य तादात्विकबुभुत्साभावाधीनत्वात्, अत्र तु सत्यामपि बुभुत्सायां ज्ञाततापरामर्शाभावो विषयभेदमेव व्यवस्थापयति। **प्रतिसंवेदनमिति**। विशेषाभ्युपगमशङ्का परस्य गत्यन्तराभावद्योतनार्था। **सर्वेषामि**त्यादिना करणव्यवस्थाऽभावप्रसङ्ग उक्तः। करणानां व्यवस्थासिद्ध्यर्थं विषयभेदानाह—**न चेत्यादिना**। अत्र पूर्वोक्तविशिष्टविषयप्रतिपत्तिविरोधविवरणम्, अकारणकत्व-दुर्निरूपाकारणकत्वनिरसनं च कृतं भवति। **रूपैकार्थसमवेतेति**। रूपसमानाश्रयसमवेत इत्यर्थः। समवेतशब्दो विशेषणतैकस्वभावपरः, विशेष्यत इति विशेषः, तेन सन्मात्रविलक्षणपरस्परभिन्नविषयत्वसिद्धिः॥

नन्वु—सर्वं प्रत्यक्षं सविशेषविषयमित्युक्तं शब्दगन्धरसानां साश्रयतया, धर्मान्तरवत्तया वा ग्रहणाभावात्तद्ग्राहिणः प्रत्यक्षस्य कथं सविशेषविषयत्वं, नैतदेवं; गुणकर्मणोरपि तत्तत्संस्थानवत्तया कालविशिष्टतया च सविशेषत्वेन गृह्यमाणत्वात्। एतच्च निर्विकल्पकमपेक्ष्योक्तं, सविकल्पके तु देशादीनां बहूनां विशेषणत्वं संभवत्येव। इन्द्रियाणां लोकसिद्धहेतुभिः सन्मात्रविषयत्वप्रतिक्षेपमुपसंहरति—**अत इति**। प्रत्यक्षस्य सन्मात्रविषयत्वं पराभ्युपगतार्थान्तरविरुद्धं चेत्याह—**निर्विशेषेति**। शास्त्रस्याप्राप्तविषयतयाऽर्थवत्त्वं, लोकसिद्धत्वात् भेदस्य शास्त्राविषयत्वं वदद्भिः परैरेवाभ्युपेतम्। श्रुतिप्रामाण्यविरोध उक्तः, **परामिमतार्थान्तरविरोधमाह—सन्मात्रब्रह्मण इति**। ततः फलितमनिष्टमाह—**तत इति**। एवमुपपादितं प्रत्यक्षस्य सन्मात्रग्राहिलप्रतिक्षेपं स्वाभिमतार्थान्तरव्युत्पादनाय प्रत्यक्षस्य विशिष्टविषयत्वे पर्यवसाययति—**अत इति। अत** इत्यादिभाष्येऽर्थद्वयमुक्तं—**वस्तुसंस्थानरूपा** जातिः, जात्यादिरेव **भेद** इति च। तत्र प्रथमं संस्थानमेव जातिरित्युपपादयति—**संस्थानेत्यादिना। किं दर्शनेन**, अनुपपत्त्या वा संस्थानातिरिक्तजात्यभ्युपगम—इति विकल्पममिप्रेत्य दर्शनं नेत्याह—**संस्थानातिरेकिण इति। अयं** सास्नादिमान्, अयमपि सास्नादिमान्, अयं पृथुबुध्नोदराकारः, अयमपि तदाकार इति **सास्नादिबुद्धिव्यवहारविषयो** दृश्यते, तदतिरिक्तोऽनुवृत्तधीव्यवहारविषयो न कश्चिद्दृश्यते तस्मादित्यर्थः। यद्वा जातितया **स्वामिमतात् संस्थानात्** परामिमतजातेरसाधारणं रूपमुक्तम्—**एकाकारबुद्धिबोध्यस्येति**। कल्पनमप्यनुपपन्नमित्याह—**तावतेति। व्युत्पत्तिः, अनुगतप्रयोगश्च व्यक्तिजातिविशेषादिशब्दानामिव** गवादिशब्दानामपि सुसदृशोपाधिवशादुपपद्यत इति

---

१ **महिषदर्शनेन**। २ °चेत्प्र°। ३ °हाराप्रतिषेधप्र°। ४ तात्त्विक°।

जातिव्यवहारोपपत्तेः, अतिरेकवादेपि संस्थानस्य संप्रतिपन्नत्वाच्च संस्थानमेव जातिः । संस्थानं नाम

भावः । नामान्तरेण परामिमतजातेरभ्युपगतत्वशङ्काव्युदासायाह—**अतिरेकवादेऽपीति** । परैरवयविनोऽसमवायिकारणत्वेन संस्थानं स्वीकृतं, किमिदं संस्थानं नाम—किमवयवसंयोगविशेषः, उत स्वरूपमात्रम्, उतान्यत् किमपि । प्रथमे—निरवयवेष्वात्मसु संस्थानाभावादात्मत्वजातिर्न स्यात् । द्वितीये—प्रत्यक्षस्य विशिष्टविषयत्वं न स्यात्, अनुगतव्यवहारश्च न स्यात्, जातिमात्रोच्छेदश्च स्यात् । तृतीये—गत्यभावादसत्प्रक्षाङ्गीकार—इति शङ्कायां निरवयवेष्वपि जातिव्यवहारसिद्ध्यर्थं जात्यजातिव्यवहारसाधारणं संस्थानमात्रं दर्शयति—**संस्थानं नामेति** । घटस्य द्रव्यत्वं संस्थानं माभूदित्यसाधारणशब्दः । रूपमपृथक्सिद्धविशेषणं, तेन गर्भदासादिव्यवच्छेदः ॥

ननु—खासाधारणमित्यत्र खशब्दः किं व्यक्तिपरः, उत सजातीयपरः । व्यक्तिपरत्वे च—किमेकव्यक्तिपरः, उत सर्वव्यक्तिपरः । प्रथमे—एकव्यक्त्यतिरिक्तव्यक्तिषु गोत्वं न स्यात् । खशब्दसर्वव्यक्तिपरत्वे—महिषव्यक्तावपि गोत्वं स्यात् । असाधारणशब्दश्च निष्फलः । सजातीयपरत्वे—जातेः संस्थानविशेषत्वात् समानसंस्थानविशेषाणामसाधारणं रूपं संस्थानमित्युक्तं स्यात् तत्श्चात्माश्रयः: संस्थाननिरूपणस्य तत्प्रतिपत्तिसापेक्षत्वात्, नैवम्: खशब्दस्य प्रकृतपरत्वात् । प्रकृतत्वं च तद्व्यवहारगोचरतया बुद्धिस्थत्वम् ॥ एवं तर्हि—खण्डे बुद्धिस्थे गोत्वं तदसाधारणमिति मुण्डे गोत्वं न स्यात्, खण्डस्य वा गोः गोत्वं संस्थानं न स्यात्, मुण्डेऽपि विद्यमानतया गोत्वस्य खण्डासाधारणत्वाभावादिति—चेन्न; खण्डं प्रति गोत्वस्य संस्थानरूपत्वाभावात्, खण्डत्वमेव हि खण्डस्य संस्थानम् । किं तव खण्डो बुद्धिस्थः, उत गौः, उत खण्डो गौः । प्रथमे—खण्डत्वमेव खण्डासाधारणमिति न मुण्डे गोत्वाभावप्रसङ्गः । अत एव खण्डं प्रति गोत्वस्य संस्थानरूपत्वाभावश्च नानिष्टः । द्वितीये—गोर्गोत्वमसाधारणमिति महिषादौ गोत्वं निवर्तते, गोषु च वर्तत इति न कश्चिद्दोषः । तृतीये—यथा नीलोत्पलस्य नीलत्वविशेषितमुत्पलत्वमसाधारणम्, एवं खण्डस्य गोः खण्डत्वविशेषितगोत्वमसाधारणमिति मुण्डे खण्डत्वविशेषितगोत्वमेव निवर्तते, न गोत्वमात्रमिति न काचिदनुपपत्तिः । नीलत्वविशेषितमुत्पलत्वमिन्दीवरशब्दप्रवृत्तिनिमित्तत्वादेकं संस्थानं, खण्डत्व—गोत्वे तु मिथोविशेषणविशेष्यभावेऽपि नैकं संस्थानम्; एकशब्दप्रवृत्तिनिमित्तत्वाभावादिति भिदा । अतः खासाधारणरूपसंस्थानम् ॥ कस्तर्हि जातिरूपसंस्थानानां शौक्ल्यादिभ्यो भेदः, स्वभावतारतम्याभावादिति ब्रूमः; शौक्ल्यादिषु हि शुक्लं शुक्लतरमिति तारतम्यं विद्यते, शब्दादिष्वप्युपाधितो वा, स्वतो वा तीव्रतरत्वादितारतम्यमुपलभ्यते, खरत्व—मृदुत्वादिस्वभावतारतम्यं स्पर्शादिष्वस्ति, संख्यास्वपि न्यूनाधिकभाव उपलब्धः, परिमाणे च स्फुटतरः । एवं गोत्वादिषु गोतरो, गोतम इति तारतम्यं नोपलभ्यते । एवमादिवैषम्यं द्रष्टव्यम् ॥ (संस्थानसामान्यलक्षणपक्षं त्यक्त्वा) जातिरूपसंस्थानलक्षणमिह विवक्षितं चेत् प्रकृताकारेण सुसदृशव्यक्तयः समस्ताः **स्व**शब्देन विवक्षिताः । **प्रकृताकारे**णेत्यात्माश्रयः परिहृतः; संस्थाननिरूपणस्य संस्थानप्रतिपत्तिनिरपेक्ष्यात् । **सुसदृ**शशब्देन महिषादावतिप्रसङ्गः परिहृतः । **समस्त**शब्देन मुण्डादिष्वभावप्रसङ्गः परिहृतः; खण्डासाधारणत्वाभावात् गोत्वस्य । ननु—व्यावृत्तं संस्थानमनुवृत्तव्यवहारस्य कथं निष्पादकम्, उच्यते—यथा व्यक्तित्वजातिविरहेऽपि वह्नीषु व्यक्तिषु व्यक्तिशब्दप्रयोगः, यथा गोत्वाश्वत्वजातियु जात्यन्तराभावेऽपि जातिशब्दप्रयोगः, भिन्नेषु भिन्नत्वजात्यभावेऽपि भिन्नशब्दप्रयोगः, खण्डादिषु खण्डत्वादिजात्यभावेऽपि खण्डादिशब्दप्रयोगः, यथा च नित्यद्रव्येषु विशेषमिच्छतां विशेषेषु विशेषत्वाभावेऽपि विशेषशब्दप्रयोगः, तद्वद्भवादिशब्दव्यवहार उपपद्यत—इति । किंच—कोऽयमनुवृत्तव्यवहार इति निरूप्यं, गकारौकारविसर्जनीयानामानुपूर्वी यावदाकाशभाविनां देशतः, कालतश्च नोपपद्यत—इति तस्या उच्चारणनिबन्धनत्वात्, उच्चारणस्य च विनाशित्वादानुपूर्वी च प्रतिप्रयोगविनाशिनीत्यानुपूर्वीविशेषविशिष्टस्य शब्दस्य कथमनुवृत्तिः, सुसदृशत्वमेव शब्दानामनुवृत्तिरिति चेत्, अर्थानामपि गोत्वादीनां तथाभूतैवानुवृत्तिरित्यङ्गीक्रियताम् ॥

ननु—किमिदं सौसादृश्यम्, उच्यते—सदृशव्यवहारासाधारणहेतुर्विषयधर्मः सादृश्यं, स च श्रातृत्ववत् प्रतियोगिनिरूप्यपदार्थः प्रतिव्यक्ति व्यावृत्तः, अतो न वृत्तिविकल्पादिर्दोषः द्यम् । निर्दिष्टाकारपौष्कल्यतः सादृश्यं सौसादृश्यमिति विशेष्यवाचिशब्दप्रवृत्तिनिमित्तपौष्कल्यं विवक्षितम् । **पौष्कल्य**शब्देन गवयनिष्ठगोसादृश्यं न सौसादृश्यमिति सिध्यति ॥ नन्वेवं तर्हि प्रथमेतरगोव्यक्तिषु गवा सुसदृश इत्येव प्रयोगः स्यात्, न तु गौरिति चेत्, यदि विवक्षा तदा प्रयुज्यताम्; 'अयं गौः, अयं गवा सुसदृश' इति प्रयोगेऽर्थभेदाभावात् । किं तर्हि न प्रयुज्यत, इति चेत्—व्यवहारगौरवादिति ब्रूमः; गौरिति व्यवहारे हि लाघवात् सौकर्यमस्ति । ननु—तर्हि तत्सदृशे तच्छब्दो माणवकेऽग्निशब्दवदौपचारिकः स्यात्, न; सौसादृश्यलक्षणानुवृत्त्यभावनिबन्धनत्वादौपचारिकत्वस्य । न हि माणवकाग्न्योः सौसादृश्यं, किं तु सादृश्यलेशमात्रं, पक्षे तु सौसादृश्यलक्षणानुवृत्तिरुपलभ्यते, तस्य च मुख्यताहेतुत्वं वृद्धव्यवहारसिद्धं, यथा जात्यादिशब्दानाम्, अतोऽनुवृत्तप्रयोग उपपन्नः । कस्मिंश्चिदर्थे कस्यचिच्छब्दस्य व्युत्पत्तिस्तत्सुसदृशेऽर्थे सुसदृशस्य तद्वाचकशब्दस्यैव प्रयोगे हेतुः—इति यथादर्शनमभ्युपगन्तव्यम् ।

१ आत्मादिषु । २ जात्यजातिसाधारणम् ।

स्वासाधारणरूपम्—इति यथावस्तु संस्थानमनुसंधेयम् । जातिग्रहणेनैव 'भिन्न' इति व्यवहारसंभवात्, पदार्थान्तरादर्शनात्, अर्थान्तरवादिनाप्यभ्युपगतत्वाच्च गोत्वादिरेव भेदः । ननुच—जात्यादिरेव भेदग्राहकेत्तस्मिन्गृहीते तद्व्यवहारवद्भेदव्यवहारोपि स्यात्—सत्यम्, भेदश्च व्यवह्रियत एव; गोत्वादिव्यवहारात्। गोत्वादिरेव हि सकलेतरव्यावृत्तिः; गोत्वादौ गृहीते सकलेतरसजातीयबुद्धिव्यवहारयोर्निवृत्तेः । भेदग्रहणेनैव ह्यभेदनिवृत्तिः । 'अयमस्माद्भिन्न' इति तु व्यवहारे प्रतियोगिनिर्देशस्य तदपेक्षत्वात्प्रतियोग्य-

---

अप्रतिपन्नमर्थान्तरं कल्पयित्वा वृत्तिविकल्पादिदोषाणां प्रतीतिशरणतया परिहारादपि परिदृष्ट एव वस्तुनि प्रतीतिबलेन चोद्यपरिहारो हि लाघवन्यायादुपपद्यते, व्यक्तिग्रहणं च सौसादृश्यलक्षणानुवृत्तेरेवोपपद्यत—इति तदपि न स्वदभिमतजातिकल्पकम् । अतः संस्थानानतिरिक्ता जातिः ॥ ननु—संस्थानस्यासाधारणाकारत्वात्, तेन विना संस्थानिनः प्रतीत्यनुपपत्तेश्च शुक्त्यादौ रजतादिभ्रमो न स्यात्; न ह्यसाधारणाकारस्फूर्तौ भ्रमसंभव इति चेत्—न; केनाऽपि संस्थानेन प्रतिपन्ने वस्तुनि प्रतिपन्नसंस्थानाविरोध्याकारविषयभ्रमोपपत्तेः प्रतिपन्नसंस्थानविरोध्याकारभ्रमस्यैव ह्युत्पत्त्यसंभवः । इदं शुक्लमिति प्रमितौ न कार्ष्ण्यादिभ्रमः; शौक्ल्यं हि शुक्लस्यासाधारणं, न शुक्तेः । अतोऽसाधारणाकारप्रतीतिः, भ्रान्तिश्चोपपद्यते ॥ एवमापेक्षिकं चेदसाधारण्यं तर्ह्यसाधारणशब्दवैयर्थ्यं स्यात्, न हि किमपि रूपं कस्यचिदसाधारणं न भवतीति—चेन्न; शुक्त्यपेक्षया शौक्ल्यस्य संस्थानत्वव्युदासार्थत्वादसाधारणशब्दस्य । अतः स्वासाधारणरूपं संस्थानं ततो नातिरिक्ता जातिरिति सिद्धम् ॥

इत्थं संस्थानमेव जातिरित्युपपाद्य गोत्वादेरेव भेदत्वं पूर्वं प्रस्तुतमुपपादयति—**जातिग्रहणेनेति** । प्रतियोगिनिरपेक्षो गोत्वादिः प्रतियोगिसापेक्षभेदो भवितुं नार्हति, अतः प्रतियोगिसापेक्षेतरेतराभावो गोत्वाद्यतिरिक्तो भेदोऽभ्युपगन्तुमुचित इति शङ्कायामुच्यते—**जातिग्रहणेनैव भिन्न इति व्यवहारसंभवादिति** । अयमर्थः—गोत्वादिव्यतिरिक्तभेदमङ्गीकुर्वताऽप्यभावाभावे प्रतियोगिनिरपेक्षभावरूपपदार्थस्यैव प्रतियोगिसापेक्षाभावत्वमङ्गीकृतम्; अन्यथाऽनवस्थानात्, अनुपलम्भाच्च, तद्वदत्रापि संभवति प्रतियोगिसापेक्षत्वस्य प्रतियोगिनिरूपितवेषप्रवृत्तिनिमित्तकशब्दस्वभावाधीनत्वेनार्थस्वरूपभेदहेतुत्वाभावादिति । एवमनुपपत्तिर्नास्तीत्युक्तम्, दर्शनं च नेत्याह—**पदार्थान्तरादर्शनादिति** । नामान्तरेणेतरेतराभावाभ्युपगमशङ्कां व्युदस्यति—**अर्थान्तरेति** । **अर्थान्तरवादिना** इतरेतराभावरूपो भेदोऽप्यस्तीति वदतेत्यर्थः । पूर्वं प्रतियोग्यपेक्षया **भेदव्यवहार** इत्युक्तम्, अत्र तन्निरपेक्षगोत्वादिभेद उक्तः—तर्हि, भेदव्यवहारोऽपि प्रतियोगिनिरपेक्षः प्रसजेदित्यभिप्रायेण चोदयति—**ननु चेति** । एकार्थविषयानेकचोद्यसमुच्चयपरः इदंशब्दः । **सत्यमिति** । प्रतियोग्यनपेक्षभेदस्वरूपव्यवहारेऽभ्युपगमः, भेदशब्दादिव्यवहारविशेषे तदनभ्युपगमः । **भेदश्च व्यवह्रियत एवेति** । न केवलं गृह्यते, प्रतियोगिनिरपेक्षं व्यवहियते चेति **चार्थः** । उपपादयति—**गोत्वादिव्यवहारादिति** । कथं गोत्वादिव्यवहारे सति भेदव्यवहार इत्यत्राह—**गोत्वादिरिति** ॥

गोत्वादिरेव कथं व्यावृत्तिः, इत्यत्राह—**गोत्वादाविति** । निर्दिष्टसामान्यानन्तरपरसामान्यापेक्षया तद्विशेषाणां सजातीयत्वं विवक्षितम्, अत्र तिर्यक्त्वेन सजातीयो महिषादिर्गौरस्य व्यवच्छेद्यः । व्यावृत्तेः सजातीयबुद्धिव्यवहारनिवृत्तिहेतुत्वमस्तु ततः किं जात्यादेर्भेदत्व—इत्यत्राह—**भेदग्रहणेनैव ह्यभेदनिवृत्तिरिति । अभेदनिवृत्तिः** अभेदधीनिवृत्तिः । एवं गोत्वादेः प्रतीतौ, हानोपादानादौ, गोत्वादिशब्दव्यवहारे च न प्रतियोग्यपेक्षेत्युक्तं—तर्हि, कथं 'मयस्माद्भिन्न' इत्यत्र प्रतियोग्यपेक्षेति शङ्कायामाह—**अयमस्मादिति** । न हानादिव्यवहारे, नापि शाब्दव्यवहारमात्रे, अपि तु शाब्दव्यवहारविशेष एवेति ज्ञापयति **तु**शब्दः । **भेदश्च व्यवह्रियत एवे**त्यादिना **भेदग्रहणेनैव ह्यभेदनिवृत्तिरित्यन्तेन** कस्यचिद्वस्तुनो वस्त्वन्तराद्यावर्तकधर्मस्यैव स्वयमेव स्वव्यावृत्तिरूपत्वसंभवः; परनिर्वाहकत्वाभावे स्वनिर्वाहकत्वासंभवात् । स्वरूपे प्रकाशमाने भ्रमविरोधिनश्च न व्यावृत्तिरूपधर्मान्तरापेक्षेत्युक्तं भवति । एवं च सति ब्रह्मणः कस्यचिद्वस्तुनो वस्त्वन्तराद्यावर्तकधर्मरूपत्वाभावात्, स्वरूपे भासमानेऽध्यासहत्वाच्च न स्वरूपमेव व्यावृत्तिरिति सिध्यति ॥ **ननु**—धर्मिणः स्वरूपमेव तद्गतभावाभावरूपसकलधर्मान्तरापेक्षया भेद इत्यन्ततोगत्वाऽभ्युपगन्तव्यं; भेदान्तराभ्युपगमे तस्मात्स्वरूपस्य भेदापेक्षायामनवस्थाप्रसङ्गात्, सत्यं; स तु स्वरूपभेदो नाध्यासविरोधी; तन्निवृत्तौ धर्मान्तरान्वयसापेक्षत्वात् । पटद्रव्यस्य रूपाव्यतिरेकभ्रमो हि सर्वसामानाधिकरण्यबुद्धिनिबन्धनः । अतो धर्मिस्वरूपस्य स्वगतधर्मापेक्षया भ्रमविरोधिभेदो धर्मान्तरान्वयः । अतो धर्माणां स्वरूपस्यैव स्वाश्रयस्य स्वविरुद्धधर्मान्तरधर्म्यन्तरापेक्षयाऽध्यासविरोधिभेदत्वसंभवः । विशिष्टस्य तु वस्तुनः स्वरूपमेव विशिष्टं स्वविरुद्धविशेषणविशिष्टवस्त्वन्तराद्यावृत्तिरिति च युक्तम्; अर्थान्तरैक्यभ्रमविरोधित्वात् । तत्र विशेषणापेक्षया विशेष्यस्य स्वरूपमेव भेदः, विशेष्यापेक्षया विशेषणस्य स्वरूपमेव भेदः, तदुभयापेक्षया च संबन्धस्य स्वरूपमेव भेदः, विशिष्टस्य

---

१ सकलेतरस्य । २ व्यावृत्तेर्भे° ।

विशिष्टान्तरापेक्षया स्वरूपमेव भेदः । **स्वरूपस्य भेद** इति निर्देशस्तु पदार्थस्य स्वरूपमितिवदनतिरिक्तार्थः । तत्तदसाधारणशब्दवाच्यं स्वरूपं, स च शब्दो व्युत्पत्तिसिद्धः, प्रतियोगिनयाऽमिमतार्थान्तरैक्यधीविरोधि वा स्वरूपम् । अतः कस्यचिद्धर्मलाभाभावात्, धर्मविशिष्टलाभाभावात्, **स्वरूपे** भासमानेऽपि भ्रमसहत्वाच्च-ब्रह्मणः स्वरूपमेव जडत्वाद्यध्यासविरोधिनी व्यावृत्तिर्भवितुं नार्हतीति सिद्धम् ॥

इत्थं प्रमाणप्रमेयानुपपत्ती परिहृते, अथ परोक्तमनुमानमनूद्य दूषयति—**यत्पुनरित्यादिना** । **पुनः**शब्दः केवलतर्कादप्यनुमानस्य वैषम्यं द्योतयति । दृश्यत्वानुमानस्य सूत्रकारैरेव दूषयिष्यमाणत्वात्, वक्ष्यमाणदूषणस्य मिथ्यात्वविषयसर्वानुमानानां दूष्यत्वप्रदर्शनार्थत्वाच्च-व्यावर्तमानत्वानुमानमिह दूष्यते । साधारणदूषणानि-कालात्ययापदेशसोपाधिकत्वव्याघाताः । तत्राश्रयः प्रतीतो, न वा । न चेत्, आश्रयासिद्धिः । प्रतीतत्वे-प्रतीतिश्च प्रत्यक्षादिप्रमाणैः सत्यत्वेनेति तस्य मिथ्यात्वसाधनं धर्मिग्राहकमानबाधितम् । प्रतिपन्नोपाधौ बाधितत्वस्य मिथ्यात्वे प्रयोजकतया **सोपाधिकत्वं च** वक्ष्यते । तत्र च देशकालविषयभ्रमेष्वपि वस्त्वन्तरस्योपाधित्वात्, अनुदितबाधकज्ञानेषु भ्रान्तिष्वपि चोदयिनृपुरुषज्ञानेन बाधितत्वाच्च **विशेषणविशेष्यांशसिद्धेर्विशिष्टोपाधिसिद्धि**रिति विस्तरेण वक्ष्यामः । साध्यधर्मस्य पारमार्थ्यापारमार्थ्यविकल्पे कृते, पारमार्थ्य चेत्-अद्वैतहानिः, दृश्यत्वहेतोरनैकान्त्यं च; परमार्थेऽपि तस्य वृत्तेः । अपारमार्थ्ये-प्रपञ्चसत्यता; 'बाधकबाधे बाध्यस्वरूपाबाधं' इति न्यायात् । अत एव हि 'द्वौ नञौ प्रकृतमर्थं सूचयत' इति शाब्दप्रसिद्धिः । धर्मे धर्मान्तरारोपणेन प्रत्यवस्थानादियं नित्यसमा जातिरिति न वाच्यम्; अप्रामाणिकधर्मपरम्परापादनेन दूषणं हि नित्यसमा । मिथ्यात्वं मिथ्यात्वं प्रामाणिकं; माध्यमिकोक्तस्य ज्ञानबाध्यत्वस्य भवता बाध्यत्वाभ्युपगमात्, परमार्थरज्वौ रज्ज्वबुद्धेः सर्पबुद्ध्या बाध्यत्वस्य बाध्यत्वदर्शनाच्च । तर्हि सत्यत्वेऽपि सत्यत्वं किमस्ति, उत नास्ति । न चेत्-असत्यं जगत्स्यात्, अस्ति चेत्-तस्यापि सत्यत्वमित्यनवस्था—इति चेन्न; स्वपरनिर्वाहकत्वाभ्युपगमात् । यदि त्वया मिथ्यात्वेऽपि स्वपरनिर्वाहकत्वमङ्गीक्रियते, तर्हि—मिथ्यात्वस्यैव स्वमिथ्यात्वनिर्वाहकत्वाभ्युपगमान्मिथ्यात्वं मिथ्यात्वान्तरमनपेक्ष्य स्वयमेव मिथ्येति—प्रपञ्चः सत्यः स्यात् । साधनस्य पारमार्थ्यापारमार्थ्यविकल्पे कृते, पारमार्थ्ये—अद्वैतहानिः, अपारमार्थ्ये—धूमबुद्ध्या गृहीतबाष्पवदसाधकत्वमिति व्याहतिः । भेदवादिनाऽपि हि न प्रपञ्चसत्यत्व-हेतुसत्यत्वसाधनपूर्वकमनुमानान्युपन्यस्यन्ते, तथाऽपि तदुपपद्यते तद्वन्ममापीति चेन्न; सत्यत्वासाधनेऽपि नास्माकं स्वाभ्युपगमव्याहतिः, तव तु मिथ्यात्वाभ्युपगमसाधकत्वाभ्युपगमव्याहतिरिति वैषम्यात् । ननु—न साधनधर्मपारमार्थ्यमपेक्षितं, नाशके सुदूरे नष्टेऽपि पूर्वनष्टो घटो नष्ट एव दृष्टः, नोत्पन्नः, तद्वद्बाधकज्ञानस्य मिथ्यात्वेऽपि तद्बाधितस्य मिथ्यात्वं तिष्ठत्येवेति चेन्न; कारक-ज्ञापकयोर्वैषम्यात् । नाशको हि कारकः, अतस्तन्नाश्यस्य तस्मिन्नष्टेऽपि नाश एव तथा दर्शनात् । बाधकं च ज्ञापकं, तस्मिन् बाधिते तद्बाध्यं च सत्यमेव स्यात्; अपवरकस्थघटाभावे केनचिदुक्ते-'अस्ती'ति वचनेन बाधिते घटसत्यत्वदर्शनात् ॥

ननु—बाधकबाधे पूर्ववाधितस्य सत्यत्वं वक्तुमयुक्तं; वृन्तविषयभ्रमरत्वभ्रमबाधेऽपि, भ्रमरत्वबुद्धिबाधितस्य पालाशपुष्पविषयाग्निभ्रमस्य बाधितत्वदर्शनादिति चेत्, तत्र किं वस्तुनिवृत्तिः, बुद्धिनिवृत्तिर्वोच्यते । न प्रथमः; दावत्वस्य परमार्थभूतवृन्तबाध्यत्वात् । बुद्धिनिवृत्तिश्चेत्, सा न बाधकाधीना; ज्ञानानां क्षणिकत्वात्—स्वयं निवृत्तेः । भ्रमरबुद्धिस्तूत्तरकालीनदावबुद्ध्युत्पत्तिप्रतिबन्धिका, तत्प्रतिबन्धकत्वं च भ्रमरपारमार्थ्यबुद्धेरेव; अन्यथा पूर्वभ्रमनिवृत्त्यभावदर्शनात्, ततश्च लब्धमते कदाचिदपि न निःशेषभ्रमनिवृत्तिः सिध्यति । बुद्धिनिवृत्तेर्बाधकज्ञानजन्यत्वपक्षेऽपि निवर्तकज्ञानानां सर्वेषां भ्रान्तिरूपोत्तरोत्तरनिवर्तकज्ञानसापेक्षतया भ्रमपरम्परापत्तेः-उत्तरस्य कस्यचित् ज्ञानस्य स्वयंनाशे काल्पनिकघटादिनाशस्येव तन्नाशस्य काल्पनिकत्वान्नाशकृतिरूपभ्रान्तिः स्थितेति निःशेषभ्रमनिवृत्तिरूपो मोक्षोऽनुपपन्न—इति कृत्स्नमिथ्यात्वनिःशेषावियानिवृत्तिव्याघातः, एवमादिव्याघाता अनुसंधेयाः । सोपाधिकत्वं चानन्तरमेव वक्ष्यते । दृश्यत्व-व्यावर्तमानत्वयोरसाधारणं दूषणं ब्रह्मण्यनैकान्तिकत्वम् । **अध्यस्तं** स्वाधिष्ठानसमानाधिकरणतया वेद्यं-यथा इदं रजतमिति । एवं घटः सन्, पटः सन्नित्यधिष्ठानस्य सतः, प्रपञ्चस्य चैकधीवेद्यत्वाद्दृश्यत्वमनैकान्तिकम् । यद्यपि—नभो मलिनमित्यध्यासे नभसोऽचाक्षुषत्वादेकधीवेद्यत्वमध्यस्ताधिष्ठानयोर्न नियतं, तथाऽपि—सन्मात्रस्य प्रत्यक्षप्राह्यत्वं परोपगतमिति सिद्धमनैकान्त्यम् ॥

ननु—दृश्यत्वनियमोऽत्र हेतुनया विवक्षितः, दृश्यत्वनियमः सतो नास्ति; सतः स्वयंप्रकाशत्वात्, तदपि कथं सदनुभूत्योर्भेदाभावादिति चेन्न; अन्योन्याश्रयणात्-सदनुभूत्योर्भेदाभावे सिद्धे सतः स्वयंप्रकाशत्वेन दृश्यत्वनियमासिद्धेर्दृश्यत्वहेतोरनैकान्त्यपरिहृतिः, अनैकान्तिकत्वे परिहृते भेदाभाव—इति । यद्यनुमानान्तरेण भेदनिषेधः, तर्ह्यस्य सिद्धेसाध्यता । एवं परोपगमेनानैकान्त्यमुक्तम् । किंच—ब्रह्मणो दृश्यत्वं श्रुतिसिद्धं 'दृश्यते लभ्यया बुद्ध्या, आत्मा वा अरे द्रष्टव्य' इति । **अनुभूतित्वा**दित्याद्यनुमानेन दृश्यत्वाभावे साध्ये कालात्ययापदेशः । 'यत्तददेश्य'मिति वाक्याद्दृश्यत्वश्रुतिर्बाध्येति—चेन्न;

---

१ स्वरूपमेव भेदः । २ बाधकश्च । ३ अबाधितत्वदर्शनात् । ४ सिद्धसाध्यत्वात् ।

पेक्षया 'भिन्न इति व्यवहार' इत्युक्तम् । यत्पुनर्घटादीनां विशेषाणां व्यावर्तमानत्वेनापारमार्थ्यमुक्तं, तदनालोचितबाध्यबाधकभाव—व्यावृत्त्यनुवृत्तिविशेषस्य भ्रान्तिपरिकल्पितम् । द्वयोर्ज्ञानयोर्हि विरोधे बाध्यबाधकभावः बाधितस्यैव व्यावृत्तिः, अत्र घटपटादिषु देशकालभेदेन विरोध एव नास्ति । यस्मिन्देशे यस्मिन्काले यस्य सद्भावः प्रतिपन्नस्तस्मिन्देशे तस्मिन्काले तस्याभावः प्रतिपन्नश्चेत्तत्र विरोधाद्बलवतो बाधकत्वम्, बाधितस्य च निवृत्तिः । देशान्तरकालान्तरसंवन्धितयानुभूतस्यान्यदेशकालयोरभावप्रतीतौ न विरोध इति कथमत्र बाध्यबाधकभावः, अन्यत्र निवृत्तस्यान्यत्र निवृत्तिर्वा कथमुच्यते, रज्जुसर्पादिषु तु तद्देशकालसंवन्धितयैवाभावप्रतीतेर्विरोधो, बाधकत्वं, व्यावृत्तिश्चेति—देशकालान्तर-

---

दृश्यत्वसामान्यनिषेधपरत्वात्स्या', 'दृश्यते लक्ष्यया वृद्ध्या सूक्ष्मया सूक्ष्मदर्शिभि'रित्यस्य दृश्यत्वविशेषविधानविषयत्वाच्च । 'न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैः, मनसा तु विशुद्धेने'त्यादौ दृश्यत्वविशेषनिषेधदर्शनात्, अदृश्यमित्यादिसामान्यनिषेधस्य तत्पर्यवसायित्वाच्च, अदृश्यमित्यादिसामान्यश्रुत्या, दृश्यत्वाभावसाधकानुमानेन च ब्रह्मणो न दृश्यत्वमिति चेत्—तर्हि 'न हिंस्यात् सर्वाभूतानी'ति सामान्यनिषेधश्रुत्या हिंसात्वादित्यनुमानेन चाग्नीषोमीयहिंसानिवृत्तिप्रसङ्गात्, अतो ब्रह्मणि दृश्यत्वमनैकान्तिकम् । अनैकान्त्ये परिजिहीर्षिते ब्रह्मणो मिथ्यात्वमभ्युपगन्तव्यं स्यात्, दृश्यतैकस्वभावत्वं हि हेतुत्वेनाभिमतमिति नानैकान्त्यम् । ब्रह्म हि स्वयंप्रकाशमिति न दृश्यतैकस्वभावमिति चेन्न; तदानीं हेतोर्भागासिद्धिः स्यात्; चिदचिदात्मके प्रपञ्चे जीवांशस्य स्वयंप्रकाशत्वात् । अचिदंशमात्रपक्षीकारे हेतोर्जीवगतनित्यत्वादिधर्मेष्वनैकान्तिकत्वं, ते हि तद्धर्मभूतज्ञानवेद्या एव परमार्थभूताश्च । व्यावर्तमानत्वमपि ब्रह्मण्यनैकान्तिकम्; अवृत्तादिभ्यो व्यावृत्तत्वेनाभ्युपगमात् । तच्च स्वरूपमात्रमिति न शक्यं वक्तुं; ब्रह्मणः कस्यचिद्धर्मत्वाभावात्, अध्यासहत्वाच्च । व्यावर्तमानत्वस्य स्वरूपत्वेऽपि तत्स्वकार्यकरम्; अनुभूतित्ववत् हेतोः स्वरूपातिरेकेऽपि साधनदशायां कार्यकरत्वं, न तु दूषणदशायामिति नियामकाभावात् । किंच—ब्रह्मणि स्वरूपं व्यावृत्तिश्चेत् घटादिष्वपि तथाऽस्तु, यदि ब्रह्मणि स्वरूपातिरिक्ता सा, तर्हि घटादिष्वपि तथा स्यात्, सर्वथाऽनैकान्त्यमवर्जनीयम् । जडादिव्यावृत्तत्वं ब्रह्मणोऽपरमार्थश्चेत्, वस्तुतो ब्रह्म जडमेव स्यात्, अपरमार्थशब्दश्च निष्फलः, घटादावपि व्यावर्तमानत्वस्य मिथ्यात्वेन व्यावर्त्याभावात्, ततश्चानैकान्त्यं सुस्थम्; अपरमार्थस्यैव हेतुतया त्वयाङ्गीकृतत्वात् तस्य च विपक्षेऽपि वर्तमानत्वात् । किंच—अनुवर्तमानस्य सन्मात्रस्य व्यावर्तमानेभ्यो घटादिभ्यो । व्यावृत्तिरस्ति वा, न वा अस्ति चेत्—तत एव व्यावर्तमानत्वहेतुर्ब्रह्मण्यनैकान्तिकः । नो चेत्—घटादिष्विव व्यावर्तमानत्वं ब्रह्मणि स्यात्; व्यावर्तमानेभ्यो व्यावृत्तत्वाभावात् । यथा रजतादव्यावृत्तं रजतं, तथा व्यावर्तमानादव्यावृत्तमपि हि व्यावर्तमानमेव भवति, अथ उभयथाऽपि ब्रह्मण्यनैकान्तिकम् । ननु—ब्रह्म जडादिव्यावृत्तमेव, व्यावर्तमानत्वं च सत्यं, तच्च स्वरूपमिति नाद्वैतहानिः, तस्य च सत्यत्वान्न जडत्वादि च ब्रह्मणः, ततश्च नानैकान्त्यम् । अपरमार्थभूतं घटादिगतं व्यावर्तमानत्वं हि हेतुरिति चेत्, यदपरमार्थभूतं घटादिगतं व्यावर्तमानत्वं हेतुतया विवक्षितं, तर्हि असिद्धो हेतुः; घटादीनां मिथोव्यावृत्तेरसत्यत्वोपगमात् ॥

यत्पुनरित्यादिना सोपाधिकत्वं प्रतिजानीते । पूर्वं परेण बाधस्यापि पक्षाद् व्यावृत्त्युपपादनेनोपाधित्वं प्रत्युक्तं, तद्व्युदासाय पक्षे बाधाभावं दर्शयितुं बाधं शिक्षयति—**द्वयोरिति** । विरोधे सत्येव बाध्यबाधकभावः, न त्वस्ति नास्तीति प्रत्ययमात्रयोरित्यर्थः । **बाधितस्यैव व्यावृत्तिरिति** । प्रतिपन्नोपाधौ बाधितस्यैव मिथ्यात्वसाधिका व्यावृत्तिः, न त्वगृहीतत्वमात्रं मिथ्यात्वसाधकमित्यर्थः । अत्र व्यावृत्तिविशेषो **व्यावृत्ति**शब्दोक्तः · उत्तरत्र व्यावर्तमानत्वमात्रमिति मात्रच्प्रत्ययसद्भावात्, ततः किं पक्षे बाधाभावस्येत्यत्राह—**अत्रेति** । देशयोः, कालयोश्च भेदे सत्यविरोधं दर्शयितुं तयोरैक्यविरोधबाधौ दर्शयति । **यस्मिन्निति** । भावाभावविरोधादन्यतरस्य बाध्यत्वे सति बलवतो बाधकत्वम्, इतरस्य बाधितत्वान्निवृत्तिश्चेत्यर्थः । **च एवार्थे, बाधितस्यैव** त्वदभिमतव्यावृत्तिविशेष इत्यर्थः । सामानाधिकरण्यानर्हत्वं विरोधः, अदुष्टकारणजन्या निषेधधीर्बाधः । अदुष्टकारणजन्यत्वे सति निषेधरूपत्वं बाधकत्वम् । पुरोवर्तिन्यभावः, अनवभासो वा, सत्यत्वावभासाभावो वा **निवृत्तिः** । **पक्षे** घटादौ देशकालभेदेन **विरोधबाधाभावावुपपादयति—देशान्तरेति** । विरोध–बाधाभावात्तत्फलभूतनिवृत्तिरपि नेत्याह—**अन्यत्रेति । अन्यत्र निवृत्तस्य** विरोधबाधस्थले निवृत्तस्य, **अन्यत्र** विरोधबाधरहितस्थले । यद्वा, **अन्यत्र निवृत्तस्य** स्वदेशकालव्यतिरिक्तदेशकालयोः निवृत्तस्य, **अन्यत्र** स्वदेशकालयोः । एतद्वैधर्म्यदृष्टान्तेन विवृणोति—**रज्जुसर्पादिष्विति । तुशब्दो** घटादिवैषम्यपरः । **इत्थंदूषणोपयोगिनी** व्याप्तिः शिक्षिता, अथानुमानदूषणसिद्धिं दर्शयति—**इति देश-**

---

१ °प्रकल्पितम् । २ व्यावर्तमानत्वा° । ३ °कारणकत्वे ।

(दृष्टस्य देशकालान्तरेव्यावर्तमानत्वं मिथ्यात्वव्याप्यं न दृष्टमिति न व्यावर्तमानत्वमात्रमपारमार्थ्ये हेतुः। य'स्त्वनुवर्तमानत्वात्सत्परमार्थ' इति, तत्सिद्धमेवेति न साधनमर्हति। अतो न सन्मात्रमेव वस्तु। अनुभूति-सद्विशेषयोश्च विषयविषयिभावेन भेदस्य प्रत्यक्षसिद्धत्वात्, अबाधितत्वाच्चानुभूतिरेव सतीत्येतदपि निरस्तम्। यत्त्वनुभूतेः स्वयंप्रकाशत्वमुक्तं, तद्विक्ष्यप्रकाशनवेलायां ज्ञातुरात्मन-

---

कालान्तरेति। इतिहेतौ। मिथ्यात्वं व्याप्यकम्, **व्यावर्तमानत्वं** व्याप्यम्। **व्यावर्तमानत्वमात्रमिति मात्र**शब्देन विरोधबाधहेतुकव्यावृत्तिर्व्यावर्त्यते। यद्वा, व्यावर्तमानत्वहेतोरसिद्धिं प्रतिजानीते—**यत्पुनरित्यादिना**। तदर्थं बाधमूलं विरोध इत्याह—**द्वयोरिति**। पक्षे तदभावं दर्शयति—**अत्रेति**। विरोधाभावमुपपादयति—**यस्मिन्निति**। तत्फलनिवृत्तिमाह—**अन्यत्रेति**। दृष्टान्ते तद्वैधर्म्यं दर्शयति—**रज्विति**।

एवमसिद्धिं वक्तुं विभागो दर्शितः, अथासिद्धिमाह—**इति देशकालान्तरेति**। सोपाधिकत्वमार्थम्। अयमर्थः—किं पटोऽस्तीत्यत्र घटाभावः सिषाधयिषितः, उत घटोऽस्तीत्यत्रापि तदभावः। प्रथमे-सिद्धसाध्यता। द्वितीये—**व्यावर्त्तमानत्व**शब्देन किं व्यावृत्तिबुद्धिबोध्यत्वं मिथ्यात्वहेतुतया विवक्षितम्, उत प्रतिपन्नोपाधौ बाधितस्य व्यावृत्तिः। प्रथमे—सोपाधिकत्वम्। द्वितीये—हेत्वसिद्ध्या घटादेः सत्यत्वमिति। ननु बाधार्हताया उपाधिले साध्याविशिष्टना स्यादिति बाधितत्वमेवोपाधिः स्यात्, तस्य च न साध्यसमव्याप्तिः, असहायेन गच्छता पथि दृष्टस्य रज्जुसर्पस्य केनाप्यबाधितत्वादिति चेत्—नैवम्; ईश्वरादिज्ञानेनापि बाधितत्वनियमात्, अनभ्युपगतेश्वरादीनां पक्षेऽप्यथमुपाधिरेव। किं त्वया तस्य पथि दृष्टस्य रज्जुसर्पस्य मिथ्यात्वं प्रमाणतोऽवगतं, न वा। न चेत्-सम्यक्सर्प एवेति तत्रावृत्तिर्न साध्यसमव्याप्त्यभावाय स्यात्। अवगतं चेत्—तत एव ज्ञानात्तस्य बाधितत्वं सिद्धमिति साध्यसमव्याप्तिः सिद्धा। ननु—किं प्रतिपन्नोपाधौ बाधो मिथ्यात्वे प्रयोजकः, उत केवलबाधः। प्रथमे—देशकालयोरुपाधित्वादेशकालभ्रमस्य देशकालोपाधिकत्वाभावेन सर्वसपक्षानुयायित्वेन साध्यसमव्याप्त्यभावात् प्रतिपन्नोपाधौ बाधो नोपाधिः स्यात्। द्वितीये—कृत्स्नमिथ्यात्वमिति। अत्रोच्यते— न हि देशकालावेवोपाधिरिति नियमः, किंतु वस्त्वन्तरमप्युपाधिः, उपाधिरवच्छेदकः, अत एव हि देशकालादिप्रतिपन्नोपाधा**वबाधितत्वादीत्यत्रादि**शब्देन वस्त्वन्तरस्याप्युपाधित्वं भाष्यकारैर्वक्ष्यते, तस्माद्देशकालभ्रमे वस्त्वन्तरमुपाधिः। देशकालभ्रमस्य वस्त्वन्तरोपाधिकलेऽपि वस्तुभ्रमस्य देशकालोपाधिकलेनान्योन्याश्रयः; भ्रमव्यक्तिभेदात्, तस्माद्यदवच्छेदकावच्छिन्नं यत्प्रतिपन्नं तदवच्छेदकावच्छिन्नस्य बाधो मिथ्यात्वे प्रयोजकः। यद्वाऽऽरोपितेन सायंत्वादिना, तन्निवर्तकेन, दिवात्वादिना च विना क्रियान्तरावच्छिन्नस्य कालस्य भ्रान्त्युपाधित्वम्, एवं देशेऽपीति न कश्चिद्दोषः। एवं विशिष्टोपाधौ विशेषणविशेष्यांशयोः परिहताऽनुपपत्तिकलेन विशिष्टोपाधिः सिद्धः। अतो न व्यावर्तमानत्वमात्रमपारमार्थ्यहेतुः॥ कैश्चिदेवमुक्तं—**घटोऽस्तीत्यत्र किं घटोऽस्ति**शब्दौ पर्यायौ, उत न। पर्यायत्वे—सह प्रयोगो न स्यात्, नो चेत्-सद्विलक्षणो घट इति—नैवम्; 'अस्ति ब्रवीति चेद्वेदे' त्यादौ **चास्तिब्रह्मशब्दयोः** पर्यायत्वे-पौनरुक्त्यं, नो चेत्-ब्रह्मणोऽपि सद्विलक्षणत्वमिति। उभयत्रार्थं परिहारः—**स्वशब्दप्राप्तस्य** स्वभावस्यैव निषेधार्थानुवादशङ्कापरिहाराया**स्ति**शब्देन नियमः क्रियत इति। **इति व्यावर्तमानत्वानुमानभङ्गः॥**

अथ पारमार्थ्यसाधकत्वेनोक्तमनुवर्तमानत्वं दूषयति—**यत्त्वित्यादिना**। प्रमाणसंबन्धार्हतत्तद्घटादिस्वरूपस्य सच्छब्दवाच्यस्य किं पारमार्थ्यं साध्यते, उताधिष्ठानतयाऽनुवृत्तस्यार्थान्तरस्येति विकल्पे-द्वितीयशिरस्याश्रयासिद्धिमभिप्रेत्य, प्रथमे शिरसि सिद्धसाधनत्वं दूषणमुक्तम्। ननु—सदेव परमार्थ इति हि ग्रन्थकाराभिप्रायः, तत्कथं सिद्धसाधनत्वमिति—**चेत्**, उच्यते—एतदनुमानं किं सतः पारमार्थ्यस्य साधकम्, उत व्यतिरिक्तापारमार्थ्यस्य, उतोभयस्य। प्रथमे—सिद्धसाध्यता। द्वितीये—व्यधिकरणासिद्धता। तृतीये-अंशे सिद्धसाध्यता, अंशे व्यधिकरणासिद्धिश्चेति। निगमयति—**अत इति। इत्यनुवर्तमानत्वानुमानभङ्गः॥**

परेण प्रमाणप्रमेयानुपपत्तिकृतं भेददूषणमुपजीव्यानुभूतेः सतो भेदोऽपास्तः, अत्र च भेददूषणहेत्वाभासनिरासमुपजीव्यानुभूतिसतोरभेदश्च निरस्यते—**अनुभूतीत्यादिना**। अनुभूतिसद्विशेषयोरित्यत्र **विशेष**शब्देनानुवर्तमानत्वहेतोराश्रयासिद्धिः सूच्यते; सच्छब्दवाच्यस्य वस्तुनो व्यावृत्तत्वात्, अनुवृत्तार्थान्तराभावाच्च। सच्छब्दः प्रमाणसंबन्धयोग्ये हि **वर्तते** घटः सन्, पटः सन्नित्यनुवृत्तव्यवहारो व्यावृत्तशब्दवदुपपन्न इति—प्रमाणसंबन्धार्हाः पदार्थाः परस्परव्यावृत्ताः सच्छब्दवाच्याः। **इति धीसदैक्यनिरासः॥**

अथ परोक्ते स्वयंप्रकाशत्वेऽभिमतेऽपि तत्र शिक्षणीयांशोऽस्तीत्यभिप्रायेणाह—**यत्त्वनुभूतेरिति। तुः** पक्षवैषम्ये। वक्तव्यांशमाह—**तद्विषयप्रकाशनवेलायामिति**। उत्तरत्र **वर्तमानदशायामिति** हि वक्ष्यते, तत्र ज्ञानस्य नित्यद्र-

---

१ अनुभूतिसतोः। २ अनुभूतिसतोर्भेदश्च।

स्यैव, न तु सर्वेषां सर्वदा तयैवेति नियमोस्ति; परानुभवस्य हानोपादानादिलिङ्गकानुमानज्ञानविषयत्वात्, स्वानुभवस्याप्यतीतस्याज्ञासिषमिति ज्ञानविषयत्वदर्शनाच्च । अतोनुभूतिश्चेत्स्वतःसिद्धेति वक्तुं न शक्यते । 'अनुभूतेरनुभाव्यत्वेननुभूतित्वम्' इत्यपि दुरुक्तम्; स्वगतातीतानुभवानां, परगतानुभवानां चानुभाव्यत्वेनानननुभूतित्वप्रसङ्गात् । परानुभवानुमानानभ्युपगमे च शब्दार्थसंबन्धग्रहणाभावेन समस्तशब्दव्यवहारोच्छेदप्रसङ्गः । आचार्यस्य ज्ञानवत्त्वमनुमाय[1] तदुपसत्तिश्च क्रियते सा च नोपपद्यते । नचान्यविषयत्वेऽननुभूतित्वम्; अनुभूतित्वं नाम वर्तमानदशायां[2] स्वसत्तयैव स्वाश्रयं प्रति प्रकाशमानत्वं, स्वसत्तयैव स्वविषयसाधनत्वं वा, ते चानुभवान्तरानुभाव्यत्वेपि स्वानुभवसिद्धे नापगच्छत इति नानुभूतित्वमपगच्छति । घटादेस्त्वननुभूतित्वम्[3]–एतत्स्वभावविरहात्, नानुभाव्यत्वात् । तथानुभूतेरननुभाव्यत्वेप्यननुभूतित्वप्रसङ्गो दुर्वारः; गगनकुसुमादेरननुभाव्यस्याननुभूतित्वात् । गगनकुसुमादेरननुभूतित्वमसत्त्वप्रयुक्तं नाननुभाव्यत्वप्रयुक्तमिति चेत्, एवं तर्हि घटादेरप्यज्ञानाविरोधित्वमेवाननुभूतित्वनिबन्धनम्, नानुभाव्यत्वमित्यास्थीयताम् । अनुभूतेरनुभाव्यत्वेऽज्ञानाविरोधित्वमपि तस्या घटादेरिव प्रसज्यत इति चेत्, अननुभाव्यत्वेपि गगनकुसुमादेरिवाज्ञानाविरोधित्वमपि प्रसज्यत एव । अतोऽनुभाव्यत्वे-

---

व्यत्वेन सदा वर्तमानत्वात् वर्तमानदशायामिति पदं निरर्थकमिति शङ्कांऽपनुत्तये **विषयप्रकाशनवेलायामित्युक्तम्** । **वर्तमानदशाशब्देन** विषयसंबन्धप्रसरस्य वर्तमानता विवक्षितेत्यवगम्यते, नतु सर्वेषामित्येतदुपपादयति—**परानुभवस्येति** । **सर्वदेत्येतदुपपादयति—स्वानुभवस्यापीति** । **अनुभूतिश्चेदित्यनेन स्वाश्रयं प्रति विषयप्रकाशनवेलायामित्युक्तेर्वैषम्यविरहो गर्भितः** । **इत्यनुभूतेः स्वयंप्रकाशत्वशिक्षणम्** ॥

एवमनुभूतेरनुभाव्यत्वसंभवमुपपाद्य, तदसंभवे परोक्तमनुमानं दूषयति—अनुभूतेरिति । कुत इत्यत्राह—**स्वगतेति** । **परानुभवानुमेयत्वानभ्युपगमे लौकिकव्यवहारविरोधमभिप्रेत्याह—परेति** । अथ वैदिकव्यवहारविरोधमाह—**आचार्यस्येति** । **परानुभवानुमानानभ्युपगम** इत्यादिना **चार्वाक**निरासश्च फलितः; अनुमानानभ्युपगमे शब्दार्थसंबन्धग्रहणायोगात् । **एवं बाध उक्तः, अथ व्याप्तिं दूषयति न चान्येति** । न ह्यसाधारणाकारो धर्मिग्राहकमानसिद्धः साधारणाकारे सत्यप्यज्ञातत्वमिप्रायेणानुभूतिस्वरूपं शिक्षयति—**अनुभूतित्वमिति** । अत्रानुभूतिशब्दो ज्ञानमात्रपरः, न तु स्मृतिविलक्षणपरः । **प्रकाशमानत्वमित्युक्ते** घटादेरप्यनुभूतित्वं स्यादिति तद्व्यावृत्त्यर्थं **स्वाश्रयंप्रतीत्युक्तम्** । अणुत्वनित्यत्वाद्यात्मधर्माणां ज्ञानान्तरप्रकाश्यत्वात्तद्व्यावृत्त्यर्थं **स्वसत्तयैवेत्युक्तम्** । अतीतानुभवव्यावृत्त्यर्थं **वर्तमानदशायामित्युक्तम्** । यद्यप्यतीतानुभवस्य ज्ञानान्तरमन्तरेण प्रकाशानुपपत्तेरर्थाद्वैच्छेदः, तथापि, अतीतस्य ज्ञानान्तरेण सिद्धि परानभिमतां व्युत्पादयितुमिदं विशेषणं, विषयसंबन्धस्य वर्तमानदशायामित्यर्थः । वर्तमानदशायां स्वसत्तयैव प्रकाशमानत्वमित्युक्ते **परानुभवे तदसंभवात्तद्व्यावृत्त्यर्थं स्वाश्रयं प्रतीत्युक्तम्** । एतल्लक्षणं स्वयंप्रकाशत्ववादिनामेवेष्टमिति सर्वसंप्रतिपन्नं लक्षणमाह—**स्वसत्तयैवेति** । **स्वाश्रयं प्रति, वर्तमानदशायामिति** पदद्वयानुकर्षस्योपलक्षणं **स्वसत्तयैवेति पदम्** । साधनमित्युक्ते दण्डचक्रादेरपि तथात्वात्तद्व्यावृत्त्यर्थं **स्वविषयसाधनत्व**मित्युक्तम् । चाक्षुषज्ञानं श्रावणं विषयं न साधयतीति सर्वविषयसाधनत्वासंभवव्यावृत्त्यर्थं **स्वशब्दः** । इन्द्रियव्यावृत्त्यर्थं **स्वसत्तयैवेति** पदम् । इन्द्रियादिकं हि न केवलं स्वसत्तया प्रकाशकम्, अपि तु ज्ञानोत्पादनद्वारा । **वर्तमानदशाया**मित्यतीतानुभवव्यावृत्तिः । **स्वाश्रयं प्रतीति** परानुभवव्यावृत्तिः । ततः किमित्यत्राह—**तेचेति** । एवमनुभाव्यत्वलक्षणसाध्यधर्मप्रतिपक्षेणानुभाव्यत्वेनानुभूतित्वस्य सामानाधिकरण्यदर्शनादनुभाव्यत्वेन व्याप्तिर्निराकृता, तर्हि कथमनुभाव्यत्वेऽननुभूतित्वदर्शनमिति—शङ्कायां सोपाधिकत्वमाह—**घटादेस्त्विति** । **अननुभूतित्वम्—अनुभूति**शब्देन व्यवहर्तव्यत्वाभावः, इति न साध्याविशिष्टता । यद्वा उक्तयोर्लक्षणयोरन्यतरदनुभूतित्वं, न तु समुचितमुभयम्; अन्योन्यनिरपेक्षत्वात्, **वा**शब्दप्रयोगाच्च, नहि **च**शब्दः प्रयुक्तः । तत्रान्यतरलक्षणराहित्यरूपमननुभूतित्वमन्यतराकारविरहप्रयुक्तमिति सोपाधिकत्वमित्यर्थः । अथ प्रतितर्कपराहतिमाह—**तथानुभूतेरिति** । यद्वा आभासमानयोगक्षेमत्वमाह—**तथानुभूतेरिति** । गगनकुसुमादेरननुभूतित्वस्योपाध्यन्तरमसत्त्वं शङ्कते—**गगनेति** । घटादेरननुभूतित्वस्योपाध्यन्तरमज्ञानाविरोधित्वमाह—**एवं तर्हीति** । प्रकाशनियमाभावाविरोधित्वम् **अज्ञानाविरोधित्वम्** । न च सुखादावननुभाव्यत्वप्रयुक्तमज्ञानाविरोधित्वमाशङ्कनीयः; सुखादेर्ज्ञानविशेषत्वेनानुभूतित्वाभावात् । अज्ञानाविरोधित्वस्योपाधित्वनिरासाय पक्षे तत्प्रसञ्जयति—**अनुभूतेरिति** । तद्धवत्पक्षेऽपि तुल्यमित्याह—**अनुभाव्यत्वेऽपीति** । अनुभूतेरनुभाव्यत्वे-

---

१ अनुभूय । २ वर्तमानतां । ३ °भूतित्वमेव तत्त्व० । ४ असंभवस्य । ५ इदमितीदम् । ६ °हृतत्व० ।

ननुभूतित्वमित्युपहास्यम् । यत्तु संविदः स्वतःसिद्धायाः प्रागभावाद्यभावादुत्पत्तिर्निरस्यते, तदन्धस्य जात्यन्धेन यष्टिः प्रदीयते । प्रागभावस्य ग्राहकाभावादभावो न शक्यते वक्तुम्; अनुभूत्यैव ग्रहणात्[1] । कथमनुभूतिः सती तदानीमेव स्वाभावं विरुद्धमवगमयतीति चेत्, न ह्यनुभूतिः स्वसमकालवर्तिनमेव विषयीकरोतीत्यस्ति नियमः; अतीतानागतयोरविषयत्वप्रसङ्गात् । अथ मन्यसे—अनुभूतिप्रागभावादेः सिध्यतस्तत्समकालभावनियमोस्तीति । किं त्वया क्वचिदेवं दृष्टं येन नियमं ब्रवीषि । हन्त तर्हि तत एव दर्शनात्प्रागभावादिः सिद्ध-इति न तदभावनिह्नवः । तत्प्रागभावं च तत्समकालवर्तिनमनुन्मत्तः को ब्रवीति । इन्द्रियजन्मनः प्रत्यक्षस्य ह्येष स्वभावनियमः— यत्स्वसमानकालवर्तिनः पदार्थस्य ग्राहकत्वं, न सर्वेषां ज्ञानानां, प्रमाणानां च; स्मरणानुमानागमयोगिप्रत्यक्षादिषु कालान्तरवर्तिनोपि ग्रहणदर्शनात् ।

ऽननुभूतित्वस्योपाधित्वेनोक्तम् अज्ञानाविरोधित्वमननुभाव्यत्वेऽपि प्रसज्यत इत्यर्थः । अनुभाव्यत्वेऽननुभूतित्वम्, अज्ञानाविरोधित्वं च यदुक्तं तदननुभाव्यत्वेऽपि गगनकुसुमादेरिव प्रसज्यत इत्युक्तं गगनकुसुमादावननुभूतित्वम्, अज्ञानाविरोधित्वं चासत्त्वप्रयुक्तं, नाननुभाव्यत्वप्रयुक्तमिति—चेत्, अननुभूतित्वे तद्वदसत्त्वमपि प्रसज्यते । गगनकुसुमादेरसत्त्वं नाननुभाव्यत्वमात्रप्रयुक्तम्, अपि तु स्वयंप्रकाशत्वे सत्यननुभाव्यत्वविरहप्रयुक्तमित्यनुभूतेरननुभाव्यत्वमात्रान्नासत्त्वप्रसक्तिरिति चेत्, अननुभाव्यत्वे तद्वदस्वयंप्रकाशत्वमपि प्रसज्यते, अतोऽस्वयंप्रकाशत्वे सत्यननुभाव्यत्वप्रयुक्तमसत्त्वमनुभूतेर्दुर्वारम् । असत्त्वं तु धर्मिग्राहकप्रमाणविरुद्धमिति—चेत्, अनुभाव्यत्वेऽननुभूतित्वमपि तथैवमनुसंधेयमिति भाष्याभिप्रायः ॥ खपुष्पोदाहरणे तु नाश्रयवैकल्यदोषः शङ्कनीयः; ख्यातेर्नासदिति व्यतिरेकदृष्टान्तस्य परैः स्वीकृतत्वात्, 'शब्दज्ञानानुपाती वस्तुशून्योऽवभासो विकल्पः स स्वभावो वस्त्ववभासः प्रतीति'रिति हि तैरुच्यते, तत्राभासप्रतीतस्यापि निषेधाधिकरणत्वं युक्तमिति भाट्टाङ्गीकृतत्वाच्च, अतः परमतप्रक्रियया खपुष्पमुदाहृतम् । **उपहास्यं** समीपस्थैरपि हास्यमित्यर्थः । **इत्यनुभूतेरनुभाव्यत्वसमर्थनम् ॥** — [illegible] ।

अथ परोक्तनित्यत्वं व्युदस्यति । **यत्त्वित्यादिना ।** ननु—कथं ज्ञाननित्यत्वमभ्युपयद्भिस्तन्निरसितुं युक्तम्, उच्यते—ज्ञानाश्रयभूत आत्मा, तदाश्रितं च संकोचविकासार्हं नित्यं ज्ञानद्रव्यं परस्यानभिमतम्, यत्तु प्रस्तुतमिन्द्रियसंप्रयोगाद्यन्वयव्यतिरेकानुविधायि प्रत्यक्षत्वपरोक्षत्वप्रमाणत्वात् अप्रमाणत्वाद्यवस्थं लोकसिद्धज्ञानं तस्य यदि नित्यत्वमुपपाद्यते तद्व्युदस्यते; **विषयसंबन्धिज्ञानस्य** हि स्वयंप्रकाशत्वं परेण समर्थितं स्वयंप्रकाशत्वम् । समानाधिकरणं च नित्यत्वं परस्येष्टं; स्वतःसिद्धतया नित्यत्वसमर्थनात्, अतस्तन्निरासो युक्तः, तत्र च मृद्द्रव्यस्य स्थिरत्वेऽपि घटत्वाद्यवस्थमृद्द्रव्यान्नित्यत्ववत्, ज्ञानाख्यद्रव्यस्य नित्यत्वेऽपि स्मृतित्वानुभूतित्वाद्यवस्थज्ञानान्नित्यत्वं युक्तमिति न स्वपक्षविरोधः ॥ स्वयंप्रकाशत्वे किंचिदुपादेयत्वमप्यस्ति तद्व्यावृत्त्यर्थं**स्तु**शब्दः । **अन्धस्य जात्यन्धेन यष्टिः प्रदीयत इति ।** असिद्धमत्यन्तासिद्धेन हेतुना साध्यत इत्यर्थः । तत्र हि ग्राहकाभावाद्ग्राह्याभावाच्च प्रागभावाभाव उक्तः, तमाशङ्क्य ग्राहकोऽस्तीत्याह—**प्रागभावस्येति ।** तत्र विकल्पे पूर्वपक्षिणोक्ते सत्येवावगमयतीति पक्षं स्थापयितुं तत्रोक्तं विरोधं शङ्कते—**कथमिति । तदानी**मित्यभावविशेषणं न क्रियाविशेषणम् । परिहरति—**नहीति ।** स्वसमकालवर्तित्वतियमः किं ग्राह्यसामान्यप्रयुक्तः, उतैतद्ग्राह्यविशेषप्रयुक्त—इति विकल्पाभिप्रायेण प्रथमं ग्राह्यसामान्यप्रयुक्तत्वपक्षं प्रतिवदति—**न ह्यनुभूतिरिति ।** यद्वा वर्तमानग्रहणनियमः—किं ग्राहकानुभूतिस्वभावात्, उत ग्राह्यानुभूत्यभावस्वभावादिति विकल्पमभिप्रेत्य प्रथमं दूषयति—**नहीति ।** हिशब्दो हेतौ । **नेति** प्रतिज्ञाऽध्याहर्तव्या । ग्राह्यविशेषपक्षं दूषयितुं शङ्कते—**अथ मन्यस इति ।** ग्राह्यविशेषस्य समकालवर्तित्वनियमोक्तिर्दर्शनपूर्विकैव स्यादित्यभिप्रायेणाह—**किं त्वयेति । क्वचित्** अनुभूतौ व्याप्तिग्रहणभूमिलेनाभावस्य दुष्टत्वात्प्रागभावो दुरपह्नव इत्याह—**हन्त तर्हीति ।** प्रागभावस्य समकालसिद्ध्या व्याप्तिरनुभूतिप्रागभावरूपे धर्मिणि गृहीते सिध्यतीत्यर्थः । **आदि**शब्दः प्रध्वंसपरः । समकालवर्तित्वनियममभ्युपगम्य दूषणमुक्तं, समकालवर्तित्वं चानुपपन्नमित्याह—**तत्प्रागभावं चेति ।** यदि स्वसमकालवर्तिग्रहणनियमोऽनुभूतेर्नास्ति तर्ह्यविद्यमानेऽपि घटे चाक्षुषतज्ज्ञानमुत्पद्येतेत्यत्राह—**इन्द्रियजन्मन इति । प्रत्यक्षशब्देन** प्रत्यक्षज्ञानमुच्यते । अयमभिप्रायः—स्वसमकालवर्तिग्राहकत्वनियमो न ज्ञानमात्रस्य, न च तदवान्तरभेदप्रमाणज्ञानस्य, न च तदवान्तरभेदप्रत्यक्षज्ञानस्य, अपि तु प्रत्यक्षविशेषरूपस्यैन्द्रियिकज्ञानस्येति, न सर्वेषां ज्ञानानां प्रमाणानां चेति **च**शब्देन प्रत्यक्षस्य चेत्युक्तं भवति; उपपादकग्रन्थानुगुण्यात्। कुत इत्याह—**स्मरणानुमानेति । स्मरण**शब्देन सर्वज्ञानानां समकालवर्तिविषयत्वनियमव्युदासः । **अनुमानागम**शब्देन प्रमाणमात्रस्य तन्नियमव्युदासः । **योगिप्रत्यक्षादि**शब्देन प्रत्यक्षमात्रस्य तन्नियमव्युदासः । **आदि**शब्देनेश्वरप्रत्यक्षं गृह्यते । प्रमेयसद्भावो न चेत्प्रमाणाप्रमाणज्ञानयोः कथं वैषम्यमि-

---

१ ग्राहणात् । २ अनुभवित्वे का. मु. पु. ।

अत एव च प्रमाणस्य प्रमेयाविनाभावः। न हि प्रमाणस्य स्वकालवर्तिनाऽविनाभावोऽर्थसंबन्धः, अपि तु यद्देशकालादिसंबन्धितया योऽर्थोऽवभासते तस्य तथाविधाकारमिथ्यात्वप्रत्यनीकता। अत इदमपि निरस्तं—स्मृतिर्न वाह्यविषया; नष्टेऽर्थे स्मृतिदर्शनात्—इति। अथोच्येत न तावत्संवित्प्रागभावः प्रत्यक्षावसेयः; अवर्तमानत्वात्। न च प्रमाणान्तरावसेयः; लिङ्गाद्यभावात्। न हि संवित्प्रागभावव्याप्तमिह लिङ्गमुपलभ्यते, नानुपलब्धिरपि कस्यचिद्दृश्यते, न चागमस्तद्विषयो दृष्टचरः, अतस्तत्प्रागभावः प्रमाणाभावादेव न सेत्स्यति—इति। यद्येवं स्वतःसिद्धत्वविभवं परित्यज्य प्रमाणाभावेऽवरूढश्चेत्, योग्यानुपलब्ध्यैवाभावः समर्थित इत्युपशाम्यतु भवान्। किंच—प्रत्यक्षज्ञानं स्वविषयं घटादिकं स्वसत्ताकाले सन्तं साधयत्तस्य न सर्वदा सत्तामवगमयद्दृश्यत इति घटादेः पूर्वोत्तरकालसत्ता न प्रतीयते। तदप्रतीतिश्च—संवेदनस्य कालपरिच्छिन्नतया प्रतीतेः। घटादिविषयमेव संवेदनं स्वयं कालानवच्छिन्नं प्रतीतं [1]चेत्,

---

त्रात्राह—**अत एवेति। अत एव** ज्ञानमात्रस्य समकालवर्तिग्राहकत्वनियमाभावेन। प्रमेयाविनाऽभावश्च सिद्ध इत्यर्थः। अन्यथा वर्तमानविषयालाभादसमकालवर्त्तिग्राह्णां तत्तत्प्रमाणानां प्रमेयाविनाभावो न सिध्येदिति भावः। तत्सिद्धिः कथमित्यपेक्षायां तमेवाविनाभावं विवृणोति—**नहि प्रमाणस्येति**। प्रमाणस्यार्थसंबन्ध इत्यन्वयः। तर्हि प्रमेयाविनाभावः क इत्यत्राह। **अपिन्विति। यद्देशकालादीति। आदि**शब्देन संस्थानमुच्यते। **मिथ्यात्वप्रत्यनीकता** मिथ्यात्वस्य प्रमाणं प्रत्यनीकं भवति तस्य भाव इत्यर्थः। यद्वा, मिथ्यात्वप्रत्यनीकोऽर्थो भवति तस्य भावो **मिथ्यात्वप्रत्यनीकता**, सा प्रमाणस्यार्थसंबन्ध इत्यन्वयः। **अत एवे**त्यादिभाष्यस्यैवं वाऽर्थः—**अत एव** प्रमाणत्वेन संप्रतिपन्नानां कालान्तरवर्तिग्राहकत्वदर्शनात्, तत्रापि प्रमेयाविनाभावः कल्प्यत इत्यर्थः। कथं तत्राविनाभावप्रकार इत्यत्राह—**नहीत्यादि**। अनेनैव प्रमाणप्रमेयाविनाभावरूपविषयविषयिभावशिक्षणेन बौद्धैकदेशिभिरुक्तस्मृतेर्निर्विषयत्वं निरस्तम्—इत्यवश्याभ्युपेतव्यमिदमित्यभिप्रायेणाह—**अत इदमपीति**॥

एवमनुभूतिरेव प्रागभावग्रहणक्षमेत्युपपादितम्, अथ तद्ग्राहिणाऽनुभवेन प्रत्यक्षाद्यन्यतमेन भवितव्यमिति तदसंभवेन प्रमाणाभावात्प्रागभावाभाव इति शङ्कते—**अथोच्येतेति। लिङ्गाद्यभावादिति। आदि**शब्देनानुमान-शब्दौ विवक्षितौ। तद्विवृणोति—**न हीत्यादिना**। निगमयति **अत इति**। उपमानस्य प्रतिपन्नवस्तुसादृश्य-संज्ञासंज्ञिसंबन्धयोरन्यतरमात्रगोचरत्वेनाप्रतिपन्नपदार्थप्रतिपादनासामर्थ्यादनुपन्यासः। परिहरति—**यदीति। यदि**शब्दः किमर्थः। **चेच्छब्दो** यद्यर्थः। **स्वपरीपार्टी विहाय शास्त्रमर्यादायां किमवतीर्णोऽसि** तथा चेदित्यर्थः। प्रमाणमाह **योग्यानुपलब्ध्यैवेति।** परेणाभावप्रमाणस्याङ्गीकृतत्वात् **योग्यानुपलब्ध्यैवेत्युक्तम्**। स्वपक्षपर्यालोचनायामपि ज्ञानस्य योग्यानुपलब्धिर्नाम भावरूपावऽस्थान्तरोपलब्धिः; पिण्डत्वाद्युपलब्धिरेव हि घटस्य योग्यानुपलब्धिः। अतोऽतीतकालावच्छिन्नज्ञानाभावो नाम **ज्ञानस्य संकोचो**, अर्थान्तरज्ञानं वा। पूर्वकालीनगजज्ञाने बुभुत्सिते तत्कालीनस्वापादिप्रतिसंधानं, घटादिज्ञानप्रतिसंधानं वा **गजज्ञानस्य योग्यानुपलब्धिः**, सा च लिङ्गतया पूर्वकालीनज्ञानाभावनिश्चायिका। यदुक्तं—'संविद इयमिति विषयीकारानर्हत्वेनाभावो दुर्ग्रहः' इति, तदयुक्तं; तथा सति प्रागभावनिरासानुपपत्तेः। न ह्यन्यस्य घटादेः प्रागभावो निरस्यते, अपि त्वनुभूतेः, तस्मादनुभूतिम् **इयमिति** विषयीकृत्य तस्याः प्रागभावो निराकरणीयः। **इयमिति** विषयीकाराभावेऽपि तत्प्रागभावोऽपि निराकर्तुं शक्यते चेत्, तदभावेऽपि प्रागभावः साधयितुमपि शक्यते। यदि त्वया विषयीकृता तद्वदस्माभिरपि विषयीकृतेति तदभावः सुसाध इत्यनुसंधेयम्। उत्तरत्र **नित्यं चे**दिति ग्रन्थेऽयमर्थो ह्यभिप्रेतः॥

एवं प्रागभावस्य योग्यानुपलब्धिसिद्धत्वमभिधायार्थापत्तिमप्याह—**किंचेत्यादिना**। ज्ञानस्य स्वावभासास्थिरत्वलक्षणयोग्यानुपलब्ध्या **अनित्यत्वमुक्तम्**, अथ विषयप्रकाशनिरूपणमुखेनापि तदुपपाद्यते। अविशेषेण ज्ञानाभावस्य ग्रहणमुपपन्नमित्युक्तम्, अथ **किं भवता नित्यं** सविषयज्ञानस्य **सिषाधयिषितम्**, उत निर्विषयस्येति विकल्पमभिप्रेत्य सविषयपक्षं दूषयति **—प्रत्यक्षेत्यादिना। सर्वदा** घटसत्ताकाले सर्वस्मिन्न प्रतीयत इत्यर्थः। घटादेः पूर्वोत्तरकाले सत्ता न प्रतीयतां ततः **किमित्यत्राह—तदप्रतीतिश्चेति। अप्रतीतिर्ज्ञानस्य** घटव्यवहारानुगुण्याभावः, अतो न साध्याविशिष्टता; नियमेन स्वसमकालवर्तिग्राहिणः प्रत्यक्षज्ञानस्य पूर्वोत्तरकालयोर्विद्यमानेऽपि घटे तदप्रकाशकत्वं तदानीं स्वभावादेवेत्यर्थः। एवं विषयव्यवहारानुगुण्यकादाचित्कत्वान्यथानुपपत्त्या ज्ञानानित्यत्वमुक्तम्। अर्थापत्त्यन्तरमप्याह—**घटादिविषयमेवेति**। विषयसमकालवर्तिनः प्रत्यक्षसंवेदनस्य नित्यत्वे घटादिरपि नित्यः स्यादतो घटाद्यनित्यत्वान्यथानुपपत्त्या ज्ञानानित्यत्वमित्यर्थः। अथा-

---

१ चेत्तत्संवेद°। २ °शब्देनानुपपद्यमानोपमानशब्दौ। ३ अनित्यत्वम्।

संवेदनविषयो घटादिरपि कालानवच्छिन्नः प्रतीयत—इति नित्यः स्यात् । नित्यं चेत्संवेदनं, स्वतः-सिद्धं नित्यमित्येव प्रतीयेत न च तथा प्रतीयते । एवमनुमानादिसंविदोपि कालानवच्छिन्नाः प्रतीताश्चेत्, स्वविषयानपि कालानवच्छिन्नान्प्रकाशयन्तीति ते सर्वे कालानवच्छिन्ना नित्याः स्युः; संविदनुरूपत्वाद्विषयाणाम् । न च निर्विषया संवित्काचिदस्ति; अनुपलब्धेः । विषयप्रकाशनस्वभावतयैवोपलब्धेरेव हि संविदः स्वयंप्रकाशता समर्थिता । संविदो विषयप्रकाशनसत्तास्वभावविरहे सति—स्वयंप्रकाशत्वासिद्धेः, अनुभूतेरनुभवान्तराननुभाव्यत्वाच्च संविदस्तुच्छतैव स्यात् । न च स्वापमदमूर्छादिषु सर्वविषयशून्या केवलैव संवित्परिस्फुरतीति वाच्यम्; योग्यानुपलब्धिपराहतत्वात् । तास्वपि दशास्वनुभूतिरनुभूता चेत्, तस्याः प्रबोधसमयेऽनुसंधानं स्यात्, न च तदस्ति । नन्वनुभूतस्य पदार्थस्य स्मरणनियमो न दृष्टचरः, अतः स्मरणाभावः कथमनुभवाभावं साधयेत्; उच्यते—निखिलसंस्कारतिरस्कृतिकरदेहविगमादि-

---

र्थापत्त्यन्तरमाह—**नित्यंचेदिति** । संविदो नित्यत्वसाधनं संविद**मियमि**ति विषयीकृत्यैव कर्तव्यं, स्वतःसिद्धत्व**नेयमि**ति विषयीकारानर्हत्वात्स्वयमेव नित्यमिति प्रतीयेत, न च तथा प्रतीयते, तस्मादनित्यत्वमेवेत्यर्थः । एवं नित्यतयाऽनवभासान्यथानुपपत्त्या ज्ञानानित्यत्वमुक्तम् । अनित्यतयाऽनवभासान्नित्यत्वमिति चेत् न; पूर्वापरावधिद्वयसापेक्षस्यानित्यत्वस्य सद्भावेऽप्यवधिद्वयास्वर्यप्रकाशत्वादेवानित्यत्वाप्रकाशत्वोपपत्तेः । यद्वा घटादिनित्यत्वप्रसङ्गः, नित्यत्वेनावभासप्रसङ्गश्च विषयव्यवहारानुगुण्यकादाचित्कत्वान्यथानुपपत्तेरनुग्राहकतर्कतयोक्तौ भवतः ॥

अथानुमानादिविषयाणामपि नित्यत्वमनिष्टं प्रसज्जयति—**एवमिति** । **एवं** प्रत्यक्षज्ञाननित्यत्वे विषयनित्यत्वप्रसक्तौ सत्यामित्यर्थः । कुतो नित्यतेत्यत्राह—**संविदनुरूपेति** । यथा संवित्स्वविषयं दर्शयति तथाभावादिति तदर्थः । ननु—प्रत्यक्षस्य समकालवर्तिविषयत्वनियमात्तन्नित्यत्वे विषयनित्यत्वप्रसङ्ग उपपन्नः, अनुमानादिसंविदामपि अतीतानागतविषयत्वसंभवात्कथं तन्नित्यत्वे विषयनित्यत्वप्रसङ्गः; उच्यते—अतीतत्वानागतत्वे ह्यापेक्षिके वर्तेते, ननः संविदपेक्षया हि विषयस्यातीतत्वानागतत्वे, संविदो नित्यत्वे तदपेक्षया विषयस्यातीतत्वानागतत्वे संवित्र दर्शयतीति—कालानवच्छिन्नतया प्रतीता विषया नित्याः स्युरिति, कालानवच्छिन्नत्वमेवानुगतनित्यत्वलक्षणमित्यभिप्रायेण **कालानवच्छिन्ना नित्या** इत्युक्तम् । ननु—न संविदपेक्षया विषयस्यातीतत्वागामित्वे किंतु लिङ्गाद्यर्थान्तरापेक्षया, ततो विषयस्य लिङ्गाद्यपेक्षयाऽतीतत्वम्, आगामित्वं च संभवतीति न नित्यत्वप्रसङ्गः; उच्यते—लिङ्गादेः प्रत्यक्षज्ञानविषयत्वात्–तन्नित्यत्वेन तद्विषयभूतलिङ्गादेरपि नित्यत्वापातात् तदपेक्षयाऽनुमानविषयस्यातीतत्वम्, आगामित्वं च संवित्र दर्शयतीति कालानवच्छिन्नो नित्य एव विषयः स्यादिति । एवं पूर्वोक्तदूषणमुपजीव्यानुमाने विषयनित्यत्वप्रसक्तिरित्यभिप्रायेणैवमित्युक्तम् । एवं पूर्वोक्तविकल्पे सविषयानुभवस्य नित्यत्वं निराकृतम्, अथ निर्विषयानुभवनित्यत्वपक्षं निराकरोति—**न चेति** । कुत इत्यत्राह—**अनुपलब्धेरिति** । न केवलं निर्विषयसंविदनुपलब्धेरेव, सविषयसंविद एव परेण स्वयंप्रकाशत्वसमर्थनात्तदभ्युपगमप्रकारेणापि निर्विषया संवित्रास्तीत्याह—**विषयेति** । ततः किमित्यत्राह—**संविदो विषयेति** । सविषयज्ञानोत्तीर्णायाः संविदः कदाचिदपि विषयसंबन्धाभावेन स्वयंप्रकाशत्वासिद्धेः, ज्ञानान्तरावेद्यत्वाच्च तुच्छतेत्यर्थः । ननु—यदि विषयप्रकाशतया स्वयंप्रकाशत्वमुपपाद्यते, तदायं दोषः स्यात्, विषयसंबन्धाभावेऽप्यनुभूतित्वात् इत्यनेन साध्यस्वप्रकाशत्वसिद्धिरिति चेत्, किमिदमनुभूतित्वं—किं स्वतःसिद्धत्वं तदा साध्यविशिष्टता स्यात् । यदि विषयप्रकाशकत्वमनुभूतित्वं तदानीमुक्तदोषः स्यादेव । विद्यमानदशायां सर्वदा भासमानत्वमपि न त्वया हेतुत्वेन वाच्यं; सुखदुःखेच्छादौ जडत्वेन त्वदभिमते व्यभिचारात्, अतो विषयप्रकाशकत्वमनुपजीव्य स्वयंप्रकाशत्वं दुःसाधनमित्युक्तदोषानतिवृत्तिः ॥ कथं स्वप्रकाशत्वरूपसाध्यधर्मनिवृत्तौ धर्मिभूतसंविदसिद्धिरित्यत्राह—**अनुभूतेरनुभवान्तराननुभाव्यत्वाच्चेति** । नन्वेकस्या एव संविदोऽन्तःकरणवृत्तिद्वारा विषयसंबन्धः कादाचित्कः, तद्विगमेऽपि स्वापादिदशासु स्वप्रकाशा संविच्चकास्तीति न तुच्छताप्रसक्तिरित्यत्राह—**न चेति** । **केवल**शब्देन निराश्रयत्वमुच्यते । कुत इत्यत्राह—**योग्येति** । तदेवोपपादयति—**तास्वपीति** । विषयेये पर्यवसानं दर्शयति । **न च तदस्तीति** । व्यापकभावो हि व्याप्याभावसाधकः, स्मरणं च नानुभवव्यापकम्, अतस्तदभावो नानुभवाभावसाधक इत्याह—**नन्विति** । पथि गच्छता स्पृष्टतृणादीनां, प्राग्जन्मानुभूतार्थादीनां चास्मरणादिति भावः । परिहरति—**उच्यत इत्यादिना** । विषयान्तरव्यासङ्गादिरस्मरणमात्रहेतुः; विषयवैचित्र्यविरहः, निष्प्रयोजनतया तात्पर्याभावः, तादात्विकतीव्रसंवेदनान्तरमनुभवानभ्यासश्च, अस्मरणमात्रहेतुतया हि प्रसिद्धाः । **अतः** नियमशब्दः अस्मरणनियम इत्युक्तेः । जन्मान्तरानुभूतस्याप्यर्थस्यानुभवाभावप्रसङ्गात्तद्व्यावृत्त्यर्थ—**निखिलसंस्कारेत्युक्तम्** । देहविगमादीति । **आदि**शब्देन नारकदुःख-प्रसूतिव्यसन-

---

१ °रूपस्वरूपत्वा० । २ विषयप्रकाशनतयैव । ३ °स्य नित्यत्वस्य का. मु. पु. । ४ निर्विषयासंविदनुपलब्धेरेव ।

प्रबलहेतुविरहेप्यस्मरणनियमोऽनुभवाभावमेव साधयति, न केवलमस्मरणनियमादनुभवाभावः; सुप्तोत्थितस्येवन्तं कालं न किंचिदहमज्ञासिषमिति प्रत्यवमर्शेनैव सिद्धेः । न च सत्यप्यनुभवे तदस्मरणनियमो विषयावच्छेदविरहात्, अहंकारविगमाद्वेति शक्यते वक्तुम; अर्थान्तरानुभवस्य, अर्थान्तराभावस्य चानुभूतार्थान्तरास्मरणहेतुत्वाभावात् । तास्वपि दशास्वहमर्थोऽनुवर्तत इति च वक्ष्यते । ननु स्वापादिदशास्वपि सविशेषोऽनुभवोऽस्तीति पूर्वमुक्तं, सत्यमुक्तम्—स त्वात्मानुभवः, स च सविशेष एवेति स्थापयिष्यते, इह तु सकलविषयविरहिणी निराश्रया च संविन्निषिध्यते । केवलैव संविदात्मानुभव इति [१]चेत्, सा च साश्रयेति [२]उपपादयिष्यते । अतोनुभूतिः सती स्वयं स्वप्रागभावं न साधयतीति प्रागभावासिद्धिर्न शक्यते वक्तुम् । अनुभूतेरनुभाव्यत्वसंभवोपपादनेनान्यतोप्यसिद्धिर्निरस्ता । तस्मान्न प्रागभावाद्यसिध्या संविदोऽनुत्पत्तिरूपपत्तिमती । यदप्यस्या अनुत्पत्त्या विकारान्तरनिरसनं, तदप्यनुपपन्नं; प्रागभावे

कालविप्रकर्षा विवक्षिताः । यथासंविस्सिद्धौ 'प्रायणाभ्रमक्लेशात्प्रसूतिव्यसनादपि । [३]चिरातिवृत्ताः प्राग्जन्मभेदा न स्मृतिगोचराः' इति । देहविगमादीनां निखिलसंस्कारतिरस्कृतिकरत्वं स्वभावः, पुण्यविशेषादपवादात्कस्यचिदेव जातिस्मृतिः । प्रबलशब्दो व्यासज्ञाद्यपेक्षया प्राबल्यपरः । उक्ततिरस्कारकाभावे कदाचिदपि स्मरणमनुभवव्यापकम्, अतस्तदभावोऽनुभवाभावसाधक एवेत्यर्थः । न केवलमनुभवसाधकाभावः, बाधकप्रमाणान्तरमप्यस्तीत्याह—**न केवलमिति । सिद्धेरित्यनुभवाभावस्येत्यनुषङ्गः** । अथास्मरणनियमस्यान्यथासिद्धिमाशङ्कते—**न चेति । अहंकारविगमोऽहंप्रत्ययविगमः** । परिहरति—**अर्थान्तरेति** । घटानुभवः, पटविनाशश्चानुभूतकुड्याद्यस्मरणकारणं न दृष्टमित्यर्थः । ननु—कुड्यादेः स्मरणं प्रति घटादेरकारणत्वात्तदभावो नास्याः स्मरणहेतुः, इह तु स्मरणकारणस्याभावोऽस्मरणहेतुरेव, नैवं; कुड्यादिस्मरणं प्रति घटादेरिव—ज्ञातृज्ञेययोरपि स्मरणं प्रति अकारणत्वमकामेनापि स्वीकार्यमित्यभिप्रायेण ह्यर्थान्तरशब्दः प्रयुक्तः । अयमर्थः—ज्ञातृज्ञेययोः स्मरणं प्रति कारणत्वं दृष्टत्वादङ्गीक्रियते चेत् दृष्टत्वादेवानुभवेऽपि ज्ञातृज्ञेययोः कारणत्वमङ्गीकार्यं, यदि ज्ञातृज्ञेययोर्दृष्टत्वेऽप्यनुभवकारणत्वं नाङ्गीक्रियते—स्मृतावपि कारणत्वं न स्यात्, अतस्तदभावान्न स्मरणाभाव इत्येतदूषणमहमर्थाभावमभ्युपगम्योक्तम् । अहमर्थाभावो नास्तीत्युपपादयिष्यत इत्याह—**तास्वपीति । अनुवर्तते** प्रकाशते, ततो हेतुरसिद्धश्चेत्यर्थः ।

पूर्वं 'सविशेषोऽनुभवः स्वापादिदशास्वस्तीत्युक्त'मिति तदालम्ब्य व्याघातामिप्रायेण चोदयति—**नन्विति** । अत्राह **सत्यमुक्तमिति । स त्वात्मानुभवः, न त्वनुभूत्यनुभव इत्यर्थः । अनुभूतिरिह** स आत्मा निर्विशेषः स्वादित्याह—**स चेति** । प्रबलत्वानुकूलविशिष्ट इत्यर्थः । इह किं निषिध्यत इत्यत्राह—**इह त्विति** । शब्दान्तरेणात्मन्यतमज्ञीकृतमिति शङ्कते—**केवलैव संविदात्मानुभव इति चेदिति । आत्मानुभवे** केवलात्मानुभवदशायाम् । स्वापादिदशायां या संवित्त्वेन निश्चितयाऽभ्युपेता सा प्रसरणाभावेन विषयावच्छेदविरहात्तदानीं केवला निर्विशेषा अस्मदुक्तैव स्यादिति भावः । **परिहरति—साचेति । सा च धर्मभूता संविद्विषयरहिताऽपि साश्रयेत्यर्थः । केवलैवेत्यादेरेवं वार्थः—आत्मानुभवरूपा आत्मस्फुरणरूपा या संवित्सा । केवलैवेति चेत्** अस्मदुक्तसकलविषयादिविशेषशून्यैवेति चेदित्यर्थः । परिहरति—**साचेति । सा** धर्मिस्फुरणरूपा या संवित् सा, **साश्रयेति** वक्ष्यते । स्फुरणं हि स्फुरतो धर्मः, यथा प्रभाश्रयस्य दीपस्य धर्मिणः औज्ज्वल्यं दीपाख्यधर्मिगतो धर्मस्तद्वदित्यर्थः । धर्मिस्वरूपभूतज्ञानस्य स्फुरणं नित्यं, तच्च भासमानताव्यवहारानुगुण्यम् । धर्मभूतज्ञानस्य स्फुरणं विषयसंबन्धजन्यं तदानीमेव, न तन्यदा, अत एव हि विषयप्रकाशनवेलायामिति पूर्वमुक्तं, **पुंस्त्वादिवत्त्वस्येत्यत्र** च वक्ष्यते । स्वापादौ तु तस्य सर्वविषयसंबन्धार्हता प्रतिबद्धा—वह्नेर्दाहकत्वशक्तिवत्, अतो न तदा स्फुरणम् ॥ **अथ प्रासङ्गिकमात्मानुभवं परिसमाप्य प्रस्तुतप्रागभावसिद्धिं निगमयति—अत इति । अतः** निर्विषयज्ञानस्याप्रामाणिकत्वात्, **तदवच्छिन्नज्ञाननित्यत्वस्योक्तानुपपत्तिपरिहारत्वात्,** प्रागभावग्राहकसमर्थनाच्चेत्यर्थः । **कथमनुभूतिः सती स्वप्रागभावं साधयेत्, इत्थं—स्मर्तव्यास्मरणलिङ्गेन 'इदानीं कालं न किंचिदहमज्ञासि'षमिति सुषुप्त्यवस्थापरामर्शेन ज्ञानसामान्याभावोचरेण तदन्तर्भूतज्ञानाभावोऽपि खेनैव विषयीकृत—इति** । स्वतःपक्षे प्रागभावसिद्धिरुक्ता, परतःपक्षेऽपि सिध्यतीत्याह—**अनुभूतेरिति** । **अथ प्रागभावाभानहेतुकानुत्पत्तिदूषणमुपसंहरति—तस्मादिति । इत्यनुभूतेर्नित्यत्वानुमानमिति ॥**

अनुत्पत्त्या विकारान्तरनिरसनं दूषयति—यदपीत्यादिना अनुत्पत्तिरूपहेतुसिद्ध्या विकारान्तरनिरासोऽनुपपन्नः, तद-

---

१ चेत् । सा । २ उपपादयिष्यते । ३ चिरातिवृत्ताः । ४ °स्य औज्ज्वल्यं । ५ °सोऽनुपपन्नः ।

व्यभिचारात्। तस्य हि जन्माभावेपि विनाशो दृश्यते। भावेष्विति विशेषणे तर्ककुशलताविष्कृता भवति। तथा च—भवदभिमताविद्यानुत्पन्नैव विविधविकारास्पदं, तत्त्वज्ञानोदयादन्तवती चेति–तस्यामनैकान्त्यम्। तद्विकाराः सर्वे मिथ्याभूता इति चेन्, किं भवतः परमार्थभूतोप्यस्ति विकारः, येनैतद्विशेषणमर्थवद्भवति, न ह्यसावभ्युपगम्यते। यदप्यनुभूतिरजत्वात्स्वस्मिन्विभागं न सहत इति, तदपि नोपपद्यते; अजस्यैवात्मनो देहेन्द्रियादिभ्यो विभक्तत्वात्, अनादित्वेन चाभ्युपगताया अविद्याया आत्मनो व्यतिरेकस्यावश्याश्रयणीयत्वात्। स विभागो मिथ्यारूप इति चेन्, जन्मप्रतिबद्धः परमार्थविभागः किं कचिदृष्टस्त्वया, अविद्याया आत्मनः परमार्थतो विभागाभावे हि वस्तुतो ह्यविद्यैव स्यादात्मा। अबाधितप्रतिपत्तिसिद्धदृश्यभेदसमर्थनेन दर्शनभेदोपि समर्थित एव। छेद्यभेदाच्छेदनभेदवत्। यदपि 'नास्या दृशेर्दृशिस्वरूपाया दृश्यः कश्चिदपि धर्मोस्ति, दृश्यत्वादेव तेषां न दृशिधर्मत्व'मिति च,

---

भ्युपगमेऽपि हेतोर्व्यभिचारमाह—**प्रागभाव इति**। तद्विवृणोति—**तस्य हीति**। **भाव**शब्दोपादाने तद्विरहेऽपि व्यभिचारसम्भवाभिप्रायेण भावशब्दोपादानम् उपालभते—**भावेष्वितीति**। नात्र प्रतिज्ञान्तरं दूषणमुच्यते तद्धि उक्तिदूषणं, न त्वर्थदूषणम्। भावरूपत्वे व्यभिचारं दर्शयति—**तथा चेति**। **तथा**शब्देन भावरूपत्वं विवक्षितं; तैर्भावरूपाज्ञानस्य समर्थितत्वात्। तत्र परिहारं शङ्कते—**तद्विकारा इति**। अस्य विशेषणस्य व्यावर्त्याभावान्नैरर्थक्यमाह—**किं भवत इति**। व्यावर्त्यमस्ति चेद्व्दैतहानिः, न चेद्विशेषणवैयर्थ्यमित्यर्थः। किं विकारमात्राभावः साध्यते, उत परमार्थविकाराभावः। प्रथमे—**अनैकान्त्यम्**। द्वितीयेपि—अनुभूतिः परमार्थविकाररहिता; अजत्वादित्युक्तं स्यात्। यत्परमार्थविकारवत्, तदुत्पन्नं–यथा घट इति व्यतिरेकोदाहरणं वाच्यं, तदा घटस्य परमार्थविकारानभ्युपगमादृष्टान्तः साध्याव्याप्तः इति—**हेतोर्व्याप्यत्वासिद्धि**र्भवेदिति भावः। **इत्यनुभूतेर्विकारित्वसमर्थनम्।**

अथाजत्वान्नानात्वनिषेधं प्रतिवदति—**यदपीति**। अत्र किं भेदमात्रं दुदूषयिषितम्, उत विजातीयभेदः, उत सजातीयभेदः, उत स्वगतभेद—इति पक्षेषु हेलसिद्ध्या निरस्तेष्वपि हेतुलाभ्युपगमेन प्रथमं, द्वितीयं शिरश्च दूषयंश्चार्वाकव्यतिरिक्तसर्ववादिसंमतस्थले व्यभिचारं दर्शयति–**अजस्यैवेति**। मृषावाद्यभिमत एव स्थले हेतोरनैकान्त्यमाह—**अविद्याया इति**। 'तमः–प्रकाशयोरिव विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सत्या' मिति हि तद्ग्रन्थः, तद्विभागस्य मिथ्यात्वमाशङ्क्य तदभ्युपगमेन परिहरति—**स विभाग इत्यादिना। जन्मप्रतिबद्धः** उत्पत्तिव्याप्तः। घटादिषु परमार्थविभागस्यैवोत्पत्तिव्याप्त्याभ्युपगमे घटादिविभागस्य पारमार्थ्यप्रसङ्गात्, तस्यापारमार्थ्ये–विशेषणवैयर्थ्यादुक्तदोषः स्यादेवेत्यर्थः। हेतुदूषणस्य बुभुत्सायां दृष्टान्तस्य साध्यव्यावृत्तत्वमुखेन व्याप्यत्वासिद्धिरभिप्रेताऽनुसंधेया। यत्परमार्थविभागवत् तदुत्पन्नं—यथा घट—इति हि व्यतिरेकदृष्टान्तः। घटस्य परमार्थविभागत्वानभ्युपगमात्–साध्याव्यावृत्तत्वं हि स्पष्टम्। विभागस्य मिथ्यात्वे **दूषणान्तरमाह—अविद्याया इति**। अथ सजातीयभेदाभावं व्युदस्यति—**अबाधितेति**। पूर्वं प्रमाणप्रमेयानुपपत्तिमिथ्यात्वानुमाननिरासमुखेन दृश्यभेदः समर्थितः, तत्तुल्यन्यायतया दर्शनभेदोऽपि सिद्ध इत्यर्थः। अवच्छेदकगतो भेदः, तत्सवच्छेद्यगत इति घटकरकाकाशदृष्टान्तमाशङ्क्याह–**छेद्यभेदादिति**। यथा संवित्सिद्धौ—**'प्रतिप्रमातृविषयं परस्परविलक्षणाः। अपरोक्षं प्रकाशन्ते सुखदुःखादिबुद्धयः॥ संवन्धिव्यङ्ग्यभेदस्य संयोगेच्छादिकस्य तु। न हि भेदः स्वतो नास्ति नाप्रत्यक्षस्य संमतः'** इति। प्रतिप्रमातृ, प्रतिविषयं ज्ञानभेदोऽपरोक्षः, परज्ञानं परोक्षतया भासते, स्वज्ञानमपरोक्षतया, घटादिविषयज्ञानानां परस्पर(विषय)वैलक्षण्यं चापरोक्षं, तस्मात्तद्भेदापलापः स्वानुभवप्रत्यक्षबाधित—इति प्रथमग्रन्थार्थः। सर्वमेकं ज्ञानं ज्ञातृज्ञेयरूपावच्छेदकसंबन्धभेदाद्भेदेन प्रतीयत इत्यत्राह—**संबन्धीति। संबन्धिव्यङ्ग्यभेदस्ये**ति शङ्कावीजानुवादः। नच—ज्ञातृज्ञेयरूपसंबन्धिव्यङ्ग्यभेदत्वमात्रेण ज्ञानस्य भेदः संबन्धिभेदकृत—इत्यौपाधिकः स्यात्; संयोगादेरपि संबन्धिव्यङ्ग्यत्वमात्रेण घटकरकावच्छिन्नाकाशवदेकत्वप्रसक्तेः। संबन्धी हि द्वेधा—सत्ताहेतुः, व्यक्तिहेतुश्चेति। यस्य संयोगादेः संबन्धिव्यतिरेकेण स्वरूपे प्रमाणं नास्ति तस्य संबन्धी सत्ताहेतुः, यस्य तु शब्दाकाशादेरस्ति तस्य तदुपाधिको भेदावभासो न स्वतः, तस्मात् ज्ञातृज्ञेयव्यतिरेकेणालब्धसद्भावस्य ज्ञानस्य स्वाभाविक एव भेदः, तस्मान्न सजातीयभेदापलाप इत्यर्थः। एतदभिप्रेत्यैव **छेद्यभेदा**दित्युक्तम्। **इत्यनुभूतेर्विभागसहत्वसमर्थनम्॥**

अथ स्वगतनित्यत्वैकत्वादिभेदनिरासार्थं पूर्वपक्षिणा अनुभूति पक्षीकृत्योक्तम् **अनुभूतित्वा**दिति व्यतिरेकि, दृश्यं पक्षीकृत्योक्तं **दृश्यत्वा**दित्यन्वयि च दूषयति—**यदपीत्यादिना। अनैकान्तिकमिति**। अनियतं व्याप्तिशून्यमित्यर्थः। **दृश्यत्वा**दित्यन्वयिनः पक्षत्रयवृत्तित्वलक्षणमनियतत्वम्। **दृश्यत्वा**दिति व्यतिरेकिणः साध्यव्यावृत्तावपि साधनाव्यावृत्तिल-

तदपि स्वाभ्युपगतैः प्रमाणसिद्धैर्नित्यत्वस्वयंप्रकाशत्वादिधर्मैरुभयमनैकान्तिकम्। न च ते संवेदनमात्रम्; स्वरूपभेदात्। स्वमत्तयैव स्वाश्रयं प्रति कस्यचिद्विषयस्य प्रकाशनं हि संवेदनम्, स्वयंप्रकाशता तु स्वसत्तयैव स्वाश्रयाय प्रकाशमानता, प्रकाशश्च चिदचिदशेषपदार्थसाधारणं व्यवहारानुगुण्यम्। सर्वकालवर्तमानत्वं हि नित्यत्वम्, एकत्वमेकसंख्यावच्छेद इति, तेषां जडत्वाद्यभावरूपतायामपि तथाभूतैरपि चैतन्यधर्मभूतैस्तैरनैकान्त्यमपरिहार्यम्। संविदि तु स्वरूपातिरेकेण जडत्वादिप्रत्यनीकत्वमित्यभावरूपः

क्षणमनियतत्वमात्रम्। अनुभवितृत्वं द्रव्यधर्मवत्ता; दृशिलात्, यद् द्रव्यधर्मवत्तन्न दृशिः—यथा घट इति व्यनुमानशरीरम्, अत्र द्रव्यधर्मवत्त्वस्य अदृशिलव्यभिचारिनुभूतौ भग्ना; तस्या दृशिलनित्यत्वादिधर्मवत्त्वादिति भावः। नित्यत्वादिमिथ्यात्वे नित्यत्वादिविपरीतानागनित्यत्वं प्रसज्येदिति तत्परिहाराय तेषां स्वरूपमात्रत्वमाशङ्क्य परिहरति—**न चेत्यादिना**। तेषां स्वरूपमात्रत्वं किमन्वयरूपाणाम्, उत व्यतिरेकरूपाणामिति—विकल्पमभिप्रेत्यान्वयमुखेन स्वरूपमात्रत्वं संभावितं शिर इति दूषितं, न तु परमभ्युपगमात्। हेतुमाह—**स्वरूपभेदादिति**। स्वरूपाद्वैदः, तेषां परस्परभेदश्च विवक्षितः। अनेन पूर्वं 'विधाभेदविवाददर्शना'दित्युक्तं विवृतम्। संवेदनत्व-स्वयंप्रकाशत्वयोः स्वरूपभेदमाह—**स्वसत्तयेत्यादिवाक्यद्वयेन**। प्रकाश्यतेऽनेनेति प्रकाशनं, व्यवहारानुगुण्यापादकमित्यर्थः। उभयत्रानुगत**प्रकाश**शब्दार्थमाह—**प्रकाशश्चेति**। चिदचिदशेषपदार्थास्तदा हि व्यवहारानुगुणा—यदा तद्व्यवहारहेतुषु ज्ञानं सन्निधत्ते, तत्राचिदंशस्य स्वव्यवहारसामग्र्यन्तर्भूतज्ञानवत्त्वं व्यवहारानुगुण्यं, वेद्यत्वे चिदंशस्याप्येवं, स्वप्रकाशकत्वे तु स्वव्यवहारसामग्र्यां ज्ञानान्तरानपेक्षायां स्वस्यान्तर्भावः। यद्वैवं चाहुः—व्यवहारानुगुण्यं व्यवहारप्रतिसंबन्धित्वं प्रकाश इत्यर्थः, नच ज्ञप्तिज्ञात्रोः खनः, ज्ञेयस्य तु ज्ञानापाद्यम्, अतः पुरोवर्तिनो घटादेरपि तदेव प्रकाशः, न प्राकट्यं, तदतिरिक्तान्युपगमेऽपि न ज्ञानस्य स्वप्रकाशत्वविरोधः; तस्य तन्निरपेक्षसिद्धितया प्राकट्यस्य ज्ञानानुमापकत्वानभ्युपगमात्। यद्वा, ज्ञानगतप्रकाशासाधारणं लक्षणमाह—**चिदचिदिति**। चिदचिदशेषपदार्थापेक्षया साधारणं ज्ञानगतं विद्व्यवहारानुगुण्यं, अचिद्व्यवहारानुगुण्यं च प्रकाशः। स्वपरव्यवहारानुगुण्यं प्रकाश इत्यर्थः। नन्विचितो विषयत्वमविगीतं, तच्च भास्यमानत्वम्, अचितो व्यवहारानुगुण्यं हि ज्ञानगतं चेत्, घटः प्रकाशत इति व्यवहारामुख्यत्वं स्यात्; ज्ञानगतप्रकाशस्य तत्संबन्धिन्युपचरितत्वात्॥ न च—ज्ञानसंबन्ध एव घटादेर्व्यवहारानुगुण्यं; व्यवहारानुगुण्यापादनस्वभाव इति ज्ञानलक्षणकथनायोगात्, संबन्धस्य द्विनिष्ठतया पुरोवर्तिनो घटादेरपि तद्धेतुत्वेन संबन्धरूपव्यवहारानुगुण्यापादकत्वं हि ज्ञानज्ञेयसाधारणं स्यात्: उच्यते—व्यवहारकर्मत्वरूपं व्यवहारानुगुण्यं साधारणं तद्धि व्यवहारप्रतिसंबन्धित्वं-तदेव भासमानत्वं, अतः घटः प्रकाशत इति व्यवहारश्च तन्निबन्धनतया मुख्यः, व्यवहारप्रतिसंबन्धित्वं प्रतिहेतुत्वरूपं व्यवहारानुगुण्यं **ज्ञानस्यैव**, तत्र प्रत्यक्त्वानुकूलत्वैकत्वलक्षणस्य स्वस्य व्यवहारप्रतिसंबन्धित्वं प्रतिहेतुत्वरूपं व्यवहारानुगुण्यं ज्ञातृस्वरूपभूतज्ञानस्यैव, स्वस्वरूपस्वगतैकत्वपरात्तत्वानुकूलत्वाद्याकारस्वाश्रयतत्संबन्धस्वविषयतत्संबन्धानां व्यवहारप्रतिसंबन्धित्वे हेतुत्वरूपं व्यवहारानुगुण्यं तु धर्मभूतज्ञानस्यैव, अतः स्वपरव्यवहारानुगुण्यं (ज्ञानासाधारणं) ज्ञानासाधारणप्रकाशलक्षणमिति युक्तम्॥

अथ नित्यत्वमाह—सर्वेति। यद्यपि कालानवच्छिन्नत्वमनुगतं नित्यत्वलक्षणं प्रागुक्तं सदकारणकत्वं च नित्यत्वं प्रसिद्धं, तथापि संविदः कालव्यतिरिक्तत्वात्—कालव्यतिरिक्तार्थनित्यत्वं कृत्स्नकालसंबन्धव्याप्तमिति—तेनापि सविशेषत्वापादनाय कालव्यतिरिक्तार्थनित्यत्वलक्षणमत्रोक्तम्। धर्माणामभावरूपत्वेऽप्यनैकान्त्यमाह—**तेषामिति**। अभावरूपाणामपि स्वरूपानतिरिक्तत्वे दूषणमाह—**संविदित्विति**। **तु**शब्देन प्रागुक्तशौक्ल्यादिदृष्टान्तवैषम्यमिहाभिप्रेतम्। तस्य कस्यचिद्धर्मत्वेन स्वपरनिर्वाहकत्वात्, स्वरूपे प्रतिपन्ने भ्रमविरोधित्वाच्च—स्वरूपमेव व्यावृत्तिः, ब्रह्मणस्तु कस्यचिद्धर्मत्वेनानभ्युपगमात्, स्वरूपे प्रतिपन्नेऽपि भ्रमसहत्वाच्च—पुरोऽवस्थितशुक्तिभास्वरशकलस्येव न स्वरूपमेव व्यावृत्तिरिति—**संविदस्तीति**शब्दौ **नित्यस्वयंप्रकाशादि**शब्दाश्च किमधिकार्थाः, उतानधिकार्थाः। अधिकार्थत्वे—सविशेषत्वम्; अन्यथा पदान्तरवैयर्थ्यं; स्वरूपमात्रत्वाविगीतत्वात्। नित्यत्वादिसाधकैर्हेतुभिः किं संविन्मात्रं साध्यते, उत तदतिरिक्तं किंचित्। प्रथमे—सिद्धसाध्यता। द्वितीये—सविशेषत्वम्—इति। एवं समानाधिकरणपदप्रयोगानुपपत्तिः, नित्यत्वादिसाधकहेतूनां सिद्धसाधनत्वं चाभिप्रेतं, यथा **संविन्मिद्धी—'न वेद्यं वित्तिधर्मः स्यादिति यत्प्रागुदीरितम्। तेनापि साधितं किंचित्संविदोऽस्ति न वा त्वया॥ अस्ति चेत्पक्षपातः स्यान्न चेत्ते विफलः श्रमः'** इति॥ नित्यत्वादिधर्माणां परस्परभेदानभ्युपगमे एकेनैव धर्मेण साधितेनालं, न तु धर्मान्तरं साध्यं; तस्य पूर्वप्रसाधितधर्मानतिरिक्तत्वात्। न हि नित्यत्वे प्रसाधिते कालापरिच्छेदः पुनरपि साध्योऽवतिष्ठते। एवं नित्यत्वादीनां स्वरूपाद्वैदः, परस्परभेदश्च सिद्धः। **इत्यनुभूतेर्दृश्यधर्मवत्त्वसमर्थनम्॥**

---

१ 'रामत्वम्। २ इदं का. मु. पु. नास्ति।

भावरूपो वा धर्मो नाभ्युपेतश्चेत्, तन्निषेधोक्त्या किमपि नोक्तं भवेत् । अपि च संवित्सिध्यति वा, न वा । सिध्यति चेत्–सधर्मता स्यात् । नो चेत्–तुच्छता; गगनकुसुमादिवत् । सिद्धिरेव संविदिति चेत्, कस्य कं प्रतीति वक्तव्यम् । यदि न कस्यचित्कंचित्प्रति सा, तर्हि न सिद्धिः सिद्धिर्हि पुत्रत्वमिव कस्यचित्कंचित्प्रति भवति । आत्मन इति चेत्, कोयमात्मा । ननु संविदेवेत्युक्तम्, सत्यमुक्तम्–दुरुक्तं तु तत् । तथा हि—कस्यचित्पुरुषस्य किंचिदर्थजातं प्रति सिद्धिरूपतया तत्संबन्धिनी सा संवित्स्वयं कथमिवात्मभावमनुभवेत् । एतदुक्तं भवति—अनुभूतिरिति स्वाश्रयं प्रति स्वसद्भावेनैव कस्यचिद्वस्तुनो व्यवहारानुगुण्यापादनस्वभावो ज्ञानावगतिसंविदाद्यपरनामा सकर्मकोनुभवितुरात्मनो धर्मविशेषो–'घटमहं जानामि, इममर्थमवगच्छामि, पटमहं संवेद्मी'ति सर्वेषामात्मसाक्षिकः प्रसिद्धः । एतत्स्वभावतया हि तस्याः स्वयंप्रकाशता भवताप्युपपादिता । अस्य सकर्मकस्य कर्तृधर्मविशेषस्य कर्मत्ववत्कर्तृत्वमपि दुर्घटमिति । तथा ह्यस्य कर्तुः स्थिरत्वं कर्तृधर्मस्य संवेदनाख्यस्य सुखदुःखादेरिवोत्पत्तिस्थितिनिरोधाश्च प्रत्यक्षमीक्ष्यन्ते । कर्तृस्थैर्यं ताव'त्स एवायमर्थः पूर्वं मयानुभूत' इति प्रत्यभिज्ञाप्रत्यक्षसिद्धम्[1] । 'अहं जा-

---

परेण संविदो निर्भेदत्वापादनमुखेन तस्या आत्मत्वं साधितम्, अत्र निर्भेदत्वनिराकरणमुखेन संविदात्मत्वं निराकर्तुमारभते—**अपिचेत्यादिना** । तत्र सविशेषत्वमापादयितुं विकल्पयति—**संवित्सिध्यति वा, न वेति** । किं प्रतीता, उताप्रतीतेत्यर्थः । प्रथमं शिरो दूषयति—**सिध्यति चेदिति** । सर्वप्रमाणानां सविशेषविषयत्वस्य पूर्वमुपपादितत्वादिति भावः । यद्वा, सिध्यद्वस्तु सिद्धेराश्रयतया सविशेषं स्यात्, **सिद्धिः** प्रकाशः, व्यवहारानुगुण्यरूपधर्मयोगी स्यादित्यर्थः । शिरोद्वयापादितदोषपरिहाराय परोक्तं शङ्कते—**सिद्धिरेवेति** । सिद्धेः सिध्यन्तरानपेक्षत्वात्—प्रमितिविषयत्वप्रयुक्तं, सिद्धिसंबन्धित्वरूपं सविशेषत्वं न स्यात्, अथाऽपि तुच्छत्वं च न भवेत्; न हि शशशृङ्गं सिद्धिरूपमिति भावः । तत्रापि सविशेषत्वमाह—**कस्येति** । प्रतीतिश्चेत्कस्यचिदाश्रयस्य कंचिद्विषयं प्रति भवति, तदुभयं वक्तव्यमित्यर्थः । विपक्षे बाधकमाह—**यदीति** । तद्विवृणोति—**सिद्धिर्हीति** । पितृस्थाने विषयः, पुत्रस्थाने आश्रयः, पुत्रत्वस्थाने सिद्धिः; पुत्रत्वस्य हि पुत्र आश्रयः । कस्यचिदित्युक्तं ज्ञात्रपेक्षाप्रतिक्षेपं शङ्कते—**आत्मन इति चेदिति** । आत्मानं प्रतीत्यर्थः । **आत्मशब्दः** स्ववाची । अनेन प्रत्यक्त्वं फलितं; **सिद्धिप्रतिसंबन्धी स्वात्मा हि प्रत्यक्, स्वस्मै भासमानत्वं प्रत्यक्त्वमिति** हि वक्ष्यते । तच्च संविदोऽनुपपन्नमित्यभिप्रायेणाह—**कोऽयमात्मेति** । **अयं**शब्दः सिद्धिप्रतिसंबन्धित्वपरः—सिद्धिप्रतिसंबन्ध्यात्माकः । **किं**शब्दः क्षेपे । संवित्र सिद्धिप्रतिसंबन्ध्यात्मा—संविदः प्रत्यक्त्वमनुपपन्नमित्यर्थः । संविदात्मभावस्योपपादितत्वान्नानुपपन्नमिति चोदयति—**नन्विति** । परिहरति—**सत्यमिति** । संविदात्मत्वस्य दुरुक्तत्वं संविदात्मत्वनिराकरणमुखेनोपपादयितुमारभते—**तथाहीति** । कर्मनिर्देशो दृष्टान्तेन । **अर्थजातमिति** । धर्मधर्मिरूपपुञ्ज एव प्रमितिविषय इति भावः । **सिद्धिरूपा** प्रकाशरूपा, अत एव तदुभयसंबन्धिनी । **कथमिति** । आत्मधर्मभूता संवित् स्वयं कथमात्मेत्यर्थः । **सिद्धिशब्द** उत्पत्तिज्ञप्तिसाधारणः ईह किमर्थः, प्रकाशश्चेदिह विवक्षितः—स कः, तस्य कर्मकर्तृसंबन्धित्वे किं प्रमाणं, वृत्तिज्ञानं हि सकर्मकर्तृकं संवित्तु केवला । इह कर्मनिर्देशे किं फलमिति शङ्कायामाह—**एतदुक्तं भवतीति** । **अनुभूतिरि**त्यनेन ज्ञप्तिपरत्वमुक्तम् । **स्वाश्रयं प्रति स्वसद्भावेनैव कस्यचिद्वस्तुनो व्यवहारानुगुण्यापादनस्वभाव** इत्यनेन तत्स्वरूपमुक्तम् । एवं **सिद्धि**शब्दार्थ उक्तः । **ज्ञानावगतिसंविदाद्यपरनामे**त्यनेन ज्ञान-संविच्छब्दयोः पर्यायतया वृत्तिज्ञानसंविदोर्विभागस्य निष्प्रमाणकत्वं फलितम् । **घटमहं जानामी**त्यादिना **आत्मसाक्षिकः प्रसिद्ध** इत्यन्तेन कर्मकर्तृसंबन्धस्य स्वानुभवसिद्धत्वमुक्तम् । **ज्ञानसंविच्छब्दयोः** पर्यायत्वमुपपादितं च । तत्र कर्मकर्तृसंबन्धे पराभ्युपगतमाह—**एतत्स्वभावतयेति** । आत्मनः स्वयंप्रकाशत्वं साधयता कर्मकर्तृसंबन्धिज्ञानस्य स्वयंप्रकाशत्वं साधितमिति—सकर्मकर्तृकं ज्ञानं जडरूपमात्मभूतज्ञानादन्यद् वृत्तिरूपमित्यभ्युपगमोऽनुपपन्न—इति भावः । **अस्ये**त्यादिना कर्मनिर्देशस्य फलं दर्शितम् । ननु—न वयं संविदः कर्तृत्वमिच्छाम इति कथमयं प्रसङ्गः; उच्यते–संविद आत्मत्वं वदता प्रत्यक्त्वमभ्युपेतव्यं प्रत्यक्त्वं च ज्ञानाश्रयस्यैव—इति संविदो ज्ञातृत्वमवर्जनीयं, तच्च दुर्घटमित्यर्थः । **कर्तृत्व**माश्रयत्वं, धात्वर्थाश्रयो हि कर्ता ॥

एवं धर्मधर्मिभावेन प्रतीत्या संविदात्मत्वं निराकृतम्, अथ स्थिरत्वास्थिरत्ववैधर्म्येण तद्व्युदस्यते—**तथेति** । **हि**र्हेतौ । **तथा**शब्देन चार्थेन हेत्वन्तरं सूच्यते । कर्तृस्थैर्यमुपपादयति—**कर्तृस्थैर्यं तावदिति** । प्रत्यभिज्ञायमानत्वाद्धि घटादिस्थैर्य-

---

१ प्रत्यभिज्ञासिद्धम् । २ अहमर्थः का. मु. पु. ।

नामि, अहमज्ञासिषं, ज्ञातुरेव ममेदानीं ज्ञानं नष्टमिति च संविदुत्पत्त्यादयः प्रत्यक्षसिद्धा इति कुतस्तदैक्यम् । एवं क्षणभङ्गिन्याः संविद आत्मत्वाभ्युपगमे—पूर्वेणुर्दृष्टमपरेणुरिदमहमदर्शमिति प्रत्यभिज्ञा च न घटते; अन्येनानुभूतस्य न ह्यन्येन प्रत्यभिज्ञानसंभवः । किंचानुभूतेरात्मत्वाभ्युपगमे तस्या नित्यत्वेपि प्रतिसंधानासंभवस्तदवस्थः; प्रतिसंधानं हि पूर्वापरकालस्थायिनमनुभवितारमुपस्थापयति, नानुभूतिमात्रम् । अहमेवेदं पूर्वमप्यन्वभवमिति—भवतोप्यनुभूतेर्न ह्यनुभवितृत्वमिष्टम् । अनुभूतिरनुभूतिमात्रमेव । संविन्नाम काचिन्निराश्रया निर्विषया वात्यन्तानुपलब्धेर्न संभवतीत्युक्तम् । उभयाभ्युपगता संविदेवात्मेत्युपलब्धिपराहतम् । अनुभूतिमात्रमेव परामार्थ—इति निष्कर्षहेत्वाभासाश्च निराकृताः । ननुच—'अहं जानामीत्यस्मत्प्रत्यये योऽनिदमंशः प्रकाशैकरसश्चित्पदार्थः स आत्मा, तस्मिंस्तद्बलनिर्भासिततया युष्मदर्थ-

सिद्धिः, तद्वत् तत्र घटप्रत्यभिज्ञाकाले 'पूर्वं मयाऽभूत' इति कर्तुरपि प्रत्यभिज्ञाविषयत्वात् स्थैर्यसिद्धिरित्यर्थः । अथ ज्ञानस्योत्पत्तिस्थितिनिरोधान् दर्शयति—**अहमित्यादिना । जानामी**त्यनेनोत्पत्तिस्थिती सिद्धे । **अज्ञासिष**मित्यतीतत्वप्रतीतीतिः । एतद्द्वैशद्यायानन्तरं पूर्वकालसंजातज्ञानविशिष्टत्वपरामर्शद्योतनार्थं **ज्ञातुरेव ममे**त्युक्तिः । **उत्पत्त्यादय इति । आदि**शब्देन स्थितिनिरोधग्रहणम् । संविद **उत्पत्ति**नाम त्रिचतुरक्षणस्थायिन्यास्याः प्रथमक्षणयोगः, क्षणान्तरसंबन्धः **स्थितिः**, सैवंविदः स्वप्रकाशत्वात् प्रत्यक्षे । घटसंविदो निरोधो नाम—पटसंविन्सा च प्रत्यक्षा । **इति**हेतौ । स्थिरत्वास्थिरत्ववैधर्म्येण न तदैक्यमित्यर्थः । एवं प्रत्यभिज्ञाविषयत्वेनात्मनः स्थैर्यमुक्तम्, अथ प्रत्यभिज्ञाश्रयत्वेन स्थैर्यमुच्यते—**एवमिति** । पूर्वत्र प्रत्यभिज्ञाप्रत्यक्षसिद्धमित्युक्तम्, अत्र प्रत्यभिज्ञा न घटत इत्युक्तम् । अयमभिप्रायः—प्रत्यभिज्ञाविषये ज्वालादौ यत्र क्वचिदन्यथासिद्धिः संभवेत् तत्र न स्थैर्यसिद्धिः । अत्र प्रत्यभिज्ञाविषयत्वान्यथासिद्धावपि, प्रत्यभिज्ञाश्रयत्वस्य चानन्यथासिद्धत्वात्—भ्रान्तिरूपप्रत्यभिज्ञायामपि तदाश्रयस्य स्थैर्यमनन्यथासिद्धमिति—प्रत्यभिज्ञाश्रयत्वप्रयुक्तं स्थैर्यं दुष्प्रकल्पमिति—प्रत्यभिज्ञाश्रयतया स्थैर्यं विवृणोति—**अन्येनेति** ॥

एवं स्थिरस्य ज्ञातुर्धर्मत्वेन, अस्थिरत्वेन च प्रतीतत्वात्, अस्थिरत्वनिबन्धनात्प्रतिसंधानासंभवाच्च संविदात्मत्वं निरस्तम्, अथ स्थिरत्वाभ्युपगमेऽपि प्रतिसंधानाऽसंभवादात्मत्वं व्युदस्यति—**किंचेति । अनुभूतेरात्मत्वाभ्युपगमे तस्या नित्यत्वेऽपीति** । आत्मत्वाभ्युपगमौपयिकतया संविदो नित्यत्वाभ्युपगमेऽपीत्यर्थः । न केवलमनित्यत्वपक्ष एव संविद आत्मत्वानुपपत्तिः, नित्यत्वेऽपीत्यपिशब्दार्थः । आत्मा हि प्रतिसंधत्ते, प्रतिसंधानमत्र न संभवतीत्यर्थः । तदसंभवमुपपादयति—**प्रतिसंधानमिति** । तदुदाहरति—**अहमिति** । ततः किमिति शङ्कायां तस्य परानिष्टत्वमाह—**भवत इति । न केवलं भवदनभ्युपगमः**, अनुभूतेरनुभवितृत्वं गमनक्रियाया गन्तृत्ववदनुपपन्नं च इत्यभिप्रायेणाह—**अनुभूतिरिति । मात्रचाऽनुभवितृत्वव्यावृत्तिः** । ननु—धर्मत्वा-स्थिरत्वा-प्रतिसंधातृत्वैः संविदोऽनात्मत्वं यदुक्तं तन्न वक्तव्यम्; अनुभवितृत्वस्यात्माकारत्वेनानभ्युपगमात्, विषयाश्रयशून्यायाः संविदो गुणभावाभावात्, तदुभयसंबन्धप्रयुक्तानित्यत्वप्रसङ्गाभावाच्च इत्यत्राह—**संविन्नामेति** । ननु—कथं विषयाश्रयशून्यज्ञानाभावः, स्वरूपभूतं ज्ञानं विषयाश्रयशून्यं लक्ष्यते; उच्यते—स्थविष्ठमिदं चोद्यं—किं त्वया ज्ञातुरेव ज्ञानशब्दवाच्यस्याऽजडत्वनित्यत्वादिकं, विषयाश्रयशून्यत्वम्, आत्मत्वं च साध्यते—तत्सिद्धसाधनं, यदि ज्ञातृव्यतिरिक्तस्य ज्ञानस्य—तर्हि ज्ञातृव्यतिरिक्तं विषयाश्रयविरहितं ज्ञानं शून्यमिति ब्रूमः । ज्ञातृज्ञेय-तदवच्छिन्नज्ञानस्वरूपत्रिकातिरिक्तं ज्ञानमनुपलम्भनिरस्तमित्यर्थः । बौद्धैकदेशिभि'र्धर्मिकल्पनातो वरं धर्मकल्पने'ति लाघवन्यायात् ज्ञात्रात्मवादिना, ज्ञानात्मवादिना च संप्रतिपन्ना संविदेवात्मेत्युक्तं, तदाशङ्क्य परिहरति—**उभयेति** । कल्पनायामेव लाघवन्यायः, न तूपलब्धौ; अन्यथा अत्यन्तलाघवार्थं माध्यमिकमतानुसारेण ज्ञानं च लक्ष्येत कल्पने तु लाघवन्यायः, संवित्तूपलभ्यत इति चेत्—ज्ञानाऽपि तथोपलभ्यते, अथ उपलब्धिपराहतत्वात्संविदात्मत्वमनुपपन्नमित्यर्थः । साध्यमेव संविदुपलभ्यते, तथाऽपि युक्तिमिर्निर्विशेषत्वं साधितमित्यत्राह—**अनुभूतिमात्रमिति** । यद्वा, संविदः परमार्थत्वेनोभयवादिसंमतत्वात्सैवात्मेति युक्तमित्याशङ्क्य दूषयति—**उभयेति । उपलब्धिपराहतं** प्रत्यक्त्वलक्षणस्यात्मत्वस्या'हं जानामी'ति **ज्ञातृत्वसामानाधिकरण्येनोपलब्ध्या पराहतमित्यर्थः** । ज्ञातुरेव प्रत्यगात्मत्वमुपलब्धिसिद्धमित्युक्ते, तस्या उपलब्धेर्निर्विशेषसंविदात्मत्वसाधकयुक्तिमिर्बाधितत्वमाशङ्क्याह—**अनुभूतिमात्रमिति । इति संविदात्मत्वनिरासः** ॥

प्रत्यग्भो ह्यात्मा, प्रत्यक्त्वं चाहमर्थात्मत्वे तु न सिध्यति, संविदात्मत्वपक्ष एव सेत्स्यतीति चोदयति—**ननुचेति । अहं जानामीत्यस्मत्प्रत्यये** अस्मत्प्रत्ययत्वेन **पराभ्युपगते, यश्चित्पदार्थः स आत्मा** । कुत इत्यत्राह—**अनिदमंश इति । इदमंशव्यतिरिक्तः** परागर्थव्यतिरिक्तः प्रत्यगर्थः । हेतुगर्भमिदं; प्रत्यगर्थत्वादित्यर्थः । प्रत्यक्त्वं च कुत इत्यत्राह—**प्रकाशै-**

लक्षणोऽहं जानामीति सिध्यन्नहमर्थश्चिन्मात्रातिरेकी युष्मदर्थ एव, नैतदेवम्; अहं जानामीति धर्मधर्मितया प्रत्यक्षप्रतीतिविरोधादेव। किं च—**'अहमर्थो न चेदात्मा प्रत्यक्त्वं नात्मनो भवेत्। अहंबुद्ध्या परागर्थात्प्रत्यगर्थो हि भिद्यते॥ निरस्ताखिलदुःखोहमनन्तानन्दभाक् स्वराट्। भवेयमिति मोक्षार्थी श्रवणादौ प्रवर्तते॥ अहमर्थविनाशश्चेन्मोक्ष इत्यध्यवस्यति। अपसर्पेदसौ मोक्षकथाप्रस्तावगन्धतः॥ मयि नष्टेपि मत्तोन्या काचिज्ज्ञप्तिरवस्थिता। इति तत्प्राप्तये यत्नः कस्यापि न भविष्यति॥ स्वसंबन्धितया ह्यस्याः सत्ताविज्ञप्तितादि च। स्वसंबन्धवियोगे तु ज्ञप्तिरेव न सिध्यति॥**

करस इति। स्वयंप्रकाशत्वादित्यर्थः। हेत्वभिप्रायश्चिच्छब्दः। ज्ञानत्वात्स्वयंप्रकाशत्वमित्यर्थः। **प्रत्यक्त्वं स्वस्मै** प्रकाशमानत्वम्। **स्वयं प्रकाशत्वम**नन्याधीनप्रकाशत्वम्। अहमर्थस्तु युष्मदर्थलक्षणः; युष्मदर्थलक्षणत्वात्, परागर्थविशेषोऽहमर्थ इत्यर्थः। युष्मदर्थलक्षणत्वं कुत इत्याह—**तद्बलेति। तद्बलनिर्भासितत्वात्** ज्ञानाधीनप्रकाशत्वात्। तच्च चिन्मात्रातिरेकित्वादित्यर्थः। अस्मिन्श्रोद्यग्रन्थे संविदात्मत्वे व्यतिरेकित्रयम्, अहमर्थानात्मत्वेऽन्वयित्रयं चाभिप्रेतम्। तत्र व्यतिरेकिणां व्यतिरेकिदृष्टान्तः, अन्वयिनां सपक्षश्च **युष्मदर्थ**शब्देन सूचितः। अनुभूतिरात्मा; प्रत्यक्त्वात्, यदनात्मा तन्न प्रत्यक्—यथा घटः; अनुभूतिः प्रत्यग्भूता; स्वयंप्रकाशत्वात्, यन्न प्रत्यक् तन्न स्वयंप्रकाशं—यथा घटः; अनुभूतिः स्वयंप्रकाशा; अनुभूतित्वात्, यन्न स्वयंप्रकाशं न तदनुभूतिः—यथा घट इति व्यतिरेकित्रयम्। अहमर्थो ज्ञानाधीनप्रकाशः; **चिद्व्यतिरिक्तत्वात्**, घटवत्; अहमर्थः पराक्; ज्ञानाधीनप्रकाशत्वात्, घटवत्; अहमर्थो नात्मा; पराक्त्वात्, घटवत्—इत्यन्वयित्रयम्। स्वयंप्रकाशत्वमेव, संविदात्मत्वे साक्षाद्धेतुतया पूर्वमुक्तं पूर्वपक्षोपन्यासे, अत्र तु तेन प्रत्यक्त्वं साधयित्वा तेनात्मत्वं साधितम्, एतत्परिहरति **—नैतदेवमिति**। संवित्स्वयंप्रकाशत्वमिष्टं शिक्षणीयांश्च शिक्षितः, अतः अनुभूतेः सिद्धत्वसाधकहेतोः **सिद्धसाध्यता**, ज्ञातुरस्वतःसिद्धत्वसाधकहेतोश्चिदन्यत्वस्यासिद्धिर्वक्ष्यते, इतरानुमानचतुष्टयमिह निरस्यते। संविदात्मत्वादि—किं प्रतीत्याऽभ्युपगतम्, उत प्रत्यक्त्वसिद्ध्यनुपपत्त्या, उत श्रुत्यर्थापत्त्या, उत श्रुतिस्मृतिसूत्रस्वारस्यादिति विकल्पमभिप्रेत्य, प्रथमपक्षे प्रत्यक्षप्रतीतिविरोधमाह—**अहं जानामीति**। एतेन परोक्तानां ज्ञानप्रत्यक्त्वात्मत्व-ज्ञातृपराक्त्वानात्मत्वसाधकानामन्वयिव्यतिरेक्यनुमानानां कालात्ययापदेश उक्तः 'अहं जाना' मीत्यत्राहमर्थः स्वावभासेऽपि घटावभास इव प्रतिसंबन्धितयाऽहमिति प्रतीयते धर्मितयाऽवभासादेव न ज्ञानशेषतावभासः, अतः स प्रत्यक्, आत्मा च। ज्ञानं च धर्मतया प्रतीयमानं सुखादिवदन्यस्मै भासत इति न प्रत्यक्, नाप्यात्मा, अपि तु परागनात्मा च। अतश्चतुर्णां हेतूनां प्रत्यक्षबाध उक्तो भवति॥

अथ प्रत्यक्त्वं विपरीतसाधकं चेत्याह—**किंचेति**। स्वस्मै प्रकाशमानत्वरूपं प्रत्यक्त्वं, परस्मै प्रकाशमानत्वं पराक्त्वं चाह—मिदंवुद्धिभ्यां हि विभज्यते तस्मादहंवुद्धिविगमे प्रत्यक्त्वमेव न सेत्स्यतीति प्रत्यक्त्वमेवाहमर्थस्यात्मत्वसाधकमित्यर्थः। संविदि प्रत्यक्त्वाभावात्—आत्मत्वसाधकहेतोरसिद्धिश्च फलिता, अहमर्थस्य पराक्त्वाभावात्—अनात्मत्वसाधकहेतोरसिद्धिश्च सिद्धा। **अहंवुद्ध्येत्यनेन** 'युष्मदस्मत्प्रत्ययगोचरयो'रिति स्वोक्तिविरोधश्च, 'कोऽहमित्येव निपुणः, शब्दोऽहमिति दोषाय, नात्मन्येष' इत्याद्यागमविरोधश्च गर्भितः। **हि**शब्दस्य प्रसिद्धिपरत्वाद्धेतौ वा। अनुभूतिः पराची; अहमर्थव्यतिरिक्तत्वात्, घटवदिति—प्रत्यक्त्वहेतोरसिद्धिदार्ढ्य, तत्प्रत्यक्त्वसाधकस्य स्वयंप्रकाशत्वहेतोश्च सत्प्रतिपक्षत्वं च, अनुभूतिरनात्मा; अहमर्थव्यतिरिक्तत्वात्, घटवदिति—संविदात्मत्वसाधकस्य प्रत्यक्त्वहेतोश्च सत्प्रतिपक्षत्वं चाभिप्रेतमित्यवगम्यते। अहंवुद्ध्या परागर्थात्प्रत्यगर्थस्य भेदसमर्थनात्, **हि**शब्दाच्चात्र संवित्प्रत्यक्त्वहेतोरसिद्धिश्च साधिता। श्रुत्यर्थापत्तिं वक्तुं मुमुक्षोरभिसंधिमाह—**निरस्तेति**। ततः किमित्यत्राह—**अहमर्थविनाश इति**। यत्संबन्धित्वेन दुःखज्ञानं, यत्संबन्धिनी दुःखनिवृत्तिः, यत्संबन्धिनी सुखप्राप्तिश्चेप्स्यते तद्विनाशो मोक्षश्चेत्, अधिकारिविरहादप्रामाण्यं भवेत्; प्रमितिजनकत्वं हि शास्त्रस्य प्रामाण्यं, बुभुत्सितप्राह्यस्य शास्त्रस्य पुरुषार्थपर्यवसायित्वाभावे श्रवणमननाद्यधिकारी न सिध्येत्, न हि शास्त्रं श्रवणादिनिरपेक्षं कस्यचित्प्रमितिं जनयति, अतोऽधिकारिविरहात्प्रामाण्य न भवेदिति—शास्त्रप्रामाण्यान्यथानुपपत्तिरूपश्रुत्यर्थापत्तिरुक्ता। अहमर्थे नष्टेऽपि ज्ञप्तिर्निला तिष्ठतीत्यत्राह—**मयि नष्टेऽपीति**। न हि मयि नष्टेऽपि स्तम्भस्तिष्ठतीति स्वशिरश्छेदः पुरुषार्थः स्यादिति भावः। न हि केवलसंविदः श्रवणादौ प्रवृत्तिः, अपि त्वहमर्थस्यैव, अतः प्रवर्तमानोऽयं स्वनाशाय न प्रवर्तते। अहमर्थविगमे इत्यवस्थानमभ्युपगम्य दूषणमुक्तम्, अथ तदवस्थानमेव नास्तीत्याह—**स्वसंबन्धितयेति**। सामान्याकारः **सत्ता, विज्ञप्तिता** विषयप्रकाशत्वरूपविशेषाकारः। **आदि**शब्देन स्वयंप्रकाशत्वं विवक्षितम्। सत्ताया आश्रयसंब-

१ प्रत्यक्त्वमेवाहमर्थस्यैव, प्रत्यक्त्वमहमर्थस्यैव।

छेत्तुश्छेद्यस्य चाभावे छेदनादेरसिद्धिवत् । अतोऽहमर्थो ज्ञातैव प्रत्यगात्मेति निश्चितम् ॥ **विज्ञातारमरे केन जानात्येवेति च श्रुतिः । एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति च स्मृतिः ॥ नात्मा श्रुतेरित्यारभ्य सूत्रकारोऽपि वक्ष्यति । ज्ञेत एवेत्यतो नात्मा ज्ञप्तिमात्रमिति स्थितम् ॥**' अहं-प्रत्ययसिद्धो ह्यस्मदर्थः, युष्मत्प्रत्ययविषयो युष्मदर्थः, तत्राहं जानामीति सिद्धो ज्ञाता युष्मदर्थ इति वचनं जननी मे वन्ध्येतिवद्व्याहतार्थं च । न चासौ ज्ञाताहमर्थोऽन्याधीनप्रकाशः; स्वयंप्रकाशत्वात् । **चैतन्यस्वभावता** हि स्वयंप्रकाशता । यः प्रकाशस्वभावः सोऽनन्याधीनप्रकाशो, दीपवत् । न हि दीपादेः

न्याधीनत्वात्, स्वरूपलाभे सति ज्ञप्तित्वादिसंभवाच्च सर्वं तदधीनमित्यर्थः । अतो यत्संबन्धाद्यत्ता सत्ता तत्संबन्धवियोगे ज्ञप्तिमत्त्वेव नेत्याह—**स्वसंबन्धेति** । घटकरकाकाशदृष्टान्तव्यावृत्त्यर्थं विषयाश्रयसंबन्धस्य सत्ताहेतुत्वे दृष्टान्तमाह—**छेत्तुरिति । छेदनादेरिति । आदि**शब्देन सत्ता, तत्फलं, द्वैधीभाव इत्यादि विवक्षितम् । एवं प्रत्यक्षविरोधात्, असिद्धत्वात्, विपरीतसाधकत्वात्, सत्प्रतिपक्षत्वाच्च-संविदात्मत्वानुपपत्तेः, श्रुत्यर्थापत्त्या चाहमर्थात्मत्वमाह—**अत इति** । पूर्वोत्तरहेतूनामयं प्रतिज्ञा । श्रुतिस्मृतिसूत्राणि दर्शयति—**विज्ञातारमिति** । ज्ञातव्यस्यात्मनो ज्ञातृत्वमुक्तं 'विज्ञातारमरे केन विजानीया'दिति । ज्ञातृत्वस्य स्वाभाविकतया मुक्तावपि विज्ञातृत्वमस्तीति दर्शयति—**जानात्येवेति । ज्ञेऽत एवे**त्यत्र ज्ञशब्दनिर्दिष्ट आत्मेति ज्ञापनार्थं **नात्मा श्रुतेरिति** सूत्रमुपात्तम् । तया अनित्यतया अभ्युपेतस्याहमर्थस्य नित्यत्वकथनमपि तस्यैवात्मत्वसाधकमिति च ज्ञापनार्थम् । **अतो नात्मेति** संविदात्मत्वप्रतिक्षेपनिगमनात्—पूर्वोक्ताहमर्थात्मत्वप्रतिज्ञायां, संविदात्मत्वप्रतिक्षेपे च यथायथमुक्तहेतवोऽनुसंधेयाः ॥

दूषणान्तरं व्याहतिरप्यस्तीत्याह—**अहंप्रत्ययेत्यादिना । अहंप्रत्ययसिद्ध इति । सिद्ध**शब्देन स्वतःसिद्धिः सूचिता, अत एव अन्यत्र **युष्मत्प्रत्ययविषय** इत्युक्तम् । **अहंप्रत्ययसिद्धो हीति हि**शब्देन, **अस्मदर्थं युष्मदर्थं**शब्दतश्च 'युष्मदस्मत्प्रत्ययगोचरयो'रिति तद्भिन्नप्रसिद्धिं दर्शयति । ज्ञानमेव स्वयंप्रकाशं तद्व्यतिरिक्तत्वादहमर्थोऽन्याधीनप्रकाशः, अतो नात्मेति शङ्कायां—हेतोरसिद्धिमभिप्रयन्नहमर्थस्य प्रकाशान्तरनैरपेक्ष्यं प्रतिजानीते—**न चासाविति** । कुत इत्यत्राह—**स्वयंप्रकाशत्वादिति । प्रकाशो** व्यवहारानुगुण्यम् । स्वत एव व्यवहारानुगुण्यशक्तियुक्तत्वादहमर्थः प्रकाशान्तरनिरपेक्ष इत्यर्थः । तत्र कथमित्यत्राह—**चैतन्यस्वभावता हि स्वयंप्रकाशतेति । चेतना** ज्ञानं तद्भावश्चैतन्यं—ज्ञानत्वं तत्स्वभावत्वं, ज्ञानत्वगुणकत्वेत्यर्थः । ज्ञानत्वमेव हि ज्ञानस्य स्वयंप्रकाशत्वं, तद्वदत्रापि ज्ञानत्वं प्रामाणिकं चेत्तदेव स्वयंप्रकाशत्वं भवतीत्युक्तं भवति । अहमर्थस्य चैतन्यस्वभावत्वे श्रुति प्रमाणं वक्ष्यंस्तदनुग्राहकतर्कमुपन्यस्यति—**यः प्रकाशस्वभाव इत्यादिना** । आत्मदीपधर्मभूत-ज्ञानप्रभयोः साक्षाद्वा, प्रणाल्या वा यादृशं स्वव्यवहारानुगुण्यं तादृशं व्यवहारानुगुण्यमिह **प्रकाश**शब्देन विवक्षितम् । **दीपस्य** तमोविरोधरूपमौज्ज्वल्यं **प्रकाशः, ज्ञानस्य** तु स्फुरणम् । **यस्तत्स्वभावः** तद्धर्मकः—स्वव्यवहारानुगुण्यापादनशक्तियुक्तः सोऽनन्याधीनप्रकाशः, स्वधर्मनिरपेक्षप्रकाश इत्यर्थः । स्वप्रकाशस्वभावत्वासिद्धिर्न शङ्कनीया; यथा प्रभाश्रयस्य दीपस्यौज्ज्वल्यं प्रत्यक्षसिद्धं, तथा ज्ञातुरपि स्वत एव स्वव्यवहारानुगुण्यस्य वक्ष्यमाणश्रुतिस्वारस्यावगतत्वात् । प्रकाशस्वभावस्य **स्वधर्मभूत**प्रकाशानपेक्षप्रकाशत्वमुपपन्नमित्येतावदेव ह्युच्यतेऽनेन ग्रन्थेन ॥ अथ चक्षुर्ग्राह्यत्वे सति प्रभान्यतिरिक्तत्वादीपो घटादिवत्प्रभाबलनिर्भास्य इति दृष्टान्तस्य साध्यवैकल्यमाशङ्क्याह—**न हीति** । नच चक्षुर्ग्राह्यत्वे सति प्रभान्यत्वाद् घटादिरिव दीपः प्रभाऽवभास्यः; अन्धकारे व्यभिचारात् । अतो न दीपस्य प्रभापेक्षेत्यभिप्रायः । **अप्रकाशत्वम्, अन्याधीनप्रकाशत्वं चेति** । स्वयमौज्ज्वल्यधर्मकत्वाभावः, तत्कृतप्रकाशान्तरसापेक्षत्वं च नास्तीत्यर्थः । अर्थस्थितिं वक्तुमाकाङ्क्षा दर्शयति—**किं तर्हीति** । उत्तरमाह—**दीप इति** । दीपो न केवलं स्वात्मानमेव प्रकाशयति, अपि तु **स्वपरिकरेणान्यानपि** प्रकाशयतीत्यतिशयमाह—**अन्यानपीति** । एवं वार्थः—दीपः प्रभानिरपेक्षप्रकाशश्चेत्प्रभावद्विषयानपि प्रकाशयेदित्यत्राह—**अन्यानपीति** । विषयप्रकाशनक्षमोऽपि स्वरूपस्य क्वाचित्कतया विषयसंबन्धाभावात् स्वरूपेण न प्रकाशयति, किं तु विषयसंबन्धिन्या स्वपरिकरभूतया प्रमयेत्यर्थः । 'यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रवि' रित्यादिनिर्देशोऽभिप्रेतः । यद्वा, अनुमानविवक्षयाह—**चैतन्यस्वभावता हीति । चैतन्यस्वभावता** ज्ञानधर्मकत्वम् । एतदेव हि स्वयंप्रकाशत्वम् । ज्ञानधर्मकत्वात् स्वयंप्रकाशत्वम् इत्युक्तं भवति । यथा धूमवत्त्वं ह्यग्निमत्त्वमित्युक्ते धूमवत्त्वादग्निमत्त्वमित्युक्तं स्यात्, तद्वत् । अयं चान्वयी हेतुः । व्याप्तिं दर्शयति—**य इति । प्रकाशस्वभावः** प्रकाशधर्मकः । यो धर्म्यन्तरापरोक्षावभासे साक्षाद्वा, परम्परया वा भासमानतयैव हेतुः स **इहानन्याधीनप्रकाश**शब्दविवक्षितः । रूपितत्समवेतार्थ-

---

१ अभासमानं ।

स्वप्रभावलनिर्भासितत्वेन अप्रकाशत्वम्, अन्याधीनप्रकाशत्वं च। किं तर्हि, दीपः प्रकाशस्वभावः स्वयमेव प्रकाशतेऽन्यानपि प्रकाशयति प्रभया। एतदुक्तं भवति—यथैकमेव तेजोद्रव्यं प्रभाप्रभावद्रूपेणावतिष्ठते। यद्यपि प्रभा प्रभावद्रव्यगुणभूता, तथापि तेजोद्रव्यमेव, न शौक्ल्यादिवद्गुणः; स्वाश्रयादन्यत्रापि वर्तमानत्वात्, रूपवत्त्वाच्च। शौक्ल्यादिधर्मवैधर्म्यात्, प्रकाशवत्त्वाच्च—तेजोद्रव्यमेव, नार्थान्तरम्। प्रकाशवत्त्वं च—स्वस्वरूपस्यान्येषां च प्रकाशकत्वात्। अस्यास्तु गुणत्वव्यवहारो नित्यतदाश्रयत्व-तच्छेषत्वनिबन्धनः। न चाश्रयावयवा एव विशीर्णाः प्रचरन्तः प्रभेत्युच्यन्ते; मणिद्युमणिप्रभृतीनां विनाशप्रस-

---

चाक्षुषत्वनिमित्तस्य रूपस्य, स्वाश्रयेतरद्रव्यानुमापकधूमादेश्च प्रकाशत्वव्युदासाय **धर्म्यन्तरा-परोक्षशब्दौ**। इन्द्रियव्यवच्छेदार्थो **भासमान**शब्दः। पक्षसपक्षयोरनुगतत्वाय **साक्षाद्वा, परम्परया** वेत्युक्तम्। ज्ञाता स्वधर्मभूतप्रकाशनिरपेक्षसिद्धिः; प्रकाशधर्मकत्वात्, दीपवदित्यनुमानशरीरम्। **भासमानतया, साक्षाद्वा, परम्परया वा धर्म्यन्तरापरोक्षावभासहेतुधर्मकत्वा**दिति—हेतुवाचिशब्दार्थः। दीपस्य स्वधर्मभूतप्रभानपेक्षप्रकाशत्ववत्, ज्ञातुरपि स्वधर्मभूतज्ञाननिरपेक्षप्रकाशत्वं सिद्धमिति—पक्षधर्मतावलात्स्वयंप्रकाशत्वसिद्धिः। दृष्टान्ते साध्यान्वयं दर्शयति—**नहीति**। साधनान्वयं दर्शयति—**अन्यानपीति**। अनुमानपरत्वादपि ग्रन्थस्य श्रुत्यनुग्राहकतर्कपरत्वं युक्तम्; उत्तरत्र **'तथा हि श्रुतय'** इति वक्ष्यमाणत्वात्, पूर्वमनुमानं विवक्षितं चेत् **तथा चेति** हि वक्तव्यम्, उपक्रमे **चैतन्यस्वभावता हि स्वयंप्रकाशते**ति समानाधिकरणनिर्देशस्वारस्याच्च। पञ्चम्यर्थत्वे हि स्वारस्यं भज्यते। निगमने च **चिद्रूपता हि स्वप्रकाशते**त्युक्तं, तत्र **चिद्रूप**शब्दो ज्ञानस्वरूपत्वपरः, न तु ज्ञानधर्मकत्वपरः; अनन्तरपूर्वग्रन्थे चिद्रूप एव चैतन्यगुण इति ज्ञानधर्मकत्वस्य पृथगुक्तत्वात्। एवं निगमनग्रन्थे स्वयंप्रकाशतापदसमानाधिकरणस्य चिद्रूपताशब्दस्य ज्ञानस्वरूपतापरत्वदर्शनात्, पूर्वमपि स्वयंप्रकाशतापदसमानाधिकरणस्य **चैतन्यस्वभावता चे**ति पदस्य ज्ञानस्वरूपतापरत्वस्य समुचितत्वाच्च—**चैतन्यस्वभावते**त्यादिभाष्यं श्रुत्यनुग्राहकतर्कपरम्। एवमनुग्राहकतर्कस्य श्रौतत्वे सत्यनुमानमप्यर्थसिद्धं; ज्ञानधर्मकत्वज्ञानस्वरूपतोक्तेः, एकजातीयद्रव्ययोर्नियतधर्मधर्मिभावे प्रभाप्रभावदृष्टान्तोक्तेश्च। **इत्यहमर्थात्मत्वसमर्थनम्॥**

ज्ञानस्य द्रव्यत्वे द्वयोर्ज्ञानयोर्नियमेन धर्मधर्मिभावो नोपपद्यते; अन्यत्रादर्शनात्, गुणत्वे तु न ज्ञानाश्रयत्वसंभवः; गुणानामगुणत्वात्, न च द्रव्यत्वेऽपि नियताश्रयाश्रयिभावः प्रभाप्रभावतोदेश्यत इति वाच्यं; प्रभायाविशीर्णदीपावयवत्वादित्याशङ्क्याह—**एतदुक्तमिति**। यथैकमेव तेजोद्रव्यं प्रभाप्रभावद्रूपेणावतिष्ठते, एवमात्मा चिद्रूप एव चैतन्यगुण इति। **यथा**शब्दस्योत्तरत्रान्वयः। प्रथमं प्रभाया विशीर्णावयवान्यत्वं प्रतिजानीते—**एकमेवेति। एकं** सजातीयम्। नियतधर्मस्य कथं द्रव्यत्वमित्यत्राह—**यद्यपीति। गुणभूता** परतन्त्रभूता, अयुतसिद्धविशेषणभूतेत्यर्थः। **तेजोद्रव्यमेवेति** प्रतिज्ञातद्रव्यविशेषत्वसिद्ध्यर्थं प्रथमं द्रव्यत्वमुपपादयति—**स्वाश्रयादिति**। द्रव्यत्वमस्तु तत्रापि तेजस्त्वे किं प्रमाणमित्यत्राह—**प्रकाशवत्त्वादिति। प्रकाश**स्तमोविरोध्याकारविशेषः औज्ज्वल्यम्। प्रकाशवत्त्वमुपपादयति—**प्रकाशवत्वं चेति। स्व**विषयपरविषयज्ञानविरोधितमोनिरसनरूपकार्यदर्शनादित्यर्थः। तर्हि कथमस्या गुणत्वव्यवहार इत्यत्राह—**अस्या इति। तु**शब्दः शौक्ल्यादिवैषम्यपरः॥

अथ विशीर्णावयवानां प्रभात्वं प्रतिक्षिपति—**नचेति**। कुत इत्यत्राह—**मणीति**। प्रतिक्षणविनाशप्रसङ्गादित्यर्थः। तदभ्युपगमे मण्यादयुनपलम्भप्रसङ्गपरिहाराय—प्रतिक्षणोत्पत्तिरभ्युपेत्या, प्रतिक्षणोत्पत्तिविनाशाभ्युपगमश्चानुपपन्नः; दीपस्येवोत्पत्तिविनाशसाम्यनुवृत्त्यभावात्, तदभावेऽपि तेजस्त्वसामान्यादीप इव प्रत्यभिज्ञाबाधेन प्रतिक्षणविनाशादिकल्पने सत्त्वद्रव्यत्वादिभिर्घटादावपि क्षणिकत्वप्रसङ्ग इति भावः। रत्नेषु क्षणिकत्वं रत्नशास्त्रविरुद्धं; कालविशेषे तदुत्पत्त्याद्यवगतेः, आदित्यादिषु च क्षणिकत्वं श्रुतिविरुद्धं; 'सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्, नाभीषोमौ न सूर्यं' इति कालविशेषे तदुत्पत्तिविनाशावगतेः। नच सूर्यादिसृष्टिप्रलयपरवाक्यानां संतत्युपक्रमोच्छेदपरत्वं वाच्यं; रत्नसूर्यादिमात्रक्षणिकत्वे प्रमाणाभावात्। तेजस्त्वं तु तेजःपरमाणूनिच्छद्भिर्नै हेतुतया वाच्यं; तेजःपरमाणुषु व्यभिचारात्सत्त्वादिभिः क्षणिकत्वे जगत्क्षणिकत्वं स्यादित्युक्तम्। ननु—कर्पूरादीनां दूरोपलब्धगन्धानां गन्धाश्रयभूतावयवविशरणस्यावर्जनीयत्वात्, उत्तरकालोपलम्भाच्च—प्रतिक्षणोत्पत्तिविनाशावभ्युपगन्तव्यौ, तद्वन्मण्यादिष्वपीति—नैवं; समुद्गकसंपुटादिनिवातदेशनिहितदृढपिहितघनसारादेर्दूरे गन्धोपलम्भाभावादाश्रयावयवविशरणाभावेन यथापूर्वं स्थित्युपलम्भोपपत्तेः—न प्रतिक्षणोत्पत्तिविनाशौ कल्प्यौ। सवातदेशस्थघनसारादीनां दूरोपलभ्यमानगन्धानामल्पावयवविशरणमस्त्येव, अवयविनि च सूक्ष्मपरिक्षयो विद्यत एव, तुलया परीक्षणेऽप्यल्पाल्पपरिमाणापकर्षदर्शनात्, अतः प्रतिक्षणमवयवान्तरोपनिपातविश्लेषहेतुकोत्पत्तिविनाशौ न कल्प्यौ, कल्पनेऽपि परितः

---

१ प्रकाशित्वम्।

ङ्गात् । दीपेप्यवयविप्रतिपत्तिः कदाचिदपि न स्यात्: न हि विशरणस्वभावावयवा दीपाश्चतुरङ्गुलमात्रनियमेन पिण्डीभूता ऊर्ध्वमुद्गम्य ततः पश्चाद्युगपदेव तिर्यगूर्ध्वमधश्चैकरूपा विशीर्णाः प्रचरन्तीति शक्यं

केषांचिदवयवानामुपलभ्यमानगन्धाश्रयत्वेनोभयवादिसंप्रतिपन्नानामेव स्थितिमात्रं कल्प्यं, तावता गन्धोपलब्ध्युपपत्तेः, अनेकधर्मानुपपत्तिनाशापरिहृष्टदुभयसामञ्जस्यकल्पने गौरवाच्च । यद्वा, घ्राणस्यापि चक्षुष इव रश्मिद्वारा संबन्धाद्दूरस्थपदार्थगतगन्धग्राहित्वं कल्प्यं; गौरवाभावात्, न केवलं कल्प्यं रश्मिमत्त्वम् । उक्तं च भारते—'न ह्यात्मा शक्यते द्रष्टुमिन्द्रियैः कामगोचरैः । प्रवर्तमानैरनियतैर्दुर्धरैरकृतात्मभिः ॥ तेषां तु मनसा रश्मीन् यदा सम्यङ् नियच्छति । तदा प्रकाशते ह्यात्मा दीपो दीप्यग्निराकृतिं' रिति । इन्द्रियाणां पञ्चीकृतभूताप्यायनैर्वायुतेजःप्रभृतिभिः संबन्धाद्रश्मिमत्त्वं चोपपद्यते । नन्वभ्यातपनमसिलशिलादेर्गौष्ण्यतारतम्योपलम्भोऽभ्यातपावयवसंक्रान्तिं विना नोपपद्यते; सलिलादेः खत औष्ण्याभावात्, निराश्रयधर्मसंक्रमणायोगाच्च, औष्ण्याश्रयभूताभ्यातपावयवस्य संक्रान्तिरभ्युपेत्या, एवम् अवयवसंक्रान्तिश्च विशरणेन विना नोपपद्यतेः गल्गरणां रश्मीनां चरणतलानामिव कथं विशरणेन विना क्वचित्संक्रमः, अवयवतारतम्याच्चौष्ण्यतारतम्यमिति: उच्यते—अग्निसंपर्कोष्ण्यावयवसंक्रान्त्यैवौष्ण्योपलम्भः, सलिलादौ संक्रामन्तोऽभ्यवयवा एव प्रभेति न वाच्यं; प्रदीपप्रभयाऽऽहोगात्रसंतृप्तेऽपि सलिलभूतलादावौष्ण्यानुपलम्भात्, आतपनप्रभेष्वपि न किरणविशरणादवयवसंक्रमः; तुहिनकणानामिव रविकिरणोपात्तमुक्तानामभ्यवयवानां संक्रमणादुष्णोपलम्भोपपत्तेः । न चात्र कल्पकमन्वेष्टव्यं, नापि कल्पनागौरवं प्रसज्यति; आगमसिद्धत्वादस्यार्थस्य, तथाहि मान्स्ये पुराणे कथ्यते—'वसन्ते ग्रीष्मके रश्मिशतैः संतपति त्रिभिः । शरदपि च वर्षासु चतुर्भिः संप्रवर्षति ॥ हेमन्ते शिशिरे चैव हिममुत्सृजति त्रिभि'रिति । यथा वर्षासु, हेमन्ते च रविकिरणमुक्ताः सलिलकणाः, तुहिनकणाश्च न विशीर्णकिरणावयवाः, किंतु किरणोपात्तविमुक्ता आप्यावयवा एव, एवं ग्रीष्मेषु रविकिरणजन्यं संतापनं न तद्विशीर्णावयवकार्यं, किंतु तदुपात्तमुक्ताभ्यवयवकार्यमिति प्रतीयते, तथा—'अग्निं वा वाऽऽदित्यः सायंप्रविशति उदन्तं वा वाऽऽदित्यमग्निरनुसमारोहती'ति श्रूयते, अत्र चादित्यतिरोधानदर्शनावच्छिन्नकालविशेषपरौ **सायं-प्रातः**-शब्दौ; कालस्य सायंभाव-प्रातर्भावौ रविविप्रकृष्टसन्निकृष्टतत्तद्देशविशेषवर्तिपुरुषापेक्षया सर्वदोपपद्येते इति । अयमर्थो भुवनकोशे स्पष्टतरः । ततश्च **प्रविशती**त्यनेनाग्नावादित्यस्य व्याप्तिरुच्यमाना दूरस्थितस्य स्वरूपेण नोपपद्यतेति किरणद्वारा भवति । **अग्निरनुसमारोहती**त्यनेन अभ्यवयवानामादित्येनोपादीयमानत्वमुच्यते । न चाभ्यधिष्ठातृदेवतागेहणपरमिदं वाक्यं; 'तस्मादहम एवाग्नेर्दिवा दद्दश' इत्यनन्तरवाक्येनाग्नेरादित्योपसर्पणनिमित्ततेजोमान्द्यकथनात्, अन्यथा सायं-प्रातःसमययोः सर्वदा संभवेन अग्नेरादित्ये सर्वदा रोहणम्, अग्नावादित्यस्य सर्वदावरोहणं च प्रसज्येत ततश्चाभ्यादित्ययोः स्थानविनिमयेन सर्वदा स्थितिरुक्ता स्यात्, सा च प्रमाणान्तरविरुद्धा अतश्चादित्यस्याग्नौ किरणद्वारा व्याप्तिः, किरणैरभ्यवयवोपादानं च **वाक्यद्वयोक्तम्** । अतश्चोपात्ताभ्यवयववर्षेण तापनं मान्स्योक्तम्; उत्सर्जनप्रकरणस्वारस्यात् । अतस्तुहिनकणानामिव रविकिरणमुक्तानामग्नेरवयवानां **विशीर्णकिरणावयवत्वलाभाद्रविकिरणेषु**, तन्मण्डले च प्रतिक्षणं विनाशोत्पत्तिकृत्तिरनुपपन्ना, अतो न विशीर्णावयवाः प्रभाः ॥

दूषणान्तरमाह—**दीपेति** । अवयविप्रतिपत्त्यनुपपत्तिमुपपादयति—**नहीति** । दीपः किं विशरणस्वभावः, उत स्थिरस्वभावः । विशरणस्वभावत्वे—पिण्डीभावो मूर्तद्रव्यप्रतिबन्धनिबन्धनः स्यात्, स्थिरस्वभावत्वे—विशरणं मूर्तद्रव्यप्रतिहतिहेतुकं स्यात्, अत्रोभयमनुपलम्भपरगाहतम् । विशरणस्वभावत्वे पिण्डीभावो वायुनोपपद्यत इति चेत्, तर्हि निवाते **पिण्डीभावो न स्यात्** । स्निग्धसूक्ष्मवायुना पिण्डीभावश्चेत्, विशरणं न स्यात् । तच्च सूक्ष्मवायुना चेत्, एकस्य विरुद्धस्वभावद्वयायोगात्—पिण्डीभावविशरणहेतुभूतवायुद्वयमभ्युपेत्यम् । तयोर्मिथः प्रतिघातुकत्वादन्यतरविगमे—पिण्डीभाव एव वा, विशरणमेव वा स्यात्, तत्परिहाराय परस्परान्तरितविरुद्धस्वभाववायुद्वयपरम्परया सन्निधिविगमपरिकल्पने गौरवं स्यात्, तत्परिकल्पनेऽपि तिर्यग् गल्गरणां वाय्ववयवानां नोदनमात्रहेतूनां परितः प्रतिबन्धकलाभयोगात् पिण्डीभावो न स्यात् । ननु—**श्लेष्मद्रवीभूतपार्थिवावयवसंदंशात्पिण्डीभावः**, ननस्नदवयवगतस्निग्धत्वापगमेन संदंशकलाभावादग्न्यवयवविशरणमित्याह—**नहि विशरणेति** । यद्यग्न्यवयवा उद्गमनस्वभावाः, तर्हि विशरणे तिर्यग्गमनं स्यात्, यदि ते तिर्यग्गमनस्वभावाः, तर्हि प्रथममूर्ध्वगतिर्न स्यात्, एकजातीयद्रव्यस्योपाधिना विना विरुद्धस्वभावत्वायोगात्, उपाधिश्च न दृश्यते, प्रदीपप्रभयोर्भिन्नावयवित्वे तु—**विरुद्धस्वभावत्वमुपपद्यते** । किंच चतुरङ्गुलादिपरिमाणतारतम्यनियामकोऽपि नास्ति, विशरणे च—पार्श्वेऽपि **विशरणं संभवति**; समन्ततो युगपद्विशरणे नियामकाभावादित्यभिप्रायः । किंच—विशीर्णानां चावयवानां पांसूनामिव ऋजुप्रसरणविक्षेपे च न हेतुः; प्रसरणस्यार्जवनियमश्च तिरोधायकं पदार्थं प्रति ऋजुदेश एव छायायोगादवगम्यते, छायावैपुल्यं तु निवार्यमाणरश्मीनां पृथग्भवनकृतं, नानार्जवकृतं; छायाकौटिल्यं तु तिरोधायककौटिल्यकृतं, न तु प्रसरणानार्जवकृतं, तच्च ऋजुप्रसारिलसाधकम् । विशीर्णावयवत्वे रेणूनामिव पवनानुत्सार्यमाणत्वं च न घटते; प्राचीनजालकनिष्क्रान्ता हि प्रभा

२ "प्रभयोद्गिरा" ।

वक्तुम्। अतः सप्रभाका एव दीपाः प्रतिक्षणमुत्पन्ना विनश्यन्तीति—पुष्कलकारणक्रमोपनिपातात्, तद्विनाशे विनाशाच्चावगम्यते। प्रभायाः स्वाश्रयसमीपे प्रकाशाधिक्यम् औष्ण्याधिक्यमित्याद्युपलब्धिव्यवस्थाप्यम् —अश्म्यादीनामौष्ण्यादिवत्। एवमात्मा चिद्रूप एव चैतन्यगुण इति। चिद्रूपता हि स्वयंप्रकाशता। तथा हि श्रुतयः—**'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव। एवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघनः'** (बृ. ४।५।१३), **'विज्ञानघन एव'** (बृ. २।४।१२), **'अत्रायं पुरुषः स्वयंज्योतिर्भवति'** (बृ. ४।३।९), **'न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते'** (बृ. ४।३।३०), **अथ यो वेदेदं जिघ्राणीति स आत्मा'** (छा. ८।१२।४), **'कतम आत्मा योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः'** (बृ. ४।३।७), **'एष हि द्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः'** (प्र. ४।९), **'विज्ञातारमरे केन विजानीयात्'** (बृ. २।४।१४), **'जानात्येवायं पुरुषः। न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्'** (छा. ७।२६।२), **'स**

दक्षिणानिलेन नोत्सार्यते; अन्यथा रजसामपि तैत्रानोदनं प्रसजेत्, जालकनिष्क्रान्तप्रभायाः पवनानुत्सारितत्वं ततः परस्मिन् भित्त्यादौ प्रभासंसर्गादवगम्यते, अतो धनुष्यातताया मौर्व्या इव प्रभाया न विशीर्णावयवत्वमिति। ततः किमित्यत्राह—**अतः सप्रभाका एव दीपाः प्रतिक्षणमुत्पन्ना इति।** तेजस्त्वेन मण्यादिविनाशाभ्युपगमे अतिप्रसङ्गात्, विशरणस्वीकारे—पिण्डीभावयुगपद्विध्वग्विशरणेनुप्रसरणाद्यनेकनियमव्यवस्थापकाभावात्, यथादृष्टाभ्युपगमे विरोधाभावाच्च —सप्रभाका एव दीपाः प्रतिक्षणमुत्पन्ना इत्यर्थः। तर्हि कथं प्रतिक्षणोत्पत्तिविनाशाविति्यपेक्षायां—यथा मण्यादीनां प्रतिक्षणविनाशो न प्रसजति, तथा दीपक्षणिकत्वे हेतुद्वयमाह—**पुष्कलकारणक्रमोपनिपातात्, तद्विनाशे विनाशाच्चेति।** पृथक्स्थितदण्डचक्रादिव्यावृत्त्यर्थं **पुष्कल**शब्दः। वर्त्मवयवाग्निसंयोगस्य दीपसामग्रीत्वं प्रथमवर्त्मवयवाग्निसंयोगे दृष्टम्। नच—प्रथमावयवाग्निसंयोगस्यैव कारणत्वं शङ्कनीयं; चरममध्यमावयवयोरप्यग्निसंयोगे सति दीपोत्पत्तिदर्शनात्, अतः प्रत्यवयवमग्निसंयोगात्पुष्कलकारणपरम्परा दृष्टेति प्रत्यवयवमग्निसंयोगाद्दीप उत्पद्यत एव, तत्र प्रतिक्षणमुत्पत्तौ सत्यां—युगपदनेकदीपानुपलम्भाद्विनाशोऽपि सिद्धः। प्रतिक्षणविनाशस्य पृथगनुमापकमुच्यते—**तद्विनाशे विनाशाच्चेति।** वर्त्मवयवविनाशस्य दीपविनाशसामग्रीत्वं चरमवर्त्मवयवविनाशे दृष्टम्, एवं विनाशकारणानुवृत्तिदर्शनात् प्रत्यवयवविनाशं दीपो विनश्यत्येव,एवमुत्पत्तिविनाशसामग्र्यनुवृत्तिभ्यां प्रतिक्षणं तावदनुमीयते इत्यर्थः। प्रभा विशीर्णावयवा न चेत्, दीपसमीपे तस्या औष्ण्याधिक्यादिकं कथं, विशरणपक्षे ह्यवयवबाहुल्यवैरल्याभ्यामौष्ण्याधिक्यमान्द्यादिकमुपपद्यत—इत्यत्राह—**प्रभाया इति। प्रकाशाधिक्यमौष्ण्याधिक्यमित्यादीति। आदि**शब्देनाश्रयविप्रकृष्टदेशे प्रकाशमान्द्यम्, औष्ण्यमान्द्यं च विवक्षितम्। उपलब्धिव्यवस्थाप्यकले दृष्टान्तमाह—**अश्म्यादीनामिति।** उक्तं दार्ष्टान्तिकेऽतिदिशति —**एवमिति। चिद्रूप एवेति। रूप**शब्दो धर्मिस्वरूपपरः। ततः किं स्वप्रकाशत्वमेवेत्यपेक्षायां चिद्रूपत्वं विवृणोति —**चिद्रूपता हीति।** अनेन वक्ष्यमाणश्रुतिवाक्ये **ज्ञानादि**शब्दो व्याख्यातो भवति॥

एवमनुग्राहकतर्कमुपन्यस्य प्रमाणमाह—**तथा हि श्रुतय इति। स यथा सैन्धवघन इति। अनन्तरः** अन्तरङ्गव्यतिरिक्तः। **अबाह्यः** बहिरङ्गव्यतिरिक्तः। एवं व्यतिरेकनिर्देशेन निःशेषग्रहणं कृतं, तदेवाह—**कृत्स्न इति।** दार्ष्टान्तिकविषयोऽ**बाह्य**शब्दो धर्मिपरः, **अनन्तर**शब्दो धर्मपरः। **कृत्स्न**शब्दस्तयोरेकदेशजडत्वशङ्काव्युदासार्थः। अत्र सर्वत्रैकरूप्यमेव दृष्टान्तोपजीव्यं, न त्वन्यत्। दृष्टान्त-दार्ष्टान्तिकविषयवाक्यद्वयेऽप्यनन्तरोऽबाह्य इत्युक्तम्। शरीरित्वावस्थायामपि ज्ञानात्मकत्वपरं वाक्यमुपादत्ते—**विज्ञानघन एवेति। घन**शब्दोक्तनैरन्तर्यस्य जडांशमिश्रत्वं व्यावर्तयत्येवकारः। ज्ञानत्वं नाम-स्वयंप्रकाशत्वमिति ज्ञापनार्थं**मत्रायमिति** वाक्योपादानम्। धर्मधर्मिभावं ज्ञापयति—**न विज्ञातुरिति।** ज्ञातृसंबन्धिज्ञानस्य नित्यत्वे कथिते ज्ञानमात्रस्य नित्यत्वशङ्काव्युदासार्थं ज्ञातुरेवात्मत्वं दर्शयति—**अथ य इति।** एकवाक्येन ज्ञानगुणकत्व-स्वयंप्रकाशत्वयोः सहप्रतिपादकं वाक्यमाह—**कतम इति।** ज्ञानगुणकत्व-ज्ञानस्वरूपत्वप्रतिपादकवाक्यमाह—**एष हीति।** ज्ञातव्यस्य निष्कृष्टात्मस्वरूपस्य ज्ञातृत्वमाह—**विज्ञातारमिति।** अनेन ज्ञातृत्वं स्वाभाविकमिति फलितम्। न केवलं संसृतिदशायां, मुक्तावपि ज्ञातृत्वं ज्ञापयति—**जानात्येवायमिति।** अवधारणासंकोचान्मुक्तावपि ज्ञातृत्वं सिद्धम्। मुक्तौ ज्ञाननिषेधश्रुतीनां विषयविभागं दर्शयति—**न पश्य इति, स उत्तम इति च।** पुरुषं

---

१ तत्र नोदनं। २ °व्यवस्थापकत्वे।

उत्तमः पुरुषः, नोपजनं स्मरन्निदं शरीरम्' (छा. ८।१२।३), **'एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति'** (प्र. ६।५), **'तस्माद्वा एतस्मान्मनोमयात्। अन्योन्तर आत्मा विज्ञानमयः** (तै. २।४।१) इत्याद्याः । वक्ष्यति च **'ज्ञेत एव'** (ब्र. सू. २।३।१९) **इति । अतः स्वयंप्रकाशोऽयमात्मा ज्ञातैव, न प्रकाशमात्रम् । प्रकाशत्वादेव कस्यचिदेव भवेत्प्रकाशः प्रदीपादिप्रकाशवत् । तस्मान्नात्मा भवितुमर्हति संवित् । संविदनुभूतिज्ञानादिशब्दाः संबन्धिशब्दा इति च शब्दार्थविदः । न हि लोकवेदयोर्जानात्यादेरकर्मकस्य, अकर्तृकस्य च प्रयोगो दृष्टचरः । यच्चोक्तम्—**

प्राप्तस्य मुक्तस्य ज्ञातृत्वेऽनुवर्तमान एव देहेन्द्रियविर्गमं दर्शयति—**एवमिति** । अन्तःकरणोत्तीर्णस्य ज्ञातृत्वमाह—**तस्माद्वा इति** । अस्यार्थस्य सूत्रकाराभिप्रेतत्वमाह—**वक्ष्यति चेति** । पूर्वं सूत्रोपादानमहमर्थात्मकं सूत्रकाराभिमतमिति ज्ञापनार्थम्, अत्रोपादानं ज्ञानगुणकज्ञानस्वरूपत्ववादिनीनां श्रुतीनामविरोधः सूत्रकाराभिमत इति ज्ञापनार्थम् । ज्ञानत्वाज्ज्ञानं न ज्ञानान्तराश्रय इति चेन्, यदि व्याप्यनुरोधेनैवमुच्यते—तर्हि धर्मत्वेन स्वीकार्यं, यदि श्रुतिबलात् स्वातन्त्र्येण स्वीक्रियते—तर्हि श्रुतिबलादेव ज्ञानाश्रयत्वमप्यङ्गीक्रियताम् । नच व्याप्तिविरोधः; धर्मभूतज्ञानत्वप्रयुक्तत्वात् ज्ञानानाश्रयत्वस्य । श्रुत्या ज्ञातृत्व[1]-स्वयंप्रकाशत्वसिद्धिं निगमयति—**अत इति** । ननु—घटमहं जानामीत्यत्र ज्ञानस्य ज्ञातृसंबन्धः प्रतीयत इत्यभ्युपेत्यम्, अन्यथा स्वज्ञान-परज्ञानविभागस्य दुर्ग्रहत्वप्रसङ्गात् स्वसंबन्धितया प्रतीतं ज्ञानं संबन्धाप्रतीतौ कथं स्वज्ञानमिति व्यवह्रियते, अतः स्वसंबन्धः प्रतीयत एव, तत्प्रतीतिर्न तावदहमर्थाद्भवति; अहमर्थः प्रत्यक्त्वेन, अनुकूलत्वेन, एकत्वेन च स्वतो भाति, न ह्यर्थान्तरमहमर्थो विषयीकर्तुमलमिति भवतां प्रक्रिया, अतो धर्मभूतज्ञानेनैव संबन्धप्रतीतिः, संबन्धश्च संबन्धिभ्यां विना न प्रतीयत इति ज्ञातृ-ज्ञानयोरपि संबन्धप्रकाशकज्ञानान्तरवेद्यत्वं स्यात्, ततः स्वतोऽवभासः ज्ञानान्तरेणावभासस्येत्यवभासद्वयाभावात्—ज्ञानान्तरेणैव प्रकाश्यतया स्वप्रकाशत्वासिद्धेः, ज्ञातुश्च, ज्ञानस्य च जडत्वं स्यात् । किंच-ज्ञानान्तरेण संबन्धप्रतीतिरवश्यंभाविनी चेत्, संबन्धविषयज्ञानेन सह ज्ञातृसंबन्धस्यापि ज्ञानान्तरेण प्रतीत्यवश्यंभावात् संबन्धज्ञानपरम्पराप्रसङ्गः । अवश्यंभावाभावे-सर्वज्ञानेष्वहं जानामीति ज्ञान-ज्ञातृसंबन्धप्रतीतिर्न स्यात्, नैवं; स्वयंप्रकाशप्रत्यक्षेणैव संबन्धप्रतीतेः । नियतविशेषणविशेष्यभावो हि संबन्धः, अहमर्थो विशेष्यतैकस्वभावं स्वात्मानं प्रकाशयति, धर्मभूतज्ञानं च विशेषणतैकस्वभावं स्वात्मानं प्रकाशयति, विशेषणविशेष्यभावस्य परस्परप्रतियोगिकत्वं च ज्ञातृज्ञानयोः सहावभासादेव प्रतीयते । ननु—संबन्धप्रतीतौ संबन्धिनोः सहावभासस्यैकज्ञानगम्यतया विना नोपपद्यत—इति ज्ञातृत्व-ज्ञानयोर्ज्ञानान्तरवेद्यत्वं स्यात्, सुरभि पुष्पमित्यादौ भिन्नसामग्रीवेद्ययोरपि गन्धपुष्पयोः संबन्धप्रतीतिवेलायामेकज्ञानगम्यत्वं हि दृश्यत—इति चेन्; तत्र संबन्धिनोः संबन्धेन सहैकज्ञानगम्यत्वस्य सहावभासप्रयुक्तत्वाभावात् । संबन्धिनोर्जडत्वप्रयुक्तं हि तत्रैकज्ञानगम्यत्वम्, अत्र स्वप्रकाशत्वात्स्वयमेव सहावभासमानयोर्ज्ञातृज्ञानयोर्विशेषणविशेष्यतैकस्वभावलक्षणसंबन्धग्रहो ज्ञानान्तरानपेक्ष उपपद्यते, अतः संबन्धाग्रह-स्वपरज्ञानविभागाभाव-संबन्धज्ञानपरम्पराप्रसङ्गा दूरोत्सारिताः । एवं ज्ञातृत्व-स्वयंप्रकाशत्वोपपादनेन—चिन्मात्रव्यतिरिक्तत्वादिति जडत्वसाधकहेतुर्निरस्तो भवति । ज्ञानव्यतिरिक्तत्वाज्जडत्वं वदता किं स्वयंप्रकाशवस्तुव्यतिरिक्तत्वं हेतुरुक्तः, उत विषयप्रकाशकान्यत्वम् । प्रथमे—साध्यावशिष्टत्वम् । द्वितीये—ब्रह्मण्यनैकान्तिकं, श्रुत्यादिबाधश्च । अथ साश्रयत्वे तर्कमाह—**प्रकाशत्वादेवेति । प्रकाशत्वात्** विषयेण साक्षात्संबन्ध्य साक्षाद्वा, परम्परया वा ज्ञायमानत्वेनापरोक्षव्यवहारानुगुण्यहेतुत्वादित्यर्थः । अनेन स्वरूपभूतज्ञानेन्द्रियलिङ्गादिव्यावृत्तिः । हेत्वन्तरमप्याह—**संविदनुभूतीति** । संबन्धिशब्दत्वं शब्दस्वभावायत्तमित्याशङ्क्याह—**न हि लोकवेदयोरिति** । यत्रार्थस्वरूपस्यान्यथात्वं दृश्यते तत्र शब्दस्वभावायत्तत्वमाश्रयणीयं—यथा दारा इत्यादिषु बहुत्वादेः, यत्र नान्यथात्वं तत्रार्थस्वभावायत्तत्वमेव—यथा भार्येत्यादावेकत्वादेः, तथा लोकवेदयोः सकर्मकर्तृत्वदर्शनात् अर्थस्वभावायत्तमेव संबन्धिशब्दत्वमित्यभिप्रायः । यद्वा कर्मकर्तृसंबन्धित्वं व्युत्पत्तिनिमित्तमस्तु, न प्रवृत्तिनिमित्तं, तत्तु ज्ञप्तिमात्रमित्याह—**न हि लोकेति** । प्रयोगाधीनं हि प्रवृत्तिनिमित्तान्तरकल्पनं, प्रयोगश्च संबन्धिन्येवार्थे—इति नार्थान्तरकल्पना स्यात् । स्वरूपभूतज्ञानवाचिशब्दानां संबन्धिशब्दत्वं लन्मतेऽप्यनुपपन्नमिति-चेन्; स्वरूपगोचराणां स्वयंप्रकाशत्वे रूढानां ज्ञानादिशब्दानामनुभूत्यादिशब्देभ्यः शब्दान्तरत्वात् । अतः संबन्धिशब्दत्वोपदेशस्तु धर्मभूतज्ञाने सावकाशोऽस्मन्मते, विषयाश्रयसंबन्धिज्ञानस्यैव विषयाश्रयसंबन्धबोधेन निराश्रयत्व-निर्विषयत्वाभ्युपगमात्-लन्मते संबन्धिशब्दनोपदेशो निरर्थक इति भावः । **इति धर्मधर्मिज्ञानसमर्थनम् ॥**

अथाजडत्वसंविदात्मत्वसमर्थनं दूषयितुमनुवदति—यच्चोक्तमिति । अजडत्वं नाम किं स्वसत्ताप्रयुक्तप्रकाशत्वम्,

---

१ °त्वेन । २ धातुः स्वयंप्रका° । ३ ज्ञातृत्वज्ञान° ।

अजडत्वात्संविदेवात्मेति, तत्रेदं प्रष्टव्यम्—अजडत्वमिति किमभिप्रेतम्, स्वसत्ताप्रयुक्तप्रकाशत्वमिति चेत्; तथासति दीपादिष्वनैकान्त्यं, संविदतिरिक्तप्रकाशधर्मानभ्युपगमेनासिद्धिरिति विरोधश्च । अव्यभिचरितप्रकाशसत्ताकत्वमपि सुखादिषु व्यभिचारान्निरस्तम् । यद्युच्येत—सुखादिरव्यभिचरितप्रकाशोप्यन्यस्मै प्रकाशमानतया घटादिरिव जडत्वेनानात्मेति । ज्ञानं किं स्वस्मै प्रकाशते, तदपि ह्यन्यस्मैवाहमर्थस्य ज्ञातुरवभासते, 'अहं सुखी'तिव'ज्ञानाम्यह'मिति । अतः स्वस्मै प्रकाशमानत्वरूपमजडत्वं संविद्यसिद्धम् । तस्मात्स्वात्मानं प्रति स्वसत्तयैव सिध्यन्नजडोऽहमर्थ एवात्मा । ज्ञानस्यापि प्रकाशता तत्सम्बन्धायत्ता । तत्कृतमेव हि ज्ञानस्य सुखादेरिव स्वाश्रयचेतनं प्रति प्रकटत्वम्, इतरं प्रत्यप्रकटत्वं च । अतो न ज्ञप्तिमात्रमात्मा, अपि तु ज्ञातैवाहमर्थः । अथ यदुक्तम्—अनुभूतिः परमार्थतो निर्विषया, निराश्रया च सती भ्रान्त्या ज्ञातृतयावभासते रजततयेव शुक्तिः; निरधिष्ठानभ्रमानुपपत्तेरिति—तदयुक्तम्; तथासत्यनुभवसामानाधिकरण्येनानुभवित्राहमर्थः प्रतीयेतानुभूतिरहमिति—पुरोवस्थितभास्वरद्रव्याद्याकारतया रजतादिरिव । अत्र तु पृथगवभासमानैवेयमनुभूतिरर्थान्तरमहमर्थं विशिनष्टि—दण्ड इव

उताव्यभिचरितप्रकाशसत्ताकत्वम्, उत स्वस्मै प्रकाशमानत्वम्, उत स्वस्मै स्वयंप्रकाशमानत्वम्, उत स्वयंप्रकाशत्वम्—इति पञ्चधा विकल्पमभिप्रेत्याह—**अजडत्वमिति । किमभिप्रेतमिति ।** 'अहं जानामी'ति प्रत्यक्षबाधः **सर्वसाधारणं** दूषणम् । प्रथमं स्वसत्ताप्रयुक्तप्रकाशत्वपक्षं दूषयितुमाह—**स्वसत्तेति ।** स्वसत्ताप्रयुक्तः प्रकाशो यस्येति बहुव्रीहिः । वक्ष्यमाणसिद्धिदूषणोपयोगिभेदज्ञापनार्थं **स्वसत्ताप्रयुक्त**शब्दः । अनैकान्त्यमाह—**तथासतीति ।** स्वपक्षे ज्ञातुरात्मत्वात्सपक्षभूते तस्मिन्, विपक्षे अनात्मनि दीपे च वृत्त्याऽनैकान्त्यं पक्षत्रयवृत्तित्वलक्षणमुक्तं, परपक्षे त्वनियतत्वमेवानैकान्त्यं सपक्षाभावात् । दूषणान्तरद्वयमाह—**संविदतिरिक्तेति ।** संवित्प्रयोजिका, प्रकाशः प्रयोज्य—इति तदतिरेकेणानभ्युपगमा**दसिद्धिः**, अभ्युपगमे निर्विशेषत्व**विरोधः**, इमावसिद्धिविरोधौ विकल्पितसर्वविरःसाधारणावनुसंधेयौ । यद्वा, **विरोधः** पक्षविपक्षयोरेव वर्तमानत्वं; पक्षभूतसंविदि, विपक्षे दीपादौ च वृत्तेः । परमतमात्रपर्यालोचनायां विरोध उक्तः । **अत्र स्वसत्ताप्रयुक्तप्रकाशत्व**मित्यत्र **प्रकाश**शब्देन किं साक्षाद्वा, परम्परया वा व्यवहारानुगुण्यं विवक्षितम्, उत **परम्परयैव,** उत साक्षादेव—इति विकल्पोऽभिप्रेतः । प्रथमं शिरःस्फरदर्शनपर्यालोचनयाऽभिहितयोरनैकान्त्य-विरोधयोरन्यतरेण निरस्तं भवति । द्वितीये त्वसिद्धिः; परम्परयैव व्यवहारानुगुण्यस्य ज्ञप्तावुभयवाद्यनभिमतत्वात् । तृतीये—सत्तातिरिक्तप्रकाशानभ्युपगमनिबन्धनासिद्धिः, निर्विशेषत्वविरोधश्च स्यातामित्यभिप्रायः । द्वितीयपक्षं प्रतिक्षिपति—**अव्यभिचरितेति ।** न व्यभिचरति प्रकाशो यस्य सत्तायां सोऽव्यभिचरितप्रकाशसत्ताकः । प्रयोज्यप्रयोजकत्वाभावेऽपि विद्यमानदशायां सर्वदा प्रकाशमानत्वमित्यर्थः । तस्यानात्मत्वेन संप्रतिपन्नेषु सुखदुःखादिषु व्यभिचार उक्तः, अथ तत्परिहारमुखेन स्वस्मै प्रकाशमानत्वपक्षमुपक्षिपति—**यद्युच्येतेति ।** परिहरति—**ज्ञानं वेति ।** कस्येत्यत्राह—**तदपीति ।** परस्मै भासमानत्वमुपपादयति—**अहमिति ।** तस्मादेवंरूपाजडत्वमसिद्धमित्याह—**अत इति ।** अथ चतुर्थं शिरोदूषयन्नसिद्धिमाह—**तस्मादिति ।** स्वयंप्रकाशपक्षेऽपि स्वप्रकाशत्वं नाम—किं ज्ञानकर्मतामन्तरेण व्यवहारानुगुणत्वम्, उत ज्ञानान्तरनिरपेक्षप्रकाशत्वम्—इत्यऽभिप्रेते विकल्पे, प्रथमं शिर**स्तस्मा**दिति ग्रन्थेन दूषितम् । इतरात्मव्यावृत्त्यर्थं **स्वात्मान**मित्युक्तम् । **स्वसत्तयैव सिध्य**न्नित्यनेन स्वयंप्रकाशत्वमुक्तम् । स्वस्मै स्वयंभासमानत्वमहमर्थस्याधि**कम्** । स्वस्मै स्वयंभासमानस्य स्वयंभासमानत्वमप्यस्तीत्यभिप्रायेण **स्वात्मानं प्रति स्वसत्तयैवेत्युक्तम्** । तेन ज्ञानकर्मतामन्तरेण व्यवहारानुगुणत्वं ज्ञातर्यप्यस्तीति तद्व्यभिचरितं; स्वपक्षेऽनात्मनि ज्ञातर्यपि विपक्षभूते वृत्तेरिति दर्शितम् । ज्ञानान्तरनिरपेक्षप्रकाशत्वं संविद्यसिद्धं; तस्याः स्वरूपभूतज्ञानाधीनत्वात् । अहमर्थस्यैव तदित्यभिप्रायः **स्वसत्तयैवे**त्यनेन सूचितः । तमेव विवृणोति—**ज्ञानस्यापीति ।** तत्संबन्धायत्तत्वमुपपादयति—**तत्कृतमेव हीति ।** ज्ञानस्फुरणस्याश्रयसंबन्धोऽपि सामग्यन्तर्भूत इति भावः । अजडत्वात्संविदात्मत्वासिद्धिं निगमयति—**अत इति । इति संविदात्मत्वनिरसननिगमनम् ॥**

अथाहमर्थस्य भ्रान्तिसिद्धत्वं दूषयितुमनुवदति—**अथ यदुक्तमित्यादिना ।** संविदपि मिथ्या किं न स्यादित्यत्राह—**निरधिष्ठानेति ।** अनुभूतिव्यतिरिक्तापारमार्थ्यसिद्धवत्कारेणायं हेतुरुक्तः । दूषयति—**तदयुक्तमित्यादिना ।** अधिष्ठानसामानाधिकरण्येनाध्यस्तप्रतीतिं दृष्टान्तेनोपपादयति—**पुरोऽवस्थितेति ।** पक्षे तद्विपर्ययं दर्शयति—**अत्रत्विति । पृथ-**

---

१ °भानत्वमेवं रूपम° । २ ज्ञातुरनात्मनि । ३ इह स्वात्म° ।

देवदत्तम् । तथा ह्यनुभवाम्यहमिति प्रतीतिः । तदेवमस्मदर्थमनुभूतिविशिष्टं प्रकाशयन्ननुभवाम्यहमिति प्रत्ययो दण्डमात्रं दण्डी देवदत्त इति प्रत्ययवद्विशेषणभूतानुभूतिमात्रावलम्बनः कथमिव प्रतिज्ञायेत । यदप्युक्तं–स्थूलोहमित्यादिदेहात्मामिमानवत एव ज्ञातृत्वप्रतिभासनाज्ज्ञातृत्वमपि मिथ्येति—तदयुक्तम् ; आत्मतयामिमताया अनुभूतेरपि मिथ्यात्वं स्यात्; तद्वत एव प्रतीतेः । सकलेतरोपमर्दितत्त्वज्ञानावाधितत्वेनानुभूतेर्न मिथ्यात्वमिति चेत्; हन्तैवं सति तदबाधादेव ज्ञातृत्वमपि न मिथ्या । यदप्युक्तम्—अविक्रियस्यात्मनो ज्ञानक्रियाकर्तृत्वरूपं ज्ञातृत्वं न संभवति, अतो ज्ञातृत्वं विक्रियात्मकं जडं विकारास्पदाव्यक्तपरिणामाहंकारग्रन्थिस्थमिति न ज्ञातृत्वमात्मनः, अपि त्वन्तःकरणरूपस्याहंकारस्य, कर्तृत्वादिर्हि रूपादिवदृश्यधर्मः, कर्तृत्वे चाहंप्रत्ययगोचरत्वे चात्मनोभ्युपगम्यमाने देहस्येवानात्मत्व-पराक्त्व-जडत्वादिप्रसङ्गश्चेति—नैतदुपपद्यते; देहस्येवाचेतनत्व–प्रकृतिपरिणामत्व-दृश्यत्व–पराक्त्व–परार्थत्वादियोगात्

गवभासमाना व्यधिकरणतयाऽवभासमाना । तथा प्रतीति दर्शयति—**तथाहीति** । ततः किमित्यत्राह—**तदेवमिति** । **तदेवम्** उक्तप्रकारेण धर्मिधर्मभावप्रतीतौ विशेषणतया प्रतिपन्ने, तद्विशेषणविशिष्टस्याध्यासोऽनुपपन्न इत्यर्थः । तत्र न संबन्धमात्राध्यासः, तथा सति संबन्धिनो ज्ञातुः पारमार्थ्यप्रसङ्गात्, नच तथाभ्युपेतम् । ननु—विशेषणे विशिष्टाध्यासो दृश्यते–यथा प्रभायां मण्यध्यास–इति, इदं चोद्यं **पृथगवभासमानेत्यनेन** परिहृतम् । **नहि** तथा वैयधिकरण्येन विशेषणीभूता प्रभा भाति, किंतु अयं मणिरिति मण्यध्यासाधिष्ठानभूता प्रभा मणिसामानाधिकरण्येनैव हि भाति । ननु—अनुभवसामानाधिकरण्येन प्रतीतिप्रसङ्गनमयुक्तम् : 'दिक्षु मालिन्यं, नभसि राग' इति वैयधिकरण्येनाप्यध्यासदर्शनात्, नैवं; पदद्वयप्रवृत्तिनिमित्तयोरेकाश्रयवृत्तित्वं हि सामानाधिकरण्यम्, इह च दिक्त्व-मालिन्ययोर्नभस्त्वा-रुण्ययोश्चैकाश्रयवृत्तित्वादर्थतः सामानाधिकरण्यमस्ति, वैयधिकरण्यं तु शब्दगतम् । 'दिशो मलिना, दिक्षु मालिन्य'मित्यत्र कोऽर्थभेदः । अध्यासेषु धर्म्यैक्यप्रतीतिरवर्जनीया, अतः सैवात्रापादयते—**अनुभूतिरहमिति प्रतीयेतेति** । ननु—अनुभूतिरहमितिप्रतीतिप्रसङ्गो दुर्वचः; अनुभूतित्वं ह्यधिष्ठानाभाधारणाकारः, तदस्फुरणं भ्रमानुगुणमेव, न हि शुक्तौ रजतमिति प्रतीयते–इति । एवं तर्ह्यनुभूतेर्निर्विशेषाया रूपान्तरेण स्फुरणाभावात्, अनुभूतितया स्फुरणे–विरोधाच्च तदधिकरणाध्यासानुदयः, अविरोधेन कृत्स्नाध्यासे–ग्रन्थोक्तसामानाधिकरण्यप्रतीतिप्रसङ्गो दुर्वारः । एतदभिप्रायेण हि **पुरोऽवस्थितभास्वरद्व्याद्याकारतया रजतादिरिवेत्युक्तम्** । ननु—संविद्यध्यासानुदयो दुर्वचः, विषयोपश्लिष्टानुभूति'रहं जानामी'त्यत्र ज्ञात्रध्यासे प्रतीयते, सा तु नाधिष्ठानं, निर्विषया निराश्रयानुभूतिरेवाधिष्ठानं, तदप्रकाशादध्यासोदय–इति; उच्यते—अप्रतिपन्नस्याधिष्ठानत्वायोगात्, विषयाश्रयशून्यसंविदो योग्यानुपलब्धिनिरस्तत्वात्, विषयप्रकाशकसंविद एवात्मत्वाभ्युपगमेन त्वया स्वयंप्रकाशत्वसमर्थनाच्च–सैवाधिष्ठानमिति–तदवभासे तस्याश्च शुक्तित्ववद्भ्रमविरोधित्वेऽध्यासानुदय–इति । देहात्मामिमानवतो ज्ञातृत्वप्रतिभासात्तन्मिथ्येति यदुक्तं तदनूद्य दूषयति—**यदप्युक्तमित्यादिना । तदबाधादेवेति** । ज्ञातृत्वस्याबाधितत्वं–मुक्तावपि ज्ञातृत्वपरश्रुतिवाक्यात् । **इति ज्ञातृत्वाध्यासभङ्गः** ॥

ज्ञातृत्वस्य विक्रियात्मकत्वं निराकर्तुं तदनुवदति—**यदप्युक्तमविक्रियस्येति** । ज्ञानस्य धात्वर्थतया क्रियात्वं, तत्कर्तृत्वं च विकाररूपम्, अत एव जडं च अविक्रियस्याजडस्यात्मनो न संभवति । विक्रियात्मकत्वात्, जडत्वाच्च तादृशाहंकारग्रन्थिस्थमित्यर्थः । सर्वाध्यासमूलत्वात् **ग्रन्थित्वम्** । अथ हेत्वन्तरेण च ज्ञातृत्वस्यान्तःकरणधर्मत्वमुपपादयति—**कर्तृत्वादिरिति** । दृश्यत्वादित्यर्थः । आत्मनो ज्ञातृत्वेऽनिष्टं प्रसञ्जयति—**कर्तृत्व इति** । अत्र व्यतिरेक्यनुमानान्यमिप्रेतानीति पूर्वमेवोक्तं परिहरति—**नैतदिति** । **देहस्येवेत्यादिना** अन्तःकरणस्य ज्ञातृत्वाभावोपपादनम् । **आदि**शब्दादन्तवत्त्वग्रहणम् । **चेतनासाधारणेत्यादिना** आत्मनो ज्ञातृत्वोपपादनम् । **ज्ञातृत्वाभावः** साध्योऽभिप्रेतः । **अन्तःकरणं** धर्मि । **अचेतनत्वादयो** हेतवः । **देहस्येवेति** सपक्षो दर्शितः । ज्ञातृत्वस्य **चेतनासाधारणत्व**कथनाद् व्यतिरेक्यप्यभिश्च दर्शिता । एवं परोक्तव्यतिरेकिणां प्रत्यनुमानान्युक्तानि भवन्ति—अन्तःकरणं न ज्ञातृ: अचेतनत्वात्, प्रकृतिपरिणामत्वात्, दृश्यत्वात्, पराक्त्वात्, परार्थत्वात् देहवदिति । ननु—अचेतनत्वादज्ञातृत्वे साध्ये साध्याविशिष्टता,नैवम् ; अचेतनशब्देनानात्मतस्य विवक्षितत्वात् । **पुरुषार्थप्रतिसंबन्धित्वं** वा, **देहं प्रति** नियन्तृतया अन्तःप्रविष्टत्वं वा आत्मत्वं, तदभावोऽनात्मत्वम् । **प्रकृतिपरिणामत्वं प्रकृतिकार्यत्वम्** । **दृश्यत्वं** नियमेन ज्ञानान्तराधीनसिद्धित्वम् । **पराक्त्वं** परस्मै भासमानत्वम् । **परार्थत्वं** परप्रयोजनैकफलत्वं, **जीवोपकरणत्वमित्यर्थः** । आत्मनो ज्ञातृत्वे साध्येऽमी हेतवः, यथासंभवं तर्का योजनीयाः–आत्मनो ज्ञातृत्वाभावे **देहस्येवानात्मत्वप्रसङ्गः, परार्थत्वप्रसङ्ग इति** । ननु यथा घटदेहयोरचेतनत्वादिके तुल्येऽपि इन्द्रियाश्रयत्वादिकं देहासाधारणं

---

१ परिणामित्व° । २ तत्र प्रतिपन्न° का. मु. पु. ।

अन्तःकरणरूपस्याहंकारस्य, चेतनासाधारणस्वभावत्वाच्च ज्ञातृत्वस्य । एतदुक्तं भवति—यथा देहादि-दृश्यत्व–पराक्त्वादिभिर्हेतुभिस्तत्प्रत्यनीकद्रष्टृत्व-प्रत्यक्त्वादेर्विविच्यते, एवमन्तःकरणरूपाहंकारोपि तद्दृश्यत्वादेव तैरेव हेतुभिस्तस्माद्विविच्यत इति । अतो विरोधादेव न ज्ञातृत्वमहंकारस्य–दृशित्ववत् । यथा दृशित्वं तत्कर्मणोऽहंकारस्य नाभ्युपगम्यते, तथा ज्ञातृत्वमपि न तत्कर्मणोऽभ्युपगन्तव्यम् । न च ज्ञातृत्वं विक्रियात्मकम्; ज्ञातृत्वं हि ज्ञानगुणाश्रयत्वम्, ज्ञानं चास्य नित्यस्य स्वाभाविकधर्मत्वेन । नित्यम्[1] नित्यत्वं चात्मनो **'नात्मा श्रुतेः'** (ब्र.सू. २।३।१८) इत्यादिषु वक्ष्यति, **'ज्ञोत एव'** (ब्र.सू.२।३।१९) इत्यत्र ज्ञ

भवति,तथा देहान्तःकरणयोरप्यचेतनत्वादिके तुल्येऽपि ज्ञातृत्वमन्तःकरणासाधारणधर्मः स्यात्, अत इन्द्रियाश्रयत्वाभावस्यैव ज्ञातृत्वाभावस्याप्यचेतनत्वादिकमप्रयोजकम्, अचिद्विशेषत्वमेव प्रयोजकं, तथात्मनो ज्ञातृत्वाभावेऽपि प्रत्यक्त्वादिरुपपद्यताम्—इत्युभयत्रापि विपक्षे बाधकाभावमाशङ्क्य परिहरति–**एतदुक्तमिति** । येन दृश्यत्वादिविरुद्धधर्मेण देहस्य द्रष्टृत्वाद्यनुपपत्तिः, तेनान्तःकरणस्यापि तद्व्यत्वाद् द्रष्टृत्वाद्यनुपपत्तिरित्यर्थः । ज्ञातृत्वाभावं प्रत्यचेतनत्वादिकमप्रयोजकं चेत्—देहस्य ज्ञातृत्वप्रसङ्गः, ततश्चार्वाकं प्रति **देहात्मभेदस्त्वयाऽपि दुरुपपादः** । न च देहस्य देहत्वादज्ञातृत्वं; घटादौ देहत्वाभावेऽपि ज्ञातृत्वाभावात्, अतस्तत्राचित्त्वादिकस्य ज्ञातृत्वाभावप्रयोजकत्वमभ्युपगन्तव्यमिति–क्वचित् ज्ञातृत्वाभावप्रयोजकस्य तस्याचित्त्वादेः क्वचिदप्रयोजकत्वमयुक्तम्, अतोऽचित्त्वादिभिर्देहस्येवान्तःकरणस्य द्रष्टृत्वाद्यनुपपत्तिरित्यर्थः । **प्रत्यक्त्वादेरिति । आदि**शब्दादजडत्वग्रहणम् । **विविच्यते** प्रत्यक्त्वादिधर्मः संबन्धरहितोऽवगम्यत इत्यर्थः । **तैरेव हेतुभिस्तस्माद्विविच्यत इति** । पराक्त्वादिभिर्देहस्य ज्ञातृत्वाभाव उक्ते पराक्त्वं व्याप्यं ज्ञातृत्वाभावो व्यापक इति सिध्यति, ततश्च स्वाभाव-व्याप्तेषु पराक्षु निरवकाशं ज्ञातृत्वं यदि प्रत्यग्वस्तुन्यपि न स्यात्तदा निराश्रयं प्रसजेदिति पूर्वोक्तव्याप्तिस्थापनाय विपक्षे बाधकस्तर्कोऽत्राप्यभिप्रेतः । **तस्माद्विविच्यत इत्येतदुक्त**मित्यन्वयः ॥

अतोऽचेतनत्वजडत्वादिस्वभावविरोधान्नाहंकारस्य ज्ञातृत्वमित्याह—**अत इति** । न हि वयं द्रष्टृत्वाद्यनुपपत्त्या देहात्मविवेकं ब्रूमः स तु परमतानुसारात्कृतः, वयं तु दृशित्वानुपपत्तेयेति शङ्कायां द्रष्टृत्वाभावस्याचेतनत्वादिप्रयोज्यत्वे मृषावाद्यसाधारणप्रतिबन्दीमाह—**दृशित्ववदिति** । तदेव विवृणोति—**यथेति** । दृश्यत्वाद्यविशेषेऽपि देहस्य घटादिविलक्षणस्येन्द्रियाश्रयत्व-वदन्तःकरणस्य दृशित्वमुपपद्यताम् । अन्तःकरणस्यापि दृश्यत्वादिना देहस्येव दृशित्वं नोपपद्यत—इति चेत्, तथा दृश्य-स्यान्तःकरणस्य दृश्यत्वादिनैव देहस्येव द्रष्टृत्वमपि नोपपद्यते । अतो दृशित्वाभाव इव द्रष्टृत्वाभावेऽपि अचेतनत्वादिकं प्रयोजकम्; अन्वयव्यतिरेकयोस्तुल्यत्वात्, उपाध्यन्तरादशैनाच्चेति भावः । अहंप्रत्ययगोचरत्वमनात्मत्वसाधकं देहस्येव–इति यदुक्तं, तदयुक्तं; बाधितोहंप्रत्ययगोचरत्वस्य पक्षे वृत्त्यभावात्, अबाधिताहंप्रत्ययगोचरत्वस्य सपक्षे देहादावभावाच्च । यद्यहंप्रत्ययगोचरत्वमात्रेणात्मन्यनात्मत्वादिप्रसङ्गः, तर्हि रजतप्रत्ययगोचरत्वमात्रेण भ्रान्तवत् सम्यग्रजतेऽप्यरजतत्वाङ्कुलीयकनिर्माणानर्हत्वप्रसङ्गः स्यादित्यसङ्गतं, श्रुतिभिः प्रत्यक्षेण च कालात्ययापदेशश्च । अनात्मत्वादिप्रसञ्जकं कर्तृत्वं–किं प्रयत्नाधारत्वम्, उत स्पन्दरूपक्रियाश्रयत्वम्, उत धात्वर्थमात्राश्रयत्वम् । प्रथमे–व्याप्त्यभावः; प्रयत्नाधारत्वानात्मत्वयोः क्वचित्सहदर्शनाभावात् । परमात्मन्यनात्मत्वादिप्रसङ्गश्चेत्, 'कर्तारमीशं पुरुष'मित्यादिभिः कालात्ययापदेशश्च । जीवे चे'त्साधुकारी साधुर्भवति, कर्ता शास्त्रार्थवत्त्वात्, यतः स्वकृतभुक् पुमान्' इत्यादिभिः, प्रत्यक्षेण च कालात्ययापदेशश्च । द्वितीये—परमात्मन्यसिद्धिः, जीवे तूक्तान्त्यादिश्रुतिभिः कालात्ययापदेशः । तृतीये—भ्रमाश्रयतया स्वाभिमतात्मन्यनात्मत्वप्रसङ्गः । भेददर्शनं, तदाश्रयत्वं चापारमार्थिकमिति चेत्—किं परमार्थभूतधात्वर्थाश्रयत्वमनात्मत्वसाधकम्, उतापरमार्थभूतधात्वर्थाश्रयत्वम् । प्रथमे–घटादावपि परमार्थभूतधात्वर्थान्वयानभ्युपगमाद्व्याप्त्यभावः । द्वितीये तु—त्वदभिमतस्य भ्रमाश्रयस्यात्मनोऽप्यनात्मत्वप्रसङ्गः ॥

अथ विक्रियात्मत्वं नेत्याह—**नचेति** । तदुपपादयति—**ज्ञातृत्वं हीति** । गुणक्रियाश्रयत्वेऽपि तत्कादाचित्कं चेत्, क्रियाश्रयत्ववत् विक्रियात्मकं स्यात् इत्यत्राह—**ज्ञानं चास्येति** । धर्मस्य स्वाभाविकत्वेऽपि धर्मी अनित्यश्चेत्–धर्मोऽप्यनित्यः स्यात्, धर्मिनित्यत्वेऽपि धर्मः सोपाधिकश्चेत्–उपाधिविगमे धर्मो नश्यतीत्यनित्यः स्यात्, तदुभयव्यावृत्त्यर्थौ **नित्य-स्वाभाविक**शब्दौ । अवस्थाविशेषेण कादाचित्कत्वं तु प्रामाणिकत्वादिष्टम् । अनेन पदद्वयेन–'न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते अविनाशित्वादात्मन' इति श्रुत्यर्थं उक्तो भवति । अस्याः श्रुतेरयमर्थः–ज्ञातृसंबन्धिविज्ञानं नित्यं, कुतः–अविनाशित्वादात्मनः, विशिष्टस्य नित्यत्वेन विशेषणभूतज्ञानस्यापि नित्यत्वात् । यद्वा, धर्मिनित्यत्वेन तत्स्वाभाविकधर्मस्यापि नित्यत्वादिति आत्मनो नित्यत्वे, ज्ञानस्य तत्स्वाभाविकधर्मत्वे च प्रमाणं स्मारयन् पूर्वमेव श्रुतिवाक्यस्योपादानात् सूत्रमुदाहरति—**नित्यत्वं चेति** । सूत्रोदाहरणेन तद्विषयभूता श्रुतिरपि ह्यर्थतो दर्शिता स्यात् । सूत्रं च पूर्वं ज्ञानगुणकत्वप्रदर्शनायोपात्तम, इदानीं नित्यत्वज्ञापनायोपात्तम् । **ज्ञोऽत एवे**त्यत्र ज्ञ इति व्यपदेशस्य विवरणं–'यावदात्मभावित्वाच्च न दोषः' इति सूत्रम् ।

---

२ °द्रव्यत्वादेव ।

इति व्यपदेशेन ज्ञानगुणाश्रयत्वं च स्वाभाविकमिति वक्ष्यति, अस्य ज्ञानस्वरूपस्यैव मणिप्रभृतीनां प्रभाश्रयत्वमिव ज्ञानाश्रयत्वमप्यविरुद्धमित्युक्तं, स्वयमपरिच्छिन्नमेव ज्ञानं संकोचविकासार्हमित्युपपादयिष्यामः, अतः क्षेत्रज्ञावस्थायां कर्मणा संकुचितस्वरूपं तत्तत्कर्मानुगुणतरतमभावेन वर्तते, तच्चेन्द्रियद्वारेण व्यवस्थितम्, तस्मिमिन्द्रियद्वारा ज्ञानप्रसरमपेक्ष्योदास्तमयव्यपदेशः प्रवर्तते, ज्ञानप्रसरे तु कर्तृत्वमस्यैव, तच्च न स्वाभाविकम्, अपितु कर्मकृतमित्यविक्रियस्वरूप एवात्मा। एवंरूपाविक्रियात्मकं ज्ञातृत्वं ज्ञानस्वरूपस्यात्मन एवेति—न कदाचिदपि जडस्याहंकारस्य ज्ञातृत्वसंभवः। जडस्वभावस्याहंकारस्य चित्संनिधानेन तच्छायापत्त्या तत्संभव इति चेन्, केयं चिच्छायापत्तिः—किमहंकारच्छायापत्तिः संविदः, उत संविच्छायापत्तिरहंकारस्य। न तावत्संविदः; संविदि ज्ञातृत्वानभ्युपगमात्। नाप्यहंकारस्य; उक्तरीत्या तस्य जडस्य ज्ञातृत्वायोगात्, द्वयोरप्यचाक्षुषत्वाच्च। न ह्यचाक्षुषाणां छाया दृष्टा। अथाग्निसंपर्कादयः पिण्डौष्ण्यवच्चित्संपर्कज्ज्ञातृत्वोपलब्धिरिति चेन्—नैतत्; संविदि वस्तुतो ज्ञातृत्वानभ्युपगमादेव न तत्संपर्कादहंकारे ज्ञातृत्वं, तदुपलब्धिर्वा, अहंकारस्य त्वचेतनस्य ज्ञातृत्वासंभवादेव सुतरां न तत्संपर्का-

---

अत्र स्वाभाविकत्वसिद्धिरिति भावः। ज्ञानस्वरूपस्य ज्ञानाश्रयत्वं कथमित्यत्राह—**अस्येति**। ज्ञानं स्वाभाविकनित्यधर्मश्चेत्सर्वदा सर्वज्ञत्वप्रसङ्ग इत्यत्राह—**स्वयमिति**। **स्वयं** स्वतः। 'संपद्याविर्भाव' इत्यादिसूत्रे उपपादयिष्याम इत्यर्थः, अनन्तरमेवेति वार्थः। नहींदानीमपि कदाचित्सर्वज्ञत्वं, मुक्तौ च कदाचिज्ज्ञानसंकोचः किं न स्यात्, यदि क्षेत्रज्ञावस्थायां संकोचः तर्हि सर्वेऽप्यज्ञाः स्युरित्यत्राह—**अतः क्षेत्रज्ञेति**। **अतः** संकोचविकासार्हत्वात्। **कर्मणे**ति संकोचकोपाधिः। **क्षेत्रज्ञावस्थायामिति** तदानीमेव संकोच इत्यर्थः। सर्वेषामज्ञत्वप्रसक्तिश्च कर्मतारतम्यात्परिहृता। **तरतमभाव**शब्देन 'तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता। सर्वभूतेषु भूपाल तारतम्येन वर्तते' इति वचनं स्मारितं भवति। **कर्मणे**ति पदेन **तये**ति पदं श्लोकस्थं व्याख्यातं भवति। **तया** कर्मरूपाविद्ययेत्यर्थः; 'अविद्या कर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते। यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा॥ संसारनापानखिलानवाप्नोत्यतिसंतता'नेति हि प्रकृतम्। ज्ञानस्य नित्यत्वेनानुत्पत्तिकत्वादिन्द्रियनैरपेक्ष्यं स्यादित्यत्राह—**तच्चेति**। यद्वा, स्थावरादिष्वपि ज्ञानविकासः स्यादित्यत्राह—**तच्चेति**। इन्द्रियद्वारकत्वं संकोचविकासार्थमित्यर्थः। तर्ह्युत्पत्तिविनाशव्यपदेशो न स्यादित्यत्राह—**तमिममिति**। प्रसरान्वयव्यतिरेकावपेक्ष्य उदास्तमयव्यपदेश इत्यर्थः। यद्वा, प्रष्टृतांशः प्रसरः, तस्य प्रसरण-संकोचावुदया-स्तमयाविल्यर्थः। संकोचविकासाभ्युपगमे विक्रियात्मकत्वं स्यादित्यत्राह—**ज्ञानप्रसरेत्विति**। तादृशविक्रियात्मकत्वं प्रामाणिकत्वादिष्टमित्यर्थः। अचेतनवत्परिणामो ज्ञानभ्युपगत **इत्येव**कारार्थ इति प्रायः। अनेनाविकारश्रुतीनां विषयो दर्शितः। **मुख्यान्तरेणाप्यविकारश्रुतिर्निर्वाहं** दर्शयति—**तच्चेति**। स्वाभाविकविकारनिषेधपरा अविकारश्रुतय इत्यर्थः। स्वाभाविकं रूपं कथमित्यत्राह—**अविक्रियेति**। **स्वरूपं** स्वाभाविकं रूपम्। अविकारित्ववाक्यान्युपाधिविमुक्तस्वाभाविकरूपपराणीत्यर्थः। प्रसरणकर्तृत्वमपि विकाररूपत्वादन्तःकरणस्यैवेत्यत्राह—**एवंरूपविक्रियात्मकमिति**। स्वधर्मभूतज्ञानप्रसरणकर्तृत्वलक्षणविकारित्व**मेवंरूप**शब्देनाभिप्रेतम्। **ज्ञानस्वरूपस्य** ज्ञानमेव स्वाभाविको धर्मो यस्य सः ज्ञानस्वरूपः। स्वधर्मभूतज्ञानप्रसरणकर्तृत्वलक्षणविकारस्तद्धर्मकस्यात्मन एव संभवति, नतु जडस्वरूपत्वात् अतद्धर्मकस्याहंकारस्येत्यर्थः। यद्वा, **स्वरूप**शब्दो धर्मिपरः, ज्ञानस्वरूपस्यैव ज्ञानधर्मकत्वं संभवति, नतु जडस्वरूपस्य-यथा घटादेरिति—ज्ञानस्वरूपत्वात् ज्ञानधर्मकस्यैव स्वधर्मभूतज्ञानप्रसरकर्तृत्वरूपविकारसंभवः, नतु जडस्वरूपत्वात्-अतद्धर्मकस्याहङ्कारस्येत्यर्थः। **इति अहंकारज्ञातृत्वभङ्गः॥**

एवं विक्रियात्मकत्वात् ज्ञातृत्वस्य आत्मधर्मत्वानुपपत्तिरित्स्वा, अथ परोक्तान् ज्ञातृत्वनिर्वाहप्रकारान्निरस्यति। ज्ञातृत्वं **चिच्छायापत्तिकृतं**, चित्संपर्ककृतं, चिदभिव्यञ्जकलकृतम्—इति त्रयः पक्षाः, तत्र प्रथमं चिच्छायापत्तिपक्षमाशङ्कते—**जडेति**। **दूषयति—केयमिति**। **केयं** दुर्निरूपेत्यर्थः। विकल्पयति—**किमिति**। **चिच्छाया**शब्दयोः समासान्तर्गता विभक्तिः षष्ठी वा, सप्तमी वेति भावः। **अहंकारच्छायापत्तिः संविदः** अहंकारे संविद्गतज्ञातृत्वच्छायापत्तिरित्यर्थः। **संविच्छायापत्तिरहंकारस्येति**। संविद्यहंकारगतज्ञातृत्वच्छायापत्तिरित्यर्थः। प्रथमं दूषयति—**न तावदिति**। **विरोधमुक्तरं दूषयति—नापीति**। पूर्वमचेतनत्वप्रकृतिपरिणामित्वादिभिरहंकारस्य ज्ञातृत्वव्युदासमभिप्रेत्याह—**उक्तरीत्ये**ति। **द्वयोरप्यचाक्षुषत्वा**दित्यत्र **द्वयो**रिति। तद्विवृणोति—**नहीति**। **इति चिच्छायापत्तिनिरासः॥**

चित्संपर्कपक्षं दूषयितुं शङ्कते—अथेति। पूर्ववद्विकल्प्य **दूषयति—नैतदिति**। इयं साधारणी प्रतिज्ञा। अहंकारे संवित्संपर्कज्ज्ञातृत्वं **नुदति—संविदीति**। अहंकारसंपर्कात्संविदि ज्ञातृत्वं दूषयति—**अहंकारस्य त्विति। सुतरामिति।**

त्संविदि ज्ञातृत्वं, तदुपलब्धिर्वा। यदप्युक्तम्–उभयत्र न वस्तुतो ज्ञातृत्वमस्ति, अहंकारस्त्वनुभूतेरभिव्यञ्जकः स्वात्मस्थामेवानुभूतिमभिव्यनक्त्यादर्शादिवदिति—तदयुक्तम्; आत्मनः स्वयंज्योतिषो जडस्वरूपाहंकाराभिव्यङ्ग्यत्वायोगात्। तदुक्तम्—**'शान्ताङ्गार इवादित्यमहंकारो जडात्मकः। स्वयंज्योतिषमात्मानं व्यनक्तीति न युक्तिमत्॥'** (आ. सि.) इति। स्वयंप्रकाशानुभवाधीनसिद्धयो हि सर्वे पदार्थाः, तत्र तदायत्तप्रकाशोऽचिदहंकारोऽनुदितानस्तमितस्वरूपप्रकाशमशेषार्थसिद्धिहेतुभूतमनुभवमभिव्यनक्तीत्यात्मविदः परिहसन्ति। किं चाहंकारानुभवयोः स्वभावविरोधात्, अनुभूतेरननुभूतित्वप्रसङ्गाच्च न व्यङ्ग्यव्यञ्जकभावः। तथोक्तम्—**'व्यङ्ग्यव्यञ्जकत्वमन्योन्यं न च स्यात्प्रातिकूल्यतः। व्यञ्जकत्वेऽननुभूतित्वमात्मनि स्याद्यथा घटे॥'** (आ. सि.) इति। नच रविकरनिकराणां स्वाभिव्यङ्ग्यकरतलाभिव्यङ्ग्यत्ववत्संविदभिव्यङ्ग्याहंकाराभिव्यङ्ग्यत्वं संविदः साधीयः; तत्रापि रविकरनिकराणां करतलाभिव्यङ्ग्यत्वाभावात्। करतलप्रतिहतगतयो हि रश्मयो बहुलाः स्वयमेव स्फुटतरमुपलभ्यन्त इति तद्बाहुल्यमात्रहेतुत्वात्करतलस्य नाभिव्यञ्जकत्वम्। किं च–अस्य संवित्स्वरूपस्यात्मनोहंकारनिर्वर्त्यो-

ज्ञानस्याजडत्वात् ज्ञानाश्रयत्वं स्वमते संभवति, अहंकारस्य जडत्वेन वस्तुतो ज्ञानाश्रयत्वस्य स्वपरपक्षयोरुभयोरप्यसंभवात् न तत्संपर्कात्संविदि ज्ञातृत्वमिति भावः। रुमागतकाष्ठादीनां लवणसंबन्धाल्लवणत्वोत्पत्तिर्दृश्यते, अयःपिण्डेऽग्निसंपर्कादुष्णत्वमुपलभ्यते–अतो **ज्ञातृत्वं, तदुपलब्धिर्वेति** पृथगुक्तम्। ननु—पूर्वोक्ते पक्षद्वयेऽपि ज्ञातृत्वस्य छायापत्तिसंपर्कौ निरस्तौ, ज्ञानच्छायापत्तिसंपर्कौ कस्मादनिरस्तौ; वक्ष्यमाणाभिव्यक्तिपक्षान्तर्भावादिति ब्रूमः। ज्ञानस्याहङ्कारे च्छायापत्तिर्नाम–दर्पणे मुखस्येव तदाधेयतया अभिव्यक्तता, संपर्कपक्षेऽप्यधिष्ठानतया संपर्को ज्ञातृत्वप्रतीत्यनुपयुक्तः, अत आधेयतया संपर्को वक्तव्यः, स च तत्स्थतयाऽभिव्यक्तावन्तर्गतः, अतस्तत्रानुपन्यासः। किंच—छायापत्तिः संविदोऽचाक्षुषत्वेनैव निरस्ता, संपर्कश्चोपलम्भानुगुण्येन वक्तव्यत्वात्पृथक्सिद्धधर्मधर्मिभावेन वक्तव्यः स च नोपपन्नः; अचेतनस्य, चैतन्यस्य च तथाविधधर्मधर्मिभावायोगात्। दण्ड-देवदत्तयोरिव ज्ञान-ज्ञात्रोः पृथगवस्थानादर्शनादपृथगवस्थितयोः संपर्कश्चानुपपन्न **इत्यनुसंधेयम्। इति चित्संपर्कपक्षनिरासः॥**

अथाभिव्यक्तिपक्षमनुभाषितुं छायापत्ति-संपर्कपक्षयोः, अभिव्यक्तिपक्षस्य चान्योन्यवैषम्यं दर्शयति—**उभयत्रेति। वस्तुत इति।** छायापत्त्यादिना आपाद्यमानाद्ध्यासात्पूर्वमेव सिद्धत्वं विवक्षितं, न तु पारमार्थिकत्वम्; अलातचक्रादेरपि प्रतिबिम्बदर्शनात्, उष्णजलसंपर्कादनुष्णेऽप्यौष्ण्योपलम्भाच्च। एकत्र पूर्वसिद्धज्ञातृत्वाध्यासादन्यत्र ज्ञातृत्वनिर्वाहः पूर्वस्मिन् पक्षद्वये, अभिव्यक्तिपक्षे तु ज्ञातृत्वस्य पूर्वसिद्धिमनपेक्ष्य ज्ञानाध्यासात् ज्ञातृत्वनिर्वाह–इति वैषम्यम्। अभिव्यक्तिपक्षमाह—**अहंकारस्त्विति।** दूषयति—**तदयुक्तमिति।** कुत इत्यपेक्षायामात्मनोऽभिव्यञ्जकापेक्षा च नास्ति, अहङ्कारस्याभिव्यञ्जकत्वशक्तिरपि नास्तीत्याह—**आत्मत इत्यादिना।** स्वोक्तार्थस्य सांप्रदायिकत्वप्रदर्शनार्थं, दृष्टान्तेन तद्विशदीकरणार्थं चात्मसिद्धिग्रन्थमाह—**तदुक्तमिति।** 'शान्ताङ्गार' इत्यादिकं श्लोकं विवृणोति—**स्वयमिति। स्वयंप्रकाशशब्देनाभिव्यञ्जकापेक्षाया अभाव उक्तः। अनुभवाधीनसिद्धय** इत्यनेन अहंकारस्याभिव्यञ्जकत्वाभाव उक्तः। **अचिदहङ्कार** इत्यनेन चिन्मात्रातिरेकिलात्तदायत्तप्रकाश इति परोक्तहेतुः सूचितः। **अनुदितानस्तमितस्वरूपप्रकाशं** कदाचिदप्रकाशं चेत्तदाऽभिव्यञ्जकापेक्षा स्यात्तदभावात्कदाचिदप्यभिव्यञ्जकापेक्षा नास्तीत्यर्थः। **अशेषार्थसिद्धिहेतुभूतं** त्वयाऽपि विषयप्रकाशकत्वेन हि स्वयंप्रकाशत्वं समर्थितमिति भावः। **परिहसन्तीति।** ईदृशमनुभवमीदृशोऽहंकारोऽभिव्यनक्तीति–त्वदीया एव त्वत्समीपस्था एव हसन्तीति भावः॥

अहंकारानुभवयोरभिव्यञ्जकत्वाभिव्यङ्ग्यत्वानभ्युपगमेन दूषणमुक्तं, तयोरभिव्यञ्जकत्वमभिव्यङ्ग्यत्वं चास्तु तत्परस्परं नोपपद्यत इत्याह–**किं चेति। स्वभावविरोधात्** अनुभवस्याशेषार्थसिद्धिहेतुत्वं, तद्व्यतिरिक्तत्वेनाहङ्कारस्यास्य तदधीनसिद्धित्वं च विरोधः, यथा–पितापुत्रयोरन्यं प्रति पुत्रत्वे, पितृत्वे च सत्यपि परस्परं पितृत्व-पुत्रत्वव्यत्ययो नोपपद्यते, एवमन्यापेक्षया तयोर्व्यङ्ग्यव्यञ्जकभावसंभवेऽपि परस्परं नोपपद्यत इत्यर्थः। दूषणान्तरं चाह—**अनुभूतेरननुभूतित्वप्रसङ्गाच्चेति।** अस्मिन्नर्थेऽप्यात्मसिद्धिग्रन्थं दर्शयति—**यथोक्तमिति। प्रातिकूल्यतः** पूर्वोक्त**स्वभावविरोध**शब्देन प्रातिकूल्यशब्दो व्याख्यातः। तद्व्यङ्ग्यस्यैव तद्व्यञ्जकत्वे परोक्तदृष्टान्तं दूषयित्वाह—**न चेति।** दृष्टान्तस्य साध्यविकलत्वमाह—**तत्रापीति।** तत्र तथात्वस्यान्यथासिद्धिं दर्शयति—**करतलेति।** नहि ब्रह्म प्रसरणस्वभावं द्रव्यम्, अतस्तद्बाहुल्यहेतुत्वमहंकारस्यानुपपन्नमित्यर्थः। तथा अहंकारेणास्याभिव्यक्तिं त्रिधा विकल्प्य दूषयति–**किंचेत्यादिना। किंरूपा** किंशब्दः

अभिव्यक्तिः किंरूपा, न तावदुत्पत्तिः; स्वतःसिद्धतयानन्योत्पाद्यताभ्युपगमात्। नापि तत्प्रकाशनम्; तस्या अनुभवान्तराननुभाव्यत्वात्। तत एव च न तदनुभवसाधनानुग्रहः। स हि द्विधा—ज्ञेयस्येन्द्रियसंबन्धहेतुत्वेन वा, यथा—जातिनिजमुखादिग्रहणे व्यक्तिदर्पणादीनां नयनादीन्द्रियसंबन्धहेतुत्वेन। बोद्धृगतकल्मषापनयनेन वा, यथा परतत्त्वावबोधसाधनस्य शास्त्रस्य शमदमादिना। यथोक्तम्—'करणानामभूमित्वान्न तत्संबन्धहेतुता।' (आ. सि.) इति। किं च—अनुभूतेरनुभाव्यत्वाभ्युपगमेप्यहमर्थेन न तदनुभवसाधनानुग्रहः सुवचः; स ह्यनुभाव्यानुभवोत्पत्तिप्रतिबन्धनिरसनेन भवेत्—यथा रूपादिग्रहणोत्पत्तिविरोधिसंतमसनिरसनेन चक्षुषो दीपादिना। न चेह तथाविधं निरसनीयं संभाव्यते। न तावत्संविदात्मगतं तज्ज्ञानोत्पत्तिविरोधि किंचिदप्यहंकारापनेयमस्ति। अस्ति ह्यज्ञानमिति

क्षेपार्थः, दुर्निरूपेत्यर्थः। कुत इत्यत्रापेक्षायामभिव्यक्तिर्नाम—किमुत्पत्तिः, उत प्रकाशनम्, उतानुभवसाधनानुग्रह—इति त्रिधा विकल्पमभिप्रेत्योत्पत्तिपक्षं दूषयति—**न तावदिति**। अनुत्पन्नस्य घटादेरभिव्यक्त्यसंभवात्, उत्पादकस्यापि दण्डचक्रादेरुत्पादनद्वारा अभिव्यक्तिहेतुत्वादुत्पत्तिरपि विकल्पशिरसि निवेशिता। किंच—व्यङ्ग्यप्रकाशोत्पादकं व्यञ्जनं, संविदः स्वयमेव प्रकाशरूपत्वान्नदुत्पत्तिरेव तत्प्रकाशोत्पत्तिरूपाऽभिव्यक्तिः इति विकल्पशिरस्युत्पत्तिनिवेशः। **स्वतः सिद्धतयेति**। स्वतः सिद्धतया हि प्रागभावाभाव उक्तः, अनादित्वादिति वाऽर्थः। अथ द्वितीयं व्युदस्यति—**नापीति। प्रकाशनम्** अनुभवविषयप्रकाशोत्पत्तिः। अथ तृतीयं प्रतिवक्ति—**तत इति**। तत एव प्रकाशनानुपपत्तेरेव॥

नन्वनन्तरग्रन्थोत्थानमनुपपन्नम्; अनुग्राहकद्वैविध्यस्य तन्निरासानुपयोगित्वात्, उत्तरत्रात्मसिद्धिग्रन्थोदाहरणं च न सङ्गतम्; इन्द्रियासंबन्धवाचित्वेनानुग्रहद्वैविध्यानुपयोगात्; अत्रोच्यते—पूर्वमनुग्राह्यजन्यप्रकाशविषयानुभूतिपर्यालोचनया तदनुभवसाधनानुग्रहो दूषितः, इदानीमनुग्रहप्रकारविशेषपर्यालोचनया दूषणमाह—**स हीति**। द्विविधस्याप्यनुपपत्तिं दर्शयितुं प्रथमं द्वैविध्यमाह—**ज्ञेयस्येति**। शमदमादेः शास्त्रानुग्राहकत्वोक्तिः परमतेन, तद्धि उपासनानुग्राहकम्। ननु—**सहि द्विधेति** वक्तुमयुक्तम्; अनुग्रहस्य कोटिद्वयेऽप्यनन्तर्भावात्, अनुमानादेर्व्याप्तिग्रहादिरनुग्रहोऽप्यस्ति इति; उच्यते—करणानुग्रहः, कर्त्रनुग्रहश्चेति कोटिद्वयमेव, व्याप्तिग्रहणमपि करणानुग्रहान्तर्भूतम्। यद्वा—दृष्टमुखेनानुग्रहः, अदृष्टमुखेन चेति द्विधा, व्याप्तिग्रहणमपि दृष्टमुखेनानुग्रहः, तस्मा**दिन्द्रियसंबन्धहेतुत्वेने**त्येतत्करणानुग्रहस्य, दृष्टमुखेनानुग्रहस्य चोपलक्षणं, तत्राहंकाराभिव्यङ्ग्यायाः संविदोऽनुमानविषयत्वासंभवा**दिन्द्रियसंबन्धहेतुत्वेने**त्युक्तम्। **बोद्धृगतकल्मषापनयनेनेति कर्त्रनुग्रहस्य**, अदृष्टमुखेनानुग्रहस्य चोपलक्षणमुक्तम्। आत्मसिद्धिग्रन्थेऽप्ययमेव भावः। एवं द्वैविध्यदर्शनेन द्विधाभूतोऽप्यनुग्रहोऽहंकारस्य **न सुवच** इत्यनुषङ्गेण योजना। कथमत्र द्विविधस्याप्यनुग्रहस्यानुपपत्तिरिति शङ्कायामात्मसिद्धिग्रन्थमाह—**यथोक्तमिति। करणानामभूमित्वान्न तत्संबन्धहेतुतेति** हेतुलक्षणानुग्रहोऽनुपपन्न इति दर्शितम्। बोद्धृगतकल्मषापनयनलक्षणानुग्रहानुपपत्तिर्न ग्रन्थस्था। अत्र केचिदाचार्या एवं व्याचक्षते—शमादेरनुग्राहकत्वं **शास्त्रसिद्धं**, न तथाऽहंकारस्यानुग्राहकत्वं शास्त्रसिद्धमिति स्फुटत्वान्न ग्रन्थे कण्ठोक्त्या निरास—इति। पूर्वार्धोदाहरणेन **श्लोकस्योत्तरार्धं बोद्धृगतकल्मषापनयनलक्षणानुग्रहानुपपत्तिर्द्रष्टव्येति** चाचार्याः। तदिदमुत्तरार्धम्—'अहमर्थस्य बोद्धृत्वान्न स तेनैव शोध्यत' इति। एकस्यैव स्वप्रतियोगितया शोध्यत्वं, शोधकत्वं चानुपपन्नमित्यर्थः। अयंतु भाष्याभिप्रायः—अहमर्थस्य **बोद्धृगतकल्मषापनयने** कर्तृत्वं किं स्वरूपेण, उताद्दष्टकिंचित्कारमुखेन। प्रथमे—कर्मकर्तृविरोधः; एकस्यैव स्वापेक्षया शोध्यशोधकत्वानुपपत्तेः। द्वितीये—निष्प्रमाणकत्वं; न ह्यन्तःकरणस्यादृष्टवशादन्तःकरणशुद्धिरित्यत्र प्रमाणमस्तीति॥

पूर्वमिन्द्रियगोचरत्वान्भ्युपगमेन दूषणमुक्तम्, अथानुभाव्यत्वाभ्युपगमेन दूषणमाह—**किंचेति**। अनुग्रहस्वरूपं शिक्षयति—**सहीति**। व्यक्तिदर्पणादावनुग्रहप्रकारान्तरे दृष्टेऽपि कथं प्रतिबन्धनिरसनरूपानुग्रह एव परिशेषितः; उच्यते—जातिव्यक्तयोर्नित्यधर्मिधर्मभावेन व्यक्तिर्जातेरभिव्यञ्जिका, न तथा अहंकारानुभवयोर्नित्यतदधर्मधर्मिभावोऽस्ति, स तु परेणैव निरस्तः। मूर्तद्रव्यभूतचाक्षुषरश्मिप्रतिहतिहेतुर्दर्पणो मूर्तद्रव्यभूतचाक्षुषरश्मिं मुखेन संबन्धयति, न तथाहंकारो मूर्तद्रव्यं **कस्य चित्प्रतिहतिहेतुः—इति वक्ष्यमाणामिहानुग्रहप्रकारान्तरानुपपत्तिमभिप्रेत्य** प्रतिबन्धनिरसनरूपानुग्रह एव परिशेषितः। **दृष्टान्तानुग्रहे** दृष्टान्तमाह—**यथा रूपादीति**। ततः किमित्याह—**न चेहेति**। तदुपपादयति—**न तावदिति**। किं **प्रागभावरूपमज्ञानं**, किं वा **भावरूपम्**, उतान्यन्निरसनीयमुच्यत—इति **शिरस्त्रयमभिप्रेत्य तावच्छब्दः** प्रयुक्तः। **न तावदिति अन्येनान्यन्निरसनीयं निरस्तम्**। यद्वा, अहङ्कारस्याज्ञाननिरासकत्वम्, अज्ञानस्य संवित्संबन्धित्वं चोभयमनुपपन्नमित्यभिप्रेत्य **प्रथममहंकारापनेयत्वमज्ञानस्य प्रतिक्षिपति—न तावदिति**। अहंकारापनेयमज्ञानमस्तीति शङ्कते—**अस्ति**

---

१ प्रकाशनुं। २ नचानं। ३ °तेति अनेन इन्द्रियसंबन्धहेतुत्वं।

चेन्न; अज्ञानस्याहंकारापनोद्यत्वानभ्युपगमात् । ज्ञानमेव ह्यज्ञानस्य निवर्तकम् । न च संविदाश्रयत्वमज्ञानस्य संभवति; ज्ञानसमानाश्रयत्वात्, तत्समानविषयत्वाच्च । ज्ञातृभावविषयभावविरहिते ज्ञानमात्रे साक्षिणि नाज्ञानं संभवितुमर्हति, यथा ज्ञानाश्रयत्वप्रसक्तिशून्यत्वेन घटादेर्नाज्ञानाश्रयत्वं, तथा ज्ञानमात्रेपि ज्ञानाश्रयत्वाभावेन नाज्ञानाश्रयत्वं स्यात् । संविदोऽज्ञानाश्रयत्वाभ्युपगमेप्यात्मतयाभ्युपेतायास्तस्या ज्ञानविषयत्वाभावेन ज्ञानेन न तद्गताज्ञाननिवृत्तिः । ज्ञानं हि स्वविषय एवाज्ञानं निवर्तयति—यथा रज्वादौ । अतो न केनापि कदाचित्संविदाश्रयमज्ञानमुच्छिद्येत । अस्य च सदसदनिर्वचनीयस्याज्ञानस्य स्वरूपमेव दुर्निरूपमित्युपरिष्टाद्वक्ष्यते । ज्ञानप्रागभावरूपस्य चाज्ञानस्य ज्ञानोत्पत्तिविरोधित्वाभावेन न तन्निरसनेन तज्ज्ञानसाधनानुग्रहः । अतो न केनापि प्रकारेणाहंकारेणानुभूतेरभिव्यक्तिः । न च स्वाश्रयतयाभिव्यङ्ग्याभिव्यञ्जनमभिव्यञ्जकानां स्वभावः; प्रदीपादिष्वदर्शनात्, यथावस्थितपदार्थप्रतीत्यनुगुणस्वाभावाच्च ज्ञानतत्साधनयोः, अनुग्राह्यस्य च । तच्च स्वतःप्रामाण्यं न्यायसिद्धम् । न च दूषणादिहीति । दूषयति—**नेति । अज्ञान**शब्दो भावरूपस्य, अभावरूपस्य च साधारणः, दूषणमपि साधारणम् । द्विविधस्याप्यज्ञानस्य अहंकारापनोद्यत्वाभावात् किं निवर्तकमित्याह—**ज्ञानमेव हीति ।** प्रागभावस्यापि ज्ञानोत्पत्तिर्निवर्तिका, भावरूपस्यापि ज्ञाननिवर्त्यत्वं पराऽभ्युपेतम् ॥

एवमज्ञानस्यापि संविदाश्रयत्वे सत्यप्यहंकारापनोद्यत्वायोगात्तन्निरसनरूपानुग्रहो न संभवतीत्युक्तम्, अथाज्ञानस्य संविदाश्रयत्वं चानुपपन्नमित्याह—**नचेति । संविदाश्रयत्वं** संवित्संबन्धित्वमित्यर्थः । **आश्रयणं** संबन्धः । **संबन्धश्च** कर्मत्वेन, आश्रयत्वेन चेत्युभयविधसंबन्धपर **आश्रय**शब्दः । 'आश्रयश्चेतसो ब्रह्मे'त्यादिप्रयोगाच्च**आश्रय**शब्देन **विषयस्याप्युपस्थापनं** युक्तम् । संविदोऽज्ञानसंबन्धः किमाश्रयतया, उत विषयतया । उभयथाऽपि संबन्धोऽनुपपन्न इत्यर्थः । कुत इत्यत्राह—**ज्ञानेति ।** ततः किमित्यत्राह—**ज्ञातृभावेति । साक्षिणि** द्रष्टर्येव साक्षित्वं, ज्ञेयेष्वपि साक्षित्वमपि व्याहतं भवतीत्यभिप्रायः । **भवितुमर्हतीति** निर्देशेनाश्रयतया, विषयतया वा संबन्धमात्रं विवक्षितम् । अनेन व्यतिरेकव्याप्तिर्दर्शिता भवति । संविदाश्रयत्वाभावे अन्वयव्याप्तिं दर्शयति—**यथेति । अज्ञानाश्रयत्वं** हि ज्ञानप्रागभावाश्रयत्वम्, अनिर्वचनीयाज्ञानाश्रयत्वं वा, तद् घटादिषु नास्तीत्यर्थः । **ज्ञानाश्रयत्वप्रसक्तीति ।** ज्ञातुरप्यज्ञानाश्रयत्वं, ज्ञानाश्रयत्वं च कालभेदादविरुद्धमिति भावः । ज्ञानात्यन्ताभावाश्रयत्वं हि घटादेः । ज्ञानं नाज्ञानाश्रयः, न चाज्ञानविषयः; अज्ञानाश्रयत्वे, तद्विषयत्वे चोपगम्यमाने ज्ञातृज्ञेयत्वप्रसङ्ग—इति प्रतिकूलतर्क उक्तो भवति । एवमज्ञानाश्रयत्वानभ्युपगमेन दूषणमुक्तं, तदभ्युपगमेन दूषणमाह—**संविद् इति ।** अवच्छिन्नज्ञानस्यानुभाव्यत्वेऽङ्गीकृतेपि, अनवच्छिन्नस्यात्मभूतस्य ज्ञानस्यानुभाव्यत्वानभ्युपगमादित्यभिप्रायेणाह—**आत्मतयाऽभ्युपेताया इति ।** ज्ञानविषयस्यैवाज्ञाननिवृत्तिं सदृष्टान्तमाह—**ज्ञानं हीति ।** यद्यविषयेऽप्यज्ञाननिवृत्तिस्तर्हि शुक्तिज्ञानेन सर्पभ्रमनिवृत्तिः स्यादित्यभिप्रायः । एवं ज्ञाननिवर्त्याज्ञानाश्रयत्वे **ज्ञानविषयत्वप्रसङ्ग** इत्युक्तं भवति । आश्रयत्वाभ्युपगमेनोक्तं दूषणं निगमयति—**अत इति ।** त्वयाऽहंकारापनोद्यत्वेनोक्तं ज्ञानं—किं सदसदनिर्वचनीयम्, उत ज्ञानप्रागभावरूपम्—इति विकल्प्याह—**अस्य चेति ।** द्वितीयं प्रतिवक्ति—**ज्ञानप्रागभावेति । विरोधि**शब्देन **प्रतिबन्धकत्वं** विवक्षितं, न सहानवस्थानमात्रम् । अभिव्यक्तेर्दुर्निरूपत्वं निगमयति—**अत इति । केनापि प्रकारेण** उत्पादकत्वेन वा, प्रकाशकत्वेन वा, तदनुभवसाधनानुग्राहकत्वेन वेत्यर्थः ।

अथ स्वात्मस्थतयाऽभिव्यक्तिं दूषयति—**न चेति । व्यभिचारमाह—प्रदीपादिष्विति ।** हेत्वन्तरं चाह—**यथाऽवस्थितेति । प्रतीतिर्व्यवहारानुगुण्यं;** तदनुगुणाज्ञानादीनां स्वभावादित्यर्थः । तदेवोपपादयति—**तच्चेति ।** प्रामाण्याप्रामाण्यविषयाश्चत्वारः पक्षाः—प्रामाण्याप्रामाण्ये द्वे च परतः, द्वे च स्वतः, प्रामाण्यं परतोऽन्यत्स्वतः, प्रामाण्यं स्वतोऽन्यत्परत इति । प्रथममनुपपन्नं; [१]द्विस्वभावत्वादिप्रसङ्गात् । प्रामाण्याप्रामाण्ये द्वे च अन्यत्र विद्येते चेत्-तत्संबन्धात् ज्ञाने तथात्वं, तत्संबन्धाभावेऽनुभवत्वं च युक्तम्; अनुष्णाशीतवदन्यत्र तयोरविद्यमानत्वात् । परतस्त्वमनुपपन्नं; प्रामाण्यबुभुत्सापरम्परयाऽनवस्थाप्रसङ्गाच्च । द्वयोरपि स्वतस्त्वमनुपपन्नं; विरुद्धधर्मत्वेन व्याघातात् । नच व्यक्तिभेदादविरोधः; इयं प्रामाण्याश्रयव्यक्तिरियं नेति नियामकाभावात् । अप्रामाण्यस्यैव स्वतस्त्वमनुपपन्नं; प्रामाण्यस्यैव भूयस्त्वात्, अन्यस्याभूयस्त्वाच्च । भूयसां स्वतस्त्वम्, अल्पीयसामौपाधिकत्वं च युक्तं; घटपटादिज्ञानेषु, शुक्तिरजतादिज्ञानानामिदमंशेष्वपि प्रामाण्यदर्शनात्तस्य भूयस्त्वम् । अतः स्वतःप्रामाण्यं, परतोऽप्रामाण्यमिति—कश्चिदात्मस्थतयाऽभिव्यञ्जनमभ्युपेत्य व्यभिचार उक्तः ।

१ सर्व° । २ निःस्व° ।

मुस्वादेरभिव्यञ्जकः, अपि तु चाक्षुषतेजःप्रतिफलनरूपदोषहेतुः, तद्दोषकृतश्च तत्रान्यथावभासः, अभिव्यञ्जकस्त्वालोकादिरेव । न चेह तथाहंकारेण संविदि स्वप्रकाशायां तादृशदोषापादनं संभवति । व्यक्तेस्तु जातिराकार इति तदाश्रयतया प्रतीतिः, न तु व्यक्तिव्यङ्ग्यत्वात् । अतोन्तःकरणभूताहंकारस्थतया संविदुपलब्धेर्वस्तुतो दोषतो वा न किंचिदिह कारणमिति नाहंकारस्य ज्ञातृत्वं, तथोपलब्धिर्वा । तस्मात्स्वत एव ज्ञातृतया सिध्यन्नहमर्थ एव प्रत्यगात्मा, न ज्ञप्तिमात्रम् । अहंभावविगमे तु ज्ञप्तेरपि न प्रत्यक्त्वसिद्धिरित्युक्तम् । तमोगुणाभिभवात्, परागर्थानुभवाभावाच्च–अहमर्थस्य विविक्तस्फुटप्रतिभासाभावेप्याप्रबोधादहमित्येकाकारेणात्मनः स्फुरणात्सुषुप्तावपि नाहंभावविगमः । भवदभिमताया अनुभूतेरपि तथैव प्रथेति वक्तव्यम् । न हि सुप्तोत्थितः कश्चिद्'हंभाववियुक्तार्थान्तरप्रत्यनीकाकारा ज्ञप्तिरहमज्ञानसाक्षितयावतिष्ठ' इत्येवंविधां स्वापसमकालामनुभूतिं परामृशति । एवं हि सुप्तोत्थितस्य परामर्शः 'सुखमह-

अथ क्वचिदपि तन्नास्तीत्याह—**न चेति** । तर्हि सुखदर्शनाय दर्पणादिकं नोपादीयेतेत्यत्राह—**अपित्विति** । प्रतिफलनस्य दोषत्वमन्यथाज्ञानहेतुत्वादित्याह—**तद्दोषेति** । कस्तत्राभिव्यञ्जक इत्यत्राह—**अभिव्यञ्जकस्त्विति** । अहंकारस्य मूर्तस्वच्छस्थूलद्रव्यत्वाभावात्, संविदो ज्ञेयत्वाभावात्, अचाक्षुषत्वाच्च–अहंकारेण संविद्विषयभूतायां तद्ग्राहकवस्तुप्रतिफलनदोषो न संभवतीत्याह—**न चेहेति** । व्यक्तौ जातिप्रतीतिर्नियतधर्मधर्मिभावात्, न तु व्यङ्ग्यत्वादित्याह—**व्यक्तेरिति** । एतद्दर्पणव्यक्तिनिर्वाहद्वयं हृदि निधाय पूर्वं प्रतिबन्धनिरसनरूपानुग्रहो दूषितः । धर्मधर्मिभावेन वस्तुतस्तात्स्थ्येनोपलब्धिर्व्यक्तौ, दर्पणे तु प्रतिफलनरूपदोषात् । एवं परपक्षे न संभवतीत्याह—**अत इति** । वस्तुतः कारणं धर्मधर्मिभावः, दोषस्तु तात्स्थ्येनोपलब्धिकारणं मूर्तस्वच्छस्थूलद्रव्यत्वम्—उभयमप्यहंकारे नास्तीत्यर्थः । वस्तुतः कारणाभावान्न ज्ञातृत्वं विद्यते, दोषरूपकारणाभावान्नोपलभ्यते चेत्यभिप्रायेणाह—**नाहंकारस्य ज्ञातृत्वं तथोपलब्धिर्वेति** । ज्ञातुरात्मत्वं निगमयति—**तस्मादिति** । ज्ञप्तेरात्मत्वमयुक्तम्; अहंत्वाभावे प्रत्यक्त्वायोगादित्याह—**अहंभावविगम इति** । अहमिति व्यवहारानुगुणभासनविरहे स्वस्मै भासमानत्वं न स्यात्, अतः प्रत्यक्त्वमप्यहमर्थस्यैवात्मत्वसाधकमित्यर्थः । **इति चिदभिव्यक्तिनिरासः** ॥

अथ सुषुप्तावहमर्थस्फुरणमस्तीति साधयितुं वेदान्तावलम्बिभिः सर्वैः स्वयंज्योतिष्ट्वश्रुत्यनुसारात् सुषुप्तावात्मस्फुरणमभ्युपेयं, तत्र 'नाह स्वत्वयमेवं संप्रत्यात्मानं जानाति अयमहमस्मी'ति श्रुत्वा, 'मामप्यहं न ज्ञातवा'निति परामर्शाच्च नाहमर्थानुभवः, अतोऽनुभूतिस्फुरणमेव तदानीमिति शङ्कायामहमर्थस्याविशदस्फुरणमस्तीति सोपपत्तिकं प्रतिजानीते—**तमित्यादिना** । **चस्त्वर्थः**–शङ्कानिवृत्तौ । **तमोगुणाभिभवहेतुकात् परागर्थानुभवाभावात्** स्फुटावभासाभावः । **विविक्तप्रतिभासः** व्यावृत्तप्रतिभासः । अनेकविशेषणविशिष्टावभासः **स्फुटावभासः** । व्यावर्तकब्राह्मणत्वादिबाह्यधर्मविशिष्टत्वेन, बुद्धिसुखाद्यान्तरधर्मविशिष्टत्वेन च प्रतिभासाभावात्–सकलेतरव्यावृत्ततया, स्फुटतया च प्रतिभासाभावः । केनाकारेण स्फुरतीत्यत्राह—**अहमित्येकाकारेण स्फुरणादिति** । **अहं**मिति न शब्दानुकारः, अपि त्वेतद्वाच्यार्थानुकारः; प्रत्यक्त्वाकारेण स्फुरणादित्यर्थः । **एक**शब्देनाहंभावाविगमो विवक्षितः । यद्वा, **एकाकारेण** सर्वात्मसाधारणाकारेणेत्यर्थः । प्रत्यक्त्वादिको हि सर्वात्मसाधारणः, सुखदुःखादयः, देवत्वादयश्च न हि सर्वात्मसाधारणाः । सुषुप्तौ भासमान आत्मन्यहंभावः साध्यः, तथा**स्फुरणं** हेतुः । विशदावभासाभावादहमर्थस्फुरणं नास्तीत्यत्राह—**भवदभिमताया अनुभूतेरपीति** । न केवलमहमर्थस्फुरण एवैवंशदयदोषः, अनुभूतिस्फुरणेऽपि स तुल्यस्तया वाच्यः, अतो विशदावभासाभावान्नास्तित्वं चेत्–ज्ञात्यात्मनोऽपि तदानीं स्फुरणं न स्यात्; ज्ञातृज्ञेयोपश्लेषविरहात्–स्फुटानवभास इति हि तदभ्युपगम इत्यभिप्रायः । मृषावादिभिः, वाद्यन्तरैरपि जागरितावस्थायामेवाविशदावभासो निर्विकल्पकेऽङ्गीकृतः, ते यदि विशदावभासाभावादहमर्थास्फुरणं ब्रूयुः, तत्रापि निर्विकल्पके पृथक्पृथग्वस्तुमात्रावभासाभ्युपगमो नोपपद्यते, अविशदवस्तुमात्रावभासः पौरैरप्रामाणिको निर्विकल्पके स्वीकृतः, अत्र तु 'अत्रायं पुरुषः स्वयंज्योतिर्भवती'त्यादिश्रुत्यनुसारादविशदावभासः प्रामाणिकः स्वीकृत इति भेदः, अतः सुषुप्तावात्मस्फुरणाभ्युपगमे, अविशदावभासाभ्युपगमे च तुल्येऽपि, मृषावादिमतादपि स्वपक्षे प्रमाणानुगुण्यं विवक्षुः परपक्षे प्रमाणानुगुण्यं दर्शयति—**न हीति** । **अहंभाववियुक्तार्थान्तरप्रत्यनीकाकारा** ज्ञातृज्ञेयादिसमस्तविशेषरहितेत्यर्थः । **प्रत्यक्त्वसिद्ध्यर्थं ज्ञप्तिरहमित्यत्राहं**शब्दोपादानम् । स्वपक्षे परामर्शानुगुण्यमाह—**एवं हीति** । अयं परामर्शः सुषुप्तिकाले सुखस्वरूपवाऽनुभूतात्मगोचरः, अतीतकालसंबन्धं स्वापं तु पूर्वकालानुभूतार्थप्रत्यभिज्ञान-योग्यानुपलब्धिभ्यामनुमेयौ । स्वनोऽनुकूलतयाऽवभासमानस्याहमर्थस्यानुमानिककालस्वापवैशिष्ट्यगोचरप्रत्यभिज्ञाविशेषोऽयं परामर्शः—**सुखमहम-**

मस्वाप्स'मिति। अनेन प्रत्यवमर्शेन तदानीमप्यहमर्थस्यैवात्मनः सुखित्वं, ज्ञातृत्वं च ज्ञायते। नच वाच्यं–'यथेदानीं सुखं भवति तथा तदानीमस्वाप्स'मित्येषा प्रतिपत्तिरिति; अतद्रूपत्वात्प्रतिपत्तेः। न चाहमर्थस्यात्मनोऽस्थिरत्वेन तदानीमहमर्थस्य सुखित्वानुसंधानानुपपत्तिः; यतः सुषुप्तिदशायाः प्रागनुभूतं वस्तु सुप्तोत्थितो 'मयेदं कृतं मयेदमनुभूतमहमेवेदमवोच'मिति परामृशति। 'एतावन्तं कालं न किंचिदहमज्ञासिष'मिति च परामृशतीति चेत्, ततः किं, न किंचिदिति कृत्स्नप्रतिषेध इति—चेन्न; 'नाहमवेदिष'मिति वेदितुरहमर्थस्यानुवृत्तेः। वेद्यविषयो हि स प्रतिषेधः। न किंचिदिति निषेधस्य कृत्स्नविषयत्वे—भवदभिमतानुभूतिरपि प्रतिषिद्धा स्यात्। सुषुप्तिसमयेप्यनुसंधीयमानमहमर्थमात्मानं ज्ञातार'मह'-

---

स्वाप्समिति। एवं स्वपरमतयोः परामर्शानुगुण्य-तदभावरूपवैषम्यमुक्तं, श्रुतिस्वारस्यं च अस्मन्मते। 'अत्रायं पुरुषः स्वयं ज्योतिर्भवती'ति पुरुषशब्दश्रवणात्–**पुरुष**शब्दो न संविन्मात्रपरः; 'एष हि द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुष' इति ज्ञातुरेव पुरुषत्वश्रवणात्, लोके ज्ञातरि पुरुषशब्दप्रसिद्धेश्च। प्रत्यक्त्वसिद्धिश्चास्मन्मत एवेति वक्ष्यते। उक्तपरामर्शफलितमर्थमाह—**अनेनेति**। 'सुखमहमस्वाप्स'मिति परामर्शे **सुख**मित्यनेन तदानीमनुकूलतया भासमानत्वमनुसंहितं भवति। **अह**मित्यनेन स्वस्मै भासमानत्वरूपप्रत्यक्त्वं चानुसंहितं भवति। यथा 'मन्दमगच्छं मधुरमगाय'मिति परामर्शेन पूर्वं गमन-गानाभ्यां सह तदानीं तनं मान्द्यं, माधुर्यं चानुसंहितं भवति–तद्वदित्यर्थः। **स्वस्मै स्वयमनुकूलमि**त्यानुकूल्यप्रतियोगित्वाभिप्रायेण **सुखित्व**मित्युक्तम्। स्वस्मै भासत इति भासनप्रतिसंबन्धित्वरूपप्रत्यक्त्वाभिप्रायेण **ज्ञातृत्व**मित्युक्तं, न तु धर्मभूतज्ञानस्फुरणात्। तत्तु **विषयप्रकाशनवेलायां ज्ञातुरात्मनस्तथैव न सर्वेषां सर्वदा तथैवे**ति भाष्यस्वारस्यविरुद्धं, 'पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगा'दिति सूत्रस्वारस्यविरुद्धं च, **असरणनियमाद्युपपत्ति**विरुद्धं च, **संसारदशायां मनोव्यापारविरहेऽपि ज्ञानस्यात्मविषयत्वं, तच्चेन्द्रियद्वारेण व्यवस्थित**मिति भाष्यस्वारस्यविरुद्धं च; अन्यथा एषां सूत्रभाष्यवचसां संकोचः स्यात्, स च संकोचकाभावादनुपपन्नः, तस्मात्तदानीमात्मा प्रत्यक्त्वेनानुकूलत्वेनानुसंहित–इति परामर्शफलितार्थः। 'सुखमहमस्वाप्स'मिति सुखस्य स्वापक्रियाविशेषणत्वे प्रतीयमाने कथमात्मविशेषणत्वमुच्यत इति चेन्नैवं; क्रियायाः सुखाश्रयत्वायोगेन पुरुषद्वारा क्रियाविशेषणत्वस्य युक्तत्वादिति आत्मनस्तदानीं 'न किंचिदवेदिष'मित्यज्ञानसाक्षित्वेन स्थितिं वदता अज्ञानाश्रयभूताहमर्थानुभवोऽभ्युपगन्तव्यः, यथा 'प्रातश्चत्वरे गजो नास्ती'ति परामर्शे पूर्वं गजाभावाश्रयभूतं चत्वरमनुसंहितं भवति–तद्वत्। 'अस्वाप्स'मिति परामर्शेन 'मन्दमगच्छ'मित्यत्र गमनवत्स्वापोऽपि तदाऽनुसंहितः स्यात्–इति चेन्न; यथा 'प्रातश्चत्वरे गजो नास्ती'त्यत्र पूर्वं गजाभावानुसंधानेऽपि एवं परामर्शोपपत्तिः–तद्वत्सकलज्ञाननिवृत्तिरूपस्वापस्य तदानीमनुसंहितत्वेऽप्येवं परामर्शोपपत्तेः। तत्र हि प्रातश्चत्वरमेवानुभूतं, न गजाभावः; प्रतियोगिभूतगजास्मरणात्। पश्चात्तु 'गजः किं स्थित' इति पृष्टेन योग्यार्थानुस्मरणलिङ्गेनाभावोऽनुमीयते–तद्वत्सकलज्ञाननिवृत्तिरूपस्वापोऽपि योग्यानुस्मरणलिङ्गेनानुमीयते। ननु—सुखमहमस्वाप्समिति परामर्शस्वरूपे सति स्वापादेस्तदानीमननुभवः, सुखित्वादेरनुभवश्च कथमुच्यते, सर्वमप्यनुभूतं स्यात्, न वा स्यात्, नैतत्: 'सुखमहमस्वाप्स'मित्यत्र यस्मिन्नंशे प्रतीतिस्वारस्यापवादकमस्ति तद्विषयप्रतिपत्तिस्वारस्यभङ्गेऽप्यनपोदितांशविषयप्रतिपत्तिस्वारस्यभङ्गायोगात्, तत्र स्वापदशायां योऽर्थो नानुभवितुं शक्यः तद्विषयप्रतिपत्तिस्वारस्यं भज्यते। यस्तु तदानीमनुभवयोग्यः तद्विषयप्रतिपत्तिस्वारस्यं तिष्ठत्येव, बाह्यान्तःकरणजन्यसमस्तज्ञानाभावरूपत्वात्–न स्वापस्तदाऽनुसंधातुं शक्यते। अनुसंधानमस्ति चेत्, स्वाप एव न स्यात्; ऐन्द्रियकसमस्तज्ञाननिवृत्त्यभावात्, नैवं सुखादेः प्रतिपत्त्यनुपपत्तिरिति यथोक्त एवार्थः।

अथाऽस्य परामर्शस्य परोक्तान्यथासिद्धिमनूद्य परिहरति—**न चेत्यादिना। अतद्रूपत्वादिति**। एवमर्थः–किं प्रतिपत्तिस्वारस्यात्, उतानुपपत्त्याऽभ्युपगम्यत इति विकल्प्य **अतद्रूपत्वात्प्रतिपत्ते**रिति प्रतिपत्तिस्वारस्यं परिहृतं–यथा 'मन्दमगच्छं मधुरमगाय'मिति परामर्शवचनस्य। न हि तत्र यथेदानीं मान्द्यं माधुर्यं च भवति तथा अगच्छमगायमित्यर्थः, अपि तु गतिगानसमकालत्वमेव मान्द्य-माधुर्ययोरुपपन्नं–तद्वत् प्रत्यक्त्व-सुखित्वे अपि स्वापसमकालीने इत्यर्थः। अथानुपपत्तिं परिहरति—**न चेत्यादिना**। अनुपपत्तिश्चात्मनोऽस्थिरत्वम्, अनुभवाभावो वा। तत्र परामर्शेन स्थिरत्वमाह—**यत इति। मयेदं कृत**मित्यादयो मानस-वाचिक-कायिकत्रिविधव्यापारविषयपरामर्शपराः। अथाहमर्थाननुभवसाधकनिषेधसामान्यविषयं परामर्शविशेषं शङ्कते—**एतावन्तमिति**। अहमर्थस्य निषेधविषयत्वाभावाभिप्रायेणाह—**ततः किमिति**। परविवक्षितं शङ्कते—**न किंचिदिति**। परिहरति—**नेति। वेद्यविषयः** वेद्यप्रतिभासविषयः। कृत्स्नविषयत्वेऽनिष्टमाह—**न किंचिदिति**। नानुभूतिनिषेधः; तस्या अनुवृत्तेरित्याशङ्क्याह—**सुषुप्तिसमयेत्विति**। भवत्पक्षस्य विपरीतोऽयं परामर्श इत्यर्थः। यथा प्रातश्चत्वरे गजानुभवं पृष्टेन पश्चाद्योग्यानुस्मरणलिङ्गेन चत्वरे गजाभावं वदता पुरुषेण पूर्वकालीन-

मिति परामृश्य 'न किंचिदवेदिष'मिति वेदने तस्य प्रतिषिध्यमाने–तस्मिन्काले प्रतिषिध्यमानाया वित्तेः सिद्धिम्, अनुवर्तमानस्य ज्ञातुरहमर्थस्य चासिद्धिमनेनैव 'न किंचिदहमवेदिष'मिति परामर्शेन साधयंस्तमिममर्थं [1]देवानामेव साधयतु। 'मामप्यहं न ज्ञातवा'नित्यहमर्थस्यापि तदानीमननुसंधानं प्रतीयत इति चेन्, स्वानुभवस्ववचनयोर्विरोधमपि न जानन्ति भवन्तः; 'अहं मां न ज्ञातवा'निति ह्यनुभव–वचने। मामिति किंनिषिध्यत इति चेत्साधु पृष्टं भवता, तदुच्यते—अहमर्थस्य ज्ञातुरनुवृत्तेर्न स्वरूपं निषिध्यते, अपि तु प्रबोधसमयेऽनुसंधीयमानस्याहमर्थस्य वर्णाश्रमादिविशिष्टता। 'अहं मां न ज्ञातवा'नित्युक्तेर्विषयो विवेचनीयः—जागरितावस्थानुसंहितजात्यादिविशिष्टोऽस्मदर्थो मामित्यंशस्य विषयः, स्वापावस्थाप्रसिद्धाविशदस्वानुभवैकतानश्चाहमर्थोऽहमित्यंशस्य विषयः। 'अत्र सुप्तोऽहमीदृशोऽहमिति च मामपि न ज्ञातवानहं'मित्येव खल्वनुभवप्रकारः। किंच—सुषुप्तावात्माज्ञानसाक्षित्वेनास्त–इति हि भवदीया प्रक्रिया। साक्षित्वं च साक्षाज्ज्ञातृत्वमेव; न ह्यजानतः साक्षित्वम्, ज्ञातैव लोकवेदयोः साक्षीति व्यपदिश्यते, न ज्ञानमात्रम्। स्मरति च भगवान्पाणिनिः—**'साक्षाद्द्रष्टरि संज्ञायाम्'** (पा० सू० ५।२।९१) इति साक्षाज्ज्ञातर्येव साक्षिशब्दम्। सचायं साक्षी 'जानामी'ति प्रतीयमानोऽस्मदर्थ एवेति–कुतस्तदानीमहमर्थो न प्रतीयेत्। आत्मने स्वयमवभासमानोऽहमित्येवावभासत इति–स्वापाद्यवस्थास्वप्यात्मा प्रकाशमानोऽहमित्येवावभासत इति सिद्धम्। यत्तु—मोक्षदशयामहमर्थो नानुवर्तत–इति, तदपेशलम्;

चलरानुभवेन विना गजाभावो वक्तुं न शक्यते, तथा अज्ञानाश्रयमहमर्थं वदता स्वापदशायामहमर्थानुभवोऽभ्युपगन्तव्यः। अथाप्यहमर्थनिवृत्तिज्ञानानुवृत्तिकथनं चलरनिवृत्तिगजावस्थानवचनतुल्यमिति भावः। **देवानामेव साधयतु** अर्चारूपा हि देवाः, प्रतिवचनमकुर्वतामित्यर्थः, क्षमावतामिति वा, प्रतिवाद्यसन्निधाविति वा, उल्लोकमुक्तमिति वार्थः॥

अथ निषेधविशेषविषयं परामर्शमाह—**मामपीति**। परिहरति—**स्वानुभवेति**। स्वानुभववचनयोर्नान्योन्यं विरोधः, किंतूभयोरप्यहमर्थानुवृत्तिनिषेधशब्देन विरोध इत्यर्थः। अनुभवैकदेशयोः, वचनैकदेशयोश्च मिथो विरोध इति वार्थः। मिथो विरोधं दर्शयति—**अहमिति**। 'अहं न ज्ञातवा'नित्यत्र अज्ञानसाक्षित्वेनाहमर्थानुवृत्तिः स्वानुभवसिद्धा, वचनमपि तदनुगुणम्–इत्यनुभववचनाभ्यामहमर्थानुवृत्तिनिषेधवाक्यविरोध इत्यर्थः, निषेधशब्दतदर्थानुभवयोर्विरोध इति वार्थः। तत्र मामिति पदस्यार्थं वक्तुं परप्रश्नमनुभाषते—**मामितीति**। पूर्वं विरुद्धार्थकथनमसाधु, अर्थतत्त्वप्रश्नः साधुः–इत्यभिप्रायेणाह—**साक्ष्विति**। निषेधानुवृत्त्योर्विषयविभागं दर्शयति—**तदुच्यत इत्यादिना**। अहं मामित्युभयोरपि पदयोर्विशिष्टविषयतैवोचिता; नीतिभेदप्रसङ्गादित्यत्राह—**अहं मामिति**। विधिनिषेधयोरेकविषयत्वे व्याघातः स्यादिति तन्निवृत्त्यर्थं विषयविषयिविभागः कार्य इत्यर्थः। विषयविभागविपर्यासशङ्कायां विषयविभागमुचितं दर्शयति—**जागरितेति**। यत्सामभ्यभावात्तदानीं न प्रकाशते तदेव निषेधविषयः, यदन्यानपेक्षं स्वयं प्रकाशते तदेवानुवर्तत इति–अप्रकाशमानस्यानुवृत्तिः, प्रकाशमानस्य निषेधश्चानुपपन्नाविल्यर्थः। एवं विषयविभागानुगुणमनुभवं दर्शयति—**अत्रेति**। शब्दप्रयोगो–विवक्षावशाद्भीस्थं सर्वं वदति वा, तदेकदेशं वदति वा, न किंचिदपि वदति वा, अतः शब्दप्रयोगे वैवक्षिकेऽप्यनुभव एकरूपः, स पुनरेवंविषयविभागानुगुण एवेत्यर्थः। अनेन 'नाहं खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति' श्रुतिवाक्यस्थोऽयंशब्दो व्याख्यातः। परमतेनेममर्थमुपपादयति—**किंचेत्यादिना** साक्षित्वेनात्माऽभ्युपगम्येत ततः किमित्यत्राह—**साक्षित्वं चेति**। **साक्षाज्ज्ञातृत्वं** साक्षात्काररूपज्ञानाश्रयत्वम्। साक्षात्कर्तरि साक्षिशब्दः प्रयुक्तश्चेदौपचारिकः। उपपादयति—**न हीति**। **अजानतः** अज्ञातुरित्यर्थः। कुत इत्यत्राह—**ज्ञातैव हीति**। शब्दप्रयोगनियामकं लक्षणमाह—**स्मरतीति**। **साक्षिशब्दं स्मरती**त्यन्वयः। ततः किमहमर्थस्यात्मत्व इत्यत्राह—**स चेति**। अस्मिन्नर्थे अनुमानमुत्तरत्र विस्तरेण विवक्षितम्। अत्र संग्रहेणाह—**आत्मने स्वयमिति। आत्मने स्वयमेव भासमानोऽहमित्येवावभासत** इति व्याप्तिवचनं, जाग्रदात्मा सपक्षः, स्वप्नः प्रकाशमानत्वादिति हेतुः। निगमयति—**स्वापादीति**। अविशदावभासस्य सर्वाभ्युपगतत्वात्, श्रुतिस्मारस्यात्, परामर्शस्मारस्यात्, साक्षित्वोपपत्तेः, प्रत्यक्षसिद्धेश्च–सुषुप्तावात्मा अहमिति स्फुरतीत्युक्तं भवति। **इति सुषुप्तावप्यहमर्थानुवृत्तिः॥**

अथ मुक्तावहमर्थानुवृत्तिमनूद्य दूषयति—**यत्त्वित्यादिना**। तुरर्थगौरवविशेषे। **अपेशलम्** असाध्वित्यर्थः। कुत

---

१ देवानामेव मिथः मा° २ स्वाप्यम्°।

तथासत्यात्मनाश एवापवर्गः प्रकारान्तरेण प्रतिज्ञातः स्यात् । नच अहमर्थो धर्ममात्रं येन तद्विगमेप्यविद्यानिवृत्तावि स्वरूपमवतिष्ठेत, प्रत्युत स्वरूपमेवाहमर्थ आत्मनः, ज्ञानं तु तस्य धर्मः; 'अहं जानामि, ज्ञानं मे जात'मिति चाहमर्थधर्मतया ज्ञानप्रतीतेरेव । अपिच यः परमार्थतो, भ्रान्त्या वाध्यात्मिकादिदुःखैर्दुःखितया स्वात्मानमनुसंधत्ते 'ऽहं दुःखी'ति, 'सर्वमेतद्दुःखजातमपुनर्भवमपोह्य कथमहमनाकुलः स्वस्थो भवेयमित्युत्पन्नमोक्षरागः स एव तत्साधने प्रवर्तते, स साधनानुष्ठानेन यद्यहमेव न भविष्यामीत्यवगच्छेदपसर्पेदेवासौ मोक्षकथाप्रस्तावात्, ततश्चाधिकारिविरहादेव सर्वं मोक्षशास्त्रमप्रमाणं स्यात् । अहमुपलक्षितं प्रकाशमात्रमपवर्गेऽवत्तिष्ठत–इति चेन्, किमनेन, 'मयि नष्टेपि किमपि प्रकाशमात्रमवतिष्ठत' इति मत्वा न हि कश्चिद्बुद्धिपूर्वकारी प्रयतते, अतोऽहमर्थस्यैव ज्ञातृतया सिध्यतः प्रत्यगात्मत्वम् । स च प्रत्यगात्मा मुक्तावप्यहमित्येव प्रकाशते; स्वस्मै प्रकाशमानत्वात् । यो यः स्वस्मै प्रकाशते स सर्वोऽहमित्येव प्रकाशते यथा—तथावभासमानत्वेनोभयवादिसंमतः संसार्यात्मा । यः पुनरहमिति न चकास्ति नासौ स्वस्मै प्रकाशते—यथा घटादिः, स्वस्मै प्रकाशते चायं मुक्तात्मा, तस्मादहमित्येव प्रकाशते । न चाहमिति प्रकाशमानत्वेन तस्याज्ञत्वसंसारित्वादिप्रसङ्गः; मोक्षविरोधादज्ञत्वाद्यहेतुत्वाच्चाहं-

---

इत्यत्राह—**तथा सतीति** । सौगतान् ज्ञानसंतत्युच्छेदं मोक्षं वदतः स्वरूपनाशस्यापुरुषार्थत्वेन दूषयता त्वया शब्दान्तरेण स्वरूपनाश एवोक्तः स्यादित्यर्थः । नैयायिकाद्युक्ते मोक्षेऽप्यपुरुषार्थत्वं तुल्यं, दुःखनिवृत्तिः, सुखप्राप्तिश्चोभयं पुरुषार्थः । अत्रापुरुषार्थभूतदुःखाभावात्पुरुषार्थान्वयः, सुखाभावादपुरुषार्थान्वयश्चेति—मुक्तेः पुरुषार्थापुरुषार्थमिश्रत्वं हि स्यात्, अहमर्थो ह्यारोपितः, अतस्तद्विगमे स्वरूपनाशो न प्रसजेदित्यत्राह—**न चेति** । कुत इत्यत्राह—**अहमिति । अहमर्थधर्मतया ज्ञानप्रतीतेरेव** पूर्वोक्तहेतोरेवेत्यर्थः । अहमर्थात्मलसमर्थनोपजीवनेन स्वरूपनाशप्रसङ्ग उक्तः ॥

एवं धर्मधर्मिभावेन प्रतीत्या अनुवृत्तिरुपपादिता, अथ श्रुत्यर्थापत्तिमाह—**अपि चेत्यादिना** । पूर्वमहमर्थस्यात्मलसमर्थनाय श्रुत्यर्थापत्तिरुक्ता, इदानीमहमर्थस्य मुक्तावनुवृत्त्युपपादनाय तामेव श्रुत्यर्थापत्तिं विस्तरेणाह—**य इति** । यः स्वात्मानं दुःखिनमनुसंधत्ते, स एव तन्निवृत्तिसाधने प्रवर्तते, स चाहमर्थ एव । दुःखित्वं भ्रान्तिसिद्धमिति—चेत्, यः स्वात्मानं भ्रमवन्तमनुसंधत्ते, स एव भ्रमनिवृत्तिसाधने प्रवर्तते, स चाहमर्थः । द्विचन्द्रज्ञानादिभ्रान्तिमतोऽपि स्वभ्रमनिवृत्तिरेवापेक्षिता, न तु स्वविनाशः, अतोऽहमर्थविनाशोऽपुरुषार्थ इत्यभिप्रायेण **परमार्थतो, भ्रान्त्यावे**त्युक्तम् । **अनुसंधत्त** इत्यनेन **निरस्ताखिलदुःखोऽहमि**त्यत्रापेक्षितं वक्तव्यमुक्तम् । **निरस्ते**त्यादिश्लोकं विवृणोति—**सर्वमेतदित्यादिना । अनाकुलः स्वस्थो भवेयमिति । अपुनर्भवमपोह्ये**त्येतत्फलमुक्तम् **अनाकुल** इति । आगामिदुःखशङ्कया मनःक्षोभः आकुलत्वं तदभावोऽनाकुलत्वम् । **स्वस्थः** स्वस्मिन् स्थितः, स्वभावस्थितः, यथावस्थितस्वात्मानुभवपरः, अनन्तानन्दभागिति फलितम् । **स एव** पूर्वं दुःखित एव, य उत्पन्नानिष्टनिवृत्तीष्टप्राप्त्यभिलाषः स एवेत्यर्थः । **श्रवणादा**विति पूर्वमुक्त्वादिह **तत्साधन** इत्येतावदुक्तम् । अपसर्पेदसाविति आदिग्रन्थेन फलितमर्थमाह—**ततश्चाधिकारीति** । श्रवणाद्यायाससाध्यस्य शास्त्रस्यापुरुषार्थपर्यवसायित्वे श्रवणाद्यधिकारिविरहात्–श्रवणादिसापेक्षस्य शास्त्रस्य प्रमितिजनकत्वलक्षणं प्रामाण्यं न स्यादित्यर्थः । **मयि नष्टेपी**त्येतद्विवृणोति—**अहमुपलक्षितमित्यादिना । बुद्धिपूर्वकारी**त्यनेन **कस्यापी**ति पदं विवृतम् । श्रुत्यर्थापत्ति निगमयति—**अत इति** । अहमर्थविगमे ज्ञप्तिसिद्धिरप्यनुसंधेया । अनुमानमाह—**स चेति । किंचानुमानमप्यस्तीति चा**र्थः । अन्वयव्याप्तिमाह—**यो य इति । तथाऽवभासमानत्वेन** स्वस्मै प्रकाशमानत्वेन । व्यतिरेकव्याप्तिं दर्शयति—**यः पुनरिति** । उपनयमाह—**स्वस्मा इति** । निगमनमाह—**तस्मादिति । स्वस्मै प्रकाशमानत्वं** हेतुः । **अह**मिति व्यवहारार्हत्वं साध्यमिति न साध्याविशिष्टता । **अहमित्येव प्रकाशते** अहमिति व्यवहारार्हं प्रकाशत इत्यर्थः । साध्यविपरीतविशेषसाधकतया विशेषविरुद्धत्वं शङ्कते—**न चेति** । आदिशब्दाद्रागद्वेषदुःखादि विवक्षितम् । ननु व्यापकं हि प्रसञ्जनीयं, नच कार्यं कारणस्य व्यापकं, सत्त्वं–कारणसजातीयस्य तु कदाचित्कार्यप्रसक्तिर्व्यापिका, अतोऽहं प्रत्ययेनात्मनोऽज्ञत्वादिप्रसञ्जनम् । अज्ञत्वादिप्रसक्तिः श्रुतिविरुद्धेत्याह—**मोक्षेति** । 'न पश्यो मृत्युं पश्यति न रोगं नोत दुःखता' मिति हि श्रुतिः । अतो यथा सहदर्शनमात्रेण पर्वते भाण्डादिप्रसक्तिः प्रत्यक्षबाधाद्वार्यते, तद्वत्कालात्ययापदेश इत्यर्थः । सोपाधिकत्वमाह—**अज्ञत्वादीति** । संसारित्वाहमर्थत्वयोः सहदर्शनमात्रेण मुक्तावपि संसारित्वादिप्रसङ्गश्चेत्, अ-

---

१ °मात्रमपवर्गेऽव° । २ बुद्धिपूर्वमधिकारी । ३ स तस्मा° ।

प्रत्ययस्य। अज्ञानं नाम स्वरूपाज्ञानम्, अन्यथाज्ञानं वा। अहमित्येवात्मनः स्वरूपमिति स्वरूपज्ञानरूपोऽहं प्रत्ययो नाज्ञत्वमापादयति, कुतः संसारित्वम्, अपि तु तद्विरोधित्वान्नाशयत्येव। ब्रह्मात्मभावापरोक्षनिर्धूतनिरवशेषावद्यानामपि वामदेवादीनामहमित्येवात्मानुभवदर्शनाच्च। श्रूयते हि—**'तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति'** (बृ० १।४।१०), **'अहमेकः प्रथममासं वर्तामि च भविष्यामि च'** इत्यादि। सकलेतराज्ञानविरोधिनः सच्छब्दप्रत्ययमात्रभाजः परस्य ब्रह्मणो व्यवहारोप्येवमेव—**'हन्ताहमिमास्तिस्रो देवताः'** (छा० ६।३।२), **'बहु स्यां प्रजायेय'** (छा० ६।२।३), **'स ऐक्षत लोकान्नु सृजा'** (ऐ० १।१) इति। तथा **'यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः। अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥'** (गी० १५।१८), **'अहमात्मा गुडाकेश'** (गी० १०।२०), **'न त्वेवाहं जातु नासम्'** (गी० २।१२), **'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा।'** (गी० ७।६), **'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते।'** (गी० १०।८) **'तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।'** (गी० १२।७), **'अहं बीजप्रदः पिता'** (गी० १४।४), **'वेदाहं समतीतानि'** (गी० ७।२६) इत्यादिषु। यद्यहमित्येवात्मनः स्वरूपं कथं तर्ह्यहंकारस्य क्षेत्रान्तर्भावो

नुभवस्यापि तत्सहभावदर्शनात्त्वत्पक्षेऽपि मुक्तौ संसारित्वप्रसङ्गः, तन्मोक्षग्राहिप्रमाणविरोधात्कालात्ययापदिष्टं, संसारित्वादेरनुभवप्रयुक्तत्वाभावात् सोपाधिकत्वं चेति चेत्, तदस्मत्पक्षेऽपि समानमित्यभिप्रायः। अनेन अहमिति भासनं न स्वस्मै भासमानत्वप्रयुक्तम्, अपि त्वज्ञत्वप्रयुक्तमिति-हेतोः सोपाधिकत्वं च श्रुतिबलेन व्यासेर्भग्नतया सहदर्शनमात्रमेवेति परिहृतं भवति॥

एवं कालात्ययापदेश-सोपाधिकत्वे उक्ते, तत्र सोपाधिकत्वमुपपादयितुमज्ञानत्वेन संभावितशिरांसि विकल्पयति—**अज्ञानं नामेति।** धर्म्यैक्ये सति प्रकारान्तरारोपणेन ज्ञानमन्यथाज्ञानं—यथा पीतः शङ्ख इति, इदं रजःकार्यम्। धर्म्यन्तरस्य धर्म्यन्तरत्वेन ज्ञानं विपरीतज्ञानं—यथा शुक्ताविदं रजतमिति, इदं तमः कार्यम्। 'अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी॥ अधर्मं धर्ममिति या मन्यते तमसा वृता। सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी'ति स्मृतेः। अहंप्रत्ययस्य स्वरूपज्ञानरूपत्वात्—तत्प्रागभावान्यथाज्ञानविपरीतज्ञानानि विरोधादेवापगतानीत्याह—**अहमित्येवेति। अहमित्येवात्मनः स्वरूपम्** अहमिति व्यवहारयोग्यत्वमेवात्मनः स्वरूपमित्यर्थः। अहंप्रत्ययस्याज्ञत्वादिप्रयोजकत्वदूषणेन-अज्ञत्वादेरविद्यान्वय एवोपाधित्वित्यर्थादुक्तं भवति। अथवा, कार्यकारणभावेन व्याप्तिमङ्गीकृत्य परेणाज्ञत्वादिप्रसङ्ग उक्त इति व्याप्तिप्रतिक्षेपाय कार्यकारणभावं प्रतिक्षिपति—**अज्ञत्वाद्यहेतुत्वाच्चेत्यादिना।** अज्ञत्वफलमपि नास्तीत्याह—**कुतः संसारित्वमिति।** निवृत्ताविद्यानामप्यहमित्यात्मप्रतिपत्तिदर्शनेनाहंप्रत्ययस्य मुक्तावनुपपत्तिमाह—**ब्रह्मात्मभावेति। तद्धैतत्पश्यन्निति** ब्रह्मात्मकत्वसाक्षात्कारकथनेन निर्धूतनिरवशेषावद्यत्वं गम्यते। ब्रह्मणोऽपि तथा प्रतिपत्तिमाह—**सकलेतरेति। सकलेतराज्ञानविरोधिन इति।** न हि सकलेतरविषहरणनिपुणस्य वैनतेयस्य विषवश्यत्वसंभव इति भावः॥ **सच्छब्दप्रत्ययमात्रभाजः सच्छब्दस्य,** सदिति प्रत्ययस्य च विषयभूतस्य। **मात्रच्चा** पाश्चात्यनामरूपभाक्त्वव्यावृत्तिः। अनेनाहंकारसृष्टेः पूर्वमप्यहंप्रत्ययं ज्ञापयति। अहंप्रत्ययस्फुटीकरणाय **अहमिमा** इति वाक्यं पूर्वमुपादत्ते—**हन्तेति। बहु स्यामिति** वाक्ये 'असद्युत्तम' इत्युत्तमपुरुषबलादहमिति प्रत्ययसिद्धिः। **अहमिमास्तिस्र** इत्यत्राहंशब्दः कण्ठोक्तः। न ह्यहंकारस्य नामरूपव्याकर्तृत्वमिति भावः। बहुधूपनिषत्स्वहमिति निर्देशज्ञापनायोपादत्ते—**स ऐक्षतेति। सृजा** इत्युत्तमपुरुषेणाहंशब्दाकर्षसिद्धिरिति भावः। स्मृतिं दर्शयति—**तथा यस्मादिति। यस्मा**दिति वचनं क्षराक्षरातीतस्वाभाविकरूपेणाहंप्रत्ययज्ञापनार्थमुपात्तं; न ह्यहंकारः क्षराक्षरगतीनः, अनोऽस्मीत्युत्तमपुरुषेणाप्यहमर्थसिद्धिः। आत्मनोऽहंप्रत्ययं ज्ञापयति—**अहमात्मेति।** न ह्यहंकारश्चिदचिदन्तरात्मा। स्वाभाविकनित्यरूपेऽहंप्रत्ययं दर्शयति—**न त्वेवाहमिति।** न ह्यहंकारो नित्यः। मृत्युविरोधिमुक्तिप्रदोऽप्यहंप्रत्ययविषय इत्याह—**तेषामिति।** न ह्यहंकारो मुक्तिप्रदः। एवमनेकश्रुतिस्मृतिवचनोपादानं-परविवक्षितद्वित्रतादृश्यवचनापनोदनार्थम्। एभिरहंशब्दैश्चिन्मात्रमुपलक्ष्यते चेत्, अनेकवाक्यस्थाहंशब्दलक्षणैकदोषः। **'महाभूतान्यहंकार'** इति क्षेत्रान्तर्भाववचनमेकम्, 'अहंकारं बलं दर्पं कामक्रोधं परिग्रहं विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पत' इति स्याज्यतपरं वचनं द्वितीयम्, 'अहंकारविमूढात्मे'त्यपरम्—एतत्त्रयमनुदाहृतमप्यभिप्रेतम्; उत्तरत्र परिहारात्। **इति मोक्षेप्यहमर्थानुवृत्तिः॥**

पूर्वमेतद्वचनाभिप्रायेण सुषुप्तिमुक्त्योर्नान्वेतीत्युक्तम्, इममर्थमवलम्ब्य चोदयति—**कथं तर्हीति।** परिहरति—

---

१ अहमेव च वदामि। २ धर्म्यैक्ये. का. मु. पु.। ३ प्रजायये।

भगवतैवोपदिश्यते—**'महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च।'** (गी० १३।५) इति, उच्यते—**स्वरूपोपदेशेषु** सर्वेष्वहमित्येवोपदेशात्, तथैवात्मस्वरूपप्रतिपत्तेश्चाहमित्येव प्रत्यगात्मनः स्वरूपम्। **अव्यक्तपरिणामभेदस्याहंकारस्य** क्षेत्रान्तर्भावो भगवतोपदिश्यते स त्वनात्मनि देहेऽहंभावकरणहेतुत्वेनाहंकार इत्युच्यते। अस्य त्वहंकारशब्दस्याभूततद्भावेऽर्थे ञ्विप्रत्ययमुत्पाद्य व्युत्पत्तिर्द्रष्टव्या। अयमेव त्वहंकार उत्कृष्टजनावमानहेतुर्गर्वापरनामा शास्त्रेषु बहुशो हेयतया प्रतिपाद्यते। तस्माद्बाधकापेताहंबुद्धिः साक्षादात्मगोचरैव, शरीरगोचरा त्वहंबुद्धिरविद्यैव। यथोक्तं भगवता पराशरेण **'श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनन्दन। अनात्मन्यात्मबुद्धिर्या'** इति। यदि ज्ञप्तिमात्रमेवात्मा तदानात्मन्यात्मामिमाने ज्ञप्तिमात्रप्रतिभासः स्यान्न ज्ञातृत्वप्रतिभासः, तस्माज्ज्ञाताहमर्थ एवात्मा। तथोक्तम् **'अतः प्रत्यक्षसिद्धत्वादुक्तन्यायागमान्वयात्। अविद्यायोगतश्चात्मा ज्ञाताहमिति भासते॥'** (आ. सि.) **'देहेन्द्रियमनःप्राणधीभ्योन्योनन्यसाधनः। नित्यो व्यापी प्रतिक्षेत्रमात्मा भिन्नः स्वतः सुखी॥'** (आ. सि.) इति। **अनन्यसाधनः** स्वप्रकाशः। **व्यापी** अतिसूक्ष्मतया सर्वचेतनान्तःप्रवेशस्वभावः।

उच्यत इति। अहमर्थाहंकारयोरभेदबुद्ध्या परेण चोदिते—प्रकृतिप्रत्यययोरर्थविभागव्युत्पादनाय प्रकृत्यर्थभूत आत्मन्यहंबुद्धेः प्रामाणिकत्वेन स्थैर्यं दर्शयति—**स्वरूपोपदेशेष्विति।** अथान्यथासिद्धिं दर्शयंस्तत्राहंकारशब्दविवक्षितमाह—**अव्यक्तेति। अव्यक्तपरिणामभेदस्येति।** न त्वहमर्थस्येत्यर्थः। 'अथातोऽहंकारादेश' इत्यादिषु शुद्धस्वरूपस्याहंकारशब्देनाभिधानाभ्युपगमेऽपि न विरोधः; स त्वहंकारशब्दोऽहमर्थविषयबुद्धिपरः। यद्यहंकारशब्दवाच्यत्वमात्रात् प्रत्यगात्मापि क्षेत्रभेदः स्यात्, तर्हि हरिशब्दवाच्यत्वसाम्यात्सिंहो मण्डूकः स्यात्। अतोऽनेकार्थाभिधायिशब्दैकत्वमर्थभेदाविरोधीति भावः। यथाऽऽगमप्रामाण्ये 'तथा च हरिशब्दस्य दृष्टा मण्डूकवाचिता। इति तच्छब्दवाच्यत्वात्सिंहो मण्डूक एव किम्॥ तथा गोशब्दवाच्यत्वाच्छब्दश्चापि विषाणवा'नीति। अथाहंकारशब्दस्याव्यक्तपरिणामविशेषवाचकत्वप्रकारं दर्शयति—**स त्विति। अहंभावः** अहमिति बुद्धिः। **भाव**शब्दस्य बुद्धिवाचकत्वमभिप्रायपरतया प्रयोगादवगम्यते। सर्वत्राहंशब्दार्थमेकरूपमङ्गीकृत्याहंकारशब्दस्याव्यक्तपरिणामवाचित्वं शब्दानुशासनप्रक्रिययोपपादयति—**अस्यत्विति।** क्विप्रत्ययस्य सर्वलोपः, 'कृञः करणे घञ्'। क्षेत्रान्तर्भावोपदेशस्य निर्वाहः कृतः, 'अहंकारं बलं दर्प'मिति त्याज्यतयोपदेशस्य निर्वाहः क्रियते—**अयमेव त्विति। अयं**शब्देन प्रस्तुताहंभावो विवक्षितः, न त्वहंभावकरणहेतुः, **गर्वापरनामे**ति वचनात्; न हि महदहंकारयोरन्यतरोऽहंकारो गर्वापरपर्यायः, अतोऽत्राहंभाव एवा**यं**शब्दविवक्षितः। प्रशस्तदेहेऽहंबुद्धिः, **उत्कृष्टजनावमानहेतुः। अहंकारः** अहंबुद्धिः। मानसव्यापारवाचिनः करोतेर्बुद्धिपरत्वं युज्यते, यथा—'तदेकावयवं देवं चेतसा हि पुनैर्बुधः। कुर्या'दिति मनसा करणं हि वेदनम्, अतोऽहंबुद्धिरहंकारः ञ्विप्रत्ययार्थगर्भत्वादनहम्यहंबुद्धिगर्भाविमावहंभावाहंकारशब्दौ। अत्र भावे व्युत्पत्तिः, पूर्वत्र करणे व्युत्पत्तिः 'गर्वोऽभिमानोऽहंकार' इति नैघण्टुकाः। ननु—कथं भावे व्युत्पन्नस्याहंकारशब्दस्योपादेयगोचरतया प्रयोगः—'अथातोऽहंकारादेश' इति; उच्यते—स त्वहंकारशब्दः साक्षादहमर्थबुद्धिवाची, न त्वनात्मन्यात्मबुद्धिपरञ्विप्रत्ययार्थगर्भः। हेयोपादेयरूपेण शब्दप्रतिपन्नयोरहंबुद्ध्योर्विषयविभागं निगमयति—**तस्मादिति।** अस्मिन्नर्थे प्रमाणमाह—**यथोक्तमिति।** अत्रैव पुराणे अनात्मविषयाहंबुद्धि-वचनयोर्भ्रान्तत्वम्, आत्मविषयेत्वभ्रान्तत्वं च सष्टं, यथा—'आकाशवाय्वग्निजलपृथिवीभ्यः पृथक्स्थिते। अनात्मन्यात्ममयं भावं कः करोति कलेवरे॥ पञ्चभूतात्मके देहे देही मोहतमोवृतः। अहं ममेति चेत्युच्चैः कुरुते कुमतिर्मति'रिति। आदिभरतचरिते—'आत्मन्येष न दोषाय शब्दोऽहमिति यो द्विज। अनात्मन्यात्मविज्ञानं शब्दो वा भ्रान्तिलक्षणः'॥ इत्येतद्वचनार्थमप्यहमर्थात्मत्वहेतुत्वेनाह—**यदीति। अनात्मनीति।** अनात्मन्यहं प्रतीतिः कथमात्मामिमान इत्यर्थः। अहमर्थात्मत्वं निगमयति—**तस्मादिति।** अस्मिन्नर्थे आत्मसिद्धिग्रन्थमुदाहरति—**तदुक्तमिति।** धर्मधर्मिभावेन प्रतीतिः **प्रत्यक्षसिद्धिः।** स्थिरत्वास्थिरत्वादिवैषम्यं, श्रुत्यर्थापत्तिश्च **न्यायः। आगम** उदाहृतोपनिषद्वाक्यानि। **अविद्यायोगो**ऽनन्तरोक्तभ्रान्तियोगः। अहमर्थस्यानात्मत्वे 'स्थूलोऽहं'मिति भ्रान्तेरयोग इति वार्थः। ज्ञातुरात्मत्वे संवादिग्रन्थो, दर्शितः ज्ञातेरनात्मत्वे चात्मसिद्धिग्रन्थमाह—**तथा चेति। धीभ्योऽन्य** इत्येतदन्वोपयुक्तम्। साधनशब्दस्योत्पादकज्ञापकसाधारणत्वात्तद्व्यावृत्तिं—**अनन्येति।** जीवस्वरूपविभुत्वशङ्काव्युदासार्थं **व्यापी**तिशब्दं व्याचष्टे—**अतिसूक्ष्मेति।** पुराणादिषु व्यापिशब्दप्रयोगात्स एवात्र श्लोके प्रयुक्तः। यत्र यत्र

---

१ बुद्धः। २ व्याप्तिं। ३ व्याप्तिं।

यदुक्तं—दोषमूलत्वेनान्यथासिद्धिसंभावनया सकलभेदावलम्बिप्रत्यक्षस्य शास्त्रबाध्यत्वम्—इति। कोऽयं दोष इति वक्तव्यं यन्मूलतया प्रत्यक्षस्यान्यथासिद्धिः। अनादिभेदवासनैव हि दोष इति चेत्, भेदवासनावासितमिरादिवद्यथावस्थितवस्तुविपरीतज्ञानहेतुत्वं किमन्यत्र ज्ञातपूर्वम्। अनेनैव शास्त्रविरोधेन ज्ञास्यत इति चेन्न; अन्योन्याश्रयणात्—शास्त्रस्य निरस्तनिखिलविशेषवस्तुबोधित्वनिश्चये सति भेदवासनाया दोषत्वनिश्चयः, भेदवासनाया दोषत्वनिश्चये सति शास्त्रस्य निरस्तनिखिलविशेषवस्तुबोधित्वनिश्चय—इति। किंच—यदि भेदवासनामूलत्वेन प्रत्यक्षस्य विपरीतार्थत्वं, शास्त्रमपि तन्मूलत्वेन तथैव स्यात्। अथोच्येत—दोषमूलत्वेपि शास्त्रस्य प्रत्यक्षावगतसकलभेदनिरसनज्ञानहेतुत्वेन परत्वात्तत्प्रत्यक्षस्य बाध-

जीवस्य व्याप्तिवाचिनः शब्दास्तत्र तत्रायमेवार्थो द्रष्टव्य इति भावः। जीवस्य धर्मभूतज्ञानेन व्याप्तिरात्मसिद्धावेवोच्यते—'व्याप्तिरपि चैतन्यमात्रेण न स्वरूपेण'ति, अतो यथोक्त एवार्थः। **इत्यहमर्थात्मत्वनिगमनम्॥**

अथ शास्त्रप्रत्यक्षविरोधे शास्त्रप्राबल्यमनूद्य निरस्यति—**यदुक्तमित्यादिना**। परेण—पूर्वं मूलमूलिभावपरोक्षापरोक्षरूपत्वादिर्न बाध्यबाधकभावे कारणं; ज्वालाभेदानुमानेन व्यभिचारात्, 'आदित्यो यूप' इत्यादावपि यूपादित्यैक्याप्रतिपादनं न दौर्बल्यात्, अपि तु यूपाज्ञानविधिशेषत्वेनैक्यतात्पर्याभावात्—इत्युक्तं, तत्र ज्वालाभेदानुमानात् शास्त्रस्य त्रिधा वैषम्यमस्ति—प्रमाणान्तरेण दोषमूलत्वनिश्चयादन्योन्याश्रयः, बाध्यबाधकयोस्तुल्यदोषत्वं, मूलोच्छेदित्वं—चेति, एतत्त्रयं ज्वालाभेदानुमाने नास्ति; तथा हि—एकवर्तिकावर्तिलनिबन्धनसादृश्याख्यदोषस्यासत्यप्यैक्ये ऐक्यप्रतीतिहेतुत्वम् अचिरनिर्वापितारोपितप्रदीपे दृष्टमिति चक्षुषा ज्वालैक्यप्रतिपत्तेः क्वचिद्दोषमूलत्वनिश्चयात्, अन्यत्रैक्यप्रतिपत्तावपि दोषमूलत्वसंभवाज्ज्वालैक्यप्रत्यक्षं शङ्कितं न निश्चयजननक्षमं परीक्षकस्य भवेत्। ज्वालायां सादृश्यरूपदोषस्यासत्यप्यैक्ये ऐक्यप्रतीतिहेतुत्वं प्रमाणान्तरेण न दृष्टं चेत्, अन्योन्याश्रयः स्यात्—अनुमानस्य प्राबल्यात् प्रत्यक्षस्यान्यथासिद्धिः, तदन्यथासिद्ध्यानुमानप्राबल्यम्—इति। ऐक्यप्रतीतेरन्यथासिद्धिसंभवः प्रमाणान्तरदृष्ट इति नान्योन्याश्रयः, अत्र न तथा प्रमाणान्तरेण भेदवासनाया दोषत्वं दृष्टम्। किंच—दीपे बाध्यस्य ज्वालैक्यज्ञानस्य सादृश्याख्यदोषमूलत्वेऽपि बाधकस्य ज्वालाभेदानुमानस्य न सादृश्यदोषमूलत्वं दृष्टम्, अत्र तु बाध्यस्य प्रत्यक्षस्य, बाधकस्य शास्त्रस्य चोभयोः परास्युपेतं दोषमूलत्वम् अविशिष्टं विद्यत—इति तुल्यदोषत्वम्। किंच—तत्र ज्वालाख्यधर्मिग्राहिणः प्रत्यक्षस्य, प्रथमवर्त्तवयवाभिसंयोगे, चरमवर्त्तवयवविनाशे चोत्पत्ति—विनाशयोर्व्याप्तिग्राहिणः प्रत्यक्षस्य, प्रत्यवयवमभिसंधोगवर्त्तवयवविनाशाख्यलिङ्गग्राहिणः प्रत्यक्षस्य च न भेदानुमानबाध्यविषयत्वम्; ऐक्यप्रतीतेरेव तत्, अत्र तु शब्दाख्यधर्मिग्राहिणस्तस्य, निर्दोषत्वसाधकलिङ्गग्राहिणः, तल्लिङ्गव्याप्तिग्राहिणः, षड्विधतात्पर्यलिङ्गग्राहिणश्च प्रत्यक्षस्य, तेषां तात्पर्यलिङ्गानां च शास्त्रेणैव बाधोपगमान्मूलोच्छेदित्वम्—इति त्रिधा वैषम्यम्। एतद्वैषम्यत्रयमुपपादयिष्यन् पूर्वपक्षमनुवदति—**दोषमूलत्वेनेति। सकलभेदावलम्बिप्रत्यक्षस्येति।** अत्रायं भावः—तत्त्वबुद्धिकारादिभिः कैश्चित्काचतिमिरादिरेव प्रत्यक्षस्य दोष उक्तः, स नोपपद्यते; काचतिमिरादेः क्वाचित्कत्वात्। एतेन प्रत्यक्षान्तराणां दोषमूलत्वमनुमीयते चेत्, शब्दत्वाच्छास्त्रस्यापि दोषमूलत्वमनुमीयताम्। शास्त्रे दोषस्य योग्यानुपलम्भनिरासश्चेत्, प्रत्यक्षेऽपि तथैव स्यात्। किंच आयुर्वेदे दोषाणां स्वरूपं, तन्निवृत्त्युपायादिकं च निरूपितम्। सर्वप्रत्यक्षस्य दोषमूलत्वानुमानं तद्विरुद्धं च। किंच—सर्वप्रत्यक्षस्य दोषमूलत्वे सन्मात्रग्राहिणः प्रत्यक्षस्य च दोषमूलत्वात् सन्मात्रमपि मिथ्या स्यादिति दूषयति—**कोऽयमित्यादिना। कोऽयं दोष इति वक्तव्यमिति। कोऽयं दोष** इत्यनया वचनव्यक्त्या दोषरूपमूलं यदुक्तं तत्किमिति पृष्टेऽयं **दोष इति वक्तव्य**मित्यर्थः। यद्वा यच्छब्दसामर्थ्यात्तत्रेत्याक्षेपसिद्धं **दोषमूलत्वेने**त्यादिना **यदर्थवत्त्वमुक्तं** तत्र **कोऽयं दोष इति** पृष्टे **वक्तव्य**मित्यर्थः। कुतो वक्तव्यमित्यत्राह—**यन्मूलतयेति।** न हि दोषमनुक्त्वा ऽन्यथासिद्धिः **शक्यो**क्तुमित्यर्थः। दोषमाह—**अनादीति।** स्वरूपसंप्रतिपत्तिपर **एव**कारः। **हि**शब्देन दोषान्तरासंभवसिद्धवत्कारः, स्वमते दोषस्वसंप्रतिपत्त्यभिमानाद्वा **हि**शब्दः। दोषत्वं हि विपरीतज्ञानहेतुत्वम्, अतो विपरीतज्ञानहेतुत्वेन व्याप्तेरदृष्टतया **भेदवासनास्वरूपसंप्रतिपन्नावपि दोषत्वासंप्रतिपत्तेः पृच्छति—भेदवासनाया इति। तिमिरादिवदिति। आदि**शब्देन सादृश्यादि विवक्षितं, तद्धि ज्वालायामैक्यभ्रमहेतुः; अन्यत्र ज्ञातपूर्वत्वस्य दुर्वचत्वात्। शङ्कते—**अनेनैवेति। शास्त्रवी—नेति।** एवं **प्रमाणान्तरेण** दोषत्वनिश्चयेन—अन्योन्याश्रयणापत्तिरूपवैषम्यमुक्तम्, अथ **तुल्यदोषत्वं** बाध्यबाधकयोरा—**शङ्क्येति।** अथ दोषमूलत्वे तुल्येऽपि परत्वाद्बाधकत्वं शङ्कते—**अथेति।** अपच्छेदादिष्विदं रजतं,नेदं रजत-मित्यादिषु च परं बाधकं दृष्टम्, अतो विषेध्योपस्थापकमानापेक्षया विषेधकस्य परत्वात् बलीयस्त्वमित्यर्थः। एवं ब्रह्मप्रतिपादकशास्त्रस्यापि व्युत्पत्त्यादेः प्रत्यक्षादिमूलतया तत्पूर्वकस्य तस्य प्रत्यक्षाद्यपेक्षया परत्वात्—तत्प्रतिपाद्यनिर्विशेषवस्तुसत्य-

कम्–इति, तन्न; दोषमूलत्वे ज्ञाते सति परत्वमकिंचित्करं; रज्जुसर्पज्ञाननिमित्तभये सति 'भ्रान्तोऽयमिति परिज्ञातेन केनचि'न्नायं सर्पो मा भैषी'रित्युक्तेऽपि भयानिवृत्तिदर्शनात् । शास्त्रस्य च दोषमूलत्वं श्रवणवेलायामेव ज्ञातम्, श्रवणावगतनिखिलभेदोपमर्दिब्रह्मात्मैकत्वविज्ञानाभ्यासरूपत्वान्मननादेः । अपिचेदं शास्त्रम्, एतच्चासंभाव्यमानदोषं, प्रत्यक्षं तु संभाव्यमानदोषमिति केनावगतं त्वया, न तावत्स्वतःसिद्धा निर्धूतनिखिलविशेषानुभूतिरिममर्थमवगमयति; तस्याः सर्वविषयविरक्तत्वात्, शास्त्रपक्षपातविरहाच्च । नाप्यैन्द्रियिकं प्रत्यक्षम्; दोषमूलत्वेन विपरीतार्थत्वात् । तन्मूलत्वादेव नान्यान्यपि प्रमाणानि । अतः स्वपक्षसाधनप्रमाणानभ्युपगमान्न स्वाभिमतार्थसिद्धिः । ननु—व्यावहारिकप्रमाणप्रमेयव्यवहारोऽस्माकमप्यस्त्येव । कोऽयं व्यावहारिको नाम, आपातप्रतीतिसिद्धो युक्तिभिर्निरूपितो न तथावस्थित इति चेत्, किं तेन प्रयोजनम्; प्रमाणतया प्रतिपन्नेपि यौक्तिकबाधादेव प्रमाणकार्याभावात् । अथोच्येत–शास्त्रप्रत्यक्षयोर्द्वयोरप्यविद्यामूलत्वेपि प्रत्यक्षविषयस्य शास्त्रेण बाधो दृश्यते, शास्त्रविषयस्य सद्द्वितीयस्य ब्रह्मणः पश्चात्तनबाधादर्शनेन निर्विशेषानुभूतिमात्रं ब्रह्मैव परमार्थ–इति, तदयुक्तम्; अबाधितस्यापि दोषमूलस्या-

---

त्वमपि तुल्यन्यायतया सिद्धं, तद्दूषयति—**तन्नेति** । परत्वस्याकिंचित्करत्वमुपपादयति—**रज्जुसर्पेति** । उत्तरज्ञानस्य दोषमूलत्वेन प्रामाण्यानिश्चयाद्भ्रान्तिनिवृत्तिः । ननु—भ्रान्तत्वे ज्ञाते परत्वमकिंचित्करमस्तु, अत्र तु भ्रान्तत्वज्ञानं नास्तीत्याह—**शास्त्रस्य चेति** । ज्ञातत्वमुपपादयति—**श्रवणावगतेति** । शास्त्रस्य भेदवासनामूलत्वं तावत्संप्रतिपन्नं, तस्याश्च दोषत्वं भेदमिथ्यात्वज्ञानादवगम्यते, तन्मिथ्यात्वावगतिश्च ज्ञाननिवर्त्यत्वावगमात्, ज्ञाननिवर्त्यत्वावगमश्च ब्रह्मात्मैकत्वज्ञानस्य निखिलभेदोपमर्दित्वावगतेः, अत ईदृशनिवर्तकज्ञानाभ्यासरूपमननं कुर्वता शास्त्रस्य दोषमूलत्वमवगन्तमित्यर्थः ॥

एवं बाध्यबाधकयोस्तुल्यदोषत्वरूपवैषम्यमुक्तम्, अथ मूलोच्छेदित्वमाह—**अपि चेति** । **इदं शास्त्रम्**मिति शब्दराशिव्यावृत्तिः । **असंभाव्यमानदोषम्**मिति बौद्धागमादिव्यावृत्तिः । **त्वया** प्रमाणप्रमेयादिकं तात्त्विकत्वेनानभ्युपगच्छता । **न तावदिति** । स्वतःसिद्धत्वेन **निर्धूतनिखिलविशेषत्वम्**, एतद्विशेषणं निर्विषयत्वप्रदर्शनार्थम् । कुतो नावगमयति इत्यत्राह—**तस्या इति** । **सर्वविषयविरक्तत्वात्** निर्विषयत्वादित्यर्थः । न हि ज्ञानमसंबध्य विषयं प्रकाशयति । वस्तुतो निर्विषयापि भ्रान्त्या विद्यमानमपि शास्त्रप्रावल्यमवगमयतीत्याह—**शास्त्रपक्षपातविरहाच्चेति** । असंबद्धाविद्यमानत्वाविशेषात्—सौगतादिशास्त्रान्तरप्रामाण्यमप्यवगमयेदित्यर्थः । प्रत्यक्षादिकं नावगमयतीत्याह—**नापीति** । योगिप्रत्यक्षादेरप्यैन्द्रियिकप्रत्यक्षमूलशास्त्रजन्यज्ञानहेतुकादृष्टकार्यत्वा**दैन्द्रियिकप्रत्यक्षं** प्रथममुपात्तम् । **तन्मूलत्वाद्भेदवासनामूलप्रत्यक्षमूलत्वात्** । एवं प्रकृतगोचरतयोक्तं प्रमाणाभावं परामिमतसर्वगोचरपरत्वेनोपसंहरति—**अत इति** । **न स्वाभिमतार्थसिद्धिः—स्वाभिमतं** प्रत्यक्षदौर्बल्यशास्त्रप्राबल्यादिकम् । एतत् खण्डनकाराद्युक्तकुतर्कनिरसनोपलक्षणार्थत्वमुक्तं, तत्र प्रमाणव्याप्त्यादिभङ्गः क्रियते, तत्रेदं प्रष्टव्यं–स्वाभिमतव्यतिरिक्तार्थपरं शास्त्रान्तरमपरमार्थार्थकमित्यस्मिन्नर्थे किं तव प्रमितिः, तत्साधनं वास्ति, उत नास्ति । अस्ति चेत्, न प्रमाणादिभङ्गः । नास्ति चेत्, तत एव न प्रमाणादिभङ्गः । प्रमिति–तत्साधनादिकमस्त्येव तद्व्यावहारिकमिति चेत्, किमिदं व्यावहारिकत्वं—किं परमार्थत्वम्, उतापरमार्थत्वम्, अपरमार्थभूतम् प्रमाणं—किं साधकम्, उतासाधकम् । साधकं चेत्, अपरमार्थसंज्ञितमन्येषां च प्रमाणं तत्पक्षसाधकमेव स्यात् । अथासाधकं, ततो निरर्थं वाग्व्यन्तराभ्युपगतप्रमाणादिकं साधकं भवेत् । लदुक्तं प्रमाणादिकं परमार्थभूतं चेत्, द्वैती विजयी स्यात्–इति । स्वपक्षपरपक्षभेदः—किं परमार्थः, उतापरमार्थः । परमार्थश्चेत्, न भेदमिथ्यात्वम् । अपरमार्थश्चेत्, परपक्ष एव त्वयाऽङ्गीकृतः स्यात्–इति भेदपारमार्थ्यं त्वयैवोक्तं स्यादिति–एवमादिव्याघाताः सर्वत्रानुसंधेया इत्यभिप्रायः ॥

अथ स्वपक्षसाधकप्रमाणाभावं प्रतिविवक्षुश्चोदयति **—नन्विति** । **कोऽयम**ित्याक्षिपति । व्यावहारिकस्वरूपं दर्शयति—**आपातेति** । दूषयति—**किं तेनेति** । साध्यनिश्चयरूपप्रयोजनं नेत्यर्थः । कुत इत्यत्राह—**प्रमाणतयेति** । **युक्त्या बाधो** यौक्तिकबाधः; धूमवुद्ध्या गृहीतबाष्पादेः साध्यनिश्चयाहेतुत्वादर्शनादित्यर्थः । एवं मूलोच्छेदित्वं वैषम्यमुपपादितं, पूर्वं परोक्तं परत्वाद्वैषम्यं दूषितम्, अथास्मात्परस्य कस्यचिद्बाधकस्याभावं वक्तुं ब्रह्मप्रतिपादकशास्त्रस्य प्रत्यक्षाद्वैषम्यं शङ्कते—**अथोच्येते**त्यादिना । बाधदर्शनाभावरूपं वैषम्यं शास्त्रस्य वक्तुं प्रत्यक्षविषयस्य बाधदर्शनमाह—**शास्त्रेति** । प्रत्यक्षविषयाच्छास्त्रविषयस्य वैषम्यमाह—**शास्त्रविषयस्येति** । पाश्चात्यबाधादर्शनाभ्युपगमेन दूषयति—**तदयुक्तमिति** । कुत इत्यत्राह—**अबाधितस्येति** । यस्य च दुष्टं कारणं, यस्य च मिथ्येति प्रत्ययः, स एवासमीचीनप्रत्यय इति हि नीतिविदः ।

---

१ शास्त्रमसंभा° ।

पारमार्थ्यनिश्चयात् । एतदुक्तं भवति—यथा मकलेतरकाचादिदोषरहितपुरुषान्तरागोचरगिरिगुहासु वसतस्तैमिरिकजनस्याज्ञातस्वतिमिरस्य सर्वस्य तिमिरदोषाविशेषेण द्विचन्द्रज्ञानमविशिष्टं जायते न तत्र बाधकप्रत्ययोत्पत्तिरिति न तन्मिथ्या न भवतीति—तद्विषयभूतं चन्द्रद्वित्वमपि मिथ्यैव । दोषो ह्ययथार्थज्ञानहेतुः, तथा ब्रह्मज्ञानमविद्यामूलत्वेन बाधकज्ञानरहितमपि स्वविषयेण ब्रह्मणा सह मिथ्यैवेति ।

भवन्ति चात्र प्रयोगाः—विवादाध्यासितं ब्रह्म मिथ्या; अविद्यावत उत्पन्नज्ञानविषयत्वात्—प्रपञ्चवत् । ब्रह्म मिथ्या; मिथ्याज्ञानविषयत्वात्—प्रपञ्चवत् । ब्रह्म मिथ्या; असत्यहेतुजन्यज्ञानविषयत्वात्—प्रपञ्चवदेव । नच वाच्यं—स्वाप्नस्य हस्त्यादिज्ञानस्यासत्यस्य परमार्थशुभाशुभप्रतिपत्तिहेतुभाववदविद्यामूलत्वेनामत्यस्यापि शास्त्रस्य परमार्थभूतब्रह्मविषयप्रतिपत्तिहेतुभावो न विरुद्ध—इति; स्वाप्नज्ञानस्यासत्यत्वाभावात् । तव हि विषयाणामेव मिथ्यात्वम्, तेषामेव हि बाधो दृश्यते न ज्ञानस्य । न हि 'मया स्वप्नवेलायामनुभूतं ज्ञानमिह न विद्यत' इति कस्यचिदपि प्रत्ययो जायते; 'दर्शनं तु विद्यतेऽर्थो न सन्ती'[1]तिहि बाधकप्रत्ययः । मायाविनो मन्त्रौषधादिप्रभवं मायामयं ज्ञानं सत्यमेव प्रीतेर्भयस्य च हेतुः; तत्रापि ज्ञानस्याबाधितत्वात् । विषयेन्द्रियादिदोषजन्यं रज्वादौ सर्पादिविज्ञानं सत्यमेव भयादिहेतुः । सत्यैवादष्टेरपि स्वात्मनि सर्पसंनिधानादष्टबुद्धिः । सत्यैव शङ्काविषबुद्धिर्मरणहेतुभूता । वस्तुभूत एव

अतो दुष्टमूलत्व-बाधकप्रत्ययौ प्रत्येकं मिथ्यात्वसाधकौ । व्याहतमिदं-यदबाधितस्याप्यपारमार्थ्यनिश्चय इति, अपरमार्थत्वेन निश्चितत्वं हि बाधितत्वमित्यत्राह—**एतदुक्तमिति । अज्ञातस्वतिमिरस्ये**ति पदं क्वचिद्दृश्यते । दोषज्ञाननिबन्धनपरोक्षबाधकज्ञानोदयव्युदासः प्रयोजनम् । ज्ञानस्वतिमिरस्येति तु पाठो लेखकस्खलनकृतः; स हि पुरुषान्तरागोचरत्वोक्तिविरुद्धः । **बाधकाभावे कथं मिथ्यात्वमित्यत्राह—दोषो हीति ।** भ्रान्तिसमानाश्रयबाधकज्ञानाभावेऽपि पुरुषान्तरज्ञानेन मिथ्यात्वनिश्चयो न व्याहत इत्यर्थः । तिरश्चां यावज्जीवं बाधोदयाभावेऽपि देहात्मधीर्मिथ्यार्थविषया; तस्याः संसर्गरूपदोषमूलत्वात्, बाह्यश्रमेषु स्पष्टोदाहरणस्य विवक्षितत्वादेव तदनुक्तिः । ननु तिरश्चां देहात्मभ्रमो नास्माकं प्रत्यक्षः; कार्यानवगमात्, भ्रमकारणदोषोऽपि दुरवगमः, तत्कथं दोषमूलत्वसंभावनाज्ञानमात्रेण मिथ्यात्वनिश्चयः उच्यते—अस्मदादेः शास्त्रश्रवणात्पूर्वं देहात्मभ्रमदर्शनात्, तेषां च शास्त्राधिकारभावात्—देहात्मभ्रमः, तन्मूलं देहसंसर्गरूपदोषवत्त्वं च अनुमीयते, दोषमूलत्वनिश्चयान्मिथ्यात्वनिश्चयः, एवं तैमिरिकजनस्य तिमिरान्वये आप्तवाक्यादिकमन्वेष्टव्यं, ततो मिथ्यात्वनिश्चयः । एवं सपक्षे शिक्षितमर्थं दार्ष्टान्तिके निगमयति—**तथेति । ज्ञानमिथ्यात्वं** परमताभ्युपगमादुक्तं, पाश्चात्यबाधादर्शनमुत्तरत्र निरसिष्यते, शास्त्रस्याविद्यामूलत्वाभ्युपगमेऽनिष्टं प्रसज्यति—**भवन्ति चेत्यादिना ।** व्याप्तिप्रदर्शनवचनत्वात्**प्रयोगा** इत्युक्तम् । प्रतिज्ञादृष्टान्त-हेतूक्तेरपि कथनमनिष्टप्रसङ्गः । एवमपि न्याय्य इति ज्ञापनार्थं **ज्ञानविषयत्व**मात्रमेको हेतुः । एको दुष्टपुरुषज्ञानविषयत्वम्, एको मिथ्याभूतसामग्र्योजन्यज्ञानविषयत्वमिति भिदा । पूर्वं सपक्षीभूत एवार्थोऽत्र सपक्ष इत्येवकारार्थः । ननु—असत्यहेतुजन्यधीविषयत्वमन्यतरासिद्धं, प्रपञ्चवदिति दृष्टान्तश्च साध्यविकलः—कथमेवं प्रसङ्गः उच्यते—ब्रह्मणोऽनुभूतिर्न स्वदुक्तैव प्रमज्यत इतिवत्प्रमङ्गप्रसङ्गनीयधर्मव्याप्ति परमतेनाभ्युपगम्य दूषणमुक्तमिति न विरोधः । **इति शास्त्रप्रत्यक्षविरोधे शास्त्रप्राबल्यनिरासः ॥**

नासत्यहेतुजन्यज्ञानविषयत्वादसत्यं ब्रह्मणः; असत्यादपि सत्यप्रतिपत्तिर्दृश्यते—इति शङ्कामनूद्य परिहरति—**न चेत्यादिना ।** किमसत्यस्य सत्योत्पत्तिहेतुत्वानुपपत्तिः, उत तज्ज्ञप्तिहेतुत्वानुपपत्तिः—इति विकल्पमभिप्रेत्य, उत्पत्तिहेतुत्वे, ज्ञप्तिहेतुत्वे चोदाहरणानि दर्शितानि, तत्र स्वाप्नविषयाणां सत्यत्वेऽभिमतेऽपि विषयासत्यत्वमभ्युपगम्य परिहरति—**स्वाप्नेति ।** ज्ञानस्य सत्यत्वमुपपादयति—**तत्र हीति ।** अवधारणं कथमित्यत्राह—**तेषामेवेति ।** ज्ञानस्याबाधं दर्शयति—**न हीति ।** कथं जायते इत्यत्राह—**दर्शनं त्विति ।** अन्यविषयो बाधो नान्यत्र संचारयितुं युक्त इत्यर्थः । अत्रानेकोदाहरणप्रदर्शनं-तत्तज्ज्ञानसामग्रीविशेषाणां सत्यत्वज्ञापनार्थं, तच्च ज्ञानसत्यत्वनिर्वहणार्थम् । स्वप्नकारणं पूर्वानुभवसंस्कारः सत्यः, प्रसिद्धत्वात्तदुक्तिः । **मायाविन इति । अत्र मन्त्रौषधादिप्रभव**मित्यनेन कारणस्य सत्यत्वमुक्तं, **मायामयं** मिथ्याविषयमित्यर्थः, विनिवेशविषयं वा । **विषयेत्यादि । विषय**दोषः सादृश्यादिः । **इन्द्रियदोषः** काचादिः । **आदि**शब्देन देशगतदूरत्वादिदोष उच्यते । **दोषश्च सत्यः । सत्यैवेति ।** सर्पसंनिधानं कारणं सत्यं, **दष्टबुद्धिश्च सत्या, शङ्काविषबुद्धावपि** सामग्री सत्या; निर्विशेषणमेवेदं वा, अन्धकारेऽश्मलोष्टादिनिपीडनं वा सत्यं हि भवति । **वस्त्विति ।** जलादि सत्यं, तत्कृतचाक्षुषतेजः-

१ निर्विशेषणम् ।

जलादौ मुखादिप्रतिभासो वस्तुभूतमुखगतविशेषनिश्चयहेतुः । एतेषां संवेदनानामुत्पत्तिमत्त्वान्, अर्थक्रियाकारित्वाच्च सत्यत्वमवसीयते । हस्त्यादीनामभावे कथं तद्बुद्धयः सत्या भवन्तीति चेन्न; एतद्बुद्धीनां सालम्बनत्वमात्रनियमात् । अर्थस्य प्रतिभासमानत्वमेव ह्यालम्बनत्वेऽपेक्षितम् । प्रतिभासमानता चास्त्येव दोषवशात् । स तु बाधितोऽसत्य इत्यवसीयते । अबाधिता हि बुद्धिः सत्यैवेत्युक्तम् । रेखया वर्णप्रतिपत्तावपि नासत्यात्सत्यबुद्धिः; रेखायाः सत्यत्वात् । ननु—वर्णात्मना प्रतिपन्ना रेखा वर्णबुद्धिहेतुः, वर्णात्मता

प्रतिहतिश्च सत्या । संवेदनानां सत्यत्वे निश्चिते ह्युक्तोदाहरणेषु सत्यात्मत्वप्रतिपत्तिरित्यत्राह—**एषामिति** । उत्पत्तिमत्त्वम्, अर्थक्रियाकारित्वं च द्वयमपि प्रत्येकं सत्यत्वे साधकं: न हि शुक्तौ रजतमुत्पत्तिमत्, न च कार्यकरम् ॥ **अथ**—ज्ञानसत्यत्वं विषयसत्यताव्याप्तं तन्निवृत्त्या ज्ञानसत्यत्वनिवृत्तिरिति शङ्कते—**हस्त्यादीनामिति** । **अभावे** प्रतिपन्नोपाधौ तथात्वाभावे । ज्ञानसत्यत्वं सालम्बनत्वमात्रव्याप्तम्: अबाधितत्वात्—इति परिहरति—**नैतदिति** । **सालम्बनत्वमात्र**शब्देन सत्यालम्बनत्वव्यावृत्तिः । मिथ्याभूतस्यालम्बनत्वं कथमित्यत्राह—**अर्थस्येति** । **आलम्बनं** विषयः । **प्रतिभासमानत्वमेव ह्यालम्बनत्वेऽपेक्षितमिति** । प्रतिभास्मानत्वमेव विषयत्वमित्यर्थः । अविद्यमानस्याप्यनीतानागताद्देः प्रतिभासमानस्यालम्बनत्वदर्शनात्, विद्यमानस्याप्यप्रतिभासमानस्य तदभावाच्चेति भावः । पक्षे प्रतिभास्मानत्वमप्यन्तीत्याह—**प्रतिभासेति** । **प्रतिभासमानता** संविदपेक्षया प्रतिसंबन्धित्वम् । अविद्यमानस्य विद्यमानतया भासनात्तेन रूपेणास्त्वना । तथा साक्षादवभासमानो विषयोऽपि ज्ञानहेतुः स्यात्; संप्रतिपन्नविद्यमानविषयवत्, विद्यमानतया भास्मानत्वाविशेषात् । तथा सति–असत्यात्मत्योत्पत्तिरित्यत्राह—**दोषवशादिति** । अविद्यमानस्य विद्यमानतया भासनहेतुर्दोष एव, न त्वविद्यमानो विषयः; अविद्यमानो विषयो न ज्ञानस्य हेतुत्वायाऽपेक्षितः, केवलविषयतया विद्यमानस्तु तथात्वेन भासमानो विषयतया हेतुतया चापेक्षितः । अतो वस्तुतो विद्यमानत्वमेव विषयस्य ज्ञानहेतुत्व उपाधिः, नियतपूर्वकालवर्तिनो हि हेतुत्वं दृष्टं, तस्मादविद्यमानस्य हेतुत्वायोगात् दोष एव हेतुः—इति नासत्यात्मत्योत्पत्तिरित्यर्थः । प्रतिभास्मानत्वे द्वयोरविशिष्टे कथमन्यतरस्यासत्यत्वनिश्चय इत्यत्राह—**स त्विति** । बुद्धिरप्यसत्या कि न स्यादित्यत्राह—**अबाधितेति** । विषयासङ्कावेन ज्ञानस्यासत्यताकथनं कालात्ययापदिष्टमित्यर्थः ॥

ननु—स्वाप्नादिविषयज्ञाने किं ज्ञानमात्रं शुभाशुभप्रतिपत्तिहेतुः, उत ज्ञानविशेषः । ज्ञानमात्रपक्षे—अतिप्रसङ्गः । ज्ञानविशेषश्चेत्–कस्तस्यावच्छेदकः, विषयश्चेत्–कि विषय उपलक्षणतयावच्छेदकः, उत विशेषणतया । यदि विशेषणनया, तदा विशेष्येण सह कार्यान्वयी हि विशेषणमतो हस्त्यादेरपि शुभाशुभप्रतिपत्तिहेतुत्वादसत्यात्सत्यप्रतिपत्तिः । यद्युपलक्षणतया, उपलक्ष्यबहिर्भूत उपलक्ष्यप्रतिपत्त्युपायो ह्युपलक्षणम्–अतो विषयस्य ज्ञानप्रतिपत्तिहेतुत्वादसत्यात्सत्यप्रतिपत्तिः । ज्ञानानां तत्तद्व्यवहारानुगुण्यलक्षणस्वभावविशेषैर्व्यावृत्तत्वान्नातिप्रसङ्गः—इति चेन्न वाच्यं; व्यवहारानुगुण्यमात्रस्य व्यावर्तकत्वे–अतिप्रसङ्गात्, व्यवहारविशेषानुगुण्यस्य व्यावर्तकत्वे—तद्विशेषश्च तत्संग्राहकविषयाधीन इति व्यवहारावच्छेदकतया अनृतस्य सत्यहेतुत्वम्—इति । अत्रोच्यते—व्यावृत्तमेव ज्ञानं शुभाशुभाद्यनुमापकं, व्यावृत्तिश्च स्वालम्बनेन, अविद्यमानस्याप्यालम्बनत्वं दोषवशादित्युक्तम्, अन्यथाख्यातिपक्षेऽप्यालम्बनसत्यता सर्वज्ञानानामिष्यत एव, विशेषणविशेष्यतसंसर्गाणां क्वचित्सत्यत्वात्, विशेषणविशेष्ययोस्तथात्वनिर्वाहकसंसर्गः स्वस्य तदीयत्वे संसर्गान्तरनिरपेक्षः, न तु संसर्गः पुरोवर्तिनि भ्रमाधिष्ठाने प्रतीयमानः पुरोवर्त्यपेक्षया स्वयं स्वस्य संसर्गरूपत्वनिर्वहणासामर्थ्यात्—पुरोवर्तिनि नास्तीति पुरोवर्त्यपेक्षया संसर्गोऽपरमार्थः, न तु स्वरूपेण । आलम्बनत्वे च सन्निहितत्वरूपमनपेक्षितम्, असन्निहितस्याप्यालम्बनत्वदर्शनात्, अतः सत्येन रूपेणालम्बनत्वमिति । हस्त्यारोहणादिज्ञानान्यपि सत्यभूतहस्त्याद्यालम्बनावच्छिन्नानि; परमार्थभूतया स्वप्नावस्थयावच्छिन्नत्वात्, जाग्रदवस्थाज्ञानविलक्षणानि शुभाशुभप्रतिपत्तिनिमित्तानि अतो नातिप्रसङ्गः, नासत्यात्सत्यप्रतिपत्तिश्च ॥ नच—प्रतिबिम्बाद्धिम्बानुमितावसत्यात्सत्यप्रतिपत्तिः; प्रतिबिम्बप्रतिभासस्य सत्यस्यैवानुमापकत्वात्, परमार्थतस्तु तत्र नानुमापकानुमेयविभागः; दर्पणादिप्रतिहतैश्चाक्षुषतेजोभिर्बिम्बस्यैव दर्पणस्थतया गृह्यमाणत्वात्–अतः क्वचिदर्थात्प्रतिपत्तिः, क्वचित्प्रतिभासात्तत्तदर्थप्रतिपत्तिरिति नासत्यस्य लिङ्गत्वम् । किंच–असत्यात्सत्यप्रतिपत्तिः कि भवत्पक्षेणोच्यते, उतास्मत्पक्षेण । न तावद्भवत्पक्षे सा सिध्यति; शुभाशुभयोरपि मिथ्यात्वेनासत्यादसत्यप्रतिपत्तिरेव हि स्यात् । न चास्मत्पक्षे; यथार्थख्यात्यभ्युपगमात्—सत्यादेव सत्यप्रतिपत्तेः । एतेषां स्वाप्नहस्त्यादिज्ञानादीनां शुभाशुभप्रतिपत्त्यादिहेतुभूतानां षण्णामुदाहरणज्ञानानां संस्कारादिसत्यसामग्रीकत्वं स्पष्टं ज्ञानानां सत्यत्वमुपपादितम्, अत उत्पत्तौ ज्ञप्तौ च हेतुसत्यत्वं सिद्धम् ॥

अथ ज्ञानव्यतिरिक्तासत्यहेतुना सत्यप्रतिपत्तौ हेतुसत्यत्वमुपपाद्यते—**रेखयेत्यादिना** । हेतोरसत्यत्वं दर्शयंश्चोदयति—

त्वमत्या, नैवम् : वर्णात्मताया असत्याया उपायत्वायोगात्। असतो निरुपाख्यस्य ह्युपायत्वं न दृष्टम्, अनुपपन्नं च। अथ तस्यां वर्णबुद्धेरुपायत्वम्। एवं तर्ह्यसत्यात्सत्यबुद्धिर्न स्यात्; बुद्धेः सत्यत्वादेव। उपायोपेययोरैक्यप्रसङ्गश्च; उभयोर्वर्णबुद्धित्वाविशेषात्। रेखाया अविद्यमानवर्णात्मनोपायत्वे च—एकस्यामेव रेखायामविद्यमानसर्ववर्णात्मकत्वस्य सुलभत्वादेकरेखादर्शनात्सर्ववर्णप्रतिपत्तिः स्यात्। अथ पिण्डविशेषे देवदत्तादिशब्दसंकेतवच्चक्षुर्ग्राह्यरेखाविशेषे श्रोत्रग्राह्यवर्णविशेषसंकेतवशाद्रेखाविशेषो वर्णविशेषबुद्धिहेतुरिति, हन्त तर्हि सत्यादेव सत्यप्रतिपत्तिः; रेखायाः, संकेतस्य च सत्यत्वात्। रेखागवयादपि सत्यगवयबुद्धिः सादृश्यनिबन्धना, सादृश्यं च सत्यमेव। नच—एकरूपस्य शब्दस्य नादविशेषेणार्थविशेषभेदबुद्धिहेतुत्वेऽप्यसत्यात्सत्यप्रतिपत्तिः; नानानादाभिव्यक्तस्यैकस्यैव शब्दस्य तत्तन्नादाभिव्यङ्ग्यस्वरूपेणार्थविशेषैः सह संबन्धग्रहणवशादर्थभेदबुद्ध्युत्पत्तिहेतुत्वात्। शब्दस्यैकरूपत्वमपि न साधीयः; गकारादेर्बोधकस्यैव श्रोत्रग्राह्यत्वेन शब्दत्वात्। अतोऽसत्याच्छास्त्रात्सत्यब्रह्मविषयप्रतिपत्तिर्दुरुपपादा।

नन्विति। परिहरति—**नैवमिति**। वर्णात्मकता—किं सत्तया वर्णप्रतिपत्तेरुपायः, उत प्रमितितया, उत प्रतीततया—इति विकल्यमभिप्रेत्याह—**असत इति**। असत्त्वात्तस्योपायत्वमनुपपन्नमित्यसत इति पदस्याभिप्रायः। **असतः** सत्त्वनिरिक्तस्येत्यर्थः। असत्त्वादेव प्रमितनयोपायत्वं चानुपपन्नमिति **निरुपाख्य**शब्दाभिप्रायः। **उपाख्या** प्रमितिस्तदविषयत्वं निरुपाख्यत्वम्। प्रतीतिविषयतयोपायत्वानुपपत्तिस्तु वक्ष्यते। सत्ताप्रमित्योरभावेऽपि वर्णात्मतया उपायत्वमस्तीति कल्प्यते चेत्—तदनुपपन्नः व्याभिविरोधात्, व्याप्त्यनुगुणं हि कल्पनं प्रवर्तत इत्यभिप्रायेणाह—**अनुपपन्नं चेति**। अथ भ्रान्तितः प्रतीतायां वर्णात्मतायां वर्णप्रतिपत्तिहेतुत्वपक्षेऽपि बुध्यंशस्य हेतुत्वे परस्यानुपपत्तिं दर्शयितुमाह—**अथेति**। **दूषयति—एवं तर्हीति**। कुत इत्यत्राह—**बुद्धेरिति**। दूषणान्तरमाह—**उपायेति**। तदुपपादयति—**उभयोरिति**। बुध्यंशस्य हेतुत्वे दूषणमुक्तं, वर्णात्मतांशस्य हेतुत्वे सिंहावलोकितकेन दूषणमाह—**रेखाया इति**। **अविद्यमानवर्णात्मना** अविद्यमानवर्णात्मकत्वेनेत्यर्थः। अतिप्रसङ्गपरिहारार्थं शङ्कते—**अथेति**। तत्रापि स्वमतसिद्धिमाह—**हन्तेति**। तदुपपादयति—**रेखायामिति**। उदाहरणान्तरं परिहरति—**रेखागवयादिति**। **इत्यसत्यस्य सत्यप्रतिपत्तिहेतुत्वभङ्गः**॥

स्फोटवादावलम्बनेनोच्यमानमुदाहरणान्तरं परिहरति—**न चैकरूपस्येत्यादिना**। नादैः स्फोट्यत इति व्युत्पत्त्या **स्फोट** एकरूपः शब्दः, तदभिव्यञ्जकनादविशेषाः बहवः, कलखलगलादिभेदो व्यञ्जकगतः, शब्द आरोपितोऽर्थविशेषप्रतिपत्तिहेतुः, तत्रासत्यात्सत्यप्रतिपत्तिरित्यपि न युक्तमित्यर्थः। कुत इत्यत्राह—**नानानादेति**। खलगलादिविशेषान्वितनानादकृतोऽभिव्यक्तिविशेषः सत्यः, तद्विशिष्टः सत्यशब्दोऽर्थप्रतिपत्तिहेतुरित्यर्थः। यद्यपि खलगलादिवैशिष्ट्यं शब्दस्यारोपितं, तथापि तज्ज्ञानं सत्यमेवार्थप्रतिपत्तिहेतुः, ज्ञानस्य च सत्येनैवालम्बनेन स्वाप्रज्ञानवद्यावृत्तिरनुसंधेया। कलाद्यालम्बनाभिव्यक्तिविशिष्टरूपेण स्फोटस्यार्थप्रतिपत्तिहेतुत्वसंभवात्—कलादिवैशिष्ट्यस्यासत्यस्यार्थस्य नार्थप्रतिपत्तावुपयोगः। एवं शब्दस्यैकरूपत्वमभ्युपगम्य परिहृत्य, अथ तदनभ्युपगमेन परिहरति—**शब्दस्यैकरूपत्वमपीति**। कुत इत्यत्राह—**गकारादेरिति**। एवकारेण-करूपशब्दो व्यावर्त्यते, न तु दुन्दुभिशब्दादिः। स ह्यनभिव्यक्तिविशेषाकारो गकारादिरेव। 'अथ गौरित्यत्र कः शब्दः, गकारौकारविसर्जनीया—इति हि भगवानुपवर्षः' इति गकारादेरेव बोधकत्वं व्याचख्युः। ननु—'तार्स्मिंस्तस्मिंस्तु तन्मात्रं तेन तन्मात्रता स्मृतेः' इति शास्त्रवशादेकरूपं शब्दमात्रमभ्युपगन्तव्यं तत्कथं तत्प्रतिक्षेपः, नैवं तैन्मात्रावस्थसूक्ष्मभूतकारणगुणानामिन्द्रियग्राह्यत्वायोगात्। पञ्चीकृतभूतगुणानामेव ह्यैन्द्रियकत्वम्। किंच—दध्यवस्थायां दुग्धावस्थेव तन्मात्रावस्था, आकाशगुणभूतं शब्दतन्मात्रं स्थूलाकाशस्पृष्टेः पश्चान्न विद्यते। यथा महाभूततृतीये तेजसि शुक्लकृष्णादिवर्णव्यतिरेकेण रूपतन्मात्रं किंचिदस्ति, शुक्लत्व-कृष्णत्वादयश्चाभिव्यञ्जकगता एकरूपे आरोपिता—इति च वक्तुमयुक्तम्, एवमिदानीमेकरूपशब्दस्य विद्यमानत्वं, तत्राभिव्यञ्जकगतानां कलखलादीनामागोपितत्वं च सर्गप्रतिपादकशास्त्रानुसारिभिरभ्युपेतुमयुक्तम्। अत्रायमभिसन्धिः—वर्णातिरिक्त एकरूपः शब्दः—किं स्फुटप्रतिपन्नत्वादभ्युपगम्यते, उत कल्पनावशात्। न प्रथमः; गकारादिव्यतिरिक्तस्य कस्यचिदनुपलम्भात्। न द्वितीयः; कल्पकाभावादिति। ननु—वर्णानां वाचकत्वानुपपत्तेः, एकं पदमित्यादिप्रत्ययस्य वर्णेष्वनुपपत्तेः, भिन्नेषु वर्णेषु 'शब्दः शब्द' इत्यनुवृत्तिबुद्धिवशाच्च—वर्णातिरिक्तपदस्फोटसिद्धिः, तत एव न्यायात्पदसंघातातिरिक्तवाक्यस्फोटसिद्धिश्चेत्यत्राह—**गकारादेरिति**। गकारादिवर्णानामेव समुदितानां वाचकत्वम्, एकं पदमेकं

---

१ व्याकरणे। २ तन्मात्रावस्थायां सू°।

ननु—न शास्त्रस्य गगनकुसुमवदसत्यत्वम्, प्रागद्वैतज्ञानात्सद्बुद्धिबोध्यत्वात्। उत्पन्ने तत्त्वज्ञाने ह्यसत्यत्वं शास्त्रस्य। न तदा शास्त्रं निरस्तनिखिलभेदचिन्मात्रब्रह्मज्ञानोपायः। यदोपायस्तदास्त्येव शास्त्रम्; अस्तीति बुद्धेः, नैवम्; असति शास्त्रेऽस्ति शास्त्रमिति बुद्धेर्मिथ्यात्वात्। ततः किम्, इदं ततः—मिथ्याभूतशास्त्रजन्यज्ञानस्य मिथ्यात्वेन—तद्विषयस्यापि ब्रह्मणो मिथ्यात्वम्। यथा—धूमबुद्ध्या गृहीतवाष्पजन्या-

---

वाक्यमिति प्रत्ययश्च वर्णसमुदायविषयः, 'शब्दः शब्द' इत्यनुवृत्तिबुद्धिश्च श्रोत्रग्राह्यत्वोपाधिनिबन्धना, अतः कल्पकानामन्यथासिद्धत्वान्नैकरूपशब्दसिद्धिरित्यर्थः। ननु न कल्पकान्यथासिद्धिः, तथाहि—न तावदेकैकस्य वर्णस्य वाचकत्वं वर्णान्तरवैयर्थ्यात्, गकारमात्रेण गोगवयगजाद्यप्रतिपत्तेश्च। नापि वर्णसमुदायो वाचकः; क्रमोच्चारितश्रुतानां वर्णानां यौगपद्याभावेन वृक्षादीनामिव समुदायभावानुपपत्तेः। न च पूर्वपूर्ववर्णश्रवणजनितसंस्कारसचिवोऽन्त्यवर्णो वाचक इति युक्तं; वर्णानुभवजनितसंस्काराणामनुभूतवर्णविषयस्मरणहेतुतयाऽननुभूतार्थान्तरप्रतीतिहेतुत्वाभावेनाकिंचित्करत्वात्, तत्साचिव्यविरहितान्त्यवर्णस्य चार्थप्रत्यायकत्वायोगात्, तथा वर्णानां भिन्नत्वादेकं पदमिति प्रत्ययश्च तदतिरिक्तार्थविषयो भवितुमर्हति। नच—वनसेनादिप्रत्ययवत्समुदायविषयत्वमेकत्वप्रत्ययस्य युक्तम्: एकप्रदेशसंवन्धित्वादिवदेकीकारनिमित्तोपाध्यभावात्। एकस्मृत्यारूढत्वमुपाधिरिति—चेन्न; 'द्वे पदे, त्रीणि पदानि, बहूनि वाक्यानि' इत्यनेकेषामप्येकप्रत्ययारूढत्वदर्शनात्। न च—एकार्थावच्छिन्नवर्णसमुदाय एकं पदं; वर्णानां वाचकत्वानुपपत्तेरेवैकार्थप्रतिपादनाभावात्। किंच—बहुषु वर्णेष्वयं शब्दोऽयं शब्द' इत्यनुवृत्तः शब्दशब्दो वर्णातिरिक्तविषयो युक्तः; घटकरकपवरकादिभेदेऽप्येकार्थविषयस्याकाशशब्दस्य हि घटकरकाद्यतिरिक्तार्थविषयत्वं दृष्टम्। न च श्रोत्रग्राह्यतोपाधिना शब्दशब्दानुवृत्तिरिति युक्तं; श्रोत्रस्य श्रोत्रग्राह्यत्वायोगेन—श्रोत्रग्राह्यताया अपि श्रोत्रेण ग्रहीतुमशक्यत्वात्। मानान्तरेण श्रोत्रग्राह्यताप्रतीतौ—अविलम्बितशब्दसाक्षात्कारानुपपत्तिः, अतः कल्पकान्यथासिद्ध्यभावाद्वर्णातिरिक्तः शब्दस्फोट इति॥

अत्रोच्यते—न तावद्वर्णानां वाचकत्वानुपपत्त्या स्फोटसिद्धिः; तेषां स्फोटाभिव्यञ्जकत्वेऽपि चोद्यपरिहारयोस्तुल्यत्वात्—लाघवन्यायेन वर्णानामेव वाचकत्वाश्रयणस्य न्याय्यत्वात्। तथाहि—न तावदेकैकवर्णः स्फोटव्यञ्जकः; द्वितीयवर्णवैयर्थ्यात्, गकारमात्रेण गवयादिपदस्फोटाभिव्यक्तिप्रसङ्गाच्च। नापि वर्णसमुदायो व्यञ्जकः; क्रमोच्चरितश्रुतानां वर्णानां यौगपद्याभावेन—समुदायभावानुपपत्तेः। न च पूर्वपूर्ववर्णजनितसंस्कारसचिवोऽन्त्यवर्णो व्यञ्जकः; वर्णानुभवजन्यसंस्काराणामनुभूतवर्णस्मृतिमात्रे हेतुतया—अननुभूतस्फोटप्रतीतिहेतुत्वायोगेन, तत्संस्कारानुपकृतस्य, अन्त्यवर्णस्य च तदभिव्यञ्जकत्वायोगात्। यद्युच्येत—पदं तावत्प्रतीयते अतस्तत्प्रतीत्यनुरूपं कारणं कल्प्यं, क्रमभाविनामपि संस्काराणां युगपत्कार्यकरत्वं युक्तं; क्रमदृष्टयोरपि घटयोस्तौ घटाविति स्मरणदर्शनात्, अतो युगपद्भाविपूर्ववर्णस्मरणसचिवोऽन्त्यवर्णो वा, युगपत्स्मर्यमाणसर्ववर्णसमुदायो वा स्फोटाभिव्यञ्जक इति। एवं तर्हि स्फोटाभिव्यञ्जकतया अभ्युपेतायाः सामर्थ्या अर्थाभिव्यञ्जकत्वमास्थीयतां; चोद्यपरिहारयोस्तुल्यत्वात्, अन्यथासिद्ध्यार्थान्तरकल्पकत्वायोगात्, वर्णानामेव वाचकत्वसंभवे तदतिरिक्तकल्पनानुपपत्तेः, लाघवन्यायस्य बलीयस्त्वाच्च। वर्णानां भिन्नत्वेऽपि युगपद्बुद्धिस्थैकविभक्त्यन्तानेकवर्णसमुदायविषयतया पदैकत्वबुद्धिरपि नार्थान्तरकल्पिका। नच अर्थैकत्वात्पदैकत्वं, पदैकत्वादर्थैकत्वम्—इत्यन्योन्याश्रयः; एकविभक्त्यन्तवर्णसमुदायस्यैकपदत्वनिश्चयात्। सुप्तिङन्तं पदमिति हि पदनिष्कर्षः, तस्य चोक्ताभिप्रायत्वे सत्यव्याप्तिर्न स्यात्। एकव्युत्पत्तिसिद्धैकार्थप्रतीत्युपयुक्तवर्णसमुदायस्य वा पदत्वम्। बहुषु वर्णेष्वयं शब्दोऽयं शब्द' इति प्रत्ययोऽपि श्रोत्रग्राह्यत्वोपाधिनिबन्धनत्वादन्यथासिद्ध—इति नार्थान्तरसिद्धिः। नच—श्रोत्रग्राह्यताया अपि श्रोत्रेण ग्रहणापेक्षा; यथा चाक्षुषाणां धवलिमपीतिमनीलिम्नां चाक्षुषत्वज्ञाने न चक्षुरपेक्षा। 'इदं चाक्षुषमिदं चाक्षुष'मिति व्यवहारश्चाक्षुषत्वज्ञाननिबन्धन एव, प्रमाणान्तरावगतचक्षुःश्रोत्राद्यन्वयव्यतिरेकानुविधायिज्ञानगोचरत्वेन चाक्षुषश्रावणत्वादिज्ञानं चक्षुरादिकं नापेक्षते। न हि सहसैव शब्दोऽयमिति जानन्ति; प्रथमं गकारादिरूपेणैव शब्देऽवसिते व्युत्पन्नशब्दस्मरणपूर्वकमेव शब्द इत्यवगम्यते, अतः शब्देन स्मरणकृतविलम्बवत् श्रोत्रग्राह्यताऽनुमानविलम्बोऽपि अभ्यासपाटवकृतात् शैघ्र्यात् न विविच्यते, अतो वर्णसमुदाय एवपदं पदसमुदाय एव वाक्यमिति स्थितम्॥ असत्यात्सत्यप्रतिपत्तिनिराकरणमुपसंहरति—**अत इति। इति स्फोटवादनिरासः॥**

सत्यप्रतिपत्तिहेतुषु सत्यतया अभिमतेषु यादृशं सत्यत्वं तादृशं सत्यत्वं शास्त्रस्याप्यस्तीत्यभिप्रायेण चोदयति—**नन्विति। गगनकुसुमवदिति** युक्तिबाधो ह्युक्तः, न खिदानीमेव लौकिकपुरुषैर्नास्तीति प्रतिपन्नत्वम्, अतस्तादृशम**सत्यत्वं** नेत्यर्थः। हेतुमाह—**सद्बुद्धिबोध्यत्वादिति।** सदिति बोध्यत्वमेव कार्यकरत्वानुगुणं, न सत्यत्वमित्यर्थः। तर्हि सदद्वैतभङ्गः स्यादित्यत्राह—**उत्पन्न इति।** तर्हि न बोधकमित्यत्राह—**न तदेति।** परिहरति—**नैवमिति। नैवम्** उपायकालेऽपि

---

१ बुद्धिः। २ भावानुभूतवर्णविषयस्मरणानुप० का. मु. पु.। ३ जनित०।

मिज्ञानस्य मिथ्यात्वेन तद्विषयस्याग्नेरपि मिथ्यात्वं, पश्चात्तनबाधादर्शनं चासिद्धम्; शून्यमेव तत्त्वमिति वाक्येन तस्यापि बाधदर्शनात्। तत्तु भ्रान्तिमूलमिति चेत्, एतदपि भ्रान्तिमूलमिति त्वयैवोक्तं, पाश्चात्यबाधादर्शनं तु तस्यैवेत्यलमप्रतिष्ठितकुतर्कपरिहसनेन। यदुक्तं—वेदान्तवाक्यानि निर्विशेषज्ञानैकरसवस्तुमात्रप्रतिपादनपराणि 'सदेव सोम्येदमग्र आसीत्' (छा. ६।२।१) इत्येवमादीनि—इति, तदयुक्तम्; एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपादनमुखेन सच्छब्दवाच्यस्य परस्य ब्रह्मणो जगदुपादानत्वं, जगन्निमित्तत्वं,

---

सत्यत्वं नास्तीत्यर्थः। **ज्ञानस्य मिथ्यात्वं** मिथ्यार्थविषयत्वात् ज्ञानस्य दोषमूलत्वात्। विषयमिथ्यात्वे निदर्शनमाह—**यथेति**। पूर्वं पश्चात्तनबाधादर्शनमभ्युपेत्य दूषणमुक्तम्, इदानीं तदेव नास्तीत्याह—**पश्चादिति**। तदुपपादयति—**शून्यमिति**। तद्वाक्यं, तत्प्रामाण्यमपि भ्रान्तिसिद्धमिति शङ्कते—**तत्त्विति**। तुल्यत्वमाह—**एतदपीति**। पाश्चात्यबाधादर्शनस्य प्रामाण्यहेतुत्ववचनं सर्वशून्यवादिन एव साधकं; ततः परं निषेध्याभावेन निषेधानुदयादित्याह—**पाश्चात्येति**। प्रामाण्यादीनां दोषमूलत्वं द्वयोरपि तुल्यं, पाश्चात्यबाधादर्शनं तु शून्यवादिनोऽधिकमित्यर्थः। सर्वशून्यवादिनोऽपि परो निषेधोऽस्ति; सर्वमस्तीति वचनं हि नन्निषेध इति चेत्, नहि प्रपञ्चमिथ्यात्ववचनस्यापि प्रपञ्चसत्यतावचनं निषेधः स्यात्। नास्तीति वचनमेव च निषेध इति चेत्, तत्तु शून्यवादिन एवेति भावः। इदं च वेदाप्रामाण्यं **मृषावादिनां, सौगतानां** च समानम्। यदाहुः—**'वेदोऽनृतो बुद्धकृतागमोऽनृतः प्रामाण्यमेतस्य च तस्य चानृतम्। बोद्धाऽनृतो बुद्धिफले तथाऽनृते यूयं च बौद्धाश्च समानसंसदः'** ॥ ननु—विषयसत्यत्वरूपं शास्त्रप्रामाण्यं विद्यत इति महदिदं वैषम्यमस्माकमिति चेन्न;—किं कतिपयविषयसत्यत्वं विवक्षितम्, उत कृत्स्नविषयसत्यत्वम्। कतिपयविषयसत्यत्वं बुद्धागमस्याप्यस्ति; संवित्स्वयंप्रकाशत्वादेः संप्रतिपन्नत्वात्। कृत्स्नविषयसत्यत्वं तु श्रुतेरपि त्वयाऽपि न स्वीकृतमिति। किंच—विषयसत्यत्वं दुर्वचं; सत्यतयाभ्युपेतस्य ब्रह्मणः प्रमाणविषयत्वानभ्युपगमात्। यत्त्वा'दित्यो यूपः' इत्यत्र यूपादित्यैक्याप्रतिपादनं तात्पर्यलिङ्गाभावात्, ननु प्रत्यक्षप्राबल्यादित्युच्यते—तत्र तात्पर्यलिङ्गाभावोऽभ्युपेत एव, तेन प्रत्यक्षविरुद्धार्थप्रतिपादनाक्षमत्वमवर्जनीयमापतति। नहि वेदान्तिभिरर्थवादादेरन्यपरत्वात्स्वार्थे प्रामाण्यं त्यज्यते; मन्त्रार्थवादानामपि स्वार्थे प्रामाण्यस्य मयैवोपपादितत्वात्, अतः स्तुतिपरत्वात् यूपादित्यैक्याप्रतिपादनमित्यपसिद्धान्तः। अर्थवादानां स्वार्थे प्रामाण्यमस्तीति कथं तद्यूपादित्यैक्याप्रतिपादनमिति चेत्, उच्यते—प्रमाणविरोधश्च तात्पर्यलिङ्गम्; उपक्रमोपसंहाराद्यपूर्वत्वमपि तात्पर्यलिङ्गतया ह्युक्तम् 'अभ्यासोऽपूर्वता फलं'मिति। **अपूर्वत्वं** साधकबाधकप्रमाणागोचरत्वं; यथाहुः—**'असन्निकृष्टवाचा च द्वयमत्र जिहासितम्। तादृप्येण परिच्छित्तिस्तद्विपर्ययतोऽपि वे'**ति। अतः प्रमाणान्तरागोचरत्वलक्षणं तात्पर्यलिङ्गमत्र नास्तीति—यूपादित्यैक्याप्रतिपादनं, न स्वर्थवादत्वेन स्वार्थे प्रामाण्याभावादिति। अतस्तात्पर्यलिङ्गाभावो नाम प्रत्यक्षविरोधे पर्यवसित इति—शास्त्रं न तद्विरुद्धार्थप्रतिपादनक्षमम्। शास्त्रप्राबल्यनिरसनं परिसमापयति—**अलमिति**। यद्वा, यत्तु प्रत्यक्षमित्यादिना न्यायमुखेन कृतं परपक्षप्रतिक्षेपमुपसंहरति—अलमिति। प्रमाणविरुद्धस्तर्कः **कुतर्कः**, तत्र एवाप्रतिष्ठितत्वम्। स्वविरुद्धबौद्धमतोपयुक्तयुक्तिकथनात्**परिहसनीयत्वम्**। परेण—प्रत्यक्षादिपि शास्त्रस्य प्राबल्यं वदता प्रबलतयाऽभिमतं शास्त्रं पुरस्कृत्य पश्चात्तर्कः प्रतिपादितः, सिद्धान्ते तु—प्रबलतया अभिमतलौकिकप्रमाणगतिं प्रथमं निरूप्य परोक्तदुस्तर्कं निरस्य, लौकिकप्रमाणविरोधे शास्त्रप्राबल्यं च प्रतिक्षिप्तम्। **इति प्रागद्वैतज्ञानाच्छास्त्रासत्यत्वदूषणम्** ॥

शास्त्रस्य लौकिकप्रमाणविरुद्धार्थप्रतिपादनासामर्थ्योपपादनेन शास्त्रस्य सविशेषपरत्वं सामान्यतः सामर्थ्यात्सिद्धं, विशेषेण शब्दस्य पदवाक्यरूपेण प्रवृत्त्या, सविशेषपरतोपपादनाच्च—शास्त्रस्य सविशेषपरत्वं सामान्येन सिद्धम्, अथापि ये वाक्यविशेषाः परेण निर्विशेषपरत्वेनोदाहृताः तेषां सविशेषपरत्वं वाक्यतात्पर्यपर्यालोचनया प्रतिपादयितुमारभते—**यदुक्तमित्यादिना। तत्र निर्विशेषपरत्वं** संग्रहेणानुवदति—**यदुक्तमिति**। ज्ञानैकरसत्वेन शोधकवाक्येषु प्रतिपन्नत्वान्निर्विशेषत्वं, तत्र कारणवाक्येषु प्रतिपन्नम्। **वस्तुमात्र**शब्देनान्यत्र सगुणे ब्रह्मणि तात्पर्याभावः सूच्यते। इत्यादीनीत्युक्ते तस्यामेवोपनिषदि पर्यवस्यतीति तथात्वेत्यर्थमित्येवमादीनीत्युक्तम्। तद्दूषयति—**तदयुक्तमिति**। कुत इत्यत्राह—**एकविज्ञानेनेति। येनाश्रुतमि**त्यादिवाक्येनैकविज्ञानेन सर्वविज्ञानं प्रतिज्ञायते। अस्यायमर्थः—येन श्रुतेन, मतेन, विज्ञातेन—अश्रुतम्, अमतम्, अविज्ञातम्—श्रुतं, मतं, विज्ञातं भवतीति, न तु ब्रह्मणः सत्तया सर्वं ज्ञातं भवतीति; दार्ष्टान्तिकसामर्थ्यात्, मृद्दृष्टान्तसामर्थ्याच्च। न हि ब्रह्मसत्तया, मृत्पिण्डसत्तया वा तैत्तत्कार्यं ज्ञायते; 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती'ति मुण्डकोपनिषदि, 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदित'मिति बृहदारण्यके च श्रवणात्। अतो

---

१ स्वार्थे तात्पर्यम्°। २ प्रमाणान्तरादि°। ३ तत्कार्यता।

यथोक्त एव प्रतिज्ञावाक्यार्थः। नहि—घटज्ञानेन पटज्ञानसंभव इति—एकविज्ञानेन सर्वविज्ञानं न संभवतीति शङ्कायां कार्यकारणयोस्तदृष्टमित्याह—**यथा सोम्येति**। तत्राप्यसत्कार्यवादमुखेनैकविज्ञानेन सर्वविज्ञानानुपपत्तिशङ्कां परिहरति—**वाचारम्भणमिति**। **वाचा** वाक्शब्दोऽजहल्लक्षणया वाक्पूर्वव्यवहारपरः, **वाचे**ति तृतीयया प्रयोजनतया हेतुत्वं विवक्षितम्। **आरम्भण**मिति कर्मणि ल्युट्, आरभ्यते—आलभ्यते इत्यारम्भणम्, 'आलम्भः सर्गहिंस्रयोः'। **मृत्पिण्डेने**त्यर्थसिद्धम्। **विकारो** घटलक्षद्रव्यत्वाद्यवस्था। वाक्पूर्वकहानादिव्यवहारार्थं मृत्पिण्डेन नामरूपे स्पृश्येते—मृत्पिण्डो नामरूपभाग् भवतीत्यर्थः। कार्यकारणयोरेकद्रव्यत्वे प्रमाणमाह—**मृत्तिकेत्येव सत्यमिति**। 'मृदयं घट' इति प्रत्यभिज्ञया—मृन्मयं घटादिकमपि मृद्द्रव्यत्वेनैव प्रामाणिकमित्यर्थः। बुद्धिशब्दादिभेदाः घटपटादिषु द्रव्यभेदेऽपि दृष्टाः, 'आस्ते शेते, सुख्यहं दुःख्यहं' मित्यादिषु द्रव्यैक्येऽपि दृष्टाः, अतस्ते साधारणाः, तत्र 'आस्ते शेते, सुख्यहं दुःख्यहं'मित्यादिषु द्रव्यैक्यनियामिका या प्रत्यभिज्ञा सैवात्रापि द्रव्यैक्यनियामिकेति भावः। अत्र मृत्तिकामात्रस्य पारमार्थ्यं, विकारासत्त्वं च विवक्षितं चेत्, **इति**शब्दवैयर्थ्यं स्यादिति—तदा मृत्तिकैव सत्येति हि वाच्यम्। विकारासत्त्वे दृष्टान्तः साध्यविकलः। सत्त्वप्रतिपत्तेर्घटादिसत्त्वं व्यावहारिकमिति चेत्, मृत्पिण्डस्यापि सत्त्वं व्यावहारिकमिति—न कारणसत्त्वसिद्धिः। कारणस्य व्यावहारिकमेव सत्त्वमभिमतं चेत्, तद् घटादेरपि तुल्यं स्यात्। कार्यकारणद्रव्यैक्यात्—कारणविज्ञानेन कार्यविज्ञानमुपपन्नमस्तु, तथाऽपि लोके विविधकार्यवर्गस्य विविधोपादानकत्वदर्शनादेकविज्ञानेन सर्वविज्ञानमुपपन्नम्—इति शङ्कायां जगतो ब्रह्मैककारणतामाह—**सदेव सोम्येदमग्र आसीदिति**। श्रुतिगत**सच्छब्दार्थ**मभिप्रेत्यात्र **सच्छब्द**वाच्यस्येत्युक्तम्। सगुणब्रह्मपरमिदमित्यन्यथासिद्धिर्दुर्वचेत्यभिप्रायेण **परस्य ब्रह्मण** इत्युक्तम्। **अग्रे** सृष्टेः **पूर्व**मित्यर्थः। अनन्तरं सृष्टेर्वक्ष्यमाणत्वात्। विजातीयसजातीयस्वगतनानात्वव्यावृत्तिरत्र विवक्षिता चेत्, **अग्र** इति वक्तुमयुक्तम्; न हि ब्रह्मणः कालविशेषे निर्विशेषत्वं; वैषम्यनैर्घृण्यादिपरिहाराय जीवबहुत्व-तत्कर्मप्रवाह-तदनादित्वानामभ्युपगन्तव्याच्च। तद्बहुत्वमपारमार्थिकमिति—चेन्न; पारमार्थिकबहुत्वस्येदानीमप्यभावाद्ग्रशब्दवैयर्थ्यात्। न चाग्रशब्दस्याविवक्षितार्थता; **अनन्तरं** सृष्ट्विति। अतः कालरूपविजातीयभेदः, चेतनरूपसजातीयभेदः, सार्वज्ञ्यादिमृच्छ्रुतगुणगुणरूपस्वगतभेदश्च तदानीमस्तीति—विजातीयादित्रिविधभेदनिरसनपरत्वं विरुद्धं; कारणवाक्यत्वात्। न चेदिदं कारणवाक्यम्—ईदृशानां कारणवाक्यानां सर्वशास्त्राप्रत्ययन्यायाद्विजातीयादिभेदनिरसनपरत्वेन कारणपरत्वाभावात्—ब्रह्मकारणत्वमप्रमाणं स्यात्। अवधारणवाचिन **एव**कारस्य स्वयंव्यावर्त्यविशेषोपस्थापनासमर्थस्य समभिव्याहृतपदान्तरार्थविरोधिव्यावर्तकलनियमदर्शनात्—**सदेवे**त्यवधारणमसत्कार्यवादव्युदासपरं; न ह्ययं विद्वानेवेत्यवधारणं ब्राह्मणत्वं व्यावर्तयति, अपि त्वविद्वत्त्वमेव। अतः शब्दस्वारस्यात्सदेवेति निरसनीयमसत्त्वमेव, न तु विजातीयभेदः॥ यद्यपि सद्विजातीयमसत्, तथाऽपि तस्य व्यावर्त्यत्वं न विजातीयस्वाकारेण, अपि तु सद्विरोधिस्वरूपेण। **सदेव** न तु कदाचिदपि असदित्यर्थः। सच्छब्दो हि मानसंबन्धयोग्यत्वलक्षणसत्त्वं प्रवृत्तिनिमित्तीकृत्य परमात्मनि वर्तते, अयं तु सच्छब्दो विशेष्यभूतपरमात्मवाचकोऽपि, कारणविषयत्वसामर्थ्यात्कारणत्वौपयिकगुणविशिष्टं प्रकृतिपुरुषकालशरीरकं परमात्मानमुपस्थापयति। **एकमेवे**त्यविभक्तनामरूपं कारणावस्थं ब्रह्मोच्यते। **कारणावस्थायामेकत्वावधारणस्य** बहु स्यामिति **लक्ष्यमाणकार्यबहुत्वप्रतियोग्येकत्वपरत्वात्**, एकेन मृत्पिण्डेन सर्वं मृण्मयमित्युक्तदृष्टान्तसामर्थ्यात्, 'तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियते'ति श्रुत्यन्तरैकार्थ्याच्च—अयमेवार्थः। वैशेषिकादिभिर्निरस्तयोक्तानामाकाशादीनामपि संहाराभिप्राय **एव**कारः। एवमविभक्तनामरूपत्वाद्ब्रह्मण उपादानत्वं सिद्धं; भाव्यवस्थाविशेषवतः प्रागवस्थायोगो ह्युपादानत्वम्। **अद्वितीय**मिति निमित्तान्तरनिषेधः, उपादानस्य प्रस्तुतत्वेन निमित्तस्य धीस्थत्वात्, परतन्त्ररूपविशेषाणां विहितत्वात्, निषेधस्य च विहितव्यतिरिक्तविषयत्वात्, उपरितनवाक्यसङ्गतेरपेक्षितत्वाच्च। **एकमेवेति**शब्दस्याविभक्तनामरूपतापरत्वं **बहु स्या**मित्यनेनावगम्यते। **तदैक्षत तत्तेजोऽसृजते**त्यनेना**द्वितीय**पदस्य निमित्तान्तराभावपरत्वमवगम्यते। परस्य ब्रह्मणः सर्वदा सत्त्वेन **सदेवे**त्यवधारणमसत्कार्यवादव्युदसनपरमिति—उपरितनेन **कथमसतः सज्जायेते**त्यादिवाक्येनावगम्यते। **कथमसत** इत्यादिवाक्यं वैशेषिकमतनिरासपरं, न तु क्षणिकवादिनिरासपरं, न शून्यवादिनिरासपरं च; क्षणिकशून्यवादिनिरासे कृतेऽप्येकविज्ञानेन सर्वविज्ञानस्य वैशेषिकमतनिरासस्यापेक्षत्वात्, 'तद्धैक आहुः, 'असदेवेदमग्र आसी'दित्यारब्धत्वाच्च। न हि क्षणिकत्वं, शून्यत्वं च कालविशेषे भवति—अतोऽसत्कार्यवादनिरासपरं **तद्धैक आहु**रित्यादि वाक्यम्। 'कुतस्तु खलु सौम्यैवं स्या'दिति मृद उत्पन्नस्य मृदात्मकत्ववदसत उत्पन्नस्यासदात्मकत्वप्रसङ्ग इति भावः। **उत्पत्ति**र्नाम द्रव्यस्यावस्थान्तरापत्तिरिति—अयमर्थो **वाचारम्भण**मित्यनेन शिक्षितः। तदुपजीव्योच्यते—**कथमसतः सज्जायेतेति**। कथं निराश्रयावस्थासंभव इत्यर्थः। **तदैक्षतेति** सर्वज्ञत्वम्, **असृजते**ति निमित्तत्वं, **बहु स्या**मित्युपादानत्वम्, तदुभयानुगुणं सर्वशक्तित्वं, सत्यसंकल्पत्वं च, **अनेन जीवेनात्मनाऽनुप्रविश्ये**ति सर्वान्तरत्वं चोक्तं भवति। **जीवेनात्मना** जीवशरीरकेण मयेत्यर्थः; 'सिंहेन भूत्वा वहवो मयात्ता, व्याघ्रेण भूत्वा बहवो मयात्ता' इति वत्, सर्वज्ञत्वादिगुणकस्य तद्विपरीताकारजीवैक्यासंभवात्, **यस्यात्मा शरीर**मित्यादिवचनात्, **तदनुप्रविश्येत्य**-

सर्वज्ञता, सर्वशक्तियोगः, सत्यसंकल्पत्वं, सर्वान्तरत्वं, सर्वाधारता, सर्वनियमनम्—इत्याद्यनेककल्याणगुण-विशिष्टतां, कृत्स्नस्य जगतस्तदात्मकतां च प्रतिपाद्यैवंभूतब्रह्मात्मकस्त्वमसीति श्वेतकेतुं प्रत्युपदेशाय प्रवृत्त-

चेन्न इव जीवेऽप्यनुप्रवेशश्रवणाच्च । शरीरवच्चिपदस्य शरीरिपर्यन्तत्वस्य मुख्यतयोपपन्नत्वाच्चायमेवार्थः । **सदायतना** इत्यनेन सर्वाधारता, तत एव सर्वनियमनं च सिद्धम् : **एतस्य वाऽक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत** इति प्रशासनेन धारकत्वश्रवणात्, एवं सर्वाधारत्व—सर्वनियमन—सर्वान्तरत्वैः शरीरिलक्षणैर्जगच्छरीरकत्वं ब्रह्मण उक्तम् । **आदि**शब्देन नृच्छ्युपयोगिनः श्रुत्यन्तरसिद्धा गुणा गृह्यन्ते । **ऐतदात्म्य**मित्यनेन कृत्स्नस्य जगतस्तदात्मकता चावगम्यते । **तत्सत्य**मिति तदात्मकत्वेनैव जगतः प्रामाणिकत्वं, जगतः स्वनिष्ठत्वेन प्रतीतिर्भ्रान्तिरित्यर्थः । अतः कृत्स्नस्य जगतः स आत्मा । **ऐतदात्म्यमिदं सर्वं, स आत्मे**ति निर्देशो 'रामानुजं लक्ष्मणपूर्वजं चे'तिवदन्योन्यसंबन्धिखलतात्पर्यनिशयकृतः । यद्वा, 'स त आत्मा अन्तर्याम्यमृत' इतिवत्कृत्स्नजगदन्तर्यामित्वात्**तत्त्वमात्मा स** इत्यर्थः । तस्मात् त्वं शब्द-तदर्थ-तद्बुद्धयस्तत्पर्यन्ता इति **तत्त्वमसी**त्यस्यार्थ इत्याह—**एवंभूतेति । एवंभूत**शब्देन तत्पदस्य प्रकृतपरामर्शित्वं सूचितम् । अस्याः सद्विद्यायाः सर्वविशेषवस्तुन्येव षड्विधतात्पर्यलिङ्गं विद्यते । उपक्रमे तावत् 'उत तमादेशमप्राक्ष्य' इत्य**त्रादेश**शब्देन प्रशासिताऽभिधीयते । अत्र श्लोकावाचार्यपादैरुक्तौ—'छान्दोग्ये केचिदाहुर्दिशतिरुत तमादेशमप्राक्ष्य,इत्यत्राऽपूर्वस्तूपदेशः प्रकटयति मनो न प्रशास्ति घनन्तः । नो कर्तर्यस्ति कर्मण्यगणि घञिह सत्कर्तृशास्तौ न कर्मे ण्यात्स्यान्कर्मोपदेशे तदिदमुत तमादेशवाचोपदेश्यम् ॥ अत्र ब्रूमः प्रशास्ति वदति दिशिरसावाङ्पूर्वो नोपदेशे शास्ता सोऽतिप्रसिद्धो न हि पर इह चापेक्षितार्थप्रसङ्गः । युक्तोऽसाधारणोक्त्या घञगणि करणेऽप्यत्र वैवक्षिकत्वं शाब्दोक्तं कारकाणां ननु करणतया कर्तरि स्याद्विवक्षे'ति । **आदेश**शब्देनोपदेश्यमुच्यते—प्रकृत्यर्थ उपदेशः, प्रत्ययार्थः कर्मत्वम्, 'अकर्तरि च कारके संज्ञायां'मिति कर्तृव्यतिरिक्तकारके घञो विहितत्वात्, उपदेशे ब्रह्मणः कर्मत्वोपपत्तेश्च । प्रशासने तु ब्रह्म न कर्म, अपि तु कर्तृ; **कर्तृव्यतिरिक्तकारके** हि घञप्रत्ययविधिः । नात्र कर्तरि कप्रत्यय उपपद्यते; 'क्तिति चे'ति गुणप्रतिषेधादादेशशब्दरूपासिद्धेः । **नापि पचाद्यचप्रत्यय** उपपद्यते; दिशिधानोरिगुपधत्वेन 'इगुपधात्क' इत्यपवादमूत्रेण कप्रत्ययप्राप्तेर्गुणाभावात्, अतो घञप्रत्ययान्त एवायमादेशशब्दः, स च प्रत्ययः कर्तर्यविहित इति कर्मार्थत्वमेव युक्तत्वादुपदेश्यमेवादेशशब्दवाच्यमिति; अत्रोच्यते—प्रकृत्यर्थः शासनं; प्रसिद्धिप्राचुर्यात्, अन्यथा स्वारस्यभङ्गात् । आङ्पूर्वो दिशतिर्नियोक्तृप्रयोजनवचनः, उपपूर्वस्तु नियोज्यप्रयोजनवचन इति हि न्यासकारः । नियोक्तरि प्रयोजनं यस्य तस्यार्थस्य वाचक इत्यर्थः । एवमन्यत्रापि । किंच—उपदेश्यत्वं लौकिकालौकिककर्मब्रह्मभागार्थसाधारणं, शास्तृत्वं तु ब्रह्मणोऽसाधारणम् : 'अन्तःप्रविष्टः शास्ता जनानाम्, एतस्य वाऽक्षरस्य प्रशासने गार्गी' त्यादिभिर्निरुपाधिकप्रशासनस्य ब्रह्मासाधारणत्वश्रवणात् । निरुपाधिकोपदेश्यत्वं ब्रह्मणोऽसाधारणमिति—चेन्नः इष्टप्राप्त्यनिष्टनिवृत्तिनत्साधनेषु साधारण्यात् । यद्यप्यपरिमितसुखप्राप्तिदुःखनिवृत्त्यादि साक्षादुपदेश्यं स्यात्, तथापि संसारनिवृत्तिब्रह्मतदुपासनानामुपदेश्यत्वं साधारणं, प्रष्टव्यत्वोपदेश्यत्वमर्थसिद्धम्, अत उपदेश्यत्वकथनवैयर्थ्यं च । ननु—'येनाश्रुतं श्रुत'मित्यनेनैकवाक्यत्वात्खब्रानेनान्यज्ञानहेतुनाविशेषितमुपदेश्यत्वम् असाधारणमिति चेत्, तथापि तादृशमुपदेश्यत्वं प्रतिज्ञावाक्येन, प्रष्टव्यत्वोक्त्या चार्थसिद्धमिति—अनपेक्षितोपदेश्यत्वकथनादप्यपेक्षितं प्रशासितृत्वमेव वाच्यमिति युक्तम् । येनाश्रुतमित्युपादानत्वे सिद्धे प्रशासितृत्वेन हि निमित्तत्वं सिध्येत्, निमित्तान्तरे सति एकविज्ञानात्सर्वविज्ञानं नोपपद्यते, अतः प्रतिपिपादयिषितवस्त्वनोऽविवक्षितासाधारणाकारविशिष्टतयैव प्रतिपादनमुचितं, घञप्रत्ययस्य तु करणेऽपि व्युत्पन्नत्वा'द्विवक्षातः कारकाणां प्रवृत्ति'रिति शब्दोक्तन्यायेन कर्तर्येव करणान्तरनैरपेक्ष्येण साधकतमत्वविवक्षया तथा प्रयोग उपपद्यते । अकर्तरीति सूत्रस्य प्रयोजनं करणत्वविवक्षया विना कर्तर्यसाधुत्वेन प्रयोगनिवृत्तिः । उपदेशपक्षे प्रकृत्यर्थस्मारस्यं, प्रत्ययस्वारस्यं चः प्रशासनपक्षे तु प्रत्ययस्वारस्यं, प्रधानभूतप्रकृत्यर्थस्मारस्यम्, अर्थौचित्यं चेति वैषम्यम्। अतः **प्रशासितैवादेशशब्दाभिधेय** इति स्वीकर्तुं युक्तम् ॥ एवमुपक्रमे निरुपाधिकप्रशासनगुणयोग उक्तः, तथा जगदुपादानत्वं, निमित्तत्वम्, तदनुगुणसार्वज्ञ्यसर्वशक्तित्वादिकं चावगतम् । उपसंहारे च **तत्त्वमसी**ति सामानाधिकरण्येन जीवान्तर्यामित्वं नाम गुणविशेष उक्तः । अस्यैवार्थस्य बहुश आवर्तितत्वादभ्यासोऽप्यस्ति ॥ एवं ब्रह्मणो जगत्कारणत्व—जगदन्तरात्मत्वादिगुणानां प्रमाणान्तराप्रतिपन्नत्वादुपबृंहणा सिद्धा । एवमुपासकस्य 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य' इति शरीरपातानन्तरं मोक्षश्रवणात्कालमपि विद्यते । पितुः पुत्रं प्रति प्रतिवचनरूपत्वात्—अर्थवादश्च लब्धः । मृत्पिण्डादिदृष्टान्तोपबृंहणादुपपत्तिश्चेति । अस्मिन् दृष्टान्तत्रयेऽपि विवर्तपक्षानुगुण एकोपि दृष्टान्तो न दृश्यते, अपि तु परिणामपक्षानुगुण एव दृश्यते । दार्ष्टान्तिकविषयवाक्येऽपि 'तत्तेजोऽसृजत'त्युक्तं, न तु तदभ्रमदिति, अतोऽस्यां श्रुतौ विवर्तपक्षप्रसङ्गोऽपि नास्ति । श्रुत्यन्तरेषु च तदात्मानं स्वयमकुरुतेत्यादिकं श्रूयते, न तु व्यवर्ततेति । सूत्रं च 'परिणामा'दिति, न तु विवर्तादिति । स्मृतिषु च 'कटकमुकुटकर्णिकादिभेदैः कनकमभेदमपीष्यते यथैकम् । क्षितितलपरिणामतोऽनिलान्ते' इत्यादिषु

त्वात्प्रकरणस्य । प्रपञ्चितश्चायमर्थो वेदार्थसंग्रहे । अत्राप्यारम्भणाधिकरणे (ब्र. २।१।१५) निपुणतरमुपपादयिष्यते । **'अथ परा यया तदक्षरमधिगम्यते'** (मु. १।१।५) इत्यत्रापि प्राकृतान्हेयगुणान्प्रतिषिध्य नित्यत्व-विभुत्व-सूक्ष्मत्व-सर्वगतत्वा-व्ययत्व-भूतयोनित्व-सर्वज्ञत्वादिकल्याणगुणगणयोगः परस्य ब्रह्मणः प्रतिपादितः । **'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै. २।१।१) इत्यत्रापि सामानाधिकरण्यस्यानेकविशेषण-

---

परिणामपक्षा एव दृश्यन्ते । अतः श्रुतिस्मृतिसूत्रस्वारस्यात् परिणाम एवाभ्युपगन्तव्यः । स च परिणामः सद्वारक एव भवितुमर्हति; निर्विकारत्वनिर्दोषत्वानुप्रवेशशरीरशरीरिभावादिविषयानेकश्रुतिस्वारस्यात्, अन्यथा तद्विरोधप्रसङ्गाच्चेति । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञावाक्यं किं, कथं तदुपपादनमित्याशङ्क्यायामेतद्विस्तरो **वेदार्थसंग्रह** इत्याह—**प्रपञ्चित इति** । अत्रापेक्षितार्थः कथं ज्ञास्यत इत्यत्राह—**अत्रापीति** । **निपुणतरं** तस्याधिकरणस्यैतदर्थैकविषयत्वादिति भावः । **इति सद्विद्यायाः सविशेषविषयत्वसमर्थनम् ॥**

अनन्तरोदाहृतायाः परविद्यायाः सविशेषपरत्वमाह—**अथ परेत्यादिना । अपाणिपादम्**इत्यन्तानां पदानां विषयमाह—**प्राकृतानिति** । **प्राकृता** प्रकृतिसंबन्धिनः । अनेन पदेन क्वचिन्निद्धस्य हि क्वचिन्निषेधः इति—निषेध्यानां क्वापि सिद्धिर्दर्शिता भवति । प्रकृतिगताः, प्रकृतिसंसर्गप्रयुक्ता जीवगता दोषाश्च **प्राकृताः । अद्रेश्यम्, अग्राह्यं** प्रत्यक्षागोचरम्, अनुमानाद्यगोचरम् । यद्वा चक्षुरगोचरम्, इन्द्रियान्तरागोचरम् । **अगोत्रमवर्णं** प्राकृतनामरूपरहितम् । **अचक्षुःश्रोत्रम्** इन्द्रियाधीनज्ञानं न भवति । **अपाणिपादम्** इन्द्रियाधीनचेष्टं न भवति; 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः' इति श्रुतेः । अनेन पदद्वयेन जीवगतहेयनिषेधः । इन्द्रियाधीनज्ञानत्वं, तदधीनप्रवृत्तित्वमपि जीवगतधर्मः । 'सर्वगतं सुसूक्ष्म'मिति पाठक्रमः, तथाऽप्यर्थक्रमेण व्याख्यातं **सूक्ष्मत्वसर्वगतत्वे**ति । सूक्ष्मतया हि व्याप्तिः । नित्यत्वेन कालापरिच्छेदः । **विभुं** प्रभुं, प्रभुत्वं नियन्तृत्वं—जगच्छरीरकर्तृत्वं फलितम् । अनेन वस्त्वपरिच्छेदसिद्धिः । सर्वगतत्वेन देशापरिच्छेदः । **अव्ययत्वं** व्ययशब्दोपलक्षितदोषविरोधित्वं नाम गुण—इत्यभिप्रायेण कल्याणगुणैः सह तन्निर्देशः । यद्वा, **अव्ययत्वमेकरूपत्वं**; पूर्णत्वं वा । **भूतयोनित्वं** जगत्कारणत्वम् । एतत्प्रकरणस्थेन 'यः सर्वज्ञः सर्ववि'दित्यनेन वाक्येन सार्वज्ञ्यमुक्तम् । **सर्वज्ञः सर्ववित्** सर्वं स्वरूपतो वेत्ति, सर्वं प्रकारतश्च वेत्तीत्यर्थः । **परस्य ब्रह्मण** इत्यस्य पूर्ववदर्थः । **इति परविद्यायाः सविशेषविषयत्वसमर्थनम् ॥**

अथ शोधकवाक्येषु सत्यज्ञानादिवाक्यस्याखण्डार्थत्वं निरस्यति—**सत्यं ज्ञानमित्यादिना ।** स खल्वेवमुपन्यस्तः प्रतिपत्तिसौकर्यायाचार्यपादैः, तथा हि—सत्यादिवाक्यं सत्यत्वादिगुणविशिष्टमेव ब्रह्म प्रतिपादयति; नीलमुत्पलमित्यादिषु समानाधिकरणवाक्येषु विशिष्टैकार्थपरत्वव्युत्पत्तेः, सत्यादिवाक्यस्य च समानाधिकरणत्वाच्च । तथा च—सामानाधिकरण्यलक्षणं **भिन्नप्रवृत्तिनिमित्तानां**मित्यादिनोक्तं शाब्दैः, तत्र यदुक्तं—सामानाधिकरण्यस्यैकार्थ्यपरत्वव्युत्पत्तेः, ऐकार्थ्यस्य च पदानां विशेषणमात्रपरत्वे, विशिष्टपरत्वे चासिद्धेः—स्वरूपमात्रैक्यपरत्वं सत्यादिसमानाधिकरणपदानामास्थेयमिति—तदयुक्तं; विकल्पासहत्वात्, किं सत्त्वादिपदानि-तत्तत्पदार्थविरोधिव्यावृत्तिमात्रपराणि, उत स्वरूपमात्रपराणि, उत विरोधिव्यावृत्त्यवच्छिन्नस्वरूपपराणीति विवेचनीयम् । न तावद्विरोधिव्यावृत्तिमात्रपराणि; व्यावर्तमानानामनेकत्वेनैकार्थत्वासिद्धेः, व्यावर्त्यानेकत्वाद्व्यावृत्तयो ह्यनेकाः स्युः । नापि स्वरूपपराणि; तथा सति पदानां पर्यायत्वप्रसङ्गात्, प्रवृत्तिनिमित्तभेदाभावेन सामानाधिकरण्यलक्षणहानिप्रसङ्गात्, एकतरपदवैयर्थ्यप्रसङ्गाच्च । नापि तदवच्छिन्नस्वरूपपराणि; विकल्पासहत्वात् ।—किं विरोधिव्यावृत्तीनां स्वरूपावच्छेदकत्वमुपलक्षणतया, विशेषणतया वा । न तावदाद्यः कल्पः; एकेनोपलक्षणेन स्वरूपं प्रतिपन्नमिति—उपलक्षणान्तरवैयर्थ्यात् । 'उपलक्ष्याद्बहिर्भूत उपलक्ष्यप्रतीत्युपायो धर्म उपलक्षण' मिति ह्युपलक्षणविदः, तथा च शाखादिषु दृश्यते । तथा च सति एकतरपदवैयर्थ्यं, प्रवृत्तिनिमित्तभेदाभावेन सामानाधिकरण्यलक्षणहानिश्च । कथं तर्हि भवत्पक्षे जन्मादिबहूपलक्षणत्वमेकस्यैव ब्रह्मणोऽभ्युपगम्यत इति चेत्, उच्यते—तत्र ह्युपलक्ष्यस्य धर्मिणो ब्रह्मण एकत्वेऽपि, प्रत्युपलक्षणमुपलक्षणधर्मभेदो जन्मस्थित्याद्यनुगुणज्ञानशक्त्यादिरूपोऽस्माभिरभ्युपगम्यते; अन्यथा तत्राप्यनेकोपलक्षणवैयर्थ्यं प्रसज्यत एव त्वत्पक्षे त्वनेकोपलक्षणोपलक्ष्यधर्मभेदानभ्युपगमादुक्तदोषो दुर्वारः, तदभ्युपगमे हि ब्रह्मणः सविशेषत्वप्रसङ्गः । नापि द्वितीयः; विशेषणभूतानां व्यावृत्तीनामनेकत्वेनैकार्थत्वासिद्धेः । विशेष्यान्तर्भूतो विशेष्यप्रतीत्युपायो धर्मो हि विशेषणं, विशेष्यान्तर्भावो नाम ज्ञाप्यान्तर्भावः । विशेषणभूतार्थभेदेऽपि विशेष्यभूतप्रधानार्थैक्यादैकार्थ्यसिद्धिरिति चेत्, तत्सखण्डवाक्यार्थवादिनोऽपि समानम् । कस्तर्हि विशेष आवयोरिति चेत्, अयमेव विशेषः—यदेकस्य मते पदानां लाक्षणिकत्वम्, इतरस्य पक्षे तेषां मुख्यत्वमिति । यच्चोक्तं—विशेषणान्तरविशिष्टे वस्तुनि विशेषणान्तरान्वयाद्विशेषणानामन्योन्यसमवायप्रसङ्ग—इति तदसत्; विकल्पासहत्वात् । 'पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकम् । न्यायसंपादितव्यक्ति पश्चाद्वाक्यार्थ-

---

१ °पादयिष्यामः ।

बोधकं मित्युक्तप्रक्रियया हि वाक्यमर्थमवबोधयति, तत्र किं पदानां पदार्थस्मरणदशायामन्योन्यसमवायप्रसङ्गः, उत परामर्शदशायाम्, आहोस्विद्वाक्यार्थाभिधानदशायाम्। न तावत्प्रथमः कल्पः; स्मरणदशायां पृथक्पृथक्पदार्थस्मरणेन मिथोऽन्वयप्रसङ्गाभावात्। नापि द्वितीयः; एकस्मिन्वस्तुन्यविरुद्धानेकविशेषणसमवायस्य प्रत्यक्षाद्यवगतस्य यथावस्थितवस्तुपरामर्शदशायां परामृश्यमानत्वात्। नापि तृतीयः; वाक्यार्थाभिधानदशायां सर्वैः पदैर्युगपदनेकविशेषणविशिष्टैकवस्तुविषयैकज्ञानजनकत्वेन क्रमाभिधानप्रयुक्तान्योन्यसमवायप्रसङ्गाभावात्। यथैव हि द्वे चक्षुषी जातिगुणाद्यनेकविशेषणविशिष्टैकवस्तुविषयामेकां धियं युगपज्जनयतः, तथैवानेकपदानि युगपदेव तत्तद्विशेषणविशिष्टैकवस्तुविषयैकज्ञानजनकानि भवन्ति। क्रमेणाभिधानेऽपि नान्योन्यसमवायप्रसङ्गः; पदान्तरोपपन्नविशिष्टे विशेष्यांशस्यैव पदान्तरोपात्तविशेषणैर्विशेष्यमाणत्वात्, तच्च यथादृष्टविषयत्वात् पदानां व्युत्पत्तेः। अन्यथा भवत्पक्षे व्यावृत्तिरूपविशेषणानामन्योन्यविशेषणविशेष्यभावः क्रमाभिधानप्रयुक्तो दुर्वारः, अतो यथोक्त एव परिहारस्त्वापि शरणम्। क्रमेणाभिधानानभ्युपगमे कथमुद्देश्योपादेयविभागसिद्धिरिति चेत्; उच्यते—ज्ञाताज्ञातविभागो ह्युद्देश्योपादेयविभागः, स च युगपत्प्रतिपादनेऽपि नापैतिः एकेन वाक्येनैकस्य वस्तुनोऽनेकविशेषणान्वये युगपत्प्रतिपाद्ये तत्रैकविशेषणान्वयः प्रागेव ज्ञातः, विशेषणान्तरान्वयस्त्वज्ञात—इति ज्ञाताज्ञातविभागपरामर्शः परामर्शदशायां हि संभवत्येव। यदप्युक्तं—विशिष्टैक्यप्रतिपादने विशेष्यैक्यवद्विशेषणैक्यं प्रसज्यत—इति, तदपि न साधीयः; विशेष्यमात्रैक्यपरत्वात्समानविभक्तेः। तच्च व्युत्पत्तिसिद्धं, व्युत्पत्तिश्च प्रत्यक्षमूला, प्रत्यक्षं च विशेष्यैक्यमेवावगमयति, न तु विशेषणानामैक्यं, यथा—गौरित्यादावेकपदप्रयोगेऽपि प्रातिपदिकावगतविशेषणविशेष्यैक्यं तदूतमेकवचनं नावगमयति, किं तु विशेष्यैक्यमेवावगमयति, प्रत्यक्षमूला व्युत्पत्तिरेव हि तत्र कारणं, तथा समानाधिकरणपदसङ्गतस्थसमानविभक्तिरपि विशेष्यमात्रैक्यपरत्वेनैव नियामिका; अन्यथा भवत्पक्षे असत्यादिप्रतियोगिव्यावृत्तिरूपविशेषणैक्यप्रसङ्गात्। प्रातिपदिकानां तत्तत्प्रतियोगिव्यावृत्तिविशिष्टस्वरूपपरत्वेऽपि, समानविभक्तेः प्रातिपदिकार्थैकदेशभूतविशेष्यमात्रैक्यपरत्वव्युत्पत्त्या न विशेषणैक्यं प्रसज्यत—इति चेत्, तदस्मत्पक्षेऽपि समानम्, आवयोर्विशेषस्तु प्रागेवोक्तः। यच्चोक्तं—विशेषणभेदे विशेष्यभेदप्रसङ्ग—इति, तदयुक्तं; विशेषणभेदमात्रस्य विशेष्यभेदकत्वाभावात्। तथा च देवदत्तः श्यामो युवेत्यादिषु विशेषणभेदेऽपि विशेष्यैक्यदर्शनात्—विशेषणभेदस्य स्वतःप्राप्तविशेष्यभेदकत्वं प्रत्यक्षेण तत्रापोद्यत इति चेत्—तत्र; धर्मिवाचिपदैक्यात्, समानविभक्तिनिर्देशाच्चैक्यप्रतीतेः। खण्डो मुण्डः पूर्णशृङ्गो गौरित्यत्र धर्मिवाचिपदैक्ये समानविभक्तिनिर्देशे सत्यपि विशेषणभेदाद्विशेष्यभेदः प्रतीयत इति—चेन्नैवं; यतः—स्वतःप्राप्तं तयोर्विशेष्यैक्यप्रत्यायकत्वं प्रत्यक्षेण तत्रापोदितम्। परोक्षविषयेऽपि खण्डो मुण्डः पूर्णशृङ्गो गौरित्यादिवाक्ये प्रयुक्ते खण्डत्वादिविशेषणभेदे विशेष्यभेदप्रतीतिर्दृश्यत इति चेत्, परोक्षविषयेऽपि देवदत्तः श्यामो युवेत्यादिवाक्ये प्रयुक्ते श्यामत्वादिविशेषणभेदेऽपि विशेष्यैक्यप्रतीतिर्दृश्यत इति समानश्चर्चः। को निर्णायक इति चेत्, यज्जातीयविशेषणानां नियमेन भिन्नाश्रयत्वं दृष्टं प्रत्यक्षेण, तज्जातीयविशेषणानां परोक्षत्वेऽपि विशेष्यभेदापादकत्वं—यथा खण्डत्वादीनां, यज्जातीयविशेषणानां भिन्नाश्रयत्वनियमो न दृष्टः, तज्जातीयविशेषणानां धर्मिवाचिपदैक्ये, समानविभक्तिनिर्देशे चैकविशेष्यनिष्कर्षकत्वं युक्तं—यथा नीलत्वादीनामिति। यच्चोक्तं—समानविभक्त्यवगतैक्यविरोधाद्विशेषणपरित्याग—इति, तदप्ययुक्तं; प्रातिपदिकाभिहितविशेषणान्वयविरोधादैक्यपरित्यागापत्तेः। तथा हि—यदि समानविभक्त्यन्वयावगतत्वादैक्यं न हातुं शक्यते, तर्हि प्रातिपादिकावगतविशेषणान्वयः कथमिव हातुं शक्यते—यथा नीलमुत्पलमित्यादौ तत्र प्रत्यक्षसिद्धत्वादङ्गीक्रियत इति चेत्, तत्रैक्यप्रतीतिरपि तथैव किमिति न स्यात्। समानविभक्तिनिर्देशे परोक्षेऽप्यैक्यप्रतीतिः शाब्दी दृश्यत इति चेत्, तथैव प्रयोगे परोक्षेऽपि प्रातिपदिकावगतविशेषणान्वयप्रतीतिर्दृश्यत एव। तस्मादैक्यप्रतीतिः शाब्दी चेत्, विशिष्टप्रतीतिरपि शाब्दीति न कश्चिद्विशेषोऽन्यत्रामिनिवेशात्। किंच—प्रातिपदिकावगतविशेषणान्वयपरित्यागहेतुभूतसमानविभक्त्यवगतमैक्यं किं स्वरूपम्, उत तदतिरिक्तम्। अतिरिक्तपक्षे—सविशेषत्वप्रसङ्गः, अनतिरिक्तपक्षे—हेत्वसिद्धिः, प्रातिपदिकावगतस्वरूपातिरेकेण समानविभक्त्या कस्यचिदैक्यस्याप्रतिपादनात्। न हि स्वरूपमात्रविरोधाद्विशेषणत्यागः; व्यधिकरणवाक्येष्वपि तत्त्यागप्रसङ्गात्। प्रातिपदिकावगतं स्वरूपं निर्विशेषमिति प्रतिज्ञाय समानविभक्तैरैक्यावगमादित्युक्ते—स्वरूपावगमादित्युक्तं स्यात्, ततश्चैक्यावगमविरोधरूपहेत्वसिद्धिः। स्वरूपं तु विशेषणान्वयाविरुद्धं; व्यधिकरणवाक्येषु विशेषणान्वयावगमादित्युक्तम्। किंच—समानविभक्त्यवगतमैक्यं च प्रातिपदिकार्थैकदेशभूतविशेष्यमात्रमित्युक्तात्तस्य विशेषणभेदाविरोधित्वान्न तद्विरोधनिबन्धनविशेषणत्यागो युक्तः, अतो न निर्देशविशेषत्वं वस्तुनः। कार्ष्ण्यव्यावृत्तं पीतिमव्यावृत्तं शौक्ल्यमित्यादिषु प्रतियोगिभेदस्य, तत्तद्व्यावृत्तस्वरूपस्य च शब्दोपात्तत्वान्न लक्षणाप्रसङ्गः, सत्यादिवाक्ये तु न तथेति विशेषः। एवं शौक्ल्यादिदृष्टान्तवाक्यात् सत्यादिदार्ष्टान्तिकवाक्यस्य शब्दद्वारकवैषम्यमुक्तम्, अर्थद्वारकं च वैषम्यं पूर्वोक्तं द्रष्टव्यम्। कथमिति चेदित्थं—शौक्ल्यादेः कस्यचिद्द्रव्यस्य द्रव्यान्तराद्व्यावर्तकधर्मतया धर्मान्तरानपेक्षत्वं युक्तं, ब्रह्मणस्तु न तथात्वमिति स्वरूपातिरिक्तव्यावर्तकधर्मान्तरापेक्षाऽस्त्येव, न हि परनिर्वाहकत्वानभ्युपगमे स्वनिर्वाहकत्वसंभवः।

१ तत्त्व का. मु. पु.।

विशिष्टैकार्थाभिधानव्युत्पत्त्या—न निर्विशेषवस्तुसिद्धिः। प्रवृत्तिनिमित्तभेदेनैकार्थवृत्तित्वं सामानाधिकरण्यम्। तत्र सत्यज्ञानादिपदमुख्यार्थैर्गुणैः, तत्तद्गुणविरोध्याकारप्रत्यनीकाकारैर्वैकस्मिन्नेवार्थे पदानां प्रवृत्तौ निमित्तभेदोऽवश्याश्रयणीयः। इयांस्तु विशेषः—एकस्मिन्पक्षे पदानां मुख्यार्थता, अपरस्मिंश्च तेषां लक्षणा। न चाज्ञानादीनां प्रत्यनीकता वस्तुस्वरूपमेव; एकेनैव पदेन स्वरूपं प्रतिपन्नमिति पदान्तरप्रयोगवैयर्थ्यात्। तथा सति सामानाधिकरण्यासिद्धिश्च; एकस्मिन्वस्तुनि वर्तमानानां पदानां निमित्तभेदानाश्रयणात्। न चैकस्यैवार्थस्य विशेषणभेदेन विशिष्टताभेदादनेकार्थत्वं पदानां सामानाधिकरण्यविरोधि; एकस्यैव वस्तुनोऽनेकविशेषणविशिष्टताप्रतिपादनपरत्वात्सामानाधिकरण्यस्य। 'भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्य'मिति शाब्दिकाः। यदुक्तम्—'एकमेवाद्वितीय'मित्यत्राद्वितीयपदं गुणतोपि सद्वितीयतां न सहते, अतः सर्वशाखाप्रत्ययन्यायेन कारणवाक्यानामद्वितीयवस्तुप्रतिपादनपरत्वमभ्युपगमनीयम्। कारणतयोपलक्षितस्य तस्याद्वितीयस्य ब्रह्मणो लक्षणमिदमुच्यते **'सत्यं ज्ञानमनन्तं**

किंच—शौक्ल्यादिस्वरूपस्फुरणे सति—न कार्ष्ण्यादध्यासप्रसङ्गः, अतस्तत्र स्वरूपमेव व्यावृत्तिरिति युक्तमभ्युपगन्तुम्। ब्रह्मस्वरूपस्फुरणेऽपि—तदितराध्यासाभ्युपगमाद्रजतादिव्यावर्तकाधिष्ठानस्वरूपातिरिक्तशुक्तित्वादिवत्, सर्वाध्यासाधिष्ठानब्रह्मस्वरूपातिरिक्तसकलेतरव्यावृत्तिरूपधर्मोऽवश्याभ्युपगमनीयः। यच्चोक्तं—वाच्ये प्रधानांशस्य प्रतिपादनान्न लक्षणा—इति, तदप्यसत्; विशेषणद्वारेण विशेष्यपर्यवसायिनः शब्दस्य द्वारानभिधाने द्वार्यभिधानासिद्धेः। अलाक्षणिकलेऽपि—विशिष्टाभिधानस्वरस्य शब्दस्य विशेष्यमात्रपरत्वे स्वारस्यहानिरवर्जनीया, सा च न विरोधाभावे युक्ता। यच्च—'विषं भुङ्क्ष्वे'त्यादिषु सर्वपदलक्षणा दृष्टा—इति, तच्च विधिप्रत्ययांशस्य मुख्यार्थत्वादयुक्तं, तत्र विधिप्रत्ययव्यतिरिक्तशब्दलक्षणा च मुख्यार्थत्वे प्रमाणान्तरविरोधादङ्गीक्रियते, प्रस्तुतेऽपि तु विरोधाभावान्न सा युक्ता। विमतं वाक्यमखण्डार्थं; समानाधिकरणवाक्यत्वात्—संप्रतिपन्नवदिति, ईदृश्यनुमानोत्थिरनुपपन्ना; वाक्यमखण्डार्थमिति पदयोरर्थभेदोऽस्ति वा, न वा। अस्ति चेत्, प्रतिज्ञावाक्य एव हेतोरनैकान्त्यम्। न चेत्, अखण्डार्थत्वं प्रतिज्ञातमेव न स्यात्। दृष्टान्तस्य च साध्यवैकल्यमवर्जनीयं; प्रकृतिप्रत्ययात्मकपदपुञ्जरूपत्वात्सर्ववाक्यानाम्। यदि—भावरूपाखण्डार्थप्रतिपादनासमर्थमिति प्रतिज्ञा तर्हि—साध्यधर्मवचनान्तर्गतयोः समानाधिकरणयोर्भावरूपखण्डशब्दयोरनैकान्त्यं, तस्मात्सत्यादिवाक्यं सत्यत्वादिविशिष्टमेव ब्रह्म प्रतिपादयतीति सिद्धम्। तदिदमुच्यते—**सत्यं ज्ञानमनन्त**मित्यादिना। तत्र निर्विशेषपरत्वाभावं सोपपत्तिकं प्रतिजानीते—**सत्यं ज्ञानमिति**। सामानाधिकरण्यलक्षणप्रत्यभिज्ञापकशब्दैर्हेलंशं विवृणोति—**प्रवृत्तीति**। ततः किमित्यपेक्षायामन्वयमुखेन, व्यावृत्तिमुखेन वा प्रवृत्तिनिमित्तभेदस्यावश्याश्रयणीयत्वमाह—**तत्रेति**। तर्हि को विशेष इत्यत्राह—**इयानिति। अवश्याश्रयणीय** इत्यत्राभिप्रेतं व्यावृत्तीनां स्वरूपमात्रत्वे दूषणमाह—**न चेति**। सामानाधिकरण्यासिद्धिमुपपादयति—**एकस्मिन्निति**। पर्यायत्वं दूषणं स्पष्टमिति तत्र कण्ठोक्तं; विशेषणभेदेनानेकार्थत्वात्। सामानाधिकरण्यलक्षणहानिं निरस्यति—**न चैकस्येति। विशिष्टताभेदात्** तत्तद्विशेषणान्वयभेदात्। तथाविधा**नेकार्थत्वं** न विरोधि, प्रत्युतानुकूलमेवेत्यर्थः। कुत इत्यत्राह—**भिन्नप्रवृत्तीति**। विशेषणतो भिन्नार्थत्वे, विशेष्यतश्चैकार्थत्वे सति हि सामानाधिकरण्यलक्षणसाद्गुण्यमित्यर्थः। समानाधिकरणं वाक्यं किं विशेषणविशेष्यसंबन्धपरम्, उत विशेष्यैक्यपरम्, उतोभयपरम्। प्रथमे—विशेष्यैक्ये प्रमाणं न स्यात्। द्वितीये—विशेषणान्वयो निष्प्रमाणकः स्यात्। तृतीये—संबन्धद्वयस्यैकवाक्येन बोधयितुमशक्यत्वात् वाक्यभेदप्रसङ्ग—इति केचिदुदयन्ति, तत्र; प्रातिपदिकेनैव विशेषणान्वयस्य बोध्यतया—समानविभक्तिनिर्देशेन विशेष्यैक्यप्रतिपादने वाक्यभेदप्रसङ्गाभावात्॥

एवं सामानाधिकरण्यस्यान्यथैवोपपत्त्या **सत्यज्ञाना**दिवाक्यस्य निर्विशेषपरत्वं निरस्तम्, अथ कारणवाक्यैकार्थ्यान्निर्विशेषपरत्वं निराकर्तुं तदनुवदति—**यदुक्तमित्यादिना। सदेवैकमेवे**ति विजातीयसजातीयभेदव्यावर्तकावधारणद्वयसमभिव्याहृतमद्वितीयपदं पारिशेष्यात्—स्वगतभेदाभावपरमिति **गुणतोऽपि सद्वितीयतां न सहत** इत्यर्थः। 'यः सर्वज्ञः सर्ववित्, यस्य ज्ञानमयं तपः, तस्मादेतत् ब्रह्म नामरूपमन्नं च जायत' इत्यादिसगुणविषयकारणवाक्यैकार्थ्यमस्तीत्यत्राह—**अत इति**। सर्वशाखाप्रत्ययन्यायान्निर्गुणकारणवाक्येषु सगुणत्वं, सगुणकारणवाक्येषु निर्गुणत्वं चोक्तं स्यात्, तत्रापि च्छेदन्यायेन निर्गुणवाक्यप्राबल्यात्सर्वकारणवाक्यानि निर्गुणपराणीत्यर्थः। कारणवाक्यैकार्थ्यं कुतोऽपेक्षितमित्यत्राह—**कारणतयोपलक्षितस्येति**। जगत्कारणत्वं तटस्थलक्षणं, न तु स्वरूपलक्षणम्—इत्यभिप्रायेणो**पलक्षितस्येत्युक्तम्**। कारणत्वशङ्कितदोषव्यावर्तकत्वादिकार्थ्यमवर्जनीयमित्यर्थः। अथ शोधकवाक्यान्तरैकार्थ्यात् निर्विशेषपरत्वोपपादनं निराचि-

ब्रह्म' (तै. २।१।१) इति, अतो लिलक्षयिषितं ब्रह्म निर्गुणमेव; अन्यथा निर्गुणं निरञ्जनमित्यादि-मिर्विरोधश्चेति—तदनुपपन्नम् । जगदुपादानस्य ब्रह्मणः स्वव्यतिरिक्ताधिष्ठात्रन्तरनिवारणेन विचित्रशक्ति-योगप्रतिपादनपरत्वाद्द्वितीयपदस्य । तथैव विचित्रशक्तियोगमेवावगमयति—**'तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोसृजत'** (छा. ६।२।३) इत्यादि । अविशेषेणाद्वितीयमित्युक्ते निमित्तान्तरमात्रनिषेधः कथं ज्ञायत इति चेन्. सिसृक्षोर्ब्रह्मण उपादानकारणत्वं **'सदेव सोम्येदमग्र आसीदेकमेव'** (छा. ६।२।१) इति प्रतिपादितम् । कार्योत्पत्तिस्वाभाव्येन बुद्धिस्थं निमित्तान्तरमिति तदेवाद्वितीयपदेन निषिध्यत—इत्यवगम्यते । सर्वनिषेधे हि स्वाभ्युपगताः सिषाधयिषिता नित्यत्वादयश्च निषिद्धाः स्युः । सर्वशाखाप्रत्ययन्यायश्चात्र भवतो विपरीतफलः; सर्वशाखासु कारणान्वयिनां सर्वज्ञत्वादीनां गुणानामत्रोपसंहारहेतुत्वात् । अतः कारणवाक्यस्वभावादपि **'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै. २।१।१) इत्यनेन सविशेषमेव प्रतिपाद्यत इति विज्ञायते । न च निर्गुणवाक्यविरोधः; प्राकृतहेयगुणविषयत्वात्तेषां **'निर्गुणम्'** (चू. ७।२), **'निरञ्जनम्'** (श्वे. ६।१९), **'निष्कलं निष्क्रियं शान्तम्'** (श्वे० ६।१९) इत्यादीनाम् । ज्ञानमात्रस्वरूपवादिन्योपि श्रुतयो ब्रह्मणो ज्ञानस्वरूपतामभिदधति । न तावता निर्विशेष-ज्ञानमात्रमेव तत्त्वम्; ज्ञातुरेव ज्ञानस्वरूपत्वात् । ज्ञानस्वरूपस्यैव तस्य ज्ञानाश्रयत्वं मणिद्युमणिप्रदीपा-

---

कीर्षुरनुवदति—**अन्यथेति** । अनूदितमर्थं दूषयति—**तदनुपपन्नमित्यादिना** । तत्र प्रथमं कारणवाक्यैकार्थ्य सविशेष-विषयत्वे सतीत्याह—**जगदिति । तथैवेति** । अद्वितीयपदं यथाऽधिष्ठात्रन्तरनिवारणपरमेव भवति तथैवेत्यर्थः । शङ्कते **—विचित्रशक्तियोगमेवेति** । उत्तरवाक्यमुपादानभूतस्यैव ब्रह्मणोऽधिष्ठातृत्वशक्तियोगमेवावगमयति, नतु निर्गुणत्वमित्यर्थः । शङ्कते—**अविशेषेणेति** । सर्वनिषेधस्य, निमित्तान्तरनिषेधस्य च साधारणमद्वितीयपदं; निरुपपदत्वात् । किंच—उपक्रमे **सदेवैकमेवेति** सजातीयविजातीयभेदयोर्निषिद्धत्वात्, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञायाः सजातीयविजातीयभेद-मात्रमिथ्यात्वेऽनुपपन्नत्वाच्च—अद्वितीयपदमुपक्रमानुगुण्येन स्वगतभेदनिषेधपरं स्यात्, न तूत्तरवाक्यानुगुणं स्यात्; उपक्रम-प्राबल्यादिति साक्षात्पूर्वपक्षिणोक्तं, निमित्तत्वोपादानत्वे उभे अप्युत्तरत्र श्रूयेते, तत्रोपादानान्तरमद्वितीयपदेन निषिध्येत, न तु निमित्तान्तरमिति पार्श्वस्थचोद्यं, तत्राह—**सिसृक्षोरिति** । अनेन शङ्काद्वयं परिहृतं भवति । तदैक्षतेत्यनन्तरोक्तस्यादस्य वाक्यस्य—**कारणपरत्वं** नापलपनीयमित्यभिप्रायेण **सिसृक्षोरि**त्युक्तम् । कारणपरत्वे च **सत्यम्र**शब्देन विजातीयकाल-सद्भावसिद्धेः, जीवानादित्वश्रुतेः, अकृताभ्यागमकृतविप्रणाशादिश्रुत्यर्थापत्त्या, वैषम्यनैर्घृण्यपरिहाराय जीवाना कर्मसूक्ष्मभेदस्य प्रलयदशायामभ्युपगमात्. एकत्वावधारणस्य जीवसूक्ष्मभेदसहस्रस्य परैरभ्युपगन्तव्यत्वात्, सार्वज्ञ्यसर्वशक्तित्वादीनां सर्गौपयिकत्वाच्च—विजातीय-सजातीय-स्वगतभेदाभावस्य दुर्वचत्वात्, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञायाश्चोक्तार्थाविरोधेन **निर्वाह्यत्वात्**, परतन्त्रभेदस्य विहितत्वात्, निषेधस्य च विहितव्यतिरिक्तविषयत्वात्, स्वतन्त्ररूपभेदविशेषस्य 'न तत्समश्चाभ्यधिकश्चे'त्यादिभिर्निषिद्धत्वात्, सामान्यनिषेधस्य च नत्पर्यवसानस्य न्याय्यत्वाच्च—अद्वितीयपदस्य स्वतन्त्रभेदनिषेधपरत्वे प्राप्ते सत्यविभक्तनामरूपताप्रतिपादकै**नैकमि**ति पदेनोपादानत्वस्य सिद्धत्वात्, निमित्तान्तरस्य बुद्धिस्थत्वाच्च—निमित्तान्तररूपस्वतन्त्रवस्तुनिषेध**परमद्वितीय**पदमित्यर्थः । सर्वनिषेधेऽनिष्टमाह—**सर्वेति** । सर्वशाखाप्रत्ययन्यायस्य निर्विशेषत्ववादविपरीतफलमाह—**सर्वशाखेति** । अत्र निर्गुणवादे, **अत्रभवत** इत्युपालम्भो वा । सर्वशाखाप्रत्ययन्यायोऽनुगुणस्वीकारफलः, न तत्तद्गुणत्यागफल—इति स्वपक्षे विपरीतफल इत्यर्थः । सविशेषपरत्वे कारणवाक्यैकार्थ्य निगमयति—**अत इति** । न केवलं सामानाधिकरण्यान्यथानुपपत्त्या, कारणवाक्यैकार्थ्याच्च सविशेषपरमित्य**पि**शब्दस्य भावः । **इत्यखण्डार्थसामानाधिकरण्यनिरासेन सत्यादिवाक्यस्य सविशेषविषयत्वसमर्थनम् ॥**

अथ शोधकवाक्यान्तरैकार्थ्यं निर्विशेषपरत्वहेतुं निरस्यति—**न चेति** । परेणापच्छेदन्यायेन हि निर्गुणसगुणवाक्यविरोधः परिहृतः, अत्र मित्रविषयत्वाद्विरोध एव नास्तीत्याह—**प्राकृतेति । निर्गुणमि**ति गुणसामान्यनिषेधः । **निष्कलमि**ति शरीरसामान्यनिषेधः । **निष्क्रियमिति** क्रियासामान्यनिषेधः । न गुणनिषेधः संकोचयितव्यः; आर्थगुणनिषेधबलेन सर्वगुणविरहावगमात्, **ज्ञानस्य** ज्ञानादिगुणाश्रयत्वादर्शनात्—ब्रह्मणो ज्ञानमात्रत्वप्रतिपादनेन निर्गुणत्वं हि फलितम्—इति शङ्कायाम्, आर्थगुणनिषेधं परिहर्तुं श्रुतिप्रतिपन्नमर्थमनुभाषते—**ज्ञानमात्रेति** । ततः किमित्यत्राह—**न तावतेति** । कुत इत्यपेक्षायां—**किं ज्ञानत्वात् ज्ञानाश्रयत्वमुच्यते, किमेकजातीयद्रव्ययोर्नियतधर्मधर्मिभावानुपपत्तेः**—इति विकल्प्ये, प्रथमं प्रतिक्षिपति—**ज्ञातुरेव ज्ञानस्वरूपत्वादिति** । अयमर्थः—**ज्ञानस्य ज्ञानादिगुणाश्रयत्वाभावः**—किं व्याप्या कथ्यते, उत

देवद्युक्तमेवेत्युक्तम्। ज्ञातृत्वमेव हि सर्वाः श्रुतयो वदन्ति—**'यः सर्वज्ञः सर्ववित्'** (मु. १।१।९), **तदैक्षत'** (छा. ६।२।३), **'सेयं देवतैक्षत'** (छा. ६।३।२), **'स ऐक्षत लोकान्नु सृजा'** ऐ. १।१) इति। **'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्'** (श्वे. ६।१३), **'ज्ञाज्ञौ द्वावजावीशनीशौ'** (श्वे. १।९), **'तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम्। पतिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यम्॥ न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च॥** (श्वे. ६।७–८), **'एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः'** (छा. ८।१।५) इत्याद्याः श्रुतयो ज्ञातृत्वप्रमुखान्कल्याण-

---

श्रुतिबलात्। व्याख्या चेत्—ज्ञानानाश्रयभूतं विषयप्रकाशकं ज्ञानं कस्यचिद्धर्मीभूतमेव दृष्टमिति धर्मत्वेनाङ्गीक्रियताम्। यदि श्रुतिबलात् स्वतन्त्रत्वेनाङ्गीक्रियते—तर्हि श्रुतिबलादेव ज्ञानाश्रयत्वमप्यङ्गीक्रियताम्—इति ज्ञानानाश्रयत्वं धर्मभूतज्ञानत्वप्रयुक्तं, न तु ज्ञानत्वमात्रप्रयुक्तमिति सोपाधिकत्वम्, अतो व्याप्तिविरोधश्च नास्ति। यद्वा, जडस्य घटादेरिव ज्ञातृत्वायोगात् ज्ञातृत्वेनैव ज्ञानस्वरूपत्वमर्थसिद्धम्। द्वितीयं प्रतिवक्ति—**ज्ञानस्वरूपस्येति।** एकजातीयद्रव्ययोर्नियतधर्मधर्मिभाव उपपद्यत इत्यर्थः। श्रुत्या ज्ञानाश्रयत्वे सिद्धे हि तथाभ्युपगम इत्यत्राह—**ज्ञातृत्वमेव हीति।** यद्वा, **ज्ञातुरेव ज्ञानस्वरूपत्वादिति।** ज्ञातुर्ज्ञानस्वरूपत्वाविरोधादित्यर्थः। एकजातीयद्रव्ययोर्नियतधर्मधर्मिभावानुपपत्त्या विरोधं परिहरति—**ज्ञानस्वरूपस्यैवेति।** ज्ञानत्वात् ज्ञानानाश्रयत्वं परिहरति—**ज्ञातृत्वमेव हीति।** पूर्ववदभिप्रायः। ज्ञातृत्वं यथाफलितं भवति तादृशगुणपराश्च, ज्ञातृत्वकण्ठोक्तिमत्यश्च श्रुतयः **सर्व**शब्दविवक्षिताः। बहुवचनेन बहूपनिषद्वाक्यानि वा विवक्षितानि। **एव**कारेण ज्ञातृत्वस्यानन्यथासिद्धिरभिप्रेता। **हि**शब्दो हेतौ। ज्ञातृत्वस्य श्रुतिसिद्धत्वान्न कान्चिदनुपपत्तिरित्यर्थः। काः पुनः श्रुतय इत्यपेक्षायामपि—आर्थगुणनिषेधपरिहारार्थं, निर्गुणश्रुतिसंकोचसिद्ध्यर्थं, सगुणश्रुतीनामाविधिकगुणविषयत्वशङ्कापनोदार्थंच—श्रुतीर्दर्शयंस्ताभिरेतत्प्रयोजनत्रयसिद्धिं च दर्शयति—**यः सर्वज्ञ इत्यादिना। यः सर्वज्ञः, सर्ववित्** सर्वं स्वरूपतः, प्रकारतश्च जानातीत्यर्थः। ज्ञानस्य सर्वविषयत्वं, तस्य समष्टिव्यष्टिसृष्ट्युपयोगित्वम्, आत्मसंबन्धित्वं च दर्शयति—**तदैक्षतेत्यादित्रयेण। नित्यो नित्यानां**मित्यत्र चेतनबहुत्वमुक्तं, कामप्रदत्वं च। **ज्ञाज्ञौ द्वावजा**वित्यत्र ज्ञातृत्वम्, ईश्वरत्वं च। **तमीश्वराणां**मित्यत्र ईश्वरत्व-देवताव-पतित्वानि। **ईश्वरत्वं** नियन्तृत्वम्। नियाम्यविषयज्ञानवत एव नियन्तृत्वात्, नियमनस्य ज्ञानविशेषरूपत्वाच्च—नियन्तृत्वेन ज्ञातृत्वसिद्धिः। **देवतात्वं** कर्माराध्यत्वम्। **पतित्वं** शेषित्वम्। **न तस्येति। कार्यं** शरीरं, **करण**मिन्द्रियादि; 'कार्यकारणकर्तृत्वे' इति प्रयोगात्। समाभ्यधिकनिषेधश्चात्र श्रूयते—तेनाद्वितीय**मिति** सामान्यनिषेधस्य 'छागो वा मन्त्रवर्णा'दिति न्यायादीश्वररूपद्वितीयविशेषपर्यवसायित्वं सूचितम्। **परास्येति** ज्ञानशक्त्यादीनां स्वाभाविकत्वमुक्तम्। **क्रिया** नियमनम्। **एष आत्मेति** विशेषविधानं, विशेषनिषेधश्च। आर्थगुणनिषेधस्य परिहर्तव्यतामभिप्रेत्य **ज्ञानस्वरूपस्यैवेत्युक्तम्।** आविद्यिकत्वनिराकरणाय **स्वाभाविकानित्युक्तम्। समस्तहेयरहितता**ं **चेत्यनेनाप्याविद्यिकत्वशङ्काऽर्थात्परिहृता। किंच—ज्ञातृत्वप्रमुखान् कल्याणगुणान्, समस्तहेयरहितता**ं **चेत्यनेन** निर्गुणवाक्यस्य संकुचितवृत्तित्वं चोपपादितं भवति। तथा हि—**कल्याणगुणानि**त्यस्यायमभिप्रायः गुणविशेषविधानं गुणसामान्यनिषेधो न बाधितुं प्रभवति, अपि तु तद्व्यतिरिक्तविषय एव भवति; अन्यथा 'न हिंस्यात्सर्वा भूतानी'ति सामान्यनिषेधेनार्न्नाधोमीयं पशुमालभेतेति हिंसाविशेषविधानबाधप्रसङ्गादिति। **समस्तहेयरहितता**ं **चेत्यस्या**यमर्थः—यथा—'पशुना यजेत, छागस्य वपायाः' इत्यादिषु 'छागो वा मन्त्रवर्णा'दिति सूत्रोक्तन्यायात्सामान्यशब्दो विशेषदर्शने सति तत्रपर्यवस्यति, तथा गुणसामान्यनिषेधो विशेषगुणनिषेधे पर्यवस्यतीति। किंच—सामान्यशब्दानां विशेषे पर्यवसायित्वं व्युत्पत्तिसिद्धं, यथा—'गामानय, गां बधाने'त्यादिषु सामान्यशब्दो विशेषकटाक्षेण प्रयोजकवृद्धेन प्रयुज्यते, तत एव हि तत्र प्रयोज्यवृद्धश्च न सर्वा गोव्यक्तीरानयति, किंतु विवक्षितव्यक्तिविशेषमेवानयति, तथैवहि तत्र व्युत्पत्तिः। एवं **ज्ञातृत्वप्रमुखान् कल्याणगुणानि**त्यनेन, **समस्तहेयरहितता**ं **चेत्यनेन** च उत्सर्गापवादन्यायः, सामान्यविशेषन्यायश्चाभिप्रेतः उपात्तविशेषव्यतिरिक्तविषये सामान्यशब्दस्य विरोधपरिहाराय संकोच—उत्सर्गापवादन्यायः, अविरोधेऽपि वैयर्थ्यपरिहाराय संकोचश्चेत्—गोबलीवर्दन्यायः, उपात्तविशेषविषये तस्य संकोचः—सामान्यविशेषन्याय इति भिदा। किंच—अध्यात्मशास्त्रेषु गुणशब्दः सत्त्वरजस्तमस्सु प्रसिद्धः—'न हि तस्य गुणाः सर्वे सर्वैर्मुनिगणैरपि। वक्तुं शक्या विमुक्तस्य सत्त्वाद्यैरखिलैर्गुणैः॥

---

१ °दित्युक्तमेव।

गुणाज्ञानस्वरूपस्यैव ब्रह्मणः स्वाभाविकान्वदन्ति, समस्तहेयैरहिततां च । निर्गुणवाक्यानां, सगुणवाक्यानां च विषयमपहतपाप्मेत्याद्यपिपास इत्यन्तेन हेयगुणान्प्रतिषिध्य 'सत्यकामः सत्यसंकल्प' इति ब्रह्मणः कल्याणगुणान्विदधतीयं श्रुतिरेव विविनक्तीति—सगुणनिर्गुणवाक्ययोर्विरोधाभावादन्यतरस्य

सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः, निर्गुणस्याप्रमेयस्य, गुणा गुणेषु वर्तन्ते, कारणं गुणसङ्गोऽस्य, निर्गुणं गुणभोक्तृ च, नान्यं गुणेभ्यः कर्तारं, दैवी ह्येषा गुणमयी मम माया दुरत्यया, विना हेयैर्गुणादिभिः, गुणाददोषांश्च मुने व्यतीत', गुणकलुषस्य सनातनेन तेने त्यादिषु । एवं केवलगुणशब्दस्य सत्त्वादिपरत्वेन प्रसिद्धिप्राचुर्यान्**निर्गुण**शब्दाः सत्त्वादिनिषेधपराः । अयं विषयविभागो न केवलमस्मामिर्भिन्नोपनिषद्वाक्येषु गुणविशेषविधान–गुणविशेषनिषेधदर्शनान्निश्चीयते, एकस्मिन्नेव वाक्ये विषयविभागो दृष्ट इत्याह—**निर्गुणेति ।** गुणसामान्यनिषेधवद्गुणसामान्यमात्रविधानाभ्युपगमेन **निर्गुणवाक्यानां सगुणवाक्यानां चेत्युक्तम् ।** न हि श्रुतिषु गुणसामान्यविधानं क्वचिद्दृश्यते, गुणविशेषा एव हि श्रूयन्ते । दोषसमभिव्याहृतगुणशब्दस्तूपादेयगुणपरः—'वर्षायुतैर्यस्य गुणा न शक्याः, स ते गुणानामयुतैकदेशं, नान्तं गुणानां गच्छन्ती'त्यादिस्मृतिवचनाभिप्रायेण वा **सगुणवाक्यानाम**ित्युक्तं, तत्र गुणशब्दो दोषप्रतिपक्षवचनः लोके तथा प्रसिद्धेः, प्रकरणवशाच्छागपशुन्यायेन कल्याणगुणरूपविशेषपर्यवसानस्य न्याय्यत्वाच्च । उक्तन्यायद्वयेन विरोधाभावादपच्छेदन्यायस्याविषयत्वमाह—**इति सगुणनिर्गुणवाक्ययोरिति । इति**शब्देन पूर्वोक्तसर्वहेतवो विवक्षिताः । उत्सर्गापवादन्यायात्, सामान्यविशेषन्यायात्, अयात्मशास्त्रेषु गुणशब्दस्य सत्त्वादिषु प्रसिद्धिप्राचुर्याच्चेत्यर्थः । **सगुणनिर्गुणवाक्ययोरिति ।** अत्र तु विषयविभागान्न विरोध इति—नापच्छेदनयः प्रवर्तत—इति भावः । अन्यतरस्य मिथ्याविषयताश्रयणमपि नाशङ्कनीयमिति **सगुणवाक्यस्येति** नोक्तं, किं **त्वन्यतरस्येत्युक्तम् ।** सगुणेन निर्गुणवाक्यस्य वा, निर्गुणेन सगुणवाक्यस्य वा बाधाश्रयणमनुपपन्नमित्यर्थः । अत्रायमभिप्रायः—पूर्वं विरोधो नास्तीति परिहृतम्, इदानीं विरोधाभ्युपगमेऽपि नायमपच्छेदन्यायविषयः, अपि तु विरोधाधिकरणन्यायविषय एवेति । तथा हि—अपच्छेदन्यायो ह्यनियतविरोधपौर्वापर्यविषयः, उद्भातृप्रतिहर्तृरुभयोरपच्छेदनियमो नास्ति तत्रापि क्रमेणापच्छेदोऽप्यनियतः, तन्नियमे सति—सर्वस्वदक्षिणाकल्पादक्षिणाकल्पविरोधनियमः, उभयोरप्यपच्छेदे—तस्य क्रमभावित्वे उद्भात्रपच्छेदः पूर्वभावी, इतरस्तु चरमभावीति वा, विपर्ययेणेति वा नियमोऽपि नास्ति, अतोऽपच्छेदन्यायविषयः प्रयोगावधिकविरोध, सगुणनिर्गुणवाक्यविरोधस्तु स्वरूपप्रयुक्तः, विधिनिषेधरूपतया नियतपौर्वापर्यश्च । अतो विरोधाभ्युपगमेऽप्यनियतविरोधपौर्वापर्यविषयोऽपच्छेदन्यायो नात्र प्रवर्तते, अपि तु विरोधाधिकरणन्याय एव प्रवर्तते· तद्विषये हि पौर्वापर्यनियमो, विरोधनियमश्च विद्यते । तथा हि—'औदुम्बरी स्पृष्ट्वोद्गाये'दिति प्रत्यक्षश्रुतिः, 'औदुम्बरी सर्वा वेष्टयितव्या' इति स्मृतिः । तत्र श्रुतिः प्रथमत एव प्रमिति जनयतिः निरपेक्षप्रमाजनकत्वात् । स्मृतिस्तु स्वमूलभूतश्रुत्यनुमानसापेक्षतया—विलम्बितप्रवृत्तिः, अतस्तत्र पौर्वापर्यं नियतम्, औदुम्बरीस्पर्शतदनयोर्विरोधश्च नियतः, तत्र पूर्वमेव प्रमित्यां जातायां तद्विरुद्धार्थः कालात्ययापदिष्टः स्यात्, अतो 'विलम्बितधीहेतोः प्रबलधीहेतुर्बलीया'निति न्यायात् पूर्वम्या· श्रुतेर्बलीयस्त्वमित्युत्तरत्र शास्त्रानुदय एव । ननु—अत्राधीतमेव ह्युत्तरशास्त्रमिति चेत्, ततः किं, प्रमित्यनुदयो ह्यनुदयः, न तु शब्दानुदयः—आदित्यो यूप इति वत् । ननु—तत्र श्रुतित्वस्मृतित्वे बाध्यबाधकभावप्रयोजके, नैवं; स्मृतित्वश्रुतित्वयोः पौर्वापर्यहेतुत्वात् । तेन सिद्धं—पौर्वापर्यमेव बाध्यबाधकभावे हेतुरिति न्यायसाम्यात्सगुणवाक्यबलीयस्त्वम्–इति । यद्वा, माभूद्विरोधाधिकरणन्यायः, अत्र उपक्रमाधिकरणन्याय एव प्रवर्ततेः विरोधपौर्वापर्यनियमात्, अतः सगुणवाक्यप्रतिबद्धत्वात्–निर्गुणशास्त्रानुदय एवेति । ननु—प्रथमप्रवृत्तं विलम्बितस्योत्पत्तिप्रतिबन्धकं चेन्नेदं रजत'मिति ज्ञानोदयं'मिदं रजत'मिति धीः प्रतिबध्नातीति—चेन्नः सत्तया, ज्ञायमानतया च ज्ञापकयोरत्यन्तवैषम्यात् । सत्तया ज्ञापकं हि प्रमाणं पूर्वापरपरामर्शनिरपेक्षं ज्ञानं जनयति । तत्रोत्पन्नं ज्ञानं 'पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिध्यती'ति न्यायात् पूर्वं बाधित्वैवोदेति, ज्ञायमानतया ज्ञापकं तु योग्यतापरामर्शादिसापेक्षं प्रमितिं जनयति, तत्र परामर्शदशायां पूर्वप्रमाणेन विरुद्धार्थप्रमितिश्चेत्सा प्रमितिरुत्तरोत्पत्ति प्रतिबध्नातीति वैषम्यमिति । एवं तर्हि 'नेदं रजत'मिति ज्ञानस्य, 'इदं रजत'मिति परामर्शसापेक्षत्वात्—पूर्वज्ञानेन प्रतिबद्धस्य 'नेदं रजत'मिति ज्ञानस्यानुदयप्रसङ्ग इति—चेन्न; इन्द्रियस्य प्रत्यभिज्ञेतरज्ञानजनने पूर्वपरामर्शनिरपेक्षत्वादिहापि 'शुक्तिरियं'मिति शुक्तित्वविषया ह्युत्तरप्रमितिः । शुक्तित्वप्रतिपत्तेश्च न रजतप्रतिपत्तिसापेक्षत्वं; शुक्तित्वे गृहीते सति तद्ग्रहणफलभूतो 'नेदं रजत'मिति व्यवहारो नलुब्धिस्थितत्वात्प्रतियोगिसापेक्षः प्रवर्तते, तत्सापेक्षत्वं च शब्दस्वभावाधीनम्, अतः शुक्तिज्ञानं रजतज्ञानानिरपेक्षमुदयमानं पूर्वं बाधित्वैवोदेति । अतो नियतविरोधपौर्वापर्यविषयः विरोधाधिकरणन्याय एवात्र प्रवर्तते, न त्वपच्छेदनयः । स चेदशस्थले यदि प्रवर्तते—पश्वालम्भनमकर्तव्यं स्यात्; चरमभावितो न हिंस्यादिनिषेधस्य प्रबल-

२ सदानन्दस्य नेनेत्यादिषु । ३ प्रतीतिः ।

मिथ्याविषयताश्रयणमपि नाशङ्कनीयम्। **'भीषास्माद्वातः पवते'** (तै. २।८।१) इत्यादिना ब्रह्मगुणानारभ्य **'ते ये शतम्'** (तै. २।८।१) इत्यनुक्रमेण क्षेत्रज्ञानन्दातिशयमुक्त्वा **'यतो वाचो निव-**

त्लात्, तनश्चानुष्ठानविरोधः। सगुणनिर्गुणवाक्ययोर्विरोधपर्वापर्यनियमः परेणैवोक्तः, अतो विरोधाधिकरणन्यायविषयत्वेनाऽपच्छेदनयानवकाशात्सगुणवाक्यानां वलीयस्त्वं सिद्धमिति, एतदभिप्रायेणान्यतरस्येत्युक्तम्। उपाध्यनुक्तिपूर्वकश्रुत्युक्तानां गुणानां, निरुपाधिकत्लस्य स्वतः प्राप्तत्लात् स्वाभाविकत्लश्रुतेर्नान्यो हेतुर्विद्यते ईशनायेति ईशनस्य हेत्लश्रवणेन तदौपयिकगुणानामपि निरुपाधिकत्लसिद्धेः, ज्ञानशक्त्यादिनारतम्योपाधिभूतकर्मसंबन्धनिषेधपूर्वकसत्यकामत्लाद्युक्तेः, 'न इमे सत्याः कामा' इति स्वरूपवत् सत्यत्लश्रुतेः, 'पराऽस्य शक्तिः, ते ये शत'मित्यादिभिर्गुणानामनवच्छिन्नत्लप्रतिपादनेन कर्मसंबन्धव्यापकपरिच्छेदनिवृत्त्या व्याप्यकर्मसंबन्धनिवृत्तेरर्थसिद्धत्वात्, स्वाभाविकत्लकण्ठोक्तिरहितगुणपरवाक्येष्वपि सर्वशाखाप्रत्ययन्यायेन गुणानां स्वाभाविकत्लसिद्धेः, 'आनन्दं ब्रह्मण' इत्यादितात्पर्यलिङ्गप्राचुर्यात्, उत्सर्गापवादन्याय-सामान्यविशेषन्यायाभ्यां विषयविभागात्, एकस्यां श्रुतावेव विषयविभागस्य दृष्टतया च विरोधाभावादपच्छेदन्यायाविषयत्लात्, विरोधे सत्यपि विरोधाधिकरणन्यायेन सगुणवाक्यप्राबल्यात्, 'यः सर्वज्ञ' इत्यादिषूपासनविधिरहितवाक्येषु स्वरूपवत्प्रतिपन्नत्लात्, मानान्तरागोचरतयैवानुवादविषयत्लासंभवेन निषेद्धुमशक्यत्लात्, 'आत्मा वा अरे द्रष्टव्यः, सत्यं ज्ञानमनन्तं ब्रह्म, यो वेद, आत्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामानि'ति क्वचिदुपास्यत्वश्रवणस्य स्वरूपेऽपि तुल्यत्लात्, अध्यात्मशास्त्रेषु सत्त्वादिषु गुणशब्दस्य प्रसिद्धिप्राचुर्याच्च—निर्गुणवाक्यविषयत्लाभावात्, वाद्यतर्काणां कालात्ययापदिष्टत्लात्, अवधारणद्वयसहितादितीयत्लश्रुति-ज्ञानानन्दस्वरूपत्ल-वाङ्मनसनिवृत्ति-ज्ञेयत्लनिषेध-रूपार्थगुननिषेधानां परिहृतत्लाच्च—**निरुपाधिका ब्रह्मगुणा** इत्युक्तवक्ष्यमाणार्थसंग्रहः प्रवृत्तिसौकर्याय दर्शितः। **इति निर्गुणश्रुतीनां हेयगुणनिषेधपरत्वसमर्थनम्॥**

'सत्यं ज्ञान'मिति ज्ञानपदेन सिध्यन्नार्थगुणनिषेधः पूर्वं परिहृतः, अथ एतदनुवाकोपसंहारेच 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे'ति वाङ्मनसनिवृत्त्यभिधानान्निर्गुणत्वं फलितम्, अतस्तदैकार्थ्याच्च सत्यज्ञानादिवाक्यस्य निर्विशेषपरत्वम्—इति शङ्कायामार्थगुणनिषेधपरतया परोक्तस्यास्य वाक्यस्योक्तार्थानुगुण्यमुपपादयति—**भीषाऽस्मादित्यादिना** भीषाऽस्मादित्यनेन आज्ञापयितृत्लमुच्यते। **क्षेत्रज्ञानन्दातिशयमुक्त्वेति।** अत्र निर्विशेषत्वं प्रतिपिपादयिषितं चेत्—गुणानां क्रमेण न्यूनतां प्रतिपाद्य सर्वाभावे पर्यवसितुं युक्तं, अत्र तु क्रमेण गुणानामाधिक्यमुक्त्वा वाङ्मनसनिवृत्त्यभिधानमानन्त्यादेवेत्यभिप्रायः, यथा—'संख्यातुं नैव शक्यन्ते गुणा दोषाश्च शार्ङ्गिणः। आनन्त्यात्प्रथमो राशिरभावादेव पश्चिम' इति प्रथममनुष्यानन्दमारभ्य क्रमेणातिशयो दर्शितः। **साधु युवाऽध्यायकः**—साधु यथाविधि, सम्यक्संप्रदायसिद्धतया, स्वरवर्णादिभ्रंशरहितं वा, युवशब्देन प्रत्यग्रत्वं विवक्षितम्। अविस्मरणान्नित्यनवं यथा भवति तथाऽध्ययनवानित्यर्थः। यद्वा, स्वसमवयस्कानां सर्वेषा**मध्यापकः** तदधिकज्ञान इत्यर्थः। **आशिष्ठः** आशुनरक्रियः। यद्वा, अशनक्षमः अरोग इत्यर्थः। यद्वा, आशीर्वादविषयभूतसर्वानुरञ्जक इत्यर्थः। 'सर्वान् देवान् नमस्यन्ती'तिवत्। **बलिष्ठः** मनोबलवान्; **द्रढिष्ठ** इति शरीरबलस्योक्तत्लात्। यद्वा, **द्रढिष्ठः** दृढतरः, न त्वव्यवस्थितस्वभाव इत्यर्थः। **बलिष्ठः** शारीरमानससर्वविधबलवान्। **वित्तस्य पूर्णा** वित्तेन पूर्णा; 'पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणे'नेति षष्ठ्यनुज्ञानात्। **स एको मानुष आनन्दः।** एवं गुणसमुदायं विभूतिपौष्कल्यं चोक्त्वा, 'स एको मानुष आनन्द' इति श्रुत्या स्वरसतस्तस्यैवानन्दत्लमुक्तम्। अनुकूलत्वं **ह्यानन्दत्वम्।** निवर्त्यानिष्टत्वेष्टसाधनत्वानपेक्षमिष्टत्ल**मनुकूलत्वम्।** उक्तलक्षणायोगात्—गुणविभूत्योरानन्दत्लमुपपद्यते। तद्विषयज्ञानस्याप्यनुकूलत्वं विषयानुकूलत्वकृतमित्यन्वयव्यतिरेकसिद्धम्। एवं च सति श्रुतिस्वारस्यं च सिध्यति; गुणविभूतिप्रकर्षमुक्त्वा **स आनन्द** इति ह्युक्तं, न तु तद्विषयज्ञानमिति। युवत्वाद्यनेकगुणान्विभूतिमप्युक्त्वा तत्समुदायमानन्दशब्देन निर्दिश्य तस्यानन्दस्य निरतिशयत्लप्रतिपादनात्—सर्वगुणानां विभूतेश्चानवधिकातिशयत्वं प्रतिपादितं भवति। अनुकूलत्वज्ञानत्लमेवानैन्दत्लमिति गुणविभूतिविषयज्ञानस्यानन्दत्वेऽपि तस्यानन्दस्य निरवधिकातिशयत्वोक्त्या गुणविभूत्योरप्यनवधिकातिशयत्लमर्थादुक्तं भवति; तदानन्त्यस्य गुणविभूत्यानन्त्यनिबन्धनत्लादिति। **आरभ्येति।** उपक्रमानुगुणमुपरितनवाक्यं नेयमिति भावः। **श्रोत्रियस्य चाकामहतस्येति** वाक्यैर्मुक्तानन्दस्य भगवदानन्दसाम्यमुक्तं भवति; बद्धदशायां निरतिशयानन्दासंभवात्। **श्रोत्रियः** ब्रह्मनिष्ठः। **अकामहतः** निवृत्ताविद्यत्लात्समस्तसांसारिकभोगानुपहतः। **स एकः प्रजापतेरानन्द** इत्यनेन क्षेत्रज्ञानन्दातिशय उक्तः। **स एको ब्रह्मण आनन्द** इति भगवदानन्द उच्यते; चतुर्मुखानन्दपरत्वे ब्रह्मशब्दस्वारस्यहानिः—'परं जैमिनिर्मुख्यत्लात्, स्याच्चैकस्य ब्रह्मशब्दव'दिति ब्रह्मशब्दस्य तत्रैव मुख्यवृत्तत्लस्य सूत्रितत्लात्, भाष्ये प्रथमसूत्रस्थब्रह्मशब्दव्याख्यानावसरे प्रपञ्चितत्लाच्च। 'ब्रह्मविदाप्नोति,

---

१ उपाध्यानु°। २ साहचर्यात्। ३ अन्वाविषय°। ४ आनन्दत्वमर्थादुक्तं भवति। का. मु. पु.।

र्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान्' (तै. २।९।१) इति ब्रह्मणः कल्याणगुणानन्त्यमत्यादरेण वदतीयं श्रुतिः। 'सोश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता' (तै. २।१।१) इति ब्रह्मवेदनफलमवगमयद्वाक्यं परस्य विपश्चितो ब्रह्मणो गुणानन्त्यं ब्रवीति। विपश्चिता ब्रह्मणा सह सर्वान्कामान् समश्नुते। काम्यन्त इति कामाः कल्याणगुणाः। ब्रह्मणा सह तद्गुणान्त्सर्वानश्नुत इत्यर्थः। दहरविद्यायां 'तस्मिन्यदन्तस्तदन्वेष्टव्यम्' (छा. ८।१।१) इतिवद्गुणप्राधान्यं वक्तुं सहशब्दः। फलोपासनयोः प्रकारैक्यं—'यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति' (छा. ३।१४।१)

ब्रह्मणा विपश्चिता, सत्यं ज्ञानमनन्तं ब्रह्म, आनन्दं ब्रह्मणः, असद्ब्रह्मेति वेद चेत्, अस्ति ब्रह्मेति चेद्वेदे'ति प्रकरणस्थब्रह्मशब्दानां परब्रह्मपरत्वात् प्रकरणविरोधश्च, 'आनन्दं ब्रह्मणो विद्वा'निति पूर्वत्रोत्तरत्र चानन्दप्रतियोगिषष्ठ्यन्तब्रह्मशब्दस्वारस्यविरोधश्च, 'सैषाऽऽनन्दस्ये'ति प्रकान्तब्रह्मानन्दस्य चतुर्मुखानन्देनोपसंहारानुपपत्तिश्च, 'तदप्येष श्लोको भवती'ति ब्रह्मानन्दं प्रकृत्य वक्ष्यमाणस्य श्लोकस्य उक्तविषयत्वविरोधश्च, 'स एकः प्रजापते'रिति निरुपपदैकवचनान्तप्रजापतिशब्दस्वारस्यभङ्गश्च॥ नच—नञ्जात्येकवचनं; बहुत्वैकत्वविवक्षायां बहुवचनैकवचनप्रकरणत्वात्, मनुष्यगन्धर्वाणां देवगन्धर्वाणां देवानामिन्द्रस्य बृहस्पतेः प्रजापतेरिति हि निर्दिश्यते, अतः प्रजापतिशब्दश्चतुर्मुखपरः। 'स एको ब्रह्मण' इत्यत्र ब्रह्मशब्दो भगवत्परः। 'ते ये शतं, स एक' इति भगवदानन्दस्य कथं परिच्छिन्नत्वमिति—चेन्न; परिच्छिन्नत्वमेकक्षणार्धे बहूनि योजनानि गच्छतो रवेः 'क्षिप्तेषुरिव सर्पती'तीषुसाम्यकथनं यथा गतिमान्द्यनिवृत्तिपरं, न तु परिच्छेदपरं—तद्वत्'ते ये शतं, स एक' इति निर्देशोऽपि चतुर्मुखानन्दाधिक्याभिप्रायः, न तु परिच्छेदपर इति। यद्वा, 'ते ये शतं, स एक' इत्यस्य निर्देशस्य संख्याविशेषपरत्वेऽप्यानन्दस्यापरिच्छिन्नत्वं फलितम्; 'अण्डानां तु सहस्राणां सहस्राण्ययुतानि च। ईदृशानां तथा तत्र कोटिकोटिशतानि च। रोमकूपेष्वनन्तानि ब्रह्माण्डानि भ्रमन्ति ते' इत्यादिवचनैरण्डानामनन्तत्वेन—तत्र तत्र चतुर्मुखानामप्यानन्त्यात्, कालत्रयवर्तिसमस्तब्रह्माण्डगतचतुर्मुखानन्दापेक्षया शतगुणत्वात्, 'मेरोरिवाणुर्यस्यैतद् ब्रह्माण्डमखिलं मुनं इत्युक्तत्रिपाद्विभूतिमत्तया च भगवदानन्दस्यात्यन्तमानन्त्यसिद्धेरिति—कल्याणगुणानन्त्यमिति। न हि क्रमेण गुणापकर्षं उक्तः, किं तु गुणानां प्रकर्ष एवोक्तः, अतो गुणप्रकर्षस्य निरतिशयत्वाद्ब्रह्मनसनिवृत्तिरिति भावः॥ **अत्यादरेणेति** ब्रह्मस्वरूपादपि तद्गुणेष्वादरातिशय उक्तः; 'आनन्दं ब्रह्मणो विद्वा'निति हि श्रुतिः, न त्वानन्दान्वितं ब्रह्म विद्वानिति भावः। इयं श्रुतिरिति निर्गुणपरत्वेन त्वयोक्तेनत्प्रकरणस्था श्रुतिरप्यस्मदुक्तार्थानुगुणेति भावः। एवमार्थगुणनिषेधनिरासद्वारा प्रकरणगतवाक्यान्तरेण गुणानन्त्यपरेणैकार्थ्यात्सत्यज्ञानादिवाक्यस्य सविशेषविषयत्वमुक्तम्, अथ स्ववाक्यैकदेशेनापि सविशेषपरत्वमुपपादयति—**सोश्नुत इत्यादिना**। फलमवगमयद्वाक्यमिति 'ब्रह्म विदाप्नोति पर'मिति ब्राह्मणे—ब्रह्म, तद्वेदनं, प्राप्तिः, प्राप्यं चेति चतुष्टयमुक्तम्, एतद्विवरणं 'सत्यं ज्ञान'मित्यादिमन्त्रेण कियत इति श्रुतिरेवाह—**तदेषाऽभ्युक्तेति**। तदेव ब्रह्मानिमुखीकृत्य ऋगेषाऽभ्युक्तेत्यृग्भिरुक्तेत्यर्थः। मन्त्राणां ब्राह्मणविवरणरूपत्वदर्शनात्—उपक्रमाधिकरणविषयवाक्ययोरिवापातविरोधप्रतीत्यभावात्, मन्त्रब्राह्मणयोर्नित्यनिर्दोषत्वाविशेषाच्च—मन्त्रापेक्षया ब्राह्मणप्राबल्यवादोऽनुपपन्नः। स्फुटप्रतिपत्तिहेतुत्वतदभावावेव प्राबल्यदौर्बल्यशब्दविवक्षितौ चेत्, न विरोधः। 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति ब्रह्मशब्दो विवृतः। 'यो वेद निहितं गुहाया'मिति विच्छब्दः। 'परमे व्योमन् सोऽश्नुत' इति प्राप्तिः। 'सर्वान्कामा'नित्यादिना प्राप्यम्। तत्र परशब्दार्थविवरणमेतदिति दर्शयितुं **परस्य विपश्चितो ब्रह्मण** इत्युक्तम्। विपश्चित्त्वमपि भोग्यगुणत्वेनोक्तम्। वाक्यस्यार्थं वक्तुं पदानामन्वयं दर्शयति—**विपश्चितेति**। किमत्र गुणवाचिपदमिति शङ्कायां—'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिता' इति त्याज्यतयोक्तकामव्यावृत्त्यर्थमवयवशक्त्या व्याचष्टे—**काम्यन्त इति**। ब्रह्मवेदनफलतया मुक्तानुभाव्यत्वादिह त्याज्यकामपरत्वानुपपत्तेः, काम्यत्वस्य ब्रह्मस्वरूपेऽपि संभवे सत्यपि व्यतिरेकनिर्देशात्, बहुवचनान्तत्वात्, अवयवशक्तेः, तदुक्तभोग्यत्वस्य च गुणेषु संभवात्, 'स वा एतेन दिव्येन चक्षुषा मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके, य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान्, 'त इमे सत्याः कामा' इति श्रुत्यन्तरैकार्थ्याच्च—कामशब्दवाच्याः कल्याणगुणगणा इत्यर्थः। कस्येमे गुणाः, सहभावश्च ब्रह्मणः, 'पुत्रेण सहैदनं भुङ्क्ते' इत्यत्र पुत्रस्येव किं भोक्तृतया उत 'क्षीरेण सहैदनं भुङ्क्ते' इत्यत्र क्षीरस्येव भोग्यतया—इति शङ्कां च परिहरन्वाक्यार्थमाह—**ब्रह्मणेति**। अस्य वाक्यस्य प्राप्यवाचिपरशब्दविवरणरूपत्वात्, **सर्वान्कामान् सह ब्रह्मणे**ति भोग्यवाचिपदेनाव्यवहितप्रयोगस्वारस्याच्च—**सह** शब्दो भोग्यसाहित्यपरः। सन्निहितं ब्रह्मैव च गुणानामाश्रयः, अनोऽनन्तगुणविशिष्टं ब्रह्मानुभवतीत्यर्थः। 'सह युक्तेऽप्रधान' इति शब्दानुशासनबलात्सहशब्देनाप्राधान्यं ब्रह्मण आशङ्क्य तत्परिहाराय **सह**शब्दप्रयोजनमाह—**दहरेति** 'यो वेदे'ति विहिते वेदने गुणानां प्राधान्यसूचकः **सह**शब्दः। दहरविद्यायामुपासने हि गुणप्राधान्यमुक्तं, तथात्राप्युपासने गुणप्राधान्यं वक्तुं **सह**शब्द इत्यर्थः। फलदशायां गुणप्राधान्यश्रवणादुपासने गुणप्राधान्यं कथं सिध्यतीत्यत्राह—**फलोपासन-**

इति श्रुत्यैव सिद्धम । **'यस्यामतं तस्य मतम्—अविज्ञातं विजानताम्'** (के. ११) इति ब्रह्मणो ज्ञानविषयत्वमुक्तमिति चेन्, **'ब्रह्मविदाप्नोति परम्'** (तै. २।१।१), **'ब्रह्म वेद ब्रह्मैव भवति'** (मु. ३।२।९) इति ज्ञानान्मोक्षोपदेशो न स्यात् । **असन्नेव स भवति असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः ॥'** (तै. २।६।१) इति ब्रह्मविषयज्ञानासद्भावसद्भावाभ्यामात्मनाशम्, आत्मसत्तां च वदति । अतो ब्रह्मविषयवेदनमेवापवर्गोपायं सर्वाः श्रुतयो विदधति । ज्ञानं चोपासनात्मकम्, उपास्यं च ब्रह्म सगुणमित्युक्तम । **'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह'** (तै. २।४।१) इति ब्रह्मणोऽनन्तस्यापरिच्छन्नगुणस्य वाङ्मनसयोरेनावदिति परिच्छेदायोग्यत्वश्रवणेन ब्रह्मैतावदिति ब्रह्मपरिच्छेदज्ञानवतां ब्रह्माविज्ञातम्, अमतमित्युक्तम : अपरिच्छिन्नत्वाद्ब्रह्मणः । अन्यथा **'यस्यामतं तस्य मतम्—विज्ञातमविजानताम्'** (के. ११) इति ब्रह्मणो मतत्वविज्ञातत्ववचनं तत्रैव विरुध्यते । यत्तु—**'न दृष्टेर्द्रष्टारम्—न मतेर्मन्तारम्'** (बृ. ३।४।२) इति श्रुतिर्दृष्टेर्मतेर्व्यति-

---

योरिति । फलोपासनयोरुभयोरपि सगुणत्वं, गुणप्राधान्यं च तुल्यप्रकारमित्यर्थः । **गुणप्राधान्यं** वक्तुमित्यनेनापि **सह**शब्दस्य भोग्यसाहित्यपरत्वं सिद्धम्; अन्यथा भोक्तृप्राधान्यं हि सिध्येत्, न तु भोग्यगुणप्राधान्यमिति—**श्रुत्यैवेत्येवकारेण** उक्तन्यायस्य पुरुषबुध्युत्प्रेक्षानिरपेक्षं श्रुत्या कण्ठोक्तत्वमभिप्रेतम् । अथ सगुणानामेव ज्ञेयत्वं दृष्टमिति ज्ञेयत्वनिषेधेन निर्गुणत्वं फलितमिति ज्ञेयत्वनिषेधपरत्वेन परोक्तं वाक्यमुपादत्ते—**यस्येति** । किं ज्ञानमात्राविषयत्वम्, उतोपासनात्मकज्ञानाविषयत्वम्, उत सगुणोपासनात्मकज्ञानाविषयत्वं विवक्षितम्—इति विकल्पत्रयमभिप्रेत्य प्रथमं ज्ञानमात्राविषयत्वं दूषयति—**ब्रह्मविदिति** । ब्रह्मणो ज्ञेयत्वे श्रुतेरादरातिशयं दर्शयति—**असन्नेवेति** । न ब्रह्मवेदनमपवर्गोपायः, अपि तु प्रपञ्चा मिथ्यात्वज्ञानमेव तदुपाय इति परैरुच्यते । 'विद्ययाऽमृतमश्नुते, तथा विद्वान्नामरूपाद्विमुक्तः, ततो ज्ञानं प्रवर्तते, ज्ञानाग्निः सर्वकर्माणी'त्यादिष्वनिर्दिष्टविषयविशेषेषु वाक्येष्वपवर्गोपायतया श्रूयमाणस्य ज्ञानस्य ब्रह्मविषयत्वप्रपञ्चमिथ्यात्वविषयतासाधारण्यात्तदाशङ्क्याह—**अत इति** । अतः केषुचिद्वाक्येष्वपवर्गोपायज्ञानस्य ब्रह्मविषयत्वदर्शनात्—सर्वाः श्रुतयः अनिर्दिष्टविषयविशेषाः । 'विद्ययाऽमृतमश्नुत' इत्यादिकाः श्रुतयोऽपि सर्वशाखाप्रत्ययन्यायेन ब्रह्मविषयमेव वेदनमपवर्गोपायतया विदधतीत्यर्थः । यद्वा, केषुचिद्ब्रह्मविषयत्वे श्रुते—ज्ञानमात्रोपायपराः श्रुतयश्च सामान्यविशेषन्यायात् तत्रैव पर्यवस्यन्तीत्यभिप्रायः । अथोपासनात्मकज्ञानाविषयत्वपक्षं दूषयति—**ज्ञानं चेति** । 'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत' इति श्रुतिरुपासनात्मकज्ञानाविषयशङ्कावीजं वाक्यार्थज्ञानस्योपायत्वानुपपत्त्युपपादनान्परिहृतमित्यर्थः । **नेदं यदिदमुपासत** इत्यस्यायमर्थः—यदिदं प्रतीकमुपासते तन्न, तदेव परं ब्रह्म त्वमुपास्स्वेति । अथ सगुणोपासनाविषयत्वपक्षं प्रतिक्षिपति—**उपास्यं चेति** । निर्गुणपरत्वेन परोक्तायाः सद्विद्याया एव सगुणविषयत्वोपपादनादिति भावः । यद्वा, ज्ञानं चोपासनात्मकमिति ज्ञानविशेषविषयत्वकण्ठोक्त्या ज्ञेयत्वमात्रनिषेधो दूरं निरस्त इति भावः । उपास्यं चेति ज्ञेयत्वनिवृत्त्या सिषाधयिषिता गुणनिवृत्तिर्गुणविधानबाधिता, ततश्चाज्ञेयत्वं बाधित्वा ज्ञेयत्वमाक्षिपतीति भावः । तर्ह्यविज्ञातत्वामतत्वश्रुत्योः कोऽर्थः इत्यत्राह—**यतो वाच इति । अनन्त**शब्देन सत्यं ज्ञानमिति वाक्यं स्मारितम् । **अनन्तस्ये**ति स्वरूपानन्त्यमुक्तम् । **अपरिच्छिन्नगुणस्ये**ति गुणानन्त्यम् । अस्मिन्नर्थे 'न हि तस्य गुणाः सर्वे सर्वैर्मुनिगणैरपि । वक्तुं शक्या वियुक्तस्य सत्त्वाद्यैरखिलैर्गुणैः ॥, नान्तं गुणानां गच्छन्ति तेनानन्तोऽयमुच्यते, तवानन्तगुणस्यापि पडेव प्रथमे गुणाः, वर्षायुतैर्यस्य गुणा न शक्या वक्तुं समैतैरपि सर्वलोकैः । महात्मनः शङ्खचक्रासिपाणेर्विष्णोर्जिष्णोर्वसुदेवात्मजस्य ॥, चतुर्मुखायुर्यदि कोटिवक्त्रो भवेन्नरः क्वापि विशुद्धचेताः । स ते गुणानामयुतैकदेशं वदेन्न वा देववर प्रसीद ॥, यथा रत्नानि जलधेरसंख्येयानि पुत्रक । तथा गुणा ह्यनन्तस्य असंख्येया महात्मनः ॥, इषुक्षयान्निवर्तन्ते नान्तरिक्षक्षितिक्षयात् । मतिक्षयान्निवर्तन्ते न गोविन्दगुणक्षयात् ॥' इत्यादि द्रष्टव्यम् । परिच्छिन्नत्वज्ञाने कथं धर्मिणो ब्रह्मणोऽज्ञातत्वम्, इत्यत्राह—**अपरिच्छिन्नत्वाद्ब्रह्मण इति** । ब्रह्मशब्दवाच्यस्य स्वरूपतो गुणतश्चापरिच्छिन्नत्वादित्यर्थः । न केवलं श्रुत्यन्तराविरोधार्थमेवमर्थं उक्तः, इतरथा स्ववाक्यव्याहतिप्रसङ्गाच्चेत्याह—**अन्यथेति । तत्रैव** स्ववाक्य एव । **इति परोक्तज्ञेयत्वनिषेधनिरासः ॥**

ज्ञेयत्वनिषेधे परिहृते ज्ञातृत्वनिषेधं परिहरति—**यत्त्वित्यादिना । दृष्टेर्मतेरिति** पञ्चम्यन्तत्वाभिप्रायेण **व्यतिरिक्त**मिति पदाध्याहारेण किं योजना, उत षष्ठ्यन्ततया व्यतिरिक्तपदानध्याहारेण योजना त्वया क्रियत—इति विकल्पमभिप्रेत्य

---

१ अपवर्गाय । २ अपरिमित° । ३ ब्रह्म इति नास्ति म. मु. पु. ।

रिक्तं द्रष्टारं मन्तारं च प्रतिषेधति—इति, तदागन्तुकचैतन्यगुणयोगितया ज्ञातुरज्ञानस्वरूपतां कुतर्कसिद्धां मत्वा न तथात्मानं पश्येर्न मन्वीथाः, अपि तु द्रष्टारं मन्तारमप्यात्मानं दृष्टिमतिरूपमेव पश्येरित्यमिदधातीति परिहृतम्। अथवा—दृष्टेर्द्रष्टारं मतेर्मन्तारं जीवात्मानं प्रतिषिध्य सर्वभूतान्तरात्मानं परमात्मानमेवोपास्स्वेति वाक्यार्थः। अन्यथा **'विज्ञातारमरे केन विजानीयात्'** (बृ. २।४।१४) इत्यादि ज्ञातृत्वश्रुतिविरोधश्च। **'आनन्दो ब्रह्म'** (तै. भृ. ६।१) इति आनन्दमात्रमेव ब्रह्मस्वरूपं प्रतीयत इति यदुक्तं, तज्ज्ञानाश्रयस्य ब्रह्मणो ज्ञानं स्वरूपमिति परिहृतम्। ज्ञानमेव ह्यनुकूलमानन्द इत्युच्यते। 'विज्ञानमानन्दं ब्रह्मे'त्यानन्दस्वरूपमेव विज्ञानं ब्रह्मेत्यर्थः। अत एव भवतामेकरसता। अस्य ज्ञानस्वरूपस्यैव ज्ञातृत्वमपि श्रुतिशतसमधिगतमित्युक्तम्। तद्वदेव **'स एको ब्रह्मण आनन्दः'** (तैः २।८।१), **'आनन्दं ब्रह्मणो विद्वान्'** (तै. २।४।१) इत्यादिव्यतिरेकनिर्देशाच्च—नानन्दमात्रं ब्रह्म, अपि त्वानन्दि; ज्ञातृत्वमेव ह्यानन्दित्वम्। यदिदमुक्तं—**'यत्र हि द्वैतमिव भवति'** (बृ.२।४।१४), **'नेह नानास्ति किंचन। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति'** (बृ. ४।४।१९),

---

प्रथममध्याहारपक्षमनुवदति—**न दृष्टेरिति**। परिहरति—**तदिति**। प्रसक्तस्य हि प्रतिषेध इति शङ्कायां, प्रसङ्गं दर्शयति—**कुतर्कसिद्धामिति**। कुतर्कः **कथ**मुपन्यस्त इत्यपेक्षायां, स्वरूपजडत्वे परोक्तं हेतुद्वयं संग्रहेणोपादयति—**आगन्तुकचैतन्यगुणयोगितयेति**। **आगन्तुकत्वात्, गुणत्वाच्चे**ति हेतुद्वयम्। **आगन्तुकत्वात्** अनित्यत्वात्—ज्ञानं नित्यस्यात्मनो न स्वरूपं भवितुमर्हति, **गुणत्वाच्च** न स्वरूपमिति। यद्वा, **चैतन्यं** नाम विषयप्रकाशः तन्नित्यं स्वरूपं चेत्सर्वदा विषयप्रकाशप्रसङ्ग इति भावः। दृष्टि—श्रुति—मति—निदिध्यासनानां ज्ञानविशेषाणां कर्तुरात्मनः **स्वरूपस्य** दृष्ट्यादिरूपत्वे विधीयमाने—आत्मनः स्वरूपस्य न ज्ञानावान्तरभेदः शङ्कनीयः; तेषां ज्ञानविशेषरूपाणां स्वयंप्रकाशलक्षणं ज्ञानत्वमविशिष्टमिति तावन्मात्रमेव स्वरूपस्य विवक्षितं भवति। अयं परिहारः परपक्षेऽपि समानः, साक्षाद्योजनामाह—**अथवेति**। दृष्टि-श्रुति मति-निदिध्यासनानां कर्तारं जीवात्मानं प्रतिषिध्य परमात्मानमेवोपास्स्वेत्यर्थमर्थं उक्त इत्यर्थः। यद्वा, अभिदधातीत्यनुषङ्गः, जीवात्मनं प्रतिषिध्य परमात्मानमुपास्स्वेत्यभिदधाति श्रुतिरिति वाक्यार्थ—इति वाक्यान्तरम्। यद्वा, **प्रतिषिध्य** परित्यज्येत्यर्थः, अतः समानकर्तृकत्वोपपत्तिः। 'यः प्राणेन प्राणिति योऽपानेनापानिति एष त आत्मा सर्वान्तर' इति प्रस्तुतत्वात्प्राणेन प्राणितृत्वादि जीवात्मनः संभवतीति तदुपास्यत्वशङ्काव्यावृत्त्यर्थं 'न दृष्टेर्द्रष्टा' रमित्याद्युच्यत—**इति अयमेवार्थः**। अन्यथा श्रुत्यन्तरविरोधमाह—**अन्यथेति**। गुणत्वमसिद्धं; ज्ञानस्य स्वरूपत्वेन श्रुतिप्रतिपन्नत्वात्। ज्ञानं चेदागन्तुकमिति न वाच्यम्; ईश्वरज्ञाने व्यभिचारात्, अस्मदादिज्ञानस्याप्यागन्तुकत्वं कालात्ययापदिष्ट—'न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत' इति श्रुतेः, इते हेतुद्वयपरिहारः। विषयप्रवणत्वं धर्मभूतज्ञानस्यैव, सर्वसाधारणं ज्ञानत्वं **स्वप्रकाशत्वम्**, अतो न सर्वदा विषयप्रकाशप्रसङ्गश्च। **इति परोक्तज्ञातृत्वनिषेधनिरासः॥**

ज्ञेयत्वनिषेधपरिहारानन्तरं बुद्धिस्थत्वात्—ज्ञातृत्वनिषेधः परिहृतः, अथार्थगुणनिषेधान्तरं परिहृयते—**आनन्द इत्यादिना। पूर्वोक्तपरिहारमत्रातिदिशति—तज्ज्ञानाश्रयस्येति। कथं तेनेदं परिहृतमित्याह—ज्ञानमेव हीति**। तर्हि श्रुतिषु विज्ञानानन्दशब्दयोः समभिव्याहारो नोपपद्यत इत्याह—**विज्ञानमिति**। स्वयंप्रकाशत्वानुकूलत्वरूपप्रवृत्तिनिमित्तभेदादुपपद्यत इति भावः। तर्हि भवद्भिरभ्युपगतमित्याह—**अत एवेति। अत एव** ज्ञानानन्दशब्दयोरेकविषयत्वा**देवेत्यर्थः**। आनन्दस्यानन्दाश्रयत्वाभावः किं श्रुत्या, उत व्याप्त्या। व्याप्त्या चेत्, कस्यचिद्धर्मः स्यात्। श्रुतिबलात्स्वतन्त्र इति चेत्, तत् **एवानन्दाश्रयत्वमप्यभ्युपगम्यतां**; धर्मभूतानन्दस्य ह्यानन्दाश्रयत्वाभावो दृष्टः, अतो व्याप्तिविरोधश्च नास्ति। अतः **स्वतन्त्रत्ववत् गुणाश्रयत्वमपि** श्रुतिसिद्धत्वात् स्वीकार्यमिति भावः। उभयत्र प्रमाणे सति हि न्यायसंचार इत्याशङ्कायां, दृष्टान्तभूमौ प्रमाणस्य दर्शितत्वमाह—**अस्येति**। दार्ष्टान्तिकेऽपि कण्ठोक्तिं दर्शयति—**तद्वदिति**। ज्ञातृत्ववदानन्दित्वमपि कण्ठोक्तमित्यर्थः। **ज्ञातृत्वश्रुतिरप्यानन्दित्वे प्रमाणमित्यमिप्रेत्याह—ज्ञातृत्वमेव ह्यानन्दित्वमिति**। ज्ञातृत्वातिरिक्तानन्दित्वव्युदासपर **एवकारः**। हिशब्दस्तदुपपत्तिसूचकः। अनुकूलज्ञानाश्रयत्वमेव ह्यानन्दित्वमित्यर्थः। **ज्ञातृत्वश्रुतिर्ज्ञानाश्रयत्वनिषेधस्य, आनन्दाश्रयत्वनिषेधस्य** च विरोधिनीति भावः। **इत्या'नन्दो ब्रह्मे'ति श्रुत्यर्थः॥**

अथ भेदनिषेधपरत्वेन परोक्ताः श्रुतीर्योजयितुमनुवदति—**यदिदमिति। यत्र हीत्यादिवाक्याभ्यां** भेदनिषेधः कृतः। भेदप्रतिपत्तावनर्थं दर्शयति—**मृत्योरिति**। 'तमसो वा एष तमः प्रविशती'ति वत्। नित्यानुवृत्तस्य भेदस्य कथं

'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' (बृ. ४।५।१५) इति भेदनिषेधो बहुधा दृश्यत इति,

भ्रान्तिसिद्धत्वमित्याह—**यत्र त्विति** । उक्तवाक्येषु वचनभङ्गीवैविध्यामिप्रायेण बहुधेत्युक्तम् । बहुश इति पाठे निषेधक्रियाऽऽवृत्तिरित्यर्थः । परिहरति—**तदिति** । **तच्छब्दस्य परिहृतमि**त्यत्रान्वयः । समस्तहेयप्रत्यनीकत्वेन, समस्तकल्याणगुणात्मकत्वेन च श्रुत्यन्तरप्रसिद्धस्य ब्रह्मणो विकारासदक्लेशकर्मादिहेयपरवशजगदैक्यं व्याहतत्वाच्छ्रुतिर्न प्रतिपादयति । न व्याहतिः; हेयानामपारमार्थिकत्वादिति चेत्, अपारमार्थिकत्वेऽप्येतन्निरसनीयं, न वा । न चेत्, तन्निवृत्त्यर्थं शास्त्रमनर्थकं स्यात् । निरसनीयं चेत्, निरसनीयसंबन्ध एव हेयसंबन्ध इति तत्प्रत्यनीकस्य तत्संबन्धित्वं व्याहतम् । किंच—'बहु स्या' मिति संकल्पपूर्वकं बहुभवनं श्रूयते, सर्वज्ञस्य स्वेच्छया स्वस्मिन् हेयोपादानमनन्वितमिति—तत्प्रतिपादनमशक्यम् । अमर्वज्ञत्वे—'पश्यत्यचक्षुः स शृणोत्यकर्णः, स्वाभाविकी ज्ञानबलक्रिया च, यः सर्ववि' दित्यादि श्रुतिविरोधः । हेयस्यापारमार्थ्येऽपि स्वसंकल्पेन स्वस्यानन्तापुरुषार्थभ्रमापादनं सर्वज्ञस्य नोपपद्यते । सार्वज्ञ्यस्याविद्यापरिकल्पितत्वाभ्युपगमादविद्यापूर्वकमेव बहुभवनभ्रमरूपं सार्वज्ञ्यमिति—न वाच्यं: 'स्वाभाविकी' ति श्रुतेः, 'त इमे सत्याः कामा' इति सत्यत्वश्रुतेश्च । स्वसार्वज्ञ्यमाविद्यिकत्वेन मिथ्येति न जानाति चेत्, सार्वज्ञ्यं न स्यात्, जानातीति चेत्, तेनैव ज्ञानेन बाधितत्वान्मिथ्यैवज्ञ्यं न स्यात्, ततश्च पूर्वजगदाकारपर्यालोचनेन संकल्पपूर्वकं जीवकर्मानुगुणसृष्टिर्नोपपद्यते, अतः सार्वज्ञ्यस्याविद्यिकत्वमनुपपन्नमिति—सर्वज्ञस्य तस्य स्वगतहेयोपादनं न घटते । किंच—हेयं स्वगतत्वेन जानतः सर्वशक्तेस्तस्य सत्यसंकल्पस्य सहसैव स्वगतहेयनिरासकत्वमपि नोपपद्यते । अशक्तत्वे—'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी'त्यादिश्रुतिविरोधः । ईदृशविरोधो नास्ति; श्रुतिबलादविरुद्धत्वस्याभ्युपगन्तव्यत्वादिति चेत्, तर्हि 'विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति, न जायते म्रियते वा विपश्चित्, वायुश्चान्तरिक्षं चैतदमृतमभयम्, आत्मन आकाशः संभूतः, न नभो न भूमिर्नेमे द्यावापृथिवी, अन्तवदेवास्य तद्भवति, नास्येष्टापूर्ते क्षीयेते' इत्यादिश्रुत्युक्तस्यात्मादीनां नित्यत्वानित्यत्वादेरपि श्रुतिप्रतिपन्नतया विरोधाभावादुभयमभ्युपगन्तव्यं, ततश्च सर्वत्र यथाप्रतिपन्नस्वीकारेण मीमांसारम्भवैयर्थ्यं स्यात् । प्रस्तुतमेदाभेदश्रुत्योरपि पारमार्थिकापारमार्थिकविषयत्वेन, सोपाधिकनिरुपाधिकविषयत्वेन वा विभागकल्पनमनुपपन्नं; तस्य विरोधपरिहारार्थत्वाद्विरोधस्य चाभावात्, ततश्च भेदपरमार्थत्वसिद्धिः, अतो विरोधोऽभ्युपगन्तव्यः, इह च विरोधोऽवगम्यते । 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती'ति भेदप्रतिपत्तेः संसारहेतुत्वं श्रूयते, 'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति, जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक' इति भेदज्ञानस्य मोक्षोपायत्वं श्रूयते । 'द्वैतिनोऽनर्थदर्शिन' इत्यादि स्मृतिविरुद्धं 'द्वाविमौ पुरुषौ, आविश्य बिभर्त्यव्यय ईश्वरः, यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः' इत्यारभ्य 'यो मामेवमसंमूढो जानाति पुरुषोत्तम'मिति भेदज्ञानवतोऽसंमूढत्वं स्मर्यते । एवमादिवचनप्रतिपन्नस्य भेदस्य लोकसिद्धत्वाभावात्—निषेधार्थं भेदोऽनूद्यत—इति वादोऽनुपपन्नः । किंच—यदि भेदमात्रस्य लोकसिद्धत्वात् 'अप्राप्ते हि शास्त्रमर्थव'दिति न्यायादभेद एव शास्त्रवेद्य इत्युच्यते, तर्हि 'सोऽयं देवदत्त' इत्यादावभेदमात्रस्य च लोकसिद्धत्वात्, अप्राप्ते शास्त्रस्यार्थवत्त्वाच्च शास्त्रेणाभेदप्रतिपादनमयुक्तम् । देवदत्तादैक्यं हि लोकसिद्धं, न जीवपरयोः, अतस्तयोरभेदः शास्त्रप्रतिपाद्य—इति चेत्, तर्हि घटपटादिभेद एव लोकसिद्धः, न तु जीवपरयोः; नियाम्यत्वनियन्तृत्व—धार्यत्वधारकत्व—शेषत्वशेषित्व—व्याप्यत्वव्यापकत्वादिलक्षणभेदो न लोकसिद्ध इति—स भेदः शास्त्रप्रतिपाद्य एव, यथोक्तमाचार्यपादैः—'न द्वैतं प्रतिपादयन्त्युपनिषद्वाचः प्रसिद्धं हि तत्किलद्वैतमनन्यगोचरतया तद्वेद्यमास्थीयताम् । अप्राप्ते खलु शास्त्रमर्थवदिति व्यर्थप्रयासो यतः प्रख्यातादपरस्तु शास्त्रविषयो भेदस्तदद्वैतव'दिति । अयं चार्थोऽनन्तरमेव भाष्ये वक्ष्यते, अतोऽनुवाद इति निर्बाहो नोपपद्यते । भेदश्रुतिरुपासनार्था, न तु तत्त्वपरा; 'पृथगात्मानं प्रेरितारं च मत्वा जुष्टं यदा पश्यत्यन्यमीश' मित्युपासनवाक्यिपदश्रवणादिति चेत्, तथाऽपि तात्त्विक एव भेदः; तज्ज्ञानस्य मोक्षोपायत्वोक्तेः, तत्त्वज्ञानेन हि मोक्षः । नच—फलविशेषायोपासनार्थत्वाद्भेदश्रुतीनां भेदस्यातात्त्विकत्वं वाच्यम्; ऐक्यस्य चोपासनार्थत्वादसत्यत्वप्रसङ्गात् । श्रूयते ह्यभेदस्योपासनार्थत्वम्—'अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद, आत्मेत्येवोपासीते'ति । ऐक्यस्योपासनार्थत्वं, भेदस्य च तात्त्विकत्वं युक्तं; वैनतेयध्याने ह्यैक्यमारोपितं दृष्टं, भेद एव हि नरेन्द्रवैनतेययोस्तात्त्विकः । विधिशेषभूतव्यतिरिक्तेष्वपि वाक्येष्वभेदः प्रतीयत इति तस्य तात्त्विकत्वम् इति—चेत्, तर्हि 'क्षरं प्रधानमृताक्षरं हरः प्रधानक्षेत्रज्ञपतिर्गुणेशः, ज्ञाज्ञौ द्वौ, ऋतं पिबन्तौ, द्वा सुपर्णा, नित्यो नित्यानां'मित्यादाविविधिशेषभूतवाक्यावगतत्वाद्भेदस्यापि तात्त्विकत्वमवर्जनीयम् । उपास्तिफलभूतमुक्तिदशायामभेदादभेदपारमार्थ्यं चेत्, मुक्तिदशायां भेदश्रवणाद्भेदतात्त्विकत्वसिद्धिः । अत उपासनार्थत्वादपरमार्थविषयत्वेन भेदश्रुतिर्निर्बाहो नोपपद्यते । भेदाभेदयोर्नियतपौर्वापर्यविरोधवत्त्वादपच्छेदन्यायविषयत्वं सगुणत्वनिर्गुणत्वयोरिव न संभवतीति—विरोधनयात्, उपक्रमनयाद्वा परभूतभेदनिषेधोत्पत्तिप्रतिबन्ध एव स्यात् । इदं च पूर्वमेव प्रपञ्चितम् ॥

तत्कृत्स्नस्य जगतो ब्रह्मकार्यतया तदन्तर्यामिकतया च तदात्मकत्वेनैक्यात्तत्प्रत्यनीकनानात्वं प्रतिषिध्यते,

एवं न्यायानुगृहीतान्श्रुत्यन्तरविरोधमभ्यावर्जनीयलम्, एषां निर्वाहाणामनुपपन्नत्वं च प्रदेशान्तरोक्तमिहाभिप्रेत्य समीचीनं निर्वहणं दर्शयति—**तदिति। जगत** इति पदं ब्रह्मपर्यन्तं—तस्य **ब्रह्मकार्यतये**ति पदेन, **ऐक्या**दिति पदेन चान्वयः। **तदन्तर्यामिकतये**त्यत्र सामर्थ्याज्जगत इत्यध्याहारः, तेन सकृत्प्रयुक्तजगच्छब्दस्य निष्कर्षकत्वानिष्कर्षकत्वविरोधपरिहारः। 'सर्वं खल्विदं ब्रह्म तज्जला' इत्युक्तं—जगतस्तज्जत्वं, तल्लत्वं चोपजीव्याह—**ब्रह्मकार्यतये**ति। **ब्रह्म**शब्दः कारणावस्थचिदचिद्विशिष्टपरः। तदनन्यत्वमुपजीव्याह—**तदन्तर्यामिकतयाचेति। तच्छब्दो** विशेष्यपरामर्शी; विशिष्टे प्रकृते विशेष्यांशस्यापि प्रकृतत्वात्, यथा—'मन्मूलाः सदायतना' इत्यत्र सच्छब्दस्य विशिष्टपरत्वं, विशेष्यपरत्वं च तद्वत्। तत् ब्रह्मान्तर्यामि यस्य तत्तदन्तर्यामिकं तद्भावेनेत्यर्थः। कथं तदनन्यत्वेन तदन्तर्यामिकत्वसिद्धिः, उच्यते—**अनन**ं स्थितिः, ब्रह्मणो जगन्स्थितिहेतुत्वं चान्तः प्रविश्य प्रशास्तृत्वेन धारकत्वम्। 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा' इत्यत्र **सन्मूलाः सत्प्रतिष्ठा** इति पदद्वयं सच्छब्दवाच्यब्रह्माधीनोत्पत्तिलयपरम्। **प्रतिष्ठा** निष्ठा—पर्यवसानं—लयः, न तु सदाधारत्वं। **सदायतना** इति पुनरुक्तिप्रसङ्गात्। एवं ब्रह्मण उत्पत्तिलयहेतुत्ववाचिपदद्वयमध्यगतेन स्थितिहेतुत्ववाचिना **सदायतना** इति पदेन धारकत्वसिद्धेः, 'एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत' इत्यत्र निष्ठतिधातूक्तस्थितेः प्रशासनेन धारणाधीनत्वावगमात्, 'अन्तः प्रविष्टः शास्ता जनाना'मिति धारणहेतुभूतप्रशासनस्यान्तःप्रविश्य क्रियमाणत्वश्रवणात् 'तद्यथा अरेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः, मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इवे'ति श्रुतिस्मृतिभ्यामरनाभि-मणिगणसूत्रदृष्टान्ताभ्यामन्तःस्थितस्य धारकत्वावगमात्, 'तत्सृष्ट्वा तदेवानुप्राविश'दित्युक्तानुप्रवेशस्य सृष्ट्यनन्तरभावित्वात्—उदाहृतश्रुत्यैकार्थ्याच्च—स्थित्यर्थत्वात्, 'एष प्राणः प्रभवन्नीत्यादिवाक्योक्तप्रक्रियया—सृष्टस्य जगत'स्तेनेदं पूर्णं पुरुषेण सर्वं'मिति वाक्येन स्थितिवेलायां व्यापकेन परमपुरुषेण पूर्णत्वावगमात्, सर्वशाखाप्रत्ययन्यायेन व्यापन-नियमन-धारणेष्वन्यतमोक्तावन्यतमयोः सिद्धत्वाच्च—अनुप्रविश्य प्रशासनेन धारकत्वं स्थितिहेतुत्वमिति ह्यवगम्यते। एवं **तज्जला**निति वाक्यमुपजीव्योक्तं—जगतो ब्रह्मकार्यतया, तदन्तर्यामिकतया चेति तदन्तर्यामिकत्वम्—उभयलिङ्गकस्य ब्रह्मणः परमार्थजगदुपादानत्वान्यथानुपपत्तिसिद्धं, घटकश्रुतिसिद्धं च। **च**शब्दस्योत्तरत्रान्वयः, तदन्तर्यामिकतया तदात्मकत्वेन चेति। स आत्मा यस्य **तत्तदात्मकम्। तदन्तर्यामिकत्वरूपेण** तदात्मकत्वेनेत्यर्थः; अन्तःप्रविश्य नियन्ता ह्यात्मा। ब्रह्मकार्यतया, तदन्तर्यामिकतया, तदात्मकत्वेन चेत्युक्ते हेतुत्रयशङ्का स्यादिति तच्छब्दार्थ **च**शब्दस्य प्राक्प्रयोगः। **एवमु**भयविधैक्यस्य विहितत्वादित्यर्थः। ननु—ऐक्यस्य कार्यकारणभावनिबन्धनत्वे—कार्यावस्थजगद्विशिष्टस्य कारणावस्थचिदचिद्विशिष्टब्रह्मणा स्वरूपैक्यं युक्तं, तदन्तर्यामिकत्वनिबन्धनत्वे तु—न ब्रह्मणा जगत ऐक्यं, किंतु प्रकारिणो ब्रह्मण एकत्वसंख्यान्वय एव—**इत्यैक्य**शब्दास्यार्थभेदः स्यात्, ततश्च **जगत्तदात्मकत्वेनैक्या**दिति वक्तुमयुक्तं; प्रकारप्रकारिणोर्जगद्ब्रह्मणोर्भिन्नत्वात्, नैवं; जगद्ब्रह्मणोर्भिन्नत्वेऽप्यत्र **जग**च्छब्दो जगद्विशिष्टब्रह्मपर—इत्युक्तत्वात्। ऐक्यशब्दस्य च नार्थभेदः; उभयथाऽपि विशिष्टैक्यपरत्वात्। तथा हि—कार्यकारणभावनिबन्धनमैक्यं नाम—अवस्थाद्वयापन्नचिदचिद्विशिष्टवस्त्वैक्यं, यथा—रूपसर्शादिविशिष्टघटस्य तादृशमृद्द्रव्यैक्यं, तथा—चिदचिदात्मकजगद्विशिष्टस्य, स्वरूपेण गुणैश्च निरतिशयबृहत्त्वविशिष्टस्य चैक्यं, प्रकार्यैक्यं यथा—नैल्यविशिष्टस्य उत्पलस्य **विशिष्टस्य चैक्यम्।** नच—विशेषणांशैक्याभावाद्वस्त्वैक्यहानिः; मृद्घटादावपि स्वरूपस्य, रूपसर्शादीनां कार्यत्वकारणत्वावस्थयोश्चैकत्वाभावात्। इयान्विशेषः—कार्यकारणभावे भिन्नकालीनावस्थारूपसद्भारकविशेषणाश्रयधर्म्यैक्यं, यथा—'स एवायं तरुणोऽभूदि'ति, अन्यत्र समकालसंबन्ध्यद्वारकानेकविशेषणाश्रयधर्म्यैक्यं, यथा—'अयं वेदविद्ब्राह्मण' इति। **बाल्ययौवने** भिन्नकालीनसद्भारकावस्थे। **वेदनं, ब्राह्मणशरीरं** च समकालवर्त्यद्वारकविशेषणम्। एवमुभयविधविशेषणविशिष्टधर्म्यैक्यमैक्यशब्दार्थ, अतो जगच्छब्दवाच्यधर्म्यैक्यात्—**जगत ऐक्या**दिति निर्देश उपपन्नः। यद्वा, **कृत्स्नस्य जगत** इति निष्कर्षकः शब्द, ब्रह्मशब्दोऽपि विशेष्यमात्रपरः; कार्यावस्थां प्रत्याधारत्वात्, आधारत्वं च साक्षाद्वा, परम्परया वा **मुख्य**मेव, अतो ब्रह्मकार्य जगत्। **तदन्तर्यामिक**शब्दो व्याख्यातः॥ एवं ब्रह्मकार्यतया, तदन्तर्यामिकतया च जगत्तदात्मकम्। तदात्मकत्वं नाम—जगतस्तत्प्रकारतैकस्वभावतया पृथगवस्थानाभावात्तदन्तर्गतत्वं, तेन प्रकारैक्यं, न तु स्वरूपैक्यम्। **विशिष्टान्तर्भाव** एवैक्यमित्यर्थः। **तत्प्रत्यनीकनानात्वमिति।** विहितोभयविधैक्यप्रत्यनीकनानात्वं **निषिध्यत** इत्यर्थः। कार्यकारणभेदः—कुतर्कमूलभ्रान्तिविषयः, स्वनिष्ठभेदो—लौकिकप्रतीतिमूलभ्रान्तिविषयः, अतो भ्रान्तिसिद्धत्वाविशेषात्, विहितैक्यप्रत्यनीकत्वाविशेषाच्च तेनाकारेणोभयविधं भेदं **नाना**शब्देन परामृश्य निषिध्यत इति—न वाक्यभेदः। **तत्प्रत्यनीकेति** ऐक्यविधिशेषभूतो भेदनिषेधः; अन्वयमुखेनोक्तार्थस्थिरीकरणार्थत्वाद्व्यतिरेकोक्तेः। ऐक्यविधिश्च—'नेह नानास्ती'ति प्रकरणे श्रूयते। **एकधैवानुद्रष्टव्यमिति। एकधा** एकतया,

१ °मित्यैक्यदर्शनविधिः का. पु. मु.।

न पुनर्बहु स्यां प्रजायेय' (छा. ६।२।३) इति बहुभवनसंकल्पपूर्वकं ब्रह्मणो नानात्वं श्रुतिसिद्धं प्रतिषिध्यत इति परिहृतम् । नानात्वनिषेधादियमपरमार्थविषयेति चेन्नः प्रत्यक्षादिसकलप्रमाणानवगतं नानात्वं दुरारोहं ब्रह्मणः प्रतिपाद्य तदेव बाध्यत इत्युपहास्यमिदम् । **'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति'** (तै. २।७।१) इति ब्रह्मणि नानात्वं पश्यतो भयप्राप्तिरिति—यदुक्तं,

---

परमात्मशरीरतयैकप्रकारेणेत्यर्थः । तथाच—'अहमेकः प्रथममासं वर्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्तः, आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किंचन मिषत्' तथा—'परमार्थस्त्वमेवैको नान्योऽस्ति जगतः पते, अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः कारणकार्यजातम् । तदच्युतो नास्ति परं ततोऽन्यत्' इत्यादिषु चैक्यविधिशेषतया भेदनिषेधो दृश्यते । शेषत्वं च—विहितैकत्वस्थिरीकरणलक्षणकिंचन्कारेण भवति । यादृशमैक्यं विहितं निषेधस्य तादृशैक्यविरोधिभेदविषयत्वे सति तन्स्थिरीकरणार्थत्वं निश्चेयम्, नत्वविरोध्यर्थान्तरनिषेधस्तदुपयुक्तः । नहि 'मृदेव घट' इत्युक्ते घटद्वित्वनिषेधो मृद्घटैकत्वोपकारकः; घटद्वित्वस्य मृद्घटैकत्वाविरोधित्वात् । नाप्येको घट' इत्युक्ते घटगतरूपपरिमाणादिनिषेधो घटाख्यधर्म्यैक्यविधेरुपकारकः; रूपपरिमाणादिभेदस्य घटव्यक्त्यैक्याविरोधित्वात् । विधेयविरोध्यर्थनिषेध एव हि विध्युपकारकः । किंच—न केवलमुपकाराभावः, ऐक्यविधिविरुद्धं च कृत्स्नभेदनिषेधपरत्वं; समानाधिकरणवाक्यैनैक्यविधानात् । भिन्नविशेषणाभिधायिशब्दानामेकविशेष्यवृत्तित्वं हि सामानाधिकरण्यम् । नच प्रकारभेदे तिष्ठति कृत्स्नभेदनिषेध उपपद्यते, अतो भेदनिषेधस्यैक्यविधिशेषत्वात्—कार्यकारणभेदः, स्वनिष्ठभेदश्च निषिध्यत इत्यभिप्रायः । किंच—'न चास्य कश्चिज्जनिता न चाधिपः, न तत्समश्चाभ्यधिकश्च दृश्यते, तेनाहैति ब्रह्मणा सर्धितुं कः, न तत्समोऽस्त्यभ्यधिकः कुतोऽन्योलोकत्रयेऽप्यप्रतिमप्रभाव' इत्यादिभिः स्वतन्त्ररूपवस्तुविशेषविषयनिषेधदर्शनात्—सामान्येनावगतो भेदनिषेधस्तत्र छागपशुन्यायेन पर्यवस्यतीत्यर्थसिद्धः तत्प्रत्यनीकनानात्वमित्युक्तत्वात्, केषुचिद्वाक्येषु तस्य कण्ठोक्तत्वाच्च । अथ उत्सर्गापवादन्यायमभिप्रयन्नाह—**न पुनरिति** । ब्रह्मणः कार्यरूपेण नानात्वविषयश्रुतिवाक्योदाहरणं प्रकारनानात्वविषयवाक्यानामपि प्रदर्शनार्थम् । 'एकः सन् बहुधा विचारः, एको देवो बहुधा निविष्टः, त्वमेकोऽसि बहूननुप्रविष्टः, योऽव्यक्तमन्तरे संचरन् यस्याव्यक्तं शरीरं, योऽक्षरमन्तरे संचरन् यस्याक्षरं शरीरं, योमृत्युमन्तरे संचरन् यस्य मृत्युः शरीरम्, एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायण' इति प्रकारनानात्वं, प्रकार्यैकत्वं च हि स्पष्टं श्रूयते । यद्वा छान्दोग्ये, तैत्तिरीये च 'बहु स्या'मिति प्रकरणे 'अनेन जीवेनात्मनाऽनुप्रविश्य, तदनुप्रविश्य सच्च त्यच्चाभवत् निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं चे'ति चिदचिदनुप्रवेशपूर्वकनामरूपभाक्त्वश्रवणात्, उभयलिङ्गस्याप्यव्यवधानेन जगदुपादानत्वानुपपत्तेश्च । 'बहु स्या'मित्यत्रापि ब्रह्मणो बहुनामरूपभाक्त्वस्य सद्वारकत्वसिद्धेः—शरीरतया प्रकारभूतचिदचिन्नानात्वमर्थसिद्धमित्यभिप्रायेण **बहु स्या**मिति वाक्यमुदाहृतम् । एवं कार्यनानात्वस्य, प्रकारनानात्वस्य च विहितत्वात्, सामान्यनिषेधस्य च विहितव्यतिरिक्तविषयत्वाच्च—कुतर्कसिद्धकारणकार्यभेदविषयाः, लौकिकप्रतीतिसिद्धस्वनिष्ठभेदविषयाश्च भेदनिषेधश्रुतय—इत्यर्थः । नानात्वनिषेधादपरमार्थविषयत्वं शङ्कते—**नानात्वेति । इयं** श्रुतिः । भेदस्तु निषेधार्थमनूद्यत इति भावः । परिहरति—**नेति** । अप्राप्तस्यानुवादायोगात्, अतो विषयविभागादविरोध एव न्याय्यः । तदुक्तमाचार्यपादैः—**'यद्ब्रह्मणो गुण-शरीर-विकार-भेद-कर्मादिगोचरविधिप्रतिषेधवाचः । अन्योन्यभिन्नविषया न विरोधगन्धमर्हन्ति तन्न विधयः प्रतिषेधबाध्याः'** इति । समस्तहेयरहितस्य हेयाकारवस्त्वैक्यासंभवात्, हेयस्यापारमार्थ्येऽपि तस्य निरस्तीयतया हेयत्वस्यावर्जनीयत्वात्, तत्प्रतिभटतयोक्तस्य तत्संबन्धार्हवस्त्वैक्यव्याघातात्, सर्वज्ञस्य ब्रह्मणः स्वसंकल्पेन स्वगतहेयतद्विषयभ्रमापादनायोगात्, असर्वज्ञत्वे—सार्वज्ञ्यश्रुतिविरोधात्, सर्वशक्तेः स्वगतहेयानिवारकत्वायोगात्, अशक्तत्वे—सर्वशक्तिश्रुतिविरोधात्, श्रुतिबलादीदृशविरोधाभावे—'तान्येवानुविनश्यति, न जायते म्रियत' इत्यादिवाक्यप्रतिपन्ननित्यत्वानित्यत्व—निर्गुणत्वसगुणत्वादेः श्रुतिबलाद्विरोधाभावेन क्वचिदपि न्यायसचारानपेक्षतया मीमांसानैरर्थक्यात्, भिन्नत्वाभिन्नत्वयोश्च विरोधाभावेन—पारमार्थिकापारमार्थिकत्वेन विभागस्यानभ्युपन्तव्यत्वात्, 'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति, जुष्टं यदा पश्यत्यन्यमीश'मिति पृथक्त्वज्ञानस्य मोक्षोपायत्वश्रवणात्, 'यस्मात् क्षरमतीतोऽहं'मित्यादिना भेदज्ञानवतोऽसंमूढत्वस्मरणात्, जीवपरयोर्नियन्तृत्वनियाम्यत्वादिलक्षणभेदस्य घटपटभेदवत् प्रमाणान्तरागोचरत्वेनानुवादासंभवात्, विहितस्य निषेधायोगात्, उपासनार्थत्वाश्रयणस्य 'अथ योऽन्यां देवता'मित्यादिवाक्यप्रतिपन्नैक्येऽपि प्रसङ्गदैक्यस्य, अविधिशेषवाक्यप्रतिपन्नत्वे भेदस्य च तुल्यत्वात्, नियतपौर्वापर्यविरोधतया अपच्छेदन्यायाविषयत्वात्, विरोधाधिकरणन्यायेन भेदश्रुतेः परभूतनिषेधोत्पत्तिप्रतिबन्धकत्वात्, ऐक्यविधिशेषस्य भेदनिषेधस्य विहितैक्यविरोधिभेदनिषेधकत्वोपपत्तेः, अन्यथा समानाधिकरणवाक्यप्रतिपन्नस्वशेषिभूतैक्यविरोधित्वप्रसङ्गात्, उत्स-

तदमन; **'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत'** (छा. ३।१४।१) इति तन्नानात्वानुसंधानस्य शान्तिहेतुत्वोपदेशात्। तथा हि—सर्वस्य जगतस्तदुत्पत्तिस्थितिलयकर्मतया तदात्मकत्वानुसंधानेनात्र शान्तिर्विधीयते। अतो यथावस्थितदेवतिर्यङ्मनुष्यस्थावरादिभेदभिन्नं जगद्ब्रह्मात्मकमित्यनुसंधानस्य शान्तिहेतुतयाभयप्राप्तिहेतुत्वेन न भयहेतुत्वप्रसङ्गः। एवं तर्हि **'थ तस्य भयं भवति'** (तै. २।७।१) इति किमुच्यते, इदमुच्यते—**'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने भयं प्रतिष्ठां विदन्ते। अथ सोऽभयं गतो भवति'** (तै.२।७।१) इत्यभयप्राप्तिहेतुत्वेन ब्रह्मणि या प्रतिष्ठामिहिता तस्या विच्छेदे भयं भवतीति। यथोक्तं महर्षिभिः **'यन्मुहूर्तं क्षणं वापि वासुदेवो न चिन्त्यते।**

गोपवादन्यायेन निषेधस्य विहितभेदव्यतिरिक्तविषयत्वात्, छागपशुन्यायेन सामान्येन भेदनिषेधस्य स्वतन्त्रभेदविशेषनिषेधपर्यवसायित्वाच्च—भेदनिषेधश्रुतयोऽब्रह्मात्मकनानात्वनिषेधपराः, न तु भेदमात्रनिषेधपरा इति संग्रहः। **यत्र हीत्यादिवाक्यानामयमर्थः—यत्र** यदा। **द्वैतमिव भवति** स्वनिष्ठभेद इव भवति, **इवशब्दः** स्वनिष्ठभेदस्यात्यन्तिकत्वद्योतकः, कथमिवेतिवद् वाक्यभङ्गीरीत्याऽविवक्षितार्थो वा। **तत्** तदा। **इतर इतरमितरेण पश्यति; केनेति** वक्ष्यमाणत्वादि**तरेणेत्यध्याहारः। इतरः** स्वनिष्ठो द्रष्टा। **इतरं** स्वनिष्ठं द्रष्टव्यं स्वनिष्ठदर्शनसाधनेन पश्यति। **यत्र तु** यदा। **अस्य** उपासकस्य। **सर्वमात्मैवाभूत्** परमात्मसामानाधिकरण्येन सर्वं साक्षात्कृतं; नहि पूर्वमनात्मभूतमिदानीं सर्वमात्मा भवति, अतः साक्षात्कारमभिप्रायोऽभूदिति निर्देशः। **अस्येत्युक्तेः क** इत्यध्याहारः; इतर इत्युक्तत्वात्। **तत्** तदा। स्वनिष्ठः **को द्रष्टा** स्वनिष्ठेन **केन** दर्शनसाधनेन स्वनिष्ठं **कं** द्रष्टव्यमर्थं पश्येत्, ज्ञातृ-ज्ञेय-ज्ञानसाधनेषु स्वनिष्ठं किंचिदपि नास्तीत्यर्थः; प्रमितस्य निषेधायोगात्, आपातप्रतीतिसिद्धस्यैव निषेध्यत्वात्, लौकिकप्रतीतेश्च स्वनिष्ठताविषयत्वात्, तेन रूपेणैव निषेधविषयत्वोपपत्तेः। यदि द्रष्टृदृश्यादिमात्रं निषिध्येत—तदानीं 'तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहंमनुरभवं सूर्यश्चे'ति परमार्थसाक्षात्कारदशायां**महमिति** द्रष्टुरात्मनो, **मनुसूर्यादि**दृश्यपदार्थानां च साक्षात्कारश्रवणं विरुध्यते। तस्मात् लौकिकप्रतीतौ द्रष्टृदृश्यादिकं प्रकारीभूतपरमात्माप्रतिपत्तेस्तत्सामानाधिकरण्यमन्तरेण स्वनिष्ठतया भाति, योगदशायां तु प्रकारिणः परमात्मनः प्रतीयमानत्वादहंशब्दवाच्यपरमात्मसामानाधिकरण्येन प्रकाशत—इति वैषम्यं, न तु द्रष्टृदृश्यादिनिवृत्तिरित्यभ्युपगन्तव्यम्; अन्यथा वामदेवादिदर्शनस्य भ्रान्तित्वप्रसङ्गात्। **नेह नानेति। इह** प्रपञ्चे, लोकदृष्टप्रकारेण **नाना**भूतं स्वनिष्ठतया भिन्नं किंचिदपि नास्तीत्यर्थः। स्वनिष्ठदर्शनेन प्रत्यवायमाह—**मृत्योरिति।** 'तमसो वा एष तमः प्रविशती'-**त्यनिर्देशः। नानेव** स्वनिष्ठमिव। अज्ञानादज्ञानमाप्नोतीत्यर्थः। देहातिरिक्तविषयाऽज्ञानं प्रागेव सिद्धं, ततोऽप्यतिशयितमज्ञानं स्वनिष्ठतया तद्वस्तुदर्शनमित्यभिप्रायः॥

'यदा ह्येवैष' इत्यादिश्रुतिमुपादाय तत्र **ब्रह्मणी**त्यादिना पूर्वपक्षिणोक्तमर्थमनूद्य दूषयति—**तदसदिति।** भयप्राप्तिहेतुत्वं नेत्यर्थः। कुत इत्यत्राह—**सर्वमिति।** ब्रह्मणः कार्यजगद्रूपेण नानात्वानुसन्धानं मुक्तिहेतुरिति सिद्धान्तार्थः। इदानीं **परोक्षं शान्तिहेतुत्वमभ्युपगम्योक्तम्॥** कथं तत्र नानात्वानुसन्धानप्रतीतिः, कथं वा तस्य भयप्राप्तिहेतुताविरोधित्वमिति **शङ्कायामेतद्विवृणोति—तथा हीति।** अत्र नानात्वानुसन्धानप्रतीतिं दर्शयति—**सर्वस्येति।** नहि केवलं ब्रह्मेत्युक्तम्, अपि त्विदं सर्वं ब्रह्मेति ह्युक्तम्। **सर्व**शब्दश्च विविधभेदप्रपञ्चपरः, अतो नानात्वविशिष्टब्रह्मानुसन्धानं प्रतीतमित्यर्थः। ततः किमित्यत्राह—**अत इति।** नानात्वानुसन्धानस्य शान्तिहेतुत्वद्वारा समस्तभयनिवृत्तिरूपमोक्षोपायत्वात्—भेदबुद्धेर्भयप्राप्तिहेतुत्वोक्तिस्तद्विरुद्धेत्यर्थः॥

ननु—मणिकृपाणदर्पणादिगतप्रतिबिम्बेष्विव देहेषु रागद्वेषादिनिवृत्त्यर्थं सर्वस्य ब्रह्मण्यध्यस्तत्वानुसन्धानविधिः किं न स्यात्, **नैवं; प्रवृत्तिनिमित्तभेदेनकार्यवृत्तित्वं** हि सामानाधिकरण्यमित्युपपादितत्वात्, बाधार्थत्वस्य वक्ष्यमाणदूषणोपहतत्वाच्च। अथ **चोद्यपूर्वकमेतत्सूत्रमवतारयति—इदमुच्यत इति। अदृश्य** इत्यविद्यावृत्तिः। **अनात्म्य** इति बद्धव्यावृत्तिः, स हि परमात्मना व्याप्यः। यद्वा, **आत्म्यं** व्याप्यं-कर्मकृतं शरीरं तद्रहितोऽ**नात्म्यः। अनिरुक्त** इति मुक्तव्यावृत्तिः, स हि बद्धवत् स्वाभां देवादिशब्दैर्निरुक्तः। **अनिलयन** इति नित्यमुक्तव्यावृत्तिः, तेषां हि भगवानाधारः। स्वोक्तार्थविषयमुपबृंहणं दर्शयति—**यथोक्तमिति। हानिरिष्टहानिः छिद्रमनिष्टप्राप्तिरन्धम्। भ्रान्ति**सत्कृतचित्तस्खलनम्। **विक्रिया** तेनाङ्गानामवष्टादवयवव्यापारः। 'एकस्मिन्प्यतिक्रान्ते मुहूर्ते ध्यानवर्जिते। दस्युभिर्मुषितेनेव युक्तमाक्रन्दितुं भृशम्॥ वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः। न शौरिचिन्ताविमुखजनसंवासवैशसम्' इत्यादिवचनान्यादिशब्दविवक्षितानि। भेदवा-

---

१ तद्व्यतिरिक्तवाज्ञानम् का. मु. पु.।

सा हानिस्तन्महच्छिद्रं सा भ्रान्तिः सा च विक्रिया ॥' इत्यादि। ब्रह्मणि प्रतिष्ठाया अन्तरमवकाशो विच्छेद एव। यदुक्तं **'न स्थानतोपी**'ति सर्वविशेषरहितं ब्रह्मेति वक्ष्यति–इति, **तन्न**—सविशेषं ब्रह्मेत्येव हि तत्र वक्ष्यति। **मायामात्रं त्विति** च स्वाप्नानामप्यर्थानां जागरितावस्थानुभूतपदार्थवैधर्म्येण मायामात्रत्वमुच्यत इति जागरितावस्थानुभूतानामिव पारमार्थिकत्वमेव वक्ष्यति। स्मृतिपुराणयोरपि निर्विशेषज्ञानमात्रमेव परमार्थोऽन्यदपारमार्थिकमिति प्रतीयत–इति यदभिहितं, तदसत्; **'यो मामजमनादिं**

चिनोऽन्तरशब्दस्य विच्छेदार्थकत्वं कथमित्यत्राह—**ब्रह्मणीति**। अविच्छिन्नं हि ध्यानं निरन्तरमित्युच्यते, अतोऽन्तरं विच्छेद एव। स कस्येत्यपेक्षायां, प्रतिष्ठायाः प्रकृतत्वात् तस्या विच्छेदः। प्रकृतब्रह्मविषये 'तदप्येष' इत्युदाहृते 'भीषाऽस्मादित्यनन्तरश्लोके वायुसूर्यादिसर्वचेतनप्रशासनिमूलकथनात्–**अन्तर**शब्दस्योपासनविच्छेदपरत्वमेव युक्तं, न तु भेदपरत्वम्, अतोऽयमर्थः पूर्वापरवाक्यश्रुत्यन्तरवाक्यानुगुणः; उपबृंहणानुगुणश्च, परोक्तस्तु तदुभयविरुद्ध इति भावः। ननु—'यदा ह्येवैष' इत्यत्र प्रतिष्ठाविच्छेदोऽर्थश्चेत्, एतस्यामिति स्त्रीलिङ्गता स्यात्। 'अदितिः पाशा'नीति न्यायात् विभक्त्यवगतनपुंसकत्वाविवक्षेति चेत्, तथाप्यस्वारस्यमवर्जनीयं, तच्च स्वरसार्थे संभवति नोपपद्यते। सप्तमी चास्वरसा, तस्या विच्छेद इति ह्युक्तिः स्वरसा, न तु तस्यां विच्छेद इति। प्रातिपदिकाख्यारस्यं च प्रतिष्ठापरत्वे स्यात्। पूर्ववाक्ये 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्य' इति ब्रह्मपरतया प्रयुक्तस्यैतस्मिन्निति पदस्यानन्तरवाक्येऽपि बुद्धौ विपरिवृत्तेः; उच्यते—न तावच्छिन्नसप्तम्योः, प्रातिपदिकस्य चास्वारस्यं; ब्रह्मपरामर्शिलादेतच्छब्दस्य। **अन्तर**शब्दश्चावकाशपरः; निरन्तरं सान्तरमिति प्रयोगात्। अन्तरं च देशतः कालतश्च भवति, कालकृतं **चान्तरं** विच्छेद एव। ननु—एवं सति कस्य विच्छेद इत्यपेक्षायां–प्रतिष्ठाया अन्तरमित्यध्याहारः स्यात्, तच्चायुक्तम्; अनध्याहारेण निर्वाहसंभवादिति—चेन्न; सन्निधिलब्धस्यार्थस्याध्याहारानिरपेक्षत्वात्। तथाप्यस्वारस्यमिति चेत्, तद्वरं पक्षान्तरे बह्वस्वारस्यसंभवात्। तथाहि—भयहेतोरभयहेतुप्रतियोगित्वादभयहेतुपरप्रतिष्ठापदस्यैक्यवाच्छिन्नाभावाद्वाक्यवृत्तेरसामञ्जस्यं, तत्सामञ्जस्याय प्रतिष्ठाशब्दस्यैक्यपरत्वे–मुख्यार्थहानिः; दृढसंबन्धो हि प्रतिष्ठा—यथा 'राज्ये प्रतिष्ठित' इति। प्रथमप्रतिपन्नप्रतिष्ठापदस्यार्थभङ्गश्चानुपपन्नः: पूर्वनिर्दैक्यावगतिपरत्वात्–विन्दतिधात्वर्थास्वारस्यं च। सप्तमी चास्वरसाः भेदप्रतियोगित्वावच्छिन्नसंबन्धविवक्षायां तृतीयापञ्चमीषष्ठीनामेव स्वारस्यात्–करोतेः प्रतिपत्त्यर्थत्वादस्वारस्यं च। 'मनसि कुरुत' इति योजनायामध्याहारः, 'एष ह्येवानन्दयाती'ति पूर्ववाक्यप्रतिपन्नभेदविरोधश्च, अनन्तरं च भीषाऽस्मादिति प्रशासितृत्वेन भेद उच्यते, अतो मध्ये भेदनिषेधश्चानुपपन्नः। **'आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चने**'ति पूर्वापरवाक्येषु गुणविशिष्टवेदनस्याभयहेतुत्वोक्तेः–ब्रह्मणि भेदनिषेधस्याभयहेतुत्वकथनं च विरुद्धम्। ब्रह्मविदाप्नोतीति विद्युपक्रमत्वाच्च–ब्रह्मणि प्रतिष्ठाया वेदनरूपत्वमेव युक्तं, न त्वैक्यरूपत्वं: न ह्यैक्य–तद्बध्योरुभयस्य च प्रतिष्ठाशब्दवाच्यत्वम्। दृढसंबन्धवाचिनः **प्रतिष्ठा**शब्दस्य तूपास्यं ब्रह्म प्रत्युपासकतया संबन्धे पर्यवसानं युक्तम्॥

इति भेदतन्निषेधश्रुतीनामविरोधसमर्थनम्॥

ब्रह्मणो निर्विशेषत्वे, व्यतिरिक्तमिथ्यात्वे च परोक्तं सूत्रद्वयं परिहरति—**यदुक्तमिति। इति सूत्राणां सविशेषविषयत्वम्॥**

अथ स्मृतिपुराणयोः सविशेषपरत्वमुपपादयति—**स्मृतिपुराणयोरिति। स्मृती**त्यादिना सामान्येन प्रमाणस्य, तदवान्तररूपस्य शब्दस्य च सविशेषवस्तुपरत्वोपपादनात्, शास्त्रस्य प्रत्यक्षविरुद्धार्थप्रतिपादनासामर्थ्योपपादनात्, विशेषेण वेदान्तवाक्यानां सविशेषपरत्वोपपादनेन स्मृतिपुराणयोः श्रुतिविरुद्धार्थे प्रामाण्यासंभवाच्च—तयोः सविशेषपरत्वं सिद्धम्। इदानीं स्मृतिपुराणयोरपि परोदाहृतवचनानां पूर्वापरपर्यालोचनया सविशेषपरत्वमुपपाद्यते। यथा—लौकिकप्रमाणश्रुतिविरुद्धानर्थान्नेदं शास्त्रं प्रतिपादयति, एवमेव–पूर्वापरवाक्यविरुद्धमपर्यर्थं न स्मृतिपुराणानि प्रतिपादयितुं शक्नुवन्तीत्यभिप्रायः। परेण सर्वस्याप्याविद्यिकत्वाविशेषेण स्वाभाविकवैकृवैषम्यानभ्युपगमात्, अद्वैतस्पष्टताभ्रमाच्च—पूर्वं पुराणवचनान्युपन्यस्य पश्चाद्भगवद्गीतावचनान्युदाहृतानि, अत्र तु स्वाभाविकवकृवैषम्याभ्युपगमात्, अनन्तगुणविभूतिमत्त्वस्य स्पष्टतया च–भगवद्गीतावचनानि पूर्वमुपन्यस्य पश्चात्पुराणवचनानि प्रदर्श्यन्ते, अतः **स्मृतिपुराणयो**रित्युक्तम्। परेण स्वोदाहृतवचनप्रतिपाद्यतया योऽर्थोऽभिहितः तद्विपरीतार्थपरत्वेन स्पष्टतमानि वचनानि प्रथमं प्रदर्श्यन्ते, पश्चात्तदविरोधेन परोक्तवचनानामर्थप्रतिपादनार्थं **यो मामिति। अत्राज**मिति पदेन अचित्तत्संसृष्टचेतनव्यावृत्तिः। **अनादि**मिति मुक्तव्यावृत्तिः; तस्याजत्वं हि आदिमत्। **लोकमहेश्वर**मिति नित्यमुक्तव्यावृत्तिः, लोक्यत इति **लोकः** प्रमाणसिद्धत्रिविधचेतनाचेतनवर्गः। अत्रोत्तरार्धोऽप्यनुसंधेयतयाऽभिप्रेतः। **असंमूढः स मर्त्येष्विति** चेतनाचेतनविलक्षणत्वेन जानन्नसंमूढ इति कथनात् सर्ववैल-

---

१ उभयोरपि। २ °वैलक्षण्येनाभ्यु°।

च वेत्ति लोकमहेश्वरम् ।' (गी. १०।३). **'मत्स्थानि सर्वभूतानि नचाहं तेष्ववस्थितः । न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् । भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥** (गी. ९।४-५). **'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा । मत्तः परतरं नान्यत्किंचिदस्ति धनंजय । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥'** (गी. ७।६-७), **'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ।'** (गी. १०।४२), **'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥'** (गी. १५।१७-१८), **'स सर्वभूतप्रकृतिं विकारान्गुणादिदोषांश्च मुने व्यतीतः ।**

क्षण्यं तान्त्रिकमित्युक्तं भवतीत्यभिप्रायः । धारकत्वादिभिर्वैलक्षण्यं वैशद्यार्थमुपादत्ते—**मत्स्थानीति** । अत्र शरीरलक्षणं मूर्त्तित्वं भवति । सर्वभूतानि मदायत्तस्थितीनि, नाहं तदायत्तस्थितिरित्यर्थः । लोकदृष्टप्रकारेण नाहमाधारः, अपि तु संकल्पमात्रादित्याह—**न चेति** । निषेधस्य विहितव्यतिरिक्तविषयत्वादयमेवार्थः । **योगमैश्वरम्** ईश्वरासाधारणं सर्वशक्तियोगमित्यर्थः । नच—**मत्स्थानी**ति धारकत्वपारमार्थ्यनिषेधश्चेद्योगमैश्वरं पश्येति विरुद्धं; मम भ्रान्तिं पश्येति हि तदा वक्तव्यम् । योगमैश्वरमित्येतद्विरुध्यत्रिममेवार्थमाह—**भूतभृदिति** । **ममात्मा** मम संकल्प इत्यर्थः । **आत्म**शब्दो हि मतिवाची 'यन्मेऽकेऽग्नौ मनावात्मे'ति । अतोऽत्रात्मशब्दः संकल्परूपज्ञानवाची । **ममात्मा भूतभावन** इत्येनेन 'न च मत्स्थानि भूतानी' त्यस्यार्थः स्फुटीकृतः । **भूतभावनः** भूतानां सत्ताऽनुवर्तकः । अर्वाचीनस्येश्वरस्य हि सगुणत्वमिति शङ्कायां **कारणानिरिक्तवस्तुनिषेधप्रदर्शनार्थ**, लक्षणप्रदर्शनार्थं च जगत्कारणत्वमाह—**अहमिति** । प्रभवः प्रलयश्चोक्तः, स्थितिस्तु धारकत्वकथनेन सिध्यतीति-धारकत्वं विशिनष्टि—**मयीति । विष्टभ्याह**मित्यनेन नियन्तृत्वमुक्तम् । **विष्टभ्य** अधिष्ठाय । **एकांशेन** संकल्पैकदेशेन, तच्छरीरित्वलक्षणम् । 'यो मामज'मित्यादिनाऽभिप्रेतचिदचिद्वैलक्षण्यकण्ठोक्ति दर्शयति—**उत्तम इति** । पूर्वस्मिन् वचने **क्षराक्षर**शब्दौक्तौ बद्धमुक्तौ । कूटस्थो निर्विकारः; ज्ञानसंकोचरूपविकाराभावान्मुक्तस्य, कूटस्थशब्दः साधारणवाची वा । 'सर्वेषु लोकेषु कामचारो भवती'ति मुक्तात्मन उभयविभूतिसाधारणत्वात् कूटस्थत्वम् । **परमात्मेत्युदाहृत** इत्येनेन **परमात्मा व्यवस्थित** इत्येतद्वाक्यान्वितो नारायणानुवाकः स्मारितः । **अक्षरादपि चोत्तम** इत्येनेन च तत्रैव हि **सोऽक्षरः परमः स्वराडि**त्युक्तम् । ज्ञानसंकोचरूपक्षरणाभावात् **अक्षरो** मुक्तः । **स्वराट्** स्वतन्त्रः, अकर्मवश्यः । **परमः** जीवगतावस्थास्खलनपरमुत्कृष्टावस्थान्तराभावात्पारम्यम् । **सर्वाणी**ति पदं ब्रह्मशिवाद्यभिप्रायं; तस्मिन्ननुवाके हि 'स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वरा'डिति बद्धमुक्तजीववाचिपदैः समानाधिकृतैर्भगवानुक्तः । तत्र 'विश्वमेवेदं पुरुष' इति च सामानाधिकरण्यवाक्यं श्रूयते । सामानाधिकरण्यहेतुश्च तस्मिन्ननुवाके स्पष्टः । 'तद्विश्वमुपजीवति, पति विश्वस्यात्मेश्वरं, व्याप्य नारायणः स्थित' इति च वाक्यजाते धार्यत्वधारकत्व–नियन्तृत्वनियाम्यत्व–शेषित्वशेषत्व–व्याप्यत्वव्यापकत्वादिकमेव सामानाधिकरण्यनिबन्धनं, नतु तदैक्यमिति स्पष्टं, तदत्राप्युच्यते । **आविश्येति** 'व्याप्य नारायणः स्थित' इत्यस्यार्थं उक्तः । 'पति विश्वस्ये'त्यस्यार्थ **ईश्वर**शब्देनोक्तः; ईश्वरशब्दो हि शेषिवाचकः । अत एव हि पति विश्वस्यात्मेश्वरम्' इत्यत्र पत्यन्तरराहित्यविवक्षायां**मात्मेश्वर** इत्युक्तम् । 'तद्विश्वमुपजीवती'त्यस्यार्थो **बिभर्ती**त्युक्तः । तथा 'व्यापनाद्भरणात्साम्यादन्यः पञ्चदशोदित' इति । **यो मामेवमसंमूढ** इति कृत्स्नवैलक्षण्यज्ञानवतोऽसंमूढत्वमुक्तम् । **इति गुह्यतमं शास्त्र**मिति तस्यार्थस्य गुह्यतमत्वमुक्तम् । अतोऽस्मिन्नर्थे तात्पर्यमिति स्पष्टम् । पुरुषोत्तमशब्दस्य समासासाधुत्वमशङ्कनीयं: 'नागोत्तमादि च सिद्धं भवती'ति महाभाष्यवचनात्, पाणिनिवत्पुरुषोत्तमशब्दनिर्वाहकृताभृषीणामाप्ततमत्वाच्च **पुरुषोत्तम** इति च पञ्चमीसमासो वा । **अक्षरादपि चोत्तम** इति ह्युक्तम् । पूर्वनिपातस्तु सामानाधिकरण्यविवक्षायामेव, न तु तदविवक्षायामपीति—नानुशासनविरोधशङ्काप्रसङ्गः । एवमेभिर्वचनैश्चिदचिद्वैलक्षण्यस्य प्रतिपादितत्वात्–'क्षेत्रज्ञं चापि मां विद्धी'त्यादेस्तदविरोधेनार्थो वर्णनीयः । 'यो लोकत्रयमाविश्य बिभर्ती'त्यादिना कृत्स्नस्य भगवच्छेषत्व–धार्यत्व–नियाम्यत्व–व्याप्यत्व–शरीरत्वादेर्विहितत्वात्तस्य च निषेद्धुमयुक्तत्वात् 'न तदस्ति विना यत्स्या'दित्यादिना अतदात्मकस्य नास्तित्वमुच्यते । **अविनाभाव**शब्दस्य मिथ्यात्वपरत्वेन प्रसिद्ध्यभावाच्च तथाभ्युपेत्यमित्यभिप्रायः । **विना**शब्दो हि संबन्धविरहपरः; अविनाभावशब्दस्य संबन्धनियमवाचित्वात् । **इति गीतावचनानां सविशेषविषयत्वम् ॥**

अथ पुराणवचनान्युपन्यस्यन्ते, तत्र 'प्रत्यस्तमितभेद'मित्यस्य वचनस्यार्थं व्याचिख्यासुस्तदुपयोगित्वेन तदुपक्रमोपसंहारयोः **सविशेषपरत्वं दर्शयिष्यन्नुपक्रमवचनान्युपादत्ते—स सर्वेति** । तत्र प्रथमग्रन्थो हेयप्रत्यनीकत्वपरः । **'सर्वभूतप्रकृतिं प्रधानम्** । **विकारान्** महदादीन् । **गुणादिदोषान्** सत्त्वरजस्तमोहेतुकान् दोषान्, ते दोषाः क्लेशादयः । **व्यतीतः विशेषेणातीतः**, नियमेन अतत्परवशतया संबन्धानर्हं इत्यर्थः । **अतीतसर्वावरणः आवरणं** प्रकृतिसंबन्ध-

अतीतसर्वावरणोऽखिलात्मा तेनास्तृतं यद्भुवनान्तराले ॥ समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशाद्धृतभूतसर्गः। इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ ॥ तेजोवलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः। परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे ॥ स ईश्वरो व्यष्टिसमष्टिरूपोऽव्यक्तस्वरूपो प्रकटस्वरूपः। सर्वेश्वरः सर्वदृक्सर्ववेत्ता समस्तशक्तिः परमेश्वराख्यः। संज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरूपम्। संदृश्यते वाप्यधि गम्यते

कर्मवासनादिकं तत्सर्वमतीतं येन स इत्यर्थः। यद्वा, सर्वविषयज्ञानावरणं **सर्वावरणं**, सर्वविषयज्ञानसंकोचातीत इत्यर्थः, ज्ञानशक्त्यादिसर्वगुणसंकोचकातीत इति वाऽर्थः। अखिलात्मत्वं विवृणोति **तेनेति**। ननु मृदात्मको घट इतिवदित्यर्थः। **भुवनान्तराले** उभयविभूत्यन्तराले। अथ दिव्यात्मस्वरूपस्य मङ्गलैकतानत्वमाह—**समस्तेति**। **समस्तकल्याणगुणात्मक** इति कल्याणगुणवत्त्वमुच्यते चेत्, तदा **आत्म**शब्दः स्वभाववाची स्यात्। एवं संक्षिप्तार्थस्य **तेजोवलैश्वर्येत्यादिना** विस्तरः क्रियत इति निर्वाहः। अस्मादपि निर्वाहाद् दिव्यात्मस्वरूपपरत्वं युक्तम्; अपेक्षितविधेरनपेक्षितविधानं दुर्बलमिति न्यायात्। तदा **कल्याण**शब्दो भावप्रधानः, समस्तकल्याणत्वं गुणः स्वभावो यस्य स **समस्तकल्याणगुणः**। यथा—'द्व्येकयोर्द्विवचनैकवचने' इति सूत्रस्थ**द्व्येकयो**रिति पदं द्वित्वैकत्वपरं व्याख्यातम्; अन्यथा द्वेकेष्विति वाच्यं, ननु **द्व्येकयो**रिति। तच्च भावप्रधाननिर्देशस्य साधुत्वज्ञापनाय कृतं, तत एव हि 'गुणाः सत्यज्ञानप्रभृतय' इत्यभियुक्तैरुक्तम्। समस्तकल्याणगुण आत्मा धर्मिस्वरूपं यस्य स **समस्तकल्याणगुणात्मकः**। बहुव्रीहिरौपचारिकः—शिलापुत्रकस्य वपुरमिति निर्देशवत्। दिव्यात्मस्वरूपमेव स्तौति—**स्वशक्तीति**। स्वांशलेशात् धृतभूतसर्गः। यद्वा, **शक्तिः** सामर्थ्यं, स्वगुणलवधृतभूतजात इत्यर्थः। **भूतसर्गो** भूतसमूहः। यद्वा, सृज्यत इति **सर्गः** कार्यवस्तुजातम् इत्यर्थः। अभिप्रायविशेषेण षाड्गुण्यं पश्चाद्वक्ष्यन्, प्रथमं दिव्यविग्रहत्वमाह—**इच्छेति**। **अभिमतत्व**मभिमत्यर्हत्वम्, स्वानुरूपत्वमिति यावत्। अर्हार्थे निष्ठा। यथा—'अदृष्टो द्रष्टा अश्रुतः श्रोते'ति, तत्र ह्यर्हार्थीयः क्तः; 'अदृश्यमग्राह्य' मित्यादौकार्थ्यात्। अभिमतस्यानानुरूपत्वम्, अनुरूपस्यानभिमतत्वं च लोके दृश्यते तद्व्यावृत्त्यर्थ**मिच्छागृहीताभिमत**शब्दौ। निरुपप**देच्छा**शब्दो नित्येच्छाया, अवतारसमयजन्येच्छायाश्च साधारणः; असंकोचात्। अथावतारद्वारेण साध्यं विग्रहप्रयोजनमाह—**संसाधितेति**। अथ षाड्गुण्यवत्तामाह—**तेज इति**। नात्र क्रमविवक्षा। **महा**शब्द-**सु**शब्दौ सर्वगुणसाधारणौ। **महत्त्व**मपरिच्छन्नत्वं, यथा—'महोत्साहोमहाबलः। महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः॥' इति, यथा च—'प्रकृष्टं विज्ञानं बलमतुल'मित्यादि। **सु**शब्देन तेषां मङ्गलत्वमुच्यते। एवं स्वरूपतः, विग्रहतः, गुणतश्च पर इत्याह—**पर इति**। गुणादिदोषानित्यत्र दोषशब्दार्थं विवृणोति—**न यत्रेति**। **क्लेशादयः** क्लेशकर्मविपाकाशयाः, अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः। **कर्म** पुण्यापुण्यात्मकम्। जात्यायुर्भोगा **विपाकाः**। **आशयो** वासना—संस्कारः। '**क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर**' इति योगसूत्रं स्मारयति—**स ईश्वर इति**। योगशास्त्रादपि वेदान्तस्य वैषम्यमाह—**व्यष्टीति**॥

पूर्वं भेदश्रुत्यर्थं उक्तः, अथैक्यश्रुतिनिर्वाहार्थं घटकश्रुत्यर्थं उच्यते—**व्यष्टीति**। व्यष्टि-समष्टिशब्दाभ्यां कार्यकारणावस्थश्चेतनवर्ग उच्यते। **रूपं** शरीरं, **स्वरूपं** स्वासाधारणं शरीरम्। शरीरिलक्षणं सूचयति—**सर्वेश्वर इति**। **ईश्वरो** नियन्ता। अनेन नियाम्यत्वं शरीरत्वं सिद्धम्। नियाम्यविशेषो हि शरीरम्। **सर्वदृक्** सर्ववेत्ता, स्वरूपतः प्रकारतश्च **सर्वं** जानातीत्यर्थः। यद्वा, **विश्वतश्चक्षु**रित्यादिश्रुतिप्रक्रियया सर्वतोदृग्भवन् सर्वं वेत्तीत्यर्थः। यद्वा, सर्वेषां **दृक्सर्ववेत्ता** च, 'चक्षुर्देवानामुत मर्त्यानां'मिति श्रुतेः, **चक्षु**र्ज्ञानप्रदः। सर्वं विन्दतीति वा **सर्ववेत्ता**, अवाप्तसमस्तकाम इत्यर्थः। **समस्तशक्तिः शक्तिः** कार्योपयोग्यपृथक्सिद्धविशेषणम्, उक्तप्रकारेण सर्वशरीरकत्वादस्य सर्वमपृथक्सिद्धविशेषणमित्यर्थः। **परमेश्वराख्य** इति परमशब्देनान्येश्वरत्वं निषिद्धं, परो माऽस्येति हि परमः। एवंविधेश्वरविषयज्ञानस्यैवापवर्गोपायवेदनत्वमाह—**संज्ञायत इति**। **संज्ञायत** इति पाठे—अस्तदोषमित्यादि ब्रह्मविशेषणम्। **येन** शास्त्रजन्यज्ञानेन **विज्ञायते, येनो**पासनात्मकेन **संदृश्यते, येन** परभक्तिरूपेणानुभवरूपेण च प्राप्यते, अनुभूयत इत्यर्थः; 'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तपे'ति वचनात्। **स ज्ञायत** इति पाठे अस्तदोषमित्यादि ब्रह्मज्ञानविशेषणम्। 'अर्थेनैव विशेषो हि निराकारतया धिया'मिति न्यायात् ज्ञानस्यास्तदोषत्वादिकं विषयद्वारा। **अस्तदोषमिति** दोषास्पदाविद्विषयज्ञानाद्व्यावृत्तिः। **शुद्ध**मिति 'अशुद्धास्ते समस्तास्ति'त्याद्युक्तकर्मवश्याशुद्धबद्धजीवविषयज्ञानाद्व्यावृत्तिः।

---

१ विभागः। २ अनन्येश्वरत्वं सिद्धम् का. पु. मु.।

वा तज्ज्ञानमज्ञानमतोन्यदुक्तम् ॥' (वि. पु. ६।५।८३-८७), **'शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते। मैत्रेय भगवच्छब्दः सर्वकारणकारणे ॥ संभर्तेति तथा भर्ता भकारोऽर्थद्वयान्वितः। नेता गमयिता स्रष्टा गकारार्थस्तथा मुने ॥ ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥ वसन्ति तत्र भूतानि भूतात्मन्यखिलात्मनि। स च**

परं निर्मलम्, अत्यन्तनिर्मलम्। अनेन कदाचित्कर्मसंबन्धार्हतारूपमलान्वितमुक्तविषयज्ञानाद्व्यावृत्तिः। **एकरूपमिति** नित्यमुक्तविषयानेकरूपज्ञानाद्व्यावृत्तिः। अनया दिशा ब्रह्मविशेषणलेऽपि व्यावृत्तिर्द्रष्टव्या, ब्रह्मविशेषणले—**एकरूपमिति**—आश्रयणीयप्रयोगिविशेषणं च भवति। **स्थिरस्वभावम्** आश्रितसंरक्षणादिप्रतिज्ञायां दृढतरमित्यर्थः। **अज्ञानं** मोक्षोपायज्ञानव्यतिरिक्तं, तद्विरोधि वा 'मा विद्या या विमुक्तय' इति वचनात्। यद्वा, **अज्ञानं** ज्ञानाभावः; ब्रह्मपर्यन्तलाभावेनायथावस्थितवस्तुविषयत्वात्। ब्रह्मविशेषणले—एकवाक्यम्। ज्ञानविशेषणले—वाक्यद्वयम्। 'प्रत्यस्तमितभेद'मित्यादिश्लोके **प्रत्यस्तमितभेदम्**इति पदं हृदि निधाय सविशेषले वचनानि दर्शितानि, 'अथागोचरं वचसा'मित्येतद्व्याचिख्यासया शब्दगोचरत्वे वचनानि दर्शयति—**शुद्ध इत्यादिना**। **तत्राशब्दगोचरस्ये**त्यादिके पूर्वश्लोके मुक्तात्मनि **भगवच्छब्द**प्रयोग औपचारिक इत्युक्तं, तत्कथमित्यपेक्षायां—मुक्तात्मव्यावर्तकं भगवच्छब्दप्रवृत्तिनिमित्तमाह—**शुद्ध इति**। यत्र प्रवृत्तिनिमित्तपौष्कल्यं तत्रैव हि मुख्यत्वं, नान्यत्रेति भावः। 'शुद्धे सिद्धे शब्दार्थसंबन्ध' इत्यत्र सिद्धशब्दवच्छुद्धशब्दोऽवधारणगर्भः। **शुद्ध एव** नित्यशुद्ध इत्यर्थः। 'अब्भक्षो वायुभक्षश्च' इतिवत् सिद्धशब्दस्यावधारणगर्भत्वात् सिद्धशब्दो नित्यपरत्वेन हि व्याख्यातः—तद्वत्। अनेन **नित्यशुद्धत्वेन** सकलचेतनव्यावृत्तिः। नित्यसिद्धानामपि नित्यशुद्धत्वस्य भगवन्निरपेक्षायत्तत्वात्। **महाविभूत्याख्ये** विभूतिभूतस्य महाविभूतित्वायोगात्-उभयविभूतिशेषित्वं समस्तचेतनव्यावर्तकम्। **परे ब्रह्मणी**त्यनेन च चेतनव्यावृत्तिः सिद्धा; अपरात्मा हि केवलब्रह्मशब्देनोक्तः—'अशब्दगोचरस्यापि तस्य वै ब्रह्मणो द्विजे'ति, **उत्तरत्र तु परमब्रह्मभूतस्ये**ति हि परमात्मा वक्ष्यते, प्रदेशान्तरेऽपि **परब्रह्मशब्दः** परमात्मपर एव दृश्यते, अतोऽपरमात्मव्यावृत्त्यर्थं **महाविभूत्याख्ये परे** ब्रह्मणीत्युक्तम्। **सर्वकारणकारणत्वं** च भगवत एव; जगद्व्यापारविरहिणो हि मुक्तात्मा। एवमुक्तप्रवृत्तिनिमित्तपौष्कल्यात्—सर्वेश्वर एव **भगवच्छब्दो** मुख्यवृत्तः, नान्यत्रेत्यर्थः॥

इममर्थं विवृण्वन्नक्षरशः, समुदायतश्च भगवच्छब्दार्थमाह—**संभर्तेत्यादिना**। शुद्धत्वं **विना हेयै**रिति विवृतम्। भोग्यसंपद्वाचकैश्वर्यस्य समग्रस्ये[1]ति श्लोकस्थश्रीशब्देन भोगविभूतेः, **संभरणाद्युक्त्या** लीलाविभूतेश्च दर्शितत्वात्—**महाविभूतित्वं** विवृतम्। **सर्वकारणकारणत्वं** चोपरि स्पष्टम्, अत एव ज्ञानशक्त्यादिभिश्च निरतिशयबृहत्त्वात्परब्रह्मत्वं स्फुटम्, अत उत्तरग्रन्थानां **शुद्ध** इत्यादिश्लोकविवरणरूपत्वं युक्तम्। **भश्च गश्च व**श्चेति विभज्यार्थ उच्यते। एतेषां पदानां तत्तद्धातुभ्य'स्त्र्यर्थेषु दृश्यत' इति—उप्रत्यये टिलोपे च कृते एवं रूपं भवतीति भावार्थमाह—**समित्यर्थेन**। **संभर्ता** संभरणम् उपकरणसंविधानम्। **प्रकृतिपुरुषकालान्** कार्योत्पत्तियोग्यान् करोतीत्यर्थः। महदादिसृष्टिरण्डरूपकार्योत्पत्त्युपयुक्ता, **संभरण**मिति वा विवक्षिता। **भर्ता** स्वामी; धारणस्य **व**कारवाच्यत्वात्, पोषकत्वस्य **ग**कारवाच्यनेतृत्वान्तर्भावात्, अपेक्षितविधेरनपेक्षितविधानदौर्बल्याच्च—स्वामित्वमिह विवक्षितम्। यद्यपि—प्रलयविशेषयुक्तस्य **भरतेः** स्वामिनि रूढत्वं, तथापि—पूर्वोक्तयुक्तिसचिवार्षवचनबलाद्—धातुमात्रस्य स्वाम्यवाचित्वं निश्चीयते। **इति**करणेन संभर्तृत्वभर्तृत्वे प्रवृत्तिनिमित्ते निष्कृष्योच्येते। अत **एवार्थद्वयान्वित** इत्युक्तम्, उत्तरत्रतु—प्रवृत्तिनिमित्तत्रये सत्यपि **इति**करणेन तेषामनिष्कृष्टत्वात्प्रवृत्तिनिमित्तत्रयविशिष्टो धर्म्येक एवार्थ उक्तः। **ग**कारार्थमाह—**नेतेति**। उपसर्गस्फुटीकृतानामर्थानां धातुलीनत्वादुद्गमयिता **गमयिता सङ्गमयिते**त्येवंरूपपदानामर्थमाह—**नेतेति**। स्रष्टेत्यनेन उद्गमयितृशब्दार्थ उक्तः। **नेतेति** गमयितृशब्दार्थ उक्तः, स्थितिकर्तेत्यर्थः। **गमयिते**ति सङ्गमयितृशब्दार्थ उक्तः। स च संहारः' यथा—'यस्मिन्निदं सर्वविचैति सर्वं' मित्यत्र **व्येति-समेती**ति सर्ग-संहारावुच्येते—तद्वत्। यद्वा, कारणभूतं स्वात्मानं **गमयिता** स्वस्मिन् कार्यवर्गस्य लयकर्तेत्यर्थः। उपसर्गप्रयोगेऽपि अर्थानां धातुलीनत्वादेवं व्याख्यातं भगवता पराशरेण। अथ **व**कारव्याख्यानात्पूर्वमेव भकारगकारसमुदायस्यार्थमाह—**ऐश्वर्यस्येति**। **समग्र**शब्दः सर्वत्रान्वेति। परिच्छिन्नचतुर्भुजाद्यैश्वर्यव्यावृत्त्यर्थः **समग्र**शब्दः। **यशो** गुणवत्ताप्रथा। **श्रीः** भोग्यसंपत्। **वैराग्यं** विरक्तिः, परिपूर्णत्वादनादरतेत्यर्थः, यथा-'अवावयनादर' इति। **मतुप्**प्रत्ययस्य प्रसिद्धार्थत्वात्र तद्व्याख्यातम्। अथ **व**कारार्थमाह—**वसन्तीति**। 'अन्येष्वपि दृश्यत' इति डप्रत्ययस्यानेकार्थत्वादधिकरणे, कर्तरि च व्युत्पत्तिः। **भूतात्मनि** भूतानामात्मनि। **अखिलात्मनि**

---

१ श्रीभाष्यम् का. मु. पु.।

भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः ॥' (वि. पु. ६।५।७२-७५), **ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥**' (वि. पु. ६।५।७९), **एवमेष महाशब्दो मैत्रेय भगवानिति । परमब्रह्मभूतस्य वासुदेवस्य नान्यगः ॥ तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः । शब्दोयं नोपचारेण ह्यन्यत्र ह्युपचारतः ॥**' (वि. पु. ६।५।७६-७७), **समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः । तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ॥ समस्तशक्तिरूपाणि तत्करोति जनेश्वर । देवतिर्यङ्मनुष्याख्यचेष्टावन्ति स्वलीलया ॥ जगतामुपकाराय न सा कर्मनिमित्तजा । चेष्टा तस्याप्रमेयस्य व्यापिन्यव्याहतात्मिका ॥**' (वि. पु. ६।७।६९-७१), **'एवंप्रकारममलं नित्यं व्यापकमक्षयम् । समस्तहेयरहितं विष्ण्वाख्यं परमं पदम् ॥**' (वि. पु.

अखिलशरीरके । यद्वा, **भूत**शब्देन कार्यजातमुच्यते तस्यात्मनि । **अखिलात्मनि** कार्यान्तर्भूतानां नित्यमुक्तानामात्मनीत्यर्थः । अथ समुदायशक्तिविषयमर्थमाह—**ज्ञानशक्तीति** । पाठक्रमे **त्वेवमेष** इत्यादिश्लोकद्वयानन्तरं **ज्ञानशक्तिबलैश्वर्ये**त्यादिश्लोकः पठ्यते, तथापि—प्रवृत्तिनिमित्तवाचित्वसंगतित्वशा**देवमेष** इत्यादिश्लोकद्वयात्पूर्वं **ज्ञानशक्ती**त्यादिश्लोक इहोपात्तः । **उत्पत्तिं प्रलयं चैवे**त्यादिश्लोकस्य प्रस्तुतानुपयुक्तत्वाच्च—एवमुपादानं कृतम् । **भगवच्छब्दवाच्यानि** प्रवृत्तिनिमित्तत्वेन वाच्यानीत्यर्थः । **अशेषतः** न प्रत्येकं प्रवृत्तिनिमित्तानि, अपि तु समुच्चित्येत्यर्थः । **अशेष**शब्देन षाड्गुण्यावान्तरमिदा, रूपं, शीलादिगुणजातं च क्रोडीकृतम् । यद्यपि—ऐश्वर्यवीर्यज्ञानानि पूर्वं कण्ठोक्तानि, तथापि—कतिपयसमुदाय्यावापोद्वापप्रयुक्तसमुदायभेदापुनरुक्तिः । न चात्र समुदायशक्तिः कल्प्यते—येनानुक्तगुणमात्रगोचरता स्यात्; वचनबलादेव शक्तिस्वीकारः । पूर्वमक्षरार्थकथनेन **भ**कार-**ग**कार-**व**कारा व्याख्याताः, अथ **अ**न्नित्यस्यार्थमाह—**विनेति** । 'कश्यपः पश्यको भवती'ति न्यायात्—अन्नित्यनेन नेत्युक्तं भवति, निषेध्यं च हेयमित्यर्थः । एवं प्रवृत्तिनिमित्तपौष्कल्याद्भगवत्येव मुख्यवृत्तत्वमाह—**एवमिति** । महार्थगर्भत्वान्महाशब्दत्वम् । मुक्तात्मव्यावृत्त्यर्थं **परब्रह्मे**त्युक्तम् । कथं तत्रैव मुख्यवृत्तत्वमन्यत्रापि तत्प्रयोगो दृश्यत इत्यत्राह—**तत्रेति** । **तत्र पूज्यपदार्थोक्तिः** पूज्यानामवयवार्थानामुक्तिः । **परिभाषा** रूढिः । **ताभ्यां समन्वितः** योगरूढिभ्यां विशिष्टः । अत एव **नोपचारेण**, मुख्यवृत्त इत्यर्थः । अन्यत्रामुख्यत्वमित्याह—**अन्यत्र हीति** । मुक्तात्मन्यौपचारिकत्वोक्त्या—अर्थान्तरप्रयोगेषु औपचारिकत्वमर्थाद्दर्शितमिति **हि**शब्दाभिप्रायः । भगवच्छब्दप्रयोगविषयेषु सर्वेषु प्रयोगेऽन्यथासिद्धेऽपि नहि शक्तिभेदकल्पनं युक्तम् । यत्र ज्ञानादयो निरङ्कुशाः स एव मुख्यार्थः, गुणलेशयोगादपि प्रयोगसंभवात्—अन्यत्र वृत्तिरौपचारिकीत्यर्थः ।

अथ तस्मिन्नेव योगप्रकरणे उपसंहारेऽपि सविशेषपरवाक्यानि दर्शयन् दिव्यविग्रहवत्त्वं चाह—**समस्ता इति । बद्धो, मुक्तः, कर्मरूपाविद्या** च शक्तयः,तत्तदभिमानिदेवताद्वारेण तत्र तासां **प्रतिष्ठि**तत्वं; यत्रेत्यनुवादस्य पुरोवादसापेक्षत्वात्, अस्त्रभूषणाध्याये यथोक्तप्रकारेण पुरोवादाच्च । **तद्विश्वरूपवैरूप्य**मिति सन्निवेशवैलक्षण्यमुक्तम् । **अन्य**दिति द्रव्यान्तरत्वमुक्तम् । **महद**ित्यपरिच्छेद्यत्वम् । विलक्षणसन्निवेशस्य सकलेतरविजातीयस्य कथं चिन्तयितुं शक्यत्वमित्यत्राह—**समस्तेति** । केन हेतुनेत्यत्राह—**स्वलीलयेति** । लीलायाः प्रयोजनत्वात्तदभिसंधिर्हेतुः, न तु कर्मणेत्यर्थः । किं प्रयोजनमित्यत्राह—**जगतामिति** । न तु स्वकर्मफलभोगायेत्यर्थः । एतद्विवृणोति—**न सेति** । **व्यापिनी** देशनियमरहिता, यथा—वैदिकपुत्रानयनादिषु । व्यापनशक्तत्वेऽपि प्रतिबन्धः संभवतीत्यत्राह—**अव्याहतात्मिका** । न तस्याः प्रतिहतिरस्तीत्यर्थः । यद्वा, **व्यापिनी** सर्वावतारानुगुणा । **अव्याहता** देशकालवस्तुकृतप्रतिबन्धरहिता । एवं **प्रत्यस्तमिते**ति श्लोकस्य परमात्मपरत्वाभ्युपगमेऽपि, निर्विशेषपरत्वनिराचिकीर्षयोपक्रमोपसंहारयोस्तस्मिन्नेव प्रकरणे सविशेषपरत्वं दर्शितम्। अथास्य श्लोकस्य परिशुद्धजीवात्मस्वरूपविषयत्वं, **प्रत्यस्तमितभेदादि**पदानां कतिपयविषयत्वं च विवक्षुः—तदर्थं परमात्मविषयभेदनिषेधादीनां कतिपयविषयत्वाभिधायीनि वाक्यानि दर्शयिष्यन्, तत्र परमात्मविषयकतिपयभेदनिषेधपरवचनोदाहरणेन मुक्तात्मविषये किमायातमिति शङ्कायां—मुक्तस्य परमात्मसाम्यप्रतिपत्तये मुक्तगुणान् परमात्मन्यतिदिशन्तं श्लोकं दर्शयति—**एवंप्रकारमिति** । एतच्छ्लोकोदाहरणेन **प्रत्यस्तमिते**त्यादिश्लोकानन्तरं पूर्वपक्षे पठितस्य **ज्ञानस्वरूपमि**त्यादेः, प्रथमांशोपक्रमश्लोकस्य, चतुःश्लोक्याश्च सविशेषपरत्वप्रतिपादनाय—प्रथमांशोपसंहारेऽपि सविशेषपरत्वं दर्शितं भवति। **उपसंहार**वचनोपादानमुपसंहारस्य बुद्धिस्थत्वात् क्रियते। **एवंप्रकारं** मुक्तात्मानं प्रति **निर्व्यापारम्, अनाख्येय**मित्यादिना यः प्रकार उक्तस्तदुपेतमित्यर्थः । एवं भगवति मुक्तात्मगुणातिदेशः कृतः । **भेदराहित्यस्य, सत्तामात्रत्वस्य, वचसामगोचरत्वस्य** च मुक्तगुणस्य **निर्व्यापार**मित्यादिनोक्तस्य भगवत्यतिदिष्टत्वात्, भगवति च तेषां निषे-

१।२२।५१), 'परः पराणां परमः परमात्मात्मसंस्थितः । रूपवर्णादिनिर्देशविशेषणविवर्जितः ॥
अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः । वर्जितः शक्यते वक्तुं यः सदास्तीति केवलम् ॥
सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः । ततः स वासुदेवेति विद्वद्भिः परिपठ्यते ॥

धानां कतिपयविषयत्वस्य प्रामाणिकत्वाच्च—ते निषेधा मुक्तात्मन्यपि तथाविधा इति कतिपयविषयत्वं सिद्धमिति भावः । अथ परमात्मनोऽधिकान् गुणानाह—**अमलं** मलप्रतिभटं, सोपाधिकहेयविरोधिनमित्यर्थः । **नित्यम्** उक्तप्रकारेण नित्यम्, मलप्रतिभटत्वं नित्यमित्यर्थः । **व्यापकं** स्वरूपेण व्यापकम् । **अक्षयं** स्वत एव, धर्मतोऽपि विकाररहितम् । मुक्तस्य हि पूर्वावस्थायां ज्ञानसंकोचविकासविकारो विद्यते, नित्यसिद्धानामपि तथात्वं परायत्तमिति—तद्व्यवच्छेदः । समस्तहेयरहितं पूर्वं हेयप्रत्यनीकत्वमुक्तम्, अत्र हेयराहित्यमुक्तम् । स्वतो हेयाभावोऽपि मुक्तस्य नास्ति; परमात्मप्रसादाधीनत्वात्तस्य । पदयत इति **पदं** दिव्यात्मस्वरूपम् । परमपदशब्दस्य दिव्यलोके, मुक्तात्मनि च प्रयोगात्तद्व्यावृत्त्यर्थं **विष्णवाख्यमित्युक्तम्** । अथ प्रथमांशोपक्रमेऽपि सविशेषपरत्वं दर्शयति—**परः पराणामिति** । अनेन शास्त्रोपक्रमस्यापि सविशेषपरत्वमुक्तं भवति । अनेन **प्रत्यस्तमितभेदमित्यादि** पदानां कतिपयभेदनिषेधपरत्वं च सिद्धमिति त्रिविधं प्रयोजनम् । अनेन **परः पराणामित्यादिग्रन्थजातस्य अविकारायेत्यादिसंग्रहश्लोकविवरणरूपत्वात्—ज्ञानस्वरूपमित्यादिश्लोकं प्रत्युपक्रमत्वमर्थक्रमेण सिद्धमिति**—तस्यापि सविशेषपरत्वसिद्धिः । यद्वा, प्रथमांशोपक्रमोपसंहारयोः सविशेषपरत्वात्—उपक्रमोपक्रमभूतस्यापि **ज्ञानस्वरूपमिति** श्लोकस्य महावाक्यस्वारस्यविरोधो न न्याय्य इति—तस्यापि **सविशेषपरत्वं** सिद्ध्यति । यद्वा, **नमस्कारश्लोकस्य** शास्त्रोपक्रमशेषभूतत्वात्—तच्छेषभूतस्तदनुगुणार्थो वर्णनीय इति सिद्ध्यति । उपक्रमोपक्रमभूतनमस्कारश्लोकार्थानुगुणं **परः पराणामित्यादेरर्थो** वर्णनीय इति—चेन्न; तस्याप्युपक्रमभूतप्रश्नोत्तरवरलाभकथनश्लोकानुगुणं तदर्थस्य वाच्यत्वात्—इत्यभिप्रायः । अत्र ब्रह्मणः कृत्स्नजगत्कारणत्वसिद्ध्यर्थं वेदान्तेषु **सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिवाक्यैरानन्त्यमुक्तं, तच्च त्रिविधपरिच्छेदराहित्यं**; न हि देशकालादिभिः परिच्छिन्नानां घटादीनां कृत्स्नस्य सर्वविधकारणत्वं दृष्टम् । **कालत्रयवर्तिकार्यजातकारणत्वे, सर्वदेशगतकार्यकारणत्वे च**—देशतः कालतोऽप्यपरिच्छेदावपेक्षितौ । उपादानत्वसिद्ध्यै **वस्त्वपरिच्छेदोऽपेक्षितः**; न हि वस्तुतः परिच्छिन्नः कुलाल उपादानं भवति; मृत्पिण्डकुलालयोः सामानाधिकरण्यसंभवात् । अतः कृत्स्नकारणत्वसिद्ध्यर्थं त्रिविधपरिच्छेदराहित्यं विस्तरेण विवक्षुः **परः पराणामित्यर्थेन** तत् संग्रहेण प्रतिजानीते—**परः पराणां परम इति** । अनेन कालानवच्छेदः सिद्धः; अधिककालवर्तित्वस्य परशब्दवाच्यत्वात् । **परमात्मेति** देशापरिच्छेद उक्तः; **आप्नोतीति** ह्यात्मशब्दव्युत्पत्तिः । **आत्मसंस्थितः** सर्वेषामात्मत्वेन सर्ववस्तुभिर्विशिष्टः । यद्वा, आत्मत्वेन संस्थिततया सर्वशरीरकत्वात्तस्मिन्पर्यवस्थितः । **स्वनिष्ठः** अन्यत्सर्वं तन्निष्ठं; शरीरतया विशेषणत्वात्, अतः सर्वपर्यवसानभूमिः स्वनिष्ठ इति वस्त्वपरिच्छेद उक्तः, सर्ववस्तुसामानाधिकरण्यार्हत्वं हि वस्त्वपरिच्छेदः, इदमिदं न भवतीति हि वस्तुपरिच्छेदः । यद्वा, नित्यत्वविभुत्वव्यतिरिक्तगुणैः समाभ्यधिकराहित्यं वस्त्वपरिच्छेदः । स्वनिष्ठं परमात्मानमपेक्ष्य तन्निष्ठानामन्येषां समलाभ्यधिकत्वासंभवात्—**आत्मसंस्थित** इत्यनेन वस्त्वपरिच्छेदसिद्धिः । एवं संक्षिप्तमर्थमुपपादयति—**रूपेत्यादिना** । तत्र कालापरिच्छेदं प्रथमं विवक्षुः कालपरिच्छिन्नेषु विद्यमानं पञ्चकल्पनान्वितत्वं ब्रह्मणि नास्तीत्याह—**रूपेति । रूप**शब्देन जातिरुच्यते; 'जातिगुणौ च रूपिणं रूपे' इति हि नीतिविदः । **वर्ण**शब्दो रूपाख्यगुणविशेषपरः । **आदि**शब्देन गन्धरसादिः, आसनशयनादिक्रिया, विषाणाद्यवयववत्त्वं च विवक्षितम् । **रूपवर्गादी**ति पाठे **रूप**शब्दो नीलपीतत्वादिगुणपरः, **वर्ग**शब्दो देवमनुष्यादिवर्गपरः, जातिपर इत्यर्थः । तन्निबन्धनस्तद्विषयो **निर्देशः** शब्दः, शब्दवाच्यास्त एव विशेषणानि तैर्विवर्जितः । यद्वा, **रूपवर्णादि**तद्वाचिशब्दरूपैर्विशेषणैर्विवर्जितः । एवमनित्यत्वव्यापकं कर्मकृतं रूपादिमत्त्वं ब्रह्मणि नास्तीति—कर्मकृतरूपादिनिवृत्त्या—तद्व्यापककालपरिच्छेदनिवृत्तिरित्यर्थः । यद्वा, अनित्यत्वव्याप्यकर्मकृतरूपाद्यभावान्नानित्यत्वं ब्रह्मण्यनुमातुं शक्यमित्यर्थः । अनेन **प्रत्यस्तमितभेदमित्यस्य** पदस्य विषयो दर्शितः । **अथानित्यत्वव्यापकत्वाद्विकाराणामनित्यत्वनिवृत्तये तद्व्यापकविकारराहित्यमाह—अपक्षयेति** । जायते अस्तीत्यवस्थाद्वयं **जन्म**शब्देन विवक्षितम् । उत्पत्तिस्थितिनाशानामेकैकत्र विधाद्वयेन विकारषट्कसिद्धिः, तद्विवर्जितत्वात्**सदाऽस्तीति वक्तुं शक्यते । सदा**शब्देन कादाचित्कास्थितिनिवृत्तिः, न तूत्पद्यत इत्यादिशब्दैरिति **केवल**शब्दाभिप्रायः । अनेन **सत्तामात्रमित्यस्य** विषयो दर्शितः, **अगोचरं वचसामित्यस्य** च विषयो दर्शितो भवति । रूपवर्णादिप्रवृत्तिनिमित्ताभावात्, उत्पत्त्यादिप्रवृत्तिनिमित्ताभावाच्च—कल्पनाविकारवाचिशब्दैर्न **वक्तुं शक्य** इति तस्य पदस्यार्थ इत्यभिप्रायः । **अगोचरं वचसामिति** सर्वशब्दागोचरत्वमुच्यते चेत्, वचसामगोचरं सत्तामात्रमित्यपि वक्तुं न शक्यते । अथ देशापरिच्छेदं नामनिर्वचनमुखेनाह—**सर्वत्र इति** । ब्रह्मण ईश्वरातिरिक्तत्वनिषेधार्थं, देवतान्तरव्युदासार्थं च नामनिर्वचनमुखेन तदुक्तिः । औणादिकप्रत्ययस्यानेकार्थत्वादधिकरणे, कर्तरि च व्युत्पत्तिर्वासुदेवशब्दस्योच्यते—**सर्वत्रेति** । वेदान्तेषु पर-

तद्ब्रह्म परमं नित्यमजमक्षयमव्ययम् । एकस्वरूपं च सदा हेयाभावाच्च निर्मलम् ॥ तदेव सर्वमेवैतद्व्यक्ताव्यक्तस्वरूपवत् । तथा पुरुषरूपेण कालरूपेण च स्थितम् ॥' (वि. पु. १।२।१०-१४), प्रकृतिर्या मयाख्याता व्यक्ताव्यक्तस्वरूपिणी । पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि ॥ परमात्मा च सर्वेषामाधारः परमेश्वरः । विष्णुनामा स वेदेषु वेदान्तेषु च गीयते ॥' (वि. पु. ६।४।३८-३९), 'द्वे रूपे ब्रह्मणस्तस्य मूर्तं चामूर्तमेव च । क्षराक्षरस्वरूपे ते सर्वभूतेषु च स्थिते । अक्षरं तत्परं ब्रह्म क्षरं सर्वमिदं जगत् ॥ एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा । परस्य

ब्रह्मणो हि निर्विकारत्वादिकमुक्तं तत्कथं वासुदेवस्योच्यत इत्यत्राह—**तद्ब्रह्मेति** । 'शैत्यं हि यन्सा प्रकृतिर्जलस्ये'तिवत् **तदिति** निर्देशः । 'निर्दिश्यमान-प्रतिनिर्दिश्यमानयोरेकलमापादयन्ति सर्वनामानि पर्यायेण नलिङ्गमुपाददत' इति हि शाब्दाः । **नित्यमिति** कार्यमात्रव्यावृत्तिः । **अजमक्षरमव्ययम् । एकस्वरूपमिति** सविकारनित्यप्रधानव्यावृत्तिः । **एकस्वरूपश**ब्देन वृद्धिपरिणामराहित्यं विवक्षितम् । **हेयाभावाच्च निर्मलमिति** बद्धव्यावृत्तिः । **सदेति** मुक्तव्यावृत्तिः । **परममिति** नित्यसिद्धव्यावृत्तिः । यद्वा, **एकस्वरूपमिति** बद्धव्यावृत्तिः, **स**देत्यादिना मुक्तव्यावृत्तिरिति । एवं स्वव्यतिरिक्तसमस्तवस्तुविलक्षणत्वेनोपनिषत्सूक्तं ब्रह्म वासुदेव एवेत्यर्थः । त्रिविधापरिच्छेदवादिनी श्रुतिरपि देवताविशेषं निरवोचत्[1]. **अनन्तमिति** अनन्तशब्दो योगरूढः, अतो नारायणादिशब्दपर्यायस्त्रिविधानन्त्ययोगिनि भगवति मुख्यो वर्तते । सत्यज्ञानादिवाक्येऽनन्तमिति पदं पुंलिङ्गं द्वितीयान्तम्; **यो वेदेति** वेदनशब्देनान्वयात् । प्रथमान्तत्वे—**तद्यो वेदेति** तत्पदाध्याहारः स्यात्, वाक्यभेदश्च स्यात्, अतस्त्रय यथोक्त एवार्थः । तस्मात्तदनुसारेणात्रापि अपरिच्छेदकथनसमये देवताविशेषो निर्णीतः । वस्तुपरिच्छेदमाह—**तदेवेति । सर्वमेवैतदिति व्यक्ताव्यक्तपुरुषकालसमुदाय उच्यते । व्यक्ताव्यक्तादिस्वरूपमेतत् सर्वं तद्** ब्रह्मेत्यर्थः । अनेन वस्त्वपरिच्छेद उक्तः; सर्ववस्तुसामानाधिकरण्यार्हत्वं हि वस्त्वपरिच्छेदः । सर्ववस्तुसामानाधिकरण्यार्हत्वेनैव चिदचिच्छरीरकत्वहेतुभूतव्यापनभरणादिगुणतः, समाभ्यधिकराहित्यसिद्धेश्च—वस्त्वपरिच्छेदसिद्धिः, न हि ब्रह्मव्यतिरिक्तस्य कस्यचित् समस्तचिदचिच्छरीरकत्वसंभवः । एवं शास्त्रोपक्रमे वासुदेवाख्यमुभयलिङ्गकं वस्तु प्रतिपाद्यमुक्तं, शास्त्रोपसंहारे च तथोक्तमिदं दर्शयति—**प्रकृतिर्येति । परमात्म**शब्दस्य क्वचिज्जीवेऽपि प्रयोगदर्शनात्तद्व्यावृत्त्यर्थं साक्षात्परमात्मलक्षणं जगत्कारणत्वमुक्तं **लीयेते परमात्मनीति** । स चेश्वरानतिरिक्त इति ज्ञापनार्थः **परमेश्वर**शब्दः । ईश्वरश्च न देवतान्तरमिति ज्ञापनाय **विष्णुनामेत्युक्तम् । अत्र परमात्मा, आधारः, परमेश्वर** इति पदैः शरीरिलक्षणं स्पष्टम् । एवं शास्त्रोपक्रमोपसंहारयोः, अवान्तरप्रकरणोपक्रमोपसंहारयोश्च हेयप्रत्यनीकत्वकल्याणगुणास्पदं नारायण एव **परं ब्रह्मेति** प्रतिपाद्यते—इति दर्शितम् ॥

अथ—अविद्यासंबन्धादयश्च ब्रह्मण एव हि प्रतिपाद्यन्ते, तत्कथं यथोक्तस्वरूपस्य ब्रह्मण उपपद्यत इति शङ्कायां—'काठिन्यवान् यो बिभर्ती'तिवद्धारद्वारिभावेनोपपद्यत इति वक्तुं परमात्मनः, जीवानां चात्मशरीरभावेन संबन्धं, तेषामविद्यासंबन्धादिकं च वक्ष्यन्—प्रथमं जीवब्रह्मणोः शरीरशरीरिभावरूपसंबन्धं दर्शयति—**द्वे रूपे इत्यादिना । मूर्तं चामूर्तमेव चेति** बद्धश्च मुक्तश्चेत्यर्थः । एतद्विवृणोति—**क्षराक्षरस्वरूपे इति** । ज्ञानसंकोचात्मकक्षरणवत्, असंकुचितज्ञानं चेत्यर्थः । **सर्वभूतेषु च स्थिते** अर्थार्थे क्तः, सर्वभूतस्थित्यर्थे—सूक्ष्मतरतया व्यापनक्षमे इत्यर्थः । यद्वा—**बद्धस्य स्वरूपेण** सर्वभूतस्थितिः, मुक्तस्य तु धर्मभूतेन विभुज्ञानद्वारेणेति । **अक्षरं तत्परं ब्रह्मेति । तन्मुक्तस्वरूपम्** अक्षरम् । **क्षरं सर्वमिदं जगत्—इदं बद्धस्य** स्वरूपं क्षरमित्यर्थः । रूपत्वं विशिनष्टि—**एकदेशेति । शक्तिरप्यंशभूतं** कार्योपयोगिविशेषणम्, **एकदेशस्थितस्य, विस्तारिणीति** विशेषणद्वयेनासंकीर्णस्वभावत्वमुक्तम् । अस्मिन् श्लोके **अखिलं जगदिति** चिदचिदात्मकं जगदुच्यते । तुल्यन्यायत्वादक्षरस्यापि शक्तिलसिद्धिः । यद्वा—**अखिलजगच्छब्देनाक्षरस्यापि** क्रोडीकारः; त्रिपाद्विभूतेरपि लोकशब्दवाच्यत्वात्, तत्समानार्थत्वाज्जगच्छब्दस्य अखिलशब्दस्य संकोचकाभावाच्च । **क्षरं सर्वमित्यत्र** क्षरसामानाधिकरण्यमपवादः, इह तदभावादक्षरस्याप्यभिधानमुपपद्यते । **इदं**[2]शब्दस्य प्रकृतवाचित्वात्—क्षराक्षरपरत्वं युज्यते । **ननु**—अत्र क्षराक्षरशब्दौ कार्यकारणरूपेणावस्थितपरब्रह्मपरौ; परब्रह्मशब्दमुख्यार्थलसिद्धेः; अन्यथा ब्रह्मशब्दानामेकप्रकरणस्थानामर्थवैरूप्यं च स्यात् । जगतो **ज्योत्स्ना**स्थानीयत्वं चोपपद्यते; प्रभाया विशीर्णावयवत्वेनाग्निकार्यत्वापत्तेः; नैवं; **ब्रह्मणो रूपे** इति व्यतिरेकनिर्देशस्यारस्यभङ्गप्रसङ्गात्, स च कार्यकारणयोर्ब्रह्मव्यतिरिक्तत्वाभावात् ।

---

१ शब्दस्त्वखिलशब्दस्य च का. मु. पु. ।

ब्रह्मणः शक्तिमत्थेदमखिलं जगत् ॥' (वि. पु. १।२२।५३-५५), 'विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथापरा । अविद्या कर्मसंज्ञान्या तृतीया शक्तिरिष्यते ॥ यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा । संसारतापानखिलानवाप्नोत्यतिसंततान् ॥ तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता । सर्वभूतेषु भूपाल तारतम्येन वर्तते ॥' (वि. पु. ६।७।६१-६३), प्रधानं च पुमांश्चैव सर्वभूतात्मभूतया । विष्णुशक्त्या महाबुद्धे वृतौ संश्रयधर्मिणौ ॥ तयोः सैव पृथग्भावकारणं संश्रयस्य च ।' (वि. पु. २।७।२९-३०), 'यथाऽसक्तो जले वातो बिभर्ति कणिकाश्र-

---

यदि—षष्ठ्यास्वार्थाय मूर्तत्वामूर्तत्वे विवक्षिते, तदा—मूर्तामूर्तशब्दस्वारस्यभङ्गः । भावप्रधानत्वाविवक्षायां—रूपशब्दसामानाधिकरण्यायोगः । यद्युच्येत—ब्रह्मणो द्वे रूपे, ब्रह्म हि मूर्तममूर्तं चेति—तदा प्रथमान्तब्रह्मशब्दाध्याहारदोषः स्यात्; षष्ठ्यन्तस्य ब्रह्मशब्दस्य मूर्तामूर्तपदमामानाधिकरण्यायोगात् । किंच—**सर्वभूतेषु च स्थिते** इति चानुपपन्नं; सर्वभूतशब्दस्य कार्यवाचिनया—तत्र कार्यस्थितावुच्यमानायां स्वस्मिन् स्ववृत्तिप्रसङ्गात्, कारणस्यापि कार्यादन्यतया स्ववृत्तिप्रसङ्गाच्च । अवस्थाद्वयस्य सर्वभूतस्थितिरिति च न वाच्यं; धर्मिपर्यन्तक्षराक्षरशब्दसामानाधिकरण्यायोगात्, तयोरप्यवस्थापरत्वे—स्वारस्यभङ्गात्, अवस्थावद्वाचिजगच्छब्दब्रह्मशब्दसामानाधिकरण्यायोगाच्च, तस्मिन् सोढेऽपि कारणत्वावस्थायाः कार्ये विद्यमानत्वायोगाच्च, शक्तिशब्दस्य कार्यवाचित्वायोगाच्च श्लोकस्य नायमर्थः । उपचारतोऽपि कार्योपयोगिविशेषणं हि शक्तिशब्देन व्यपदेशमर्हति; कार्योपयोगिविशेषणत्वस्य सामान्यात् । शक्तिर्हि शक्तं प्रत्यपृथग्भूतं कार्योपयोगिविशेषणं, कार्यं तु न कारणस्यापृथग्भूतं विशेषणं कार्योपयोगि च भवति; कार्यकारणयोरनन्यत्वात्—स्वस्य स्वयमेव विशेषणत्वायोगात् । कार्यत्वं विशेषणमिति चेत्, सत्यं, तथापि धर्मिवाचिनो जगच्छब्दस्य कार्यतावाचित्वाभावात्—शक्तिशब्दसामानाधिकरण्यमुपचारतोऽपि नोपपद्यते । कार्योपयोग्यपृथग्भूतविशेषणं शक्तिरिति मुख्यत्वमस्मन्मते संभवेत्, क्षरशब्दस्य कार्यपरत्वे दृष्टान्तवैषम्यं च स्यात्; तच्च ज्योत्स्नाया विर्गीणावयवत्वाभावेनाग्निकार्यत्वाभावात् । नच—'क्षरं प्रधानमृताक्षरं हर' इति प्रयोगानुसारेण चेतनाचेतनपरत्वं युक्तम् : अचिदंशस्य स्वस्मिन् स्वप्रवृत्तिप्रसङ्गेन सर्वभूतस्थित्यनुपपत्तेः । चिदचित्संघातरूपेषु भूतेषु द्वयोरवस्थानमुपपन्नमिति—चेन्न; समुदायिनोः समुदायनिष्ठत्वानुपपत्तेः । समुदायो हि समुदायिनिष्ठः । उपरितनग्रन्थवैरूप्यं च स्यात् : उत्तरत्र हि—'भूप मूर्तममूर्तं चे'ति मूर्तामूर्तशब्दाभ्यां रूपद्वयं प्रस्तुत्य हिरण्यगर्भादीन् निर्दिश्य 'मूर्तमेतद्धरे रूपं भावनात्रितयान्वित'मिति मूर्तशब्दवाच्यरूपस्य भावनात्रयान्वयकथनात् । न ह्यचेतनस्य कर्मब्रह्मभावनान्वयः; 'सोऽक्षरः परमः स्वरा' डित्यत्र हीन्द्रादिबद्धविलक्षणवाचित्वात्, **स स्वराड् भवती**तिवन्मुक्तवाचित्वस्वाराद्दब्दसामानाधिकरण्याच्च—**अक्षर**शब्दो मुक्तात्मपरः, अतस्तदनुरोधेनाक्षरशब्दोऽत्रापि मुक्तात्मपरः । ब्रह्मशब्दार्थवैरूप्यं तु 'तपसा चीयते ब्रह्म, तस्मादेतत् ब्रह्म नामरूपमन्नं च जायते' इति श्रुताविवानेकोपपत्तिबलाद्युज्यते, अतो यथोक्त एवार्थः ॥

ब्रह्मणोऽविद्यासंबन्धद्वारभूते जीवात्मन्यविद्यान्वयं दर्शयति—**विष्णुशक्तिरित्यादिना । सर्वगा** चतुर्मुखादिपिपीलिकान्तसर्वशरीरस्था, जानावेकवचनम् । यद्वा, धर्मभूतज्ञानेन स्वतः सर्वं व्याप्तुं क्षमा । **कर्मणा वेष्टिता** कर्मणा संकुचितज्ञानेत्यर्थः । तर्हि—सर्वं अज्ञाः स्युरित्यत्राह—**तयेति । कर्मतारतम्यानुगुणं** ज्ञानतारतम्यवती क्षेत्रज्ञशक्तिरित्यर्थः । सर्वेषां ज्ञाननित्यत्वस्य, मुक्तौ सर्वविषयत्वस्य च प्रामाणिकत्वाद्बद्धावस्थायां संकोचविकासौ सिद्धौ, तत्तारतम्यं च 'पुंसः शक्त्युपलक्षिनः, तच्छक्त्या पशवोऽधिका' इति स्पष्टीकृतम् । जातीनामप्यपृथक्सिद्धधर्मत्वेन—रूपशब्दवाच्यत्वाच्च तद्व्यावृत्त्यर्थं प्रस्तुतं रूपत्वं नियाम्यत्वलक्षणमित्याह—**प्रधानं चेति** । चिदचितोः परमात्मनियाम्यत्व-धार्यत्व-व्याप्यत्व-नित्यत्वादेः प्रमाणान्तरागोचरतया विहितत्वात्—निषेध्यत्वमयुक्तमिति—नियाम्यत्वादिधर्माणां पारमार्थ्येन—तदाश्रयभूतयोश्चिदचितोश्च पारमार्थ्यात्, नित्यत्वोक्त्या च—तयोश्रमविषयत्वासंभवश्च दर्शितो भवति । न हि धर्मिसत्यत्वेन विना धर्मसत्यत्वं युक्तं, नापि बाध्यस्य नित्यत्वं युक्तम् । **सर्वभूतात्मभूतया** सर्वभूतव्यापिकयेत्यर्थः । **विष्णुशक्त्या** विष्णोर्नियमनशक्त्या; अन्यथा **शक्तिः सापि विष्णो**रित्यनन्तरोक्तिविरोधात् । **तया वृतौ** व्याप्तौ । नियमनेन च धारणं श्रुतिसिद्धम्—'एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत' इति हि श्रूयते । अतो **बिभर्तीत्युत्तरश्लोकसामञ्जस्यम् । संश्रयधर्मिणौ** भगवदपृथक्स्थितिधर्मकौ । **पृथग्भाव** उपकरणोपकरणत्वलक्षणसंबन्धविशेषराहित्यं संहारः; तत्र हि करणकलेवरं नश्यति । **संश्रयः** करणकरणिलेन संबन्धः, सृष्टिरित्यर्थः । यद्वा, **संश्रयस्तयोः** संबन्धः **संसारः, पृथग्भावो** मोक्षः, तत्सर्वं भगवन्नियमनाधीनमित्यर्थः । अत्र दृष्टान्तमाह—**यथेति ।** कारणात्कार्यस्य विभागे दृष्टान्तः । **जलस्य कणिकाः** तस्माद्भेदेन बिभर्ति वायुः, संयोजकत्वियोजकत्वयोर्वा दृष्टान्तः । परस्परं संकलिता, असंकलिताश्च बिभर्ति

तम्। शक्तिः सापि तथा विष्णोः प्रधानपुरुषात्मनः ॥' (वि. पु. २।७।३२), **तदेतदक्षयं नित्यं जगन्मुनिवराखिलम्। आविर्भावतिरोभावजन्मनाशविकल्पवत् ॥'** (वि. पु. १।२२।५९) इत्यादिना परंब्रह्म स्वभावत एव निरस्तनिखिलदोषगन्धं, समस्तकल्याणगुणात्मकं, जगदुत्पत्ति-स्थितिसंहारान्तःप्रवेशनियमनादिलीलं प्रतिपाद्य, कृत्स्नस्य चिदचिद्वस्तुनः सर्वावस्थावस्थितस्य पारमार्थिकस्यैव परस्य ब्रह्मणः शरीरतया रूपत्वं शरीररूपतन्वंशशक्तिविभूत्यादिशब्दैस्तत्तच्छब्दसामानाधिकरण्येन चाभिधाय, तद्विभूतिभूतस्य चिद्वस्तुनः स्वरूपेणावस्थितमचिन्मिश्रतया क्षेत्रज्ञरूपेण स्थितिं चोक्त्वा, क्षेत्रज्ञावस्थायां पुण्यपापात्मककर्मरूपाविद्यावेष्टितत्वेन स्वाभाविकज्ञानरूपत्वानुसंधानमचिद्रूपार्थाकारतयानुसंधानं च प्रतिपादितमिति—परं ब्रह्म सविशेषं, तद्विभूतिभूतं जगदपि **परमार्थिक-मेवेति** ज्ञायते। **प्रत्यस्तमितभेद**मित्यत्र देवमनुष्यादिप्रकृतिपरिणामविशेषसंमृष्टस्याप्यात्मनः स्वरूपं तद्गतभेदरहितत्वेन तद्भेदवाचिदेवादिशब्दागोचरं ज्ञानसत्तैकलक्षणं स्वसंवेद्यं योगयुञ्जनसो न गोचर-

---

वायुः। यद्वा, प्रकृतिपुरुषगतदोषलेशराहित्ये दृष्टान्तः, वायुर्हि कणिकाशतं तत्स्वभावास्पृष्टो बिभर्ति। **प्रधानपुरुषात्मनः** प्रधानपुरुषयोरात्मनः। **समस्तचिदचिद्वस्तुजात**मिति कर्मधारयाहृतव्यम्। यद्वा **प्रधान**शब्दानन्तर**पुरुष**शब्दो बद्धपरः, **आत्म**शब्दः प्रकृतिसंसर्गरहितमुक्तात्मपरः, तान् बिभर्तीति। एवंविधस्य जगतः परमार्थत्वमाह—**तदेतदिति।** मिथ्या हि बाध्यत्वेनानित्यं; पारमार्थ्ये सति हि नित्यत्वसंभवः। उदाहृतवचनार्थान् संक्षेपेणाह—**इत्यादिनेति।** निरस्तनिखिलदोषत्वं, कल्याणगुणात्मकत्वं च **स सर्वभूतप्रकृतिं, समस्तकल्याणे**त्यादिश्लोकार्थः। **जगदुत्पत्त्यादिलीलत्वं भगवच्छब्दनिर्वचनसिद्धम्। अन्तः प्रवेशनियमनादी**त्यादिशब्देनाध्यक्षत्वानुमन्तृत्वे उच्येते। **इत्यादिनेत्यादि**शब्देन 'क्रीडतो बालकस्येवे'त्यादिवचनं विवक्षितम्। तदर्थो **लीला**शब्देन विवक्षितः। **सर्वावस्थावस्थितस्य** कार्यकारणावस्थितस्य, बद्धमुक्तावस्थितस्य चेत्यर्थः। प्रमाणान्तरगोचरस्यार्थस्य हि निषेधार्थं भ्रान्तिसिद्धत्वेनानुवादसंभवः। परमात्मनियाम्यत्वादिकं तु प्रमाणान्तरागोचरत्वाद्विधित्सितमेवेति विहितस्य निषेधोऽनुपपन्नः—इत्यभिप्रायेण **पारमार्थिकस्यैवे**त्युक्तम्। नियन्तृत्वनियाम्यत्वादिप्रतिपादनसिद्धोऽर्थः। शरीरतया रूपत्वं **तदेव सर्वमेवैत**दित्यत्र **तच्छब्दसामानाधिकरण्यम्। द्वे रूपे ब्रह्मणस्तस्ये**त्यादिनोक्तमर्थमाह—**शरीररूपतन्वंशेति। प्रतिपादितमितीति।** एवं शास्त्रोपक्रमोपसंहारेषु, अवान्तरप्रकरणोपक्रमोपसंहारेषु च प्रतिपादितत्वादित्यर्थः। ज्ञायत इत्यन्तेनोक्तवचनार्थसंग्रहः कृतः। **इति श्रीविष्णुपुराणवचनानां सविशेषविषयतानिरूपणम् ॥**

खोदाहृतवचनैर्वस्तुनः सविशेषत्वं, जगतः सत्यत्वं च स्थितम्, अथ परोदाहृतवचनानि पूर्वोदाहृतवचनार्थानुगुण्येन व्याचिख्यासुः प्रथमं **प्रत्यस्तमिते**त्यादि श्लोकं व्याचष्टे—**प्रत्यस्तमितेति।** 'दुःखाज्ञानमलाधर्माः प्रकृतेस्ते न चात्मन' इति, 'पुमान्न देवो न नरो न पशुर्न च पादपः। शरीराकृतिभेदास्तु भूपैते कर्मयोनयः' इत्यादिषु प्रकृतिर्देवादिशरीरं चोपाधित्वेन प्रतीयत इति—उभयविधवचनार्थं संघट्टयितुं—**देवमनुष्यादिप्रकृतिपरिणामविशेषे**त्युक्तम्। **प्रकृते**रित्यत्र प्रकृतिशब्दनिर्देशः—शरीरस्य प्रकृतिपरिणामरूपत्वादित्यभिप्रायः। **देवमनुष्यादी**तिशब्देन प्रतिषेध्यभेदस्य शरीरे विद्यमानता दर्शिता। ननु—मुक्तानामुपास्यत्वाभावात्, उपासकस्वरूपस्यात्रित्यसंसृष्टतया—प्रत्यस्तमितभेदत्वायोगाच्च—तादृक्त्वोपदेशायोगादस्य श्लोकस्य परिशुद्धात्मस्वरूपविषयत्वानुपपत्तेः—परमात्मविषयत्वं स्यादिति शङ्कापरिहाराय चोक्तं—**देवमनुष्यादिप्रकृतिपरिणामविशेषसंसृष्टस्यापीति।** इदानीं संसरतोऽपि स्वाभाविकाकारस्य तिरोहितस्य विद्यमानत्वात्—आविर्भविष्यतस्तस्य तथानुसंधानायोपदेश इति भावः। **तस्यात्मपरदेहेषु सतोऽपी**त्येतत् स्मारयितुं **संसृष्टस्यापी**त्युक्तम्। **अपि**रिवरोधे। पातकिसंसर्गात्पातकित्वं भवति, रुमासंसर्गात्पदार्थानां लवणत्वं भवति, अतो विरोधः। तद्गतभेदरहितत्वेन **भेदो** रूपवर्णादिः। अनेन **प्रत्यस्तमितभेद**शब्दो व्याख्यातः। **प्रत्यस्तमितभेद**शब्देन भेदस्यापुनरुदयविनाशोऽभिप्रेतः, ततश्च प्रलयकालव्यावृत्तिः। तद्भेदवाचि**देवादिशब्दागोचरम्** इत्यनेना**गोचरं वचसा**मिति पदं व्याख्यातम्। **ज्ञानसत्तैकलक्षणमिति ज्ञान**पदं, **सत्तामात्र**मिति च पदं व्याख्यातम्। **सत्तैकलक्षण**मित्यत्रैकशब्देन सत्तामात्रमिति पदगत**मात्र**जर्थं विवृण्वता जायतेऽस्तीत्यादिविकारा व्यावृत्ताः। **सत्तामात्र**मित्युक्ते केनाकारेण सत्तेत्यपेक्षायां—**ज्ञानसत्तैकलक्षणमि**त्युक्तम्। ज्ञानत्वाकारेण सत्तेत्यर्थः। वचसामगोचरत्वे—सत्ताव्याघातपरिहारार्थं, न्यायवैशेषिकोक्तजडस्वरूपताव्युदासार्थं चात्म**संवेद्य**मिति पदस्यार्थमाह—**स्वसंवेद्यमिति।** यद्वा, **अगोचरं वचसा**मित्यन्तैः पदैः कल्पनाविकारराहित्ये, तद्वाचिशब्दागोचरत्वे चोक्ते—भेदकधर्माभावात्कथं स्वव्यावृत्तिग्रहणमिति शङ्कायामाह

मित्युच्यत इति। अनेन न प्रपञ्चापलापः। कथमिदमवगम्यत इति चेत्, तदुच्यते—अस्मिन्प्रकरणे संसारैकभेषजतया योगममिधाय, योगावयवान्प्रत्याहारपर्यन्तांश्चोक्त्वा, धारणसिध्यर्थं शुभाश्रयं वक्तुं परस्य ब्रह्मणो विष्णोः शक्तिशब्दाभिधेयं रूपद्वयं मूर्तामूर्तविभागेन प्रतिपाद्य, तृतीयशक्तिरूपकर्माख्याविद्यावेष्टितमचिद्विशिष्टं क्षेत्रज्ञं मूर्ताख्यविभागं भावनात्रयान्वयादशुभमित्युक्त्वा, द्वितीयस्य कर्माख्याविद्याविरहिणोऽचिद्वियुक्तस्य ज्ञानैकाकारस्यामूर्ताख्यविभागस्य निष्पन्नयोगिध्येयतया योगयुञ्जनसोऽनालम्बनतया स्वतःशुद्धिविरहाच्च—शुभाश्रयत्वं प्रतिषिध्य, परशक्तिरूपमिदममूर्तम्, अपरशक्तिरूपं क्षेत्रज्ञाख्यं मूर्तं च, परशक्तिरूपस्यात्मनः क्षेत्रज्ञतापत्तिहेतुभूततृतीयशक्त्याख्यकर्मरूपाविद्या च, इत्येतच्छक्तित्रयाश्रयं भगवदसाधारणमादित्यवर्णमित्यादिवेदान्तसिद्धं मूर्तरूपं

—आत्मसंवेद्यमिति। प्रत्यक्त्वेन भासमानत्वं स्वव्यावर्तकम्; अन्ये हीदन्तया भासन्त इत्यर्थः। ज्ञानपदं धर्मधर्मिनोरविशेषेणाऽऽह लमाह। धर्मभूतज्ञानस्य बृहत्तया परिशुद्धात्मस्वरूपस्य ब्रह्मशब्दवाच्यत्वं—'ब्रह्मणो हि प्रतिष्ठाह'मित्यादिष्वेवोपपद्यते। योगयुक् प्रक्रान्तयोगः। एवं प्रकारममलमिति वचनेन परमात्मनि मुक्तस्वभावस्यातिदिष्टत्वेन—मुक्तस्य परमात्ममाम्यप्रतिपत्तेः, परमात्मनश्च अपक्षयविनाशाभ्यां रूपवर्णादिनिर्देशैलादिवचनैः कतिपयभेदराहित्यस्य, षड्भावविकारराहित्यस्य च स्पष्टत्वात्तदानुगुण्येनानतिविस्तर श्लोको व्याख्यातः। अस्य श्लोकस्य मुक्तात्मविषयत्वं, तस्य च प्रक्रान्तयोगस्यागोचरत्वं च कथं ज्ञायत इत्यमिप्रायेणाह—कथमिदमिति। प्रकरणादेवावगम्यत इति परिहरति—तदुच्यत इत्यादिना। अस्मिन् प्रकरणे नत्वयं मुक्तकश्लोकः, अपि तु प्रबन्धस्थः, अतः 'पूर्वापरपरामृष्टः शब्दोऽन्यां कुरुते गति'मिति तत्परिहाराय पूर्वापरपरामर्शेनैवार्थो वर्णनीय इति भावः। संसारैकमेषजतया योगममिधायेति। एकशब्देन 'क्लेशानां न क्षयकरं योगादन्यत्र विद्यत' इत्यस्यार्थोऽमिप्रेतः। वाक्यार्थज्ञानमात्रस्यापवर्गोपायत्वनिरासश्च स्फोरितिः। योगावयवान् प्रत्याहारपर्यन्तानिति। 'प्राणायामेन पवने प्रत्याहारेण चेन्द्रिये। वशीकृते ततः कुर्यात्स्थितं चेतः शुभाश्रय' इत्यादिवचनार्थः संक्षिप्तः। परस्य ब्रह्मणो विष्णोः शक्तिशब्दाभिधेयमिति। 'विष्णुशक्तिः परा प्रोक्ते'त्यत्र विष्णुरेव शक्तिर्ब्रह्मण इति केचिद्वदन्ति, तन्व्यावृत्तये विष्णोरिति व्यासः कृतः। परस्य ब्रह्मणः शक्तिः 'परमब्रह्मभूतस्य वासुदेवस्य, ततः स वासुदेवेति, तद्ब्रह्म परमं नित्यं, परमात्मा च सर्वेषां, विष्णुनामा स वेदेषु वेदान्तेषु च गीयते, परब्रह्मस्वरूपस्य विष्णोः शक्तिसमन्वितं, शक्तिः साऽपि तथा विष्णो'रित्यादिभिर्विष्णोरेव परब्रह्मत्वं, जगतस्तच्छक्तित्वं, तच्छक्तिनियाम्यत्वं चोक्तमिति—तत्प्रतिपादकतत्तद्वचनविरोधात्तदयुक्तमित्यमिप्रायः। शक्तिशब्दाभिधेयम् अपृथक्सिद्धविशेषणं हि शक्तिः, ब्रह्म च न कस्यचिद्विशेषणम्, अतो विष्णोरेव शक्तिः, स हि ब्रह्मशब्दवाच्य इत्यमिप्रायः। अत्र 'नारायणः परं ब्रह्म, विष्णुस्तदासीत्, हरिरेव निष्कलः, पतिं विश्वस्यात्मेश्वरं, न तस्येशे कश्चन, न तत्समश्चाभ्यधिकश्च दृश्यते, यस्मात्परं नापरमस्ति किंचित्, न तत्समोऽस्त्यभ्यधिकः कुतोन्यो लोकत्रय' इत्यादिश्रुतिस्मृतयोऽनुसंधेयाः। शक्तित्रयाश्रयो दिव्यविग्रह उपास्यत्वेनोच्यते, विष्णुरेव शक्तिश्चेत् कथं विष्णोर्विग्रहैकदेशो विष्णोरेवाश्रयः, तदाश्रयभूतो विग्रहः नहि ब्रह्मणोऽतीतीदं च दूषणं फलितम्। शक्तिशब्दाभिधेयं रूपद्वयमिति। परापरसंज्ञस्यास्य रूपद्वयस्योत्तरत्र परापरशब्दसमानाधिकरणशक्तिशब्देन परामर्शात्परसंज्ञरूपगोचरः शक्तिशब्दो न परमात्मविषय इत्यमिप्रायः। 'तच्च विष्णोः परं रूपं, विष्णुशक्तिः परा प्रोक्ते'ति श्रुत्यते। भूप मूर्ते चेत्यादिवचनार्थमिप्रेत्याह—मूर्तामूर्तविभागेनेति। 'अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यत' इत्यस्यार्थमाह—तृतीयेति। तृतीयेति मूर्तामूर्तविभागेनेत्युक्तत्वात्—मूर्ताख्यविभागमिति विभज्य निर्देशः कृतः। निष्पन्नयोगिध्येयतयेति न विध्यर्थं कृत्यप्रत्ययः, अपितु शक्त्यलाभिप्रायः। योगिध्येयं परं पदमित्यत्रापि स एवार्थः। निष्पन्नयोगिध्येयतया प्रक्रान्तयोगस्य ध्यानुमशक्यत्वं फलितम्। स्वतःशुद्धिविरहादिति। अत्र न क्षुद्रेरस्याभाविकत्वमुच्यते, अपि त्वौपाधिकदोषनिरासे स्वयमशक्तत्वेन—भगवत्प्रसादसापेक्षत्वं विवक्षितम्। शुभाश्रयत्वं प्रतिषिध्येति। स्वतःशुद्धिविरहादित्यनेन शुभत्वं प्रतिषिद्धम्, अनालम्बनतयेत्यनेनाश्रयत्वं प्रतिषिद्धमिति शुभाश्रयत्वप्रतिषेधः। शुभत्वं हेयविरोधित्वं, न तु हेयराहित्यमात्रं;—'चिन्त्यमात्मविशुद्ध्यर्थं सर्वक्लिल्विषनाशन' मित्युक्तत्वात्। शक्तित्रयाश्रयत्वकथनाय शक्तित्रयमनुवदति—परेति। अत्र समस्ताः शक्तयश्चैता इति वचनार्थो विवक्षितः। एताः शक्तय इति बहुवचने सत्यपि समस्तपदं बहुव्यक्तिक्रोडीकारार्थम्। परशक्तिरेव परमात्मनो रूपमिति—परशक्तिरूपं, परशक्त्यात्मकं वा। एवमुत्तरत्रापि भगवदसाधारणमिति चतुर्मुखादिशरीरव्यावृत्तिः; भगवदधिष्ठितत्वेऽपि तत्तच्छरीरविशेषाभिमानविषयत्वात्तेषां शरीराणाम्। श्रुतिमूलतां दर्शयति—आदित्येति। मूर्तरूपमित्यनेन 'मूर्तं भगवतो

१ शुभाश्रयम् का. मु. पु.।

शुभाश्रय इत्युक्तम् । अत्र परिशुद्धात्मस्वरूपस्य शुभाश्रयतानर्हतां वक्तुं **प्रत्यस्तमितभेदं** यदित्याद्युच्यते । तथाहि—'**न तद्योगयुजा शक्यं नृप चिन्तयितुं यतः । द्वितीयं विष्णुसंज्ञस्य योगिध्येयं परं पदम् ॥**' (वि. पु. ६।७।५५), '**समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः । तद्ब्रह्मस्वरूपवैरूप्यं रूपमन्यद्धरेर्महत् ॥**' (वि. पु. ६।७।६९) इति च वदति । तथा चतुर्मुखसनकादीनां जगदन्तर्वर्तिनामविद्यावेष्टितत्वेन शुभाश्रयानर्हतामुक्त्वा, बद्धानामेव पश्चाद्योगेनोद्भूतबोधानां, स्वस्वरूपमापन्नानां च स्वतःशुद्धिविरहात्–भगवता शौनकेन शुभाश्रयता निषिद्धा—'**आब्रह्मस्तम्बपर्यन्ता जगदन्तर्व्यवस्थिताः । प्राणिनः कर्मजनितसंसारवशवर्तिनः ॥ यतस्ततो न ते ध्याने ध्यानिनामुपकारकाः । अविद्यान्तर्गताः सर्वे ते हि संसारगोचराः ॥ पश्चादुद्भूतबोधाश्च ध्याने नैवोपकारकाः । नैसर्गिको न वै बोधस्तेषामप्यन्यतो यतः ॥ तस्मात्तदमलं ब्रह्म निसर्गादेव बोधवत् ।**' (श्रीविष्णुधर्मे) इत्यादिना परस्य ब्रह्मणो विष्णोः स्वरूपं स्वासाधारणमेव शुभाश्रय इत्युक्तम् । अतोऽत्र न भेदापलापः प्रतीयते । **ज्ञानस्वरूपमित्यत्रापि** ज्ञानव्यतिरिक्तस्यार्थजातस्य कृत्स्नस्य न मिथ्यात्वं प्रतिपाद्यते; ज्ञानस्वरूपस्यात्मनो देवमनुष्याद्यर्थाकारेणावभासो भ्रान्तिरित्येतावन्मात्रवचनात् । न हि शुक्तिकाया रजततयावभासो भ्रान्तिरित्युक्ते जगति कृत्स्नं रजतजातं मिथ्या भवति । जगद्ब्रह्मणोः सामानाधिकरण्येनैक्यप्रतीतेर्ब्रह्मणो ज्ञानस्वरूपस्यार्थाकारता भ्रान्तिरित्युक्ते सत्यर्थजातस्य कृत्स्नस्य मिथ्यात्वमुक्तं स्यादिति चेत्, तदसत्; अस्मिञ्छास्त्रे परस्य ब्रह्मणो विष्णोर्निरस्ताज्ञानादिनिखिलदोषगन्धस्य समस्तकल्याणगुणात्मकस्य

रूपे' इति वचनार्थं उक्तः । उक्तेष्वर्थेष्वयं श्लोकः किंविषय इत्यत्राह—**अत्रेति** । शुभाश्रयताऽनर्हत्वकथनार्थमुच्यते चेत्, अन्यत्रास्यानर्हत्वकथनं, वस्त्वन्तरस्य तदर्हत्वकथनं च द्रष्टव्यमित्यत्राह—**तथा हीति** । अस्मिन्नर्थद्वये वचनद्वयमुपादत्ते—**न तदिति** । **योगयुजा** प्रक्रान्तयोगेन । अनालम्बनत्वमनेन ग्रन्थेनोक्तम् । स्वतःशुद्धिविरहश्च प्रकरणसिद्ध इत्यभिप्रेतः; 'अन्ये तु पुरुषव्याघ्र चेतसो ये व्यपाश्रयाः । अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः' इत्यादिना भगवद्विग्रहव्यतिरिक्तानां हि शुद्धिविरह उक्तः । अन्यस्य रूपस्यार्हताकथनं चास्य रूपस्यानर्हत्वविवक्षासूचकमिति **च**शब्दार्थः । **अन्ये त्विति** ग्रन्थेन कर्मसंबन्धलक्षणाशुद्धिकथनात्–कर्मसंबन्धविनिर्मुक्तानामपि स्वतःशुद्धिविरहः सूचितः । तेषामपि शुभाश्रयपदस्थ-**शुभ**शब्देन व्यवच्छेद्यत्वं स्पष्टयितुमाह—**तथेति** । पश्चादुद्भूतबोधाश्चेत्येतद्व्याख्यानं **स्वस्वरूपापन्नाना**मिति पदेन । **आब्रह्मस्तम्बपर्यन्ता** इत्यत्राऽभिविधौ; स्तम्बसमभिव्याहारात् । स्तम्बो हि कर्मवश्यः; 'पुमान्न देव' इत्यारभ्य 'भूपैते कर्मयोनय' इत्युक्तेः । **तेषामप्यन्यतो यत** इत्येवमन्तस्य ग्रन्थस्यार्थः पूर्वमुक्तः, अथ **तस्मात्तदमलं ब्रह्मे**त्यादेरर्थमाह—**परस्येति** । **स्वासाधारण**मित्यस्य पूर्ववदर्थः । **प्रत्यस्तमिते**त्यादिश्लोकस्य भेदनिषेधपरत्वाभावं निगमयति—**अत इति** । अथ—**ज्ञानस्वरूप**मित्यादिश्लोकस्य भेदमिथ्यात्वपरत्वाभावमाह—**ज्ञानस्वरूपमितीति** । **अपि**ः समुच्चये । कृत्स्नमिथ्यात्वप्रतिपादनाभावमुपपादयति—**ज्ञानेति** । ज्ञानस्वरूपस्यार्थाकारतयाऽवभासे भ्रमे सति—अर्थाकारस्य तथात्वेनावभासो न भ्रमो भवतीत्यर्थः । तमेव दृष्टान्तेनोपपादयति—**नहीति** । दृष्टान्ताद्वैषम्यमुखेन चोद्यं शङ्कते—**जगद्ब्रह्मणोरिति** । तत्र हि सर्वं रजतजातं न शुक्तिकाशकलेन समानाधिकरणं दृष्टम्, अपि तु व्यधिकरणत्वेन प्रमाणप्रतिपन्नम्, अतो न कृत्स्नस्य रजतजातस्य शुक्तित्वेन विरोधः, अपि तु समानाधिकरणरजतस्यैव विरोधः, तत्र विरोधात् समानाधिकृतरजतस्य मिथ्यात्वम्, अविरुद्धस्यासमानाधिकृतरजतस्यामिथ्यात्वं च, अत्र तु ब्रह्मव्यतिरिक्तं कृत्स्नं ब्रह्मसमानाधिकरणं प्रतीयते, अतो ज्ञानाकारस्य, अर्थाकारस्य च विरोधे—कृत्स्नस्यार्थजातस्य मिथ्यात्वं फलितमिति । एतत्परिहरति—**तदसदिति** । तत्र प्रथमं परोक्तार्थस्य प्रबन्धवाक्यार्थस्य विरोधमाह—**अस्मिन्निति** । ब्रह्मणोऽविद्यान्वयः, जगतो मिथ्यात्वं चात्र विरुद्धम् । 'समस्तहेयरहितं विष्ण्वाख्यं परमं पदं, ततः स वासुदेवेति, तद् ब्रह्म परमं नित्यं, हेयाभावाच्च निर्मलम्, तानि सर्वाणि तद्वपुः, विभूतयो हरेरेता' इत्यादिवचनादित्यर्थः । **भ्रान्तिदर्शनतः स्थितं—विष्णुं ग्रसिष्णु**मिति विष्णोः सगुणस्य भ्रमाश्रयत्वमुच्यते अतस्तद्युक्तं; परंब्रह्म हि **निर्दोष**मिति शङ्काव्यावृत्त्यर्थं **परस्य ब्रह्मणो विष्णो**रित्युक्तम्। **निरस्ताज्ञानादिनिखिलदोषगन्धस्य, समस्तकल्याणगुणात्मकस्ये**त्याभ्यां पदाभ्यामविद्यान्वयानु-

---

१ एतदनन्तरम्—अथ ज्ञानस्वरूपमित्यादिश्लोकस्य भेदनिषेधपरत्वाभावान्निगमयति **अत इति** इत्यधिकं का. मु. पु. ।

महाविभूतेः प्रतिपन्नतया तस्य भ्रान्तिदर्शनासंभवात्। सामानाधिकरण्येनैक्यप्रतिपादनं च बाधासहम्, अविरुद्धं च—इत्येतदनन्तरमेवोपपादयिष्यते। अतोयमपि श्लोको नार्थस्वरूपस्य बाधकः। तथाहि—**'यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्म।'** (तै. ३।१।१) इति जगज्जन्मादिकारणं ब्रह्मेत्यवसिते सति—**'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति॥'** इति शास्त्रेणास्यार्थस्येतिहासपुराणाभ्यामुपबृंहणं कार्यमिति ज्ञायते। उपबृंहणं नाम—विदितसकलवेदतदर्थानां स्वयोगमहिमसाक्षात्कृतवेदतत्त्वार्थानां वाक्यैः स्वावगतवेदवाक्यार्थव्यक्तीकरणम्। सकलशास्त्रानुगतस्य वाक्यार्थस्यात्पभागश्र-

---

पपत्तिरुक्ता: **अविद्यासंबन्धे** सति निरस्तसमस्तहेयत्वं, समस्तकल्याणगुणात्मकत्वमपि ह्यनुपपन्नं स्यात्। **महाविभूतेरिति** जगन्मिथ्यात्वानुपपत्तिरुक्ता। जगतो भगवद्विभूतित्वं हि न प्रमाणान्तरसिद्धं येन निषेधार्थमनुवादः स्यात्, अतो विधीयत एव, विधिस्तु न भ्रमं जनयति; तथा सति निषेधवचनस्यापि सतो भेदस्यासत्त्वविषयबुद्धिरूपभ्रमपरत्वस्यानिवार्यत्वात्। प्रामाण्यं हि वाक्यद्वयस्य समानं, तस्माद्विहिनोऽर्थः परमार्थ एवेति न जगन्मिथ्यात्वमित्यर्थः। सामानाधिकरण्येनैक्यप्रतीतौ सत्यां-ज्ञानाकारार्थाकारयोर्विरोधादन्यतरमिथ्यात्वं स्यात्, यथा—शुक्तिरेव रजतमित्यत्रेति शङ्कायामाह—**सामानाधिकरण्येनेति। बाधासहं** न केवलमाकारद्वयेऽन्यतरबाधनिरपेक्षमपि सामानाधिकरण्यं संभवतीति, किंतु बाधं न सहते; आकारद्वयासिद्धौ सामानाधिकरण्यलक्षणासिद्धेरित्यर्थः। तर्ह्यैकस्मिन्वस्तुन्याकारद्वयविरोधः कथं परिहियतेत्यत्राह—**अविरुद्धं चेतीति।** आकारद्वयाङ्गीकारेऽप्यैक्यप्रतिपादनमविरुद्धं; सद्वारकत्वादिति भावः। **अनन्तरमेव,** न त्वधिकरणान्तर इत्यर्थः। प्रथमश्चशब्दः शङ्कानिवृत्तिपरः। द्वितीयः समुच्चयपरः। मिथ्यात्वपरत्वाभावं निगमयति—**अतोऽयमिति।**

एवं **ज्ञानस्वरूपमिति** श्लोकस्य प्रपञ्चमिथ्यात्वपरत्वमनुपपत्त्युद्घाटनेन निरस्तम्, अथ श्लोकं स्वपक्षे व्याख्यातुमुपक्रमते—**तथा हीति।** अत्र किमर्थं प्रश्नश्लोकव्याख्यानम्, उच्यते—**ज्ञानस्वरूपमिति** श्लोके द्वितीयान्तपदानां विशेष्यो विष्णुरिति न प्रतीयते, तेषां **प्रणम्येति** पदेनान्वयश्च न ज्ञायते, श्लोकस्य विशिष्टार्थपरत्वं च प्रकरणस्थ विशिष्टपरत्वेन विना नावगम्यते, अतो नमस्कारश्लोका व्याख्यातव्याः, तेषु व्याख्यातव्येषु द्वितीयाध्यायारम्भे नमस्कारकरणं किं निबन्धनं, प्रथमत एव हि कर्तव्यमिति—शङ्का जायते; शास्त्रस्य प्रश्नप्रतिवचनरूपेणावतीर्णत्वात्—प्रथमं प्रश्नानां सङ्क्षेपेण प्रतिवचनं कृत्वा विस्तरविवक्षायां द्वितीयाध्यायारम्भे नमस्कारः कृतः; अन्यथा प्रश्नानन्तरमेव च नमस्यायां क्रियमाणायाम्—असत्प्रश्नस्य किमुच्यते—इति शिष्यबुद्धेर्व्याकुलता स्यादिति—पूर्वोक्तशङ्कानिरासमुखेन नमस्कारश्लोकसङ्गतिप्रदर्शनार्थं प्रश्नश्लोका व्याख्यातः। **ज्ञानस्वरूपम्** इत्यस्मिन्नुपक्रमग्रन्थे निर्विशेषवस्तुव्यतिरिक्तस्य भ्रान्तिसिद्धत्वदर्शनात्—तदनुगुण एवार्थ उत्तरत्र वर्णनीय इति शङ्कापरिहाराय, उपक्रमोपक्रमभूतैः प्रश्नोत्तरवरलाभश्लोकैः शास्त्रप्रतिपाद्यः सविभूतिकदेवतावतारविशेषः, न तु ज्ञप्तिमात्रमिति—शास्त्रतात्पर्यज्ञापनार्थं च प्रश्नश्लोकव्याख्यानम्। व्याचिख्यासितश्लोकोक्तभ्रान्त्यन्वयस्य सद्वारकत्वसिद्धये—सामानाधिकरण्यं शरीरशरीरिभावनिबन्धनमिति **यन्मयमिति मयट्**प्रत्ययेन ज्ञापनार्थं च प्रश्नश्लोका व्याख्यायन्ते। तत्र—किमयं श्रुतवेदान्तप्रश्नः, उताश्रुतवेदान्तप्रश्न—इति विकल्पे—अश्रुतवेदान्तस्य विशेषप्रश्नानुपपत्तिः, श्रुतवेदान्तस्य श्रोतव्याभावात् प्रश्नानुपपत्तिरिति—शङ्कायां श्रुतवेदान्तस्य प्रश्न इत्याह—**यतो वा इमानीत्यादिना। अवसिते सतीत्यनेन** ब्रह्ममीमांसाश्रवणं कृतमित्युक्तम्। श्रुतवेदान्तस्य कथं प्रश्नोपपत्तिरिति—शङ्कायां श्रुतवेदान्तस्येतिहासपुराणश्रवणविधिं दर्शयति—**इतिहासेति। इतिहासे**त्यादिश्लोके वेदशब्दो वेदान्तपरः, वेदोपबृंहणभूतेषु धर्मशास्त्रेतिहासपुराणेषु धर्मशास्त्राणि पूर्वभागोपबृंहणानि, इतिहासपुराणान्युपरितनभागोपबृंहणपराणीति हि विभागः, स च स्मृत्यधिकरणे व्यक्तीभविष्यति। तत्र धर्मशास्त्रेषु ब्रह्मप्रतिपादनं—कर्मणां तदाराधनरूपत्वज्ञापनार्थम्। इतिहासपुराणेषु कर्मप्रतिपादनं कर्मणां ब्रह्मोपासनाङ्गत्वज्ञापनार्थम्। **इतिहासस्य पुराणेभ्योऽभ्यर्हितत्वं विशेषः:** 'अल्पाच्तर'मिति पुराणशब्दस्य पूर्वनिपाते प्राप्ते, 'अभ्यर्हितं पूर्वं प्रयोक्तव्य'मिति पूर्वनिपातितस्येतिहासस्याभ्यर्हितत्वप्रतीतेः। अस्य श्लोकस्य प्रथमार्धं व्याचष्टे—**उपबृंहणं नामेति।** पदान्तरविशेषणद्वयेनागमोत्थं, विवेकजं च ज्ञानमस्तीत्युक्तम्। **तत्त्वार्थानामिति** बहुवचनं कपिलमतादपीतिहासादीनां प्राबल्यद्योतनार्थम्। **व्यक्तीकरणमज्ञातविशेषैः** सह स्वावगतार्थनिष्कर्षः। यथा—वेदेन कर्तव्यतया विहितस्य संध्योपासनादेः शरीरशुद्धिप्रकारदन्तधावनस्नानादिविशेषैः सह निष्कर्षः, एवम्—उपनिषद्भागेऽप्यर्थनिष्कर्षः संपाद्यः। उपनिषदर्थनिष्कर्षो ब्रह्मविचारसिद्ध इति—नोपबृंहणापेक्षेति शङ्कायामुत्तरार्धं व्याचष्टे—**सकलेति।** पूर्वार्धविहितोपबृंहणकार्यतोपपादकमुत्तरार्धम्। **उपबृंहणं नाम**—अनधीतशास्त्रान्तरार्थैः सहाधीतशास्त्रार्थनिष्कर्षः, अतो नोपबृंहणविचारनैरपेक्ष्यमित्यर्थः॥

ननु—यथा आपातप्रतीत्या फलवदर्थावगमात्–कर्मविचारे, तदनन्तरं ब्रह्मविचारे च रागतः प्रवृत्तिः, तथा अधीयमानशाखान्तर्गतेन 'अनन्ता वै वेदा' इति वाक्येन वेदानामानन्त्यावगमादधीनशाखानवगतानां तदविरुद्धानां, विरुद्धनां चार्थानां संभवात्, 'स्मृतेश्च, अपि स्मर्यते' इत्यादिसूत्रेषु वेदान्तार्थनिर्णयस्योपबृंहणसापेक्षत्वदर्शनाच्च–उपबृंहणसापेक्षत्वश्रवणे रागतः प्रवृत्तिरुपपद्यते, तत्र पूर्वभागोपबृंहणेषु धर्मशास्त्रेषु श्रुतेषूपनिषद्भागोपबृंहणरूपेतिहासपुराणेष्वपि रागात्प्रवृत्तिरिति—विधिवैयर्थ्यम्; अप्राप्ते हि शास्त्रस्यार्थवत्त्वम्। नच—गुरोरेव श्रोतव्यमिति नियमविधिः; अस्मिन्वचने तद्वाच्यिशब्दाभावात्। इतिहासपुराणयोः श्रवणप्रवृत्तस्य एतद्वचनार्थज्ञानं, तस्मादितिहासपुराणश्रवणे प्रवृत्तिः–इत्यन्योन्याश्रयश्च। अत **उपबृंहयेदिति** विधिरनुपपन्न इति, सत्यं, भारतादिप्रबन्धविशेषश्रवणाय–तन्मध्यगतेनानेन वचनेन न्यायसिद्धं सामान्यत उपबृंहणस्यापेक्षितत्वम् अनूद्यते। **उपबृंहणं कार्यमिति ज्ञायत** इत्यस्यायमर्थः—न्यायसिद्धमुपबृंहणस्य करणीयत्वमनेनापि वचनेन ज्ञायत इति। **उपबृंहणंनामे**त्यादिभाष्येण न्यायप्राप्तिरेव प्रदर्श्यते। यद्वा, समन्वय–विरोधपरिहार-लक्षणाभ्यामेव तत्त्वस्थितेर्निश्चितत्वात्, वस्तुनि विरुद्धाकारासंभवात्, अधीयमानश्रुतिनिर्णीतविरुद्धार्थप्रतिपादकप्रदेशान्तरसंभवे वेदस्य भ्रान्तजल्पितायमानत्वप्रसङ्गाच्च—निर्णीततत्त्वविरुद्धार्थप्रतिपादकप्रदेशासंभवात्, ब्रह्मण्यनवगतगुणविभूतिविशेषसद्भावेऽप्युपबृंहणसहस्रैरपि तदियत्ताप्रतिपादनायोगात्, अवगतकतिपयगुणविशेषोपासनेष्वन्यतमेनैव पुरुषार्थसिद्ध्युपपत्तेश्च–उपबृंहणश्रवणनिरपेक्षं प्रत्**युपबृंहये**दिति विधानं युज्यते। ननु—एवं तर्हि न्यायानुगृहीतवाक्यावगतेष्वर्थेषूपबृंहणनिष्काष्टव्याभावात्–निष्काष्टव्यांशस्य सूत्रोदाहृतवचनैरेव निष्कृष्टत्वाच्चोपबृंहणविधिरदृष्टार्थः स्यात्। नच—दृष्टे संभवत्यदृष्टकल्पनं न्याय्यम्। दृष्टार्थत्वं च वचनं दर्शयति—**मामयं प्रतरिष्यतीति**। वेदस्य **प्रतारणं** नाम तदभिप्रेतविपरीतार्थवर्णनमेव, अतस्तन्निवृत्तिरूपं दृष्टफलं वाचनिकं तस्मिन् सत्यदृष्टकल्पनमयुक्तम्। तर्हि, तदेव दृष्टं फलमिति चेत्, तदप्ययुक्तं; तत्त्वविपर्यासप्रतिपादनासंभवस्य त्वयैवोक्तत्वात्, साकल्येन ब्रह्मगुणविभूत्यनवगमस्य, समस्तदवान्तरविशेषानवगमस्य च वेदप्रतारणरूपत्वाभावेन तन्निवृत्तेः फलत्वायोगाच्च। उच्यते—यद्यपि परतत्त्वतदुपासनप्रतिपादनेषु विपर्यासासंभवः, तथापि 'किं ते कृण्वन्ति कीकटेषु गावो नाशिरं दुहे न तपन्ति घर्मम्। आ नो भर प्रमगन्दस्य वेदो नैचाशाखं मघवन्त्रन्धया न' इत्यादिवाक्यप्रतिपन्नप्रमगन्दादिवृत्तान्तस्येव परमात्मसृज्यसुरनरतिर्यगादिविशेष–तदुत्पत्ति–तद्वृत्तविशेषाणां श्रुतिसामान्यप्रतीतत्वेन वाक्याविवक्षितत्वं मन्यमानो **अहल्याजारा**दिवाक्यानां पण्डितमानिभिरितरैरुक्तमर्थमिव वेदपूर्वभागोपनिषद्भागगतानां मन्त्रार्थवादानामन्यथार्थत्वं मन्यते चेत्, अश्रुतोपबृंहणतया वेदं प्रतारयत्येवायमिति—तत्परिहारायोपबृंहणविधिरुपपद्यत इति। न चान्योन्याश्रयः; स्वाध्यायविधिवाक्यस्य स्वाध्यायान्तर्भावेऽपि–अध्ययनाद्विध्यवगमः, विध्यवगमादध्ययनम्–इति यथा नान्योन्याश्रयः—तद्वत्। तत्रहि विध्यभिज्ञपुरुषप्रेरणात्, तदनुष्ठानदर्शनाद्वा माणवकप्रवृत्तिः—एवमुपबृंहणविध्यभिज्ञविशिष्टजनवादप्रसिद्ध्यावा, तदभिज्ञस्वगुरुवचनेन वा, तेनोपबृंहणाधिगमप्रवृत्तपुरुषान्तरदर्शनाद्वा—उपबृंहणज्ञानस्य संपाद्यताज्ञानाच्छिष्यस्य प्रश्न उपपद्यते, अत उपबृंहणविधिरुपपन्नः। तत्र स्वगुरोः पराशरस्य सार्वज्ञ्यप्रसिद्धेः, तेनैव सर्वविद्यास्थलेषु स्वस्य कृतशिक्षत्वाच्च–मैत्रेयस्य तत्प्रणीतपुराणश्रवणप्रवृत्त्युपपत्तिः॥

पुराणान्तरेभ्योऽस्य पुराणस्य वैषम्यं वदन् प्रश्नानवतारयति—**तत्रेति**। अस्य तावत्पुराणरत्नस्य प्राच्योदीच्यादिसर्वविद्वज्जनविदितस्य पुराणान्तरेभ्योऽपि प्रसिद्धिप्राचुर्यात्, धर्मशास्त्रे मानवस्येव, व्याकरणेषु पाणिनीयस्येव च, सजातीयप्रबन्धेभ्यः प्रकर्षातिशयो नापह्नोतुं शक्यते। तत एव प्रसिद्धिप्राचुर्यात् कौमोदेरिव नष्टकोशलशङ्का दूरोत्सारिता। अनतिविस्तरत्वाच्च—प्रक्षेपशङ्का नावतरति। अन्यपरोक्तिप्रसिद्धपरिग्रहातिशयं चेदं 'पठय पराशरेदम्' इति। 'अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्तितम्। राजसेषु तु माहात्म्यमधिकं ब्रह्मणो विदुः॥ सात्त्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः। तेष्वेव योगसंसिद्धा गमिष्यन्ति परांगतिम्॥ यस्मिन् कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा। तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते' इति सम्यग्ज्ञाननिष्पादकसत्त्वमूलत्वात्–अन्यथाज्ञान-विपरीतज्ञानहेतुभूतरजस्तमोमूलत्वाभावात्, दुष्टकारणपुराणान्तरसाम्यं न संभावनीयम्। सत्त्वस्य यथार्थज्ञानहेतुत्वं, रजस्तमसोश्च[1] अन्यथाज्ञान-विपरीतज्ञानहेतुत्वम्–'सत्त्वात्संजायते ज्ञानम्, अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी, सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी'तिच वचनात्सिद्धम्। 'सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः। गुरु वरणकमेव तम' इति। 'सर्वास्ता निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृता' इति च प्रसिद्धम्। ननु–चतुर्मुखशिवादिप्रतिपादकपुराणानां रजस्तमोमूलत्वपरवचनस्य रजस्तमोमूलत्वेन प्रामाण्याभावात्–सात्त्विकपुराणप्राबल्यासिद्धिः, अस्य वचनस्य सत्त्वमूलत्वेन प्रमाणं नास्ति, अत एवैतद्वचनमात्रस्याप्रामाण्यं वक्तुं युक्तं, न बहूनां पुराणानां; भूयसां बलीयस्त्वात्, उच्यते—न तावदस्य वचनस्य प्रामाण्ये विमतिर्न्याय्या; बाधकादर्शनात्, स्वतःसिद्धप्रामाण्यस्यानपोदितत्वात्, 'यो ह खलु वा अस्य राजसोंऽशः सोऽसौ ब्रह्मचारिणो योऽयं ब्रह्मा, योह खलु वा अस्य

---

१ रजस्तमसोश्च 'सत्त्वात्संजायते। का. मु. पु.।

सात्त्विकोंऽशः सोऽसौ ब्रह्मचारिणो योऽयं विष्णुः, योह खलु वा अस्य तामसोंऽशः सोऽसौ ब्रह्मचारिणो योऽयं रुद्र' इति, 'महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तक' इति च श्रुत्यानुगुण्येन तत्तद्गुणमयत्वेनावगतस्य तत्तत्तत्त्वस्य तत्तत्कल्पेषु तत्तद्गुणमयेन ब्रह्मणा तेषु तेषु पुराणेषु प्रतिपादितत्वपरस्य वचनस्योपपन्नार्थत्वाच्च । सकलशास्त्रार्थव्यवस्थापके महाभारते च मोक्षधर्मे—'जायमानं हि पुरुषं यं पश्येन्मधुसूदनः । सात्त्विकः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः' इत्यादिना भगवत्कटाक्षेण सत्त्वगुणमूलसम्यग्ज्ञाननिश्चयमुक्त्वा, 'पश्यत्येनं जायमानं ब्रह्मा रुद्रोऽथवा पुनः । रजसा तमसा चास्य मानसं समभिप्लुतमि'ति चतुर्मुखशिवयोः कटाक्षेण रजस्तमोमूलकालुष्यप्रतिपादनाच्च—चतुर्मुखशिवप्रतिपादकप्रबन्धानां रजस्तमोमूलत्वमुपपद्यते । अस्य वचनस्य रजस्तमोमूलपुराणस्थत्वेऽपि नाप्रामाण्यं शङ्कनीयं: ब्रह्मशिवादिप्रतिपादनाभिनिविष्टस्य प्रबन्धस्य भगवत्प्रकर्षोक्त्यावाग्रहसंभवेन—अस्य वचनस्य तत्त्वपरत्वोपपत्तेः । स्वप्रतिपाद्यदेवतायामेव हि वक्तुराग्रहसंभवो न अन्यत्र, तस्मान्नास्य वचनस्य कारणदोषसंभवः । यदुक्तमनेकपुराणाप्रामाण्यादेतद्वचनमात्राप्रामाण्यं युक्तं; भूयसां बलीयस्त्वादिति—तदयुक्तं; साक्षादर्थविरोधाभावात् । नहि विधिशिवप्रतिपादकप्रबन्धानां रजस्तमोमूलत्वं नेति तेषु पुराणेष्ववगम्यते । तत्तत्प्रबन्धेष्वेव प्रमाणतया प्रतिपन्नानां तेषां प्रामाण्यं, रजस्तमोमूलत्वं च विरुद्धमिति परम्परया विरोधः फलितः । तत्र भूयसां बलीयस्त्वमिति चेत्, यदि—केवलमेतद्वचनमात्रविरोधेन तेषामप्रामाण्यं तदा स्यादयं दोषः; पुराणानां परस्परविरोधेन सर्वेषामविशेषेण प्रामाण्येऽनुपपन्ने सर्वाप्रामाण्यादपि कतिपयप्रामाण्यसिद्ध्यनुगुणनिर्वाहे न्याय्ये सति—कस्याप्रामाण्यं, कस्य च प्रामाण्यमित्यपेक्षायां—विषयव्यवस्थामात्रपरत्वादस्य वचनस्य । अतोऽनेन सत्त्वादिमूलत्वे ज्ञापिते सत्यदुष्टमूलैः प्रबन्धैर्दुष्टमूलप्रबन्धबाधः, अतो न भूयसां बलीयस्त्वनयेनैतद्वचनबाधः । भगवत्प्रतिपादकपुराणेभ्यो विधिशिवप्रतिपादकपुराणबाहुल्यात्तत्प्रामाण्यमिति चेत्, इदं तावद्वचनमबाधितम्; इह भूयसां बलीयस्त्वनयानवतारात् । एवं बाधकरहितेनानेन वचनेन सत्त्वादिमूलत्वे पुराणानामवगते सति—दुष्टमूलपुराणबाहुल्यमदुष्टमूलमेकमपि पुराणं न बाधितुं प्रभवति; न हि भ्रान्तपुरुषसहस्रवचनैरेकस्याभ्रान्तस्य वचनं बाध्यते । अतो भगवत्प्रतिपादकत्वेन सत्त्वमूलत्वान्न कारणदोषः । तथा पुराणान्तराणामिवास्य बाधकप्रत्ययो न दृश्यते; नारायणस्यैव परमकारणत्वप्रतिपादनात् । प्रत्यक्षश्रुतिषु हि नारायणस्यैव सामान्यशब्द-विशेषशब्दाभ्यां कारणत्वमुक्त्वा 'न चास्य कश्चिज्जनिता न चाधिपः, न तत्समश्चाभ्यधिकश्च दृश्यते, न ह्येतस्मादिति नेत्यन्यत्परमस्ति, यस्मात्परं नापरमस्ति किंचि'दिति—कारणभूतात्तस्मादन्यस्य परत्वं च निषिध्यते । 'न ब्रह्मा नेशानः, तत्र ब्रह्मा चतुर्मुखोऽजायत, त्र्यक्षः शूलपाणिः पुरुषोऽजायत, ततो जज्ञ उग्रस्त्वेष नृम्णः, विरूपाक्षाय ब्रह्मणः पुत्राय, अजस्य नाभावध्येकमर्पितं, स प्रजापतिरेकः पुष्करपर्णे समभवत्, यन्नाभिपद्मादभवन्महात्मा प्रजापति'रिति ब्रह्मशिवयोश्च नारायणादुत्पत्तिः श्रूयते । लैङ्गे तु ब्रह्मविष्णू प्रति—'युवां प्रमूतौ गात्रेभ्यो मम पूर्वं सनातना' विति रुद्रोक्त्या रुद्राद्धरिश्चतुर्मुखयोरुत्पत्त्यवगमात्पुराणान्तराणां श्रुतिविरोधः स्फुटतरः । यद्यपि कैश्चित्—त्रयाणां देवानां साम्यमैक्यं चाभ्युपगतं, तथापि—अयं विरोधो दुष्परिहरः; तुल्यानामेकीभूतानामपि तेषामुत्पत्तिप्रतिपादने भगवतश्चतुर्मुखशिवयोरुत्पत्तिश्रवणात्, रुद्रादितरयोरुत्पत्तेः क्वचिदपि वाक्ये श्रवणाभावाच्च । कारणवाचिशिवादिशब्दानामाकाशादिशब्दानामिव कार्यतयाऽवगतप्रसिद्धरुद्रादिपरत्वाभावाच्च, 'सर्वे विष्णुमया देवाः सर्वे विष्णुमया गुणाः । न हि विष्णुसमा काचिद्गतिरन्या विधीयते ॥ इत्येवं सततं वेदा गायन्ते नात्र संशय' इति लैङ्गादावपि वेदानां भगवत्परत्वप्रतिपादकत्वाभ्युपगमाच्च । अतो नारायणस्यैव परमकारणत्वपरामिः प्रत्यक्षश्रुतिभिर्बाधकप्रत्ययवन्ध्यः पुराणान्तरेभ्यो वैलक्षण्यं स्फुटम् । तथा नारायणमेव परमकारणं प्रतिपादयद्भिर्मन्वादिधर्मशास्त्रैरप्यैकार्थ्यं स्पष्टम्—'आपो नारा इति प्रोक्ताः, तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते, विद्यात्तु पुरुषं परं, नारायणः परोऽव्यक्ता'दित्यादिभिर्नारायणस्यैव हि कारणत्वं, तेषूच्यते । पुराणान्तराणि तु धर्मशास्त्रविरुद्धानिच । तथा वक्तृवैलक्षण्यं च प्रत्यक्षश्रुतिसिद्धं—'स होवाच व्यासः पाराशर्यं' इति । अत्र पराशरात्मजत्वेन हि व्यासोत्कर्ष उच्यते । तथा लैङ्गेऽपि पराशरवैलक्षण्यं प्रतीयते, यथा तत्र द्वितीयेऽध्याये—'पराशरस्यावतारो व्यासस्य च शुकस्य च । विनाशं राक्षसानां तु कृतं वै शक्तिसूनुने'ति । अत्र **पराशरस्यावतार** इत्युक्तिर्हि प्रकर्षातिशयार्था; अन्यथा 'पराशरस्य चोत्पत्तिर्व्यासस्य च शुकस्य चे'त्यपि हि वक्तुं शक्यते । पुलस्त्यवसिष्ठवरदानलब्धपरदेवतापारमार्थ्यज्ञानवत्त्वं च महद्वैलक्षण्यम् । वरदाने सत्येतत्पुराणप्रामाण्यं, तत्प्रामाण्ये सति तत्प्रतिपन्नवरलाभसत्यत्वम्—इत्यन्योन्याश्रय इति न वाच्यं; वरलाभवचनस्य 'पराशरो न लब्धवर' इति बाधकप्रत्ययाभावेन—स्वतःसिद्धप्रामाण्यस्यानपोदितत्वात् । लैङ्गे च देवतापारमार्थ्यज्ञानलाभः पराशरस्यावगम्यते, यथा तत्र द्वितीयेऽध्याये—'देवतापारमार्थ्यं च विज्ञानं च प्रसादतः । पुराणकरणं चैव पुलस्त्यस्याज्ञया गुरो'रिति । तत्रैव त्रिषष्टितमेऽध्याये—'अथ तस्य पुलस्त्यस्य वसिष्ठस्य च धीमतः । प्रसादाद्विष्णवं चक्रे पुराणं वै पराशर' इति च । तदनन्तरं च—'षट्प्रकारं समस्तार्थसाधकज्ञानसंश्रयम् । दशसाहस्रसंमितं सर्ववेदार्थसंयुत' मित्यनेनास्य पुराणरत्नस्य सर्ववेदार्थसंयुतत्वम्, अत एव समस्तपुरुषार्थसाधकज्ञानप्रसाधकत्वं चोच्यते । अतो वक्तृवैलक्षण्यं, प्रबन्धवैलक्षण्यं च पुराणान्तरसिद्धमिति तदुरपह्नवम् । इदं चापरं महद्वैलक्षण्यं—यत्सामान्यप्रश्नपूर्वकविशेषनिष्ठप्रतिवचनरूपत्वं 'सोऽहमिच्छामि धर्मज्ञ श्रोतुं त्वत्तो यथा जगत् । बभूव भूयश्च यथा महाभाग भविष्यति । यन्मयं च जगद्ब्रह्मन्यतश्चैतच्चराचर' मित्यादिना सामान्येन पृष्टे—'विष्णोः सकाशादुद्भूत'मिति विशेषनिष्ठं प्रतिवचनं

वणाद्दुरवगमत्वेन तेन विना निश्चयायोगादुपबृंहणं हि कार्यमेव। तत्र पुलस्त्यवसिष्ठवरप्रदानलब्धपरदेवतापारमार्थिकज्ञानवतो भगवतः पराशरात्त्वावगतवेदार्थोपबृंहणमिच्छन्मैत्रेयः परिपप्रच्छ—**'सोहमिच्छामि**

ह्यवगम्यते। विशेषे पृष्टे सति प्रतिवचनस्य पृष्टविशेषपक्षपातेन तदुत्कर्षकथनं प्रशंसामात्रपरं, न तत्त्वपरमिति शङ्कनीयं स्यात्, सामान्येन पृष्टे सति प्रतिवचनमर्थवशाद्विशेषे पर्यवसितमिति—तत्त्वपरत्वमेव स्यात्। अतश्च 'तस्माद्भवन्तं पृच्छामः सूत पौराणिकाद्य तु। पुराणसंहितां पुण्यां लिङ्गमाहात्म्यसंयुता'मिति विशेषनिष्टप्रश्नोपक्रमतत्प्रतिवचनरूपपुराणान्तरेभ्यः प्रकर्षातिशयः स्पष्टतमः। एतत्पुराणार्थश्च लैङ्गादिषु क्वचिन् क्वचिदङ्गीक्रियते, यथा लैङ्गे द्वितीये पुराणार्थानुक्रमणे—'सर्वावतेंषु विष्णोश्च जननं लीलयैव तु। विष्णोः प्रसादाज्जिष्णोश्च विष्णोश्चैव तु संभवः॥' तत्र 'लीलया चैव कृष्णेन स्वकुलस्य च संहृतिः। जरकाख्यच्छलेनैव गमनं स्वेच्छयैव तु' इति भगवदवतारस्य, भूलोकपरित्यागस्य च लीलामात्रनिबन्धनत्वं हि तत्रोच्यते। अत एव एतत्पुराणार्थस्यान्यत्राभ्युपगतत्वादप्रकम्प्यत्वमवगम्यते। तच्चैतदैकार्थ्यान्नान्यपि पुराणानि प्रमाणानि स्युरिति—चेन्न; कात्स्न्र्येनाविरुद्धत्वाभावात्, भगवदुत्कर्षप्रतिपादकांशस्तु तस्मिन्नंशे आग्रहासंभवादादरणीय—इति पूर्वमेवोक्तम्। अस्य च पुराणस्य कात्स्न्र्येनानाग्रहमूलत्वं चोपक्रमगतप्रश्नस्वभावादवगतमिति चोक्तम्। अतोऽन्यत्र बद्धाग्रहैरप्यादरणीयस्योक्तार्थत्वमप्रकम्प्यताहेतुः। किंच—पुराणान्तरेष्विवास्य पुराणस्य न स्वव्याहन्तार्थप्रतिपादकत्वं दृश्यते, कात्स्न्र्येन भगवत्प्रकर्षस्यैवावगमात्—पुराणान्तरेषु व्याघातः प्रतीयते, यथा लैङ्गे—'युवां प्रसूतौ गात्रेभ्यो मम पूर्वं सनातनौ। अयं मे दक्षिणे पार्श्वे ब्रह्मा लोकपितामहः। वामपार्श्वे च मे विष्णुर्विश्वात्मा हृदयोद्भवः' इति। तत्र 'ततः प्रहृष्टः सुमनाः प्रणिपत्य महेश्वरम्। प्राह नारायणो देवः सलिङ्गं लिङ्गवर्जितम्॥ यदि प्रीतिः समुत्पन्ना यदि देयो वरश्च नौ। भक्तिर्भवतु नौ नित्यं त्वयि चाव्यभिचारिणी' इति—हरिविरिञ्चयोः शिवादुत्पत्तिस्तदाराधनवरवरणादिकमुक्तम्। तत्र क्वचिन्—'त्वत्कोपसंभवो रुद्रस्तमसा च समावृतः। त्वत्प्रसादाज्जगद्धाता रजसा च पितामह' इति चतुर्मुखशिवयोर्भगवत्प्रसादकोपसंभवत्वमुक्तमिति—स्वव्याघातः। नच वसुदेवादेरुत्पत्तिवत्, कैलासयात्रादिवच्च—रुद्रादुत्पत्तितदाराधनरूपलीलोक्तिरित्यविरोधः; पुराणरत्न—भारतादौ—'मनसैव जगत्सृष्टिं संहारं च करोति यः। तस्यारिपक्षक्षपणे कियानुद्यमविस्तरः॥ तथापि यो मनुष्याणां धर्मस्यदनुवर्तनम्। कुर्वन्बलवता संधिं हीनैर्युद्धं करोत्यसौ॥ साम चापि प्रदानं च तथा भेदप्रदर्शनम्। करोति दण्डपातं च क्वचिदेव पलायनम्॥ मनुष्यदेहिनां चेष्टामित्येवमनुवर्तते। लीला जगत्पतेस्तस्य च्छन्दतः संप्रवर्तते॥ ईशन्नपि महायोगी सर्वस्य जगतः प्रभुः। कर्माण्यारभते कर्तुं कीनाश इव दुर्बलः॥ तेन वध्यते लोकान्मायायोगेन केशवः। ये तमेव प्रपद्यन्ते न ते मुह्यन्ति मानवा' इत्यादिभिरिव तत्र तत्र प्रसक्तापकर्षपरिहारपरग्रन्थादर्शनात्, भारतादिषु दशरथवसुदेवादीनां रामकृष्णाद्यपेक्षया परत्वस्य जगत्कारणत्वादिमुखेन प्रतिपादनाभावात्, इह च भगवदपेक्षया रुद्रपरत्वस्य प्रतिपादनाच्च—अतः स्वव्याघातो दुष्परिहरः। न च तथात्र स्वव्याहतिः प्रतीयत इति—इदं च महद्वैलक्षण्यम्। उक्तलक्षणप्रकर्षवतो वैष्णवपुराणस्य, कारणदोषबाधकप्रत्ययस्वव्याहतिमत्प्रबन्धान्तरस्य च विरोधे सति—पुराणरत्नस्य प्रावल्यम्, अन्येषां दौर्बल्यं च सुस्पष्टम्। एवं प्रसिद्ध्यतिशयलब्धसजातीयप्रबन्धप्रकर्षवत्त्वात्, तत एव नष्टकोशलाभावात्, अनतिविस्तृततया प्रक्षेपशङ्कारहितत्वात्, अन्यपरोक्तिसिद्धपरिग्रहातिशयवत्त्वात्, सामान्यप्रश्नपूर्वकप्रतिवचनरूपत्वेनानाग्रहमूलत्वात्, अत एवेदृशवैलक्षण्यरहितकारणदोषबाधकप्रत्ययस्वव्याहतिमत्प्रबन्धान्तराणामेतद्विरोधे सति—दौर्बल्यस्यावर्जनीयत्वाच्च—श्रीमद्वैष्णवमिदं पुराणं प्रमाणतमम्॥

एतत्सर्वं हेतुजातमभिप्रेत्य प्रधानभूतयुक्तिं कण्ठोक्त्या प्रदर्शयन् तन्मुखेन प्रबन्धवैलक्षण्यं वदन् प्रश्नावतारयति—**तत्रेति। पुलस्त्यवसिष्ठवरप्रदानलब्धपरदेवतापारमार्थ्यज्ञानवत** इत्त्र **देवतापारमार्थ्य**शब्देन तमः कार्यं धर्म्यैन्तरत्वेन धर्म्यैन्तरस्य प्रतीतिरूपं विपरीतज्ञानं व्यावर्तितम्। अनेन **देवतापारमार्थ्यं चे**ति वचनं स्मारितम्। प्रशंसार्थेन मतुपप्रत्ययेन रजःकार्यं प्रकारान्तरोपेतस्य तद्विरुद्धप्रकारान्तरविशिष्टताप्रतीतिरूपमन्यथाज्ञानं व्यावर्तितम्। अनेन **यथाव**दित्यस्यार्थः सूचितो भवति। **देवता**शब्देन कर्मणा, उपासनेन वा आराध्यत्वं, फलप्रदत्वं च विवक्षितम्। अनेन सविशेषत्वसिद्धिः। **यथाव**दिति प्रकारकथनेनापि सविशेषत्वसिद्धिरिति—वरलाभकथनं सविशेषलोपपादकमित्यभिप्रायः। **भगवच्छब्देन** ज्ञानवत्त्वमुक्तम्। वरलाभात्तदतिशयसिद्धिः। **सोऽहमित्यादि। सोऽहं** त्वयैव सर्वविद्यासु **शिक्षितपूर्वो**ऽहमिति भावः। **धर्मज्ञ** विशेषोऽस्ति न सतां शिष्य—पुत्रयोरित्येवंरूपधर्मज्ञ। यद्वा 'आनृशंस्यं परोधर्म' इति धर्मज्ञ। **आनृशंस्य**माश्रितसंरक्षणपरत्वम्; 'आश्रितानवतीत्यानृशंस्यते'ति वचनात्। **महाभाग** परिपूर्णकृत्यं हि परसंरक्षणं, किंचित्कारमप्यनपेक्ष्य रक्षकस्त्वमेवेति भावः। **यथा यतो बभूव** ब्रह्मरुद्रादिषु कः कारणमिति ज्ञातुं यत इति प्रश्नः। किं विवर्ताधिष्ठानत्वं कारणत्वम्, उत परिणामित्वं, तत्रापि—किं सद्वारकपरिणामित्वम्, उतादारकपरिणामित्वमिति प्रकारभेदजिज्ञासया

१ परिणामित्वेवमिति का. मु. पु.।

धर्मज्ञ श्रोतुं त्वत्तो यथा जगत् । बभूव भूयश्च यथा महाभाग भविष्यति ॥ यन्मयं च जगद्ब्रह्मन्यतश्चैतच्चराचरम् । लीनमासीद्यथा यत्र लयमेष्यति यत्र च ॥' (वि. पु. १।१।८–९) इत्यादिना । अत्र ब्रह्मस्वरूपविशेषतद्विभूतिभेदप्रकारतदाराधनस्वरूपफलविशेषाश्च पृष्टाः । ब्रह्मस्वरूपविशेषप्रश्नेषु **यतश्चैतच्चराचरम्**इति निमित्तोपादानयोः पृष्टत्वाद्यन्मयमित्यनेन सृष्टिस्थितिलयकर्मभूतं जगत्किमात्मकमिति पृष्टम् । तस्य चोत्तरं **जगच्च स** इति । इदं च तादात्म्यमन्तर्यामिरूपेणात्मतया व्याप्तिकृतं, न तु व्याप्यव्यापकयोर्वस्त्वैक्यकृतम् ; यन्मयमिति प्रश्नस्योत्तरत्वाज्जगच्च स इति सामानाधिकरण्यस्य । यन्मयमिति मयडत्र न विकारार्थः; पृथक्प्रश्नवैयर्थ्यात् । नापि प्राणमयादिवत्स्वार्थिकः;

यथेति प्रश्नः । कल्पभेदेन सृष्टिवैषम्यशङ्कया भविष्यतीति प्रश्नः; वृश्चिकस्य गोमयवृश्चिकोपादानकलदर्शनात्—कल्पभेदेन उपादानादिभेदशङ्का ह्युपपद्यते । तत्रापि **यतो यथेति** पदयोः पूर्ववदर्थः । **यतो यथा बभूवेति** एकप्रश्नत्वशङ्का । **यन्मयमिति** प्रश्नान्तरव्यवधानेन निरस्यते । यथा–कारणं ज्ञातव्यं, तथा—सृष्टिप्रकारोऽपि पृथग् ज्ञातव्य इति ज्ञापनार्थं—ज्ञातव्यत्वेऽपि प्राधान्यद्योतनाय प्रकारप्रश्नः पूर्वमेव कृतः । **यत** इति हेतौ पञ्चमी, अतो निमित्तोपादानयोस्तत्रेण प्रश्नः । अन्तःस्थित्याद्युपयुक्तात्मशरीरभावप्रश्नः—**यन्मयमिति । मयट्**प्रत्ययः प्राचुर्यार्थः, अनेन व्याप्तिर्दर्शिता । व्याप्याद्व्यापकप्राचुर्यं हि घटाकाशादौ दृष्टम्, आत्मनया हि व्याप्तिः । आत्मत्वं च धारकत्वम् । अतोऽन्तर्यामिकृतसत्तानुवृत्तिलक्षणस्थितिप्रश्नः फलितः । **यन्मयं** येनान्तर्यामिणा धारकेण प्रचुरं जगन्मितस्यर्थ उक्तो भवति । अन्तःप्रविश्य प्रशासनेन धारकत्वं स्थितिहेतुत्वमिति—प्रागेव विशदीकृतम् । **च**कारात् बहिर्भूतपोषकादिकृता पोषणादिलक्षणा स्थितिर्मातापित्रादिभिः कार्या, इष्टप्रापणानिष्टनिवारणलक्षणा स्थितिश्च पृष्टा भवति । **यत** इत्युपादनस्यापि पृष्टत्वात्—**मयट्** प्राचुर्यार्थ एव । नच—गोबलीवर्दन्यायेन **यत** इति पञ्चम्यर्थः संकोचयितव्यः; बलीवर्दशब्दवत् **मयटो**ऽनन्यथासिद्धत्वाभावात्–संकोचकत्वानुपपत्तेः । 'पदान्तरवैयर्थ्यपरिजिहीर्षया पदान्तरार्थसंकोचो गोबलीवर्दनय' इति हि न्यायविदः । अत्रतु **मयटो**ऽर्थान्तरसंभवान्नायं संकोचकः । **यत** इति पदं निमित्तम्, उपादानं च बोधयितुं शक्तम् । स्थितिप्रश्नोऽपेक्षितश्च, अतोऽपेक्षितविधेरनपेक्षितविधानं दुर्बलम् । 'यतो वा इमानी'त्यादि श्रुतावपि **यत** इति पदेनैव निमित्तोपादानयोरुक्तत्वात्, श्रुतिच्छायानुविधानाच्च —**यत** इति तत्रेण प्रश्न इति—**यन्मय**मिति स्थितिप्रश्न एव क्रियते । अर्थान्तरस्वीकारे—अपेक्षितावचनम्, अनपेक्षितवचनं च स्यात् । नापि स्वार्थिकः **मयट्**; प्रत्ययस्यार्थवत्त्वे संभवति तत्परित्यागस्यान्याय्यत्वात्, अतो यथोक्त एवार्थः । **लयस्थानप्रश्नः, लय**कारप्रश्नश्च अनधीतशाखान्तरेषु स्थानभेदप्रकारभेदशङ्कया कृतः । देवतान्तरस्य लयस्थानत्वं, तत्रापि सद्वारकाद्वारकत्वकार्यत्वप्रमनिवृत्तिरूपतास्यप्रकारभेदश्च हि शङ्कास्पदं भवति । भूतभविष्यत्प्रश्नश्च कल्पभेदेन लयस्थानप्रकारभेदशङ्कया कृतः । **च**कारात् लयकर्तृप्रश्नश्च सूचितः, स च कर्तृभेदशङ्कानिबन्धनः । स्वरूपप्रश्नश्लोकद्वयं व्याचिख्यासितश्लोकापेक्षितत्वेनोदाहृत्य **आदि**शब्देन प्रश्नान्तरपरश्लोकाः क्रोडीकृताः । **विष्णोः सकाशा**दिति श्लोकस्यार्थान्तरप्रश्नोत्तररूपत्वशङ्काव्युदासार्थं—तेषां श्लोकानां अर्थ संग्रहेणाह—**अत्रेति । ब्रह्मस्वरूपे**ति **स्वरूप**शब्दो विभूत्यादिव्यावर्तकः । **स्वरूपविशेष**शब्दो ब्रह्मादिव्यावर्तकः । विभूतिभेदानां प्रकारो **विभूतिभेदप्रकारः**, स च ज्योतिश्चक्रभुवनकोशादिप्रश्नेऽन्तर्गतः । वर्णाश्रमधर्मादिप्रश्नेन तदाराधनस्वरूपं पृष्टं; प्रतिवचने फलविशेषोक्तिदर्शनात् । प्रतिवचनप्रकारेण प्रश्नार्थो विज्ञायत इति नीत्या—फलविशेषश्चार्थतः पृष्टो भवतीति पूर्वोक्तेषु प्रश्नेष्वन्तर्भावित इत्यभिप्रायेण—फलविशेषाश्च पृष्टा इत्युक्तम् । सप्रयोजनमाराधनं पृष्टमिति तत्र तदन्तर्भावः । अयमेवार्थः सकलश्रुतीतिहासपुराणानां प्रतिपाद्य इति भावः । ततः किं प्रस्तुतश्लोकार्थस्येत्यपेक्षायां—**यन्मय**मिति पदस्यार्थ सोपपत्तिकमाह—**ब्रह्मस्वरूपेति । सृष्टिस्थितिलयकर्मभूतमिति** पदं सृष्टिप्रलययोरुक्तत्वेन–स्थितिकथनस्यापेक्षितत्वज्ञापनार्थं **स्थितिलय**शब्दाभ्यां रक्षासंहारौ विवक्षितौ । स्थितिलययोः प्रयोज्यव्यापारत्वेन तदाश्रयत्वेन तत्कर्मत्वाभावात् जगतः—सृष्टिस्थितिलयकर्मभूतं जगत्स्थित्यर्थं किमात्मकं भवतीति प्रश्नार्थः । ततः किमित्यत्राह—**तस्य चेति । जगच्च स** इति सामानाधिकरण्यप्रतिपन्नं तादात्म्यं स्वरूपैक्यलक्षणमाशङ्क्य परिहरति—**इदं चेति । इदं** सामानाधिकरण्यप्रतिपन्नमित्यर्थः । गगनादौ व्याप्तिमात्रेण तादात्म्यं न दृष्टमिति—तद्व्यावृत्त्यर्थम् आत्मत्वं विवृणोति—**अन्तर्यामिरूपेणेति** । अन्तःप्रविश्य नियन्तृत्वं ह्यात्मत्वम् । **व्याप्यव्यापकयोरिति** जगद्ब्रह्मणोर्व्याप्यत्वेन, व्यापकत्वेन च श्रुतिसिद्धत्वादिति भावः । ननु वस्त्वैक्यकृतमिति प्रतिज्ञामुपपादयति—**यन्मयमिति । विकारार्थत्व**माशङ्क्य परिहरति—**यन्मयमिति मयडिति** । कुत इत्यत्राह—**पृथगिति** । विकारार्थत्वे उपादानं पृष्टं स्यात् । **नच तत्रापि; यत** इतिपञ्चम्यन्तपदेन उपादानस्यापि पृष्टत्वात्, अतः पृथक्प्रश्नवैयर्थ्यम् । नच गोबलीवर्दन्यायः; **अर्थान्तरसंभवा**दिति—**अपेक्षितविधेरनपेक्षितविधानं दुर्बलमिति** न्यायश्चाभिप्रेतः । ब्रह्माज्ञानवादिनोऽभिमतं स्वार्थि-

जगच्च स इत्युत्तरानुपपत्तेः। तदा हि विष्णुरेवेत्युत्तरमभविष्यत्। अतः प्राचुर्यार्थ एव **'तत्प्रकृतवचने मयट्'** (पा. सू. ५।४।२१) इति मयट्। कृत्स्नं च जगत्तच्छरीरतया तत्प्रचुरमेव। तस्माद्यन्मयमित्यस्य प्रतिवचनं **जगच्च स** इति सामानाधिकरण्यं जगद्ब्रह्मणोः शरीरात्मभावनिबन्धनमिति निश्चीयते। अन्यथा निर्विशेषवस्तुप्रतिपादनपरे शास्त्रेऽभ्युपगम्यमाने–सर्वाण्येतानि प्रश्नप्रतिवचनानि न संगच्छन्ते। तद्विवरणरूपं कृत्स्नं च शास्त्रं न संगच्छते। तथाहि सति—प्रपञ्चभ्रमस्य किमधिष्ठानमित्येवंरूपस्यैकस्य प्रश्नस्य निर्विशेषज्ञानमात्रमित्येवंरूपमेवोत्तरं स्यात्। जगद्ब्रह्मणोरेकद्रव्यत्वपरे च सामानाधिकरण्ये–सत्यसंकल्पत्वादिकल्याणगुणैकतानता, निखिलहेयप्रत्यनीकता च बाध्यते, सर्वाशुभास्पदं च ब्रह्म भवेत्। आत्मशरीरभाव एवेदं सामानाधिकरण्यं मुख्यवृत्तमिति स्थाप्यते। अतः—**'विष्णोः**

कल्पक्षं दूषयति—**नापीति**। ननु भेदाभेदपक्षाभ्युपगतं, तत्तु दूषयिष्यते। न च्यर्थं संभवति निरर्थकत्वाश्रयणमुपपन्नमिति भावः। श्रुतार्थस्वीकारेणाश्रुतकल्पनं ह्युचितं, न तु श्रुतपरित्यागः। ब्रह्माज्ञानवादिनाभ्युपगतस्य स्वार्थिकत्वस्यासाधारणं दूषणमाह—**जगदिति**। स्वार्थिकत्वपक्षे **यदिदं जगत्तत्किमि**त्युक्तं स्यात्, यदिदं जगत्तत्किमित्युक्ते–ज्ञातस्य जगद्रूपमात्रस्य प्रष्टव्यत्वायोगात् प्रश्नावैयर्थ्याय जगत्किं सत्यम्, उत मिथ्येति पृष्टं भवतीत्यभ्युपेतव्यं, तत्र मिथ्येत्युत्तरं वक्तव्यं, तत्रान्यतराकारोपस्थापके, आकारान्तरनिषेधके च शब्दे वक्तव्ये—आकारद्वयोपस्थापकं सामानाधिकरण्यमनुपपन्नमित्यर्थः। बाधार्थं सामानाधिकरण्यमिति चेत्–तन्नास्ति; माता मे वन्ध्येतिवत्सामानाधिकरण्यं बाधार्थमिति व्याहतत्वादिति भावः। तर्हि कथमुत्तरं स्यादित्यत्राह—**तदा हीति**। **विष्णु**रित्यन्यतराकारोपस्थापकः **शब्दः**। आकारान्तरनिषेधकशब्द **एव**कारः। साक्षादर्थमाह—**अत इति**। **अतः** स्वार्थिकत्वविकारार्थत्वयोरनुपपन्नत्वादित्यर्थः। शब्दानुशासनानुमतिं दर्शयति—**तदिति**। **प्रकृतं** प्रकर्षेण कृतम्। **प्रभूतं** प्रचुरमित्यर्थः। अन्नमयो यज्ञः, शकटमयी यात्रेति हि तस्योदाहरणम्। किमत्र प्राचुर्यमस्तीत्यत्राह—**कृत्स्नंचेति**। **अन्तर्बहिश्च व्याप्ये**त्यादिश्रुतेस्तदुपपन्नमिति भावः। सामानाधिकरण्यस्य शरीरात्मभावनिबन्धनत्वं प्रतिपिपादयिषितमुपसंहरति—**तस्मादिति**। **यन्मय**मित्यस्य प्राचुर्यार्थत्वेन तस्योत्तरत्वात्। **जगच्च स** इति सामानाधिकरण्यस्य शरीरात्मभावनिबन्धनत्वं, तेन स्वार्थिकत्वनिवृत्त्या—**यन्मय**मिति मयट्प्रत्ययस्य प्राचुर्यार्थत्वम्–इत्यन्योन्याश्रय इति चेन्नैवं; मयट्प्रत्ययस्य स्वार्थिकत्वनिवृत्तेः–प्राचुर्यार्थत्वनिर्णयस्य च सामानाधिकरण्यस्य शरीरात्मभावनिबन्धनत्वानपेक्षत्वात्—स्वार्थिकत्वं तावदर्थवत्त्वे संभवति निरर्थकत्वस्वीकारायोगादपास्तम्। **जगच्च स** इति सामानाधिकरण्येन च अपास्तं; स्वार्थिकत्वेसति आकारद्वयोपस्थापकसामानाधिकरण्यस्योत्तरत्वायोगात्। न तु तस्य शरीरात्मभावनिबन्धनत्वायोगात्। नच—सामानाधिकरण्यस्य प्रवृत्तिनिमित्तभूताकारद्वयोपस्थापकत्वं **मयट्**प्रत्ययस्य स्वार्थिकत्वनिवृत्तिसापेक्षं; सामानाधिकरण्यलक्षणस्वभावादेव तस्याकारद्वयोपस्थापकत्वसिद्धेः। अतो मयट्प्रत्ययस्य स्वार्थिकत्वनिवृत्तिः; सामानाधिकरण्यस्याकारद्वयोपस्थापकत्वादित्यत्र नान्योन्याश्रयः। एवं स्वार्थिकत्वे व्युदस्ते, पृथक्प्रश्नवैयर्थ्येन विकारार्थत्वेऽनुपपन्ने—परिशेषाच्च स्थितेः प्रष्टव्यत्वे सति—स्थितिस्वाभाव्यात्, अनुशासनानुरोधाच्च **मयट्**प्रत्ययस्य प्राचुर्यरूपार्थविशेषपरत्वसिद्धिः, ततो **जगच्च स** इति सामानाधिकरण्यस्य शरीरात्मभावरूपप्रवृत्तिनिमित्तविशेषसिद्धिः–इति नान्योन्याश्रयः। एवं सामानाधिकरण्यस्य मृषावाद्यमिमैक्यपरत्वे मयडानर्थक्यं, सामानाधिकरण्यानुपपत्तिश्चेति दूषणद्वयं, स्वरूपैक्यपरत्वेऽर्थविरोधः, **यन्मय**मित्युक्तप्रश्नस्योत्तरत्वानुपपत्तिश्चेति दूषणद्वयं च दर्शितं भवति। स्वोक्तार्थपरत्वानभ्युपगमे दूषणमाह—**अन्यथेति**। अन्यथा कथं प्रश्नप्रतिवचने स्याताम्, इत्यत्राह—**तथा हि सतीति**। सामानाधिकरण्यस्य भेदाभेदवाद्यभ्युपगतैकद्रव्यतापरत्वं दूषयति **जगदिति**। अस्मिन्नपि पक्षे **जगद्यन्मयं** जगद्यद्द्रव्यमिति पृष्टं स्यात्, तदानीं मयड्व्यर्थ्यमस्तीति द्रष्टव्यं; यत इत्युपादानस्य पृष्टत्वात्। अधिकं दूषणमाह—**सत्येत्यादिना। सत्यसङ्कल्पे**त्यादिना जीवगतदोषः, **सर्वाशुभे**त्यादिना प्रकृतिगतदोषश्च ब्रह्मणि प्रसज्यत इत्युक्तम्। यद्वा उभयलिङ्गकलहानिः, विपरीताकारप्राप्तिश्चेत्यर्थः। शरीरवाचिपदस्य शरीरिपरत्वे मुख्यत्वं न स्यादित्यत्राह—**आत्मशरीरेति। स्थाप्यते** स्थापयिष्यत इत्यर्थः। अनन्तरभाविलात् स्थाप्यत इत्युक्तम्॥

एवं प्रकृतश्लोकव्याख्यानौपयिकार्थः प्रपञ्चितः, अथ शास्त्रार्थसंग्रहानन्तरं विस्तरोपक्रमे सप्तश्लोकीं नमस्कारविषयामवतार्य, व्याख्येयश्लोकस्य नमस्कारश्लोकान्तरैः संगतिं दर्शयितुं **अविकाराये**त्यादीनां षण्णां वाक्यानामर्थानाह—**अत इति। अतः** प्रश्नप्रतिवचनादिभिः शास्त्रस्य सविभूतिकसगुणवस्तुपरत्वावगमात्, सामानाधिकरण्यस्य विशिष्टवस्तुनि मुख्यवृत्तत्वा-

सकाशादुद्भूतं जगत्तत्रैव च स्थितम्। स्थितिसंयमकर्तासौ जगतोऽस्य जगच्च सः॥' (वि. पु. १।१।३५) इति संग्रहेणोक्तमर्थं परः पराणामित्यारभ्य विस्तरेण वक्तुं परब्रह्मभूतं भगवन्तं विष्णुं **स्वेनैव रूपेणावस्थितमविकारायेति** श्लोकेन प्रथमं प्रणम्य तमेव हिरण्यगर्भस्वावतारशंकररूपत्रिमूर्तिप्रधानकालक्षेत्रज्ञसमष्टिव्यष्टिरूपेणावस्थितं च नमस्करोति। तत्र **ज्ञानस्वरूपमित्ययं** श्लोकः—क्षेत्रज्ञ-

---

चेति भावः। **अत** इत्यस्य व्यष्टिरूपेणावस्थितं च **नमस्करोती**त्यनेनान्वयः। यद्वा, शास्त्रवाक्यार्थस्यैवंरूपत्वाद्**विष्णोः सकाशादि**त्यस्य संग्रहरूपत्वं, **परः पराणा**मित्यादीनां विस्तररूपत्वं च सिद्धमित्यर्थः। **विष्णोः सकाशा**दित्यत्र सकाशादिति पदं पञ्चम्याः पञ्चम्यर्थसम्पादनार्थं, यथा—'अस्य कृत' इत्युक्ते कृते इति शब्दस्य चतुर्थ्यर्थसम्पादनपरत्वं—तद्वत्। यद्वा, **सकाशात्** ससंकल्पात्, **काशनं** प्रकाशनं संकल्परूपज्ञानं तद्वत इत्यर्थः। अनेन निमित्तत्वसिद्धिः। यद्वा, **सकाश**शब्दः पार्श्ववचनः, तेन शरीरमुपलक्षितं'सोऽमिध्याय शरीरात्स्वा'दितिवच्छरीरादित्यर्थः। **तत्रैव च स्थित**मिति लयस्थानप्रश्नस्योत्तरम्। **तत्र स्थित**मिति—**स्थितं** निष्ठांगतम्। अनेन जगतो नित्यत्वम् अवस्थानामागमापायित्वं च सूचितम्। लयस्थानप्रश्नस्योत्तरमुक्तम्, अथ लयकर्तृप्रश्नस्य, बाह्यस्थितिप्रश्नस्य च उत्तरमाह—**स्थितीति। जगच्च स** इति **यन्मय**मिति फलितस्य कृत्स्नान्तर्यामिरूपकृतसत्तानुवृत्तिलक्षणस्थितिप्रश्नस्योत्तरम्। यद्वा, **यन्मय**मिति फलितस्थितिप्रश्नस्यापि **स्थितिसंयमकर्तेत्येवो**त्तरम्। **जगच्च स इति तु यन्मय**मिति कण्ठोक्तस्यार्थस्योत्तरम्। इदं सामानाधिकरण्यमात्मतया व्याप्तिनिबन्धनमिति पूर्वमेवोपपादितम्। ननु—निष्कर्षकशब्दनां शौक्ल्यादीनां धर्मिपर्यन्तत्वं न दृष्टं, **यन्मयं जग**दित्यनेन **जगच्छब्द**स्य निष्कर्षकशब्दत्वं दृष्टमिति—धर्मिपर्यन्ताभिधायित्वाभावा**ज्जगच्च स** इति सामानाधिकरण्यमनुपपन्नमिति—चेत्, उच्यते—निष्कर्षकशब्दा हि द्विविधाः—नियतनिष्कर्षकाः, वैवक्षिकनिष्कर्षकाश्च, तत्र शौक्ल्यत्वादिशब्दाः—नियतनिष्कर्षकाः, मनुष्यशुक्लादिशब्दा—वैवक्षिकनिष्कर्षकाः; प्रयोगस्य नियामकत्वात्; अन्यथा निष्कर्षकानिष्कर्षकविभागोऽपि नोपपद्यते, तथा—**जगच्छब्दोऽपि** वैवक्षिकनिष्कर्षक इति। अत एव **यन्मय**मिति वैयधिकरण्येन प्रश्नस्य **जगच्च स** इति सामानाधिकरण्येनोत्तरमर्थभेदाभावादुपपन्नम्। 'शुक्लगुणस्य आश्रयः कः' इति प्रश्नस्य 'शुक्लः पटः' इत्युत्तरवत्। एवं संक्षेपेणोक्तस्य वक्ष्यमाणमहाविस्तरस्यार्थस्येषद्विस्तररूपेण श्लोकेनमस्कारः क्रियत इति—नमस्कारश्लोकसंगतिः। **स्वेनैव रूपेणावस्थितं**, ननु[1] प्रकृत्यादिविशिष्टमित्यर्थः। परब्रह्मणो हि हेयसंबन्धाभावः, न तु विष्णोरिति शङ्कायां—**विष्णुनामा स वेदेषु, समस्तहेयरहितं विष्ण्वाख्यं परमं पद**मित्यादि वचनाद् ब्रह्मण एव विष्णुशब्दवाच्यत्वात्, विष्णोरेव भगवच्छब्दवाच्यत्वाच्च—विष्णोर्हेयसंबन्धोऽनुपपन्न इत्यभिप्रायेण **परब्रह्मभूत**मित्यादिविशेषणमुक्तम्। **अविकाराय**—**विकार**शब्दो धर्मिपरः, धर्मिपरश्च; **'षोडशकश्च विकार'** इत्यादिप्रयोगात्। स्वयं कस्यचिद्विकारभूतः—[2]कैर्मभूतो न भवतीत्यविकारः, अनेन कार्याविद्यावृत्तिः। यद्वा **विकारो**ऽवस्था महत्त्वाहंकारत्वादिः, नित्यं तत्संबन्धिविरहादविकारः। अतो विकारवती प्रकृति**र्विकार**पदेन व्यावर्त्यते। एवं तत्पुरुष—बहुव्रीहिभ्याम् **अविकारायेति** पदेन कार्यकारणरूपोभयावस्थाविद्यावृत्तिः। **शुद्धायेति** बद्धव्यावृत्तिः। **नित्याय** शुद्धत्वेन नित्याय; अन्यथा **अविकारायेत्यनेन** पुनरुक्तिः स्यात्। **नित्य**पदं शुद्धिं विशिषदेव शुद्धिमद्वस्तुविशेषणं, यथा—'महोदार' इत्यत्र **महच्छब्द** औदार्यं विशिषन्नेव दातुर्विशेषणं—तद्वत्। अतो मुक्तव्यावृत्तिः। **परमात्मन** इति नित्यमुक्तव्यावृत्तिः; ते हि परवन्तः, न तु परमाः। **प्रधानपुरुषव्यक्तकालानां परम**मिति वक्ष्यमाणत्वात्—**अविकारायेत्यादिना** पदचतुष्टयेन प्रधान—पुरुष—व्यक्त—कालव्यावृत्तिरिति केचित्। निमेषाद्यवस्थकालस्य व्यक्तस्याप्यविकारपदव्यावर्तितत्वात्, पुरुषत्रैविध्यस्यैव प्रामाणिकत्वात्, विशेषणानां तद्व्यावर्तनसमर्थत्वाच्च—यथोक्तानामेवार्थानां व्यावर्तितत्वमुचितम्। विलक्षणविग्रहवत्त्वयापि समस्तवैलक्षण्यमाह—**सदैकरूपरूपायेति**। प्रथम**रूप**शब्दः स्वभाववाची, **एकस्वभावमित्यर्थः**। पर—व्यूह—विभवादिसर्वावस्थासु सकलहेयप्रत्यनीकत्व—मङ्गलास्पदत्वादि—ध्येयत्वादिस्वभावोऽप्रच्युत इत्यर्थः। **यद्वा, एकरूपं** दिव्यात्मस्वरूपेण समानस्वभावं, तेनापि हेयप्रत्यनीकत्वादिसिद्धिः। एभिः पदै**रीक्षत्यानन्दमयाधिकरणान्तरादित्यविद्यार्था** विवक्षिताः। पूर्वोक्तमात्मत्वं न 'मृदात्मको घट' इतिवद्भवतीति तद्वैशद्यमवयवशक्त्या क्रियते **विष्णु**शब्देन, **सर्वज्ञिष्णवे** इति पदेन च। पदद्वयेन नृपनभोव्यावृत्तिः; अन्तः प्रविश्य नियन्तृत्वं हि शरीरित्वम्। अत एवात्मत्वं विवृतं भवति, **विष्णु**शब्दस्य रूढलाद्देवताविशेषनिर्णयश्च सिद्धः। यद्वा, **विष्णु**शब्देनैव नियमनपर्याप्तव्याप्तिश्चका। व्याप्तिकृततदूतदोषस्पर्शशङ्कां व्युदस्यति—**सर्वज्ञिष्णव इति**। कथं विष्णोः कारणत्वं, हिरण्यगर्भादीनां हि सृष्ट्यादिकारणत्वमवगम्यत इत्यत्राह—**नम इति**। तत्तच्छरीरको विष्णुरेव सृष्ट्यादिकं करोतीत्यर्थः। रक्षार्थं सर्व-

---

१ ननु का. मु. पु.। २ कार्यभूतो।

व्यष्ट्यात्मनावस्थितस्य परमात्मनः स्वभावमाह। तस्मान्नात्र निर्विशेषवस्तुप्रतीतिः। यदि—**निर्विशेषज्ञानरूपब्रह्माधिष्ठानभ्रमप्रतिपादनपरं शास्त्रं, तर्हि—'निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः। कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यते॥'** (वि. पु. १।३।१) इति चोद्यं, **'शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः। यतोतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः॥ भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता।'** (वि. पु. १।३।२—३) इति परिहारश्च न घटते। तथा हि सति निर्गुणस्य ब्रह्मणः

भूतानां विष्णुत्वमुपजीव्य' नित्युक्तविष्ण्वाख्यावतारविग्रहद्वारा भगवत्पर्यन्तो **हरि**शब्दः। **हिरण्यगर्भशंकर**शब्दौ जीवद्वारा भगवत्पर्यन्ताविति–'ब्रह्माद्याः सकला देवा मुनुष्याः पशवस्तथा। विष्णुमायामहावर्तमोहान्धतमसावृताः' इति, 'हिरण्यगर्भादिषु च 'ब्रह्मकर्मात्मिका द्विधा' इति, 'हिरण्यगर्भो भगवा' नित्यारभ्य 'मूर्तमेतद्धरेरूपं भावनात्रितयात्मकम्, अशुद्धास्ते समस्तास्तु देवाद्याः कर्मयोनयः' इत्यावेतत्प्रबन्धस्थश्लोकतात्पर्यानुरोधात्—'एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ। तदादर्शितपन्थानौ सृष्टिसंहारकारकौ। तवान्तरात्मा मम च ये चान्ये देहिसंज्ञिताः। सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित्क्वचि'दिति–भारतादिवचनैकार्थ्याच्च—निश्चीयते। हिरण्यगर्भादिसामानाधिकरण्यं व्यामिकृतमिति सूचयति—**वासुदेवायेति**। ब्रह्मशिवमध्यस्थोऽप्यप्रच्युतस्वभाव इत्याह—**तारायेति**। यद्वा, तेषु त्रिष्वप्ययमेव मोक्षप्रद इत्यर्थः। 'अथ कस्मादुच्यते **तारं** यस्मादुच्चार्यमाण एव गर्भजन्मजरामरणसंसारमहाभयात्तारयति—तस्मादुच्यते तार'मिति श्रुतेः—'ब्रह्मविष्णुशिवा ब्रह्मन् प्रधाना ब्रह्मशक्तय' इत्यादिभिः—विष्णोः परं तत्त्वं, विष्णोश्चतुर्मुखादिसाम्यं च न शङ्कनीयम्। **शक्तिरपृथक्सिद्धविशेषणं**, तत्र धर्मिण्यसमानविभक्तिनिर्दिष्टे—धर्मिपर्यन्तस्यापि शब्दस्य धर्ममात्रपरत्वं दृष्टं—पटस्य शुक्ल इत्यादिषु, तथा–**विष्णु**शब्दो विशेषणभूतविग्रहमात्रपरः; असमानविभक्तिना **ब्रह्म**शब्देन धर्मिणः पृथङ्निर्दिष्टत्वात्, ब्रह्मणः शक्तयो हि ब्रह्मशक्तयः, अतोऽसमानविभक्तिनिर्दिष्टत्वमिति॥ यद्वा, भगवतो **देवमनुष्या**दिशब्दव्यपदेशवत् **शक्तिविभूत्या**दिशब्दव्यपदेशोऽपि विभूतिसाजात्यादिति। यथाहुः श्रीवत्साङ्कमिश्राः—सजातीयस्तेषामिति तु विभवाख्यामपि भज' न्निति, अतो यथोक्त एवार्थः॥ **अथ**–केवलप्रकृतिकारणव्यावृत्त्यर्थं प्रकृतिविशिष्टपरमात्मानं नमस्करोति—**एकानेकेति**। कारणावस्थायामेकः, कार्यावस्थायामनेकः। अथ धीस्थां कार्यावस्थामाह—**स्थूलेति**। तथा बुद्धिस्थां कारणावस्थामाह—**अव्यक्तेति**। तत्राप्यप्रच्युतस्वभावत्वमाह—**मुक्तिहेतव इति**। अथ कालविशिष्टमाह—**सर्गेति**। कालस्य वक्ष्यमाणविशेषणोपपत्तेः, प्रकरणस्य विशिष्टपरत्वात्, विशेषणान्तरविशिष्टतायाः प्रतिपादितत्वेन—कालविशिष्टताकथनम्। पारिशेष्यात्, तदप्रतिपादने अपेक्षितविध्यभावप्रसङ्गात्, केवलं ब्रह्मस्वरूपकारणपरत्वे अण्डान्तर्गतसर्गादेरुक्तत्वात्, अण्डबहिर्भूततत्त्वसर्गादेर्वक्ष्यमाणत्वाच्च—पौनरुक्त्यप्रसङ्गात्, विस्तरे च–'प्रधानपुरुषव्यक्तकालानां, व्यक्तं विष्णुस्थाऽव्यक्तं, पुरुषः काल एव च, तथा पुरुषरूपेण कालरूपेण च स्थितं, ब्रह्मा दक्षादयः काल' इत्यादिभिर्व्यक्ताव्यक्तादिभिः सह वक्ष्यमाणत्वादयं श्लोकः कालपर एव। अचिद्विशिष्टवाचिश्लोकानन्तर्यादस्य श्लोकस्य कालपरत्वमुचितम्। उत्तरश्लोकः समष्टिजीवपरः; व्यष्टिजीवपरश्लोकसाहचर्यात्। कालस्य सर्गस्थितिविनाशमूलभूतत्वं, 'ब्रह्मा दक्षादयः कालः, विष्णुर्मन्वादयः कालः, रुद्रः कालोऽन्तकश्चे'त्यादिषु सिद्धम्। **जगन्मयः** अवच्छेदकतया, अवच्छेद्यतया च जगत्प्रचुरः। अथ क्षेत्रज्ञसमष्ट्यात्मनाऽवस्थितं नमस्करोति—**आधारभूतमिति**। अचेतनस्य चेतनः स्वरूपेणाधारभूतः; 'एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः, जीवभूतां महाबाहो ययेदं धार्यते जग' दिति वचनात्। **अणीयस्त्वं** प्रकृतेरपि व्यापनयोग्यसूक्ष्मत्वम्। यद्वा, 'विकासाणुस्वरूपैश्चेत्युक्तप्रकारेण सर्गदशायामिव ज्ञानविकासाभावादणीयस्त्वमेवेत्यर्थः। **सर्वभूतस्थं** भवतीति **भूतं**, पृथिव्यन्तेषु सर्वभूतेष्ववस्थितम्। अनन्तरं क्षेत्रज्ञव्यष्टिविशिष्टं नमस्करोति—**ज्ञानेति**। हिरण्यगर्भेत्यादिभाष्ये निर्दिष्टेष्वर्थेष्वयं श्लोकः किं विशिष्टपरमात्मपर—इति शङ्कायां, समासान्तर्गतं प्रस्तुतश्लोकार्थं विविच्य दर्शयति—**तत्रेति**। परमात्मनः सद्भारक एव भ्रमान्वय इत्यर्थः। ततः किमित्यत्राह—**तस्मादिति**।

निर्विशेषज्ञानपरत्वे प्रश्नोत्तरवरलाभकथनानुपपत्तिमुखेनोपक्रमविरोध उक्तः, अथोपरितनाध्यायगतचोद्यपरिहारानुगुणत्वमुच्यते—**यदीति**। यद्वा, शास्त्रारम्भोपयोगिप्रश्नोत्तरानुपपत्तिरुक्ता, इदानीमेतत्प्रश्नोत्तरविशेषानुपपत्तिरुच्यते—**यदीति**। पूर्वाध्याये 'जुषन् रजोगुण'मित्यादिना गुणान्वये कथितेऽपि, निर्गुणस्येति चोदयतोऽयमभिप्रायः—गुणान्वयस्य सद्भारकत्वात्। **स्वयं निर्गुण** इति निर्विशेषपक्षे—**अप्रमेयस्ये**त्यादिपदवैयर्थ्यं; **निर्गुणस्ये**ति पदेनैव निर्विशेषत्वसिद्धेः। परिपूर्णत्वादिगुणानभ्युपगमाच्च—**अप्रमेया**दिपदान्तरसमभिव्याहार एव निर्गुणपदोपस्थापितनिषेधस्य संकुचितविषयत्वसाधकः। **न घटत इति। सर्गाद्या भावशक्तय** इति सर्वशक्तियोगेन चोद्यस्य परिहारात्–निर्विशेषपक्षानुगुणत्वमिति भावः। तर्हि कथं चोद्यपरिहारौ स्यातामित्यत्राह—**तथा हि सतीति। निर्गुणस्य ब्रह्मण** इत्यनेन पदान्तरवैयर्थ्यम-

कथं सर्गादिकर्तृत्वं, न ब्रह्मणः पारमार्थिकः सर्गः, अपितु भ्रान्तिपरिकल्पित—इति चोद्यपरिहारौ स्याताम् । उत्पत्त्यादि कार्यं सत्त्वादिगुणयुक्तापरिपूर्णकर्मवश्येषु दृष्टमिति—सत्त्वादिगुणरहितस्य परिपूर्णस्याकर्मवश्यस्य कर्मसंबन्धानर्हस्य कथं सर्गादेः कर्तृत्वमभ्युपगम्यत—इति चोद्यं, दृष्टसकलविसजातीयस्य ब्रह्मणो यथोदितस्वभावस्यैव जलादिविसजातीयस्याग्न्यादेरौष्ण्यादिशक्तियोगवत्सर्वशक्तियोगो न विरुध्यत—इति परिहारः । परमार्थस्त्वमेवैकः इत्याद्यपि न कृत्स्नस्यापारमार्थ्यं वदति, अपि तु कृत्स्नस्य तदात्मकतया तद्व्यतिरेकेणावस्थितस्यापारमार्थ्यम् । तदेवोपपादयति—**'तवैष महिमा येन व्याप्तमेतच्चराचरम् ।'** (वि. पु. १।४।३८) इति । येन त्वयेदं चराचरं व्याप्तमतस्त्वदात्मकमेवेदं सर्वमिति—त्वदन्यः कोपि नास्ति । **अतः सर्वात्मतया त्वमेवैकः परमार्थः** । अत इदमुच्यते **तवैष महिमा** या सर्वव्याप्तिरिति । अन्यथा तवैषा **भ्रान्तिरिति वक्तव्यम् । जगतः पते त्वमित्यादीनां च पदानां लक्षणा च स्यात् । लीलया महीमुद्धरतो भगवतो**

मिप्रेतम् । निर्विशेषस्य कर्तृत्वानुपपत्तिचोद्ये कृते—कर्तृत्वस्य पारमार्थ्ये सति हि तदनुपपत्तिः, अपरमार्थत्वाद्दुर्घटत्वमेव भूषणमिति परिहारो वक्तव्य इत्यर्थः । किमर्थाविमौ चोद्यपरिहारौ, यद्ययमर्थो न प्रतिपाद्य—इति शङ्कायां स्वयमेव तच्चोद्यपरिहारशरीरमाह—**उत्पत्त्यादीति । निर्गुणस्येत्यादिविशेषणानां** विपरीताकारैः कर्तृत्वस्य व्याप्तिं कथमित्यनेनाभिप्रेतां **दर्शयति—सत्त्वादिगुणयुक्तेत्यादिना** । सत्त्वादिगुणयुक्त—अपरिपूर्ण—कर्मवश्यत्वानि निर्गुणत्वादीनां यथाक्रमं विपरीताकाराः । **अमलात्मन** इत्यस्य विपरीताकारोऽपि **कर्मवश्येत्य**नेनार्थसिद्धः । **अमलात्मत्व**ममलस्वभावत्वं—कर्मसंबन्धानर्हत्वं, तद्विपरीताकारः कर्मसंबन्धार्हत्वं, तच्च कर्मवश्यशब्देनार्थसिद्धं; कर्मसंबन्धार्हत्वकार्यं हि कर्मवश्यत्वम् । निर्गुणत्वेत्यादिपदानां यथाक्रममर्थमाह—**सत्त्वादिगुणरहितस्येत्यादिपदैः । कर्मसंबन्धानर्हस्ये**त्यनेनाम**लात्मन इति पदं व्याख्यातं भवति** । अकर्मवश्यत्वं मुक्तस्यापि विद्यते, स पूर्वावस्थायां कर्मसंबन्धिलात्तदर्हः, अतस्तद्व्यावर्तकं **कर्मसम्बन्धानर्हत्वममलात्मत्वम् ॥**

अकर्मवश्यत्वं कर्मकृतसुखदुःखभाक्त्वाभावः, **कर्मवश्यविसजातीयत्वं** कर्मसंबन्धानर्हत्वं, सर्गादिकर्तृत्वे गुणत्रयवश्यत्व–सापेक्षत्व–कर्माधीनफलभाक्त्व–कर्मसंबन्धार्हत्वप्रसङ्ग इति विशेषविरोधप्रसञ्जनेन चोद्यम् । 'अग्नेर्द्रव्यत्वेऽनुष्णत्वप्रसङ्ग' इतिवदयं तर्को धर्मिग्राहकप्रमाणबाधितः, अतो विजातीयस्य धर्मिणो विजातीयधर्मवत्त्वं युक्तम्; अग्नित्वे सत्यपि वैद्युताग्नेर्जलनिर्वाप्यत्वाभाववत्, अतः सर्वविजातीयस्य ब्रह्मणः सर्वशक्तियोग उपपद्यत इति परिहार इत्यर्थः । **शक्तयः सर्वभावाना**मिति मन्त्रस्यायमक्षरार्थः—**अचिन्त्यज्ञानगोचरा** अतर्क्यप्रमितिसिद्धाः । **सर्गाद्याः** सर्गादिगोचराः । **भावशक्तयः** वस्तुशक्तयः । **ब्रह्मणो वस्तुशक्तय** इति निर्देशो ब्रह्मतादात्म्यमिति वत् । यद्वा, **ब्रह्मणो भावशक्तयः** वस्तुशक्तयः, ब्रह्मणो वस्तुलप्रयुक्ताः सत्ताप्रयुक्ता निरुपाधिकाः शक्तय इत्यर्थः । यद्वा, **भाव**शब्दः स्वभावपरः, स्वाभाविक्यः शक्तय इत्यर्थः ॥

अथ चतुःश्लोकीं व्याचष्टे—परमार्थ इति । कृत्स्नस्य ब्रह्मपर्यन्तत्वेन तच्छरीरत्वात्कृत्स्नशरीरं ब्रह्मैव परमार्थः, अतत्पर्यन्तो मिथ्येत्यर्थः । **जगतः पते** इत्याकाशव्यावृत्तिः । **येन व्याप्त**मिति नृपव्यावृत्तिः । अनेन जगतः शरीरलक्षणं दर्शितं भवति । नियाम्यत्व–धार्यत्व–शेषत्वेष्वन्यतमं व्याप्यत्वसहचरं हि शरीरलक्षणद्योतकम् । **जगच्छरीरक त्वदन्यो मिथ्येत्युक्ते** अतत्पर्यन्तस्य स्वतन्त्रवस्त्वन्तरस्यैव मिथ्यात्व स्यात्, न तु जगतस्तच्छरीरभूतस्य, यथा—'हे भूपते त्वदन्यो नास्ती'त्युक्ते न भूमिर्भ्या भवति, तत्तुल्यराजान्तरस्यैव तु मिथ्यात्वं—तद्वत् । यद्वा, **एक**शब्दः प्राधान्यपरः; 'एकादाकिनिवासहाव' इत्यत्रासहायपदव्यवच्छेद्यं हि प्राधान्यम् । ब्रह्मणश्च प्राधान्यं जगत्प्रतिशेषिलरूपं, तदानीं **नान्योऽस्तीति** प्रधानभूतोऽन्यो निषिध्यते, न त्वप्रधानमर्थान्तरम् । उक्तार्थस्योपपादकं व्याप्यत्वप्रतिपादकमुत्तरार्धमित्याह—**तदेवेति** । तत्र फलितमर्थमाह—**येनेति । येन** यस्मादित्यर्थः । **त्वदन्यः** अत्वदात्मकः । त्वयात्मतया व्याप्तत्वात् सर्वं त्वदात्मकं तच्छरीरमिति—**त्वदन्यः** अत्वदात्मको नास्ति, तस्मात्सर्वशरीरस्त्वमेव **परमार्थ** इत्यर्थः । **तवैष महिमे**ति श्लोकार्धैकदेशश्लोकार्थप्रतिपादक इत्याह—**अत इति** । महिम्नो व्याप्तिरूपत्वाद् **या सर्वव्याप्तिरि**त्युक्तं, न तु व्याप्तौ तात्पर्यात्; व्याप्तेर्महिमत्व एव तात्पर्यम् । यद्वा, व्याप्तेरुक्तार्थोपपादकत्वं महिमसमभिव्याहारादित्याह—**अत इदमुच्यत इति** । तस्य परप्रातिकूल्यं दर्शयति—**अन्यथेति** । व्याप्यव्याप्त्यादेर्मिथ्यात्वे—सर्वव्याप्तिस्तव महिमेति न वाच्यम्, अपि तु भ्रान्तिरिति वक्तव्यमित्यर्थः । कृत्स्नापारमार्थ्यपरत्वे दूषणान्तरद्वयमाह—**जगतः पते इति । लक्षणा** अधिष्ठानलक्षणा ।

महावराहस्य स्तुतिप्रकरणविरोधश्च। यतः कृत्स्नं जगज्ज्ञानात्मना त्वयात्मतया व्याप्तत्वेन तव मूर्त—तस्मात्त्वदात्मकत्वानुभवसाधनयोगविरहिण एतत्केवलं देवमनुष्यादिरूपमिति भ्रान्तिज्ञानेन पश्यन्ती-त्याह—**यदेतदृश्यत इति**। न केवलं वस्तुतस्त्वदात्मकं जगत्, देवमनुष्याद्यात्मकमिति दर्शनमेव भ्रमः। ज्ञानाकाराणामात्मनां देवमनुष्याद्यर्थाकारत्वदर्शनमपि भ्रम इत्याह—**ज्ञानस्वरूपमखिलमिति**। ये पुन-र्बुद्धिमन्तो ज्ञानस्वरूपात्मविदः, सर्वस्य भगवदात्मकत्वानुभवसाधनयोगयोग्यपरिशुद्धमनसश्च ते देवमनु-ष्यादिप्रकृतिपरिणामविशेषशरीररूपमिदमखिलं जगत्, शरीरातिरिक्तज्ञानस्वरूपात्मकं त्वच्छरीरं च पश्य-न्तीत्याह—**ये तु ज्ञानविद** इति। अन्यथा श्लोकानां पौनरुक्त्यं, पदानां लक्षणा, अर्थविरोधः, प्रकर-णविरोधः, शास्त्रतात्पर्यविरोधश्च। **तस्मात्मपरदेहेषु सतोप्येकमयमित्यत्र** सर्वेष्वात्मसु ज्ञानैकाकारतया

अत्रह्मात्मकत्वेन स्वतन्त्रतायाः प्रत्यक्षसिद्धत्वात्–तद्विरुद्धं ब्रह्मपर्यन्तत्वं न शास्त्रं प्रतिपादयति 'आदित्यो यूप' इति वदिति शङ्कायाम्—अन्यथासिद्धाया अपरोक्षरूपाया अपि स्वातन्त्र्यप्रतिपत्तेः परोक्षरूपाप्यन्यथासिद्धा पारतन्त्र्यप्रतिपत्तिर्बलीय-सीत्यभिप्रायेण द्वितीयश्लोकमवतारयति—**यत इति**। पारतन्त्र्यप्रतिपत्तिः परमात्मप्रतिपत्तिसापेक्षा, तदभावात्तत्प्रतिपत्त्य-भाव इति–अन्यथासिद्धा स्वातन्त्र्यप्रतिपत्तिरित्यर्थः। **केवलं देवमनुष्यादिरूपमिति**। परमात्मशरीरत्वरहितजगद्रूप-मात्रमित्यर्थः। अयमर्थः—यथा–देहात्मभ्रमोऽपरोक्षोऽपि परोक्षशास्त्रज्ञानेन बाध्यते, तथा—स्वातन्त्र्यभ्रमोऽपीति, देहा-तिरिक्तं स्वात्मानमप्यजानतः परमात्मपारतन्त्र्याप्रतिपत्तिः किं पुनर्न्यायसिद्धेति च दर्शयितुं तृतीयश्लोकारम्भः, तं व्याचष्टे—**न केवलमिति**। चिदचिदात्मके जगति चेतनरूपं **जगद्**विवक्षितं **ज्ञानस्वरूपमखिलं जगद**ति जगच्छब्देन। यथा—'त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्। मोहितं नाभिजानाति मामेभ्यः परमव्यय' मित्यत्र ज्ञानस्वरूपस्य जडरूपार्थस्वरूप-त्वबुद्धिभ्रम इत्युक्ते–अर्थस्वरूपस्यार्थस्वरूपत्वबुद्धिर्न भ्रमः स्यादिति च सिद्धम्। देहात्मभ्रमः संसर्गकृतः—जलमुष्णमितिवत्। आत्मासाधारणधर्मज्ञानस्फुरणेऽपि–तस्यासाधारणत्वाज्ञानाद् भ्रमोपपत्तिः। चतुर्थं व्याचष्टे—**ये पुनरिति**। 'विज्ञानं चावि-ज्ञानं चे'ति विज्ञानशब्दस्यात्मवाचित्वात्—**ज्ञानस्वरूपात्मविद** इत्युक्तम्। **अबुद्ध्य** इति पूर्वश्लोकोक्तार्थप्रतियोगित्वेन ज्ञानविद इत्युक्तमिति स्मारयति—**बुद्धिमन्त इति**। **अयोगिन** इत्यस्य प्रतियोगित्वेन **शुद्धचेतस** इत्युक्तमिति सूचयति—**योगयोग्यपरिशुद्धमनस इति**। योगयोग्यत्वे हेतुः परिशुद्धत्वम्। **मनसा तु विशुद्धेन** हि भगवत्साक्षात्काररूपोपासननिष्पत्तिः श्रूयते। मनोविशुद्धिश्च—कर्मयोगेन, योगेन योग्यतापरिशुद्धिरिति वार्थः। पूर्वश्लोके **अखिलजगच्छब्देन** चेतनरूपं जगद्विवक्षितम्, अस्मिन् श्लोकेऽखिलजगच्छब्देन अचिद्रूपं जगद्विवक्षितम्। कृत्स्ना-पारमार्थ्यं विवक्षितमिति पक्षे—प्रथमश्लोके संक्षिप्तदूषणमनुक्तदूषणेन सह विस्तरेण सर्वश्लोकसाधारणमाह—**अन्यथेति**। स्वातन्त्र्यभ्रमो, देहात्मभ्रमश्चेति विभागाभावे पौनरुक्त्यमित्यर्थः। **लक्षणा-परमेश्वर, जगतःपते, तव महिमा, त्वमि**त्यादिशब्दानां लक्षणा। **त्वं**शब्दो हि स्वामिमुखाहमर्थान्तरवाची, अतस्तस्य लाक्षणिकत्वम्। **अर्थविरोधः** प्रत्य-क्षादिभिरबाध्यत्वेन सिध्यतोऽसत्यत्वे–प्रमाणविरोधः, तिरोधानानुपपत्तिः, तर्कविरोधः, उभयलिङ्गत्वविरोधश्च। **प्रकरण-विरोधः** स्तुतिविरोधः; 'रोमान्तरस्था मुनयः स्तुवन्ती'ति हि प्रकृतम्। स्तोतृणामद्वैतज्ञानवत्त्वे—स्तुत्यनुपपत्तिः, तदभावे च—नितराम्। **शास्त्रतात्पर्यविरोधः** उपक्रमोपसंहारावान्तरप्रकरणोपक्रमोपसंहारादिविरोधः॥

अथादिभरतचतुःश्लोकीं परस्परव्यवहितां व्याचष्टे—**तस्येत्यादिना**। ब्रह्माद्वैतं, जीवाद्वैतं चेत्यद्वैतं द्विविधं **शास्त्रप्रति-पाद्यं**—तत्र ब्रह्माद्वैतं–प्रकार्यद्वैतं, जीवाद्वैतं–प्रकाराद्वैतम्। कोऽत्र नियामक इति चेत्, उच्यते—ब्रह्मप्रकरणेषु सामाना-धिकरण्येन ब्रह्माद्वैतप्रतिपादनात्, सामानाधिकरण्यस्य च प्रकारभेदविशिष्टप्रकार्यैकत्वपरत्वात्, 'एकः सन् बहुधा विचार' इति प्रकारबहुत्वस्य कण्ठोक्तत्वात्, ऐक्यविधिशेषस्य 'नेह नानास्ती'त्यादिभेदनिषेधस्य विहितैक्यविरोधिभेदविषयत्वात्, सामान्यनिषेधस्य च विहितव्यतिरिक्तविषयत्वेन प्रकारिबहुत्वनिषेधपरत्वात्, 'न तत्समश्चाभ्यधिकश्च दृश्यत' इति ब्रह्मतुल्य-प्रकार्यन्तरनिषेधकण्ठोक्त्या च—प्रकार्यद्वैतमेव ब्रह्माद्वैतम्। जीवात्मबहुत्वस्य श्रुतिसिद्धत्वात्; अन्यथा **बद्धमुक्तव्यवस्था-नुपपत्तेः**, उपदेशानुपपत्तेः, सुखादिव्यवस्थाऽनुपपत्तेः, 'पुमान्न देवो न नरो न पशुर्न च पादपः। चतुर्विधोऽपि भेदोऽयं मिथ्याज्ञाननिबन्धनः। देवादिभेदेऽपध्वस्ते' इत्यादिभिर्भेदविशेषनिषेधस्य कण्ठोक्तत्वात्, मुक्तानां साम्यवचनात्, 'अहं त्वं च तथाऽन्ये च, तत्र त्वमहमप्यत्र, तन्मनः समतालम्बी'त्यादिप्राकरणिकवचनानुरोधात्, 'एको व्रीहि'रितिवदेकशब्दस्यैक-जातीयपरत्वोपपत्तेः, वक्ष्यमाणश्लोकस्य शब्दस्वभावाच्च—जीवाद्वैतं प्रकाराद्वैतमेव। 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामा'न्नित्यस्य वाक्यस्य कामविधानपरत्वात्–न नित्यत्वबहुत्वयोस्तात्पर्यमस्ति। अस्ति चेत्, वाक्यमे-

समानेषु सत्सु देवमनुष्यादिप्रकृतिपरिणामविशेषरूपपिण्डसंसर्गकृतमात्मसु देवाद्याकारेण द्वैतदर्शनमत-ध्यमित्युच्यते, पिण्डगतमात्मगतमपि द्वैतं न प्रतिषिध्यते। देवमनुष्यादिविविधविचित्रपिण्डेषु वर्तमानं सर्वमात्मवस्तु सममित्यर्थः। यथोक्तं भगवता—**'शुनि चैव श्वपाके च पण्डिताः समदर्शिनः।'** (गी. ५।१८), **'निर्दोषं हि समं ब्रह्म'** (गी. ५।१९) इत्यादिषु। **तस्मात्मपरदेहेषु सतोपीति** देहातिरिक्ते वस्तुनि स्वपरविभागस्योक्तत्वात्। **यद्यन्योस्ति परः कोपीत्यत्रापि** नात्मैक्यं प्रतीयते; **यदि मत्तः परः कोप्यन्य** इत्येकस्मिन्नर्थे परशब्दान्यशब्दयोः प्रयोगायोगात्। तत्र **पर**शब्दः स्वव्यतिरिक्तात्म-वचनः। **अन्य**शब्दस्तस्यापि ज्ञानैकाकारत्वादन्याकारत्वप्रतिषेधार्थः। एतदुक्तं भवति—यदि मद्व्यतिरिक्तः

दप्रमङ्गादिति चेन्न; 'यदाग्नेयोऽष्टाकपाल' इत्यत्र अष्टाकपालत्वविशिष्टाग्नेयपुरोडाशविधिवद्विशिष्टविधिपरत्वाद्वाक्यस्य। नित्यबहुचेतनविशिष्टकामप्रदानविधिपरं हीदं प्रतीयते। अनित्यानामल्पानां कामप्रदानादपि नित्यानां बहूनां कामप्रदाने कथिते हि—कामप्रदानस्यातिशयो भवति। जीवबहुत्वस्य लोकसिद्धत्वान्न तत्र शास्त्रस्य तात्पर्यम्; 'अप्राप्ते हि शास्त्रमर्थवं दिति—चेन्न; संसृष्टस्य हि बहुत्वप्रतीतिर्लौकिकसिद्धा, परिशुद्धात्मस्वरूपबहुत्वस्य लोकसिद्धत्वाभावात्—तत्र हि शास्त्रतात्पर्यं संभवति। औपाधिकाकार्स्यानित्यत्वात्, निष्कृष्टस्वरूपस्य नित्यत्वात्, नित्यत्वसमानाधिकरणबहुत्वेऽभिहिते—परिशुद्धा-त्मस्वरूपबहुत्वं ह्युक्तं भवति। उपदेशोऽपि न संभवति; गुरुर्भ्रान्तश्चेत्—नोपदेशः, अभ्रान्तश्चेत्—द्वैतप्रतीत्यभावान्नित-राम्। द्वैतप्रतीतावपि—दर्पणस्थं स्वात्मनः प्रतिबिम्बं प्रति विवक्षितस्य नोपदेशः संभवतीति। सुखदुःखादिव्यवस्थया चात्ममेदसिद्धिः। ननु—सुखदुःखव्यवस्था नाम कि सुखदुःखव्यक्तिबहुत्वम्, उत तदाश्रयबहुत्वम्। एकस्यैवानेकसुखदुःख-व्यक्तिदर्शनात्सुखादिस्वरूपबहुत्वं नात्मैक्यविरोधीति—न व्यवस्था। आश्रयभेदश्चेत्, साध्याविशिष्टो हेतुरिति—चेन्न; सुदुःखोभयप्रकारविलक्षणत्वाद्व्यवस्थायाः सम्प्रतिपन्नैकाश्रयेषु सुखदुःखादिषु प्रतिसंधानं दृष्टं, प्रतिबन्धकाभावे सति-एका-श्रयत्वेन सुखदुःखादिप्रतिसंधानाभावो व्यवस्थेति—परिहारः। **एकमय**मित्यत्र **मयट्** स्वार्थिकः। यद्वा, **एक**शब्दो भावप्रधानः-ऐक्यं तत्प्रचुर**मेकमयं**; शुद्धावस्थस्यात्मनो ह्यैक्यप्राचुर्यं, न तु संसृष्टस्य तस्य; बुद्धिसुखदुःखाद्यान्तरभेदेन, देवत्वादिबाह्यभेदेन चैक्यप्राचुर्याभावात्। **एक**शब्दः समानवाचीः 'एको व्रीहिः सुनिष्पन्नः सुपुष्टाः कुरुते प्रजा' इत्या-दिषु तथा प्रयोगदर्शनात्। **देवमनुष्यादिप्रकृतिपरिणामविशेषरूपे**त्यनेन 'दुःखाज्ञानमला धर्माः प्रकृतेस्ते न चा-त्मनः। पुमान्नदेवो न नरो न पशुर्न च पादपः॥ शरीराकृतिभेदास्तु भूपैते कर्मयोनय' इति, वचनयोरैकार्थ्यं दर्शितम्। 'पिण्डः पृथग्यतः पुंसः शिरः पाण्यादिलक्षण' इति प्राकरणिकवचनं स्मारयति **पिण्ड**शब्दः। **एकमय**मित्यात्मन्येकत्वं विधाय भेदे निषिध्यमाने—आत्मस्वरूपभेद एव निषेध्यः स्यादिति चेत्, स्यादेवं—यदि विधीयमानमेकत्वं व्यक्त्यैक्यं स्या-त्, तत्तु प्रकारैक्यम्, अतो भेदनिषेधो वैजात्यनिषेध एवेति भावः। **द्वैतिनोऽतथ्यदर्शिन** इति सामान्येनोक्ते कथं देवादिद्वैतनिषेध इत्युच्यत—इति चेन्, कथं सामान्येन द्वैतनिषेधे प्रतीते—आत्मद्वैतनिषेध इत्युच्यते। न पिण्डात्मनोर्भेद-निषेधः; पिण्डात्मनोर्भेदस्य प्रामाणिकत्वादिति चेत्—आत्मभेदस्यापि प्रामाणिकत्वान्न तद्भेदनिषेधः, अपि तु देवादिभेद-निषेध इति भावः। आत्मगतद्वैतमप्रतिषिद्धं चेत्—'आत्मा शुद्धोऽक्षरः शान्तः, विज्ञानं यज्ञं तनुत' इत्येकवचनं नोपप-द्यते। जातावेकवचनं चेत्—देहशब्देऽप्येकवचनं स्यादिति शङ्का च **देवमनुष्यादि**पदेन परिहृता। देवादिष्ववान्तरभेदवि-वक्षया—**विविध**शब्दः। तत्राप्यनेकविधत्वविवक्षया **विचित्र**शब्दः। आत्मसु जात्येकत्वादेकवचनं, पिण्डेष्ववान्तरजाति-बहुत्वाद्बहुवचनमित्यमिप्रायः॥

साम्ये प्रमाणमाह—**यथोक्तमिति**। बहुत्वस्य विहितत्वात्, साम्यप्रतिपादनाच्च—आत्मव्यक्तिभेदनिषेधोऽनुपपन्न इत्य-र्थः। **हेत्वन्तरं चाह—तस्येति**। अन्यथार्थश्चेत्, एतच्छ्लोकस्थपदानां व्याघातः स्यादित्यर्थः। **उक्तत्वादिति सममि-त्यर्थः** इत्यन्वयः। **एकवचनोक्तो** हि जातावेकवचनमिति निर्वाहः, अन्यनिषेधपरस्य वचनस्यान्यथा निर्वाहायोगादात्मैक-त्वसिद्धिरिति—शङ्कायां, **यद्यन्योऽस्ती**त्यादिश्लोकस्यार्थमाह—**यदीति**। एकस्मिन्नर्थे द्वौ द्वौ शब्दौ प्रयुक्तौ स्थानन्यये, तेनान्यतरशब्दस्याकारपरत्वात्—नात्मभेदनिषेध इति परिहियते। तत्र द्वयोः शब्दयोः कोऽर्थ इत्यत्राह—**तत्रेति**। **पर**-शब्देन **धर्मिणमनूद्य** तस्य शब्दान्तरोपस्थापिताकारान्तरान्वयो निषिध्यत इत्यर्थः। **एषोहमयं चान्य** इति वक्तुमशक्यत्वं कथं, प्रत्यक्-पराक्ते भेदकधर्मौ हि विद्येते—इति चेन्नैवम्; प्रत्यक्-पराक्त्वयोः स्वपरापेक्षया सर्वात्मनां साधारणतया व्यावर्तकत्वाभावात्। पूर्वं देवादिष्वन्यतमोऽयमित्यमिप्रायेण तद्विशेषवुभुत्सया हि सौवीरराजेनादिभरतः पृष्टः, अतो देवा-द्याकारनिषेधपरा इमे शब्दा इति भावः। एवं पदार्थे सति श्लोकेन किमुक्तं भवतीति—शङ्कायां वाक्यार्थं योजयति **एत-**

कोप्यात्मा मदाकारभूतज्ञानाकारादन्याकारोस्ति तदाहमेवमाकारः, अयं चान्यादृशाकार–इति शक्यते व्यपदेष्टुं, न चैवमस्ति; सर्वेषां ज्ञानैकाकारत्वेन समानत्वादेवेति—**वेणुरन्ध्रविभेदेने**त्यत्राप्याकारवैषम्यमात्मनां न स्वरूपकृतम्, अपि तु देवादिपिण्डप्रवेशकृतमित्युपदिश्यते, नात्मैक्यम्। दृष्टान्ते चानेकरन्ध्रवर्तिनां वाय्वंशानां न स्वरूपैक्यम्, अपि त्वाकारसाम्यमेव तेषाम्। वायुत्वेनैकाकाराणां रन्ध्रभेदनिष्क्रमणकृतो हि षड्जादिसंज्ञाभेदः—एवमात्मानां देवादिसंज्ञाभेदः। यथा—तैजसाप्यपार्थिवद्रव्यांशभूतानां पदार्थानां तत्तद्द्रव्यत्वेनैक्यमेव न स्वरूपैक्यम्, तथा—वायवीयानामंशानामपि स्वरूपभेदोऽवर्जनीयः। **सोहं स च त्वमिति** सर्वात्मनां पूर्वोक्तं ज्ञानाकारत्वं तच्छब्देन परामृश्य तत्सामानाधिकरण्येनाहं त्वमित्यादीनामर्थानां ज्ञानमेवाकार इत्युपसंहरन्देवाद्याकारभेदेनात्मसु भेदमोहं परित्यजे-

---

दुक्तमिति। **एष** इति शब्दस्यार्थमाह—**एवमाकार इति**। **अन्य**शब्दार्थमाह—**अन्यादृशाकार इति**। आकारैक्यं नामाकाराणां सौसादृश्यमित्याभिप्रायेणै**वमाकारः, अन्यादृशाकार** इत्युक्तम्: अन्यथा स्वरूपमात्रप्रतिपत्तिरेकेनैव पदेन सिद्धेति—पदान्तरवैयर्थ्यप्रसङ्गात्पदान्तरमाकारपरमित्यर्थः। अस्यार्थस्य विपर्यये पर्यवसानमुत्तरश्लोकोक्तं, सोऽनुदाहृतः तदर्थमाह—**न चैवमिति**। अयं हि स श्लोकः—'यदा समस्तभूतेषु पुमानेको व्यवस्थितः। तदा हि को भवान् सोऽहमित्येतद्विफलं वच' इति। अ**त्रैक**शब्द आकारैक्यपरः, स्वयंप्रकाशत्व–नित्यत्वा–णुत्वादिः सर्वात्मसाधारणः, व्यावर्तकदेवाद्याकारस्तु नात्मन्यस्ति; व्यावर्तकाभावात्–तद्वाचिशब्देन निर्देशोऽनुपपन्नः। प्रत्यक्–पराक्–परोक्षत्वा–परोक्षत्वादीनि न व्यावर्तकानीति—**को भवा**निति प्रश्नस्तदतिरिक्ताकाराभिप्रायः न हि **भवा**निति प्रश्नः। **भवच्छब्दो** धर्मिमात्रपरः, **किं** शब्दो व्यावर्तकदेवाद्याकारपरः, तस्मात्तदतिरिक्ताकाराभावेन न तद्वाचिशब्देन निर्देश उपपद्यत इत्यर्थः। **ज्ञानैकाकारत्वेन समानत्वादेवेति**। पूर्वोक्तादेवेति भावः। उक्तनिर्वाहगोचरं दृष्टान्तमुखेनाद्वैतपरत्वेन परोक्तस्य श्लोकस्यार्थमाह—**वेणुरन्ध्रेति**। स्वत एकाकाराणामुपाधिवशादवान्तरभेदसद्भावमात्रे दृष्टान्तोपन्यासः: अन्यथा सर्वथा साधर्म्याभ्युपगमे हि—आत्मनोऽचित्त्वाकाशकार्यत्वादिकमपि स्यात्, तद्धि प्रमाणान्तरविरोधात्त्यज्यते, तथा—दृष्टान्तगतमाकारान्तरमपीति भावः। **तथासौ परमात्मन** इत्युक्ते षड्जादिसंज्ञाभेदो मा भूदित्यभिप्रायेणाह—**एवमात्मनां देवादिसंज्ञाभेद इति। भेदः षड्जादिसंज्ञित** इति पाठे सत्यपि **षड्जादिसंज्ञाभेद** इति व्याख्यातं; दुरवगमषड्जादिरूपभेदप्रतिपत्तिसौकर्यस्य संज्ञाभेदाधीनत्वादिति भावः। दार्ष्टान्तिकेऽपि तथैव, दृष्टान्ते व्यक्तिबहुत्वं किमस्तीति शङ्कायां–वाय्वंशानामनेकत्वं बहुतर्केण साधयति—**तैजसेति**। स्पर्शवद्द्रव्यत्वादिति भावः। यत्र त्वाकाशदृष्टान्त उक्तः तत्राप्येकस्यात्मनो दृष्टान्तत्वेनाकाशमुक्तत्वाऽऽत्मान्तरे तथात्वमिति मन्तव्यम्। 'सितनीलादिभेदेन यथैकं दृश्यते नभः। भ्रान्तदृष्टिभिरात्मा हि तथैकः सन् पृथक्पृथ'गिति–नभसः सितनीलादिभेदः शरत्प्रावृट्संध्यासमयेषु मेघोपश्लिष्टस्य तस्य यथा क्रमभावी, तथा–एकस्यात्मनोऽपि देवादिभेदः क्रमभावीति। यद्वा, तत्रापि प्रदेशभेदाङ्गीकारेण सर्वात्मदृष्टान्तः स्यात्, आकाशस्य प्रदेशभेदानभ्युपगमे—घटादेर्विभुत्वम्, आकाशस्याल्पत्वं वा प्रसजेत्। किं घटादेः कृत्स्नाकाशेन संबन्धः, उत प्रदेशभेदेन। पूर्वस्मिन्पक्षे—घटादेर्विभुत्वम्, आकाशस्याल्पपरिमाणत्वं वा। द्वितीये—प्रदेशभेदाङ्गीकार इति—वेदान्तिभिर्नभसो निरवयवत्ववादोऽपसिद्धान्तः; वेदान्तेषु तस्यांशभेदेन पक्षीकरणोपदेशात्, एकांशेन वायुत्वेन परिणामवादात्, उत्पत्तिलयदर्शनाच्चेति। अत एव 'घटध्वंसे घटाकाशो न भिन्नो नभसा यथा। ब्रह्मणा हेयविध्वंसे विष्वाख्येन तथा पुमा'निति शौनकवचनमपि नभस्यंशभेदाभिप्रायेण–जीवस्य परस्मादात्मन औपाधिकवैषम्यविरहे–दृष्टान्तसमर्पणपरं वेदितव्यं; 'यथाऽग्निरौ संक्षिप्तः समानत्वमनुव्रजे'दिति तत्रैव साम्यदृष्टान्तामिधानात्॥

अथादिभरतनिगमनश्लोकमाह—**सोहमिति**। पूर्वोक्तमध्यायचतुष्टयोक्तं **स** इति पदस्य ज्ञानाकारविशिष्टवस्तुवाचित्वेऽपि, विशेषणांशे तात्पर्यं दर्शयितुं **सर्वात्मनां ज्ञानाकार**मिति विशेषणांशस्य निष्कृष्य निर्देशः; अन्यथा **तत्सामानाधिकरण्येने**त्यनन्तरोक्तिविरोधात्। **ज्ञानमेवाकार इत्युपसंहरन्निति**। 'सोऽह'मित्यादिश्लोकानन्तरपूर्वश्लोके 'एकं समस्तं यदिहास्ति किंचित्तदच्युतो नास्ति परं ततोऽन्य'दित्यर्धेन सर्वात्मनां भगवच्छरीरत्वस्योक्तत्वात्—**सोऽह**मित्यादिश्लोकस्य च भगवदात्मकत्वनिगमनपरत्वशङ्का स्यात्, तच्चायुक्तं; प्रकरणस्य शरीरात्मविवेकपरत्वात्, तन्निगमनस्य चापेक्षितत्वात्, तन्निगमनपरश्लोकान्तराभावात्, अपेक्षितविधेरनपेक्षितविधानायोगाच्च–आत्मनां देहव्यावर्तकज्ञानैकाकारत्वनिगमनपरोऽयं श्लोक इत्यभिप्रायः। **त्यज भेदमोह**मित्यंशस्यार्थमाह—**देवाद्याकारभेदेनात्मसु भेदमोहं परित्यजेति।**

---

१ ज्ञानैकाकारा°।

त्याह । अन्यथा देहाद्यतिरिक्तोपदेश्यस्वरूपेऽहं त्वं सर्वमेतदात्मरूपमिति—भेदनिर्देशो न घटते । अहं-त्वमादिशब्दानामुपलक्ष्येण सर्वमेतदात्मस्वरूपमित्यनेन सामानाधिकरण्यादुपलक्षणत्वमपि न संगच्छते । सोपि यथोपदेशमकरोदित्याह—**तत्याज भेदं परमार्थदृष्टिरिति** । कुतश्चैष निर्णय इति चेत्, देहात्म-विवेकविषयत्वादुपदेशस्य । तच्च—'**पिण्डः पृथग्यतः पुंसः शिरःपाण्यादिलक्षणः** । (वि. पु. २ ।१३।८४) इति प्रक्रमात् । **विभेदजनकेऽज्ञान** इति च नात्मस्वरूपैक्यपरम्, नापि जीवपरयोः; आत्मस्वरूपैक्यमुक्तरीत्या निषिद्धम्, जीवपरयोरपि स्वरूपैक्यं देहात्मनोरिव न संभवति । तथा च श्रुतिः—'**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यन-**

देवादिशब्दो **भेद**शब्दविवरणरूपः । देहगतदेवत्वाद्याकारभेद आत्मनि भेदमोहहेतुस्तं भेदमोहं परित्यजेत्यर्थः । **कृत्स्न-भेदनिषेधपरत्वेऽनिष्टमाह—अन्यथेति** । नच—**अहंत्वमा**दिशब्दा देहपराः; नहि—**तच्छब्देनात्मानं** परामृश्य तेनात्मना देहानामैक्यमुपदिश्यते । नाप्यन्तःकरणपराः; न ह्यन्तःकरणानां परमात्मनैक्यं, परस्परैक्यं वोपदि-श्यते । नापि देहविशिष्टान्तःकरणपराः; नहि—देहविशिष्टानामन्तःकरणानामैक्यमुपदिश्यते । अतोऽ**हंत्वमा**दिशब्दा देहातिरिक्तात्मपरा इत्यभिप्रायेण **देहातिरिक्तेत्युक्तम्** । **अहंत्वमित्यादि**पदानामुपलक्षणत्वादुपलक्ष्ये वस्तुनि न भेद इत्याशङ्क्य परिहरति—**अहमिति** । **अहंत्वमादी**त्यादि शब्देन सर्वशब्दो विवक्षितः । **उपलक्ष्येणे**त्यौपचारि-कनिर्देशः, उपलक्ष्यवाचिपदेनेत्यर्थः । **सर्वमेतदात्मस्वरूपमित्यनेनेति । अहं, त्वं, सर्व**मिति त्रयाणामपि पदानामात्मस्वरूपशब्देन सामानाधिकरण्यं फलितम् । तेष्वन्यतमेनाहंत्वमर्थसजातीयार्थवाचिना **सर्वमेत**दिति पदेना-**त्मस्वरूप**शब्दस्य सामानाधिकरण्यनिर्देशादिति ज्ञापनार्थं **सर्वमेतदात्मस्वरूपमि**त्युपादानं कृतम् । भाष्ये श्लोके **स-र्वमेतदात्मस्वरूप**मिति प्रदर्शनार्थमुक्तम्, अतोऽ**हंत्वमादि**शब्दानामुपलक्ष्यवाचकाभिम**तात्मस्वरूप**शब्देन सामा-नाधिकरण्या**दहंत्वमादि**शब्दवाच्यानामर्थानामुपलक्षणत्वमसङ्गतं; न हि 'चन्द्रः शाखा, सारसः केदार' इत्युपलक्षणोपल-क्ष्यशब्दवाचिशब्दानां सामानाधिकरण्यं मुख्यतया दृष्टमित्यर्थः । **लक्षणयास्त्विति** चेत्, लक्षणैव दोष इति भावः । यद्वा, **अनेने**ति पदमुपलक्ष्यविशेषणं, **सर्वमेतदात्मस्वरूप**मित्यात्म**शब्दनिर्दिष्टेनानेनो**पलक्ष्येणा**हंत्वमादि**शब्दानां सामानाधिकरण्यादुपलक्षणत्वमसङ्गतमित्यर्थः । अस्यां योजनायाम**हंत्वमादि**सजातीयार्थवाचिसर्वपदसामानाधिकरण्यनि-र्देशस्य हेतुत्वमर्थसिद्धम् । यद्य**हंत्वमादि**शब्दा उपलक्ष्यपर्यन्तवृत्तयः तदानीमेवमर्थतया उपलक्ष्यवाचिना**त्मस्वरूप**मिति पदेन **स** इति पृथक्सामानाधिकरण्यदर्शनात्–उपलक्षणवाचका**हंत्वमादि**सामानाधिकरण्यवैयर्थ्यमिति—**अहं**शब्दस्यापे-क्षिकप्रत्यक्त्वं प्रवृत्तिनिमित्तं, **त्वं**शब्दस्य च चेतनत्वे सत्यभिमुखत्वम्, **आत्म**शब्दस्य च व्यापनक्षमत्वं, **स** इति पदस्य प्रकृतज्ञानाकारः । ननु—**स च सर्वमेतदात्मस्वरूप**मित्यत्र कथमात्मस्वरूपविशेषणस्य **तच्छब्द**स्य पुंलिङ्गत्वम्, उच्यते—'आत्मा शुद्धोऽक्षरः शान्त' इत्यादिषु परज्ञानमयत्वेन प्रकृत आत्मा हि **तच्छब्देन** परामृश्यते, अतो न विरोध इति । अ**चित्संसृष्टं** देवादिरूपेण प्रतीयमानं **सर्वमेतदात्मस्वरूपं** ज्ञानैकाकारः **स** आत्मेत्यर्थः । चतुर्थपादं व्याचष्टे—**सो पीति** । न जीवब्रह्माद्वैतपरमिदं प्रकरणं, न चात्मस्वरूपबहुत्वनिषेधपरं, प्रकारैक्यपरमिति कथं ज्ञायत—इत्यभिप्रा-येणाह—**कुतश्चेति** । परिहरति—**देहात्मेति** । तदपि कुत इत्यत्राह—**तच्चेति** । देहात्मविवेकपरत्वोपपादनेन जीवप-रैक्यपरत्वम्, आत्मबहुत्वनिषेधपरत्वं च दत्तोत्तरमेव ॥

अथ शास्त्रोपसंहारगतस्य **विभेदजनक** इत्यादिश्लोकस्यार्थं वक्ष्यन्, अर्थान्तरपरत्वं व्युदस्यति—**विभेद इत्यादिना**। **प्रथमं किमात्मस्वरूपैक्यपरम्**, उत जीवपरैक्यमिति—विकल्प्य दूष्यते । अत्र **च**शब्दाभावा**दात्मब्रह्म**शब्दयोः सामा-नाधिकरण्यं **संभावितं**, तथा सति **ब्रह्म**शब्दः शुद्धावस्थापरः स्यात्, एवं शुद्धावस्थाजीवस्य भेदो नास्तीति—जीवस्वरूपै-क्यमुक्तं स्यात्, **अतः शङ्कास्पदीभूतमात्मैक्यपरत्वं** दूषयति—**आत्मेति** । **उक्तरीत्या** श्रुतिस्मृत्यर्थापत्तिलौकिकार्थाप-त्त्यादिभिरित्यर्थः । द्वितीयं **पक्षं** दूषयति—**जीवेति** । **देहात्मनोरिवेति** विरुद्धधर्मत्वादित्यर्थः । प्रत्यक्पराक्—जड-**लाजडत्व–नित्यत्वपरिणामित्वादिभिर्विरुद्धधर्मैर्यथा** देहात्मनोर्भेदः, तथाजीवपरयोरपि हेयार्हत्वोभयलिङ्गत्व–नियाम्यत्वनिय-**न्तृत्वादिविरुद्धधर्मैरैक्यं** हि नोपपद्यते । विरुद्धधर्मत्वे प्रमाणमाह—**तथा चेति** । **तथा** विरुद्धधर्मत्व इत्यर्थः । **चो** ह्यर्थः **हेतुवाची, वक्ष्यमाणहेतूनां पञ्चमी प्रयुक्ता** तत्स्थानीयोऽयं **च**शब्दः । **समानं वृक्षं** शरीरम् । **पिप्पलं** कर्मफलम् । अ-**भिचाकशीति स्वयमनश्नत्त्वात्, आशयित्वाच्च**—भृशं भातीत्यर्थः । ननु—कथमस्य मन्त्रस्य जीवपरमात्मभेदपरत्वम्; **अन्तःकरणजीवपरो ह्ययं मन्त्रः; पैङ्गिरहस्यब्राह्मणेनास्य मन्त्रस्य** तथा व्याख्यातत्वात् । यथा—**तयोरन्यः पिप्पलं स्वा-**

श्नन्नन्योऽभिचाकशीति ॥' (मु. ३।१।१), **'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे । छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः ॥'** (का. ३।१), **'अन्तः प्रविष्टः शास्ता जनानाम्'** (तै. आ. ३।११), **'सर्वात्मा'** (कै. १६) इत्याद्या । अस्मिन्नपि शास्त्रे—**'स सर्वभूतप्रकृतिं विकारान्गुणादिदोषांश्च मुने व्यतीतः । अतीतसर्वावरणोऽखिलात्मा तेनास्तृतं यद्भुवनान्तराले ॥ समस्तकल्याणगुणात्मकोसौ'** (वि. पु. ६।५।८३-८४), **'परः**

द्वत्तीति सत्त्वम्, अ**नश्नन्नन्यो**ऽ**भिचाकशीति** ङः, तावेतौ मत्रक्षेत्रज्ञाविति—**स्वाद्वत्ती**त्यन्तेन सत्त्वमुक्तम्, **अभिचाकशीती**त्यन्तेन वाक्ये**नानश्नन्नन्यो ज्ञ** इति क्षेत्रज्ञोऽ**भिपश्यती**त्युक्तमिति व्याख्यातत्वमवगम्यते । नच—सत्त्वशब्दो जीवपरः, क्षेत्रज्ञशब्दः परमात्मपर—इति वाच्यं; सत्त्वक्षेत्रज्ञशब्दयोरन्तःकरणजीवपरतया प्रसिद्धत्वात्–'तदेतत्सत्त्वं येन स्वप्नं पश्यति, अथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञस्तावेतौ सत्त्वक्षेत्रज्ञौ'विति—सत्त्वक्षेत्रज्ञशब्दयोरन्तःकरणजीवपरत्वेन तत्रैव व्याख्यातत्वाच्च । **येन पश्यती**ति करणत्वप्रतीतेः—सत्त्वं त्वन्तःकरणं, स्वप्नद्रष्टृत्वा**दितरः क्षेत्रज्ञो** हि जीवः, अतो **द्वा सुपर्णे**ति मन्त्रोऽयमन्तःकरणजीवपरः, न तु जीवपरमात्मपर इति; उच्यते—न तावज्जीवपरमात्मपरत्वमस्य मन्त्रस्यापवदितुं शक्यते; अनेन मन्त्रेण तुल्यार्थतया प्रत्यभिज्ञायमाने **समाने वृक्षे पुरुषो निमग्न** इत्यनन्तरमन्त्रे जीवपरमात्मनोः प्रतिपन्नत्वात्, अस्य मन्त्रस्य तदैकार्थ्याच्च; **समानं वृक्षं परिषस्वजाते, समाने वृक्षे पुरुषोनिमग्न** इति—तयोरैकार्थ्यं हि प्रतीयते । **समाने वृक्ष** इति मन्त्रे च **पुरुषो** जीवः; अन्तःकरणस्य **पुरुष**शब्दवाच्यत्वाभावात्, **शोचति मुह्यमानः, पश्यति वीतशोक** इति पदानामस्यारस्यप्रसङ्गाच्च । अन्यश्च परमात्मा; ईशशब्दवाच्यत्वात्, स्वविषयज्ञानेन वीतशोकत्वहेतुत्वाच्च । न केवलमुत्तरमन्त्रैकार्थ्याद् **द्वासुपर्णे**ति मन्त्रस्य जीवपरमात्मपरत्वं, किंतु तस्मिन्नेव **स्वाद्वत्ति, अनश्नन्नन्य** इति भोक्तृत्वाभोक्तृत्वश्रवणाच्च—तदवगम्यते । चक्षुःश्रोत्रादीनां द्रष्टृत्वश्रोतृत्वादिवदन्तःकरणस्यापि करणत्वादेव भोक्तृत्वं न संभवति, जीवस्य च **वृक्ष**शब्दोक्ते देहपरिष्वङ्गदशायामेव **अनश्नन्त्व**मपि नोपपद्यते । तर्हि पैङ्गीरहस्यब्राह्मणस्य कोऽर्थः, उच्यते—**सत्त्वं** बद्धजीवः 'द्व्यासु व्यवसायेषु सत्त्वमन्त्री तु जन्तुष्वि'ति नैघण्टुकपाठात्त्वन्तुपरत्वावगतेः । जन्तुश्चेतनः; 'प्राणी तु चेतनो जन्मी जन्तुर्जन्युश्शरीरिण' इति पाठात्, 'न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः । सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणै'रिति प्रयोगात्, 'वन्यान्विनेष्यन्निव दुष्टसत्त्वा'नित्यर्वाचीनप्रयोगाच्च । **क्षेत्रज्ञ**शब्दश्चात्र परमात्मपरः; अर्थान्तरप्रसिद्धाकाशप्राणादिशब्दवदर्थानुपपत्त्या—परमात्मपरत्वोपपत्तेः, 'विष्णोर्नामसहस्रं मे'इत्युपक्रम्य 'क्षेत्रज्ञोऽक्षर एव चे'ति प्रयोगात्, क्षेत्रं जानातीत्यवयवार्थस्य तस्मिन्नेव पुष्कलत्वाच्च, मोक्षधर्मे 'ततस्त्वैगुण्यहीनास्ते परमात्मानमञ्जसा । प्रविशन्ति द्विजश्रेष्ठ क्षेत्रज्ञं निर्गुणात्मकम् ॥ सर्वावासं वासुदेवं क्षेत्रज्ञं विद्धि तत्त्वतः । विश्वमूर्धा विश्वभुजो विश्वपादाक्षिनासिकः ॥ एकक्षरति क्षेत्रेषु स्वैरचारी यथासुखम् ॥ क्षेत्राणि च शरीराणि बीजानि च शुभाशुभे ॥ तानि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यते' इति प्रयोगात्, 'यस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते । यः करोति च कर्माणि स भूतात्मेति चोच्यत' इति प्रयोगाच्च । **येन स्वप्नं पश्यति** इत्यत्र **येने**तीत्यंभावे तृतीया—येन विशिष्टः परमात्मा स्वप्नं पश्यतीत्युच्यते । ततश्च **काठिन्यवान् यो बिभर्त्ति** इति पृथिवीद्वारा काठिन्यवत्—स्वप्नद्रष्टृत्वं जीवात्मद्वारा परमात्मविशेषणं भवतीति न विरोधः । **शारीर**शब्दश्च 'तस्यैष एव शारीर आत्मे'तिवत् स्वव्यतिरिक्तसमस्तचिदचिद्वस्तुशरीरके परमात्मन्युपपद्यते । **उपद्रष्टे**ति निरुपाधिकद्रष्टृत्वं च सर्वज्ञस्य तस्यैवोपपद्यते । अतो **द्वा सुपर्णे**ति मन्त्रो जीवपरमात्मपरः । **ऋतं पिबन्ता**विति पानक्रियायां जीवपरयोः प्रयोज्यप्रयोजकभावेनान्वयः । **पिबन्ता**विति शतृप्रत्ययः । कर्तृमात्रपरः, नतु कर्तृविशेषपरः, **तेन प्रयोज्य-प्रयोजकौ** द्वावपि कर्तृविशेषाविति तावविशेषेण क्रीडीकृतौ भवतः; अन्यथा **अनश्नन्नि**त्यादिविरोधः स्यात् । यद्वा, 'छत्रिणो गच्छन्ती'तिवदजहल्लक्षणा; सुकृतस्य **ऋतं** फलम् । यद्वा, **सुकृतस्य लोक** इत्यन्वयः, तदा ऋतं सुकृतं–तत्फलमुच्यते लक्षणया; 'एवं पुण्यस्य कर्मणो दूराद्वन्धो वाती'त्यत्र–'एवमनृतादात्मानं जुगुप्से'दिति पुण्यप्रतियोगित्वे**नानृत**शब्दप्रयोगात् । **गुहां** हृदयगुहाम् । **परमे परार्ध्ये** इति लोकविशेषणं, जीवपरविशेषणं वा । छान्दसत्वाल्लिङ्गव्यत्ययः । **छायाऽऽतपौ** अज्ञसर्वज्ञौ; 'ज्ञाज्ञौ द्वावजावीशनीशा' वित्यनेनैकार्थ्यात् । **ब्रह्मविदः** अध्यात्मविदः । **पञ्चाग्नयः, त्रिणाचिकेताश्च** कर्मविशेषनिष्ठाः । ते **वदन्ति** । यथा—'ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः । ते वदन्ति महात्मानं कृष्णं धर्मं सनातन'मिति । **ऋतं पिबन्ता**वित्येतद्वैशद्यायाह—**अन्तःप्रविष्ट इति** । इत्याद्याः **श्रुतय** इत्यन्वयः । न केवलं श्रुतिस्वारस्यात्, अस्मिन्नपि प्रबन्धे दृश्यते इत्याह—**अस्मिन्नपीति । स सर्वभूते**त्यादिना हेयप्रत्यनीकत्व-कल्याणगुणाकरत्वे कथिते । जीवस्य हेयासदृश**मविद्ये**त्यादिना उक्तम् । **सर्वगे**ति **भेदव्यपदेशा**दिति पूर्वेण संबन्धः, नतु सूत्रोपादानम्; उपर्यस्य सूत्रस्य विषयवाक्यानुपादानात्, उदाहृतपुराणवचनानां हेतुत्वकथनसापेक्षत्वाच्च । श्रुतिवाक्यस्य **हेतुत्वं** हि

पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे । (वि. पु. ६।५।८५), **'अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते । यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप सर्वगा ॥'** (वि. पु. ६।७।६१) इति भेदव्यपदेशात् । **'उभयेऽपि हि भेदेनैनमधीयते'** (ब्र. सू. १।२।२१), **'भेदव्यपदेशाच्चान्यः'** (ब्र. सू. १।१।२२), **'अधिकं तु भेदनिर्देशात्'** (ब्र. सू. २।१।२२) इत्यादिसूत्रेषु च **'य आत्मनि तिष्ठन्नात्मनोन्तरः । यमात्मा न वेद । यस्यात्मा शरीरम् । य आत्मानमन्तरो यमयति'** (बृ. ३।७।२२), **'प्राज्ञेनात्मना संपरिष्वक्तः'** (बृ. ४।३।२१), **'प्राज्ञेनात्मनान्वारूढः'** (बृ. ४।३।३५) इत्यादिभिरुभयोरन्योन्यप्रत्यनीकाकारेण स्वरूपनिर्णयात् । नापि साधनानुष्ठानेन निर्मुक्ताविद्यस्य परेण स्वरूपैक्यसंभवः; अविद्याश्रयत्वयोग्यस्य तदनर्हत्वासंभवात् । यथोक्तम्— **'परमात्मात्मनोर्योगः परमार्थ इतीष्यते । मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः ॥'** (वि. पु. २।१४।२७) इति । मुक्तस्य तु तद्धर्मतापत्तिरेवेति भगवद्गीतासूक्तम्—**'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेपि नोपजायन्ते प्रलये न व्यथन्ति च ॥'** (गी. १४।२) इति । इहापि—

चशब्देनोक्तम् । **उभयेऽपी**त्याद्युपात्तसूत्रद्वयस्य विषयवाक्यं—**य आत्मनी**ति । **अधिकंत्वि**त्यादिसूत्रस्य विषयवाक्यं—**प्राज्ञेने**ति । सूत्रेष्वाभिः श्रुतिभिरेवमर्थनिर्णयादित्यर्थः ॥

एवमुपनिषत्पुराणवचनसूत्रैर्जीवपरयोर्विरुद्धधर्मत्वमुपपादितम्, अथ **ब्रह्मवेद ब्रह्मैव भवती**त्यादिवाक्यानि हृदि निधायास्याऽन्यथासिद्धिं शङ्कते—**नापीति** । तद्दूषयति—**अविद्याश्रयत्वेति** । **अविद्याश्रयत्वयोग्यत्वम्—अविद्याशब्दः** समस्तहेयप्रदर्शनार्थः, **आश्रय**शब्दः संबन्धपरः, हेयसंबन्धात्यन्ताभावानधिकरणत्वं **तद्योग्यत्वं**, हेयसंबन्धात्यन्ताभावाधिकरणत्वं **तदनर्हत्वम्** । **अनश्नन्नन्य** इत्यादिश्रुत्या परमात्मनस्तदनर्हत्वं सिद्धम् । देशकालसन्निकर्षे सत्यपि तदस्पर्शो हि स्वभावसन्निकर्षाभावात् । स्वभावसन्निकर्षाभाव एव ह्ययोग्यत्वं, यथा—नभसः क्लेदनदहनाद्यनर्हत्वम् । अतो हेयार्ह—तदनर्हयोः स्वरूपोपगमेऽपि न स्वरूपैक्यं संभवति निग्राह्यस्य पश्वादेनुगृहीतस्य हि निग्राह्यत्वापगमेऽपि निग्रहानुग्रहकर्त्रा पुरुषेण नैकत्वसंभव इत्यर्थः । कारागृहविनिर्मुक्तस्य नियन्त्रा नरपतिना न स्वरूपैक्यं संभवतीत्यर्थः । अस्मिन्नर्थे पुराणवचनमाह—**यथोक्तमिति** । **योग**शब्द ऐक्यपरः; अन्यथा 'अन्यद्द्रव्यं हि तद्द्रव्यतां नैती'ति प्रतिक्षेपानुपपत्तेः । ननु—**मिथ्यैत**दित्युत्तरत्रान्वयः । **परमात्मनोर्योगः परमार्थः अन्यद् द्रव्यं हि तद्द्रव्यतां नेतीत्येतन्मिथ्ये**त्यर्थ इति—चेन्नैवम्; अन्यस्यान्यद्रव्यतानापत्तेः सत्यत्वात्; इतरथा जडाजडयोस्तादात्म्यप्रसङ्गः । 'ऋग्यजुःसामनिष्पाद्यं यज्ञकर्म मतं तवे'तिवत्—**इष्यत** इत्यनेन पूर्वार्धोक्तार्थस्य परमतत्वद्योतनात्—अन्य**थेष्यत** इति पदवैयर्थ्यात् । किंच 'परमार्थस्तु भूपाल संक्षेपाच्छ्रूयता'मिति वक्ष्यमाणपक्षव्यतिरिक्तपक्षाणां निराकरणपरत्वाच्च—प्रकरणस्य तच्छ्लोकपूर्वार्धैक्यसमर्थनपरत्वमुत्तरार्धस्य नोपपद्यते । 'धर्माय ल्यज्यत' इत्यादिप्रत्ययैस्तत्तदर्थानां परमार्थत्वं हि निरस्यते । स्वतः प्रकृतार्थे स्वरसस्य **एतच्छब्दस्य** प्रकृतार्थे सत्यपि वक्ष्यमाणपरत्वाश्रयणमप्ययुक्तम् । किञ्च—**अन्यद्द्रव्यं तद्द्रव्यतां नैतीति यत् एतन्मिथ्येति** हि तदानीमर्थः, **तथाच सति—यतः**शब्दस्य स्वारस्यभङ्गः; **यतः**शब्दस्य हि हेतुपरत्वं स्वरससिद्धं; ननु यच्छब्दवत्प्रकृतार्थशरीरमात्रपरामर्शित्वम् । **अन्यद्द्रव्यं तद्द्रव्यतां नैतीत्येतन्मिथ्येति यतः ततः ऐक्यं परमार्थ**—इत्यन्वये **इति**शब्दद्वयाध्याहारप्रसङ्गः, स चानध्याहारेण निर्वाहे सति नोपपद्यते । यदुच्येत पूर्वं पृथग्भूतयोः **परमात्मात्मनोरैक्यं परमार्थं इष्यत इति चेन्मिथ्यैतत्; अन्यद्द्रव्यं हि तद्द्रव्यतां नैतीति यत**स्तस्मात्पूर्वमपि परमात्मात्मनोर्भेदो नास्तीति—**नैवं; पूर्वं** भ्रान्त्या पृथग्भूतयोरिव्यस्याश्रुतत्वेनाध्याहारप्रसङ्गात्, स चानध्याहारेण निर्वाहे संभवति नोपपद्यते । किंच-तस्मात्पूर्वमपि **भेदो** नास्तीत्यश्रुतवाक्यान्तराध्याहारेण वाक्यस्य पूरणीयत्वं स्यात्, तच्च तन्निरपेक्षनिर्वाहे संभवति नोपपद्यते । तस्मात्**प्रागपि भेदो नास्तीति** वाक्यं नाध्याहर्तव्यं; **पूर्वं भिन्नयोः परमात्मात्मनोः पश्चाद्भेद—इति-पक्षनिराकरणमात्रपरत्वाद्**—इति चेन्, किं तेन प्रयोजनं, पूर्वमप्यैक्यसिद्धिरिति—चेन्न; पूर्वं पृथग्भूतयोः **पश्चादैक्यायोगेऽभिहिते** सति पश्चादपि भेदसिद्धेः, अतः स्वरससिद्ध एव वाक्यार्थः स्वीकार्यः ॥

अथ ब्रह्म वेद ब्रह्मैव भवतीत्यादिवाक्यनिर्वाहं बहुश्रुत्यन्तराविरोधेन च वक्ष्यन्मुक्तस्य साम्यापत्तिमाह—**मुक्तस्येति** । **तत्रैक्यश्रुतेः** प्रतिकूलार्थां साम्यश्रुतिर्दर्शयिष्यत इति मत्वा व्याख्येयतया—प्रकृतस्योपबृंहणवचनस्य सजातीयं परा**भिमतार्थप्रतिकूलार्थस्मृतिवचनं** दर्शयति—**इदमिति**। मुक्तपरत्ववैशद्यायोपादानं **सर्गेपीति** । न केवलं शास्त्रान्तरे, अत्रापि

'आत्मभावं नयत्येनं तद्ब्रह्म ध्यायिनं मुने । विकार्यमात्मनः शक्त्या लोहमाकर्षको यथा ॥' (वि. पु. ६।७।३०) इति । **आत्मभाव**मात्मनः स्वभावम् ; नह्याकर्षकस्वरूपापत्तिराकृष्यमाणस्य । वक्ष्यति च **'जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च'** (ब्र. सू. ४।४।१७), **'भोगमात्रसाम्यलिङ्गाच्च'** (ब्र. सू. ४।४।२१), **'मुक्तोपसृप्यव्यपदेशाच्च'** (ब्र. सू. १।३।२) इति । वृत्तिरपि **'जगद्व्यापारवर्जं समानो ज्योतिषा'** (बो. वृ.) इति । द्रमिडभाष्यकारश्च **'देवतामायुज्यादशरीरस्यापि देवतावत्सर्वार्थसिद्धिः स्या'**दित्याह । श्रुतयश्च—**'य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति'** (छा. ८।१।६), **'ब्रह्मविदाप्नोति परम्'** (तै. २।१।१), **'सोश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता'** (तै. २।१।१), **'एतमानन्दमयमात्मानमुपसंक्रम्य । इमाँल्लोकान्कामान्नी कामरूप्यनुसंचरन्'** (तै. ३।१०।५), **'स तत्र पर्येति'** (छा. ८।१२।३), **'रसो वै सः । रसꣳ ह्येवायं लब्ध्वानन्दी भवति ।'** (तै. २।७।१), **'यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान्नामरूपा-**

मुक्तस्य भेदप्रतिपत्तिरस्तीत्याह—**इहापीति । इह** योगप्रकरणे, सङ्क्षेपकथनारम्भ इत्यर्थः । संक्षेपविस्ताराभ्यां तु 'किमन्यत्क्रियतां तवे'ति ह्युक्तम् । **आत्मनः शक्त्या विकार्यम**वस्थान्तरं नेयम् । **ध्यायिनमेनं तद्** ब्रह्म **आत्मभावं नयति आत्मनः शक्त्या विकार्यं लोहमाकर्षको यथे**त्यन्वयः । **आकर्षको** वह्निः—दोषमाकर्षतीति व्युत्पत्त्या । 'यथाग्निरुद्धतशिखः कक्षं दहति सानिलः। तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिष'मिति ह्युत्तरत्र वक्ष्यते। श्रीविष्णुधर्मेच—'यथाग्निसङ्गात्कनकमपदोषं प्रजायत' इति। सोऽग्निः **आत्मभावं आत्मनः स्वभावं**—निर्दोषत्वं **लोहं नयति** तथेत्यर्थः, अयं सम्यगर्थः। यद्वा, **आत्म**शब्दः स्ववाची सन्नन्ययोगव्यतिरेकपरः । **यथाऽग्निर्लोहमात्मभावं** स्वभावं—स्वतःसिद्धरूपं नयति, तद्वदित्यर्थः । यद्वा, **आकर्षको**ऽयस्कान्तः **लोहमात्मभावं नयति** स्वव्यापारं लोहं कारयति—स्वमनुकारयति । 'स्थितः स्थितामुच्चलितः प्रयाता' मितिवत्—अयस्कान्तस्तिष्ठति चेत् लोहस्तिष्ठति, धावति चेत्तमनुधावति, एवं—'कामान्नीकामरूप्यनुसंचरन् सर्वेषु लोकेषु कामचारो भवती'त्यादिश्रुत्यनुगुणं परमात्मा उपासकं स्वचेष्टामनुकारयति, समानचेष्टितं करोतीत्यर्थः । यद्वा, **आत्म**शब्दः स्ववाची निष्कृष्टस्वरूपपरः, उपासकं परमात्मा **आत्मभावं नयति** प्रकृतिसंबन्धराहित्येन शुद्धतां नयति—केवलतां नयति । यथा—अयस्कान्तो दारुनिमग्नं लोहं तस्माद्दारुण उद्धृत्य केवलतां नयति—तद्वदित्यर्थः । यद्वा, 'भू प्राप्तावात्मनेपदी'ति वचनात्—**भाव**शब्दः प्राप्तिवचनः—**आत्मप्राप्तिं नयति,** यथा—लोहमयस्कान्तः स्वप्राप्तिं नयतीत्यर्थः । **प्राप्तिं नयती**ति निर्देशः—ओदनपाकं पचतीतिवत् । जीवस्य परमात्मशक्त्या विकार्यत्वं युक्तं; जीवस्य बन्धमोक्षयोर्ज्ञानसंकोचविकासरूपविकारार्हत्वात् । अत्र श्लोके तादात्म्यप्रतिपत्त्यभावं दर्शयति—**न हीति ।** आकर्षकस्वरूपापत्तिराकृष्यमाणस्येति निर्देश उक्तः । सर्वार्थसाधारणः अग्निसुवर्णदृष्टान्तविवक्षायामाकृष्यमाणशब्दो विकार्यपरः । **समानो ज्योतिषेति ज्योतिः** परं ब्रह्म; 'परं ज्योतिरुपसंपद्य, अथ यदतः परो दिव्यो ज्योतिर्दीप्यत' इति श्रुतेः । **द्रमिडेति । अशरीरो** मुक्तः, कर्मकृतशरीराभावात् । **सिद्धि**रनुभवः । मुक्तौ जीवपरयोर्भेदश्रुतीर्दर्शयति—**श्रुतयश्चेति । आप्नोति** परमनुभवतीत्यर्थः । एतद्विवरणरूपं वाक्यं दर्शयति—**सोश्नुत इति । अनुसंचर**न्नित्यनेन भेदो दर्शितः । **रसो वै स** इत्यनेन **साम्य**मानन्दिलाकारेणेत्युक्तं भवति । परमसाम्योपयोगिनीं वैधर्म्यनिवृत्तिं दर्शयति—**यथा नद्य इति ।** नदीनां नदीलाकारप्रहाणेन समुद्रसंसर्गात्—वैधर्म्यप्रहाणेन संसर्गो दृष्टान्ते उपजीव्यः । प्राकृतनामरूपप्रहाणपूर्विका हि परमात्मप्राप्तिः । नच तावता भेदनिवृत्तिः; **पुरुषमुपैती**ति कर्मकर्तृभावावगमात् । साम्यापत्तिं दर्शयति—**तथेति ।** ननु—**परमं साम्यमुपैती**त्यैक्यापत्तिरुच्यते; **सम**शब्दस्य समानपर्यायत्वात्, समानशब्दवदैक्ये प्रयोगाच्च । समशब्दस्यैक्ये प्रयोगो दृश्यते समकालवर्तीत्यादिषु, तथा **सम**शब्दपर्यायतया अवगत**समान**शब्दोऽप्यैक्ये प्रयुज्यते—'समानं वृक्षं परिषस्वजाते' इति, **एकस्मिन्नर्थे वृत्तिः सामानाधिकरण्य**मिति च । ऐकाधिकरण्यं हि सामानाधिकरण्यम्; एकस्मिन्नर्थे इत्युक्तेः । तत्पर्यायश्च **सम**शब्दः । यद्यपि—सादृश्यस्यापि **सम**शब्दो वाचकः, तथापि—मुक्तिवाक्यस्थ**साम्य**शब्द ऐक्यपरः; **ब्रह्म वेद ब्रह्मैव भवती**त्यादिश्रुत्यन्तरैकार्थ्यात्, **लयसायुज्य**शब्दश्रवणात्, नदीसमुद्र-घटाकाशमहाकाशादिदृष्टान्तश्रवणाच्च । **साधर्म्यमागता** इति स्मृतिस्तु सगुणप्राप्तिविषया; अन्यथा प्रत्यक्षश्रुतिविरोधे, स्वरूपैक्यविषय-

---

१ स्वभाववाची का. मु. पु. ।

बहुस्मृतिविरोधे च—तद्दौर्बल्यात्। अत ऐक्यापत्तिरेवानेन वाक्येन प्रतिपादिता। ऐक्यस्य च **पारम्यं** नाम—पुनर्भेदप्रमप्रोद्विरहितत्वमिति। **अत्रोच्यते—अत्र साम्य**शब्दः सादृश्यमेवाभिधत्ते, न त्वैक्यम्; ऐक्यस्य मुख्यार्थत्वेऽभ्युपगतेऽपि खारस्याभावात्। सादृश्ये एव हि **सम**शब्दस्य प्रसिद्धिप्राचुर्यं, तस्य चापवादाभावे सत्यखरसार्थस्वीकारोऽनुपपन्नः, अपवादहेतवश्च लदुक्ता अनन्तरमेव परिहियन्ते। नच **समा**दिशब्दानामैक्यं मुख्यार्थः; एकत्वविवक्षायामेको घट इत्यादौ समो घट इत्यादिप्रयोगाभावात्। मुख्यत्वे हि एकशब्दस्येव प्रतियोगिनिरपेक्षप्रयोगः प्राप्नोति। यत्तु सामानाधिकरण्यं समकालवर्तीत्यादिषु **समादि**शब्दप्रयोगः स तु साधारण्यार्थः, न त्वैक्यार्थः, साधारण्येऽपि प्रयोगो न मुख्यः; प्रयोगेऽन्यथासिद्धे शक्तिकल्पनाऽनुपपत्तेः। तथाहि—अनेकप्रतियोगिकैकरूपसबन्धवत्त्वं साधारण्यं, यथा—धनं देवदत्तयज्ञदत्तौ प्रति शेषत्वेन संबन्धितया साधारणं, तयोश्च धनं प्रति शेषितयास्ते सादृश्यं, ताभ्यां संबन्धि धनं, तथा—नीलत्वोत्पलत्वे अपेक्ष्याधारतया संबन्धि द्रव्यं साधारणं, तयोश्च द्रव्यं प्रत्याधेयतयास्ते सादृश्यं, ताभ्यां संबन्धि द्रव्यं, तथा—द्वाभ्यां संयोगित्वेन अवच्छेद्यावच्छेदकभावेन वा संबन्धो कालस्तयोः साधारणः, तत्कालसंबन्धिलाकारेण तयोरपि सादृश्यमस्ति, ताभ्यां संबन्धी कालः। अतो मिथःसदृशपदार्थसंबन्धितया द्रव्यकालादिषु समसमानादिशब्दा लक्षणया वर्तन्त इति—न मुख्याः। अत ऐक्ये प्रयोगाभावात्—**समशब्दस्यैक्यं** न मुख्यार्थः, मुख्यार्थे संभवति लाक्षणिकार्थस्वीकारो नोपपद्यते, अतः **साम्य**शब्दः सादृश्यमेवाभिधत्ते। मुक्तात्मगोचरसामानाधिकरण्योपपत्तिस्थानन्तरमेव भाष्ये वक्ष्यते। यदुक्तं—**सायुज्य**शब्देन मुक्तावमेद—इति, तदयुक्तं: **सायुज्य**शब्दस्य समानगुणयोगवाचित्वात्। **युज्यत** इति युक्तशब्दो गुणपरः, धर्मिणि हि गुणः संबध्यते। समानगुणकः **सयुक्** तस्य भावः **सायुज्यमिति** हि व्युत्पत्तिः। प्रयोगविरोधाच्च नैक्यं सायुज्यम्। 'एतासामेव देवतानां सायुज्यं सार्ष्टितां समानलोकतामाप्नोती'ति बह्वीभिर्देवताभिरेकस्य सायुज्यापत्तिः श्रूयते, न ह्येकस्य निरवयवस्याच्छेद्यस्यात्मनो बह्वीभिर्देवताभिरैक्यं संभवति, क्रमभाविलादविरोध इति चेत्—तर्ह्यग्निनैकीभूतस्य वरुणसायुज्यापत्तावग्निलोपाधेः प्रहाणात्—अग्नेर्देवताया अभावः स्यात्; अग्निलोपाधौ स्थिते—वरुणैक्यापत्त्यनुपपत्तेः, औपाधिकभेदप्रहाणं ह्यैक्यापत्तिः, न तु पूर्वमविद्यमानैक्यमुत्पद्यते। अग्नौ स्थित एव ततः पृथग्भूतस्य वरुणसायुज्यमिति चेत्—एकीभूतस्य पृथग्भावो ह्युपाधितः स्यात्, उपाधिश्च देहान्तःकरणादिः, तत्सबन्धस्याहेतुकलेऽतिप्रसङ्गात्—हेतुर्वाच्यः। कर्मैव हेतुरिति चेत्—अग्निसायुज्यापत्तिदशायां तत्कर्म नष्टं, न वा। नष्टं चेत्, पुनरुपाध्यनुदयेनाग्नितः पृथग्भावायोगात्, अग्निलोपाधेश्चाप्रहाणात्, पूर्वोपाधिप्रहाणरूपवरुणसायुज्यापत्तिः क्रमेणापि नोपपद्यते। अनष्टं चेत्—तत्कृतोपाधेरनष्टत्वात्—नाग्निनैक्यापत्तिसंभवः, औपाधिकभेदस्य तत्प्रहाणरूपैक्यापत्तिविरोधित्वात्। अनष्टमपि तत्कर्माग्निसायुज्यापत्तिदशायां ततो भेदकमुपाधिं न जनयति; कर्मणां कार्यकरत्वस्य कालविशेषनियतत्वादिति चेत्, तथापि व्यवस्थितकर्मविशेषपरिष्वक्तस्य जीवस्य तत्कर्मापरिष्वक्तादग्नितस्तदेव कर्म भेदकमिति—नाग्निनैक्यापत्तिरुपपन्ना। किंच—पृथिव्येकीभूतपृथग्भूतघटस्येव—अग्निनैकीभूतपृथग्भूतजीवस्याजलनित्यत्वानुपपत्तिश्च। अतो भेदे स्थित एव अग्न्यादिसायुज्यम्। समानलोकतासाहचर्याच्च नैक्यं सायुज्यं; न ह्येकस्य स्वेन समानलोकत्वसंभवः, अतः समानलोकत्ववद्भेदे सिद्ध एव सायुज्यं भवति। समानलोकताप्राप्त्यनन्तरं सायुज्यापत्तिः, न तु युगपदेव, अतस्तयोरविरोध—इति चेन्न; **सायुज्यं सार्ष्टितां समानलोकतामिति सायुज्यस्य** पूर्वश्रुतत्वात्। अर्थक्रमेण पाठक्रमबाध इति—चेन्नः अवयवशक्त्युपस्थापितार्थस्य पाठक्रमानुगुण्यात्, अर्थान्तरकल्पनस्याहेतुकत्वाच्च। यदि—पाठक्रमबाधार्थं **सायुज्य**शब्दस्यैक्यापत्तिलक्षणार्थविषया रूढिशक्तिः कल्प्यते, तदा—**अन्योन्याश्रयः स्यात्**—सायुज्यस्यैक्यापत्तिलक्षणनिश्चये पाठक्रमबाधः, पाठक्रमबाधे सति सायुज्यस्यैक्यापत्तिलक्षणनिश्चय—इति। **एतेषामेव सलोकतां सायुज्यमश्नुत** इति वाक्यात् पूर्वोदाहृतवाक्यस्थक्रमबाध इति—चेन्न; विरुद्धार्थविषयाया रूढिशक्तेरकृतत्वात्—विरोधास्फुरणात्। किंच—'अग्नेर्वा एतानि नामधेयानि, अग्नेरेव सायुज्यं सलोकतामाप्नोति, वायोरेव, इन्द्रस्यैव, बृहस्पतेरेव, प्रजापतेरेव, ब्रह्मण एव सायुज्यं सलोकतामाप्नोती'ति भूयसां वाक्यानां बह्वीषत्त्वात्तदुक्तक्रम एव बाधः। किंच—**'एतेषामेव सलोकतां सायुज्यमश्नुते**, अग्नेरेव सायुज्यं सलोकतामाप्नोती'त्यादिवाक्यानि कर्मविधिशेषार्थवादरूपाणि, कर्मफलत्वाच्च—अग्न्यादिदेवतासायुज्यमनित्यम्, अतः कर्मफलवत्सानेऽग्न्यादिभ्यस्तत्सायुज्यं प्राप्तानां पृथग्भावस्यावर्जनीयत्वात्, आमोक्षाद्भावभेदस्थितेर्भवतामपीष्टत्वात्—अग्न्यादिसायुज्यदशायामपि भेदस्थितिरवर्जनीया। अग्न्यादिसायुज्यं गतानां ततः पृथग्भावः पुनरप्युपाधित—इति चेत्, दत्तमुत्तरम्। नच—अग्न्यादिसायुज्योक्तिरर्थवादत्वादनादरणीयेति वाच्यम्; वेदान्तिभिरर्थवादानां प्रतीयमानार्थे प्रामण्याभ्युपगमात्। अतो न सायुज्यमैक्यम्, अपि तु समानगुणयोग एव। लयोऽपि न खरूपैक्यं; **लय**शब्दस्य तदर्थत्वाभावात्—प्रयोगानुगुण्यं शब्दार्थव्यवस्थापनं कार्यमिति—नित्यनैमित्तिकमहाप्रलयेष्वपि **लय**शब्दः प्रयुज्यते, न तत्र खरूपैक्यापत्तिः। न तावन्नित्यप्रलये; स्वर्गनरकादिगमनागमनशास्त्रात्। नापि नैमित्तिके; पूर्वकल्पप्रलीनानां नारदादीनां प्राग्जन्मप्रत्यभिज्ञानवतामेव पुनरुत्पत्त्यवगमात्, नारदेन पूर्वकल्पे स्वजन्मवृत्तादिकमिह कल्पेऽभिहितमिति पुराणेष्ववगम्यते। नापि महाप्रलये;

द्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्॥' (मु. ३।२।८), **'तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति'** (मु. ३।१।३) इत्याद्याः। परविद्यासु सर्वासु सगुणमेव ब्रह्मोपास्यं, फलं चैकरूपमेव—अतो विद्याविकल्प इति सूत्रकारेणैव—**'आनन्दादयः प्रधानस्य'** (ब्र. सू. ३।३।११), **'विकल्पोऽविशिष्टफलत्वात्'** (ब्र. सू. ३।३।५७) इत्यादिषूक्तम्। वाक्यकारेण च सगुणस्यैवोपास्यत्वं विद्याविकल्पश्चोक्तः—**'युक्तं तद्गुणकोपासनात्'** (वाक्यम्) इति। भाष्यकृता व्याख्यातं च—**'यद्यपि सच्चित्तः'** (ब्र. भा.) इत्यादिना। **'ब्रह्म वेद ब्रह्मैव भवति'** (मु. ३।२।२९) इत्यत्रापि **'नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्'** (मु. ३।२।८), **'निरञ्जनः परमं साम्यमुपैति'** (मु. ३।१।३), **'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते'** (छा. ८।३।४) इत्यादिभिरैकार्थ्यात्—प्राकृतनामरूपाभ्यां विनिर्मुक्तस्य निरस्ततत्कृतभेदस्य ज्ञानैकाकारतया ब्रह्मप्रकारतोच्यते। प्रकारैक्ये च तत्त्वव्यवहारो मुख्य एव, यथा—सोयं गौरिति।

वैषम्यनैर्घृण्यपरिहाराय जीवनित्यत्वबहुत्वकर्मवासनानां तदानीं विद्यमानताया अभ्युपगन्तव्यत्वात्। तथा—'प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी। पुरुषश्चाप्युभावेतौ लीयेते परमात्मनी'ति वदता भगवता पराशरेणैव हि—'हिंसा हिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते। तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते॥ प्रधानकारणीभूता यतो वै सृज्यशक्तयः। तेषां ये यानि कर्माणि प्राक्सृष्टेष्वः प्रतिपेदिरे' इत्यादिभिस्तदानीं सवासनकर्मान्वितजीवबहुत्वं च दर्शितम्, अत एव भेदप्रहाणं च **लय**शब्दार्थः। नच—प्राकृतप्रतिसंचरमोक्षविषयप्रलयशब्दयोरर्थवैरूप्यं वक्तुमुचितं; शक्तिभेदकल्पनामुख्यत्वयोरन्यतरप्रसङ्गात्। न च तत्रापि महाप्रलयादिषु **लय**शब्दस्यामुख्यत्वं वाच्यं; बहुष्वर्थेष्वमुख्यत्वाश्रयणादपि मुक्तिमात्रविषय**प्रलय**शब्दस्यैवामुख्यत्वाश्रयणोपपत्तेः। अतः सर्वप्रयोगानुगुणोऽर्थः स्वीकार्यः। अतो विसदृशावस्थाप्रहाणेन कारणत्वधर्मिणा द्रव्येण विभागस्यापादानभूतेन संश्लेषो **लयः**, तस्मादैक्यं न **लय**शब्दार्थः। घटाकाशादिदृष्टान्तोपन्यासश्चौपाधिकवैषम्याभावनिबन्धनः; आकाशादितत्त्वानामपि सांशत्वात्तेषां पञ्चीकरणवचनेन प्रदेशभेदवत्ता हि वेदान्तिभिरभ्युपेतव्या। अतो मोक्षविषयासु श्रुतिषु स्वरूपैक्यं क्वचिदपि नावगम्यते। निर्गुणप्राप्तिविषया श्रुतिः काचिदपि नास्तीत्ययमर्थश्चानन्तरमेव उपपाद्यते। अतः साधर्म्यस्मरणस्य सगुणप्राप्तिविषयत्वात्—न परममोक्षविषयत्वम्; अन्यथा निर्गुणप्राप्तिविषयश्रुतिविरोधे स्मृतेर्दौर्बल्यप्रसङ्गादित्यपि—दुरुक्तम्। तस्माद्यदा **पश्य** इत्यादिवाक्ये **साम्य**शब्दः सादृश्यपरः। येनाकारेण साम्यं तस्याकारस्य निरवधिकत्वं **परम**शब्दाभिप्रेतम्। अत इदं वाक्यं परब्रह्मप्राप्तिरूपं परममोक्षं तत्साम्यापत्तिलक्षणमेव प्रतिपादयति॥

अथ सगुणोपासकस्य सगुणब्रह्मप्राप्तिं वदन्त्येताः श्रुतयः, न तु परब्रह्मविदः परब्रह्मप्राप्तिमिति शङ्कायामाह—**परविद्यास्विति। परविद्यासु** ब्रह्मविद्यास्वित्यर्थः। **सर्वासु** परेण सगुणविषयत्वेन, निर्गुणविषयत्वेन चोक्तासु दहरविद्या—सद्विद्या—ऽक्षरविद्यादिष्वित्यर्थः। **अदृश्यत्वादिगुणक** इति परविद्यावाक्यविषयसूत्रस्वारस्यात्—तस्याः सगुणविषयत्वं प्रतीयते। 'आनन्दादयः प्रधानस्ये'ति सूत्रमुपास्यसगुणत्वायोदाहृतम्। 'विकल्पोऽविशिष्टफलत्वा'दिति सूत्रं प्राप्यस्य सगुणत्वायोपात्तम्। अयमर्थः—परेण निर्गुणविषयत्वेनाभिमतानां **सत्यं ज्ञानम्, आनन्दो ब्रह्मे**त्यादिवाक्यानामानन्दादिगुणविशिष्टविषयत्वं, तेषां च गुणानां सर्वविद्यानुयायित्वं चोक्त्वा, तास्वेकैकविद्या फलायालमिति [१]विद्याविकल्पश्चोक्तः, अतः परेण निर्गुणसगुणविषयत्वेनाभिमतासु सद्विद्या—दहरविद्यादिषूपास्यं, फलं च सगुणमिति—सगुणप्राप्त्यतिरेकेण निर्गुणप्राप्तिः प्रमाणशून्या। अतो मुक्तौ भेदपराणां श्रुतीनामन्यथासिद्धिर्नोपपद्यते; प्राप्यवैषम्याभावादिति। सूत्रकाराभिप्रायविदामुक्तिं दर्शयति—**वाक्येति। युक्तं तद्गुणकोपासनादिति। युक्तं** गुणयुक्तमेव प्राप्यं, कुतः—**तद्गुणकोपासना**दित्यर्थः। **विद्याविकल्पश्च** तत्रैव द्रष्टव्यः। **सच्चित्तः** सद्विद्यानिष्ठः। तर्हि—मुक्तावभेदश्रुतेः कोऽर्थ इत्यत्राह—**ब्रह्मेति**। 'स यो ह वै तत्परं ब्रह्म वेद ब्रह्मैव भवती'ति प्रकृतस्य वेदितुर्ब्रह्मपर्यन्तस्वरूपाविर्भावपरमिदं वाक्यमिति यथा सेत्स्यति—तथा वक्ष्यते, इह लर्थान्तरमुच्यते। प्राकृतरूपनामप्रहाणज्ञापनाय **नामरूपाद्विमुक्त** इति श्रुतिरुदाहृता। 'साम्यप्रतिपत्त्यर्थं **निरञ्जन** इति वाक्यमुपात्तम्। तस्यैव साम्यस्य स्वाभाविकत्वज्ञापकं **परं ज्योति**रिति वाक्यम्। तद्यमुख्यत्वं स्यादित्यत्राह—**प्रकारैक्ये चेति। सोऽयं व्रीहि**रित्यादेरुपलक्षणमिदमुदाहरणम्। 'यथर्तुष्वृतु लिङ्गानि नानारूपाणि पर्यये। दृश्यन्ते तानि तान्येव तथा भावा

---

१ च न लय शब्दः का. मु. पु। २ विद्याविकल्पोक्तिः का. मु. पु.।

अत्रापि—**'विज्ञानं प्रापकं प्राप्ये परे ब्रह्मणि पार्थिव। प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः॥'** (वि. पु. ६।७।९१) इति परब्रह्मध्यानात्—आत्मा परब्रह्मवत्प्रक्षीणाशेषभावनः—कर्मभावना-ब्रह्मभावना-उभयभावनेति भावनात्रयरहितः प्रापणीय इत्यभिधाय—**'क्षेत्रज्ञः करणी ज्ञानं करणं तस्य वै द्विज। निष्पाद्य मुक्तिकार्यं वै कृतकृत्यं निवर्तयेत्॥'** (वि. पु. ६।७।९२) इति करणस्य परब्रह्मध्यानरूपस्य प्रक्षीणाशेषभावनात्मस्वरूपप्राप्त्या—कृतकृत्यत्वेन निवृत्तिवचनात्—यावत्सिद्ध्यनुष्ठेयमित्युक्त्वा, **'तद्भावभावमापन्नस्तदासौ परमात्मना। भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत्॥'** (वि. पु. ६।७।९३) इति मुक्तस्य स्वरूपमाह। तद्भावः—ब्रह्मणो भावः—स्वभावः, न स्वरूपैक्यम्: तद्भावभावमापन्न इति द्वितीयभावशब्दानन्वयात्, पूर्वोक्तार्थविरोधाच्च। यद्ब्रह्मणः प्रक्षीणाशेषभावनत्वं तदापत्तिः—तद्भावभावापत्तिः। यदैवमापन्नस्तदासौ परमात्मनाऽभेदी भवति—भेदरहितो भवति। ज्ञानैकाकारतया परमात्मनैकप्रकारस्यास्य तस्माद्भेदो देवादिरूपः। तदन्वयोऽस्य कर्मरू-

---

युगादिषु' इत्यादिप्रयोगो भाग्नादिषु द्रष्टव्यः। दृष्टान्ते प्रकारैक्येऽपि तत्ताव्यवहारो मुख्योऽप्यस्वरसः, पूर्वदृष्टे गवि व्यक्त्यंशग्रहणादस्वारस्यं, जात्यंशस्य सौसादृश्यलक्षणैक्यान्मुख्यत्वम्। दार्ष्टान्तिके तु 'गङ्गायां घोष' इति गङ्गापदवत्—कात्स्न्येन प्रवृत्तिनिमित्तग्रहणाभावात्, परमात्मनीव प्रवृत्तिनिमित्तपौष्कल्याभावाच्च—प्रवृत्तिनिमित्तैकदेशान्वयिनि मुक्तात्मनि मुख्यकोटिरित्यभिप्रायेण **मुख्यगुण एवे**त्युक्तम्। लाक्षणिकगङ्गापदवन्नात्यन्तामुख्य इत्यर्थः। न हि मुक्तस्यापरिच्छिन्नज्ञानानन्दत्वेऽपि जगत्कारणत्वानुगुणं बृहत्त्वं, स्वरूपबृहत्त्वं चास्ति। आकारैक्येऽपि तत्ताव्यवहारस्यात्यन्तामुख्यत्वाभावे—**सोऽयं गौ**रिति दृष्टान्तः॥

न केवलं योगसंग्रहारम्भे, विस्तरेऽप्यव्यवहितेषु पूर्वश्लोकेषु भेदप्रतिपत्तिरस्तीत्याह—**अत्रापीति**। न केवलं मुक्तविषयप्रकरणान्तरेषु, अस्मिन् प्रकरणेऽपीति वार्थः। अस्मिन् श्लोके **तथैवे**ति ब्रह्मसाधर्म्योपदेशे उपयुज्यते। **तथैवे**त्येतद्व्याख्यानं **परब्रह्मव**दित्यादि। **प्रक्षीणाशेषभावन**शब्दं व्याचष्टे—**कर्मभावनेति**। परब्रह्मवत्**प्रक्षीणाशेषकर्मभावन** इति पाठे **कर्म**शब्दो यागादिक्रियोपासनासाधारणोऽनुष्ठेयमात्रपरः। तदा **कर्म**शब्देन **त्रिविधा भावभावने**त्यत्र भावशब्दो व्याख्यातो भवति। अत्रायमर्थः—प्राप्यपरब्रह्मविषयज्ञानस्य प्रापकत्वात्—शुद्धस्वरूपमपि प्राप्यमिति—तदनुसंधेयमिति। अयंच **व्यतिरेकस्तद्भावभावित्व**मित्यधिकरणार्थः; तत्र **बद्धस्वरूपं चिन्त्य**मिति पूर्वपक्षीकृत्य **मुक्तस्वरूपं चिन्त्य**मिति हि सिद्धान्तितम्। अस्य श्लोकस्यैकप्रकरणत्वज्ञापनायानन्तरश्लोकोऽपि व्याख्यायते—**क्षेत्रज्ञ इति**। यावत् क्षेत्रज्ञावस्थस्तावत्**करणी** उपासकः, तस्य **करणं** ज्ञानम्। करणभूतं ज्ञानं मुक्तिकार्यं निष्पाद्य निवर्तयेत्, न तु मुक्तेः पूर्वमेव निवर्तयेदित्यर्थः। न हि मुक्त्योपासननिवृत्तिर्विधेया, अतो यावन्मोक्षमनुष्ठेयत्वमुक्तमिति भावः। **तद्भावभाव**शब्देन ब्रह्मसाम्यापत्तिज्ञापनार्थं, **विभेदजनकेऽज्ञान** इत्यत्र **ज्ञान** इति पदच्छेदशङ्काव्युदासार्थं च—**तद्भावभाव**मिति श्लोको व्याख्यायते। **तद्भावे**ति श्लोके **तद्भाव** इत्युपमानबहुव्रीहिः। तद्भाव इति पदान्तर्गतौ तच्छब्दभावशब्दौ व्याख्यातुमाह—**तद्भाव इति**। भाष्यस्थस्तद्भावशब्दो न बहुव्रीहिः, किंतु तत्पुरुषः। समासे व्याचिख्यासिते सति हि बहुव्रीहिविशिष्टरूपेण पदोपादानं, **तच्छब्दभाव**शब्दमात्रस्य व्याचिख्यासितत्वात्—बहुव्रीहिविशिष्टरूपेण पदस्यानुपादानम्। **तच्छब्देन** ब्रह्मोच्यते, प्रथम**भाव**शब्देन स्वभाव उच्यत इत्यर्थः। 'भावो लीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुषु। पदार्थमात्रे सत्तायामात्मयोनिस्वभावयो' रिति नैघण्टुकाः। यद्वा, भाष्यस्थ**तद्भाव**शब्दोऽपि बहुव्रीहिविशिष्टः। **तद्भावो** ब्रह्मणो भावः, **स्वभाव** इति पदे **तच्छब्द**वाच्यब्रह्मसंबन्धितया प्रतिपन्नो भावः—स्वभाव इत्यर्थः। अथवा, श्लोकेऽपि **तद्भाव**शब्दस्तत्पुरुषः, द्वितीयभावशब्दः सत्तावाची। व्यावर्त्यमाह—**नत्विति**। कुत इत्यत्राह—**तद्भावेति**। हेत्वन्तरमाह—**पूर्वोक्तार्थविरोधाच्चेति**। हेयप्रत्यनीकत्वहेयार्थत्वादिविरोधोऽर्थविरोधः। एवं शब्दपर्यालोचनया, अर्थपर्यालोचनया च **भावशब्दस्य** स्वभाववाचित्वमुपपादितम्। स्वभावशब्दवाच्यं च पूर्वश्लोकोक्तं प्रक्षीणाशेषभावनत्वमित्याह—**यदिति**। **तच्छब्दसामर्थ्याद् यद्वृत्तमाक्षिप्य** व्याचष्टे—**यदैवमिति**। **अभेदी**त्यत्र **भेद**शब्दव्याख्यानार्थं भेदशब्दं नञ्प्रत्ययाभ्यां विभज्य निर्दिशति—**भेदरहितो भवतीति**। यद्वा, **भेदरहितो भवति** न तादात्म्यवानिति भावः; अन्यथा **भेदश्च तस्याज्ञानकृत** इत्यनन्तरनिर्देशो न घटते। देवादिभेदाभावः कथमिति शङ्कायां **भेदश्च तस्ये**त्यादि व्याचष्टे—**ज्ञानैकाकारतयेति। परमात्मना भवत्यभेदी**ति परमात्मनः प्रस्तुतत्वात्, **आत्मनो ब्रह्मण** इत्यत्रापि पञ्चम्यविवक्षया च **तस्माद्भेद** इत्युक्तम्। **ब्रह्मणः मुक्तात्मनश्चाकारान्तरेण भेदस्य प्रमाणसिद्धत्वात्**, निरसनीयभेदविशेषस्य वचनान्तरसिद्ध-

पाज्ञानमूलः, न स्वरूपकृतः । स तु देवादिभेदः परब्रह्मध्यानेन मूलभूताज्ञानरूपे कर्मणि विनष्टे हेत्वभावान्निवर्तत इति—अभेदी भवति । यथोक्तम्—**'एकस्वरूपभेदस्तु बाह्यकर्मवृतिप्रजः । देवादिभेदेऽपध्वस्ते नास्त्यनावरणो हि सः ॥'** इति । एतदेव विवृणोति—**'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते । आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥'** (वि. पु. ६।७।९४) इति । विभेदः—विविधो भेदः देवतिर्यङ्मनुष्यस्थावरात्मकः । यथोक्तं शौनकेनापि—**'चतुर्विधो विभेदोऽयं मिथ्याज्ञाननिबन्धनः ।'** (विष्णुधर्मे) इति । आत्मनि ज्ञानरूपे देवादिरूपविविधभेदहेतुभूतकर्माख्याज्ञाने परब्रह्मध्यानेनात्यन्तिकं नाशं गते सति—हेत्वभावादसन्तं परस्माद्ब्रह्मण आत्मनो देवादिरूपभेदं कः करिष्यतीत्यर्थः । **'अविद्या कर्मसंज्ञान्या'** (वि. पु. ६।७।६१) इति ह्यत्रैवोक्तम् । **'क्षेत्रज्ञं चापि मां विद्धि'** (गी. १३।२) इत्यादिनान्तर्यामिरूपेण सर्वस्यात्मतयैक्याभिधानम्; अन्यथा **'क्षरः सर्वाणि भूतानि कूटस्थोक्षर उच्यते । उत्तमः पुरुषस्त्वन्यः'** (गी. १५।१६) इत्यादिमि-

---

लाच्च—**भेदो देवादिरूप** इत्युक्तम् । **कर्मरूप**शब्देन **अज्ञान**शब्दो व्याख्यातः । ज्ञानविरोधीति व्युत्पत्तिरित्यर्थः । 'अविद्यया मृत्युं तीर्त्वेति हि श्रुतिः । अत्रा'प्यविद्या कर्मसंज्ञाऽन्ये'ति हि पठ्यते । ततः किं भेदराहित्यस्येति शङ्कायां—**भेदश्च तस्याज्ञानकृतो भवे**दित्यनेनार्थसिद्धमभिप्रेतकारणाभावं विशदयन् कार्याभावमुपपादयति—**स त्विति ।** भेदस्य देवादिरूपत्वे, अज्ञानशब्दस्य च कर्मपरत्वे प्रमाणमाह—**यथोक्तमिति ।** आदिभरतचरितेऽयं श्लोकः । तत्र पूर्वं देहेन्द्रियादिबाह्यभेदरहितत्वमात्मन उक्तं—**सितनीले**त्यादिना, अस्मिन् श्लोके बुद्धिसुखदुःखेच्छाद्यान्तरभेदोऽपि नास्तीत्युच्यते—**एकस्वरूपेति ।** कर्मैव वृतिः **कर्मवृतिः** । बाह्यमान्तरं च कर्म द्विविधम्—आन्तरमात्मप्रावण्यहेतुः कर्म, बाह्यं बहिर्विषयप्रावण्यहेतुः कर्म । यद्वा, बाह्यमस्वाभाविकं कर्म-तदेव वृतिः । तया प्रकर्षेण जात एकस्वरूपभेदः बाह्यकर्मशरीरद्वारकमेकस्वरूपस्यात्मन आन्तरं भेदं करोतीत्यर्थः । द्वारभूतदेवादिशरीरभेदे नष्टे सति आन्तरभेदो नास्ति, कथं वा देवादिभेदे नष्टे कर्मवृतिहेतुकान्तरभेदनाश इत्यत्राह—**अनावरणोहि स इति । सः** निवृत्तदेवादिभेदः आत्मा, कर्मावरणरहितो हीत्यर्थः । यद्वा, **कर्मवृतिः** कर्मजन्या वृतिः—देवादिशरीरं, तत्संबन्धज आन्तरभेदः, देवादिभेदेऽपध्वस्ते स नास्ति, कथं कर्मजन्यवृतिहेतुकान्तरभेदो देवादिभेदापध्वंसे नास्तीत्याह—**अनावरणो हि स इति । कर्मजन्यवृतिर्**देवादिशरीरभेदरूपेत्यर्थः । **एतदेव-भेदश्च तस्याज्ञानकृतो भवे**दित्युक्तमेवार्थं विवृणोतीत्यर्थः । **विभेदजनक** इत्यादिश्लोकेना'नावृत्तिः शब्दा'दित्यधिकरणार्थं उच्यते । परस्माद्ब्रह्मण आत्मनो देवादिभेदस्य प्रणष्टस्य पुनरावृत्तिं कः करिष्यतीत्युच्यते । **विभेद**शब्दं व्याचष्टे—**विभेदो विविधो भेद इति ।** भेदस्य देवादिरूपत्वे प्रमाणान्तरमाह—**यथोक्तमिति । मिथ्याज्ञाननिबन्धनः** मिथ्याज्ञानम्-आत्मविषयभ्रान्तिज्ञानं, तत्कर्मद्वारा उत्तरोत्तरदेवादिभेदहेतुरित्यर्थः । अस्योत्तरार्धं 'देवतिर्यङ्मनुष्याख्यस्तथैव नृप नारक' इति व्याख्येयस्य श्लोकस्य वाक्यार्थमाह—**आत्मनीति । ब्रह्मण** इति पदस्य पञ्चम्यन्तत्वसूचनाय **परस्मादि**त्युक्तम् । उभयोरपि पदयोर्वैयधिकरण्येन षष्ठ्यन्तत्वमयुक्तं; **च**शब्दाभावात्, अनन्तरपूर्वश्लोके **परमात्मना भवत्यभेदी**ति परमात्मनः प्रतियोगितया निर्देशाच्च । अत एव समानाधिकरणषष्ठ्यन्तत्वमप्ययुक्तम् । पूर्वप्रपञ्चितात्, अर्थविरोधाच्च—पञ्चम्यन्तत्वं, पञ्चम्यन्तत्वं च विपर्ययेण स्यादिति—चेन्न; तदा परब्रह्मणोऽपि हेयार्थत्वापत्तेः—स्वाभाविकत्वप्रसङ्गात् । अतः **परस्मात् ब्रह्मण** इत्युक्तम् । **असन्तं सच्छब्दः** परमार्थपर्यायः; 'अनाशी परमार्थश्चे'त्यत्रैव ह्युक्तम्, अनित्यमित्यर्थः । तेन स्वाभाविकनित्यभेदव्यावृत्तिः । अनित्यत्वं कादाचित्कत्वम् । अनित्यत्वाधेयत्वापेक्षो देवादिभेदः तं कः करिष्यति, न कश्चिदपि; **हेत्वभावात्** कर्मरूपहेत्वभावादित्यर्थः । न केवलमेकार्थविषये **बाह्यकर्मवृतिप्रजः अज्ञानकृतो भवे**दिति अज्ञान-कर्मशब्दयोः प्रयोगादज्ञानशब्दस्य कर्मार्थत्वम्, अस्मिन् प्रकरणे च कण्ठोक्तमित्याह—**अविद्या कर्मसंज्ञाऽन्येति । अत्रैवोक्त**मिति—आत्मन औपाधिकभेद उपाध्यपगमेन नश्यतीति श्लोकार्थः, उपाध्यभावादविद्यमानं भेदं क उत्पादयेदिति वाऽर्थः । अयं श्लोको मृषावादिनामत्यन्तास्वरसः, तथा हि—**विभेदजनक** इत्यत्र **जनक**शब्दः उत्पादके स्वरसः, न ह्यध्यासहेतौ । **अज्ञान**शब्दस्य अनिर्वचनीयपरत्वं लोकतः, शास्त्रतश्च न व्युत्पन्नम् । कर्मवाचित्वव्युत्पत्तिरस्मिन् प्रबन्ध एव दर्शिता । **नाश**शब्दस्य बाधवाचित्वमसुख्यम् । **असन्त**मिति पदं च व्यवच्छेद्याभावादफलम्; सतो भेदस्यानभ्युपगमात्, तदभ्युपगमे हि तत्साफल्यम् । **करिष्यती**ति पदमप्यस्वरसम्, अध्यासवाचित्वाभावात् ॥

अथाद्वैतपरत्वेन परोक्तं गीतावचनं व्याचष्टे—**क्षेत्रज्ञं चापीति ।** परामिमतार्थस्य पूर्वापरविरोधं दर्शयति—**अन्यथेति ।**

विशेषः । अन्तर्यामिरूपेण सर्वेषामात्मत्वं तत्रैव भगवतामिहितम्—**'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।'** (गी. १८।६१), **'सर्वस्य चाहं हृदि सन्निविष्टः'** (गी. १५।१५) इति च । **'अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।'** (गी. १०।२०) इति च तदेवोच्यते । भूतशब्दो ब्रह्मात्मपर्यन्तदेहवचनः । यतः सर्वेषामयमात्मा—तत एव सर्वेषां तच्छरीरतया पृथगवस्थानं प्रतिषिध्यते—**'न तदस्ति विना यत्स्यात्'** (गी. १०।३९) इति । भगवद्विभूत्युपसंहारश्चायमिति तथैवाभ्युपगन्तव्यम् । तत इदमुच्यते—**'यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम् ॥'** **'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ।'** (गी. १०।४१-४२) इति । अतः शास्त्रेषु न निर्विशेषवस्तुप्रतिपादनमस्ति । नाप्यर्थजातस्य भ्रान्तत्वप्रतिपादनम् । नापि चिदचिदीश्वराणां स्वरूपभेदनिषेधः ॥ यदप्युच्यते—निर्विशेषे स्वयंप्रकाशे वस्तुनि दोषपरिकल्पितमीश्वरेक्षितव्यावहारिकत्वं सर्वं जगत्, दोषश्च स्वरूपतिरोधानविविधविचित्रविक्षेपकरी सदसदनिर्वचनीयानाद्यविद्या, सा चावश्याभ्युपगमनीया; **'अनृतेन हि प्रत्यूढाः'** (छा. ८।३।२) इत्यादिभिः श्रुतिभिः, ब्रह्मणस्तत्त्वमस्यादिवाक्यसामानाधिकरण्यावगतजीवैक्यानुपपत्त्या च । सा तु न सती; भ्रान्तिबाधयोरयोगात् । नाप्यसती; ख्यातिबाधयोश्चायोगात् । अतः कोटिद्वयविनिर्मुक्तेयमविद्येति तत्त्वविद—इति, तदयुक्तम्; सा हि किमाश्रित्य भ्रमं जनयतीति वक्तव्यं, न तावज्जीवमाश्रित्य; अविद्यापरिकल्पितत्वाज्जीवभावस्य । नापि ब्रह्माश्रित्य; तस्य स्वयंप्रकाशज्ञानरूपत्वेनाविद्याविरोधित्वात् । सा हि

न केवलमुत्तमः पुरुषस्त्वन्य इति भेदप्रतिपादनात्तद्विरोधेन स्वरूपैक्यपरत्वाभावः, सामानाधिकरण्योपपादकमन्तर्यामित्वं कण्ठोक्तमपीत्याह—**अन्तर्यामीति** । 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठती' त्यत्र भूतशब्दस्यात्मपर्यन्तदेहपरत्वं—'भ्रामयन् सर्वभूतानी'त्यस्योत्तरार्धेनावगम्यते; 'न हिस्यात्सर्वाभूतानी'त्यादिप्रयोगाच्च । 'सर्वस्य चाहं हृदि सन्निविष्ट' इत्यत्रापि सर्वशब्दस्यात्मपर्यन्तत्वं—'मत्तः स्मृतिर्ज्ञानमपोहनं चे'त्यनेनावगम्यते । **हृद्देशे** हृद्देशस्य आत्मनीत्यर्थः । **सर्वस्य चाहं हृदी**त्यपि तथा । तथाऽहमात्मा **गुडाकेशे**त्यत्राप्यन्तर्यामित्वपरतामाह—**अहमिति** । कुत इत्यत्राह—**भूतशब्दोहीति** । पूर्वं दर्शितसर्वशब्दैकार्थ्यांचेति भावः । अन्वयरूपेणोक्तस्य सर्वेषां भगवदात्मकत्वस्य शेषभूतोऽयं **न तदस्तीति** व्यतिरेकनिर्देशस्यदनुगुण एवेत्यमिप्रायेणाह—**यतः सर्वेषामिति । अविनाभाव**शब्दस्य संबन्धनियमवाचित्वादिति भावः । हेत्वन्तरमाह—भगवदिति । 'एतां विभूतिं योगं चे' ति प्रक्रमाद्विभूतिपरत्वमवगम्यते, अतः उपक्रमानुगुण एव उपसंहार इत्यर्थः । न हि विभूतित्वं विधाय तदेव निषेद्धुं शक्यमिति भावः । प्रकरणस्य विभूतिपरत्वं दर्शयति—**यद्यदिति । विभूतिमत्** नियाम्यवत् । **श्रीमत्** भोग्यसमृद्धिमत् । **ऊर्जितं** बलवत्, कल्याणगुणारम्भेषु ह्युक्तम् । **तेजः** पराभिभवनसामर्थ्यं **प्रशासनम् । तेजोंऽशसम्भवं** नियमनशक्तिमत्, आज्ञालवाधीनमित्यर्थः । शास्त्रस्य परोक्तार्थपरत्वाभावमुपसंहरति—**अत इति । अतः** श्रुतियोजनाप्रभृतिप्रतिपादितैर्न्यायैरित्यर्थः । **भ्रान्तत्वं** भ्रान्तिसिद्धत्वम् । जगद्ब्रह्मणोरेकद्रव्यत्वपक्षे—ब्रह्मणः सविशेषत्वं, जगतः सत्यत्वं चोपपन्नमिति शङ्कायां तद्व्युदासार्थमाह—**नापीति** । चेतनेष्वचिद्धर्मबुद्धिः, परतन्त्रेषु, स्वतन्त्रबुद्धिश्च भ्रमः, न तु स्वरूपभेदधीरित्यभिप्रायेण **न स्वरूपभेदनिषेध** इत्युक्तम् । अथवा मृत्पावादिनमेवोद्दिश्य जीवपरयोः स्वरूपभेदनिषेधाभावमाह—**नापीति** । अचिदुपादनं दृष्टान्ततया । **इति निर्विशेषपरतया परामिमतस्मृतिपुराणाद्यर्थनिर्णयः ॥**

अथाविद्यां दूषयितुं तद्विषये परोक्तमर्थमनुवदति—**यदपीति** । निर्विशेषस्य कथं भ्रमसंभव इत्यत्राह—**दोषेति** । ब्रह्मव्यतिरिक्तदोषोऽस्ति चेत्, अद्वैतहानिरित्यत्राह—**दोषश्चेति** । अस्मिन्नर्थे परोक्ताः श्रुतिस्मृत्यर्थापत्तीर्दर्शयति—**अनृतेनेति** । सदसद्विलक्षणत्वमुपादयति—**सात्विति । भ्रान्तिबाधयोरयोगात्** भ्रान्तिविषयत्वबाधविषयत्वयोरयोगात्, प्रमितिभ्रान्तिबाधान्यथानुपपत्त्या सदसदनिर्वचनीयत्वमित्यर्थः । **सद्भाव एवं भवतो मयोक्त** इतिवत्र परमतमिति दर्शयितुं **तत्त्वविद** इत्युक्तम् । दूषयति—**तदयुक्तमिति । इत्यविद्याविषये परोक्तस्य दूषणम् ॥**

आश्रयानुपपत्ति-तिरोधानानुपपत्ति-स्वरूपानुपपत्त्य-निर्वचनीयत्वानुपपत्ति-प्रमाणानुपपत्ति-निवर्तकानुपपत्ति-निवृत्त्यनुपपत्तिभिर्दूषयित्वा, प्रथममाश्रयानुपपत्तिस्वरूपमाह—**सा हीति । किमाश्रित्य** न किंचिदपीत्यर्थः । किं जीवमाश्रित्य,

ज्ञानबाध्याभिमता। 'ज्ञानरूपं परं ब्रह्म तन्निवर्त्यं मृषात्मकम्। अज्ञानं चेत्तिरस्कुर्यात्कः प्रयुक्तन्निवर्तने॥ ज्ञानं ब्रह्मेति चेज्ज्ञानमज्ञानस्य निवर्तकम्। ब्रह्मवत्तत्प्रकाशत्वात्तदपि ह्यनिवर्तकम्॥ ज्ञानं ब्रह्मेति विज्ञानमस्ति चेत्स्यात्प्रमेयता। ब्रह्मणोऽननुभूतित्वं त्वदुक्त्यैव प्रसज्यते॥' (नाथमुनिसूक्तयः)। ज्ञानस्वरूपं ब्रह्मेति ज्ञानं तस्या अविद्याया बाधकं, न स्वरूपभूतं ज्ञानमिति चेन्न; उभयोरपि ब्रह्मस्वरूपप्रकाशत्वे सत्यन्यतरस्याविद्याविरोधित्वमन्यतरस्य नेति विशेषानवगमात्। एतदुक्तं भवति—ज्ञानस्वरूपं ब्रह्मेत्यनेन ज्ञानेन ब्रह्मणि यः **स्वभावोऽवगम्यते** स ब्रह्मणः स्वयंप्रकाशत्वेन–स्वयमेव प्रकाशत इत्यविद्याविरोधित्वे न कश्चिद्विशेषः स्वरूपतद्विषयज्ञानयोरिति। **किंच**—अनुभवस्वरूपस्य ब्रह्मणोऽनुभवान्तराननुभाव्यत्वेन भवतो न तद्विषयं ज्ञानमस्ति, अतो ज्ञानमज्ञानविरोधि चेत्स्वयमेव विरोधि भवतीति—नास्या ब्रह्माश्रयत्वसंभवः शुक्त्यादयस्तु स्वयाथात्म्यप्रकाशे स्वयमसमर्थाः **स्वाज्ञानाविरोधिनस्तन्निवर्तने** ज्ञानान्तरमपेक्षन्ते, ब्रह्म तु स्वानुभवसिद्धस्वयाथात्म्यमिति स्वाज्ञानविरोध्येव। तत एव निवर्तकान्तरं च नापेक्षते। अथोच्येत—ब्रह्मव्यतिरिक्तस्य मिथ्यात्वज्ञानमज्ञानविरोधि–इति,

---

उत ब्रह्मेति—विकल्पामिप्रायेणाह—**न तावदिति**। जीवे सिद्धे—अविद्यासिद्धिः, अविद्यासिद्धौ जीवसिद्धिः—इत्यन्योन्याश्रय इत्यर्थः। जीवाज्ञानवादनिरास उत्तरत्र विस्तरेण वक्ष्यत इति–अत्र संक्षेपः। अथ ब्रह्माश्रयपक्षं **दूषयति—नापीति**। विरोधित्वं कथमित्यत्राह—**सा हीति**। ब्रह्मविषयाज्ञानस्य तत्प्रकाशबाध्यत्वाद्विरोधः। अत्र **नाथमुनिमिरुक्तान्** श्लोकानाह—**ज्ञानरूपमिति**। स्वप्रकाशत्वं विवक्षितम्। ज्ञाननिवर्त्यत्वे हेतुमाह—**मृषात्मकमिति**। न हि स्वरूपज्ञानमज्ञानविरोधि, अपि तु प्रमाणज्ञानमेवेति पक्षमनूद्य दूषयति—**ज्ञानमिति**। **ब्रह्मवत्तत्प्रकाशत्वात् स्वरूपानतिरिक्तप्रकाशत्वादित्यर्थः**। नहि शुक्लभास्वरद्रव्ये गृहीते आप्तवाक्यादिभिः शुक्लभास्वरद्रव्यमित्येतावति शतशः प्रतिपन्नेऽपि-भ्रमनिवृत्तिः। दूषणान्तरं चाह—**ज्ञानमिति**। ततः किमित्यत्राह—**ब्रह्मण इति**। एषु श्लोकेषु प्रथमश्लोकस्यार्थः **पूर्वं ज्ञानबाध्यामिमतेत्यन्तेन** भाष्येणोक्तः। द्वितीयश्लोकं व्याचष्टे—**ज्ञानस्वरूपमिति। ब्रह्मस्वरूपप्रकाशत्वे सति** स्वरूपविषयज्ञानत्वे सतीत्यर्थः। **विशेषानवगमात्** विषयवैषम्याभावादित्यर्थः। कथं विशेषानवगमः, **प्रमाणजन्यत्वं** विशेषोऽस्तीति चेत्–किं तेन, विषयवैषम्यं हि न विद्यते। किं स्वरूपभूतज्ञानान्निवर्तकज्ञानस्य विषयवैषम्यमस्ति वा, न वा। अस्ति चेत्, विशेषत्वम्। नो चेत्, स्वरूपमेव निवर्तकं स्यात्, प्रमाणजन्यज्ञानमनिवर्तकं वा स्यात्। पुरोऽवस्थितभास्वरवस्तुविषयज्ञानवत्—प्रमाणजन्यज्ञानत्वं न निवर्तकत्वे प्रयोजकम्; 'इदं शुक्लभास्वरद्रव्यमिति वाक्यजन्यस्य ज्ञानस्य निवर्तकत्वाभावात्। तस्मात् भ्रमसहाकारादतिरिक्ताकारविषयत्वं निवर्तकत्वे प्रयोजकम्॥

ननु—विषयवैषम्याभावेऽपि कस्यचित् ज्ञानस्य भ्रमाविरोधित्वं, कस्यचिद् भ्रमविरोधित्वं च दृष्टमभिज्ञाप्रत्यभिज्ञयोः, अयमेको देवदत्त इत्यभिज्ञाया ऐक्यविषयत्वेऽपि 'पूर्वदृष्टादयमन्य' इति पुरुषद्वित्वभ्रमो दृष्टः, प्रत्यभिज्ञायास्तु 'सोऽयमेको देवदत्त' इति देवदत्तैक्यविषयत्वेऽपि द्वित्वविरोधित्वं दृष्टमिति—विषयवैषम्याभावेऽपि प्रमाणज्ञानस्य भ्रमनिवर्तकत्वं युक्तमिति शङ्कायामाह—**एतदुक्तमिति**। सत्यत्वज्ञानत्वादिस्वभावोऽस्तीति चेत्, स च स्वरूपानतिरिक्त इति दर्शयितुं **स्वभावशब्दः**। अनेनाभिज्ञाप्रत्यभिज्ञयोरपि विषयवैषम्यमुक्तं भवति। अभिज्ञायामेकस्य धर्मिण एकदेशकालसंबन्धित्वं प्रतिपन्नं, न तु कालद्वयदेशद्वयसंबन्धित्वं, तत्तु प्रत्यभिज्ञायां प्रतिपन्नम्। एकदेशकालसंबन्धित्वप्रतीतिर्न द्वित्वविरोधिनी; **एकस्य धर्मिणः** कालद्वयसंबन्धित्वं देशद्वयसंबन्धित्वं चैक्यं, तत्तु द्वित्वविरोधीति तत्प्रतिपत्तिर्द्वित्वभ्रमं निवर्तयति, अतस्तत्रापि विषयवैषम्यमस्तीति फलितम्। अथ—तृतीयश्लोकार्थस्य विपर्यये पर्यवसानमाह—**किंचेति**। प्रमाणज्ञानत्वं निवर्तकत्वव्यापकम्, अतोऽधिष्ठानभूतब्रह्मस्वरूपस्य प्रमाणज्ञानत्वाभावान्न भ्रमनिवर्तकत्वम्। अधिष्ठानत्वात् शुक्त्यादिवत्—ब्रह्मस्वरूपं न भ्रमविरोधीति प्रमाणान्तरज्ञानमपेक्षत इति शङ्कायामाह—**शुक्त्यादयस्त्विति**। अधिष्ठानत्वस्य ज्ञानान्तरविषयत्वं व्यापकम्, अतो व्यापकनिवृत्त्याऽधिष्ठानत्वनिवृत्तिः। अधिष्ठानत्वादेव ब्रह्मस्वरूपस्फुरणेऽपि प्रमाणान्तरमपेक्ष्येत, नैवं; जडत्वादेव शुक्त्यादेः स्वरूपस्फुरणेऽपि प्रमाणान्तरापेक्षा, नाधिष्ठानत्वात्, अतोऽधिष्ठानत्वं सोपाधिकम्। अत्रजडत्वात्स्वरूपस्फुरणे प्रमाणान्तरापेक्षा नास्तीति चेत्, तर्हि—जडत्वादेव भ्रमनिवृत्तौ शुक्त्यादेर्ज्ञानान्तरापेक्षा, नाधिष्ठानत्वात्, अतस्तत्सोपाधिकं, तस्मादजडे तु प्रमाणान्तरापेक्षा भ्रमनिवृत्तौ च न स्यादित्यभिप्रायः। **शुक्त्यादयस्त्विवत्र तुशब्दो ब्रह्मणः** शुक्त्यादिव्यावृत्तिपरः। द्वयी ह्यद्वैतिनां गतिः—ब्रह्मविषयप्रमाणज्ञानं भ्रमनिवर्तकं, प्रपञ्चमिथ्यात्वविषयज्ञानं भ्रमनिवर्तकमिति च, तत्र प्रथमपक्षो दूषितः, अथ द्वितीयपक्षं दूषयितुं शङ्कते—**अथोच्येतेति**। दूषयति—**नेत्यादिना**।—**इदमिति**।

न; इदं ब्रह्मव्यतिरिक्तमिथ्यात्वज्ञानं—किं ब्रह्मयाथात्म्याज्ञानविरोधि, उत प्रपञ्चसत्यत्वरूपाज्ञानविरोधीति विवेचनीयम् । न तावद्ब्रह्मयाथात्म्याज्ञानविरोधि; अतद्विषयत्वात् । ज्ञानाज्ञानयोरेकविषयत्वेन हि विरोधः । प्रपञ्चमिथ्यात्वज्ञानं च तत्सत्यत्वरूपाज्ञानेन विरुध्यते, तेन प्रपञ्चसत्यत्वरूपाज्ञानमेव बाधितमिति ब्रह्मस्वरूपाज्ञानं तिष्ठत्येव । ब्रह्मस्वरूपाज्ञानं नाम—तस्य सद्वितीयत्वमेव, तत्तु तद्व्यतिरिक्तस्य मिथ्यात्वज्ञानेन निवृत्तं, स्वरूपं तु स्वानुभवसिद्धमिति—चेन्न; ब्रह्मणोऽद्वितीयत्वं स्वरूपं स्वानुभवसिद्धमिति—तद्विरोधि सद्वितीयत्वरूपाज्ञानं, तद्बाधश्च न स्याताम् । अद्वितीयत्वं धर्म इति—चेन्न; अनुभवस्वरूपस्य ब्रह्मणोऽनुभाव्यधर्मविरहस्य भवतैवोपपादित्वात् । अतो ज्ञानस्वरूपस्य ब्रह्मणो विरोधादेव—नाज्ञानाश्रयत्वम् । किंच—अविद्यया प्रकाशैकस्वरूपं ब्रह्म तिरोहितम्—इति वदता स्वरूपनाश एवोक्तः स्यात् । प्रकाशतिरोधानं नाम प्रकाशोत्पत्तिप्रतिबन्धः, विद्यमानस्य विनाशो वा । प्रकाशस्यानुत्पाद्यत्वाभ्युपगमेन—प्रकाशतिरोधानं प्रकाशनाश एव । अपिच—निर्विषया निराश्रया स्वप्रकाशेयमनुभूतिः स्वाश्रयदोषवशादनन्ताश्रयमनन्तविषयमात्मानमनुभवति—इत्यत्र किमयं स्वाश्रयदोषः—परमार्थभूतः, उतापरमार्थभूत—इति विवेचनीयम् । न तावत्परमार्थः; अनभ्युपगमात् । नाप्यपरमार्थः; तथा

प्रपञ्चसत्यत्वरूपाज्ञानेति । ननु—कथं प्रपञ्चसत्यत्वमज्ञानमित्युच्यते, अज्ञानं हि ज्ञानप्रतिबन्धकं, न हि प्रपञ्चसत्यत्वं **कस्यचित् ज्ञानं प्रतिबध्नाति**, सत्यम्, आच्छादकाज्ञानमेवंभूतं; प्रपञ्चसत्यत्वं, तत्प्रतिभासश्च विक्षेपरूपाज्ञानमिति पराभ्युपगमादेवमुक्तम् । प्रथमं शिरो दूषयति—**अतदिति** । कथमतद्विषयत्वात् ब्रह्मस्वरूपाज्ञानविरोधित्वमित्यत्राह—**ज्ञानाज्ञानयोरिति** । विरोधे हि निवृत्तिरित्यर्थः । द्वितीयं शिरो दूषयति—**प्रपञ्चेति** । प्रपञ्चमिथ्यात्वज्ञानेन ब्रह्मस्वरूपाज्ञाननिवृत्तेः । **फलितमाह**—**ब्रह्मस्वरूपेति** । **सद्वितीयत्वं** सद्वितीयत्वज्ञानमित्यर्थः । नहि सत्तया सद्वितीयत्वं ब्रह्मस्वरूपाज्ञानं **भवति; अपारमार्थ्यात्** । सद्वितीयत्वविशिष्टब्रह्मगोचरज्ञाने निवृत्ते विशेष्यांशगोचरमपि ज्ञानं निवृत्तमिति स्वरूपसिद्धिः **कथमित्यत्राह—स्वरूपंत्विति** । दूषयति—**नेति** । अद्वितीयत्वं किं स्वरूपम्, उत धर्म इति विकल्पाभिप्रायेण प्रथमं स्वरूपपक्षं दूषयति—**नेति** । धर्मपक्षे अपसिद्धान्तमाह—**अद्वितीयत्वमिति** । आश्रयानुपपत्तिं निगमयति—**अत इति** । **विरोधादेव** पूर्वोक्तादेवेत्यर्थः । एवमाश्रयानुपपत्तिरुक्ता ॥ **इत्यविद्यादूषणे आश्रयानुपपत्तिः** ॥

अथ तिरोधानानुपपत्तिमाह—किंचेति । ननु—भवत्पक्षेऽपि क्षेत्रज्ञानां नित्यं स्वरूपस्फुरणमस्तीति—तथापि तेषां **स्वरूपतिरोधानेन** विना न देहात्मभ्रम इति—तुल्याऽनुपपत्तिः, सत्यं, स्वरूपस्फुरणमस्त्येव, न तस्य तिरोधानमभ्युपगम्यते । **नच स्वरूपस्फुरणं** भ्रमविरोधि, किंतु नित्यत्वाणुत्वनिरवयवत्वादीन्येव भ्रमविरोधीनि, तान्यागमगम्यानि, तेषां **तिरोधि**स्तद्विषयज्ञानप्रमराभावरूपः संकोचः, अतः स्वरूपातिरिक्ताकारान्तरतिरोधानानभ्युपगमान्नात्मनो नाशप्रसङ्गः । ज्ञानस्यात्मासाधारणाकारस्य स्फुरणात् भ्रमानुपपत्तिरिति—चेन्न; तस्यासाधारणत्वात्स्फुरणात् । असाधारणतया स्फुरतो धर्मस्य हि भ्रमविरोधित्वं दृष्टं, यथा—शुक्तिलाद्देः शुक्तित्वं हि शुक्त्यसाधारणतया पूर्वं ज्ञातं पश्चात् भ्रमं निवर्तयति । नतावज्ज्ञानं देहातिरिक्तात्मासाधारणधर्मत्वेन क्वचिद्दृष्टचरम्, अतो भ्रमः संभवति । आत्मासाधारणधर्मत्वादर्शनादध्यासः, अध्यासादसाधारणधर्मत्वाग्रहणम्—इत्यन्योन्याश्रयो**ऽनादितया** परिहृतः । धर्मभूतज्ञानस्य नित्यत्वं, तिरोधानं च भवद्भिरभ्युपगम्यते तदा ज्ञाननाशप्रसङ्ग इति—चेन्नः ज्ञानं हि द्रव्यं तस्य स्वरूपातिरेकेण संकोचविकासात्मकमवस्थाद्वयमभ्युपेयम्, अतस्त**त्तिरोधानं** कर्मणा तत्संकोचः, तन्निवृत्तिस्तु प्रसरः, स एव प्रकाशः, स चानित्यः । तस्य नित्यत्वेऽपि—नित्यस्य ज्ञानद्रव्यस्य स्वप्रकाशत्ववादः स्वप्रकाशानरूपप्रसरणार्हत्वनिबन्धन । अतोऽवस्थाद्वयस्यागमापायित्वात्—द्रव्यं नित्यमेव । अस्मदवस्थास्थानीयो हि भवतः स्वप्रकाशः, स एव स्वरूपं, तस्मा**त्तिरोधानं** तन्निवृत्तिरेवेतीममर्थमभिप्रेत्य—**प्रकाशैकस्वरूपं ब्रह्मेत्युक्तम्** । अतः स्वरूपातिरेकिप्रकाशतिरोधानाख्यावस्थाद्वयानभ्युपगमात्—स्वरूपनाश एव तिरोधानं स्यादित्यर्थः ॥ **इति तिरोधानानुपपत्तिः** ॥

अथ स्वरूपानुपपत्तिमाह—अपि चेति । ज्ञातृत्वादीनामपरमार्थतया हि दोषान्तरापेक्षा तद्वदिहापीति—दृष्टान्ततया **वक्ष्यमाणानवस्थोपयोगिलेन—निर्विषयेत्यादिपरिपाटीप्रकटनं कृतम्** । यद्वा, विषयाश्रयभेदानामसत्त्व—प्रतिभासयोरुक्तिर्दोषकल्पनाकारत्वेन कृता; अनभ्युपगमादिति । परमार्थत्वे ह्यद्वैतहानिप्रसङ्ग **इति** भावः । अपरमार्थपक्षं दूषयितुं कोटित्रयमेव **संभावितमित्याह—तथासतीति** । अपरमार्थत्वान्मूलदोषान्तरापेक्षयाऽनवस्थेति दूषणं कोटित्रयस्यापि साधारणं,

१ °त्वज्ञानमे° ।

सति हि—द्रष्टृत्वेन वा, दृश्यत्वेन वा, दृशित्वेन वाभ्युपगमनीयः । न तावदृशिः; दृशिस्वरूपभेदानभ्युपगमात्, भ्रमाधिष्ठानभूतायास्तु साक्षाद्दृशेर्माध्यमिकपक्षप्रसङ्गेन—अपारमार्थ्यानभ्युपगमाच्च । द्रष्टृ-दृश्ययोः तदवच्छिन्नाया दृशेश्च काल्पनिकत्वेन मूलदोषान्तरापेक्षयानवस्था स्यात् । अथैतत्परिजिहीर्षया—परमार्थसत्यनुभूतिरेव ब्रह्मस्वरूपा दोष इति चेत्, ब्रह्मैव चेद्दोषः प्रपञ्चदर्शनस्यैव तन्मूलं स्यात्, किं प्रपञ्चतुल्याविद्यान्तरपरिकल्पनेन । ब्रह्मणो दोषत्वे सति तस्य नित्यत्वेन—अनिर्मोक्षश्च

दृशिलपक्षेऽधिकदूषणमस्तीति दर्शयति—**न तावदिति** । किमनवच्छिन्ना दृशिः, उतावच्छिन्ना । दृशेरनवच्छिन्नत्वे किं स्वरूपादिरिक्ता, स्वरूपमेव इति विकल्पमभिप्रेत्य, अनवच्छिन्नपक्षे स्वरूपव्यतिरिक्तपक्षं दूषयति—**दृशिस्वरूपभेदानभ्युपगमादिति** । अनवच्छिन्नदृशिद्वयानभ्युपगमादित्यर्थः । अनवच्छिन्नपक्षे-स्वरूपदृशिलपक्षं दूषयति—**भ्रमेति** । अवच्छिन्नदृशिदूषणत्वेन वक्ष्यमाणानवस्था अनवच्छिन्नपक्षेऽपि समाना, अत्राधिकदूषणद्वयसङ्गावात्मा नोक्ता । अवच्छिन्नदृशित्वेन, द्रष्टृत्वेन, दृश्यत्वेन चाभ्युपगमं दूषयति—**द्रष्टृदृश्ययोरिति** । **काल्पनिकत्वेना**परमार्थत्वेनेत्यर्थः । दोषान्तरापेक्षाहेतुरिदं काल्पनिकत्वम् । अवच्छिन्नदृशिपक्षेऽपि स्वरूपतद्व्यतिरिक्तविकल्पे-स्वरूपपक्षेपि तुल्यमनभ्युपगमरूपदूषणं; ब्रह्मस्वरूपस्यावच्छिन्नत्वापारमार्थ्यानभ्युपगमात्, अतोऽवच्छिन्नपक्षे न विकल्पितम् । स्वरूपातिरिक्तपक्षेऽनवस्थोक्ता—**अथैतदिति** । अपरमार्थत्वेऽनवस्था, परमार्थत्वे द्वैतहानिरित्येतद्दोषपरिजिहीर्षयेत्यर्थः । अनुभूतेरेव दोषत्वान्नाद्वैतहानिः, तस्याः पारमार्थ्यानवस्था-इति च भावः । एतद्दूषयति—**ब्रह्मैवेति** । अपारमार्थ्यदोषान्तरसापेक्षत्वसाम्यमभिप्रेत्य **प्रपञ्चतुल्य**शब्द उक्तः । **अतः** प्रतिशिरोऽभिहितैर्दूषणैरित्यर्थः । अनिर्मोक्षप्रसङ्गपरिहाराय **ब्रह्मव्यतिरिक्तत्वम्** । अनवस्थापरिहाराय **पारमार्थिकत्वम्** । परैरनवस्था त्रेधा परिहृता, जीवाज्ञानवादिना बीजाङ्कुरन्यायात्प्रवाहानादित्वेन परिहृता; अविद्याश्रया जीवः-जीवादविद्येति हि तन्मतम् । ब्रह्माज्ञानवादिना स्वरूपानादित्वेन परिहृता, उभाभ्यां च दुर्घटत्वेन परिहृता-दुर्घटत्वमविद्याया भूषणं, नतु दूषणमिति । परमार्थस्य ह्युपपत्त्यपेक्षा, प्रासादनिगरणादिष्वल्पास्थेन विपुलप्रासादनिगरणमनुपपन्नम्-इति युक्तिर्न प्रवर्तते, अत **उपपत्तिनिरपेक्षत्वम**पारमार्थ्यसाधकं, दोषस्य स्वरसनिर्वाहकत्वेन, दोषान्तरवैरपेक्ष्याच्च नानवस्थेति । अत्रोच्यते—प्रवाहानादित्वं ब्रह्माज्ञानवादिनैव दत्तोत्तरं-जीवनिरूपणश्रुतिभिः, अकृताभ्यागमकृतविप्रणाशरूपश्रुत्यर्थापत्त्या च आमोक्षाज्जीवस्य स्थायित्वमिष्टं हीयेतेति । अपारमार्थ्ये स्वरूपानादित्वमपि नानवस्थापरिहारः; **तथा सति माध्यमिकपक्षविजयप्रसङ्गात्** । तत्राधिष्ठानस्य भ्रान्तिसिद्धत्वे, तस्या भ्रान्तेरधिष्ठानान्तरापेक्षा स्यात्, **तस्यापि भ्रान्तिसिद्धत्वेऽनवस्था**-इत्यनवस्थाया ह्यधिष्ठानपारमार्थ्यं साधितं माध्यमिकेन । अपारमार्थ्यादधिष्ठानस्य स्वरूपानादित्वे स्वीकृतेऽनवस्था परिहृता-इत्यधिष्ठानापारमार्थ्यमेव स्यात् । किंच—स्वरूपानादित्वेऽपि मूलदोषापेक्षाऽस्त्येव; जीवस्यानादित्वेऽप्यविद्यापरिकल्पितत्वस्य भवद्भिरङ्गीकृतत्वात् । दुर्घटत्वं चानुपपन्नं; दुर्घटत्वं नाम—उपपत्तिनिरपेक्षत्वं, तदपारमार्थ्यसाधकं चेत्-अपरमार्थस्य प्रपञ्चस्य दुर्घटत्वेनोपपत्तिनिरपेक्षत्वात्-मूलदोषापेक्षा च न स्यात् । निवर्तकज्ञाने सत्यपि साऽवतिष्ठेत । **विरोधान्न तिष्ठतीति** चेत्, तर्ह्युपपत्त्यनुवर्तिन्यविद्या स्यादिति—परमार्थत्वप्रयुक्तोपपत्तिरपरमार्थत्वप्रयुक्तोपपत्तिरिति द्विविधोपपत्तिः । तत्र दुर्घटत्वं नाम—परमार्थत्वप्रयुक्तोपपत्तिनिरपेक्षत्वम् । अपरमार्थत्वप्रयुक्तोपपत्तिर्हि दोषापेक्षा, अतः प्रपञ्चस्य मूलदोषपरिकल्पनं युक्तमिति—चेत्, तर्ह्यपरमार्थत्वप्रयुक्तोपपत्तिरूपदोषापेक्षा अपरमार्थभूतदोषस्यापि स्यात्, ततोऽनवस्था तदवस्थैव । दुर्घटत्वमनवस्थापरिहारश्चेत्-अधिष्ठानापारमार्थ्येऽप्यनवस्था परिहृता स्यात् । तत्रापरमार्थत्वप्रयुक्तोपपत्तिरवर्जनीयेत्यधिष्ठानापेक्षा स्यादेवेत्यनवस्थितिः-इति वक्तव्यं, तदत्र दोषेऽपि तुल्यमित्यनवस्था दुष्परिहरा । प्रवाहानादित्वपक्षेऽपि, अधिष्ठानापारमार्थ्येऽपि-अनवस्था सुपरिहरा; पितृपुत्रादिपरम्परावदधिष्ठानपरम्परानादित्वाभ्युपगमात् । जीवाज्ञानवादिनं प्रति ब्रह्माज्ञानवादिना यद्दुर्घटत्वे दूषणमुक्तं तद् ब्रह्माज्ञानेऽपि तुल्यं, यथा—अविद्याया दुर्घटत्वं चेत्-मुक्तान्, परब्रह्म चाश्रयेदविद्या । शुद्धस्वरूपं ब्रह्म अशुद्धस्वरूपाविद्या विरोधात्-नाश्रयतीति चेत्-तर्ह्युपपत्तिमत्यविद्या, तस्मादुक्तान्योन्याश्रयणादिदूषणान्यापतेयुरिति ह्युक्तं, तत्तवापि तुल्यं मोक्षेऽपि ब्रह्माश्रयेदविद्या । न हि बाधकज्ञाने सत्यपरमार्थभूताऽविद्या तिष्ठतीति—चेत्, बाधकसन्निधौ न बाध्यस्थितिरित्येवंरूपोपपत्तिमत्येवाविद्या-इत्यस्मदुक्तान्यनवस्थादिदूषणान्यापतेयुरिति वक्तुं शक्यते । दोषस्य स्वपरनिर्वाहकत्वे—अधिष्ठानमपि तथा स्यात् । परं प्रत्यधिष्ठानत्वे सिद्धे हि स्वनिर्वाहकत्वमिति चेत्, परं प्रति दोषत्वे सिद्धे हि स्वनिर्वाहकत्वं-तदेव नास्तीति तुल्यं स्यात् । अधिष्ठानारोप्ययोर्भेदो दृष्टः, तत्राधिष्ठानस्य स्वपरनिर्वाहकत्वे-अधिष्ठानाध्यस्तयोरैक्यप्रसङ्ग इति चेत्, दोषतत्कार्ययोरपि तिमिरचन्द्रद्वित्वयोर्भेदो दृष्टः, दोषस्य स्वपरनिर्वाहकत्वे दोषाध्यस्तयोरैक्यप्रसङ्ग इति तुल्यम्-इत्येतदभिप्रायेण **यावद्ब्रह्मव्यतिरिक्तपारमार्थिकदोषानभ्युपगमः, न तावद्भ्रान्तिरूपपादिता**

---

१ °दूषणत्वे वक्ष्य° का. मु. पु. ।

स्यात्। अतो यावद्ब्रह्मव्यतिरिक्तपारमार्थिकदोषानभ्युपगमो न तावद्भ्रान्तिरुपपादिता भवति। अनिर्वचनीयत्वं च किमभिप्रेतं, सदसद्विलक्षणत्वमिति चेत्—तथाविधस्य वस्तुनः प्रमाणशून्यत्वेनानिर्वचनीयतैव स्यात्। एतदुक्तं भवति—सर्वं हि वस्तुजातं प्रतीतिव्यवस्थाप्यं, सर्वा च प्रतीतिः सदसदाकारा, सदसदाकारायास्तु प्रतीतेः सदसद्विलक्षणं विषय इत्यभ्युपगम्यमाने—सर्वं सर्वप्रतीतेर्विषयः स्यादिति। अथ स्यात्—वस्तुस्वरूपतिरोधानकरमान्तरबाह्यरूपविविधाध्यासोपादानं सदसदनिर्वचनीयमविद्या; ज्ञानादिपदवाच्यं वस्तुयाथात्म्यज्ञाननिवर्त्य ज्ञानप्रागभावातिरेकेण भावरूपमेव किंचिद्वस्तु प्रत्यक्षानुमानाभ्यां

भवतीत्युक्तम्। यथोक्तमाचार्यपादैः—'स्वरूपानादित्वं स्वपरघटने दुर्घटनता प्रवाहानादित्वं पुनरिति चतस्रो हि गतयः। असत्याविद्यायां गदितुमनवस्था परिहृता मतास्त्वेतासामुत्तराः स्फुटमसदधिष्ठानसरणा'विति। **इति स्वरूपानुपपत्तिः॥**

अथानिर्वचनीयत्वानुपपत्तिमाह—**अनिर्वचनीयत्वं चेति। अनिर्वचनीयता** विद्वत्सन्निधौ दुरुपपादत्वम्। कथं प्रमाणशून्यत्वमित्यत्राह—**एतदुक्तमिति। सर्वं सर्वप्रतीतेर्विषयः स्यादितीति।** सदसद्विलक्षणमिति या प्रतीतिस्तत्रापि सदसदेव विषयः स्यादित्यर्थः। प्रतीत्यनुगुणं हि नीलपीतादि व्यवस्थाप्यते, तस्मात्सदसदाकारायाः प्रतीतेः सदसदाकार एव विषयः, न सदसद्विलक्षणम्। यथा ख्यातिविवेके—'न ह्यन्यदवभास्यमन्यो विषयः, अवभासनव्यवस्थाप्यत्वं विषयस्ये'ति। एकस्य विषयस्य सदसदाकारत्वमनुपपन्नं; व्याप्तिविरोधादिति चेत्, सदसद्विलक्षणत्वं च व्याप्तिविरोधादनुपपन्नं; सतोऽसद्विलक्षणत्वमसतः सद्विलक्षणत्वं च हि दृष्टं, न लेकस्योभयवैलक्षण्यं दृष्टमिति व्याप्तिविरोधः। अयं च विशेषः—सदसद्विलक्षणत्वं क्वचिदपि न दृष्टं, सदसदात्मकत्वं दृष्टमिति। यथा संवित्सिद्धौ—**'नासत्प्रतीतेर्बाधाच्च न सदित्यपि यन्न तत्। प्रतीतेरेव सत्कं न बाधाच्चासत्कुतो जगं'**दिति। अर्थस्थितौ सत्त्वमसत्त्वं वा स्यात्, न तद्विलक्षणत्वम्। सतो घटादेः सदसद्विलक्षणत्वं दृष्टमिति—चेन्न; तथा सति—ब्रह्मणोऽपि सदसद्विलक्षणत्वप्रसङ्गात्। अन्यतरत्वं सदसद्विलक्षणत्वमिष्टमेवेति चेत्, तुल्यम्, ईदृशं सदसद्वैलक्षण्यं वदता शब्दान्तरेण सत्त्वमेवाङ्गीकृतं भवति, अतस्त्वदभिमतं सदसद्विलक्षणत्वं विरोधादपास्तम्। अस्तीति प्रतिपन्नत्वं सत्त्वं, नास्तीति धीविषयत्वं बाधितत्वम्—इत्येकस्यैव सत्त्वासत्त्वविरोधः सदसद्विलक्षणत्वकल्पकश्चेत्, सर्वत्र पूर्वपक्ष—सिद्धान्तप्रतीत्योः परस्परविरुद्धाकारविषयत्वात्—उभयाकारविलक्षण एवार्थः साध्य इति—सिद्धान्तसमर्थनवैयर्थ्यं स्यात्, ततश्च भेदः सुनिरूप इति पूर्वपक्षीकृत्य दुर्निरूप इति त्वया सिद्धान्तिते—प्रतीतिद्वयविरोधात्सुनिरूपदुर्निरूपविलक्षणः स्यात्। एवं संवित्सत्त्वत्वमिथ्यात्व-जडत्वाजडत्व-नित्यत्वानित्यत्वादिवादेषु पूर्वपक्षसिद्धान्तिताकारविलक्षणत्वं संविदः स्यात्, तच्चानभिमतम्, अतः परस्परविरुद्धाकारप्रतीत्योः प्रतिपन्नाकारवैलक्षण्यकल्पकत्वं व्याप्तिविरुद्धमिति—न सदसद्वैलक्षण्यसिद्धिः। तर्हि ख्यातिबाधान्यथानुपपत्तेः कः परिहार उक्त—इति चेत्, अन्यथैवोपपत्तिरुक्ता भवति; सत्त्वे सत्यन्यथख्यानादिभिस्तत्तद्वाद्यभिमतैरेव ख्यातिबाधोपपत्तेः। सतः कथं बाधः; अन्यत्र ख्यातत्वात्। ननु—अन्यत्र सत्त्वेन बाधः, न सत्त्वेदसत्ख्यातिप्रसङ्ग इति—चेन्न; अन्यत्र सत्त्वात्, अन्यत्र सतोऽन्यत्र ख्यातत्वं ह्यन्यथा ख्यातत्वम्। अन्यत्र सतोऽन्यत्र ख्यातिर्दोषवशात्, दोषस्यान्यत्र ख्यातिहेतुत्वं न दृष्टम्—इति चेत्, दोषस्यानिर्वचनीयावभासहेतुत्वं च न क्वचिद्भिमतिपदादन्यत्र दृष्टमिति—तुल्यं, मिथो विरुद्धाप्रतिपन्नाकारद्वयवैलक्षण्यमेकस्य विरुद्धमित्येतत्तत्ववादिकम्। अख्यातिपक्षे सत्त्वे सति भेदाग्रहेण—ख्यातिबाधोपपत्तिः; सत एवागृहीतभेदतया ख्यातिः, भेदग्रहश्च बाधः, बाध्यत्वं च प्रवृत्तेः। यथार्थख्यातिपक्षे तु शुक्तिरजत-स्वाप्नार्थादौ सत्त्वात्, प्रातुर्यौभावास्थिरत्वतदेकानुभाव्यत्वाग्रहाच्च—ख्यातिबाधोपपत्तिः, पुरोवर्तिनि सत एव रजतस्य ख्यातिः, शुक्तिप्रातुर्यग्रहो बाधः, तेन प्रवृत्तिर्बाध्या, तद्बाधश्च प्रवृत्त्यनुपपत्तिः, अलातचक्रादौ त्वख्यातिपक्ष इव तदुपपत्तिः, अतोऽन्यथैवोपपत्तिः सिद्धा—इत्यनिर्वचनीयत्वकल्पनमयुक्तम्। **इत्यविद्याग्रन्थेऽनिर्वचनीयत्वानुपपत्तिः॥**

एवमाश्रयतिरोधान-स्वरूपानिर्वचनीयत्वानुपपत्तय उक्ताः, अथ 'न हि दृष्टेऽनुपपन्नं नामे'ति न्यायात्प्रमाणसिद्धार्थस्य तर्केण बाधो न युक्त—इत्यभिप्रायवता परेण प्रमाणप्रतिज्ञा शङ्क्यते—**अथ स्यादिति।** पूर्वदूषिताकारान् साधयितुमाह—**वस्तुस्वरूपेति।** अनेन तिरोधानमुक्तम्। **आन्तरबाह्येति** स्वरूपमुक्तं; अध्यासोपादानत्वेन हि मिथ्यात्वं फलितम्। **सदसद्विलक्षणत्वमुक्तम्। शास्त्रेष्वेतत्प्रतिपादकशब्दप्रत्यभिज्ञानार्थमविद्याऽज्ञानादिपदवाच्यत्वमित्युक्तम्।** सिद्धान्तिना दूषयिष्यमाणमाकारान्तरमपि साध्यत्वेनाह—**वस्तुयाथात्म्यज्ञानेति। तदुपहितेत्याश्रयश्च।** आन्तराध्यासः कः, बाह्यः कः, कथं चाविद्योपादानत्वे ब्रह्मण उपादानत्वम्—इत्यत्राह—**तदुपहितेत्यादिना।** निष्कृष्टब्रह्मण उपादानत्वा-

---

१ इति वैकल्पं सत्त्वासत्त्वा° का. मु. पु.। २ °त्वागृहीतत्वाच्च का. मु. पु.। ३ एतत्पूर्वं का. मु. पु. ४६८ पृ. ननु चेत्यारभ्य ४७१ पृ. निर्वाहार्थमाहेत्यन्तं ४७४ पृ. टीकावामष्टमपङ्क्त्युत्तरं क्रमप्राप्ततया दृश्यमानमेव ग्रन्थजातं ग्रथितं दृश्यते, एतावद्ग्रन्थजातं कथंचा पिष्टपेषणदोषमलमभूदिति विमर्शनीयम्।

प्रतीयते, तदुपहितब्रह्मोपादानश्चाविकारे स्वप्रकाशचिन्मात्रवपुषि तेनैव तिरोहितस्वरूपे प्रत्यगात्मन्यहंकारज्ञानज्ञेयविभागरूपोऽध्यासः, तस्यैवावस्थाविशेषेण–अध्यासरूपे जगति ज्ञानबाध्यसर्परजतादिवस्तु तत्तज्ज्ञानरूपोऽध्यासोपि जायते, कृत्स्नस्य मिथ्यारूपस्य तदुपादानत्वं च मिथ्याभूतस्यार्थस्य मिथ्याभूतमेव कारणं भवितुमर्हतीति हेतुबलादवगम्यते, कारणज्ञानविषयं प्रत्यक्षं तावत्—'अहमज्ञो मामन्यं च न जानामी'त्यपरोक्षावभासः, अयं तु न ज्ञानप्रागभावविषयः; स हि षष्ठप्रमाणगोचरः, 'अयं त्वहं सुखीतिवदपरोक्षः, अभावस्य प्रत्यक्षत्वाभ्युपगमेऽप्ययमनुभवो नात्मनि ज्ञानाभावविषयः; अनुभववेलायामपि ज्ञानस्य विद्यमानत्वात्, अविद्यमानत्वे–ज्ञानाभावप्रतीत्यनुपपत्तेश्च । एतदुक्तं भवति—'अहमज्ञ' इत्यस्मिन्ननुभवेऽहमित्यात्मनोऽभावधर्मितया, ज्ञानस्य च प्रतियोगितयावगतिरस्ति वा, न वा। अस्ति चेत्, विरोधादेव न ज्ञानाभावानुभवसंभवः । नो चेत्, धर्मिप्रतियोगिज्ञानसव्यपेक्षो ज्ञानाभावानुभवः सुतरां न संभवति । ज्ञानाभावस्यानुमेयत्वे, अभावाख्यप्रमाणविषयत्वे चेयमनुपपत्तिः समाना । अस्याज्ञानस्य भावरूपत्वे धर्मिप्रतियोगिज्ञानसद्भावेपि विरोधाभावादयमनुभवो भावरूपाज्ञा-

नुपपत्तिं सूचयति—**अविकारे स्वप्रकाशेत्यादिना । अविकारत्वात्, स्वप्रकाशत्वात्, प्रत्यक्त्वाच्च**–विकारासदजडपराग्रूपपरिणामो नोपपद्यत इत्यर्थः । स्वप्रकाशस्य कथमध्यासंभव इत्यत्राह—**तिरोहितस्वरूपेति ।** तिरोधायकं किमित्यत्राह—**तेनैवेति । तेनैव** अध्यासहेतुनैवेत्यर्थः । **अहंकारो—ज्ञानं** चान्तरा ध्यासः, **ज्ञेयं** बाह्याध्यासः । **अध्यासरूपे** अध्यस्तरूपे, कर्मणि घञ् । **तस्यैव** दोषस्यैव । **अवस्थाविशेषेण** कादाचित्कावस्थाविशेषेण, रज्जुसर्पाद्यध्यासः । एवं निष्कृष्टब्रह्मण उपादानत्वानुपपत्तिरुक्ता, दोषस्योपादानत्वे उपपत्तिमाह—**कृत्स्नस्येति । सुवर्णजातीयस्य** भूषणस्य स्वर्णमेव ह्युपादानं दृष्टं—तद्वदिति भावः । **हेतुबलात्**कार्यकारणयोः सजातीयत्वदर्शनलक्षणात् । अथ प्रत्यक्षमाह—**कारणेति ।** अहमज्ञ इत्यस्य विवरणं **मामन्यं च न जानामी**ति । **अहमज्ञ** इत्यज्ञानस्वरूपकीर्तनम् । तस्य **मामन्यं च न जानामी**त्याच्छादनरूपकार्यकथनम् । **कारणाज्ञान**शब्देन कार्यरूपाज्ञानव्यावृत्तिः, तस्मात्सौषुप्तिकमज्ञानं विवक्षितम् । जागरितावस्थायां घटाद्यवच्छिन्नमज्ञानं प्रतीयते सविकल्पकप्रत्यक्षेण, सुषुप्तौ तु अनवच्छिन्नकारणाज्ञानप्रतीतिरिति तत्त्वशुद्धिकारादिभिरुक्तम् । जागरितावस्थायामेवाज्ञानानुभवोऽयमिति संप्रदायः; **अन्यं च न जानामी**त्युक्तेः । न हि स्वापेऽन्यपरामर्शः । **न जानामी**त्याच्छादकतया प्रतीयमानस्याज्ञानस्य कारणत्वात्—कारणाज्ञानविषयमित्युक्तम् । **अपरोक्षावभास** इति परोक्षरूपानुमानादिप्रमाणव्यावृत्त्यर्थमुक्तम् । ज्ञानप्रागभावविषयत्वमाशङ्क्य परिहरति—**अयं त्विति ।** भवत्वयमपि षष्ठप्रमाणविषय इत्याशङ्क्याह—**अयं त्विति ।** परोक्षप्रमाणानि प्रत्यक्षव्यतिरिक्तानि, तस्मात्परोक्षप्रमाणविषयः प्रागभावो नापरोक्षप्रमाणविषयभूतमज्ञानं भवितुमर्हतीत्यर्थः । भावग्राहिप्रमाणेनाभावस्य वेद्यत्वेऽपि दूषणमाह—**अभावस्येति ।** हेतुमाह—**अनुभवेति ।** अभावस्यानुभववेलायां ज्ञानं विद्यते, न वा । विद्यते चेत्, ग्राह्याभावान्नो भावप्रतीतिः । न चेत्, ग्राहकाभावान्न तदभावप्रतीतिरित्यर्थः । भावाभावयोरेकविषयत्वे हि विरोधः, अत्र विरोधो नास्ति; अभावविषयज्ञानस्य विद्यमानस्य ग्राहकत्वात्, इतरविषयज्ञानस्याभावप्रतियोगित्वेनाविद्यमानत्वादिति शङ्कां परिहरन्, अनुभववेलायां–ज्ञानस्य विद्यमानत्वम्, अविद्यमानत्वे–ज्ञानाभावप्रतीत्यनुपपत्तिं, भावरूपत्वे–विरोधाभावं च विवृणोति—**एतदुक्तं भवतीति ।** ज्ञानप्रागभावस्य ग्राह्यत्वे–अनिच्छयापि भावाभावयोरेकविषयत्वमापतितमित्यभिप्रायेणाह—**अहमिति । ज्ञानस्य चेति । ज्ञान**शब्द आत्मविषय–घटादिविषयज्ञानसाधारणः । 'इह भूतले घटो नास्ती'त्यादिषु अभावग्रहणे प्रतियोगिधर्मिणोर्ज्ञानापेक्षा दृष्टा, तस्मादत्राप्यभावधर्मितयात्मनो ज्ञानमस्तीति वक्तव्यम्; अभावव्यतिरिक्तो ह्यात्मा, अतस्तद्विषयज्ञाने सत्यपि—**अभावव्यतिरिक्तविषयज्ञानमभावप्रतियोगीति** वचनं व्याहतं स्यात् । अभाव-धर्मि-प्रतियोगिरूपत्रितयव्यतिरिक्तविषयज्ञानमभावप्रतियोगीति चेत्, तदानीमभावप्रतियोगितया ज्ञानस्यापि प्रतीतिरस्तीति वक्तव्यम् । प्रतीयमानं ज्ञानं स्वविषयावच्छिन्नं प्रतीयत इति—विषयाणामपि प्रतीतिरस्ति । एवमभावप्रतियोगिज्ञानावच्छेदकतया विषयेषु ज्ञायमानेषु तद्विषयज्ञानाभावोऽनुपपन्न—इति भावः । अभावस्य प्रमाणान्तरविषयत्वेऽप्युक्तदूषणमतिदिशति—**ज्ञानाभावस्येति** । प्रमाणान्तराणां विद्यमानविषयत्वनियमाभावेऽपि–विद्यमानतया दर्शयितुमशक्यमिति भावः । **अहमज्ञ** इति वर्तमानतया ह्यज्ञानं प्रतीयते, अस्मिन् पक्षेऽधिकं दूषणान्तरं पूर्वमुक्तम् । अपरोक्षस्य परोक्षरूपप्रमाणविषयत्वानुपपत्तिरूपमर्थसिद्धं, भावरूपत्वे उक्तदूषणं नास्तीत्याह—**अस्येति । धर्मिप्रतियोगिविषयज्ञानं धर्मिप्र-**

---

१ ज्ञानानुभव° म. मु. पु. २ प्रमाणविषयभूतमज्ञानं न भवितुमर्हति का. मु. पु. ।

नविषय एवाभ्युपगन्तव्य—इति। ननुच—भावरूपमप्यज्ञानं वस्तुयाथात्म्यावभासरूपेण साक्षिचैतन्येन विरुध्यते, मैवं; साक्षिचैतन्यं न वस्तुयाथात्म्यविषयम्, अपि त्वज्ञानविषयम्; अन्यथा मिथ्यार्थावभासानुपपत्तेः। नह्यज्ञानविषयेण ज्ञानेनाज्ञानं निवर्त्यत इति—न विरोधः। ननुच—इदं भावरूपमप्यज्ञानं विषयविशेषव्यावृत्तमेव साक्षिचैतन्यस्य विषयो भवति, स विषयः प्रमाणाधीनसिद्धिरिति—कथमिव साक्षिचैतन्येनास्मदर्थव्यावृत्तमज्ञानं विषयीक्रियते, नैष दोषः; सर्वमेव वस्तुजातं ज्ञाततया, अज्ञाततया वा साक्षिचैतन्यस्य विषयभूतं, तत्र जडत्वेन ज्ञाततया सिध्यत एव प्रमाणव्यवधानापेक्षा, अजडस्य तु—प्रत्यग्वस्तुनः स्वयं सिध्यतो न प्रमाणव्यवधानापेक्षेति—सदैवाज्ञानस्य व्यावर्तकत्वेनावभासो युज्यते, तस्मान्न्यायोपबृंहितेन प्रत्यक्षेण भावरूपमेवाज्ञानं प्रतीयते। तदिदं भावरूपमज्ञानमनुमानेनापि सिध्यति—विवादाध्यासितं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशज-

---

तियोगिज्ञानम्। न तेन भावरूपाज्ञानस्य विरोधः; घटाच्छादकमज्ञानं घटज्ञानेन हि विरुध्यते, न तु घटज्ञानविषयज्ञानेन, धर्मिज्ञानेन चेत्यर्थः। वस्तुयाथात्म्यज्ञाननिवर्त्यमज्ञानं वस्तुयाथात्म्यावभासरूपेण साक्षिचैतन्येन विरुध्यत इति चोदयति—**ननु चेति**। परिहरति—**मैवमिति**। **याथात्म्य**शब्देन निष्कृष्टमद्वितीयत्वलक्षणं स्वरूपं विवक्षितम्। प्रपञ्चमिथ्यात्वसिद्धयकारेण हेतुमाह—**अन्यथेति**। **अन्यथा** स्वसाक्षिस्वरूपप्रकाशमात्रस्यैव वस्तुयाथात्म्यविषयत्व इत्यर्थः। अज्ञानविषयत्वमस्तु, ततः किमित्यत्राह—**न हीति**। नहि रजतविषयज्ञानेन रजतं निवर्त्यमित्यर्थः। दृश्यविशेषणस्य रूपादेरपि दृश्यत्वं दृष्टं; दृश्यज्ञानावच्छेदकस्यास्मदर्थस्य दृश्यत्वानभ्युपगमात्। अस्मदर्थावच्छिन्नमज्ञानं न विषयीक्रियत इत्यभिप्रायेण पुनश्चोदयति—**ननु चेदमिति। विषयविशेषः** अवच्छेदकविशेषः। **स** इति स एव परामृश्यते। परिहरति—**नैष दोष इति**। **अस्मदर्थोऽपि सर्वशब्दवाच्यान्तर्भूतः। ज्ञाततया, अज्ञाततया वा** ज्ञानान्तरसापेक्षं, तन्निरपेक्षं वा। **साक्षिचैतन्यस्य विषयभूतं** साक्षिचैतन्येन प्रतिभातीत्यर्थः। अस्मदर्थस्य साक्षिचैतन्यविषयत्वमौपचारिकं; स्वयंप्रकाशस्य स्वस्य विषयत्वायोगात्, जडस्य स्वयंप्रकाशत्वायोगात्–प्रमाणाधीनसिद्धि सन् दृश्यविशेषणं भवति। अस्मदर्थस्तु स्वयंप्रकाशतया स्वयमेव सिध्यन्नज्ञानावच्छेदक इत्यर्थः। दृश्यावच्छेदकत्वाद्दृश्यमिति—चोद्यं, तज्जडत्वप्रयुक्तमिति सोपाधिकमिति—परिहारः। **तस्मात् अभावरूपत्वपक्षे** उक्तविरोधात्, भावरूपत्वपक्षे तदभावाच्चेत्यर्थः। **न्यायोपबृंहितेनेति**। पक्षद्वयेऽपि विरोधतदभावरूपन्यायानुगृहीतेनेत्यर्थः। एवं प्रत्यक्षेण न्यायानुगृहीतेनाज्ञानस्य भावरूपत्वं, 'न जानामी'त्यनेनात्माश्रयत्वं च सिद्धम्। **शास्त्रेष्वज्ञानशब्दवाच्यतया** परामिमतकर्मव्यावृत्तिः प्रत्यक्षतया सिद्धा। अस्य च शास्त्रेष्वज्ञानादिशब्दवाच्यत्वं ज्ञानविरोधित्वात्, 'अहमज्ञ' इति प्रतिपन्नतया च सिद्धम्। अथ स्वविषयावरणत्व–स्वनिवर्त्यत्वाभ्यां सहोपपादिताकारविशिष्टं चाज्ञानमनुमानेनापि साध्यते—**विवादाध्यासितमित्यादिना। ज्ञान**मित्युक्ते—ब्रह्मस्वरूपस्य वस्त्वन्तरपूर्वकत्वासंभवात्–तद्व्यावृत्त्यर्थं **प्रमाणज्ञान**मित्युक्तम्। तथापि धारावाहिकज्ञाने उत्तरोत्तरविज्ञानानां सिषाधयिषितवस्त्वन्तरपूर्वकत्वाभावात्–तद्व्यावृत्त्यर्थं **विवादाध्यासित**मित्युक्तम्। तज्ज्ञानं किमित्यपेक्षायां—व्यक्त्यर्थं **प्रमाणज्ञान**मित्युक्तम्। अयं धर्मी दर्शितः, अथ साध्यधर्ममाह—**स्वप्रागभावेत्यादिना**। वस्त्वन्तरपूर्वकमित्युक्ते घटादिस्वविषयपूर्वकत्वेन सिद्धसाधनं स्यादिति—तद्व्यावृत्त्यर्थमाह—**स्वदेशगतेति**। स्वाश्रयगतेत्युक्ते—दृष्टान्तस्य साध्यवैकल्यं स्यात्। न हि तमो दीपगतमतः **स्वदेशगतेत्युक्तिः**। धर्माधर्मव्यावृत्त्यर्थमाह—**स्वनिवर्त्येति**। ननु—कथं स्वनिवर्त्यशब्देन धर्माधर्मव्यावृत्तिः, ज्ञानोत्पत्तिहेतुभूतमदृष्टं ज्ञानोत्पत्त्या हि नश्यति, मैवम्; सर्वेषां धर्माधर्माणां ज्ञानफलकत्वाभावात्, ज्ञानोत्पादकव्यतिरिक्तधर्मादीनां पूर्वक्षणे स्वदेशे विद्यमानत्वाच्च। यद्वा, **स्वनिवर्त्य**पदेन संस्कारव्यावृत्तिः; न हि संस्कारो ज्ञानेन निवर्त्यः। भयादिव्यावृत्त्यर्थमाह—**स्वविषयावरणेति**। प्रागभावस्यैवंविधत्वात्–तद्व्यावृत्त्यर्थमाह—**स्वप्रागभावव्यतिरिक्तेति**। इति प्रतिलोमव्यावृत्तिः। **वस्त्वन्तरपूर्वक**मित्युक्ते—अभावस्यापि पदार्थत्वेन **वस्तु**शब्दवाच्यत्वात्–तद्व्यावृत्त्यर्थमाह—**स्वप्रागभावव्यतिरिक्तेति**। घटादिस्वविषयव्यावृत्त्यर्थमाह—**स्वविषयावरणेति**। कुड्यादिव्यावृत्त्यर्थमाह—**स्वनिवर्त्येति**। वेद्यगतमित्यभिव्यक्तिप्रागभावव्यावृत्त्यर्थमाह—**स्वदेशगतेति**। प्रमाणज्ञानेनाज्ञाने निरस्ते वेद्यगतचैतन्यमभिव्यक्तं भवतीति हि तत्परिपाटी। अभिव्यक्तिप्रागभावस्य विषयावरणत्वं प्रकाशविरोधित्वं, न तु तत्प्रतिबन्धकत्वम्–इत्यनुलोमव्यावृत्तिः। हेतुमाह—**अव्यवहारानुगुण्येति**। साक्षाद्वा, परम्परया वा अबाध्यव्यवहारानुगुण्यहेतुत्वं प्रकाशकत्वमिह विवक्षितम्। साक्षाद्वा, परम्परया वेत्युक्ते हि दीपप्रभायां, ज्ञाने च हेत्वनुगमसिद्धिः। 'इदं रजत'मिति ज्ञानेऽतिव्याप्तिपरिहाराय **अबाध्यव्यवहारानुगुण्यहेतुत्व**मित्युक्तम्। **प्रकाशकत्वादित्युक्ते—धारावाहिकज्ञाने** उत्तरोत्तरज्ञानानां प्रकाशकत्वेऽपि, सिषाधयिषितध-

गतवस्त्वन्तरपूर्वकम्; अप्रकाशितार्थप्रकाशकत्वात्—अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति। आलोकाभावमात्रं वा, रूपदर्शनाभावमात्रं वा तमः न द्रव्यं, तत्कथं भावरूपाज्ञानसाध्रने निदर्शनतयोपन्यस्यत इति चेत्, उच्यते—बहुलत्वविरलत्वाद्यवस्थायोगेन, रूपवत्तया चोपलब्धेः—द्रव्यान्तरमेव तम इति निरवद्यम्—इति। अत्रोच्यते—'अहमज्ञो मामन्यं च न जानामी'त्यत्रोपपत्तिसहितेन, केवलेन च प्रत्यक्षेण न भावरूपमज्ञानं प्रतीयते, यस्तु ज्ञानप्रागभावविषयत्वे विरोध उक्तः स हि भावरूपाज्ञानेपि तुल्यः विषयत्वेनाश्रयत्वेन चाज्ञानस्य व्यावर्तकतया प्रत्यगर्थः प्रतिपन्नो वा, अप्रतिपन्नो वा। प्रतिपन्नश्चेत्, तत्स्वरूपज्ञाननिवर्त्य तदज्ञानं तस्मिन्प्रतिपन्ने कथमिव तिष्ठति। अप्रतिपन्नश्चेत्, व्यावर्तकाश्रयविषय-

---

र्माभावाद्धेतोरनैकान्त्यं स्यादिति—तद्व्यावृत्त्यर्थमाह—**अप्रकाशितार्थप्रकाशकत्वादिति**। इन्द्रियेष्वनैकान्तिकत्वव्यावृत्त्यर्थं **भासमानत्वे सती**ति हेतुर्विशेषित इति मन्तव्यम्। दृष्टान्तमाह—**अन्धकार इति**। प्रदीपप्रभावदित्युक्तेउत्तरोत्तरप्रभाणामप्रकाशितार्थप्रकाशकत्वाभावात्–साधनविकलता स्यात्, खनिवर्त्यवस्त्वन्तरपूर्वकत्वाभावात्साध्यविकलता च स्यादिति—तद्व्युदासार्थं **प्रथमोत्पन्नप्रदीपप्रभाव**दित्युक्तम्। तथापि दिवा दीपप्रभायास्तथाविधत्वादर्शनात्–तद्व्यावृत्त्यर्थ**मन्धकार** इत्युक्तम्। दृष्टान्तस्य साध्यविकलतामाशङ्क्य परिहरति—**आलोकेत्यादिना**। आलोके सत्युलूकादीनामन्धकारसंभवादनुपायिनमाकारमाह—**रूपदर्शनाभावमात्रं वेति**। यद्वा, निमीलिताक्षस्य तमःप्रतिपत्तिर्निर्बाधमाह—**रूपदर्शनेति**। अत्र नैयायिकादिभिरुक्तं दूषणमनुसन्धीयते। तत्रोत्पादकज्ञापकानुपपत्त्या—द्रव्यान्तरत्वं दूषितं, रूपवत्त्वेऽपि–परमाणूनामेव अनुत्पाद्यत्वं, तमसस्तु रूपवत्त्वाद्बहुत्वाच्च–उत्पाद्यत्वं स्यात्, तत्र रूपवत्त्वात्तद्रहितानि वाय्वाकाशादीनि नोत्पादकानि भवन्ति, स्पर्शरसगन्धविरहान्नान्यान्यपि द्रव्याणि; कारणगुणप्रक्रमेण हि वैशेषिकगुणारम्भः। इयमुत्पत्त्यनुपपत्तिः। आलोकानुगृहीतत्वाच्चक्षुर्न ग्राहकम्, आलोकसन्निधावनवस्थानात्तस्य ग्राह्यत्वं, रूपवत्त्वप्रतीतिस्तु भ्रान्तिरेवनिमीलने नीलप्रतिभासवत्। इति ज्ञप्त्यनुपपत्तिः। अत्र परिहारो वार्तिककारैरुक्तः—'तमः खलु चलं नीलं परापरविभागवत्। प्रसिद्धधर्मवैधर्म्यान्नवभ्यो भेत्तुमर्हती'ति। स एवात्रोच्यते—**उच्यते इत्यादिना**। तत्र **परापर**शब्दार्थौ **बहुलत्वविरलत्व**शब्देन उक्तः। **आदि**शब्देन चलत्वम्। **रूपवत्त्ये**ति **नील**शब्दार्थ उक्तः। **द्रव्यान्तरमेव दशमद्रव्यत्वमुक्तं**; नवद्रव्यस्वीकारो हि तेषां पृथिव्यादीनां द्रव्याणामन्योन्यवैधर्म्यात्स्वीक्रियते; अन्यथा पृथिव्येव द्रव्यं नान्यत्; **गन्धवत्त्वाद्यभावादिति**—वक्तुं शक्यते। एवं **द्वे द्रव्ये** इत्यादि तच्चानभिमतं; द्रव्याणां परस्परवैधर्म्यात्। एवं नवद्रव्यवैधर्म्याद्दशमद्रव्यत्वमङ्गीकार्यमिति—वार्तिकार्थः। निमीलने नीलप्रतिभानम् बाधितविषयम्, इदं लबाधितत्वान्न तथा भवितुमर्हति, तथापि रूपोपलब्धिवेलायामनुपलब्धेर्निमीलनवदपि संभवतीति शङ्कितम्। **प्रत्यक्षमिति** चेत्, उलूकादीनामस्मदादिरूपोपलब्धिवेलायां रूपानुपलब्धौ–तद्रूपोपलब्धेरपि शङ्कितत्वापातात्, उलूकादिरूपोपलब्धिवेलायामस्मदादे रूपानुपलब्ध्या—अस्मदादिरूपोपलब्धेरपि शङ्कितत्वप्रसङ्गात्, आगमस्वारस्याच्च–शङ्काया निरस्तत्वात्–तमसो दशमद्रव्यत्वमवसीयते। 'तमः ससर्ज भगवान्, नाहो न रात्रिर्न नभो न भूमिर्नासीत्तमो ज्योतिरभून्न चान्यत्, यस्य तेजः शरीरं, यस्य तमः शरीर'मिति सृज्यत्व–संहार्यत्व–शरीरत्वादीनि हि श्रूयन्ते। आलोकनैरपेक्ष्यं यथा—ज्ञातृविशेषप्रयुक्तं दृश्यते, तथा—ज्ञेयविशेषप्रयुक्तमप्युपपद्यते। यथा लोके हि कार्यं प्रतीतं तथा कारणकल्पनायां प्रमाणं, न पुनः 'स्फुटावधारितं कार्यं कारणनिरूपणायाः पदवमर्हती'ति न्यायात्–अबाधितप्रतीतिसिद्धस्य तमस उत्पादकं कल्प्यमिति—नोत्पादकानुपपत्तिः, ज्ञापकानुपपत्तिर्वा। यथा—'तमो नाम द्रव्यं बहुलविरलं मेचकचलं प्रतीतं केनापि क्वचिदपि न बाधश्च दृश्ये। अतः कल्प्यो हेतुः प्रमितिरपि शाब्दी विजयते निरालोकं चक्षुः प्रथयति हि तद्दर्शनवशात्'। तमो द्रव्यमित्येव भाष्यकारमतं; सिद्धान्ते तस्यादूषितत्वात्, सृज्यत्व–संहार्यत्व–शरीरत्वश्रवणाच्च। स्वच्छद्रव्यत्वादाकाशकार्यं तमः, रूपवत्त्वं पञ्चीकरणादुपपद्यते। यद्वा, तेजःकार्यं तमः; रूपवत्त्वात्, स्पर्शानुपलम्भः; स्वच्छद्रव्यत्वादिति।—**इति निरवद्यमिति**। प्रमाणसिद्धत्वेन तर्कबाधानुपपत्त्या—निरवद्यमित्यर्थः। अथ सिद्धान्तं वक्तुमुपक्रमते—**अत्रोच्यत इति। केवलेन च प्रत्यक्षेणे**ति दृष्टान्ततयोक्तम्। उपपत्तिदूषणे कृते–केवलं प्रत्यक्षं न साधकमित्यर्थः। उपपत्तिर्हि ज्ञानप्रागभावविषयत्वे विरोधः, स भावरूपत्वेऽपि तुल्य इत्याह—**यस्त्विति**। तुल्यत्वमुपपादयति–**विषयत्वेनेति। प्रतिपन्न**शब्देन भासनमुच्यते। **तत्स्वरूपज्ञाननिवर्त्यमिति**। **स्वरूपज्ञानं** स्वरूपावभासः। स्वतो वा, प्रमाणान्तरेण वा स्वरूपावभासनिवर्त्यमित्यर्थः। 'इदं रजत'मित्यत्र 'इदं शुक्लभास्वर'मित्येवंरूपप्रमाणज्ञानशते जातेऽपि भ्रमानिवृत्तिदर्शनात्–प्रमाणज्ञानत्वमप्रयोजकमिति सिद्धवत्कारेण—**तत्स्वरूपज्ञाननिवर्त्य**मित्युक्तम्। **व्यावर्तकाश्रयविषयज्ञानशून्यम्** आश्रयतया, विषयतया च **व्यावर्तकः** प्रत्यगर्थः तदवभासशून्यम्। **विषयत्वे**त्यादिना भाष्येण स्वात्मविषयाज्ञानप्रतिपत्तौ विरोधतुल्यत्वं दर्शितम्। घटादिविषयाज्ञानप्रतीतावपि

ज्ञानशून्यमज्ञानं कथमनुभूयेत । अथ विशदस्वरूपावभासोऽज्ञानविरोधी, अविशदस्वरूपं तु प्रतीयत इत्याश्रयविषयज्ञाने सत्यपि नाज्ञानानुभवविरोध–इति । हन्त तर्हि ज्ञानप्रागभावोऽपि विशदस्वरूपविषयः, आश्रयप्रतियोगिज्ञानं त्वविशदस्वरूपविषयमिति न कश्चिद्विशेषोन्यत्राभिनिवेशात् । भावरूपस्याज्ञानस्यापि ह्यज्ञानमिति सिध्यतः प्रागभावसिद्धाविव सापेक्षत्वमस्त्येव । तथाहि—अज्ञानमिति ज्ञानाभावः, तदन्यः, तद्विरोधि वा । त्रयाणामपि तत्स्वरूपज्ञानापेक्षाऽवश्याश्रयणीया । यद्यपि तमःस्वरूप-

अज्ञानस्य विषयत्वेन व्यावर्तकतया घटः प्रतिपन्नः, न वा । प्रतिपन्नश्चेत्, घटस्वरूपज्ञाननिवर्त्य घटाज्ञानं तस्मिन् घटे प्रतिपन्ने कथमिव तिष्ठति । घटोऽप्रतिपन्नश्चेत्, व्यावर्तकविषयज्ञानशून्यमज्ञानं कथमनुभूयेतेत्यर्थसिद्धो विरोधो द्रष्टव्यः । **इति प्रमाणानुपपत्तौ भावरूपाज्ञानसमर्थनम्** ॥

एवं परेण भावाभावयोर्विरोधे दर्शिते तत्प्रतिबन्दीत्वेन निवर्त्यनिवर्तकविरोध उक्तः, अथ विशदाविशदविभागादविरोधमाशङ्क्य ते—**अथेति** । प्रत्यगर्थस्य प्रमाणज्ञानेनावभासो विशदावभासः, स स्वपक्षेऽपि तुल्य इत्याह—**हन्त तर्हीति** । विशदस्वरूपमवच्छेदकं यस्य स **विशदस्वरूपविषयः** । विशदस्वरूपस्य **प्रागभावावच्छेदकत्वं** स्वविषयज्ञानद्वारा । ज्ञानप्रागभावोऽपि विशदस्वरूपज्ञानावच्छिन्न इत्यर्थः । ज्ञानस्य चाभावावच्छेदकत्वं प्रतियोगितया । विशदस्वरूपज्ञानं प्रागभावप्रतियोगि इति यावत् । अविरोधसिद्धये—विद्यमानज्ञानस्य ततोऽर्थान्तरत्वमाह—**आश्रयेति** । आश्रयप्रतियोगिनोर्ज्ञानमाश्रयप्रतियोगिज्ञानम् । **अविशदस्वरूपविषयमिति** । आश्रयज्ञानस्या**विशदस्वरूपविषयत्वम्** अविशदप्रत्यगर्थविषयत्वं, प्रतियोगिज्ञानस्या**विशदस्वरूपविषयत्वम्** अभावप्रतियोगिभूताविशदज्ञानविषयत्वम् । सविषयं निवर्तकज्ञानमभावप्रतियोगित्वेनेदानीं ज्ञानमवलम्बते, तत्र निवर्तकज्ञानविषयस्य प्रत्यगर्थस्येदानीमविशदत्वात्, निवर्तकज्ञानस्येदानीमविद्यमानत्वात्—प्रतियोगिनो ज्ञानस्या**विशदत्वं**; विद्यमानं हि साश्रयं ज्ञानमपरोक्षावभासरूपम् । अतस्तस्याविशदत्वमविद्यमानतया भवति । एवमाश्रयतया भासमानं स्वरूपमविशदं, प्रतियोगितया च स्मर्यमाणं ज्ञानमिदानीमविशदविषयत्वात्, अविद्यमानत्वाच्च—अविशदमिति—तदुभयविषयज्ञानमविशदस्वरूपविषयं, तच्च विद्यते, विशदज्ञानं त्वविद्यमानमभावप्रतियोगि—इति न विरोध इत्यर्थः । अयमर्थः—अज्ञाननिवर्तकाभिमतप्रमाणज्ञानाभावस्तावत् त्वयाभ्युपगन्तव्यः; अन्यथा प्रमाणज्ञाननिवर्त्याज्ञानानुभवासंभवात्, ततश्च त्वदभ्युपगतप्रमाणज्ञानाभाव एव 'अहमज्ञ' इति प्रतिपत्तेर्विषयो भवितुमर्हतीति नाभावप्रहणानुपपत्त्या भावरूपत्वं कल्प्यमिति । पूर्वपक्षोक्तविरोधः कथं परिहृतो भवतीति चेत्, इत्थं—तत्र हि यदर्थावच्छिन्नं ज्ञानमभावप्रतियोगितयोच्यते अभावप्रतियोगिज्ञानावच्छेदकतदर्थप्रतिपत्तौ सत्यां—तज्ज्ञानाभावोऽनुपपन्न इति हि विरोधः, तत्रायं परिहारः–अभावप्रतियोगिज्ञानं स्मृत्यारूढं प्रतिषिध्यते, यथा—'घटसाक्षात्कारो नास्ती'ति निषेधे घटसाक्षात्कारः स्मर्यते, स्मर्यमाणस्य च स्मृतिसमकालवर्तित्वनियमाभावात्–निषेधवेलायां स्मर्यमाणस्य नाभावप्रतियोगित्वविरोधः, त्ववाच स्मृत्यारूढस्य निवर्तकज्ञानस्य स्मृतिसमकालत्वाभावात्–अज्ञानावच्छेदकतया प्रतिपत्तावपि स्मृत्यारूढं निवर्तकज्ञानं नाज्ञानविरोधीति वक्तव्यं, तस्मादात्मविषयं, घटादिविषयं च प्रमाणज्ञानं स्वविषयेणात्मना, घटादिमिश्रं सह स्मृत्यारूढमविशदतया प्रतिपन्नमभावप्रतियोगि भवतीत्युपपन्नतरमिति । अनुभूतस्य हि स्मरणसंभवः, प्रमाणज्ञानं केनानुभूतमिति चेत्—भवतो वा निवर्तकज्ञानं केनानुभूतम्, आगमादिति चेत्—अस्माकमप्यात्मसाक्षात्कारस्तद्विधायकवाक्यावगतः, घटादिसाक्षात्कारस्तु प्रत्यक्षादिषु येन केनाप्यनुभूतः, मेरुसाक्षात्कारः कथं निषिध्यते, स हि न केनापि मानेन पूर्वमनुभूतः; उच्यते—इहादृष्टचरद्विरदेन पुरुषेण कथंमिह चत्वरे गजो'नास्तीत्युच्यते, संसर्गाननुभवेपि संसर्गिणोऽनुभवमात्रेणान्यत्रान्यतरनिषेध उपपद्यत इति चेत्—एवं तर्हि सुमेरु–साक्षात्कारसंसर्गानुभवेऽपि सुमेरु–साक्षात्कारयोः केनाप्यवगमात्—तत्संसर्गनिषेध उपपद्यते । प्रमाणज्ञानानामभावप्रतियोगित्वात्–अभावस्य तदानीं ग्राहकं नास्तीति—यदुक्तं तत्सर्वप्रमाणज्ञानाभावानां युगपदनुभवासंभवात्, कतिपयमानज्ञानाभावस्य मानान्तरेण ग्रहणोपपत्तेश्च–परिहृतम् । एवं भावरूपपक्षे विरोधपरिहारसाम्यं दर्शितम् । ननु—विरोधसाम्यं वक्तुमशक्यं; अज्ञानस्य नञर्थप्रतियोग्यवच्छिन्नतयैवावगन्तव्यत्वे सति हि नञर्थप्रतियोगिनस्तस्य ज्ञानस्य स्वविषयाश्रयभूतप्रत्यगर्थावच्छिन्नत्वेन भातत्वात्–विषयाश्रयभूतप्रत्यगर्थज्ञाने सति तन्निवर्त्याज्ञानस्थितिविरोधः । नहि भावरूपस्याज्ञानस्य ज्ञानप्रतिपत्त्यपेक्षा; स्वरूपेणैव प्रतिपत्तिसंभवात् । न हि भावरूपस्य घटस्याश्रयप्रतियोगिज्ञानसापेक्षत्वं दृष्टमित्याह—**भावरूपस्येति** । कथं सापेक्षत्वमित्याह—**तथा हीति** । अभावस्य नञर्थत्वसंभवात् तदुक्तिः । प्रमाणज्ञानादन्यत्, प्रमाणज्ञानविरोधीति वा तत्प्रतिपत्तिः । तदा तस्य ज्ञानस्य स्वविषयावच्छिन्नत्वेन प्रतिपन्नत्वात्–प्रत्यगर्थस्य घटादेर्वा ज्ञाने सति तन्निवर्त्यमज्ञानं न गृह्यतेत्यर्थः । यथा—प्रकाशविरोधित्वेऽपि तमसस्तत्प्रतिपत्तौ न प्रकाशापेक्षा—तद्वदिहापीत्याह—**यद्यपीति** । भावरूपमज्ञानमपि स्वरूपेण सिध्यतीत्य-

प्रतिपत्तौ प्रकाशापेक्षा न विद्यते, तथापि प्रकाशविरोधीत्यनेनाकारेण प्रतिपत्तौ प्रकाशप्रतिपत्त्यपेक्षास्त्येव। भवदभिमताज्ञानं न कदाचित्स्वरूपेण सिध्यति, अपि त्वज्ञानमित्येव। तथा सति ज्ञानाभाववत्तदपेक्षत्वं समानम्। ज्ञानप्रागभावस्तु भवताप्यभ्युपगम्यते, प्रतीयते चेत्युभयाभ्युपेतो ज्ञानप्रागभाव एवा'हमज्ञो मामन्यं च न जानामी'त्यनुभूयत इत्यभ्युपगन्तव्यम्। नित्यमुक्तस्वप्रकाशचैतन्यैकस्वरूपस्य ब्रह्मणोऽज्ञानानुभवश्च न संभवति; स्वानुभवस्वरूपत्वात्। स्वानुभवस्वरूपमपि तिरोहितस्वरूपमज्ञानमनु-

---

त्राह—**भवदभिमतेति।** 'मुग्धोऽस्मि मूढोऽस्मी'ति स्वरूपेण सिद्धिरिति चेन्न; कस्यचित्पुरुषस्य कस्मिंश्चिद्विषये हि मोहः—'स विमलमतिरेति नात्ममोहम्'। **दिङ्मोहालातचक्रादिभ्रान्तयश्च कथं पुनरित्यादिषु** विषयाश्रयावच्छिन्नत्वेन हि मोह उपलभ्यते, 'मुग्धोऽस्मी'त्यनेनाश्रयावच्छिन्नत्वं प्रतीयते, विषयोऽप्यर्थवशात् **सिद्धः**, इदं दूषणं 'संविन्सिध्यति वा न वे'त्यत्रोक्तया दिशा फलितम्। ततश्च स्वात्मविषयाज्ञानं विषयाश्रयभूतप्रत्यगर्थप्रतिपत्तिसङ्गावहतं; घटाद्यज्ञानं तु विषयभूतघटाद्यवगमविरुद्धम्। **माया**शब्दादिभिरज्ञानप्रतिपत्तौ विषयाश्रयापेक्षा नेति—चेन्न; मायादिशब्दानामपि व्युत्पत्तिनैरपेक्ष्येण बोधकत्वासंभवात्। अज्ञानादिपदपर्यायत्वेन च व्युत्पन्नत्वात्–स्वरूपेण सिद्धिर्दुर्वचेत्यभिप्रायेण **न कदाचित्स्वरूपेण सिध्यती**त्युक्तम्। ननु—स्वरूपावच्छिन्नाज्ञानप्रतीतौ नत्वर्थप्रतियोगिज्ञानावच्छिन्नतया सिद्धावपि—न निवर्त्यनिवर्तकविरोधः; स्वरूपभूतज्ञानादन्यतया तत्सिद्धेः। स्वरूपज्ञानं हि नाविद्यानिवर्तकं, किंतु प्रमाणज्ञानमेव, अतो न विरोध इति—नैवं; 'मामन्यं च न जानामी'ति विषयाश्रयसंबन्धिज्ञानावच्छिन्नतया प्रतीतेः। न हि स्वरूपभूतज्ञानं साश्रयं, सविषयं च तव मतं; स्वरूपं—किमाश्रयतयैवाज्ञानस्यावच्छेदकम्, उत विषयतयापि। आद्ये—न त्वदभिमतसिद्धिः; तदानीं प्रत्यगर्थस्य स्वस्मादन्येन केनापि विशिष्टत्वमेव हि मिथ्यति। विषयतयावच्छेदकत्वे—प्रत्यगर्थस्याज्ञानमावरणं स्यात्, आवरणत्वं च तद्विषयज्ञानप्रतिबन्धकत्वम्, अतस्तद्विषयप्रमाणज्ञानप्रतीत्यवश्यंभावात्–उक्तविरोधोऽनतिवृत्तः। अतः स्वरूपभूतज्ञानावच्छिन्नप्रतीत्यभ्युपगमोऽनुपपन्नः। उभयत्र साधनदूषणयोस्तुल्यत्वात्–भावरूपमज्ञानं परिगृह्यतामित्याशङ्क्य लाघवन्यायेन परिहरति—**ज्ञानप्रागभावस्त्विति। अभ्युपगम्यते** 'अहमज्ञ' इति प्रतिपन्नस्य अभावरूपत्वे हि विप्रतिपत्तिः, न त्वभावानभ्युपगमः; अन्यथा प्रमाणज्ञानस्य प्रागभावाभावादनादित्वेन—तन्निरसनीयभावरूपाज्ञानानुदयप्रसङ्गात्। अतो ज्ञानाभावस्त्वयाऽभ्युपगत इत्यर्थः। प्रतीयते च लोके तज्ज्ञानाभावविवक्षया ज्ञानं नास्तीत्यादिव्यवहारदर्शनात्, अप्रतिपन्ने च—विवक्षानुपपत्तेः ज्ञानाभावप्रतीतिरस्त्येवेत्यर्थः। **अतः संप्रतिपन्नेन** ज्ञानाभावेनैव 'अहमज्ञः' इति प्रतीत्युपपत्तेः–अतिरिक्तकल्पने हेत्वभावात्–लाघवेन 'स एवाहमज्ञ' इति प्रतीतेर्विषयतयाभ्युपगन्तव्य इत्यर्थः। ननु च–उभयाभ्युपगतोऽभावो नाम कश्चिन्नास्ति, भावान्तरमभावः स्वमते, परमते तु भावातिरिक्तः, तत्कथमुभयाभ्युपगतेना'हमज्ञ' इति प्रतीत्युपपत्तिः? उच्यते—न ह्युभयाभ्युपगत इत्युक्तं, किंतु भवताऽभ्युपगम्यत इत्युक्तम्। अभावशब्दवाच्यत्वेन कश्चिदर्थ उभाभ्यामभ्युपगतः, स च भावरूपः, तदतिरिक्त इति इयदेव विमतं, तत्र भावत्वेन यः स्वाभिमतः, यश्च तदतिरिक्तत्वेन अभावशब्दवाच्यतया पराभिमतः, तयोरन्यतरेणा'हमज्ञ' इति प्रतीत्युपपत्तेः—तदुभयातिरिक्तार्थकल्पनमनुपपन्नमित्युक्तं भवतीति—न विरोधः। ननु–भावान्तरमभावमिच्छता त्वया ज्ञानप्रागभावशब्देन भावरूपाज्ञानमङ्गीकृतं स्यात्, नैवं; सिद्धान्तद्वयानभिज्ञानकृतं हीदं चोद्यं–स्वयंप्रकाशस्यैव ज्ञानस्य संकोचरूपमवस्थान्तरं प्रागभावशब्दवाच्यतयाऽस्मदभिमतं, स्वप्रकाशज्ञानव्यतिरेकेण भावरूपाज्ञानं पराभिमतम्, अतस्तयोः कथमैक्यम्। तर्हि ज्ञानसंकोचरूपावस्थां परित्यज्याज्ञानशब्दवाच्यत्वेन परोक्तं भावरूपमज्ञानं स्वीक्रियतां भावरूपत्वाविशेषादिति चेत्, प्रामाणिकं परित्यज्य अप्रामाणिकं स्वीक्रियतामितीदमनुपपन्नम्। 'न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते, सर्वं ह पश्यः पश्यति, तया तिरोहितत्वाच्च शक्तिः क्षेत्रज्ञसंज्ञिता। सर्वभूतेषु भूपाल तारतम्येन वर्तते॥ अप्राणिमत्सु खल्पा से'त्यारभ्य 'हिरण्यगर्भोऽतितरां पुंसः शक्त्युपलक्षित' इति श्रुतिस्मृतिसिद्धत्वात्—ज्ञाननित्यत्वं, तत्संकोचादिकं च प्रामाणिकं कथं त्यज्येत, भावरूपाज्ञानं तु कल्प्यं, कल्पकं चान्यथासिद्धमिति–तदप्रामाणिकं कथं स्वीक्रियते; कल्पनायां हि लाघवन्यायश्च प्रवर्तते, न तु प्रमाणप्रतिपन्नेऽर्थे, अतोऽहमज्ञ इति ज्ञानप्रागभाव एव प्रतीयते॥

एवं'महमज्ञ' इति प्रत्यक्षस्य भावरूपाज्ञानविषयत्वे–भावरूपपक्षोपपत्त्यभावरूपपक्षानुपपत्तिरूपानुकूलतर्काभाव उक्तः, अथ प्रतिकूलतर्कपराहतिरुच्यते—**नित्येति। नित्यमुक्तस्वप्रकाशचैतन्यैकस्वरूपस्ये**ति पदं हेतुगर्भम्। **नित्यमुक्तत्वं** परमार्थदोषासंस्पृष्टत्वम्, अतः परमार्थदोषो न संभवति। **स्वानुभवस्वरूपत्वात्**—अपरमार्थपरानुभवो न संभवतीत्यर्थः। अन्यानुभवरूपप्रदेशभेदाभावाच्चेति–**एक**शब्दाभिप्रायः। **एक**शब्देन ज्ञेयत्वाभावश्च विवक्षितः। अभिप्रेतं हेतुगर्भत्वं विवृणोति—**स्वानुभवस्वरूपत्वादिति।** अविद्यानिवृत्तिदशायामनुवर्तमानमविद्यावभासप्रत्यनीकं **स्वानुभ-**

---

१ °स्वत्वं। २ °रूपं ज्ञानं का. मु. पु.।

भवतीति चेन्, किमिदं तिरोहितस्वरूपत्वम् । अप्रकाशितस्वरूपत्वमिति चेत्, स्वानुभवरूपस्य कथमप्रकाशितस्वरूपत्वम् । स्वानुभवस्वरूपस्याप्यन्यतोऽप्रकाशितस्वरूपत्वमापद्यत इति चेत्, एवं तर्हि प्रकाशाख्यधर्मानभ्युपगमेन प्रकाशस्यैव स्वरूपत्वादन्यतः स्वरूपनाश एव स्यादिति पूर्वमेवोक्तम् । किंच—ब्रह्मस्वरूपतिरोधानहेतुभूतमेतदज्ञानं स्वयमनुभूतं सद्ब्रह्म तिरस्करोति, ब्रह्म तिरस्कृत्य स्वयं तदनुभवविषयो भवति—इत्यन्योन्याश्रयणम् । अनुभूतमेव तिरस्करोतीति चेत्, यद्यतिरोहितस्वरूपमेव ब्रह्माज्ञानमनुभवति तदा तिरोधानकल्पना निष्प्रयोजना स्यात् । अज्ञानस्वरूपकल्पना च ब्रह्मणोऽज्ञानदर्शनवदज्ञानकार्यतयामिमतप्रपञ्चदर्शनस्यापि संभवात् । किंच ब्रह्मणोऽज्ञानानुभवः—किं स्वतः, अन्यतो वा । स्वतश्चेदज्ञानानुभवस्य स्वरूपप्रयुक्तत्वेनानिर्मोक्षः स्यात् । अनुभूतिस्वरूपस्य ब्रह्मणोऽज्ञानानुभवस्वरूपत्वेन मिथ्यारजतबाधकज्ञानेन रजतानुभवस्यापि निवृत्तिवन्निवर्तकज्ञानेनाज्ञानानुभूतिरूपब्रह्मस्वरूपनिवृत्तिर्वा । अन्यतश्चेन्, किं तदन्यत् । अज्ञानान्तरमिति चेत्, अनवस्था स्यात् । ब्रह्म तिरस्कृत्यैव स्वयमनुभवविषयो भवतीति चेत्, तथा सतीदमज्ञानं काचादिवत्स्वसत्तया ब्रह्म तिरस्करोतीति ज्ञानबाध्यत्वमज्ञानस्य न स्यात् । अथेदमज्ञानं स्वयमनादि ब्रह्मणः स्वसाक्षित्वं, ब्रह्मस्वरूपतिरस्कृतिं च युगपदेव करोति । अतो नानवस्थादयो दोषा इति, नैतत्; स्वानुभवस्वरूपस्य ब्रह्मणः स्वरूपतिरस्कृतिमन्तरेण साक्षित्वापादनायोगात् । हेत्वन्तरेण तिरस्कृतमिति चेत्, तर्ह्यनादित्वमपास्तम् । अनवस्था च पूर्वोक्ता । अतिरस्कृतस्वरूपस्यैव साक्षित्वापादने ब्रह्मणः स्वानुभवैकतानता च न स्यात् । अपि चाविद्यया ब्रह्मणि तिरोहिते—तद्ब्रह्म न किंचिदपि प्रकाशते, उत किंचित्प्रकाशते । पूर्वस्मिन्कल्पे—प्रकाशमात्रस्वरूपस्य ब्रह्मणोऽप्रकाशे तुच्छतापत्तिरसकृदुक्ता । उत्तरस्मिन्कल्पे—सच्चिदानन्दैकरसे ब्रह्मणि

वैकस्वभावत्वं हेतुतया विवक्षितं, न तु भ्रमवेलायां विद्यमानं **स्वयंप्रकाशत्व**मात्रम् । **अतः** स्वानुभवैकस्वभावत्वस्य प्रायपि विद्यमानत्वादित्यर्थः । **स्वानुभवस्वरूपस्यापि** तिरोधानादज्ञानानुभवः संभवतीति शङ्कते—**स्वानुभवेति** । अभिप्रेतं विवरितुं तिरोधानशब्दस्यान्तरं नास्तीति ज्ञापनार्थं प्रश्नपूर्वकं तिरोधानशब्दार्थमाह—**किमिदं तिरोहितस्वरूपत्वम् । अप्रकाशितस्वरूपत्वमिति चेदिति** । स्वानुभवस्वरूपस्याप्रकाशितत्वं व्यावहितमिति बुद्ध्या दूषयति—**स्वानुभवेति** । अन्यत इति परिहारं शङ्कते—**स्वानुभवेति** । अन्यतोऽप्रकाशितस्वरूपत्वे पूर्वोक्तदूषणमतिदिशति—**एवं तर्हीति** । दूषणान्तरमाह—**किंचेति** । अपरमार्थत्वान्न सत्तया तिरस्कारकम्, अपि तु प्रतीयमानतया तिरस्कारकम्—इत्यनुभवपूर्वकतिरस्कारः, तिरस्कारपूर्वकोऽनुभवः; अतिरस्कृतस्य स्वानुभवस्वरूपस्य ब्रह्मणोऽज्ञानानुभवासंभवात्—इत्यन्योन्याश्रयणमित्यर्थः । एतत्परिजिहीर्षया अनुभवपूर्वकतिरस्कारं शङ्कते—**अनुभूतमेवेति** । तत्र दूषणमाह—**यदीति** । अतिरोहितस्वाप्यज्ञानानुभवसंभवात्तदर्थं तिरोधानकल्पना, तदर्थमाच्छादकाविद्याकल्पना च निष्फलेत्यर्थः । तदुपपादयति—**ब्रह्मण इति** । यथा—अतिरोहितस्वरूपस्यापि अपरमार्थभूताज्ञानानुभवसंभवः, तथा—अपरमार्थभूतप्रपञ्चानुभवोऽप्यतिरोहितस्य संभवतीति—तदर्थं तिरोधानकल्पना, तदर्थमाच्छादकाविद्याकल्पना च निष्फलेत्यर्थः । अनुभवपूर्वकतिरस्कारपक्ष एव विकल्पमुखेन दूषणमाह—**किंचेति** । स्वतःपक्षे दूषणद्वयमनिर्मोक्षः, ब्रह्मस्वरूपनिवृत्तिश्च । **रजतानुभवस्यापीत्यपि**शब्देन रजतस्य च निवृत्तिः सूच्यते । अन्यतःपक्षेऽनवस्था । तिरस्कारपूर्वानुभवपक्षं शङ्कते—**ब्रह्मेति** । तिरस्कृत्यानुभवनिषयेत्युक्ते—सत्तया तिरस्कारमित्युक्तं स्यात्, न तु प्रतीयमानतया । तदानीं काचादिवत्परमार्थत्वेन ज्ञानानिवर्त्यत्वं न सिध्यतीत्यर्थः । अथ तिरस्कारानुभवयोर्यौगपद्यं शङ्कते—**अथेदमिति** । **नैत**दित्यादिना दूषयति—**स्वानुभवस्वरूपस्येति** । हेतुगर्भविशेषणम् । स्वानुभवस्वरूपत्वं स्वाभाविकमिति परानुभवो हेतुना विना नोपपद्यत इत्यर्थः । हेत्वन्तरेण तिरस्कृतिमाशङ्क्य दूषयति—**हेत्विति** । यौगपद्यपक्षे पूर्वोक्तपक्षद्वयदूषणमप्यापततीत्यभिप्रायेणाह—**अनवस्था च पूर्वोक्तेति** । ज्ञानानिवर्त्यत्वदूषणस्याप्युपलक्षणमियमनवस्था; अनन्तरपूर्वोक्तेः । स्वरूपतिरस्कृतिमन्तरेण साक्षित्वापादनेऽनिष्टमाह—**अतिरस्कृतेति** ॥

पूर्वं विशदाविशदावभासमभ्युपगम्य दूषणमुक्तम्, इदानीं तु तमेव दूषयितुमुपक्रमते—**अपि चेति** । विकल्पयति—**अविद्ययेति** । पूर्वोक्तं दूषणमतिदिशति—**पूर्वस्मिन्निति** । **उत्तरस्मिन्निति** । **किंशब्दः** क्षेपे, अनुपपन्नमित्यर्थः । **सच्चि-**

कोयमंशस्तिरस्क्रियते को वा प्रकाशते। निरंशे निर्विशेषे प्रकाशमात्रे वस्तुन्याकारद्वयासंभवेन तिरस्कारः, प्रकाशश्च युगपन्न संगच्छेते। अथ सच्चिदानन्दैकरसं ब्रह्माविद्यया तिरोहितस्वरूपमविशदमिवालक्ष्यते—इति। प्रकाशमात्रस्वरूपस्य विशदता, अविशदता वा किंरूपा। एतदुक्तं भवति—यः सांशः सविशेषः प्रकाशविषयस्तस्य सकलावभासो विशदावभासः, कतिपयविशेषरहितावभासश्चाविशदावभासः। तत्र य आकारोऽप्रतिपन्नस्तस्मिन्नंशे प्रकाशाभावादेव प्रकाशवैशद्यं न विद्यते, यश्चांशः प्रतिपन्नस्तस्मिन्नंशे तद्विषयप्रकाशो विशद एव। अतः सर्वत्र प्रकाशांशे वैशद्यं न [1]संभवति। विषयेऽपि स्वरूपे प्रतीयमाने—तद्गतकतिपयविशेषाप्रतीतिरेवावैशद्यम्। तस्मादविषये निर्विशेषे प्रकाशमात्रे ब्रह्मणि स्वरूपे प्रकाशमाने—तद्गतकतिपयविशेषाप्रतिपत्तिरूपावैशद्यं नामाज्ञानकार्यं न संभवति। अपि चेदमविद्याकार्यमवैशद्यं तत्त्वज्ञानोदयान्निवर्तते, न वा। अनिवृत्तौ—अपवर्गाभावः। निवृत्तौ च—वस्तु किंरूपमिति विवेचनीयम्। विशदस्वरूपमिति चेन्, तद्विशदस्वरूपं प्रागस्ति, न वा। अस्ति चेन्, अविद्याकार्यमवैशद्यं तन्निवृत्तिश्च न स्याताम्। नो चेन्, मोक्षस्य कार्यतयानित्यता स्यात्। अस्याज्ञानस्याश्रयानिरूपणादेवासंभवः पूर्वमेवोक्तः। अपिच—अपरमार्थदोषमूलभ्रमवादिना निरधिष्ठानभ्रमासंभवोऽपि

दानन्दादिशब्दानामपि स्वरूपमात्रपरत्वेनाभ्युपगमात्—तिरस्कृतातिरस्कृतविभागोऽनुपपन्न इति भावः। **'कोऽयमंशः तिरस्क्रियते को वा प्रकाशत इति। को वा** विशेषस्तिरस्क्रियते **को वा** प्रकाशत इत्यस्याप्युपलक्षणार्थमिदम्। निरंशे निर्विशेष इत्यनन्तरोक्तेः **कोऽयमंश** इति अंशभेदो वक्तुमशक्य इत्यभिप्रायः। तदुपपादयति—**निरंश इति। प्रकाशमात्रे-मात्रचा** अविषयत्वं विवक्षितम्, अविषयभूत इत्यर्थः। **युगपन्न सङ्गच्छेते इति।** नहि त्वया कालभेदेन प्रकाशतिरस्काराद्युच्येते, अपि तु युगपदेव। तदानीमंशभेदाभावात्, आकारभेदाभावाच्च—तौ न सङ्गच्छेते इति भावः। एवं प्रकाशतिरस्कारयोर्युगपद्यानुपपत्तौ सत्यामप्यविशदशब्देन प्रत्यवतिष्ठते—**अथेति। अथ**शब्दोऽनुमतिप्रदाने वर्तते। दूषयति—**प्रकाशेति। किंरूपा** अनुपपन्नेत्यर्थः। कथमनुपपत्तिरिति शङ्कायां वैशद्यावैशद्यस्वरूपं शिक्षयितुम्, अत्र तदनुपपत्तिं च दर्शयितुमाह—**एतदुक्तमिति।** वैशद्यावैशद्यस्वरूपं शिक्षयति—**यः सांश इत्यादिना। ज्ञाने तदनुपपत्तिमाह—तत्रेति। प्रकाशाभावादेव प्रकाशावैशद्यं न विद्यत इति।** धर्म्यभावाद्धर्माभाव इत्यर्थः। ज्ञेयेऽपि ज्ञातांशस्य विशदतया, अज्ञातांशस्याज्ञातत्वाच्च—क्वचिदप्यवैशद्यं न संभवतीत्याह—**विषयेऽपीति।** एकस्मिन्वस्तुनि कतिपयांशस्य, कतिपयाकारस्य वाऽनवभासः समुदिनरूपस्यावैशद्यं, न तु तत्रापि प्रकाशमानांशस्येत्यर्थः। **तस्मादिति। स्वरूपे प्रकाशमान** इत्यस्य न **ब्रह्मणी**ति पूर्वत्रान्वयः, अपि तूत्तरत्र। **स्वरूपे प्रकाशमाने कतिपयविशेषाप्रतिपत्तिरूपमवैशद्यं** ब्रह्मणि न संभवतीत्यर्थः। **कतिपयविशेषाप्रतिपत्ति**शब्दः कतिपयांशाप्रतिपत्तेरप्युपलक्षणार्थः। मुखान्तरेण दूषणमाह—**अपि चेति। अविद्याकार्यं तन्निवृत्तिश्च न स्यामिति।** विशदस्वरूपस्याविद्याविरोधित्वादिति भावः। **मोक्षस्य कार्यतयेति। मोक्षस्य** मुक्तस्वरूपस्य। भावरूपत्वे सति कार्यं ह्यनित्यं, वैशद्यं च भावरूपम् अतः परमते त्वयोक्तं दूषणं तवैवापतनीत्यर्थः। प्रागसतः पश्चादुत्पन्नस्य वैशद्यस्य अनित्यत्वप्रसङ्गः कालत्रयायापदिष्टः; शास्त्रेण तस्य नित्यतया प्रतिपादनत्वादिति चेन्, तदा ब्रह्मणः सविशेषत्वं स्यादित्यभिप्रायः॥

पूर्वोक्ताश्रयानुपपत्तिं परोक्तप्रत्यक्षप्रमाणस्य प्रतिकूलतर्कत्वेनाह—**अस्येति।** स्वरूपानादित्वादिमुखेन परिहाराणां प्रतिबन्दीत्वं हृदि निधाय दूषणान्तरमाह—**अपि चेति।** यथा—दोष-दोषाश्रयत्वादेरपारमार्थ्येऽपि भ्रमसंभवः—तद्वदधिष्ठानापारमार्थ्येऽपि भ्रमः संभवति। अधिष्ठानापारमार्थ्ये तस्यापि प्रपञ्चवदपरमार्थत्वेन—अधिष्ठानान्तरापेक्षयाऽनवस्था स्यादिति चेन्, तर्हि—दोषस्यापि प्रपञ्चवदपरमार्थत्वेन दोषान्तरापेक्षयाऽनवस्था स्यात्। दोषस्यापारमार्थ्येऽपि स्वरूपानादित्वान्नानवस्थेति चेत्, तर्हि अधिष्ठानापारमार्थ्येऽपि स्वरूपानादित्वान्नानवस्थेति प्रवाहानादित्वेन, दुर्घटत्वेन च परिहारोऽपि तुल्यः। दोषः प्रपञ्चदर्शनस्य, स्वदर्शनस्य च स्वयमेव निर्वाहक इति—न दोषान्तरापेक्षयाऽनवस्थेति—चेन्न; अपरमार्थस्यास्य च स्वपरनिर्वाहकत्वासंभवात्। नहि स्वप्ने द्विचन्द्रज्ञानहेतुभूतोऽङ्गुल्यवष्टम्भः स्वकल्पने दोषनिरपेक्षः। अपरमार्थस्य स्वपरनिर्वाहकत्वं संभवतु, तथा सत्यधिष्ठानापारमार्थ्येऽपि स्वपरनिर्वाहकत्वादनवस्था न स्यात्। अपरमार्थस्य परं प्रति अधिष्ठानत्वे सिद्धे हि स्वनिर्वाहकत्वसिद्धिरिति चेन्, अपरमार्थस्य परं प्रति दोषत्वे सिद्धे हि स्वनिर्वाहकत्वमिति तुल्यम्। **मिथ्या-**

---

१ संभवतीति।

दुरुपपादः; भ्रमहेतुभूतदोषदोषाश्रयवदधिष्ठानापारमार्थ्येपि भ्रमोपपत्तेः, ततश्च सर्वशून्यत्वमेव स्यात् । यदुक्तम्—अनुमानेनापि भावरूपमज्ञानं सिध्यतीति—तदयुक्तम्, अनुमानासंभवात् । ननूक्तमनुमानम्, सत्यमुक्तं, दुरुक्तं तु तत्, अज्ञानेऽप्यनभिमताज्ञानान्तरसाधनेन विरुद्धत्वाद्धेतोः । तत्राज्ञानान्तरासाधने—हेतोरनैकान्त्यम् । साधने च—तदज्ञानमज्ञानसाक्षित्वं निवारयति, ततश्चाज्ञानकल्पना

भूतजगदवभासाद्दोषत्वं सिद्धमिति चेत्, नहि—तत एवाधिष्ठानत्वमपि सिद्धमिति—स्वपरनिर्वाहकत्वमधिष्ठानस्य सिध्यति । अधिष्ठानापारमार्थ्ये भ्रमो न दृष्ट इति चेत्, दोष–दोषाश्रयत्वापारमार्थ्येऽपि भ्रमो न दृष्ट इति—तुल्यश्चैष इत्यभिप्रायः । ततः किमित्यत्राह—**ततश्चेति** । एवं 'महमज्ञो मामन्यं च न जानामी'ति प्रत्यक्षस्य प्रतिकूलतर्कपराहतिरुक्ता । अत्र केचिदाहुः—सुषोत्थितस्य 'न किंचिदवेदिष'मिति परामर्शान्यथानुपपत्तिर्भावरूपाज्ञाने प्रमाणम् । कथमन्यथानुपपत्तिः, इत्थं—न किंचिदवेदिषमिति परामर्शो न ज्ञानाभावविषयः; स्वापे ज्ञानाभावस्याननुभूतत्वात् । ज्ञानाभावानुभवे हि प्रतियोगिभूतज्ञानस्य विषयावच्छिन्नस्यावभासोऽभ्युपगन्तव्यः, तदभ्युपगमे सुषुप्तिव्याघातः । न च–अस्मरणलिङ्गजन्यं ज्ञानाभावविषयमनुमितिरूपं ज्ञानमिदमिति वाच्यम्; अस्मरणस्यानुभवव्याप्तत्वाभावात् । पथि गच्छता स्पृष्टं हि तृणादिकं न स्मर्यते, अतः सुषुप्तावनुभूतं भावरूपमज्ञानं स्मर्यते 'न किंचिदवेदिष'मिति, अतस्तदन्यथाऽनुपपत्त्या भावरूपाज्ञानसिद्धिरिति, नैतदुपपद्यते; भावरूपत्वेऽप्यज्ञानस्य प्रतियोग्यपेक्षत्वोपपादनात्, प्रतियोगिनश्च सुषुप्तावनवभासात्–अज्ञानानुभवाभावेन तत्स्मरणानुपपत्तेः । प्रतियोग्यवभासे सुषुप्तिव्याघातस्त्वयैवोक्तः । नच—तदन्यवाचिनञर्थप्रतियोगिस्वरूपभूतं ज्ञानं तदाभीमवमातमिति वाच्यं; 'न किंचिदवेदिषं, मामन्यं च न जानामी'ति विषयावच्छिन्नज्ञानस्य प्रतियोगित्वावगमात् । अतस्तदनवभासे–अज्ञानानुभवायोगात्–तत्स्मरणानुपपत्तिः । किंच—सुषुप्तौ निर्विकल्पेन वा, सविकल्पेन मनोव्यापारेण वा–भावरूपाज्ञानानुभवः । प्रथमे–स्वामिमतनिर्विकल्पकस्य साक्षिचैतन्यावभासरूपस्य संस्काराधायकत्वानभ्युपगमात्प्रतिसंधानमनुपपन्नम् । न द्वितीयः; सुषुप्तिविरोधेन तदा मनोव्यापारासंभवात् । अतो न किंचिदवेदिषमिति ज्ञानं न स्मरणं, किं त्वस्मरणलिङ्गकं ज्ञानाभावविषयमनुमितिरूपम् । न च–पथि गच्छता स्पृष्टतृणाद्यस्मरणेन व्यभिचारः; अन्यव्यासङ्गादिसंस्कारविरोध्यभावविशेषितस्यास्मरणस्य व्यभिचाराभावात्–'तदन्यधीरतात्पर्यं पटुत्वविरहो धियः । दुःखादितीव्रसुन्मादोऽनभ्यासो दीर्घकालता ॥ एतैश्चादृष्टवैगुण्यं कल्प्यं संस्काररोधिषु । एतेष्वसत्स्वस्मरणाज्ज्ञानाभावोऽनुमीयते' । पथि गच्छता स्पृष्टतृणादिकं पटुतरसंस्कारोदयविरोधिसद्भावात्–न स्मर्यते । पथि गच्छन् हि गन्तव्यदेशकार्यचिन्तादिव्यासक्तो भवति । तृणादावादरश्च नास्ति; प्रयोजनाभावात् । तदभावेऽपि गजादिदर्शनस्येव न पटुतरत्वं तृणादिज्ञानस्य; विषयवैषम्यवैचित्र्याद्यभावात् । जन्मान्तरानुभवजसंस्कारस्तु प्रायणनरकप्रसूतिजन्यतीव्रदुःखाभिभवादनुद्बुद्धः । उन्मादश्च संस्कारोद्बोधविरोधी । अनभ्यासश्च तथा; तस्य विस्मरणहेतुत्वदर्शनात् । कालदैर्घ्यमपि तत्प्रमोषकं दृष्टं; बाल्येऽनुभूतानां वृद्धावस्थायामस्मरणदर्शनात् । न चैते हेतवः सुषुप्तौ सन्ति । न च किमप्यदृष्टं संस्कारोद्बोधविरोधि कल्प्यं; कल्पकाभावेन–सौषुप्तिकज्ञानस्य, तद्विषयार्थस्मरणविरोध्यदृष्टस्य च कल्पनायोगात् । यदि–किंचित्कल्पकतयोत्प्रेक्ष्येत तदापि—अकृत्या निर्वाहे संभवति न कल्पनमुपपद्यते । एवमन्यपरत्वादिसंस्कारनिरोधकहेतुविरहविशेषितास्मरणलिङ्गेन ज्ञानाभावानुमितिरूपमिदं 'न किंचिदवेदिष'मिति ज्ञानम् । त्वयापि ज्ञानाभावः सुषुप्तावभ्युपगतः, स चोत्कलिङ्गानुमेय एव इत्युपगन्तव्यं, तदस्माकमपि तुल्यम् । अतः स्मृतिलानुपपत्तेः, अनुमितिरूपत्वोपपादनाच्च—'न किंचिदवेदिष'मिति ज्ञानमन्यथैवोपपन्नमिति—न ततो भावरूपाज्ञानसिद्धिरिति–ईदृशदुर्वादानामनुपपन्नत्वं भावरूपाज्ञानविषयप्रत्यक्षप्रतिक्षेपात्–सिद्धम् ॥

अथानुमानं दूषयति—**यदुक्तमित्यादिना—अनुमानासंभवादिति** । त्वदुक्तमनुमानमाभास इति भावः । कथं दुरुक्तत्वमित्यत्राह—**अज्ञानेऽपीति** । कथमज्ञानान्तरसाधनमवश्यं भावि, तस्य कथमनभिमतत्वमित्याशङ्क्यां तदवश्यम्भावमुपपादयति—**तत्रेति** । अज्ञानस्यानभिमतत्वमुपपादयति—**साधने चेति** । ततः किमित्यत्राह—**ततश्चेति** । अस्य प्रमाणज्ञानस्य अप्रकाशितार्थप्रकाशकत्वात्—स्वविषयावरणज्ञानान्तरसाधकत्वे सति तदज्ञानं ब्रह्मस्वरूपाच्छादकं सिषाधयिषितमज्ञानमावृणोति, तेनावृतत्वात्–तदज्ञानं ब्रह्मणा न साक्षात्क्रियते, अपरमार्थस्याप्रतीयमानस्य कार्यकरत्वायोगात्—अज्ञानकल्पना निष्फला; तिरोधानरूपकार्यार्थं हि तत्कल्पना । यदसाक्षात्कृतमेव कार्यकरं, तदा सत्तया कार्यकरमिति काचादिवत्सत्यत्वात्–ज्ञाननिवर्त्यं न स्यात् । एवमज्ञानस्य ज्ञाननिवर्त्यत्वे–निष्फलत्वे, कारणतयाऽनभिमताज्ञानान्तरसाधकत्वं, तदसाधने चानैकान्त्यमुक्तम् । ननु—उक्तहेतुजन्यं ज्ञानं सम्यड्निश्चयरूपं चेत्, तद्विरोधादेव न हेतोरनैकान्त्यं, यदि न सम्यक्, तथापि न हेत्वनैकान्त्यम्; अप्रकाशितार्थप्रकाशकत्वहेतोस्तत्र वृत्त्यभावात्; उच्यते—हेत्वनैकान्त्यपरिहारः बाधाविषयस्य ज्ञानस्य प्रमितिरूपत्वं प्रतिक्षिपति, ज्ञानसम्यक्त्वं तु हेत्वनैकान्त्यपरिहारं प्रतिक्षिपति, अतो ज्ञानस्य सम्यक्त्वे तस्योक्तहेतुजन्यत्वं व्याहतं; हेतोरनैकान्त्यात् । नहि सम्यग्ज्ञानं दुष्टहेतुजन्यम् । उक्तहेतोरनैकान्त्यं न चेत्—

निष्फला स्यात्। दृष्टान्तश्च साधनविकलः; दीपप्रभाया अप्रकाशितार्थप्रकाशकत्वाभावात्। सर्वत्र ज्ञानस्यैव हि प्रकाशकत्वम्, सत्यपि दीपे ज्ञानेन विना विषयप्रकाशाभावात्। इन्द्रियाणामपि ज्ञानोत्पत्तिहेतुत्वमेव, न प्रकाशकत्वम्। प्रदीपप्रभायास्तु चक्षुरिन्द्रियस्य ज्ञानमुत्पादयतो विरोधितमोनिरसनद्वारेणोपकारकत्वमात्रमेव। प्रकाशकज्ञानोत्पत्तौ व्याप्रियमाणचक्षुरिन्द्रियोपकारकहेतुत्वमपेक्ष्य दीपस्य प्रकाशकत्वव्यवहारः। नास्माभिर्ज्ञानतुल्यप्रकाशकत्वाभ्युपगमेन दीपप्रभा निदर्शिता, अपितु ज्ञानस्यैव स्वविषयावरणनिरसनपूर्वकप्रकाशकत्वमङ्गीकृत्येति—**चेन्न**; नहि विरोधिनिरसनमात्रं प्रकाशकत्वम्, अपि त्वर्थपरिच्छेदः। व्यवहारयोग्यतापादनमिति यावत्। तत्तु ज्ञानस्यैव। यदुपकारकाणामप्यप्रकाशितार्थप्रकाशकत्वमङ्गीकृतं, तर्हीन्द्रियाणामुपकारकतमत्वेनाप्रकाशितार्थप्रकाशकत्वमङ्गीकरणीयम्। तथा सति तेषां स्वनिवर्त्यवस्त्वन्तरपूर्वकत्वाभावाद्धेतोरनैकान्त्यमित्यलमनेन। प्रतिप्रयोगाश्च—१ विवादाध्यासितमज्ञानं न ज्ञानमात्रब्रह्माश्रयम; अज्ञानत्वात्—शुक्तिकाद्यज्ञानवत्। ज्ञात्राश्रयं हि तत्। २ विवादाध्यासितमज्ञानं न ज्ञानावरणम्; अज्ञानत्वात्—शुक्तिकाद्यज्ञानवत्। विषयावरणं हि तत्। ३ विवादाध्यासितमज्ञानं न ज्ञाननिवर्त्यम्; ज्ञानविषयानावरणत्वात्—यज्ज्ञाननिवर्त्यमज्ञानं तज्ज्ञानविषया-

---

तस्यासम्यङ्निश्चयरूपज्ञानजनकत्वं व्याहतम्; अदुष्टहेतोरसम्यग्ज्ञानजनकत्वायोगात्। एवं हेत्वनैकान्त्यपरिहार—ज्ञानसौष्ठवयोः परस्परविरोधेन—तयोरिह समुच्चित्यासिद्धेः—अन्यतराभावेऽपि साध्यसिद्ध्यभावात्—अनुमानसमञ्जसमित्यभिप्राय इति। ननु—न हेत्वनैकान्त्यं; साध्यविषयज्ञाने हेतोरवृत्तेः, न ह्यप्रकाशितमज्ञानमनेन प्रकाश्यते, किं तर्हि, साक्षिचैतन्यसिद्धस्यैवाज्ञानस्याभावाद्विवेचनमात्रं क्रियते, नैवम्; अहमर्थधर्मभूतप्रकाशोत्तीर्णेन स्वरूपचैतन्येनाज्ञानसिद्धावनुमानप्रामाण्यं, तत्प्रामाण्येन अभावरूपाज्ञानसिद्धिः, तत्सिद्धौ ज्ञातुरपि तत्कल्पितत्वात्—तदुत्तीर्णसाक्षिचैतन्येनाज्ञानानुभवसिद्धिः—इति चक्रकापत्तेर्दुस्तरत्वात्। दूषणान्तरमाह—**दृष्टान्तश्चेत्यादिना**। तत्र किं साक्षात्प्रकाशकत्वम्, उत परम्परया, उत साक्षाद्वा परम्परया वा प्रकाशकत्वमात्रम्, उत स्वविषयावरणनिरासकत्वं प्रकाशकत्वम्—इति चत्वारः कल्पाः। तत्र प्रथमे कल्पे—दृष्टान्तः साधनविकलः। द्वितीये—पक्षे असिद्धिः। तृतीये—इन्द्रियेष्वनैकान्त्यं; तेषां स्वनिवर्त्यवस्त्वन्तरपूर्वकत्वाभावात्। साक्षाद्वा, परम्परया वा प्रकाशकयोरन्यतरत्वात्तेषाम्। इन्द्रियाण्यपि पक्षीकृत्य तेषामपि तथाविधवस्त्वन्तरपूर्वकत्वकल्पनमनुचितम्; आहंकारिकणामिन्द्रियाणामुत्पत्तेः—स्वविषयावरणस्वदेशगतवस्त्वन्तरपूर्वकत्वाभावात्, आलोक एव हि तादृशः। चतुर्थपक्षे तु—साध्याविशिष्टता, इत्यभिप्रेत्य प्रथमकल्पे दूषणमाह—**दृष्टान्तश्च साधनविकल इति**। कथं ज्ञानस्यैव साक्षात्प्रकाशकत्वमिति शङ्कायां तदुपपादयति—**सत्यपीति**। **ज्ञानस्यैव प्रकाशकत्वमित्यनेन**—द्वितीयकल्पे हेतोः पक्षे असिद्धिः फलिता। **इन्द्रियाणामित्यनेन** तृतीयपक्षे इन्द्रियेष्वनैकान्त्यं विवक्षितम्। दीपप्रभायाः परम्परयाऽपि प्रकाशकत्वं दूरत इत्याह—**प्रदीपेति**। प्रकाशकत्वव्यवहारः कथमित्यत्राह—**प्रकाशकेति**। चतुर्थपक्षं शङ्कते—**नास्माभिरिति**। **निरसनपूर्वकेति**। निरसनद्वारकेत्यर्थः। साध्याविशिष्टतामाह—**नहीति**। ज्ञानस्य विषयावरणनिरसनरूपप्रकाशकत्वं न ह्यस्ति, तद्धि साध्यं, न संप्रतिपन्नमित्यर्थः। **मात्रचा** परिच्छेदव्युदासः। **हि**शब्देन विषयावरणनिरासकत्वस्य साध्यत्वं फलितम्। तत्र संप्रतिपन्नं प्रकाशकत्वमाह—**अपित्विति**। **परिच्छेद**शब्दस्य परिमितिपरत्वशङ्काव्यावृत्त्यर्थमाह—**व्यवहारेति**। **व्यवहारयोग्यता** व्यवहारप्रतिसंबन्धित्वम्। ननु—न साध्याविशिष्टत्वं हेतोः स्वप्रागभावनिरासकत्वं **स्वविषयावरणनिरसन**शब्देन विवक्षितं, तेन भावरूपनिरसनीयपूर्वकत्वं साध्यमिति—न स्वप्रागभावनिरासकत्वमिति; अस्य हेतोरिन्द्रियसंप्रयोगेऽनैकान्तिकत्वात्। भासमानत्वे सतीति **अप्रकाशितार्थप्रकाशकत्वा**दिति हेतौ विशेषितेऽपि पूर्ववद्विकल्पः स्यात्। तत्र साक्षात्पक्षे—दृष्टान्तः साधनविकलः। प्रणाड्यैक्ये पक्षे—हेत्वसिद्धिः। तृतीये—लिङ्गादौ व्यभिचारः। चतुर्थे—साध्याविशिष्टता; भासमानत्वविशेषितस्य विषयावरणनिरासकत्वस्यासंप्रतिपत्तेः॥

अथास्यानुमानस्य प्रतिकूलतर्कपराहतिमाह—**प्रतिप्रयोगाश्चेति**। **तर्कस्यापि व्याप्तिमूलत्वात्—प्रयोगा** इत्युक्तं, स्वदेशगतत्व—स्वविषयावरणत्व—स्वनिवर्त्यत्वानां प्रतिकूलं यथाक्रममनुमानत्रयमज्ञानं पक्षीकृत्योच्यते। **विवादाध्यासितं** ब्रह्माश्रयमतदाश्रयमिति विवादाध्यासितमित्यर्थः। ततश्च श्रुत्याद्यज्ञानव्यावृत्तिः; तद्धि जीवाश्रयम्। अप्रामाणिकमपि भावरूपमज्ञानं, ज्ञानमात्रं ब्रह्म चाभ्युपगम्य प्रतिकूलतर्का उच्यन्ते। श्रुत्याद्यज्ञानस्य ज्ञानानाश्रयत्वं कथमित्यत्राह—**ज्ञात्राश्रयमिति**। एवं व्याप्तिर्दर्शिता। अज्ञानत्वे—ज्ञानाश्रयत्वप्रसङ्ग इत्युक्तं भवति। प्रतिकूलतर्कान्तरमाह—**विवादेति**। व्याप्तिं दर्शयति इत्यर्थः। अथ ब्रह्म पक्षीकृत्य प्रतिकूलतर्कत्रयमुच्यते—**ब्रह्मेत्यादिना**। अज्ञानाश्रयत्वे—ब्रह्मणो ज्ञातृत्वप्रसङ्ग इत्यर्थः।

वरणं—यथा शुक्तिकाद्यज्ञानम्। ४ ब्रह्म नाज्ञानास्पदं; ज्ञातृत्वविरहात्—घटादिवत्। ५ ब्रह्म नाज्ञानावरणं; ज्ञानाविषयत्वात्—यदज्ञानावरणं तज्ज्ञानविषयभूतं यथा शुक्तिकादि। ६ ब्रह्म न ज्ञाननिवर्त्याज्ञानं; ज्ञानाविषयत्वात्—यज्ज्ञाननिवर्त्याज्ञानं तज्ज्ञानविषयभूतं—यथा शुक्तिकादि। ७ विवादाध्यासितं प्रमाणज्ञानं स्वप्रागभावातिरिक्ताज्ञानपूर्वकं न भवति; प्रमाणज्ञानत्वात्—भवदभिमताज्ञानसाधनप्रमाणज्ञानवत्। ८ ज्ञानं न वस्तुनो विनाशकं; शक्तिविशेषोपबृंहणविरहे सति ज्ञानत्वात्—यद्वस्तुनो विनाशकं तच्छक्तिविशेषोपबृंहितं ज्ञानमज्ञानं च दृष्टं—यथेश्वरयोगिप्रभृतिज्ञानं, यथा च मुद्गरादि। ९ भावरूपमज्ञानं न ज्ञानविनाश्यं; भावरूपत्वात्—घटादिवदिति। अथोच्येत—बाधकज्ञानेन पूर्वज्ञानोत्पन्नानां भयादीनां विनाशो दृश्यत इति, नैवं; न हि ज्ञानेन तेषां विनाशः; क्षणिकत्वेन तेषां स्वयमेव विनाशात्, कारणनिवृत्त्या च पश्चादनुत्पत्तेः। क्षणिकत्वं च तेषां ज्ञानवदुत्पत्तिकारणसंनिधानएवोपलब्धेः, अन्यथानुपलब्धेश्चावगम्यते। अक्षणिकत्वे च भयादीनां भयादिहेतुभूतज्ञानसंततावविशेषेण सर्वेषां ज्ञानानां भयाद्युत्पत्तिहेतुत्वेनानेकभयोपलब्धिप्रसङ्गाच्च। स्वप्रागभावव्यतिरिक्तवस्त्वन्तरपूर्वकमिति—व्यर्थविशेषणोपादानेन प्रयोगकुशलता चाविष्कृता। अतोऽनुमानेनापि न भावरूपाज्ञानसिद्धिः।

—**विषयावरणमिति**। अज्ञानत्वे ज्ञानावरणत्वप्रसङ्ग इत्यर्थः। तृतीयेऽपि प्रयोगे ज्ञेयानावरणत्वे—ज्ञानानिवर्त्यत्वप्रसङ्ग द्वितीयेऽपि प्रयोगे ब्रह्मणोऽज्ञानावरणत्वे ज्ञेयत्वप्रसङ्ग इत्यर्थः। तृतीयेऽपि ब्रह्मणो ज्ञाननिवर्त्याज्ञानत्वे—ज्ञेयत्वप्रसङ्ग इत्यर्थः। अथ प्रमाणज्ञानं पक्षीकृत्य प्रागभावव्यतिरिक्तत्वस्य प्रतिकूलतर्कमाह—**विवादाध्यासितमिति**। प्रमाणज्ञानत्वे—प्रागभावातिरिक्ताज्ञानपूर्वकत्वाभावप्रसङ्ग इत्यर्थः। यद्वा, अनुमानमेवेदं; धारावाहिकज्ञानेषु प्रथमस्य पक्षत्वमुत्तरोत्तरज्ञानानां सपक्षत्वमपि ह्युपपद्यते। **ज्ञानं न वस्तुनो विनाशकमि**त्यादिना व्यतिरेक्यनुमानमुक्तम्। व्यतिरेकव्याप्तिं द्विधा दर्शयति—**यद्वस्तुन इति**। शक्तिविशेषोपबृंहणविरहे सति ज्ञानत्वादिति विशिष्टो हेतुः। तत्र शक्तिविशेषानुपबृंहितज्ञानव्यतिरिक्तत्वाविशेषात्—शक्तिविशेषोपबृंहितं ज्ञानं, शक्तिविशेषानुपबृंहितमज्ञानं च द्वयमपि व्यतिरेकव्याप्तिभूमिः—इत्युभयत्र व्याप्तिर्दर्शिता। एवं भावरूपमज्ञानं पक्षीकृत्याह—**भावरूपमिति**। भावरूपत्वे—ज्ञानमात्रनिवर्त्यत्वं न स्यादित्यर्थः। भावरूपत्वज्ञाननिवर्त्यत्वयोर्न व्याप्तिः, भयादेर्भावरूपस्य ज्ञाननिवर्त्यत्वदर्शनादिति—व्याप्तिभङ्गमाशङ्कते—**अथोच्येतेति**। **पूर्वज्ञानोत्पन्नानां** पूर्वभ्रान्तिज्ञानोत्पन्नानामित्यर्थः। बाधकज्ञानोदयात् पूर्वं भयानुवृत्तेः, तदुत्पत्तेः पश्चाद्भयादिनिवृत्तेश्च—इति भावः। परिहरति—**नैवमिति**। फलविनाश्यानि हि स्वाश्रयविनाशाधीननश्वरव्यतिरिक्तक्षणिकानि। उक्तविशेषणेन ज्वालाव्यावृत्तिः। तथा भयाद्यपि कर्म्मादिकार्यं जनयित्वा स्वयं नश्यतीत्यर्थः। न भयादेः क्षणिकत्वं; चिरोपलब्धेरिति—चेन्न; कारणभूतभ्रान्तिज्ञानाद्यनुवृत्त्या भयादिसन्तत्युपपत्तेर्हि चिरोपलब्धिः। तर्हि सदा भयसन्ततिरुपलभ्येतेति चेदत्राह—**कारणनिवृत्त्या च पश्चादनुत्पत्तेरिति**। कारणभूतभ्रान्तिज्ञानादिनिवृत्त्या कार्यभूतभयादिसन्तत्यनुत्पत्तेः—न सदोपलब्धिरित्यर्थः। **पश्चादनुत्पत्तेरिति** पञ्चम्याः **क्षणिकत्वेनेति** पूर्वत्रान्वयः। कारणनिवृत्त्या च पश्चादनुत्पत्तेः सिद्धेन क्षणिकत्वेन स्वयमेव विनाशादित्यर्थः। यद्वा, न क्षणिकत्वमिति शङ्कायाम्—उपपन्नं क्षणिकत्वमित्यर्थवशादाकृष्टेन वाक्येनान्वयः। एवं क्षणिकत्वानुबन्धी चोद्यपरिहारः कृतः। यद्वा, **नैवमिति** दूषणप्रतिज्ञामुपपादयितुं यावद्बाधं भयस्वरूपानुवृत्तेरसिद्धिमाह—**क्षणिकत्वेनेति**। बाधकज्ञानानन्तरनिवृत्तेरन्यथासिद्धिमाह—**कारणनिवृत्त्या चेति**। तत्क्षणिकत्वं कुतः सिद्धमिति शङ्कायां तदुपपादयति—**क्षणिकत्वं चेति**। स्थायिनो घटादयो दण्डचक्रादिकारणनिवृत्त्याद्युपलभ्यन्ते, न तथा ज्ञानदीपज्वालादि। तथा भयादेरपि कारणसन्निधानसन्निवृत्त्यनुविधायिसद्भावासद्भावतया क्षणिकत्वं निश्चितमित्यर्थः। विपक्षे बाधमाह—**अक्षणिकत्वे चेति**। स्थायिनो हि घटादयः प्रतिक्षणमुत्पाद्यमाना बहवो युगपदुपलभ्यन्ते, तथात्रापि प्रसजेदिति भावः। अतो न भयादिकं ज्ञाननिवर्त्यं; स्वयमेव क्षणिकतया नश्यति। भयमन्तत्युच्छेदो—भ्रान्तिज्ञानपरम्परारूपकारणनिवृत्त्या, तन्निवृत्तिश्च—दोषनिवृत्त्या। 'नायं सर्पो रज्जुरेवे'ति ज्ञानं स्वविषयव्यवहारहेतुः, न तु साक्षाद्भयादिनिवृत्तिहेतुः; रज्जुत्वं हि सर्पव्यावृत्तिः। अतः सर्पव्यावृत्तिरूपरज्जुत्वज्ञानाभावेन सर्पबुद्ध्यनुवृत्त्या—पाश्चात्यभयानुवृत्तिः, सर्पव्यावृत्तिरूपरज्जुत्वज्ञानेन सर्पपारमार्थ्याभिमाननिवृत्त्या भयनिवृत्तिरिति सर्वाभ्युपगतप्रकारेण दूषणमुक्तम्। स्वपक्षे तु—ज्ञानविशेष एव भयादिः क्षणिकतया स्वयं नश्यति, भयादिरूपज्ञानानुवृत्तिस्तु—दोषात्सर्पभ्रमाद्यनुवृत्तिमूला, तन्निवृत्त्या च तत्सन्ततिनिवृत्तिरिति परिहारः॥

एवमर्थदूषणमुक्तम्, अथ प्रयोगदूषणमाह—**स्वप्रागभावेति**। स्वशब्दः प्राक्शब्दोऽभावव्यतिरिक्तशब्दोऽन्तरशब्दश्च निरर्थकाः; वस्तुशब्दो हि भाववाची। अनुमानेन भावरूपाज्ञानासिद्धिं निगमयति—**अत इति**। श्रुत्यर्थापत्तिभ्यां

श्रुतितदर्थापत्तिभ्यामज्ञानासिद्धिरनन्तरमेव वक्ष्यते । मिथ्यार्थस्य हि मिथ्यैवोपादानं भवितुमर्हतीत्येतदपि **'नं विलक्षणत्वात्'** (ब्र. सू. २।१।४) इत्येतदधिकरणन्यायेन परिहियते । अतोऽनिर्वचनीयाज्ञान-विषया न काचिदपि प्रतीतिरस्ति । प्रतीतिभ्रान्तिबाधैरपि न तथाभ्युपगमनीयम् : प्रतीयमानमेव हि प्रतीतिभ्रान्तिबाधविषयः॰ आभिः प्रतीतिभिः; प्रतीत्यन्तरेण चानुपलब्धमामां विषय—इति न युज्यते कल्पयितुम् । शुक्त्यादिषु रजतादिप्रतीतेः, प्रतीतिकालेपि तन्नास्तीतिबाधेन चान्यस्यान्यथाभानायोगाच्च—सदसदनिर्वचनीयमपूर्वमेवेदं रजतं दोषवशात्प्रतीयत इति कल्पनीयमिति—**चेन्न**; तत्कल्पनायामप्यन्य-स्यान्यथाभानस्यावर्जनीयत्वात् । अन्यथाभानाभ्युपगमादेव ख्यातिप्रवृत्तिबाधभ्रमत्वानामुपपत्तेः—

तन्निद्धिमाशङ्क्याह—**श्रुतीति** । अनिर्वचनीयत्वे परोक्तहेतुं विस्तरेण दूषयति—**प्रतीतीति** । **प्रतीतिः** भ्रान्त्यभ्रान्ति-साधारणरूपा । भ्रान्तिर्विद्यमानभेदाग्रहणपूर्वकसाधारणाकारग्रहणजन्या स्वविषयान्यथात्वविशेषिता प्रवृत्त्यादिहेतुभूता । **बाधः** आरोपितविरुद्धाधिष्ठानाकारावगाहिनी बुद्धिः । **न तथाऽभ्युपगमनीयं** नानिर्वचनीयत्वेनाभ्युपगमनीयमित्यर्थः । प्रतीति–भ्रान्ति–बाधानां स्वविषयोल्लेखमात्रेण वा, अन्यथाऽनुपपत्त्या वा अनिर्वचनीयसिद्धिरिति—विकल्पमभिप्रेत्य, प्रथमं दूषयति—**प्रतीयमानमिति** । **प्रतीयमानं** प्रतीत्योल्लिख्यमानम् । न हि नीलोल्लेखः पीतोल्लेखतयाऽङ्गीकार्यः; तथा सति सर्वोपप्लवप्रसङ्गादिति भावः । द्वितीयं दूषयति—**आभिरिति** । **आभिः प्रतीतिभिः** प्रतीति–भ्रान्ति–बाधशब्दो-पात्ताभिः प्रत्यक्षप्रतीतिभिः । **प्रतीत्यन्तरेण** प्रमाणान्तरजन्येन । यद्वा, **आभिर्लौकिकप्रतीतिभिः** । **प्रतीत्यन्तरेण** आगमजन्येन । यद्वा, **आभिः प्रतीतिभिः** एकाधिष्ठाने सर्पभूदलनाम्बुधारादि बहुत्वाभिप्रायं बहुत्ववचनम् । **प्रतीत्य-न्तरेण** बाधज्ञानेन । संक्षिप्तस्य दूषणस्य विस्तरार्थं परमतमनुवदति—**शुक्त्यादिष्विति** । **अन्यस्यान्यथाभानायो-गाच्चेति** । ननु—कथमन्यथा भानायोगः, उच्यते—न तावद्धर्मधर्मिणोर्मिथस्तादात्म्यभानमन्यथाभानं, पुरोऽवस्थितशुक्ल-भास्वरशकलं न रजतत्वजातीयतया प्रतीयते, रजतत्वं च न भास्वरशकलतया प्रतीयते, शकलं च शकलत्वेन, जातिश्च जाति-त्वेन प्रतीयते—तस्मान्नानयोरन्यतरस्य तदितरत्वभानमिति । नापि धर्म्यन्तरस्य धर्म्यन्तरतादात्म्यमन्यथात्वं; तत्किं विषयग-तम्, उत ज्ञानगतम् । विषये तदन्यथात्वमस्ति चेत्, यथाथैव प्रतीतिः । नास्ति चेत्, असत्ख्यातिप्रसङ्गः । यदि ज्ञानगतं विषयोऽन्यः, ज्ञानमन्यदेवेति—नोपपद्यते; नहि घटज्ञानस्य पटज्ञानत्वसंभवः । आत्मख्यातिप्रसङ्गश्च; ज्ञानाकारत्वात् । रजतादेः स्वस्मिन्नसताऽऽकारेण ख्यानमन्यथाख्यानमिति—चेन्न; असत्ख्यात्यादिप्रसङ्गात् । अन्यत्र सतोऽन्यत्र ख्यानं ख्यानस्या-न्यथात्वमिति—चेन्नः खण्डे दृष्टस्य गोत्वस्य मुण्डे दर्शनस्यापि भ्रमत्वापातात् । अन्यत्रैव सतोऽन्यत्र ख्यानमन्यथात्वमिति चेत्, अन्यत्रैव सत्त्वं कथं निश्चीयते । इह बाधादिति—चेन्न; भ्रान्तिज्ञानबाधितस्य सत्यरजतस्याप्यत्रासत्त्वनिश्चयप्रसङ्गात् । प्रवृत्तिबाधादन्यत्रैव सत्त्वनिश्चय इति—चेन्न; मन्त्रौषधादिप्रतिबद्धस्याग्नेरपि स्फोटजननादिप्रवृत्तिबाधेन–मिथ्यात्वनिश्चयप्रस-ङ्गात् । दुष्टकारणजन्यज्ञानविपयत्वादिह बाध्यत इति चेत्, कथं दुष्टकारणजन्यत्वनिश्चयः । बाधकज्ञानोदयादिति चेत्, पूर्वज्ञानमेव बाधकं स्यात्; परत्वस्याकिंचित्करत्वं हि दर्शितम् । पूर्वज्ञानस्य दुष्टकारणजन्यत्वे निश्चिते–पाश्चात्यज्ञानस्य बाध-कत्वनिश्चयः, तस्य बाधकत्वे निश्चिते–पूर्वस्य दुष्टकारणजन्यत्वनिश्चय—इत्यन्योन्याश्रयश्च स्यात् । किंच–यत्तावद्रजतं पुरोवर्तिनि भानं तस्यैवान्यत्र सत्त्वे किं प्रमाणम् । न तावत्पूर्वज्ञानम्: अत्र सत्त्वेन हि तदवगमयति, न बाधकज्ञानं च; तद्धि पुरोवर्तिन्यसत्त्वमवगमयति । नापि रजतग्राहकप्रमाणं; तत्स्वत्वापणे रजतसत्तामवगमयति । ननु—तस्य, पुरतः ख्यातस्य चैक्यं; क्वचिदप्यसतः ख्यानायोगात् । अन्यत्र सत एव ख्यातत्वं निश्चीयत इति—चेन्न; असतः ख्यानायोगस्य संबन्धे परित्यक्तत्वात् । नहि पुरोवर्तिनि रजतधर्मिसम्बन्धो, रजतत्वजातिसंबन्धो वाऽन्यत्र विद्यते । ननु–अन्यत्र संबन्धमात्रमस्ति तदिह प्रकाशत इत्यन्यत्र सत एवान्यत्र ख्यानमिति—चेन्न; संबन्धद्वयानवभासात् । अन्यत्र सतः संबन्धस्यान्यत्र ख्याने–संबन्धिन इव संबन्धान्तरमपेक्षितं, संबन्धान्तरावभासे च–अन्यत्र सतः ख्यानं न स्यात्; द्वितीयसंबन्धस्य क्वचिदप्यसत्त्वात् । संबन्धस्य संबन्धान्तरानपेक्षत्वात्—संबन्धान्तराभावेऽपि पुरोवर्तिनि भानं युक्तमिति चेत्—एवं तर्हि संबन्ध्यन्तरसंबन्धः, पुरोवर्ति च निरन्तरं भातमिति—यथार्थख्यातिरेवोक्ता स्यात्; ख्यानांशस्य सत्त्वात्, असतः कस्यचिन् ख्यातत्वाभावाच्च । किंच—शुक्तिशकलस्यैव रजतज्ञानविषयत्वं; रजतोपायान्यत्वे सति रजतार्थप्रवृत्तिविषय-त्वात्–इति साधयितुमप्ययुक्तं; तथा हि—इदमर्थस्य रजतत्वजातिविशिष्टताज्ञानविषयत्वं हि साध्यं, तदबाधितप्रवृत्तिविषयत्व-प्रयुक्तमिति—हेतोः सोपाधिकत्वम् । शुक्तिर्न रजततया भाति; शुक्तित्वात्–संप्रतिपन्नवदिति बाधः । एवमादिदूषणासिप्रायेण–अन्यस्यान्यथाभानायोगाच्चेत्युक्तं दूषयति—**नेति** । अन्यत्रैव सताऽऽकारेण पुरोवर्तिनो विशिष्टताज्ञानमन्यथा भानं, प्रतिप-न्नाकारस्य पुरोवर्तिन्यभावनिश्चयश्च—प्रवृत्तिबाधसचिवान्नास्तीति प्रत्ययात् । न हि प्रतिबद्धाग्नेरग्नित्वं नास्तीति प्रत्यय इति

अन्यन्तापरिदृष्टाकारणकवस्तुकल्पनायोगात्। कल्प्यमानं हीदमनिर्वचनीयं। न तावदनिर्वचनीयमिति प्रतीयते, अपि तु परमार्थरजतमित्येव। अनिर्वचनीयमित्येव प्रतीतं चेत्, भ्रान्तिबाधयोः प्रवृत्तेरप्यसंभवः। अतोन्यस्यान्यथाभानविरहे प्रतीतिप्रवृत्तिबाधभ्रमत्वानामनुपपत्तेः, तस्यापरिहार्यत्वाच्च—शुक्त्यादिरेव रजनाद्याकारेणावभासत इति—भवताभ्युपगन्तव्यम्। ख्यात्यन्तरवादिनां च सुदूरमपि गत्वान्यथावभासोऽवश्याश्रयणीयः। असत्ख्यातिपक्षे—सदात्मना, आत्मख्यातिपक्षे च—अर्थात्मना, अख्यातिपक्षेऽप्यन्यविशेषणमन्यविशेषणत्वेन, ज्ञानद्वयमेकत्वेन च, विषयासद्भावपक्षेपि—विद्यमानत्वेन। किं च—अनिर्वचनीयमपूर्वरजतमत्र जातमिति वदता तस्य जन्मकारणं वक्तव्यम्। न तावत्प्रतीतिः; तस्यास्तद्विषयत्वेन तदुत्पत्तेः प्रागात्मलाभायोगात्। निर्विषया जाता तदुत्पाद्य तदेव विषयीकरोतीति—महतामिदमुपपादनम्। अथेन्द्रियादिगतो दोषः, तन्न; तस्य पुरुषाश्रयत्वेनार्थगतकार्यस्योत्पादकत्वायोगात्। नापीन्द्रियाणि; तेषां ज्ञानकारणत्वात्। नापि दुष्टानीन्द्रियाणि; तेषामपि स्वकार्यभूते ज्ञान एव

प्रतिदं, कथं तत्कल्पनायामप्यन्यथाभानस्यावर्जनीयत्वमित्यपेक्षायामाह—**कल्प्यमानं हीति**। अनिर्वचनीयमित्येव प्रतीत्यभ्युपगमे—प्रतीतेरभ्रमरूपत्वं, बाधः, प्रवृत्तिश्च न स्युः। अनिर्वचनीयं निर्वचनीयत्वेन प्रतीतं चेत्—अन्यस्यान्यथाभावभासोऽवर्जनीयः स्यादित्यर्थः। **तस्यापरिहार्यत्वाच्चेति**। **तस्या**न्यथाभानस्य। अयमभिप्रायः—नान्यस्यान्यथाभानं; विद्यमानत्वेन प्रतीतेः। अलौकिकं सत् लौकिकं सच्चेति द्विविधं सत्, अनिर्वचनीये चालौकिकं सत्त्वमस्ति, अत्र तदलौकिकं सद्रजतं प्रतीयते इति चेत्, किमलौकिकं सदलौकिकसत्त्वेन प्रतीयते, उत लौकिकसत्त्वेन। प्रथमे—भ्रमत्वबाधप्रवृत्त्यसंभवः। अलौकिकं लौकिकं सदिति प्रतीतं चेत्, अन्यस्यान्यथाभ्यानं स्यात्। अलौकिकसतो लौकिकसता भेदाग्रहात् प्रवृत्त्यादिसंभव इति चेत्—तर्हि तत्रानिर्वचनीयं वस्तु कल्पयित्वा तत्र भेदाग्रहेण प्रवृत्तिबाधभ्रमत्वोपपादनादपि प्रथमत एव सप्रतिपन्नरजताच्छुक्तिरूपभेदाग्रहेण प्रवृत्तिबाधभ्रमत्वोपपादने—कल्पनालाघवात्—अनिर्वचनीयं वस्त्वनुपपन्नम्—इत्यादिपदकपरम्परामभिप्रेत्य **तस्यापरिहार्यत्वाच्चेत्युक्तम्**॥

यथार्थख्यातिव्यतिरिक्तपक्षेष्वन्यथाख्यातिपक्षः प्रबल इत्यभिप्रायेणाह—**ख्यात्यन्तरेति**। **सुदूरमपि गत्वा** पदकपरम्परामुक्त्वापीत्यर्थः। तदुपपादयति—**असदिति**। अयं माध्यमिकपक्षः। किमसदित्येव प्रतीयते, उत सदिति। असदिति चेत्, भ्रमत्वबाधप्रवृत्त्यसंभवः। सदिति चेत्, अन्यस्यान्यथा भानं स्यादित्यर्थः। **आत्मेति**। अयं योगाचारपक्षः। **आत्म**शब्दो ज्ञानपरः। किं ज्ञानमित्येव प्रतीतम्, उतार्थ इति। प्रथमे—प्रवृत्तिबाधभ्रमत्वासंभवः। द्वितीये अन्यस्यान्यथाभानमित्यर्थः। **अख्यातिपक्षे इति**। इदं रजतमिति किमेकज्ञानम्, उत ज्ञानद्वयमिति विकल्पमभिप्रेत्य, एकज्ञानमिति पक्षे ज्ञेये अन्यथाख्याति प्रसज्जयति—**अन्यविशेषणमन्यविशेषणत्वेनेति**। इदं रजतमित्येकत्वेन संप्रतिपन्नसम्यग्रजतपदारोप्यलिङ्गानुविधायिप्रयोगानुगुणसामानाधिकरण्येन प्रतीतत्वात्—अन्यविशेषणमन्यविशेषणत्वेन प्रतीयत इत्यापादितं, न तु तत्पक्ष उपन्यस्तः। ज्ञानद्वयमिति पक्षे ज्ञानेऽन्यथाख्याति प्रसज्जयति—**ज्ञानेति**। ज्ञानद्वयं किं ज्ञानद्वयमित्येव प्रतीतम्, उतैकमिति विकल्पे, पूर्ववद्दूषणम्। **विषयासद्भावेति**। किमविद्यमानत्वेन प्रतीयते, उत विद्यमानत्वेन प्रतीयते। प्रथमे—प्रवृत्त्याद्यसंभवः। द्वितीये—अन्यस्यान्यथाभानमित्यर्थः॥

अथाकारणत्वमुपपादयति—**किंचेति**। **तस्याः** प्रत्यक्षप्रतीतेः। **तद्विषयत्वेन** विद्यमानविषयकारणत्वेन। कारणं हि नियतपूर्वभावीति भावः। **महतामिदमुपपादनमिति**। **तस्या** वृत्तिज्ञानस्य। विषयरहितावस्थास्वीकारेण कारणत्वाभ्युपगमेऽपसिद्धान्तापातात्, निर्विषयख्यातिवादिनामिव तत्प्रभावेन प्रवृत्त्यादिसिद्धावनिर्वचनीयकृत्तिवैयर्थ्यात्, विषयरूपकारणेन विनोत्पत्तिवचनात्, विरम्य व्यापारवचनाच्च—अत्यन्तानुपपन्नमित्यर्थः। **अथेन्द्रियादीति**। **आदि**शब्देन विषयगतदोषः, पुरुषस्यानवधानं वा गृह्यते। **तस्य पुरुषाश्रयत्वेनेति**। दूरत्वादिदोषस्य विषयगतत्वेऽपि पुरुषगतत्वस्यापि संभवात्—उभयत्र कार्यमुत्पाद्यं, न विषयमात्रे; नियामकाभावात्। अतः पुरुष इव विषयेऽपि न संभवतीत्यभिप्रायः। ननु चक्षुषः पुरुषाश्रयत्वेऽपि, चाक्षुषरजतमेः प्रकृतस्य विषयसंबद्धस्य तत्र कार्यकरत्वं दृष्टं, न तत्कार्यस्य ज्ञानस्य; पुरुषाश्रितत्वात्—दोषाणामकार्यकरत्वात्॥ ननु—विषयमात्रगताः सादृश्यादयो दोषाः सन्ति तेषां तत्रैव कार्यकरत्वमुपपद्यते, मैवं; सादृश्यादेर्दोषत्वं भ्रान्त्यभावेनः सदोत्पादकत्वप्रसङ्गात्, आगन्तोरन्यस्य तत्राद्दृष्टेः, इन्द्रियसंयोगस्य पुरुषगतज्ञानातिरिक्तहेतुत्वासिद्धेः, दृष्टिविघातेन्द्रियसंस्कारासंभवात्, संभवेऽपि सर्वेरुपलम्भप्रसङ्गाच्च। ननु—इन्द्रियाणि यथा पुरुषविशेषसंबन्धात्तत्रैव कार्यविशेषमुत्पादयन्ति, एवं विषयविशेषसंबन्धात्तत्रैव किंचिज्जनयन्तु, तत्राह—**नापीन्द्रियाणीति**। पुरुषगतज्ञानाख्यकार्य

हि विशेषकरत्वम् । अनादिमिथ्याज्ञानोपादानत्वं तु—पूर्वमेव निरस्तम् ॥ किंच—अपूर्वमनिर्वचनीयमिदं वस्तुजातं रजतादिबुद्धिशब्दाभ्यां कथमिव विषयीक्रियते, न घटादिबुद्धिशब्दाभ्याम् । रजतादिसादृश्यादिति चेत्, तर्हि तत्सदृशमित्येव प्रतीतिशब्दौ स्याताम् । रजतत्वादिजातियोगादिति चेत्, सा—किं परमार्थभूता, उतापरमार्थभूता वा । न तावत्परमार्थभूता; तस्या अपरमार्थान्वयायोगात् । नाप्यपरमार्थभूता; परमार्थान्वयायोगात् । अपरमार्थे परमार्थबुद्धिशब्दयोर्निर्वाहकत्वायोगाच्च, इत्यलमपरिणतकुतर्कनिरसनेन । अथवा 'यथार्थं सर्वविज्ञानमिति वेदविदां मतम् । श्रुतिस्मृतिभ्यः सर्वस्य सर्वात्मत्वप्रतीतितः ॥ बहु स्यामिति संकल्पपूर्वसृष्ट्याद्युपक्रमे । तासां त्रिवृतमेकैकामिति श्रुत्यैव चोदि-

---

करत्वमन्वयव्यतिरेकावस्थितं, विषये लिन्द्रियजन्यं कार्यान्तरं न दृष्टम् । तन्कुमिरन्यथैवोपपत्त्या निरस्तेति भावः । तथापि दुष्टपुरुषसन्निधानाद्यथा—देशादिषु दोषाः प्रादुःष्युः, तथा—दुष्टेन्द्रियसन्निधानाद्विषये कार्यविशेषः स्यादित्याह—**नापि दुष्टानीति** । अन्वयव्यतिरेकादिकमतिलङ्घ्य दृष्टान्तमात्रेण न किंचित्साधयितुं शक्यमिति भावः । किमत्र हेत्वन्तरगवेषणया, अनादिभावरूपाज्ञानमेव विश्वोपादानभूतं, शुक्तिरजतादापि विचित्रकार्यं जनयेदित्यत्राह—**अनादीति** । तस्य स्वरूपानादित्वात्कार्यमपि प्रागेव स्यात्, सहकारित्वेन शङ्कनीयमिन्द्रियादिकं तु निरस्तं, मिथ्याभूतस्य चार्थक्रियाकारित्वमयुक्तम्, आश्रयानुपपत्त्यादयश्च पूर्वमेवोक्ता इति भावः ॥

एवमनिर्वचनीयस्य रजतादेरुत्पादकानुपपत्तिरुक्ता, तदुक्तावपि रजतादिबुद्धिशब्दान्वयनियमानुपपत्तिमाह—**किंचेति** । तद्व्यवस्थापकं शङ्कते—**रजतादीति** । प्रातिभासिकस्य रजतादेरर्थक्रियाकारित्वाव्यवहारिकरजतादिसादृश्यादित्यर्थः । उक्तस्य व्यवस्थापकत्वाभावमभिप्रेत्य सादृश्यस्य यथादर्शनं साध्यान्तरमाह—**तर्हीति** । यदि तत्सदृशे तद्बुद्धिः—तदा गवये गोबुद्धिवदन्यथाख्यातिः स्यादित्येवकारामिप्रायः । सादृश्यस्यानिर्वाहकत्वेऽपि तज्जातियोगस्य तद्बुद्धिनिर्वाहकत्वं दृष्टमिति शङ्कते—**रजतादिजातियोगादिति । सा** रजतादिजातिः । **अपरमार्थान्वयायोगात्** अपरमार्थव्यक्त्यन्वययोगादित्यर्थः । व्यक्तिबाधेऽपि जातेरबाधितत्वप्रसङ्ग इति भावः । जातिरपि हि बाध्यते; न हि व्यक्तिर्नास्ति जातिस्त्वस्तीति प्रतीतिः, जातिरपि नास्तीत्येव हि प्रतिपत्तिः । नच—प्रतिपन्नाया अपि जातेः पश्चादप्रतीतिरभिव्यञ्जकव्यक्त्यभावात्, न तु जात्यभावादिति वाच्यम्; अभिव्यञ्जकवति पूर्वकाले प्रतिपन्नाया अपि जातेस्तत्कालसंबन्धितयैव नास्तितागोचरत्वात् । **बाधकप्रत्ययस्य प्रतिपन्नोपाधौ नास्तीति** प्रत्ययो हि बाधः । अपरमार्थपक्षं दूषयति—**नापीति । परमार्थान्वयायोगात्** आपणस्थरजतव्यक्त्यन्वययायोगादित्यर्थः । व्यक्त्यवस्थानेऽपि जातेः कदाचिद्बाधितत्वप्रसङ्ग इति भावः । न हि कदाचिदप्यापणस्थरजते रजतत्वं बाध्यते । परमार्थव्यक्त्यनन्वये बाधकमाह—**अपरमार्थे इति । परमार्थबुद्धिशब्दयोः** परमार्थविषयबुद्धिशब्दयोः । परमार्थव्यक्तौ जातिरनन्विता चेत्, तस्याः क्वचिदपि परमार्थबुद्धिशब्दहेतुत्वादर्शनात्—भ्रान्तिस्थलेऽपि **परमार्थबुद्धिशब्दनिर्वाहकत्वं** न स्यादित्यर्थः । यद्वा, जात्यपारमार्थ्य एव दूषणान्तरं बुद्धिशब्दान्वयानुपपत्तिमाह—**अपरमार्थे इति ।** तदानीं **परमार्थबुद्धिशब्दयोः** परमार्थभूतबुद्धिशब्दयोरित्यर्थः । असत्यात्सत्योत्पत्तिव्युदासमुपजीव्येदं दूषणमुच्यते । व्यक्तेस्तन्निर्वाहकत्वायोगं दर्शयितुमपरमार्थे इत्युक्तिः । अपरमार्थजातेः परमार्थभूतबुद्धिशब्दनिर्वाहकत्वायोगात्—जात्यपारमार्थ्यमयुक्तमित्यर्थः । बुद्धि-शब्दयोश्च पारमार्थ्यं तद्बाधकादर्शनादेव सिद्धम् । **इति प्रमाणानुपपत्तौ भावरूपाज्ञानदूषणम् ॥**

अथ वक्ष्यमाणाया यथार्थख्यातेः स्वसिद्धान्तत्वं दर्शयति—**अथवेति** । तस्याः सांप्रदायिकत्वं दर्शयंस्तां प्रतिजानीते—**यथार्थमिति । वेदविदां** भगवद्बोधायन-नाथमुनि-मिश्रादीनामित्यर्थः । कुत इत्यत्राह—**श्रुतिस्मृतिभ्य इति** । श्रुतिं दर्शयति—**बहु स्यामितीति । आदि**शब्देन नामरूपव्याकरणमुच्यते । यद्वा, **सन्मूला** इत्यादिवाक्योक्तं स्थितिप्रलयादिकं गृह्यते । सृष्ट्यादिरुपक्रमो यस्य प्रकरणस्य तस्मिन् सृष्ट्याद्युपक्रमे । इदं श्लोकार्धं किमर्थमिति चेत्, उच्यते—पाठक्रमेणाण्डसृष्टेः पश्चात् त्रिवृत्करणमिति ज्ञायते, अण्डसृष्टेः प्रागपि त्रिवृत्करणमस्ति; अण्डसृष्ट्यर्थत्वात् त्रिवृत्करणस्य, त्रिवृत्करणमुपायः, अण्डसृष्टिः फलम्, उत्पत्तौ फलं पश्चाद्भवति, सङ्कल्पेतु पूर्वभावि, उपायस्तूत्पत्तौ पूर्वभावी सङ्कल्पे पश्चाद्भावीति—लोकसिद्धं—किं केन कथमित्यादौ । अतो 'नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैकां करवाणी'त्यस्मिन् व्यष्टिसृष्टिसङ्कल्पवाक्ये पश्चान्निर्दिष्टमण्डसृष्ट्युपायभूतं त्रिवृत्करणं, 'नामरूपे व्याकरोत् तासां त्रिवृतं त्रिवृतमेकैकामकरो'दित्युत्पत्तिवाक्ये पूर्वनिर्दिष्टस्यापि नामरूपव्याकरणस्य फलभूतत्वात्—त्रिवृत्करणस्य फलभूतसृष्टेः पूर्वभावो निश्चीयते; अर्थक्रमेण पाठक्रमबाधस्य न्याय्यत्वात्,—'अग्निहोत्रं जुहोति यवागूं पचती'ति वदस्मिन्नर्थे निदर्शनम् । उपक्रमे—'बहु स्यां प्रजायेये'ति वाक्यम्, अत्र **बहु स्यामिति**

---

१ राममिश्रादीनां का. मु. पु. ।

तम्। त्रिवृत्करणमेवं हि प्रत्यक्षेणोपलभ्यते ॥ यदग्ने रोहितं रूपं तेजसस्तदपामपि। शुक्लं कृष्णं पृथिव्याश्चेत्यग्नावेव त्रिरूपता ॥ श्रुत्यैव दर्शिता तस्मात्सर्वे सर्वत्र संगताः। पुराणे चैवमेवोक्तं वैष्णवे सृष्ट्युपक्रमे॥ नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना। नाशक्नुवन्प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ॥ समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः। महदाद्या विशेषान्ता ह्यण्डमित्यादिना ततः ॥ सूत्रकारोपि भूतानां त्रिरूपत्वं तथावदत्। व्यात्मकत्वात्तु भूयस्त्वादिति तेनाभिधाभिदा ॥ सोमाभावे च पूतीकग्रहणं श्रुतिचोदितम्। सोमावयवसद्भावादिति न्यायविदो विदुः। व्रीह्यभावे च नीवारग्रहणं व्रीहिभावतः। तदेव सदृशं तस्य यत्तद्द्रव्यैकदेशभाक् ॥ शुक्त्यादौ रजतादेश्च भावः श्रुत्यैव बोधितः। रूप्यशुक्त्यादिनिर्देशभेदो भूयस्त्वहेतुकः ॥ रूप्यादिसदृशश्चायं शुक्त्यादिरुपलभ्यते। अतस्तस्यात्र सद्भावः प्रतीतेरपि निश्चितः ॥ कदाचिच्चक्षुरादेस्तु दोषाच्छुक्त्यंशवर्जितः। रजतांशो गृहीतोऽतो रजतार्थी प्रवर्तते ॥ दोषहानौ तु शुक्त्यंशे गृहीते तन्निवर्तते। अतो यथार्थं रूप्यादिविज्ञानं शुक्तिकादिषु ॥ बाध्यबाधकभावोपि भूयस्त्वेनोपपद्यते। शुक्तिभूयस्त्ववैकल्यसाकल्यग्रहरूपतः ॥ नातो मिथ्यार्थसत्यार्थविषयत्व-

---

फलमङ्कल्प., **प्रजायेयेति** तदुपायमङ्कल्पः। अनेन न केवलं कि केन कथमित्यादिलोकप्रसिद्ध्यात्र त्रिवृत्करणस्य फलभूतसृष्टेः पूर्वभाविलनिश्चयः, **उपक्रमभूतसङ्कल्पवाक्यानुगुण्याच्चेति** ज्ञापितम्। एवं त्रिवृत्करणस्याण्डसृष्टेः प्राक्सद्भावं ज्ञापयितुमुपक्रमगतसंकल्पवाक्यस्य तदनुगुणत्वज्ञापनाय—**बहु स्यामित्यादर्थमुपात्तम्**। अण्डान्तर्वर्त्यभ्यादिषु त्रिवृत्करणस्य प्रदर्शनादण्डसृष्टेः पश्चात् त्रिवृत्करणमिति शङ्कायां श्रुतेरर्थमाह—**एवं हि प्रत्यक्षेणोपलभ्यत इति**। अभ्यादिषु कतिपयव्यक्तिषु त्रिरूपलप्रदर्शनं नेयत्तावुद्या, अपि त्वण्डान्तर्भूतस्यैव प्रत्यक्षयितुं योग्यत्वात्—पूर्वोक्तत्रिवृत्करणसंभावनाप्रदर्शनार्थमिति भावः। अण्डसृष्टेः प्रागेव त्रिवृत्करणमस्तीति स्पष्टं ज्ञापयति—**पुराणे चेति**। अस्यामुपनिषदि भूतत्रयसृष्टेरुक्तत्वात्—सृष्टयोक्तानां मिश्रणमुक्तम्। इदं तत्त्वान्तरसृष्टिप्रतिपादकप्रकरणेषु तेषामपि मिश्रीकरणस्य प्रदर्शनार्थमिति ज्ञापनाय च **पुराणवचनो**दाहरणम्। **वैष्णव** इत्यनेन सात्त्विकत्वात्प्रामाण्यं सूचितं; 'सात्त्विकेषु च सर्वेषु विष्णोर्माहात्म्यमिष्यत' इति वचनात्। **संहतत्वं समागतत्वं** चेत्यवस्थाद्वयमस्ति, **संहतत्वं** नाम पृथक्स्थितत्वर्हसंयोगमात्रं, **समागतत्वं** पृथक्स्थितत्वनर्हसंश्लेषविशेषः, एतद्व्यभावात् स्रष्टुं नाशक्नुवन्नित्याह—**नानावीर्या इति**। एतदुभयप्राप्त्यासृजन्नित्याह **समेत्येति**। एकैकस्मिन् भूते सर्वभूतानि सन्ति चेत्, सर्वे शब्दाः सर्वत्र प्रयुज्येरन्नित्यत आह—**परस्परसमाश्रया इति**। अन्येषां भूतानां समाश्रितानामेकं भूतं समाश्रयः, आश्रिताश्रयभावश्च न्यूनाधिकभावनिबन्धनः, तत्कृता शब्दव्यवस्थेति भावः। उपात्तवचनानन्तरं **संप्राप्यैक्यमशेषत** इति कृत्स्नशः समागतत्वमुक्तम्। **महदादय** इति पाठे सत्यपि वृत्तभङ्गपरिहाराय स्वमन्दर्भे **महदाद्या** इत्युक्तं भाष्यकारैः। अयमेव श्रुत्यभिप्राय इति स्थापयितुं सूत्रकारोक्तिं दर्शयति—**सूत्रेति। ततः सूत्रकारोऽप्यवद**दित्यन्वयः। **ततः** अस्यार्थस्य श्रुतिस्मृतिसिद्धत्वादित्यर्थः। एवं प्रथमं भूते भूतान्तरसद्भाव उक्तः; वक्ष्यमाणस्य सदृशे सदृशान्तरसद्भावस्योपयोगित्वात्। **तेनाभिधाभिदा** भूयस्त्वेनाभिधानस्य व्यवस्थेत्यर्थः। सदृशे सदृशान्तरसद्भावमाह—**सोमेति। न्यायविदः** परीक्षकाः। **सोमाभावे** 'पूतीकानभिषुण्या' दित्यर्थं विधिर्नियमार्थः; सोमाभावे तत्सदृशद्रव्यान्तरेषु स्वतः प्रवृत्तेः। एतत्तुल्यन्यायसिद्धार्थमाह—**व्रीहीति। व्रीहिभावतः** व्रीह्यवयवसद्भावतः। ततः कथं सदृशे सदृशान्तरसद्भाव इत्यत्राह—**तदेवेति**। अनेन शुक्त्यादौ रजताद्यवयवसद्भावः फलित इत्याह—**शुक्त्यादाविति। श्रुत्यैव बोधितः** प्रतिनिधिश्रुत्यामिहितत्वेन फलितः। यद्वा, त्रिवृत्करणश्रुत्यैव बोधितत्वं फलितं, तेजःप्रचुररूप्यांशः शुक्तौ त्रिवृत्करणात्सिध्यतीत्यर्थः। कथं शब्दव्यवस्थेत्यत्राह—**रूप्येति**। शुक्तिरूप्ययोः सादृश्ये सति हि शुक्तौ रूप्यसद्भावसिद्धिः, शब्दव्यवस्थाया भूयस्त्वहेतुकत्वसिद्धिश्चेत्यत्राह—**रूप्यादीति**। यद्वा, शुक्तौ रजतैकदेशसद्भावे **प्रमाणान्तरमाह—रूप्यादीति। ततः** किमित्यत्राह—**अत इति। प्रतीतेः** रूप्यसदृशतया प्रतीतेः। **शुक्त्यादौ** रजताद्यवयवसद्भावश्चेन् सदा गृह्येत, प्रवृत्तिश्च सदा स्यात्, बाधश्च नोपपद्यत इत्यत्राह—**कदाचिदिति। दोषः शुक्त्यंशाग्रहहेतुः**। प्रचुरग्रहणासिभूतत्वाभावात्, अदृष्टवशाच्च—रजतग्रहणम्; **अदृष्टवशाच्चाम्बुनो ग्रहणादि**ति हि वक्ष्यते, **उदाहरणान्तरेष्वप्युपजीव्यत्वाय** हि तत्र तदुक्तिः। **भूयस्त्वेन बाध्यबाधकभाव इति**। शुक्तिभूयस्त्वेन तज्ज्ञानस्य बाधकत्वं, तत एव रजताल्पत्वं सिद्धं, तेन रजतज्ञानस्य बाध्यत्वमित्यर्थः। **भूयस्त्वेने**त्युक्ते भ्रान्तिज्ञानस्य रजतभूयस्त्वेन शुक्तिज्ञानस्य बाध्यत्वशङ्काव्यावर्त्यर्थं भूयस्त्वेन बाध्यबाधकत्वमुपपादयति—**शुक्तीति**। ननु साकल्ये सत्यपि

निबन्धनः । एवं सर्वस्य सर्वत्वे व्यवहारव्यवस्थितिः ॥[1] (इमे भाष्यकारीयाः श्लोकाः) ।

वैकल्यं गृहीतं चेदन्यथाख्यातिः—इति, नैवं; न हि वैकल्यस्य ग्रहो वैकल्यग्रहः, किं तु शुक्तिभूयस्त्ववैकल्येन ग्रहः, तद्विरहेण ग्रहः तदग्रह इति फलितम् । **भूयस्त्वसाकल्येन ग्रहः** तन्महितनया ग्रहः । तयोर्ग्रहयो **रूपात्** स्वभावात्, तथाविधग्रहणात्मकत्वादित्यर्थः । बहुव्रीहिर्वा, भावप्रधानो निर्देशः । पूर्वोत्तरज्ञानयोस्तथारूपत्वात्—बाध्यबाधकभाव इत्यर्थः । ज्ञानस्य बाध्यत्वं न स्वरूपतः, न च विषयतः, किंतु बाध्यप्रवृत्तिकत्वम् । उत्तरज्ञानस्य च बाधकत्वं—पूर्वज्ञानजन्यप्रवृत्तिनिवारकत्वम् । अन्यथाख्यातिवादेऽपि ज्ञानस्य स्वरूपेण बाध्यत्वमनभिमतं, किं तु विषयबाध्यत्वमेवाभिमतम्, अस्माकं तु ज्ञानफलभूतप्रवृत्तेर्बाध्यत्वमिति भिदा । प्रवृत्तेश्च बाधितत्वं—प्रतिबद्धोत्पत्तिकत्वं, विफलत्वं वा । **नात इति । मिथ्यार्थस्त्यार्थ**शब्दाभ्यां परामिमतमिथ्यात्वसत्यत्वे विवक्षिते ।—**एवमिति ।** सर्वस्य सर्वत्वेऽपि **व्यवहारव्यवस्थितिः** हानोपादानादिनियमः, **एवं** भूयस्त्वसाकल्यवैकल्याभ्यामित्यर्थः । साधारणाकारग्रहणभेदाग्रहदोषादृष्टानि सर्ववादिभिरभ्युपेतव्यानि, तावता प्रवृत्त्यादिसंभवेऽपि अधिककल्पनायामन्येषां गौरवं स्यात्, तत्रेष्टरूपरूपिनिरन्तरभानात् प्रवृत्तिः, द्विष्टरूपरूपिनिरन्तरभानान्निवृत्तिः, रूपरूपिणोर्धर्म्यन्तरनिष्ठत्वविरोधिधर्मान्तराश्रितत्वभानविरहेण भानं—निरन्तरभानम्, अत एव—भेदाग्रहात्प्रवृत्तिश्चेत् रज्जुसर्पभेदाग्रहे निवृत्तिर्न स्यात्—इत्यादीनि चोद्यानि नावकाशं लभन्ते । यः, परमते रूपाख्यान्तरहेतुरभ्युपेतः स एवास्माकं प्रवृत्त्यादिहेतुः । प्राभाकरैर्मन्त्रार्थवादानां स्वार्थे तात्पर्यानभ्युपगमात्—केवलभेदाग्रहेणैव निर्वाहः कृतः । अत्र तु मन्त्रार्थवादयोः प्रतीयमानार्थे प्रामाण्याभ्युपगमात्—उपनिषद्भागवगतं त्रिवृत्करणं, तत्प्रदर्शितं पञ्चीकरणम्, ईश्वरकर्तृकं सर्गविशेषं, तथा प्रतिनिधिन्यायं भेदाग्रहमभ्युपगम्य निर्वाहः कृत इति वैषम्यम् । तत्र भूते भूतान्तरभ्रमस्य त्रिवृत्करणेन निर्वाहः स्फुटतरः । सदृशे सदृशान्तरभ्रमस्य तु प्रतिनिधिन्यायेनैव निर्वाहः, न तु त्रिवृत्करणेनोपयोग इति केचिदाचार्याः । त्रिवृत्करणमपि विजातीयभूतारब्धे सदृशे विजातीयभूतारब्धसदृशान्तरभ्रमनिर्वाहौपयिकमिति च संप्रदायः । **श्रुतिस्मृतिभ्यः सर्वस्ये**त्यादिग्रन्थानां स्वारस्यात्तथाऽवगम्यते, अतस्त्रिवृत्करणश्रवण-पञ्चीकरणस्मरणाभ्यां, प्रतिनिधिन्यायाच्च—सदृशे सदृशान्तरबुद्धिर्याथार्थ्यं निरूप्यते ॥

ननु—कथं सदृशे सदृशान्तरभ्रमस्य त्रिवृत्करणेनोपयोगः, न हि त्रिवृत्करणात्पूर्वं रजताद्यवयवाः सन्ति; तथा सति हि त्रिवृत्करणनिबन्धनं शुक्तौ रजतादिसंमिश्रणं स्यात्, नच तदस्ति; त्रिवृत्करणस्याण्डमृष्टेः पूर्वमभावेलात्; उच्यते—पाञ्चभौतिकेष्वपि पदार्थेषु किंचित्कार्यं केनचित्प्रचुरेण भूतेन परिणामविशेषवताऽऽरब्धं, तत्र यादृशपरिणाममुक्तयद्भूतप्रचुरं यत्कार्यं तस्य तादृशपरिणामवतो भूतस्य कार्यान्तरेष्वपि विद्यमानत्वात्—तेषु तथाविधतद्भूतप्रचुरतत्कार्यविषयबुद्धिरुपपद्यते । यद्यप्यवान्ताराकारविशेषस्त्रिवृत्करणदशायां नास्ति, तथापि त्रिवृत्करणेन कार्यानुप्रविष्टस्य तस्य भूतस्य कार्यान्तरावयवसमानपरिणामसंभवाद्भौतिकान्तरे भौतिकान्तरबुद्धिर्याथार्थ्यं घटते, तथा त्रिवृत्करणेन शुक्तावन्तर्गतस्य तेजोऽशस्य शुक्लभास्वररूपेण परिणामवतो रजतसौसादृश्याद्रजतावयवत्वमुपपन्नं; तादृशाकारयुक्ततत्तद्भूतविशेषवन्त एव हि सम्यग्रजतादयो निरीक्ष्यन्ते, अतः शुक्त्यादौ रजताद्यवयवसद्भाव उपपद्यते । ननु—कथं शुक्त्यादिषु प्रतीयमानानामवयवानां रजताद्यवयवत्वं, न हि ते रजतादिभ्य आनीय निवेशिताः; उच्यते—संप्रतिपन्नरजताद्यवयवस्य सुसदृशाकारत्वमेव तेषां रजताद्यवयवत्वं, न तु रजतादिभ्य आनीय निवेशितत्वं—यथा संप्रतिपन्नरजताद्यवयवानाम् । न ह्यापणस्थरजताद्यवयवाः कुतश्चिद्रजतान्तरादेरानीय निवेशिताः । एवमेव पूतीकादिषु प्रतीयमानानां सोमलताद्यवयवानामपि सोमाद्यवयवत्वं नाम—संप्रतिपन्नसोमलताद्यवयवस्य सुसदृशत्वमेव, तच्च स्फुटतरप्रतीतिसिद्धमबाधितं च । न हि शुक्तिशकलपूतीकादिषु रजतसोमलतादिसादृश्यं नास्तीति बाधकप्रत्ययः उदेति । तेषामवयवानां विजातीयावयवप्राचुर्यादकार्यकरत्वं, प्रचुरक्षीरनिविष्टाल्पसलिलस्येव, प्रचुरकनकसंसृष्टाल्परजतस्येव च संभवति । ननु-एवं शुक्तितयाभिमतपुञ्जस्य शुक्तिलमपुष्कलं स्यात्—विजातीयावयवसंसर्गात्पुरुषमृगे पुरुषत्ववत् । पुरुषमृगत्वं नाम-पुरुषत्वमृगत्वविलक्षणं जात्यन्तरं, न तु विकलं पुरुषत्वं, मृगत्वं चेति चेत्, तर्हि-शुक्तितयाभिमतपुञ्जस्यापि शुक्तित्वरजतत्वविलक्षणजात्यन्तरवत्त्वं स्यात्, ततश्च पुरुषमृगे पुरुषव्यवहारवत् शुक्तिव्यवहारो न मुख्यः स्यात्; विजातीयसंसृष्टाया भ्रमाधिष्ठानभूतायाः शुक्तेः पुरुषेण पुरुषमृगस्येव शुक्त्यन्तरेण सौसादृश्याभावात्। सौसादृश्ये सति हि तत्ताव्यवहारस्य मुख्यत्वं, तदभावाद्धि 'सिंहो देवदत्त' इत्यस्यामुख्यत्वम् । शुक्त्यवयवप्राचुर्याच्छुक्तित्वं पुष्कलं, तत एव तद्व्यवहाराश्च मुख्य इति चेत्, तर्हि-रजतांशस्याप्रचुरत्वादेव रजतत्वं नास्तीति रजतबुद्धेर्याथार्थ्यं न स्यात्; उच्यते—पुरुषत्ववत् शुक्तित्वस्यावयवसंघातविशेषवृत्तित्वाभावात्—अणुमात्रेऽपि शुक्तित्वं पुष्कलं, पुरुषत्वस्य तु संघातविशेषवृत्तितया संघातवैकल्यात्—तदपौष्कल्यं, जात्यन्तरं वा तत्र स्यात्, शुक्तित्वं तु न तथेत्युक्तम् । अतः शुक्त्यवयवेषु शुक्तित्वतद्व्यवहारावुपपन्नौ; तत्र विरुद्धजात्यन्वयाभावात्, शुक्तितयाऽभिमतसंघाते तु शुक्त्यवयवप्राचुर्यात्—अर्थक्रियाव्यवस्था, शब्दव्यवस्था

१ °र्थतात्पर्या° आ. मु. पु.

स्वप्ने च प्राणिनां पुण्यपापानुगुणं भगवतैव तत्तत्पुरुषमात्रानुभाव्यास्तत्तत्कालावसानास्तथाभूताश्चार्थाः सृज्यन्ते। तथा हि श्रुतिः स्वप्नविषया—**'न तत्र रथा न रथयोगा न पन्थानो भवन्ति। अथ रथान्रथयोगान्पथः सृजते। न तत्रानन्दा मुदः प्रमुदो भवन्ति। अथानन्दान्मुदः प्रमुदः सृजते। न तत्र वेशान्ता पुष्करिण्यः स्रवन्त्यो भवन्ति। अथ वेशान्तान्पुष्करिण्यः स्रवन्त्यः सृजते। स हि कर्ता'** (बृ. ४।३।१०) इति। यद्यपि सकलेतरपुरुषानुभाव्यतया तदानीं न भवन्ति, तथापि तत्तत्पुरुषमात्रानुभाव्यतया तथाविधानर्थानीश्वरः सृजति। स हि कर्ता। तस्य सत्यसंकल्पस्याश्चर्यशक्तेस्तथाविधं कर्तृत्वं संभवतीत्यर्थः। **'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः। तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते। तस्मिल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन॥'** (का. ५।८) इति च। सूत्रकारोपि—**'संध्ये सृष्टिराह हि, निर्मातारं चैके पुत्रादयश्च'** (ब्र. सू. ३।२।१–२) इति सूत्रद्वयेन स्वाप्नेष्वर्थेषु जीवस्य स्रष्टृत्वमाशङ्क्य, **'मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्'** (ब्र. सू. ३।२।३) इत्यादिना न जीवस्य संकल्पमात्रेण स्रष्टृत्वमुपपद्यते; जीवस्य स्वाभाविकसत्यसंकल्पत्वादेः कृत्स्नस्य संसारदशायामनभिव्यक्तस्वरूपत्वात्। ईश्वरस्यैव तत्तत्पुरुषमात्रानुभाव्यतयाश्चर्य-

---

चोपपद्यते। प्रचुरशुक्त्यभिभूतत्वेन रजतांशस्यागृहीतत्वात्—गृहीतशुक्तिविवक्षया तद्विषयत्वेन प्रयुक्तशब्दो मुख्य इत्युपपन्नम्। नच—भ्रमाधिष्ठानभूतायाः शुक्तेर्विजातीयावयवयोगितया शुक्त्यन्तरसौसादृश्यहानिः; शुक्त्यन्तरस्याप्यल्परजतांशमिश्रत्वाद्रजतांशाभिभवेन शुक्त्यन्तरसौसादृश्यप्रतीतिरुपपद्यते, शुक्त्यवयवानां तु परस्परसौसादृश्यमुपपन्नतरम्। उक्तरीत्या रजतांशस्य च रजतत्वं मुख्यं; तस्मिन्नंशे विरुद्धजात्यन्वयाभावात्। रजतान्तरावयवसौसादृश्यं च भ्रमदशायां गृह्यमाणस्य तस्य प्रचुरशुक्तिग्रहणाभिभूतत्वाभावात्—रजतान्तरावयवसौसादृश्यप्रतीतिरुपपद्यते, अत एव रजतव्यवहारश्च मुख्यः, अतः शुक्त्यादौ रजतादिबुद्धेर्याथार्थ्यमुपपन्नम्। अल्पस्य रजतस्य प्रचुरतया ग्रहणेऽन्यथाख्यातिप्रसङ्ग इति चेन्न; प्राचुर्यग्रहणाभावात्: अल्पत्वाग्रहणमेव हि तत्र विद्यते। प्राचुर्यस्य प्रतियोग्यपेक्षत्वात्, प्रतियोगिभूतशुक्त्यग्रहणात्, तद्ग्रहणे प्रवृत्त्यसंभवाच्च—शुक्त्यपेक्षया रजतांशस्य प्राचुर्यं न गृहीतमिति—नान्यथाख्यातिः। नन्वल्पत्वाग्रहणं नाम—प्रचुरत्वग्रहणं स्यात्, भवन्मते हि भावान्तरमभावः, अतोऽन्यथाख्यातत्वमिति—चेन्न; अल्पत्वाग्रहणं नाम—न प्राचुर्यग्रहणम्, अपि तु अल्पत्वविषयज्ञानसङ्कोच इति—अन्यथाग्रहणाभावात्। 'नेदं रजत'मित्यत्र नञर्थः क इति चेत्, शुक्तित्वमेवेति ब्रूमः यदाकारग्रहणेन पूर्वज्ञानोत्पन्नायाः प्रवृत्तेर्निवृत्तेर्वा निवारणं स एवाकारो नञर्थः, स चाकारः प्रतियोगिसापेक्षैः'नेदं रजत'मित्यादिशब्दैस्तदनपेक्षैः, शुक्त्यादिशब्दैश्च व्यवहियते॥

एवं भूते भूतान्तरसद्भावात्, सदृशे सदृशान्तरसद्भावाच्च—शुक्तिरूप्यादिबुद्धेर्याथार्थ्यमुपपादितम्। न हि स्वाप्नार्थानां सदृशे सदृशान्तरसद्भावो भूते भूतान्तरसद्भावो वा वक्तुं शक्य इत्याह—**स्वप्नेचेति।** कथं केचित्सुखरूपाः, केचिद्दुःखरूपा इत्याह—**पुण्यपापानुगुणमिति। भगवतैव** जगत्स्रष्ट्रैव। तर्ह्यन्यैरप्युपलभ्येत, सदा चोपलभ्येतेत्याह—**तत्तदिति।** कथं दृष्टविसजातीया इत्याह—**तथाभूता इति।** श्रुतिं दर्शयति—**तथा हीति।** स्वप्नविषयत्वमस्य वाक्यस्य कथमिति शङ्कायां—**स्वप्नं पश्यतीति** पूर्ववाक्यं स्मारयति—**स्वप्नविषयेति। रथयोगाः** अश्वादयः। **न भवन्ति** दृष्टसजातीया न भवन्तीत्यर्थः। **आनन्दा मुदः प्रमुद इति।** साधारणभोग्यदर्शनजा प्रीतिर्**मुत्**, असाधारणभोग्यलक्षणजा प्रीतिः **प्रमुत्**, विनियोगजा प्रीतिर्**आनन्दः**। यद्वा, विलक्षणविषयदर्शनजा प्रीतिर्**मुत्**, तस्य स्वविनियोगार्हलक्षणजन्या प्रीतिः **प्रमुत्**, विनियोगजा प्रीतिर्**आनन्द** इति। एतैः शब्दैर्विषया लक्ष्यन्ते; मुख्यार्थत्वे दृष्टविजातीयत्वायोगात्। **वेशान्ता** गृहाः। यद्वा, **वेशान्ताः** पल्वलानीत्यर्थः। कथमुपपद्यत इत्याह—**स हि कर्तेति।** सर्वशक्तिर्हि कर्ता किमनुपपन्नमिति भावः। **तच्छब्दो** न प्रकृतजीवपरः, अपि तु प्रसिद्धपरमात्मपरः। व्याघातपौनरुक्त्यशङ्कापरिहारार्थमस्याः श्रुतेरर्थमाह—**यद्यपि सकलेति। सृजत** इति पदविरोधपरिहाराय **नभवन्तीति** निषेधस्य संकोचो हि उत्सर्गापवादन्यायेन कृतः, अतः कालान्तरस्थाखिलपुरुषान्तरानुभाव्यत्वाकारविषयो निषेधः, न तु तत्कालतत्पुरुषमात्रानुभाव्यतया स्वरूपनिषेधः, अतो जाग्रदवस्थानुभूतवस्तुसजातीया अनेकपुरुषानुभाव्याः कालान्तरस्थायिनश्च न भवन्तीत्यर्थः। **स हि कर्तेत्येतत्सङ्गमुत्कार्षोपपादकत्वेन व्याचष्टे—तस्येति।** स्वाप्नार्थसृष्टेरीश्वरकर्तृकत्वस्फुटीकरणार्थं श्रुत्यन्तरमाह—**य एष सुप्तेष्विति।** स्वाप्नार्थानां पारमार्थ्यं पूर्वपक्षीकृत्यापारमार्थ्यं सूत्रकारेण सिद्धान्तितमिति—व्याख्यातृमतभेदेनास्याः श्रुतेर्नायमर्थ इति शङ्काव्युदासार्थमुत्कार्षस्य सूत्रकाराभिमतत्वमाह—**सूत्रेति।** सूत्रार्थमाह—**स्वाप्नेष्विति।** जीवस्यापि

भूता सृष्टिरियम्। 'तस्मिंल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन।' (का. ५।८) इति परमात्मैव तत्र स्रष्टेत्यवगम्यत इति परिहरति। अपवरकादिषु शयानस्य स्वप्नदृशः स्वदेहेनैव देशान्तरगमनराज्याभिषेकशिरश्छेदादयश्च पुण्यपापफलभूताः शयानदेहसरूपसंस्थानदेहान्तरसृष्ट्योपपद्यन्ते। पीतशङ्खादौ तु नयनवर्तिपित्तद्रव्यसंभिन्ना नायनरश्मयः शङ्खादिभिः संयुज्यन्ते। तत्र पित्तद्रव्यगतपीतिमाभिभूतः शङ्खगतशुक्लिमा न गृह्यते। अतः सुवर्णानुलिप्तशङ्खवत्पीतः शङ्ख इति प्रतीयते। पित्तद्रव्यं तद्गतपीतिमा चातिसूक्ष्मतया पार्श्वस्थैर्न गृह्यते, पित्तोपहतेन तु स्वनयननिष्क्रान्ततयातिसामीप्यात्सूक्ष्ममपि गृह्यते। तद्ग्रहणजनितसंस्कारसचिवनायनरश्मिभिर्दूरस्थमपि गृह्यते। जपाकुसुमसमीपवर्तिस्फटिकमणिरपि तत्प्रभाभिभूततया रक्त इति गृह्यते। जपाकुसुमप्रभा विततापि स्वच्छद्रव्यसंयुक्ता स्फुटतरमुपलभ्यत इत्युपलब्धिव्यवस्थाप्यमिदम्। मरीचिकाजलज्ञानेऽपि तेजःपृथिव्योरप्यम्बुनो विद्यमानत्वादिन्द्रियदोषेण तेजःपृथिव्योरग्रहणात्, अदृष्टवशाच्च-अम्बुनो ग्रहणाद्यथार्थत्वम्। अलातचक्रेप्यलातस्य द्रुततरगमनेन सर्वदेशसंयोगादन्तरालाग्रहणात्तथा प्रतीतिरुपपद्यते। चक्रप्रतीतावप्यन्तरालाग्रहणपूर्वकं तत्तद्देशसंयुक्ततत्तद्वस्तुग्रहणमेव। क्वचिदन्तरालाभावादन्तरालाग्रहणं, क्वचिच्छैघ्र्यादग्रहणमिति विशेषः। अतस्तदपि यथार्थम्। दर्पणादिषु निजमुखादिप्रतीतिरपि यथार्था। दर्पणादिप्रतिहतगतयो हि नायनरश्मयो दर्पणादिदेशग्रहणपूर्वकं निजमुखादि गृह्णन्ति। तत्राप्यतिशैघ्र्यादन्तरालाग्रहणात्तथा प्रतीतिः। दिङ्मोहेपि दिगन्तरस्यास्यां दिशि विद्यमानत्वाददृष्टवशेनैतद्दिगंशवियुक्तो दिगन्तरांशो गृह्यते। अतो दिगन्तरप्रतीतिर्यथार्थैव। द्विचन्द्रज्ञानादावप्यङ्गुल्यवष्टम्भतिमिरादिभिर्नायनतेजोगतिभेदेन सामग्री-

---

स्वप्नदशायां सत्यसंकल्पलाद्याविर्भावः कल्प्यत इत्याह—**तस्मिँल्लोका इति**। अनन्यथासिद्धस्यैव हि कल्पकत्वम्, परमात्मलिङ्गश्रवणेन स्वाप्नार्थसृष्टेः परमात्मनैवोपपन्नत्वात्-न जीवस्य स्वरूपाविर्भावः कल्प्यत इत्यर्थः। कथमपवरके शयानस्य देशान्तरगमनादेः पारमार्थ्यमुपपद्यत इत्याह—**अपवरकादिष्विति**। स्वयमेव स्वदुःखावहवस्तुसृष्ट्यनुपपत्तेश्च—न तदा जीवस्य स्वरूपाविर्भावः कल्प्यत इति चार्थसिद्धम्। **शिरश्छेदादय** इत्युक्तत्वात्—सरूपे देहान्तरे शयानदेहव्यवहारो मेदाग्रहकृतो, न त्वन्यथाख्यातिकृतः। एवं स्वाप्नार्थेषु तत्तदेकपुरुषानुभाव्यत्व-तत्तत्कालावसायिलरूपभेदाग्रहात्-प्रवृत्त्यादिर्भवति। पीतशङ्खादावीश्वरसृष्टत्वश्रुतिर्दर्शयितुं न शक्यत इत्याह—**पीतेति**। पीतिमवच्छौक्ल्यमपि प्रतीयेतेत्याह—**तत्रेति**। तर्हि पार्श्वस्थैरपि पित्तद्रव्यं ग्राह्यमित्याह—**पित्तेति**। तर्हि सूक्ष्मत्वात्तेनापि न पित्तं ग्राह्यमित्याह—**पित्तोपहतेन त्विति**। दूरस्थशङ्खस्यातिसामीप्याभावात्कथं तत्रस्थं पित्तद्रव्यं गृह्यत इत्याह—**तद्ग्रहणेति**। यथा अतिदूरमुत्पतितः पतगो न द्रष्टुं शक्यते, तथापि सन्निकर्षोत्पतनकालादारभ्य निरन्तरमवेक्ष्यमाणस्तज्जनितसंस्कारवत्त्वां चक्षुर्भ्यां दूरेऽपि गृह्यते—तद्वदित्यर्थः। प्राभाकरैः—पित्तपीतिमा, शङ्खद्रव्यं च निरन्तरं गृह्येते इत्युक्तम्, अत्र तु रूपिद्रव्ये चक्षुषः सामर्थ्यात् पित्तद्रव्यं गृह्यत इत्युक्तमिति विशेषः। **सुवर्णानुलिप्तशंखवदिति** दृष्टान्ते चायं भावः—ननु—यदि पित्तद्रव्यशङ्ख्योर्भेदाग्रहात् पीतशङ्खव्यवहारः, तर्हि पटे पीतव्यवहारः कथं न स्यात्, अन्यथाख्यातौ वा—कथं पटे पीतव्यवहाराभावः, भ्रमे सति—तन्मूलनिरूपणा कार्या, ननु सर्वत्र भ्रमेण भवितव्यमिति चेत्, तुल्यम्। जपाकुसुमस्फटिकादौ चाक्षुषदोषसंसर्गो दुर्वच इत्याह—**जपेति**। जपाकुसुमस्फटिकमरीचिकाजल-अलातचक्र-दिङ्मोहेषु द्रव्यान्तरेण संबन्धाद् यथार्था प्रतीतिरिति निर्वाहः। जपाकुसुमप्रभासंबन्धाद्रक्तप्रतीतिश्चेत्, तत्संबन्धात्पाषाणादिष्वपि तथा स्यादित्यत्राह—**स्वच्छेति**। **मरीचिकेति**। अदृष्टस्य नियामकत्वं सर्वैरपि स्वीयान्तरवादिभिरभ्युपेतव्यम्; अन्यथा सर्वेषां सर्वदा सर्वत्र सर्वविषयभ्रमप्रसङ्गात्, कदाचिदपि भ्रमाभावप्रसङ्गाच्च। **अलातेति**। **अन्तरालाग्रहणात्**पूर्वोत्तरकालभाविनोस्तत्तत्प्रदेशविशेषालातसंयोगयो**रन्तरालाग्रहणात्**, क्रमाग्रहणादित्यर्थः। अन्तरालाग्रहणे सति कथं यार्थ्यमित्यत्राह—**चक्रेति**। **चक्रप्रतीतिः** सम्यक्चक्रप्रतीतिः। को विशेष इत्यत्राह—**क्वचिदिति**। **दर्पणादिष्विति**। सव्यदक्षिणविपर्यासः कथमिति चेत्, उच्यते—आपेक्षिको हि सव्यदक्षिणभावः, तत्र स्वाभिमुखतया विपर्यस्तसव्यदक्षिणभावस्य दर्पणस्य, मुखस्य चान्तरालाग्रहणमेव विपर्यासो दर्पणदेशगतः, तेनागृहीतान्तरालं मुखमिति-अभिमुखस्य दर्पणस्य, मुखस्य चान्तरालाग्रहणादाभिमुख्यप्रतीतेर्यार्थ्यम्, एवं मलिनत्वाल्पत्वादि च। **दिङ्मोहेऽपीति**। सर्वदिक्सङ्गावेऽपि प्राच्यादिव्यवहारः प्रतियोग्यपेक्षया,

भेदात्सामग्रीद्वयमन्योन्यनिरपेक्षं चन्द्रग्रहणद्वयहेतुर्भवति। तत्रैका सामग्री स्वदेशविशिष्टं चन्द्रं गृह्णाति, द्वितीया तु किंचिद्वक्रगतिश्चन्द्रसमीपदेशग्रहणपूर्वकं चन्द्रं स्वदेशवियुक्तं गृह्णाति। अतः सामग्रीद्वयेन युगपद्देशद्वयविशिष्टचन्द्रग्रहणे ग्रहणभेदेन ग्राह्याकारभेदात्, एकत्वग्रहणाभावाच्च—द्वौ चन्द्राविति भवति प्रतीतिविशेषः। देशान्तरस्य तद्विशेषणत्वं, देशान्तरस्य, अगृहीतस्वदेशचन्द्रस्य च निरन्तरग्रहणेन भवति। तत्र सामग्रीद्वित्वं पारमार्थिकम्। तेन देशद्वयविशिष्टचन्द्रग्रहणद्वयं च पारमार्थिकम्। ग्रहणद्वित्वेन चन्द्रस्यैव ग्राह्याकारद्वित्वं च पारमार्थिकम्। तत्र विशेषणद्वयविशिष्टचन्द्रग्रहणद्वयस्यैक एव चन्द्रो ग्राह्य इति ग्रहणे प्रत्यभिज्ञावत्केवलचक्षुषः सामर्थ्याभावाच्चाक्षुषं ज्ञानं तथैवावतिष्ठते। द्वयोश्चक्षुषोरेकसामग्यन्तर्भावेपि तिमिरादिदोषभिन्नं चाक्षुषं तेजः सामग्रीद्वयं भवतीति कार्यकल्प्यम्। अपगते तु दोषे स्वदेशविशिष्टस्य चन्द्रस्यैकग्रहणवेद्यत्वादेकश्चन्द्र इति भवति प्रत्ययः। दोषकृतं तु सामग्रीद्वित्वं, तत्कृतं ग्रहणद्वित्वं, तत्कृतं ग्राह्याकारद्वित्वं चेति निरवद्यम्। अतः सर्वं विज्ञानजातं यथार्थमिति सिद्धम्। ख्यात्यन्तराणां दूषणानि तैस्तैर्वादिभिरेव प्रपञ्चितानीति न तत्र यत्नः क्रियते। अथवा किमनेन बहुनोपपादनप्रकारेण। प्रत्यक्षानुमानागमाख्यं प्रमाणजातम्, आगमगम्यं च निरस्तनिखिलदोषगन्धमनवधिकातिशयासंख्येयकल्याणगुणगणं सर्वज्ञं सत्यसंकल्पं परं ब्रह्माभ्युपगच्छतां किं न सेत्स्यति, किं नोपपद्यते। भगवता हि परेण ब्रह्मणा क्षेत्रज्ञपुण्यपापानुगुणं तद्भोग्यत्वायाखिलं जगत्सृजता सुखदुःखोपेक्षाफलानुभवानुभाव्याः पदार्थाः सर्वसाधारणानुभवविषयाः केचन तत्तत्पुरुषमात्रानुभवविषयास्तत्तत्कालावसानास्तथातथानुभाव्याः सृज्यन्ते। तत्र बाध्यबाधकभावः सर्वानुभवविषयतया,

---

तत्र दिगन्तरप्रतियोगिनः दिगन्तरस्य च निरन्तरभानम्, अतो यथार्थविषयत्वमिति। दिशां बहुत्वं च-'पञ्चां भूमिर्दिशः श्रोत्रा' दित्यवगम्यते। **द्विचन्द्रेति**। ततः किमित्याह—**तत्रैकेति**। स्वतः ऋजुप्रसारिणोऽपि चाक्षुषतेजसो वक्रत्वं संभवति; दर्पणादिना तद्दर्शनात्, इहाप्यङ्गुल्यवष्टम्भादष्टादिना तदुपपत्तिः। ततः किमित्याह—**अत इति**। चन्द्रदेशौ द्वाविति प्रतीत्यभावहेतुः—चन्द्रैकलाग्रहणम्। देशान्तरगतस्य तद्विशेषणकत्वं कथमित्याह—**देशेति**। ततः किं प्रतीतेर्यथार्थ्यस्येत्याह—**तत्र सामग्रीति। तेन देशद्वयविशिष्टचन्द्रग्रहणद्वयं च पारमार्थिकमिति**। ग्रहणद्वयम्, अतिशैघ्र्यादगृहीतक्रमम्, अत एवागृहीतपरस्परभेदं चेति भावः। विशेषणद्वयविशिष्टविषयग्रहणद्वयेऽपि विशेषैक्यं कथं न प्रतीयत इत्याह—**तत्रेति**। न हि केवलं चक्षुरैक्यप्रतिपत्तिसमर्थं दृष्टं देवदत्तादिषु, अपि तु संस्कारसंस्कृतमेव समर्थं दृष्टम्। संस्कारस्य विलम्बितभाविलात्र तदानीमैक्यप्रतीतिरित्यर्थः। **चाक्षुषज्ञानं तथैवावतिष्ठत इति**। अगृहीतैकखचन्द्रमात्रविषयमवतिष्ठत इत्यर्थः। **तस्यैवेति** पाठे—चन्द्रमात्रस्यैव ग्राहकतया तिष्ठतीत्यर्थः। एकसामग्रीभूतयोश्चक्षुषोः कथं द्विसामग्रीलमित्याह—**द्वयोश्चक्षुषोरिति**। स्वतो निर्दोषस्येन्द्रियस्य सदोषत्वं हि कार्यकल्प्यं, तथा सामग्रीद्वित्वमपीति भावः। तर्हि सदैव चन्द्रद्वित्वं गृह्येतेत्याह—**अपगतेत्विति**। कथं दोषापगमे ऐक्यप्रतिपत्तिरिति शङ्कायां द्वित्वप्रतिपत्तेरौपाधिकत्वमाह—**दोषकृतमिति। ग्राह्याकारद्वित्वमिति** स्वदेशविशिष्टत्वमेकाकारः, अगृहीतान्तरालं प्रदेशान्तरमेकाकारः तस्याकारत्वं विशेषणत्वम्। न चानाकारस्याकारत्वेनान्यथाख्यानम्: अगृहीतान्तरालत्वे सत्यप्रधानतया भातस्यैव विशेषणत्वात्। नेत्रवृत्तिर्विभक्तिगतद्वित्वं, चन्द्रं चागृहीतमेदं गृह्णातीति प्राभाकराः। यथा संवित्सिद्धौ प्राभाकरमतोपन्यासे—**'नेत्रवृत्तिर्द्विधा भूता द्वे तु वित्ती वितन्विती। द्वित्वं चन्द्रं च युगन्निर्भासयति तत्र न'** इति। देशगतद्वित्वं, चन्द्रं चागृहीतमेदं गृह्णातीति—ततोऽत्र वैषम्यम्। चाक्षुषतेजोगतिभेदरूपसामग्रीद्वयजन्यम्, अतिशैघ्र्यादगृहीतक्रमम्, अगृहीतभेदं च ज्ञानद्वयमगृहीतैकत्वं चन्द्रम्, अगृहीतान्तरालं देशान्तरं च निरन्तरं गृह्णाति, ततो द्विचन्द्रव्यवहार इत्यर्थः। इति निरवद्यं यथार्थख्यातिसमर्थनमित्यर्थः॥

ख्यात्यन्तरदूषणानामन्योन्यमुक्तानां स्वामिमतत्वात्तत्र यत्नाभावमाह—**ख्यातीति**। अथवा **किमनेने**त्यादिपाठो बहुषु कोशेषु दृश्यते, व्याख्यातृभिर्व्याख्यातश्च, तत्र परागर्थविषयापरोक्षभ्रमेष्वेकेनैवोत्तरेण परिहारः कृतो भवति। **किं न सेत्स्यतीत्यनेन प्रमाणेऽस्तिलमुक्तम्। किं नोपपद्यत** इत्यनेन उपपत्तिरुक्ता। कि प्रमाणं, कथमुपपत्तिरित्याह—**भगवता हीति। अखिलं जगत् सृजतेत्यनेनास्यार्थस्य** श्रुतिमूलत्वं सूचितं; कृत्स्नकार्यकारणत्वात् ब्रह्मणः। 'इदं सर्वमसृजते'ति हि श्रुतिः। प्रतीयमानत्वाविशेषात्—इदमपि तत्सृष्टमित्यर्थः। तर्हि **बाध्यबाधकभावव्यवस्था** कथमित्याह—**तत्रेति।**

तद्रहिततया चोपपद्यत इति सर्वं समञ्जसम् । यत्पुनः—सदसदनिर्वचनीयमज्ञानं श्रुतिसिद्धम्–इति, तदसत्; **'अनृतेन हि प्रत्यूढाः'** (छा. ८।३।२) इत्यादिष्वनृतशब्दस्यानिर्वचनीयानभिधायित्वात् । ऋतेतरविषयो ह्यनृतशब्दः । ऋतमिति कर्मवाचि; **'ऋतं पिबन्तौ'** (का. ३।१) **इति वचनात्** । ऋतं कर्म—फलाभिसंधिरहितं परमपुरुषाराधनवेषं तत्प्राप्तिफलम् । अत्र तद्व्यतिरिक्तं सांसारिकफलं कर्मानृतं—ब्रह्मप्राप्तिविरोधि; **'एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः'** (छा. ८।३।२) इति वचनात् । **'नासदासीन्नो सदासीत्तदानीम्'** (तै. ब्रा. २।८।९।३) इत्यत्रापि सदसच्छब्दौ चिदचिद्व्यष्टिविषयौ; उत्पत्तिवेलायां सत्त्यच्छब्दाभिहितयोश्चिदचिद्व्यष्टिभूतयोर्वस्तुनोरप्ययकालेऽचित्समष्टिभूते तमःशब्दाभिधेये वस्तुनि प्रलयप्रतिपादनपरत्वादस्य वाक्यस्य । नात्र कस्यचित्सदसदनिर्वचनीयतोच्यते; सदसतोः कालविशेषेऽसद्भावमात्रवचनात् । अत्र तमःशब्दाभिहितस्याचित्समष्टित्वं श्रुत्यन्तरादवगम्यते—**'अव्यक्तमक्षरे लीयते । अक्षरं तमसि लीयते ।'** (मु. २।४) इति । सत्यं, तमःशब्देनाचित्समष्टिरूपायाः प्रकृतेः सूक्ष्मावस्थोच्यते । तस्यास्तु **'मायां तु प्रकृतिं विद्यात्'** (श्वे. ४।१०)

न हि तत्तदेकपुरुषानुभाव्यानां, तत्तत्कालावसायिनां च सुखादीनां मिथ्यात्वमिति भावः । **इति प्रमाणानुपपत्तौ यथार्थख्यातिः ॥**

अथ श्रुतिस्मृत्यर्थापत्तिभ्यामनिर्वचनीयसिद्धिं दूषयितुं प्रथमं श्रुतिवाक्यानि योजयति—**यत्पुनरिति**[1]**। अनृतेने**त्यादिश्रुतिं व्याचष्टे—**अनृतेनेति** । पूर्वैर्निरस्तप्रकारेणानिर्वचनीयस्याप्रामाणिकत्वात्–तत्र व्युत्पत्तिर्नास्तीति भावः । **अनृत**शब्दं व्याचष्टे—**ऋतेतरविषयो ह्यनृतशब्द इति** । हि शब्देन ऋतेतरविषयत्वसंप्रतिपत्तिः सूचिता । ऋताभावस्य, ऋतविरोधिनश्च ऋतभूतब्रह्माश्रयत्वानुपपत्त्या–तदन्य एव नञर्थस्त्वयापि वक्तव्य इति भावः । **अनृत**शब्दार्थं निष्कृष्टुम् **ऋत**शब्दार्थमाह—**ऋतमितीति** । **कर्मवाचि** पुण्यकर्मवाचीत्यर्थः, न तु सत्यवाचीति भावः । कुत इत्यत्राह—**ऋतं पिबन्ताविति** । अस्मिन्वाक्ये **सुकृतस्य लोक** इति ह्युक्तमिति भावः । एवंविधवाक्यान्तरेषु प्रसिद्धिश्चात्रापेक्षिता । 'यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वाती'त्युक्ता 'एवमनृतादात्मानं जुगुप्से'दिति पुण्यप्रतियोगिन्यनृतशब्दः प्रयुक्तः, तस्मादृतशब्दः पुण्यवाची । पुण्यमपि हि मोक्षविरोधि, तत्कथमनृतशब्दोक्तपापमात्रप्रत्यूढत्वमिति शङ्कायां मोक्षप्रकरणोक्तं पुण्यं विविनक्ति—**ऋतं कर्मेति** । मुमुक्षोः सुकृतं, दुष्कृतमुभयं हि विरोधी इत्यतस्त्रह्यं पापम्, अतो नञ्समासान्तर्गत **ऋत**शब्दोऽनभिसंहितफलकर्मपर इत्यर्थः । **परमपुरुषाराधनवेषं तत्प्राप्तिफल**मित्यनेन 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानव' इत्येतत्सूचितम् । **अनृत**शब्दस्य ब्रह्मप्राप्तिविरोधिपरत्वे सति **ऋत**शब्दस्य बन्धकेतरकर्मवाचित्वसिद्धिरिति–तदर्थं तत्पूर्ववाक्येनोपपादयति—**एतमिति** । **ऋतानृत**शब्दयोः–'एवमनृतादात्मानं जुगुप्से'त्यादिषु श्रुतिषु पुण्यपापपरत्वेन प्रसिद्धत्वात्, 'न सुकृतं न दुष्कृतं, सर्वे पाप्मानोऽतो निवर्तन्ते, क्षीयन्ते चास्य कर्माणी'त्यादिषु सुकृतदुष्कृतयोरुभयोरपि मोक्षविरोधित्वश्रवणात्, मोक्षप्रकरणेषु मुमुक्षोः संसारास्थानिष्टफलप्रदत्वेनोभयोरपि पापशब्दाभिधेयत्वात्, अस्यानृतशब्दवाच्यस्यास्मिन्वाक्य एव ब्रह्मप्राप्तिविरोधित्वश्रवणात्, 'अस्यान्तरायो मैत्रेये'त्यादिषु पुण्यपापकर्मणोः मोक्षविरोधिफलत्वश्रवणात्, अनृतशब्दस्यानिर्वचनीयवाचित्वेन व्युत्पत्त्यभावाच्च–अनृतशब्दस्तदन्यव्युत्पत्त्या मोक्षविरोधिकर्मपर इत्यर्थः । **नासदासीदित्यादि** । अत्र 'अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यत' इति ब्रह्मशब्दवाच्यशुद्धात्मस्वरूपविषयः सदसच्छब्दप्रयोगः प्रतिबन्दीलेनानुसंधेयः । सदसच्छब्दयोश्चिदचिद्व्यष्टिविषयत्वमुपपादयति—**उत्पत्तीति** । उत्पन्नस्य हि प्रलयः, उत्पत्तिश्च चिदचिद्व्यक्त्योः श्रुतिसिद्धा, अतस्तयोरत्र प्रलय उच्यत इत्यर्थः । **सत्त्यच्छब्दाभ्यां सच्च त्यच्चाभव**दिति वाक्यं स्मारितम् । कार्यावस्थचेतनस्य सच्छब्दोक्तत्वात्–इह **सच्छब्देन**, तदन्यवाचकेनासच्छब्देन च कार्यावस्थचेतनाचेतननिषेधः कृतः; वाक्यान्तरैकार्थ्यादित्यर्थः । 'तम आसीत्तमसा गूढ'मिति तदनन्तरवाक्याभिप्रायेण—**अचित्समष्टिभूते तमः शब्दाभिधेये वस्तुनी**त्युक्तम् । हेत्वन्तरं चाह—**सदसतोरिति** । न हि कालविशेषे अनिर्वचनीयमभ्युपगम्यते । अचित्समष्टेस्तमःशब्दवाच्यत्वमुपपादयति—**अत्रेति** । 'तम आसीत्, मायां तु प्रकृति'मित्यनयोर्वाक्ययोः पूर्वक्रमेणोपादानविवक्षां चोद्यरूपेण दर्शयति—**सत्यमिति** । **प्रकृति**शब्दवाच्या

---

१ एतदनन्तरं–तस्या अपि मूलाज्ञानकार्यत्वात् 'श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनन्दन । अनात्मन्यात्मबुद्धिर्या' इति—इत्यधिकं का. मु. पु. दृश्यते । २ व्युत्पत्तिभावाच्च का. मु. पु. ।

इति मायाशब्देनाभिधानादनिर्वचनीयत्वमिति चेन्, नैतदेवम्; मायाशब्दस्यानिर्वचनीयवाचित्वं न दृष्टमिति। मायाशब्यस्य मिथ्यापर्यायत्वेनानिर्वचनीयत्ववाचित्वमिति चेन्, तदपि नास्ति; नहि सर्वत्र मायाशब्दो मिथ्याविषयः; आसुरराक्षसशाम्बरादिषु सत्येष्वेव मायाशब्दप्रयोगात्। यथोक्तम्—**'तेन मायासहस्रं तच्छम्बरस्याशुगामिना। बालस्य रक्षता देहमेकैकस्येन सूदितम्॥'** (वि. पु. १।१९।२०) इति अतो मायाशब्दो विचित्रार्थसर्गकराभिधायी। प्रकृतेश्च मायाशब्दाभिधानं विचित्रार्थसर्गकरत्वादेव। **'अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः॥'** (श्वे. ४।९) इति मायाशब्दवाच्यायाः प्रकृतेर्विचित्रार्थसर्गकरत्वं दर्शयति। परमपुरुषस्य च तद्वत्तामात्रेण मायित्वमुच्यते, नाज्ञत्वेन। जीवस्यैव हि मायया निरोधः श्रूयते—**'तस्मिंश्चान्यो मायया संनिरुद्धः'** (श्वे. ४।९) इति, **'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते।'** (गौ. १।१६) इति च। **'इन्द्रो मायाभिः पुरुरूप ईयते'** (बृ. २।५।१९) इत्यत्रापि विचित्राः शक्तयोऽभिधीयन्ते। अत एव हि **'भूरि त्वष्टेव राजती'**त्युच्यते। न हि मिथ्याभूतः कश्चिद्विराजते **'मम माया दुरत्यया'** (गी. ७।१४) इत्यत्रापि गुणमर्यीति वचनात्सैव त्रिगुणात्मिका प्रकृतिरुच्यत इति—न श्रुतिभिः सदसदनिर्वचनीयाज्ञानप्रतिपादनम्। नाप्यैक्योपदेशानुपपत्त्या; नहि **'तत्त्वमसि'** (छा. ६।८।७) इति जीवपरयोरैक्योपदेशे सति सर्वज्ञसत्यसंकल्पे सकलजगत्सर्गस्थितिविनाशहेतुभूते तच्छब्दावगते प्रकृते ब्रह्मणि विरुद्धाज्ञानपरिकल्पनाहेतुभूते काचिदप्यनुपपत्तिर्दृश्यते। ऐक्योपदेशस्तु त्वंशब्देनापि जीवशरीरकस्य ब्रह्मण एवाभिधानादुपपन्नतरः। **'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि'** (छा. ६।३।२)

मायेत्यभिप्रायः। परिहरति—**नैतदेवमिति**। कुत इत्यत्राह—**मायेति**। **इति**हेतौ। **माया**शब्दवाच्या प्रकृतिरित्यभिप्रायः। ऐन्द्रजालिकादिषु मायाविलशब्दप्रयोगदर्शनात्, माया–मिथ्याशब्दयोः पर्यायत्वात्, अनिर्वाच्यस्य मिथ्यात्वाच्च—मायाशब्दवाच्यत्वमित्यभिप्रायेण शङ्कते—**मायेति**। परिहरति—**तदपि नास्तीति**। **माया**शब्दस्य मिथ्यापर्यायत्वमेव नास्ति, तथाभ्युपगमेऽपि अन्यथाख्यातिभेदाग्रहणयोरन्यतरेणैवोपपन्नत्वात्–न तद्विषयत्वं युक्तमिति–अनिर्वचनीयवाचित्वं नास्तीति भावः। तदुपपादयति—**न हीति**। **माया**शब्दप्रयोगविषयेषु सर्वेषु मिथ्याज्ञाननिवृत्तेरित्यर्थः। सत्येषु **माया**शब्दप्रयोगं दर्शयति—**यथोक्तमिति**। नहि ज्ञानबाध्यानामेकैकशः शस्त्रच्छेद्यत्वमस्ति, तस्मादेकैकशो मायानां च्छेद्यत्ववचनात्–**माया**शब्दस्य सत्यपरत्वमिति–अनुयायिन एव प्रवृत्तिनिमित्तत्वान्**माया**शब्दप्रयोगविषयेषु सर्वेष्वनुगतमाश्चर्यत्वमेव मायाशब्दप्रवृत्तिनिमित्तमित्याह—**अत इति**। **आश्चर्यत्वं** विस्मयनीयत्वं, तच्च विचित्रार्थसर्गकरत्वात्। **विचित्र**शब्दो नानाविधवाची, नानाविधकार्यकरत्वात्प्रकृतेर्विस्मयनीयत्वम्। **मायाशब्दो ह्याश्चर्यवाची**ति हि वक्ष्यते, तस्मादाश्चर्यत्वमेव प्रवृत्तिनिमित्तम्। असत्येषु, सत्येष्वपि **माया**शब्दप्रयोगविषयेष्वाश्चर्यत्वं विद्यते, प्रकृतेराश्चर्यत्वमेव मायाशब्दाभिधेयत्वनिबन्धनमित्याह—**प्रकृतेरिति**। तदुपपादयति—**अस्मादिति**। विचित्रकार्यकरत्वात्प्रकृतेराश्चर्यरूपत्वमिति—न **मायामात्र**सूत्रविषयभाष्यविरोधः। एवं **माया**शब्दार्थं उक्तः, अथ भगवतो मायासंबन्धश्रवणात्तद्दृश्यत्वशङ्काव्युदासाय **मायी**तिपदगतमत्वर्थीयप्रत्ययार्थमाह—**परमपुरुषस्य चेति**। **मायी**तिपदोक्तो मायासम्बन्धो न तत्तिरोभाव्यत्वम्, अपि तु तच्छेषित्वं, जीवस्यैव तु तत्तिरोधेयत्वं; तस्यैव तथात्वश्रवणादित्यर्थः। मायाभिभवो जीवस्यैवेत्यस्मिन्नर्थे परोक्तमेव वचनमाह—**अनादीति**। **इन्द्रो मायाभि**रित्यत्र अनेकविचित्रशक्त्यभिधायित्वं बहुवचनादवगम्यते। **ममेति**। स्पष्टम्। **निगमयति इतीति**। **माया**शब्दस्य मिथ्याभूतविषयेषु प्रयोगो दृश्यते चेत्, तत्र लाक्षणिकः स्यात्; **अर्थस्य** सत्यलाभावेन तस्याश्चर्यत्वाभावात्। प्रतिभासस्तु द्वित्वादिविषयत्वादाश्चर्यरूपः, मन्त्रौषधादिष्वाश्चर्यरूप इति—तत्सम्बन्धाल्लाक्षणिकत्वम्॥

अथ श्रुत्यर्थापत्त्या अनिर्वचनीयसिद्धिं दूषयति—**नापीति**। प्रतिज्ञातमुपपादयति—**नहीति**। अज्ञानापरिकल्पनेऽनुपपत्तिर्नास्ति, तत्कल्पनैवानुपपत्तिः; विरुद्धधर्मश्रवणादित्यभिप्रायेण—तच्छब्दावगतविशेषणान्युक्तानि। समानविभक्तिश्रुतितिरुक्तया **ह्यैक्यापरित्यागः**, तथा **श्रुतहानस्यान्याय्यत्वात्तच्छब्दावगतविशेषाः** स्वीकार्या इति भावः। ऐक्योपदेशानुपपत्तिरिति चेत्, तत्राह—**ऐक्येति**। जीवपरयोर्हेयसंबन्ध–तदनर्हत्वाभ्यां **ह्यैक्य**विरोधः। जीवशरीरकस्य परमात्मन ऐक्याभिधाने–हेयसंबन्धस्य जीवद्वारकतया विरोधः परिहृत इत्यर्थः। **उपपन्नतरः** मुख्यतयोपपन्न इति भावः। जीववाचिश-

इति सर्वस्य वस्तुनः परमात्मपर्यन्तस्यैव हि नामरूपभाक्त्वमुक्तम्। अतो न ब्रह्माज्ञानपरिकल्पनम्। इतिहासपुराणयोरपि न ब्रह्माज्ञानवादाः क्वचिदपि दृश्यते। ननु—**'ज्योतींषि विष्णुः'** (वि. पु. २।१२।३८) इति ब्रह्मैकमेव तत्त्वमिति प्रतिज्ञाय, **'ज्ञानस्वरूपो भगवान्यतोऽसौ'** (वि. पु.२।१२।३९) इति शैलाब्धिधरादिभेदभिन्नस्य जगतो ज्ञानैकस्वरूपब्रह्माज्ञानविजृम्भितत्वमेवामिधाय, **'यदा तु शुद्धं निजरूपि'** (वि. पु. २।१२।४०) इति ज्ञानस्वरूपस्यैव ब्रह्मणः स्वस्वरूपावस्थितिवेलायां वस्तुभेदाभावदर्शनेनाज्ञानविजृम्भितत्वमेव स्थिरीकृत्य, **'वस्त्वस्ति किम्'** (वि. पु. २।१२।४१) **'मही घटत्वम्'** (वि. पु. २।१२।४२) इति श्लोकद्वयेन जगदुपलब्धिप्रकारेणापि वस्तुभेदानामसत्यत्वमुपपाद्य **'तस्मान्न विज्ञानमृते'** (वि. पु. २।१२।४३) इति प्रतिज्ञातं ब्रह्मव्यतिरिक्तस्यासत्यत्वमुपसंहृत्य, **'विज्ञानमेकम्'** (वि. पु. २।१२।४३) इति ज्ञानस्वरूपे ब्रह्मणि भेददर्शननिमित्ताज्ञानमूलं निजकर्मैवेति स्फुटीकृत्य, **'ज्ञानं विशुद्धम्'** (वि. पु. २।१२।४४) इति ज्ञानस्वरूपस्य ब्रह्मणः स्वरूपं विशोध्य **'सद्भाव एवं भवतो मयोक्तः'** (वि. २।१२।४५) इति ज्ञानस्वरूपस्य ब्रह्मण एव सत्यत्वं नान्यस्य, अन्यस्य चासत्यत्वमेव, तस्य भुवनादेः सत्यत्वं व्यावहारिकमिति तत्त्वं तवोपदिष्ट-

---

क्देन तच्छरीरकपरब्रह्माभिधानममुख्यमिति चेत्, तत्राह—**अनेनेति**। श्रुत्यर्थापत्त्यसिद्धिं निगमयति—**अत इति**। **इति प्रमाणानुपपत्तौ—अविद्यायाः श्रुतितदर्थापत्तिसिद्धत्वनिरासः॥**

इतिहासपुराणयोर्ब्रह्माज्ञानपरत्वाभावं प्रतिजानीते—**इतिहासेति। नन्वित्यादि। ब्रह्मैकमेव तत्त्वमिति प्रतिज्ञायेति**। जडाजडयोः स्वरूपैक्ययोगेन—सामानाधिकरण्यस्य बाधार्थत्वात्, उत्तरश्लोकेषु तद्व्यतिरिक्तस्य मिथ्यात्वकथनाच्च—इत्यभिप्रायः। **विज्ञानविजृम्भितानि** विविधं ज्ञायते येन, विपरीतं ज्ञायते येन इति वा, करणे व्युत्पत्तिः। **विज्ञानमविद्या**; 'यदा तु शुद्ध'मित्यादिना तस्य हि व्यतिरेको वक्ष्यते। **विज्ञानेन विजृम्भितानीति** योजनात्प्रयुक्ता; अस्वारस्यात्; **विजृम्भितानी**ति नपुंसकान्तपदस्य पुंलिङ्गभेदशब्दविशेषणत्वायोगेन, विजृम्भितशब्दस्य भावार्थप्रत्ययान्तत्वेन कृत्वेन षष्ठीसमासस्य युक्तत्वाच्च। ब्रह्मव्यतिरिक्तस्याविद्यापरिकल्पितत्वं व्यतिरेकमुखेन स्थिरीकरोतीत्याह—**यदात्विति। शुद्धम्** अविद्यारहितम्। **निजरूपि** तत्कृतभेददर्शनरहितम्। **अपास्तदोषं** रागादिदोषरहितम्। **सङ्कल्परोः** समन्तात्कल्प्यतेऽनेनेति सङ्कल्पः दोषः। **वस्तुषु वस्तुभेदा** इत्यत्र वस्तुष्विति बहुवचने न तात्पर्यं, जडोपलक्षिते वस्तुनि जडगतभेदा न संभवन्तीत्यर्थः। यद्वा, एको **वस्तु**शब्द आकारपरः, जडगताकारभेदा न भवन्तीत्यर्थः। **वस्त्वस्ति किं, महीघटत्वमि**ति। श्लोकद्वये प्रथमेनार्थस्वभाव उक्तः, द्वितीयेनोदाहरणं दर्शितमिति भिदा। तत्र कुतो हि तत्त्वम्, एवं सति कुतः परमार्थ इत्यर्थः। कृत्स्नमपरमार्थत्वेनोपलब्धं चेत्कथं तत्र प्रामाण्यमिति शङ्कायाम्, उच्यते—**स्वकर्मस्तिमितात्मनिश्चयैरिति**। तत्त्वार्थनिश्चयविरोधिकर्मवशादित्यर्थः। यद्वा, न केवलमात्मविद्भिरेवासत्यत्वमुपलभ्यते, अपि त्वज्ञैरपीति भावः। न केवलं शास्त्रप्रमाणेन, लौकिकजडग्राहिप्रमाणेनापि तस्य मिथ्यात्वं सिध्यतीत्युक्तं भवति। **तस्माच्च विज्ञानमृत** इति श्लोकार्धमनात्मभूतविजातीयभेदनिषेधमुपसंहरतीत्याह—**तस्मादिति। विज्ञानमेकमि**त्यर्धं सजातीयरूपात्मभेदनिषेधपरम्। **भेददर्शननिमित्ताज्ञानमूलं निजकर्मैवेतीति। भेददर्शनं** सजातीयभेददर्शनं, तदुत्तरोत्तरभाविकार्याज्ञानहेतुः, तस्यापि पूर्वकर्मैवेत्यर्थः। यो देवादिशरीरभेदहेतुः **स एवेत्येव**कारार्थप्रायः। यद्वा, देवादिशरीरभेदप्रतीतिहेतु**काज्ञान**मात्मनि देवत्वाद्याकारारोपणरूपं, तस्य हेतुः कर्मैवेत्यर्थः। अनात्मन्यात्मबुद्धेरपि अज्ञानशब्दवाच्यत्वं युक्तं; तस्या अपि मूलाज्ञानकार्यत्वात्, 'श्रूयतां चाप्यविद्यायाः स्वरूपं कुलनन्दन। अनात्मन्यात्मबुद्धिर्यै'रिति तस्या अज्ञानपर्यायाविद्याशब्दवाच्यत्वाच्च। **ज्ञानं विशुद्धम**िति स्वगतभेदनिषेधः। **विशुद्धं विमल**मिति अविद्यातत्कृतभेददर्शनरहितमित्यर्थः। तत्कृतशोकादिरहितमित्याह—**विशोकमिति। एकं सदैकमि**ति सजातीयविजातीयभेदविरहानुवादः। यद्वा, **एक**मिति सजातीयभेदनिषेधानुवादः। **सदैक**मित्युक्तप्रकारेण स्वगतभेदराहित्यमुच्यते। परमपरेशादिशब्दवाच्यं चिन्मात्रमेवेत्याह—**परम इति**। नेदं परमतं तत्त्वमेवोक्तमित्याह—**सद्भाव इति। संव्यवहारभूतं** समन्ताद्व्यवहारार्हभेदम्। **भुवनाश्रितं** भुवनेनाधिष्ठानतयाश्रितमेवैतद्वर्तते। तत्रापि हेतुरज्ञानमेवोक्तमित्यर्थः। यद्वा, **भुवनाश्रितं** भुवनमाश्रितं, **संव्यवहारभूतं** व्यावहारिकम्। एतल्लोकसिद्धं सत्यत्वं यत् तत्रापि कारणमविद्येत्युक्तमित्यर्थः। एतदभिप्रायेणहि. **तस्य भुवनादेः सत्यत्वं व्यावहारिक**मितीत्युक्तम्। **इति ह्युपदेशो दृश्यत इति**। तस्मादितिहासपुराणयोर्ब्रह्माज्ञानवादो दृश्यत इति वक्तुं न शक्यमित्यर्थः॥

मितिह्युपदेशो दृश्यते, नैतदेवम्; अत्र भुवनकोशस्य विस्तीर्णं स्वरूपमुक्त्वा, पूर्वमनुक्तं रूपान्तरं संक्षेपतः श्रूयतामित्यारभ्यामिधीयते । चिदचिन्मिश्रे जगति चिदंशो वाङ्मनसागोचरस्वसंवेद्यस्वरूपभेदो ह्यनैकाकारतयाऽस्पृष्टप्राकृतभेदोऽविनाशित्वेनास्तिशब्दवाच्यः । अचिदंशस्तु चिदंशकर्मनिमित्तपरिणामभेदो विनाशीति नास्तिशब्दाभिधेयः । उभयं तु परब्रह्मभूतवासुदेवशरीरतया तदात्मकमित्येतद्रूपं संक्षेपेणात्राभिहितम् । तथा हि—'यदम्बु वैष्णवः कायस्ततो विप्र वसुंधरा । पद्माकारा समुद्भूता पर्वताब्ध्यादिसंयुता ॥ (वि. पु. २।१२।३७) इत्यम्बुनो विष्णुशरीरत्वेनाम्बुपरिणामभूतं ब्रह्माण्डमपि विष्णोः कायस्तस्य च विष्णुरात्मेति सकलश्रुतिगततादात्म्योपदेशोपबृंहणरूपस्य सामानाधि-

एतन्प्रतिक्षिपति—**नैतदेवमित्यादिना** । **नैतत्** चिन्मात्रब्रह्मणोऽविद्यासंबन्धित्वम्, अविद्याकल्पितत्वेन प्रपञ्चस्य मिथ्यात्वं च यदुक्तं—न तन्प्रामाणिकमित्यर्थः । तथासत्यर्थविरोधात्, प्रकरणविरोधात्, शास्त्रतात्पर्यविरोधात्, **अशेषमूर्तिर्भगवान्**नित्यादिपदाना लाक्षणिकत्वात्, प्रपञ्चधर्मिग्राहकप्रमाणविरोधात्, श्रुतेः सविशेषवस्तुपरत्वोपपादने स्मृतेस्तद्विरुद्धार्थपरत्वापातात्, पूर्वोक्तनर्कविरोधाच्च—तदभावः । अत्रार्थविरोधोनाम—सर्वज्ञत्वादिगुणकस्याज्ञानादिप्रसक्तिविरोधः, अविद्याया आश्रयतिरोधानाद्यनुपपत्तिश्च । प्रपञ्चस्य विस्तरेण प्रतिपादनवैयर्थ्यं प्रकरणविरोधः । अन्यत्तु सृष्टं दशश्लोक्याम् । अस्ति नास्ति-सत्यासत्य-ज्ञानाज्ञानादिशब्दा आत्मानात्मविषया इति नात्र विगानम् । तत्र नास्त्यसत्यशब्दयोः किं ज्ञानबाध्यत्वं प्रवृत्तिनिमित्तम्, उत परिणामित्वम्—इति विचारे—परिणामित्वपक्षे स्वारस्यमस्ति; महीघटत्वमित्युपपादनात् । **अज्ञान**शब्दस्य च नानिर्वचनीयपरत्वम्, अपि तु कर्मपरत्वमेव; 'यज्ञः पशु'रित्यादिस्वारस्यात्, अन्यत्र 'शरीराकृतिभेदास्तु भूपैते कर्मयोनयः । अविद्या कर्मसंज्ञाऽन्या बाह्यकर्मवृतिप्रज' इत्यादिवचनाच्च । चिदचिद्विवेकोऽत्र क्रियत इत्यभिप्रेत्य तदनुगुणसङ्गतिमाह—**अत्रेति** । **अत्र** अस्मिन् द्वितीयांशे । **विस्तीर्णं**मिति स्वरूपविशेषणम् । **विस्तीर्ण**शब्देन स्थौल्यं विवक्षितम् । संसृष्टस्थूलरूपमुक्त्वा, वियुक्तं सूक्ष्मरूपमुच्यत इति भावः यद्वा, **विस्तीर्ण**मिति क्रियाविशेषणम्; उत्तरत्र मिथ्यात्वं विवक्षितं चेत् पूर्वं विस्तरेण कथनमनुपपन्नम् । नहि पूर्वमेव भ्रान्तस्य भ्रमान्तरापादनं कार्यं, तस्मात्पूर्वं विस्तरेण भुवनकोशस्य कथितत्वान्न मिथ्यात्वं वक्ष्यत इति भावः । वक्ष्यमाणमादिभरतचरितं हृत्स्थं विस्तररूपं तत्संक्षेपश्चायं वक्ष्यमाणसंक्षेपः, उक्तसंक्षेपश्च दृश्यते, अत उक्तसंक्षेपशङ्काव्यावृत्त्यर्थमाह—**अनुक्तमिति** । अनुक्तं संसृष्टरूपान्तरं कथ्यत इति शङ्काव्यावृत्त्यर्थमाह—**रूपान्तरमिति** । वियुक्तमित्यर्थः । मिथ्यात्वव्यतिरेकेण वक्तव्यं रूपान्तरं सकलमुक्तं, तस्मादनुक्तं वक्तव्यं रूपान्तरं नाम मिथ्यात्वं, नान्यदिति शङ्कायां, मिथ्यात्वं विनाऽनुक्तं रूपान्तरमाह—**चिदचिन्मिश्र इति । चिदचिन्मिश्रे जगती**त्यनेन संक्षेपः । **श्रूयतां पुन**रित्यत्र **पुनः**शब्दो व्याख्यातो भवति । चिदचिदात्मके जगति स्थूलरूपत्वमुक्तं तत्रैव जगतीदमपि रूपान्तरं पुनरुच्यते—इति तस्यार्थः । **सत्तामात्रमगोचरं, वचसामात्मसंवेद्यम्** इत्यादिवाक्योक्तं विशेषणमाह—**चिदंशो वाङ्मनसेति । द्वैतिनोऽतथ्यदर्शिन** इत्यादिवाक्यानां भेदनिषेधपराणामर्थं हृदि निधायाह—**अस्पृष्टेति** । यदि चिदंशस्य ज्ञानैकाकारत्वम्, अचिदंशस्य परिणामास्पदत्वं च विवक्षितं, तर्हि—अस्तिनास्ति-सत्यासत्यादिशब्दप्रवृत्तिनिमित्तत्वेन किमर्थमुक्तमिति चेत्, उच्यते—शाखाविशेषे-'सच्च त्यच्चाभवत्, विज्ञानं चाविज्ञानं च, सत्यं चानृतं च सत्यमभवत्' इत्यादिवाक्येषु अस्तिनास्ति-सत्यासत्यादिशब्दानां श्रूयमाणानाम्, अनधीतशाखागतानां च—किं ज्ञानबाध्यत्वाबाध्यत्वे प्रवृत्तिनिमित्तभूते, उत परिणामित्वापरिणामित्वे—इति शङ्कां निराकर्तुं—परिणामित्वापरिणामित्वे एव नास्त्यस्त्यादिशब्दार्थः, न तु ज्ञानबाध्यत्वाबाध्यत्वे इत्यधीतानधीतशाखार्थज्ञापनार्थमिति । पृथिव्यादितत्त्वाना सङ्घातविशेषावस्थायामेव जीवं प्रति शरीरत्वं दृष्टं, न त्वेकैकस्य, मनुष्यादिशरीराणामपि तादृशपिण्डावस्थायामेव शरीरत्वं दृष्टं, न भस्मादवस्थायामिति—चिदचितोः प्रत्येकमवस्थाविशेषेषु भगवच्छरीरत्वाभावशङ्काव्यावृत्त्यर्थमाह—**उभयमिति** । चिदचिद्रूपमन्योन्यसंसृष्टं, निष्कृष्टं च भगवच्छरीरमित्यर्थः । निष्कृष्टस्य भगवच्छरीरत्वप्रतिपादनात्-भगवन्तं प्रति शरीरत्वस्य निरुपाधिकतया—स्वरूपप्रयुक्तत्वं फलितमिति—मुक्तावस्थायामपि जीवस्य भगवच्छरीरत्वसिद्धिः । **एतद्रूपम**यमाकार इत्यर्थः ॥ एतदुपपादयति—**तथाहीत्यादिना** । दशश्लोक्यां न भगवदात्मकत्वमसाधारणं प्रतिपाद्यं; तत्तु सर्वप्रकरणसाधारणम्, असाधारणप्रतिपाद्यं तु प्रकृतिपुरुषविवेक एव; शास्त्रस्योपनिषदर्थोपबृंहणपरत्वात् । सांख्यादिमतव्यावृत्त्यर्थं सर्वप्रकरणेषु भगवदात्मकत्वमुच्यते, **अत्रासाधारण**प्रतिपाद्यप्रकृतिपुरुषविवेक एवेत्यभिप्रायेण हि—**पूर्वमनुक्तं रूपान्तर**मित्युक्तम् । भगवदात्मकत्वस्य सर्वप्रकरणसाधारण्यं हि **पूर्वमप्येतदसकृदुक्त**मिति उत्तरत्र च वक्ष्यते । दशश्लोकीस्थसामानाधिकरण्यं शरीरात्मभावनिबन्धनमिति ज्ञापयितुं पूर्वश्लोकमुपादत्ते—**यदम्ब्वि**ति । ऋषिणाऽभिप्रेतं फलितमर्थमाह—**अम्बुनो विष्णोरिति** । नहि बाल्यावस्थायां शरीरभूतस्य वस्तुनोऽवस्थान्तरे चेतनेन स्वरूपैक्यमस्ति, अपि तु सर्वावस्थमपि तद्वस्तु शरीरमेवेति भावः । **तस्य च विष्णुरात्मेतीति** । अभिप्रेत्येत्यर्थः । एवंरूपशरीरात्मभाव इति वार्थः । **सकलश्रुतिगततादात्म्योपदेशोपबृंहणरूप-**

करण्यस्य **'ज्योतींषि विष्णुर्भुवनानि विष्णुः'** (वि. पु. २।१२।३८) इत्यारभ्य वक्ष्यमाणस्य शरीरात्मभाव एव निबन्धनमित्याह । अस्मिञ्छास्त्रे पूर्वमप्येतदसकृदुक्तम् । **'तानि सर्वाणि तद्वपुः'** (वि. पु. १।२२।८४) । **'तत्सर्वं वै हरेस्तनुः ।'** (वि. पु. १।२२।३७) **'स एव सर्वभूतात्मा विश्वरूपो यतोव्ययः'** (वि. पु. १।२।६८) इति । तदिदं शरीरात्मभावायत्तं तादात्म्यं सामानाधिकरण्येन व्यपदिश्यते **'ज्योतींषि विष्णुः'** (वि. पु. २।१२।३८) इति । अत्रास्त्यात्मकं, नास्त्यात्मकं च जगदन्तर्गतं वस्तु विष्णोः कायतया विष्ण्वात्मकमित्युक्तम् । इदमस्त्यात्मकमिदं नास्त्यात्मकमस्य च नास्त्यात्मकत्वे हेतुरयमित्याह—**'ज्ञानस्वरूपो भगवान्यतोऽसौ'** (वि. पु. १।१२।३९) इति । अशेषक्षेत्रज्ञात्मनावस्थितस्य भगवतो ज्ञानमेव स्वाभाविकं रूपम्, न देवमनुष्यादिवस्तुरूपम् । यत एवं तत एवाचिद्रूपदेवमनुष्यशैलाब्धिधरादयश्च तद्विज्ञानविजृम्भिताः—तस्य ज्ञानैकाकारस्य सतो देवाद्याकारेण स्वात्मवैविध्यानुसंधानमूलाः, देवाद्याकारानुसंधानमूलकर्ममूला इत्यर्थः । यतश्चाचिद्वस्तु

स्येति । अनधीतशाखास्वपि तादात्म्योपदेशोऽस्ति तस्यायमेवार्थ इति ज्ञापनं **तादात्म्योपदेशस्योपबृंहणम्** । यद्वा, प्रत्यक्षसकलश्रुतिगततादात्म्योपदेशोपबृंहणं नाम—अनधीतशाखासु तद्विरुद्धार्थप्रतिपादनं नास्तीति ज्ञापनम् । अत्र **इति**—शब्दत्रयस्थानेन श्लोकेन भगवानिममर्थमभिप्रेत्यायमर्थ इत्याहेत्यन्वयप्रकारः । न केवलमत्र समष्टिसृष्टिश्लोकगतव्यधिकरणनिर्देशेन व्यष्टिश्लोकगतसामानाधिकरण्यं शरीरशरीरिभावनिबन्धनमिति विज्ञायते, अपि तु प्रदेशान्तरेषु व्यष्ट्यवस्थानां भगवन्तं प्रतिशरीरत्वं, सामानाधिकरण्यस्य शरीरशरीरिभावनिबन्धनत्वं चासकृत्कण्ठोक्तमित्याह—**अस्मिन्निति** । शरीरात्मभावस्य सामानाधिकरण्यहेतुत्वं कण्ठोक्तं—**विश्वरूपो यतोऽव्यय इति** । तथान्यत्रापि—**सर्वगत्वादनन्तस्य, स एवाहं, सर्वं समाप्नोषि ततोऽसि सर्वः** इत्यादि द्रष्टव्यम् । **तदिद**मित्यादिना **ज्योतींषी**त्यादिश्लोके पादत्रयस्यार्थ उच्यते । संसृष्टस्य भगवदात्मकत्वमुक्तमित्यर्थः । 'प्रधानादिविशेषान्तं चेतनाचेतनात्मक'मित्युक्तत्वात्—**ज्योति**रित्यादिशब्दाः संसृष्टजीववाचिनः । अथोत्तरश्लोकसङ्गत्यर्थं विशिष्टवाक्यार्थानुवादेन चतुर्थपादार्थं दर्शयति—**अत्रास्त्यात्मकमिति । यदम्बु**त्यादिश्लोकेन वैयधिकरण्येन समष्ट्यवस्थचिदचितोर्भगवदात्मकत्वमुक्तम् । व्यष्ट्यवस्थयोरसंसृष्टयोः संसृष्टयोरपि तयोः सामानाधिकरण्येन भगवदात्मकत्वमुच्यते **ज्योतींषी**त्यादिना श्लोकेन । तत्र पादत्रयेण व्यष्ट्यवस्थयोः संसृष्टयोः तदात्मकत्वमुक्तं, चतुर्थपादेन तु निष्कृष्टयोरपि तदात्मकत्वमुक्तमित्यर्थः । अनन्तरश्लोकमवतारयति—**इदमिति** । अचिदंशस्य नास्त्यात्मकत्वनिबन्धनमेव तात्पर्यविषयः । अचिदंशस्य हि मिथ्यात्वशङ्का व्युदसनीया, अतस्तस्य परिणामित्वात्—नास्त्यात्मकत्व एव तात्पर्यं, चिदंशस्य त्वपरिणामित्वादस्त्यात्मकत्वं फलितं स्यादित्यभिप्रायेण **अस्य च नास्त्यात्मकत्वे हेतुरयमित्याहे**त्युक्तम् । व्याख्येये प्रतीकमुपादत्ते—**ज्ञानस्वरूप इति** । अत्र **ज्ञानस्वरूपो भगवा**निति सामानाधिकरण्यस्य शरीरशरीरिभावनिबन्धनत्वं न केवलं पूर्वश्लोके **यदम्बु वैष्णवः काय** इत्युक्तत्वादवगम्यते, अस्मिन्नपि श्लोके **अशेषमूर्ति**रित्यनेनापि ज्ञायत इत्यभिप्रायेण व्याचष्टे—**अशेषेति । अशेष**शब्देनाचितोऽपि विवक्षितत्वे—भगवन्तं प्रति तस्य मूर्तित्वं विहितं स्यात्; अप्राप्तत्वात्, ततश्च **न तु वस्तुभूत** इति देवमनुष्यशैलाब्धिधरादिवस्तुभावनिषेधोऽनुपपन्नः, अतोऽशेषशब्दः क्षेत्रज्ञविषय इत्यभिप्रायेण—**अशेषक्षेत्रज्ञात्मने**त्युक्तम् । अत्र **ज्ञानस्वरूपादि**शब्दानां परमविशेष्यपर्यन्तामिधायित्वेऽपि विशेषणविशेषणे वाक्यस्य तात्पर्यम्, अतो ज्ञानस्वरूपत्वं विशेषणभूतजीवस्यैव विधीयते—यथा 'लोहितोष्णीषा ऋत्विजः प्रचरन्ती'त्यत्र विशेषणगतं लौहित्यमेव विधेयं, परम्परया ऋत्विक्प्रचारकर्मविशेषणं—तद्वत् । 'काठिन्यवान् यो बिभर्ति, नृसिंहमूर्तिर्भगवान् श्वेत' इत्याद्युदाहरणं द्रष्टव्यम् । **ज्ञानस्वरूप** इत्र दिव्यात्मस्वरूपस्य ज्ञानस्वरूपत्वमुच्यत इति शङ्कनीयं; **सर्वकर्मक्षये ज्ञानमपास्तदोष**मिति विवरणानुपपत्तेः । नहि दिव्यात्मस्वरूपस्य कर्मतत्कृतरागद्वेषादिहेयसंबन्धप्रसङ्गः । न तु वस्तुभूत इत्यस्यार्थमाह—**न देवमनुष्यादीति** । शैलादिस्थावरोक्तिः सर्वशरीराणामुपलक्षणमिति ज्ञापनार्थो **देवमनुष्यादि**शब्दः । उत्तरार्धं व्याचष्टे—**यत एवमिति । शैलाब्धिधरादिमेदान् विज्ञानविजृम्भितानि जानीही**त्यनेन फलितं हेतुहेतुमद्भावं विवृणोति—**तद्विज्ञानेत्यादिना । विज्ञान**शब्दं व्याचष्टे—**तस्येति । विज्ञानं** विविधज्ञानम् । कथं शैलाब्धिधरादिमेदस्य वैविध्यानुसंधानमूलत्वं; निजकर्ममेदविभिन्नचित्तैः सर्वैकर्मक्षये इति कर्ममूलत्वेन वक्ष्यमाणत्वात्—कर्मैव हि मूलमित्यत्राह—**देवादीति** । वैविध्यानुसंधानस्य देवादिमेदहेतुत्वं सद्वारकम्; उपरितनग्रन्थैकार्थ्यात्, 'अविद्यासंज्ञितं कर्म, बाह्यकर्मेतृतिप्रजः, भूपैते कर्मयोनयः' इत्यादिवचनान्तरावलेयर्थः । **पूर्वमिदमस्त्यात्मकमित्यादिनोक्तश्लोकवाक्यार्थः कथं घटत** इत्यत्राह—**यतश्चेति । ज्ञानस्वरूपः, विज्ञानविजृम्भितानी**त्यनेन फलि-

क्षेत्रज्ञकर्मानुगुणं परिणामास्पदं ततस्तन्नास्तिशब्दाभिधेयम्, इतरदस्तिशब्दाभिधेयमित्यर्थादुक्तं भवति । तदेव विवृणोति—**'यदा तु शुद्धं निजरूपि'** (वि. पु. २।१२।४०) इति । यदैतज्ज्ञानैकाकारमात्मवस्तु देवाद्याकारेण स्वात्मनि वैविध्यानुसंधानमूलसर्वकर्मक्षयान्निर्दोषं परिशुद्धं निजरूपि भवति, तदा देवाद्याकारेणैकीकृत्यात्मकल्पनामूलकर्मफलभूतास्तद्भोगार्था वस्तुषु वस्तुभेदा न भवन्ति । ये देवादिषु वस्तुष्वात्मतयाभिमतेषु भोग्यभूता देवमनुष्यशैलाब्धिधरादिवस्तुभेदास्ते तन्मूलभूतकर्मसु विनष्टेषु न भवन्तीति—अचिद्वस्तुनः कादाचित्कावस्थाविशेषयोगितया नास्तिशब्दाभिधेयत्वम्, इतरस्य सर्वदा निजसिद्धज्ञानैकाकारत्वेनास्तिशब्दाभिधेयत्वमित्यर्थः । प्रतिक्षणमन्यथाभूततया—कादाचित्कावस्थायोगिनोऽचिद्वस्तुनो नास्तिशब्दाभिधेयत्वमेवेत्याह—**वस्त्वस्ति किम्'** (वि. पु. २।१२।४१) इति। अस्तिशब्दाभिधेयो ह्यादिमध्यपर्यन्तहीनः सततैकरूपः पदार्थः; तस्य कदाचिदपि नास्तिवुद्ध्यनर्हत्वात् । अचिद्वस्तु किंचित्कचिदपि तथाभूतं न दृष्टचरम् । ततः किमित्यत्राह—**'यच्चान्यथात्वम्'** (वि. पु. २।१२।४१) इति । यद्वस्तु प्रतिक्षणमन्यथात्वं याति तदुत्तरोत्तरावस्थाप्राप्त्या पूर्वपूर्वावस्थां जहातीति—तस्य पूर्वावस्थस्योत्तरावस्थायां न प्रतिसंधानमस्ति । अतः सर्वदा तस्य नास्तिशब्दाभिधेयत्वमेव ।

तमित्यर्थः । **तदेवेति** । पूर्वपक्षयोजनायामुक्तेष्वर्थेष्वपेक्षितांशोपजीवनेन सिद्धान्तयोजना क्रियते, विज्ञानविजृम्भितत्वमेव व्यतिरेकमुखेन विवृणोतीत्यर्थः । पूर्वश्लोके देवादिभेदानां स्वात्मवैविध्यानुसंधानमूलत्वं सद्वारकमिति व्याख्यानम्, अनन्तरश्लोके व्यतिरेकमुखेन विवरणे कर्महेतुत्वं श्रवणनिबन्धनमिति सष्टयन्नाह—**देवाद्याकारेणेति । निर्दोषमि**त्यादिपदानामर्थविभागो **ज्ञानं विशुद्धमि**त्यादिश्लोकव्याख्याने विशदयिष्यत इति–ग्रन्थलाघवार्थमत्र न विस्तृतः । **निर्दोषं** शरीरसंबन्धरहितम् । **परिशुद्धं** तत्कृतरागद्वेषमुखदुःखादिरहितम् । **निजरूपि** आविर्भूतस्वरूपम् । **सङ्कल्पशब्दं व्याचष्टे—एकीकृत्यात्मकल्पनशब्देन** । सम्मित्येकीकार इति हि शाब्दाः । पूर्ववत्सद्वारकमिति व्याचष्टे—**आत्मकल्पनामूलकर्मफलभूता इति** । देहात्मनोरेकीकृत्यानुसन्धानफलं देवाद्याकारेण स्वात्मवैविध्यानुसन्धानं, तयोरेकैकं **विज्ञान**शब्दे, **सङ्कल्प**शब्देप्यर्थसिद्धम् । सुखदुःखे हि कर्मफले तत्कथं वस्तुभेदस्य कर्मफलत्वमिति शङ्कायां—**तद्भोगार्था** इत्युक्तम् । सुखादिभोगद्वारभूतत्वात्–देवादिभेदाः कर्मफलमित्यर्थः । 'भोक्ता भोग्यं प्रेरितारं च मत्वे'त्यादिषु **भोग्य**शब्दार्थः सष्टीकृतो भवति । **तद्भोगार्था** इत्यनेन भोगस्थान-भोगोपकरणानां भोगसिद्धिप्रयोजकत्वमेव भोग्यत्वमित्यर्थः । सप्तम्यन्त**वस्तु**शब्दो जीवपर्यन्तदेहपरः । द्वितीय**वस्तु**शब्दो देवादिशरीरमात्रपरः । **वस्तुभेदाः** देवादिशरीरभेदाः । अत्र **वस्तुभेद**शब्देन भेदस्य वस्तुरूपत्वात्–पारमार्थ्यमपि फलितम् । अत्रान्वितेषु पदेषु व्याख्येयपदव्याख्यानार्थमाह—**ये देवादिष्विति । देवादिषु वस्तुष्वात्मतयाऽभिमतेषु** प्रथम**वस्तु**शब्दो जीवपर्यन्तदेहपर एवेत्यभिप्रायः । संसृष्टाकारो ह्यात्माभिमानः । **तद्भोगार्था** इति पूर्वोक्तस्य पदस्य व्याख्येयपदमुदाहरति—**भोग्यभूता इति । भोग्यभूता** इत्यनेन **वस्तुभेदा** इति पदस्याविदंशमात्रपरत्वमुक्तम् । **न तु वस्तुभूत** इत्युक्तत्वात्–पूर्वश्लोकोक्तभेदा एवात्र विवक्षिता इत्याह—**देवमनुष्येति** । कारणाभावात्कार्याभावो हि व्यतिरेकः, तं सष्टयति—**मूलभूतेति** । परमप्रकृतार्थस्यापि फलितत्वमाह—**इत्यचिद्वस्तुन इति** । पूर्वश्लोकफलितार्थकथने आत्मनोऽस्तिशब्दवाच्यत्वे हेतुरनुक्तः, अत्र तु तस्यापि फलितत्वमाह—**इतरस्येति** । जगदुपलब्धिप्रकारेणापि वस्तुभेदानां परिणामित्वमुपपाद्यते श्लोकद्वयेन, तत्र प्रथमस्य वाक्यार्थमाह—**प्रतिक्षणमिति** । श्लोकस्य **नास्ति**शब्दाभिधेयतापरत्वं **यदस्ति यन्नास्ती**त्युपक्रमादवगतम्, अस्मिन्नपि श्लोके प्रयोजकशिक्षा । **वस्त्वस्ति किम**ित्यर्थयोजनौपयिकतयात्राभिधेयं **यदस्ति यन्नास्ती**त्युपक्रमवशात्सिद्धमर्थमाह—**अस्तिशब्देति** । सततैकरूपतया **अस्ति**शब्दवाच्यत्वे सति हि पूर्वार्धोक्तस्य तदभावस्य **नास्ति**शब्दाभिधेयताहेतुत्वसिद्धिः । पूर्वार्धं व्याचष्टे—**अचिद्वस्त्विति** । किमनेन **नास्ति**शब्दाभिधेयत्वस्येति शङ्कायाम्, उत्तरार्धमवतारयति—**ततः किमित्यत्राहेति । यातीति** वर्तमाननिर्देशस्यामिप्रायमाह—**प्रतिक्षणमिति । भूयो न तत्त्थे**त्यस्यार्थमाह—**तदिति । उत्तरोत्तरावस्थाप्राप्त्येति भूयः**शब्दार्थः । **न तत्त्थे**त्यस्यार्थमाह—**पूर्वपूर्वावस्थां जहातीति । तत्रे**त्यस्यार्थमाह—**पूर्वावस्थस्योत्तरावस्थायामिति । कुतस्तत्त्व**मित्यस्यार्थमाह—**न प्रतिसंधानमिति । तत्त्वं** तस्य भावः । तदिदमिति प्रतिसन्धानानर्हत्वं फलितमित्यर्थः । ननु—**तत्त्वं कुतः** पूर्वावस्थत्वं कुत इत्युक्तं, कथं प्रतिसन्धाननिषेधः, उच्यते—**कुतःशब्दः प्रमाणप्रतिक्षेपपरः**, पर्वतोऽग्निमानित्युक्ते कुत इति प्रमाणाकाङ्क्षा हि दृश्यते, अतः प्रतिक्षेपपरः **कुतः**शब्दोऽपि प्रमाणप्रतिक्षेपपरः–कुतः प्रमाणादित्यर्थः । पूर्वावस्थस्य भूयस्त्वात्वे प्रमाणं च प्रत्यभिज्ञा, अतः प्रमाणे प्रतिक्षिप्ते प्रतिसन्धानं निषिद्धं भवतीति भावः; अन्यथा **न तत्त्थे**त्यनेन पौनरुक्त्यं स्यात् । **हि**शब्देन फलितमर्थमाह—**अत इति । नास्ति-**

तथा ह्युपलभ्यत इत्याह **'मही घटत्वम्'** (वि. पु. २।१२।४२) इति। स्वकर्मणा देवमनुष्यादिभावेन स्तिमितात्मनिश्चयैः स्वभोग्यभूतमचिद्वस्तु प्रतिक्षणमन्यथाभूतमालक्ष्यते, अनुभूयत इत्यर्थः। एवं सति किमप्यचिद्वस्त्वस्तिशब्दार्हमादिमध्यपर्यन्तहीनं सततैकरूपमालक्षितमस्ति किं, न ह्यस्तीत्यभिप्रायः। यस्मादेवं तस्माज्ज्ञानस्वरूपात्मव्यतिरिक्तमचिद्वस्तु कदाचित्कचित्केवलास्तिशब्दवाच्यं न भवतीत्याह—**'तस्मान्न विज्ञानमृते'** (वि. पु. २।१२।४३) इति। आत्मा तु सर्वत्र ज्ञानैकाकारतया देवादिभेदप्रत्यनीकस्वरूपोपि देवादिशरीरप्रवेशहेतुभूतस्वकृतविविधकर्ममूलदेवादिभेदमिन्नात्मबुद्धिभिस्तेत तेन रूपेण बहुधानुसंहित इति—तद्भेदानुसंधानं नात्मस्वरूपप्रयुक्तमित्याह—**विज्ञानमेकम्'** (वि. पु. २।१२।४३) इति। आत्मस्वरूपं तु कर्मरहितं, तत एव मलरूपप्रकृतिस्पर्शरहितं, ततश्च तत्प्रयुक्तशोकमोहलोभाद्यशेषहेयगु-

---

शब्दवाच्यत्वं प्रयोजकशिक्षा कृता। शिक्षितमर्थमुदाहरणेन दर्शयत्यनन्तरश्लोक इत्यभिप्रायेणाह—**तथा हीति**। **महीघटत्वमिति** श्लोकं व्याचष्टे—**स्वकर्मणेत्यादिना**। **महीघटत्वमित्यत्र यातीति** पूर्वश्लोकादनुषङ्गः। कर्मण आत्मनिश्चयविरोधित्वं सद्वारकमित्याह—**देवमनुष्यादिभावेनेति**। देवादिदेहसंसर्गेणेत्यर्थः। **स्तिमितं** प्रतिबद्धम्। अस्थिरे भोग्यत्वबुद्धिः, स्थिरतरसुखरूपात्मनिश्चयस्तैमित्यादिति भावः। यद्वा आत्मज्ञानरहितैरप्यचिद्वस्तुनोऽस्थिरत्वमालक्ष्यत इत्याह—**तथा हीति**। **आलक्ष्यत इति**। चाक्षुषज्ञाने प्रयोगप्रावुर्यात्तद्व्यावृत्त्यर्थं**मनुभूयत** इत्युक्तम्। श्लोकव्याख्यानपरिसमाप्तिं द्योतयति—**इत्यर्थ इति**। ब्रूहीत्यादेरर्थमाह—**एवं सतीति**। अनेनात्रेति पदं व्याख्यातम्। **अचिद्वस्त्विति** पदेन श्लोकस्थ**वस्तु**शब्दो व्याख्यातः। **अस्तिशब्दार्हमित्यादिविशेषणं** सामर्थ्यसिद्धतयोक्तम्। अथवा, श्लोकद्वयामिप्रायमाह—**एवं सतीति। न तु वस्तुभूत** इति। पुराणग्रन्थे **किमप्यचिद्वस्तु, अचिद्वस्तु किंचि**दिति भाष्ये च अचिद्विषय**वस्तु**शब्दप्रयोगात्**तद्वस्तु नृप तच्च किमिति** ग्रन्थस्थ**वस्तु**शब्दतुल्यत्वं न शङ्कनीयम्। **अस्ति किमि**त्यनेन श्लोकस्थास्तिशब्दस्य भवत्यर्थत्वमुक्तम्, अत एव **यदस्तीत्यस्ति**शब्दवन्नात्मस्वरूपपरत्वं शङ्कनीयम्। फलितमाह—**न हीति। अस्ति किं न ह्यस्तीति** भाष्यस्वारस्येन श्लोकद्वयोपक्रमगतस्**अस्ति किमिति** वाक्यस्य प्रत्यभिज्ञातस्य भवत्यर्थतया व्याख्यातत्वं प्रतीयते। यद्वा, **अस्ति**शब्दाभिधेय इत्यनेन **वस्त्वस्ति किमि**त्यत्रा**स्ति**शब्दो व्याख्यातः; **यदस्ति तस्मान्न विज्ञानमृतेऽस्ती**त्यनेनैकरूप्यात्। एवं **वस्त्वस्ति किं, महीघटत्वमिति** श्लोकद्वयस्य प्रत्येकमुक्तो वाक्यार्थः पूर्वपक्षयोजनायामुपर्जाव्यः। उत्तरश्लोकस्य प्रथमार्धं व्याचष्टे—**यस्मादिति। यस्मादेवं तस्मादिति**। परिणामित्वादेव, न तु ज्ञानबाध्यत्वादित्यर्थः। **अचिद्वस्तु**शब्देन **वस्तुजात**शब्दार्थ उक्तः। **जात**शब्दशिरस्को वस्तुशब्दो न नित्यवाचीति भावः। **केवलास्तिशब्दवाच्यमिति**। एतच्छ्लोकस्थास्तिशब्दो न भवत्यर्थः; ज्ञानव्यतिरिक्तस्य **तदेतदक्षयं नित्यम्** इत्यादिना नित्यत्वेनोक्तस्य निषेध्यत्वायोगात्, **यदस्तीत्युपक्रान्तस्योपसंहारौचित्याच्चेति** भावः। प्रागभावप्रध्वंसाभाववतोऽचिद्वस्तुनो नास्तिशब्दाभिधेयत्वमुपसंहृतम्। **विज्ञान**मित्यादि व्याचष्टे—**आत्मात्विति**। **तु**शब्दोऽचिद्वैषम्यपरः। **सर्वत्र** सर्वशरीरेषु। **एक**शब्दं व्याचष्टे—**ज्ञानैकाकारतयेति**। 'एको व्रीहिः सुनिष्पन्नः सुपुष्टं कुरुते प्रजा' इतिवदय**मेक**शब्द आकारैक्यपरः। स चाकारो **विज्ञान**शब्दोक्तं ज्ञानत्वमित्यभिप्रायेणोक्तम्। **ज्ञानैकाकारतयेति** भावप्रधानो निर्देशः—ज्ञानत्वैकाकारतयेत्यर्थः; स्वरूपतो धर्मतश्चाविशेषेण ज्ञानत्वं सद्वारकमद्वारकं चाकारोहि भवति। **ज्ञानैकाकाकारतये**त्यत्र **एक**शब्देन संकोचविकासदुःखरूपत्वादिव्युदासश्च। **देवादिभेदप्रत्यनीकस्वरूपोऽपीति**। एकरूपत्वाद्भेदप्रत्यनीकत्वम्। निजकर्मादिपदं व्याचष्टे—**देवादीति। भेद**शब्दार्थमाह—**विविधेति**। बुद्धिशब्देन चित्तशब्दार्थ उक्तः। बुद्धेर्भेदश्चात्मन्यारोप्यमाणदेवाद्याकाररूपविषयभेदात्—**बहुधा** देवत्वादि बहुप्रकारविशिष्टतयाऽभ्युपेतमित्यर्थः। **बहुधा**शब्देन एकशब्दस्याकारैक्यपरत्वं स्पष्टम्। फलितमर्थमाह—**नात्मस्वरूपप्रयुक्तमिति**। औपाधिकमित्यर्थः। उपाधिविमोक्षे कीदृशं स्वरूपमित्यपेक्षायामनन्तरश्लोकं व्याचष्टे—**आत्मेति। विशुद्ध**पदं व्याचष्टे **कर्मरहितमिति। विमल**पदं व्याचष्टे—**तत एवेति। विमल**पदव्याख्यानमिति स्पष्टीकर्तुं **मलरूप**शब्दः। **मलरूपप्रकृतिस्पर्शरहित**मित्यनेन **सर्वकर्मक्षये ज्ञानमपास्तदोष**मित्यस्यार्थोऽवगतः; कर्मक्षयवाचिपदानन्तरपदस्य शरीरसंबन्धरहितपरत्वेन व्याख्यातत्वात्। तथा च श्रुतिः—'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य। धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामी'ति। अत्र हि **पापं विधूये**त्युक्त्वा **धूत्वा शरीर**मित्युक्तम्। उपरितनपदानि व्याचष्टे—**ततश्चेति। ततश्च** तत एवेत्यर्थः हेतोर्नैरपेक्ष्यसूचकश्चशब्दः। निरस्ताशेष-

णासङ्गि, उपचयापचयानर्हतयैकं तत एव सदैकरूपं, तच्च वासुदेवशरीरमिति तदात्मकम्; अतदात्मकस्य कस्यचिदप्यभावादित्याह—**'ज्ञानं विशुद्धम्'** (वि. पु. २।१२।४४) इति । चिदंशः सदैकरूपतया सर्वदास्तिशब्दवाच्यः । अचिदंशस्तु प्रतिक्षणपरिणामित्वेन सर्वदा नाशगर्भ इति—सर्वदा नास्तिशब्दाभिधेयः । एवंरूपं चिदचिदात्मकं जगद्वासुदेवशरीरं तदात्मकमिति—जगद्याथात्म्यं सम्यगुक्तमित्याह—**'सद्भाव एवम्'** (वि. पु. २।१२।४५) इति । अत्र **सत्यमसत्यमिति यदस्ति यन्नास्तीति** प्रक्रान्तस्योपसंहारः । **एतत्** ज्ञानैकाकारतया सममशब्दगोचरस्वरूपभेदभेदवाचिन्मिश्रं **ध्रुवनाश्रितं** देवमनुष्यादिरूपेण सम्यग्व्यवहारार्हभेदं यद्वर्तते तत्र हेतुः कर्मेवेत्युक्तमित्याह—**'एतत्तु यत्'** (वि. पु. २।१२।४५) इति । तदेव विवृणोति—**'यज्ञः पशुः'** (वि. पु. २।१२।४६) इति । जगद्याथार्थ्यज्ञानप्रयोजनं मोक्षोपाययतनमित्याह—**'यच्चैतत्'** (वि. पु. २।१२।४७) इति । अत्र निर्विशेषे परे ब्रह्मणि, तदाश्रये सदसदनिर्वचनीये चाज्ञाने जगतस्तत्कल्पितत्वे वानुगुणं किंचिदपि पदं न दृश्यते । अस्तिनास्तिशब्दाभिधेयं चिदचिदात्मकं कृत्स्नं जगत्परमस्य परेशस्य परस्य ब्रह्मणो विष्णोः कायत्वेन तदात्मकम्; ज्ञानैकाकारस्यात्मनो देवादिविविधाकारानुभवे, अचित्परिणामे च हेतुर्वस्तुयाथात्म्यज्ञानविरोधि क्षेत्रज्ञानां कर्मैवेति प्रतिपादनात् । अस्तिनास्तिसत्यासत्यशब्दानां च सदसदनिर्वचनीयवस्त्वभिधानासामर्थ्याच्च—

लोभादिसङ्गमित्यर्थः । **एकमिति** पदं व्याचष्टे—**उपचयापचयानर्हतयैकमिति । उपचयापचयौ** वृद्धिक्षयौ, तदर्हत्वं सावयवत्वं, सावयवत्वाभावादेवैकशब्दवाच्यत्वं, निरवयवत्वमेकत्वमित्यर्थः । तत एव **सदैकरूपमिति** निरवयवत्वात्—सावयवत्वप्रयुक्तवृद्धिक्षयरहितमित्यर्थः । सामानाधिकरण्यं व्याचष्टे—**तच्चेति । यदम्बु वैष्णवः कायः, अशेषमूर्तिरित्युक्तत्वात्**—अयमेवार्थः । **न यतोऽन्यदस्तीत्येतद्व्याचष्टे— अतदिति । यतः** यस्माद्वासुदेवादन्यत्स्वपर्यवसितं वस्तु नास्तीत्यर्थः । यद्वा, **वासुदेवा**दिति पदमध्याहृत्य योजना, वासुदेवादन्यत्रास्तीति यतः तत इत्यर्थ. । अस्यां योजनायां **तच्छब्दः** प्रसिद्धपरामर्शी, अतोऽपि पूर्वयोजना साधीयसी; तद्वृत्तस्य यद्वृत्तप्रतिनिर्देशरूपत्वस्वारस्यात्, पञ्चम्यन्ताध्याहारानपेक्षत्वाच्च । **ज्ञानस्वरूपः, यदा** लिति श्लोकौ चिदचित्साधारणौ, **वस्त्वस्ती**त्यादिसार्धश्लोकद्वयमचिदसाधारणं, **विज्ञानमि**त्यादिसार्धश्लोकश्चिदसाधारण इति विभाग. । न परमतमुक्तं तत्त्वमेवोक्तमित्यभिप्रायेण **सद्भाव** इत्यारभ्योक्तम् । तत्र **यथा**शब्दार्थमाह—**चिदंश इति । यथा** येन प्रकारेण-परिणामित्वापरिणामित्वरूपेण, न ज्ञानबाध्यत्वाबाध्यत्वरूपेणेत्यर्थः । **एवंरूपेति** । शरीरशरीरिभावरूपेण येन प्रकारेण भगवदात्मकत्वं, न तु स्वरूपैक्येनेत्यर्थः । श्लोके यथाशब्दप्रतियोग्येवंशब्दः । सत्यं ज्ञानम्, असत्यमन्यच्च यथावस्थितम् । **एवं सद्भाव उक्त** इत्यन्वयोऽभिप्रेतः । अतः सत्यासत्यशब्दवाच्यत्वनिर्वाहकापरिणामित्वपरिणामित्वे, भगवदात्मकत्वं च **यथा**शब्दविवक्षितं भवति । अन्यदुपक्रान्तमन्यदुपसंहृतं भवति; **अस्तिनास्ति**शब्देन उपक्रम्य **सत्यासत्य**शब्देन उपसंहारादित्याह—**अत्रेति ।** उपक्रमोपसंहारयोः शब्दान्तरनिर्देशस्यायं भावः—अन्येष्वपि शब्देषु क्वचिदेवं श्रुतेषु तेषामपि प्रवृत्तिनिमित्तमिदमेवेति । उत्तरार्धस्यार्थमाह—**एतदिति । प्रत्यस्तमितभेदम्, अगोचरं वचसा**मित्यनयोरर्थमभिप्रेत्याह—**ज्ञानैकाकारतया सममशब्दगोचरस्वरूपभेदमिति । एव**कारेण विरोधः सूचितः । ध्रुवनाश्रितत्वस्य घटकं पदमाह—**अचिन्मिश्रमिति । ध्रुवनाश्रितम्** अण्डान्तर्गतं, भोगस्थानगतमित्यर्थ । **संव्यवहार**शब्दं व्याचष्टे—**सम्यग्व्यवहारार्हभेदमिति । सम्य**क्शब्दः स्पष्टत्वपरः । तत्कर्म किमित्यपेक्षायाम् उत्तरश्लोकस्य तद्विवरणपरत्वमाह—**तदेव विवृणोतीति । स्वर्गमयश्च कामः** स्वर्गविषयेच्छेत्यर्थः । **फलस्य** वक्ष्यमाणत्वात्—देवतायाः, फलस्य च यष्टव्यत्वेन, साध्यत्वेन च कर्मान्तर्भावः । **इत्यादि**शब्देन दानहोमादिकं च, पापं चोक्तं भवति । **भूरा**दिशब्देन पापफलमप्युक्तं भवति । पश्वादिपरिकरयुक्तो यज्ञ एकं कर्म, एवंविधयज्ञात्मकं, दानहोमाद्यात्मकं च कर्म तत्र हेतुः । **आश्रितमार्गदृष्टं** तैस्तैराश्रिता मार्गा वर्णाश्रमाः तेषु दृष्टमित्यर्थः । अनन्तरश्लोकार्थमाह—**जगदिति ।** कर्मवश्यः सर्वत्र व्रजति हि । यद्वा, कर्मवश्यो हि सर्वत्र व्रजति तस्मादेवं कुर्यादित्यर्थः । निगलित एव हि सर्वत्र कारागृहे चरति अतस्तन्मोचनाय यतत इति भावः । **ध्रुवम्** अचलम् । **सदैकरूपं** स्वरूपतो गुणतश्च एकरूपमित्यर्थः । यद्वा, स्वरूपतो गुणतो रूपतश्च एकरूपमित्यर्थः । **तस्माच्च तदेव**मिति पूर्वेणान्वयः ॥

एवं श्लोकाना स्वोक्तार्थानुगुण्यमुपपाद्य, परोक्तार्थानुगुणत्वमुपपादयति **अत्रेत्यादिना** । किंचिदपि पदं न दृश्यत इति न वाच्यं; नास्त्यादिशब्दा-, सामानाधिकरण्यम्, अज्ञानवाचिपदजातं चानुगुणमिति चेत्, तत्राह—**अस्तीति । परमस्येत्यादिपूरमपरेशादिशब्दाना** भवत्पक्षे मुख्यार्थासिद्धिरिति भावः । हेत्वन्तर चाह—**अस्तिनास्तिसत्यासत्येति ।**

नास्त्यसत्यशब्दावस्तिसत्यशब्दविरोधिनौ। अतश्च ताभ्यामसत्यत्वं हि प्रतीयते नानिर्वचनीयत्वम्। अत्र चाचिद्वस्तुनि नास्त्यसत्यशब्दौ न तुच्छत्वमिथ्यात्वपरौ प्रयुक्तौ। अपि तु विनाशित्वपरौ। **'वस्त्वस्ति किम्'** (वि. पु. २।१२।४१), **मही घटत्वम्'** (वि. पु. २।१२।४२) इत्यत्र विनाशित्वमेव ह्युपपादितं न निष्प्रमाणकत्वं, ज्ञानवाध्यत्वं वा। एकेनाकारेणैकस्मिन्काले ऽनुभूतस्य कालान्तरे परिणामविशेषेणान्यथोपलब्ध्या नास्तित्वोपपादनात्। तुच्छत्वं हि प्रमाणसंबन्धानर्हत्वम्। वाधोपि यद्देशकालादिसंबन्धितया यदस्तीत्युपलब्धं तस्य तद्देशकालादिसंबन्धितया नास्तीत्युपलब्धिः, न तु कालान्तरे ऽनुभूतस्य कालान्तरे परिणामादिना नास्तीत्युपलब्धिः; कालभेदेन विरोधाभावात्। अतो न मिथ्यात्वम्। एतदुक्तं भवति—ज्ञानस्वरूपमात्मवस्त्वादिमध्यपर्यन्तहीनं सततैकस्वरूपमिति—स्वत एव सदास्तिशब्दवाच्यम्, अचेतनं तु क्षेत्रज्ञभोग्यभूतं तत्कर्मानुगुणपरिणामि विनाशीति—सर्वदा नास्त्यर्थगर्भमिति —नास्त्यसत्यशब्दाभिधेयमिति। यथोक्तम्—**'यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै। परिणामादिसंभूतां तद्वस्तु नृप तच्च किम् ॥'** (वि. पु. २।१३।९५), **अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते। तत्तु नाशि न संदेहो नाशिद्रव्योपपादितम् ॥'** (वि.पु. २।१४।२४) इति देशकालकर्मविशेषापेक्षयास्तित्वनास्तित्वयोगिनि वस्तुनि केवलास्तिवुद्धिवोध्यत्वमपरमार्थ इति ह्यपरमार्थ इत्युक्तम्, आत्मन एव केवलास्तिवुद्धिवोध्यत्वमिति स परमार्थ इत्युक्तम्। श्रोतुश्च मैत्रेयस्य **'विष्ण्वाधारं यथा**

प्रथमश्चशब्दस्त्वर्थः। स्वोक्तयोजनायामनुगुणस्य शब्दस्य परपक्षानुगुणत्वरूपं वैषम्यमस्तीति भावः। **अस्तिसत्य**शब्दौ दृष्टान्तार्थौ—यथा**स्तिसत्य**शब्दौ न सद्विलक्षणपरौ, तथा **नास्त्यसत्य**शब्दावपि नासद्विलक्षणपरावित्यर्थः। कथमनिर्वचनीयवस्त्वभिधानासामर्थ्यमित्यत्राह—**नास्तीति**। अर्थद्वारको हि विरोधः। ततः किमित्यत्राह—**अतश्चेति**। यद्वा, **अनिर्वचनीयवस्त्वभिधानासामर्थ्या**दिति व्युत्पत्त्यभाव उक्तः। परस्परविरुद्धार्थत्वमत्र हेत्वन्तरतयोक्तम्। **चः** समुच्चये। तथापि सत्ताभावात्तुच्छत्वं, मिथ्यात्वं वोक्तं भवतीति चेत्तत्राह—**अत्रेति**। कथं विनाशित्वपरावित्यत्राह—**वस्त्विति**। विनाशित्वमेव मिथ्यात्वमिति शङ्कायां विनाशित्वस्वरूपं शोधयति—**एकेनेति**। एकेनाकारेण कालान्तरेऽनुभूतस्य कालान्तरे आकारान्तरेणोपलब्धिरस्तु, ततः कथं विनाशित्वं तुच्छत्वमिथ्यात्वव्यावृत्तमिति शङ्कायां तुच्छत्वादिस्वरूपं शोधयति—**तुच्छत्वं हीत्यादिना**। **परिणामादिनेति**। **परिणाम**शब्दः परिणामसामान्यपरः, तद्विशेषपरश्च। यथा—**वाद**शब्दः सर्वकथासाधारणः, वीतरागकथामात्रपरश्च—तद्वत्। अत्रायं **परिणाम**शब्दो वर्धमानावस्थावाची; **परिणामर्धिजन्मभि**रिति प्रयोगात्। 'यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै। परिणामादिसंभूत'मिति वक्ष्यमाणवचनकटाक्षेणैवमुक्तम्। **परिणाम**शब्दस्य विकारमात्रपरत्वे **आदि**शब्दः प्रदेशान्तरगमनपरः। कालान्तरानुभूतस्य कालान्तरे नास्तीत्युपलब्धिः कथं न बाध इत्यत्राह—**कालभेदेनेति**। विरोधे हि बाधः, बाध्यत्वं हि मिथ्यात्वमित्यभिप्रायेणाह—**अत** इति। परिणामित्वापरिणामित्वयोरर्थयोर्न हि **नास्त्यसत्या**दिशब्दाः पारिभाषिकाः तत्कथं तदभिधानप्रकारः; परिणामास्पदस्यापि वस्तुनो नित्यत्वात् **नास्ति**शब्दाभिधेयत्वं चानुपपन्नमित्यत्राह—**एतदुक्तं भवतीति**। सततैकरूपत्वमस्तिशब्दप्रवृत्तिनिमित्तं, विनाशगर्भत्वं **नास्ति**शब्दप्रवृत्तिनिमित्तमित्यर्थः। घटावस्थायां पिण्डो नास्ति, कपालावस्थायां घटो नास्ति, चूर्णावस्थायां न कपालसत्तेति—सदा नाशगर्भत्वम्। उत्तरावस्थाप्राप्तिर्हि पूर्वावस्थस्य विनाशः, तदवस्थस्य सैवोत्पत्तिः तस्मान्नास्तिशब्दाभिधेयत्वम् अचिद्वस्तुनः, चिद्वस्तुनस्तु अवस्थान्तरापत्त्यवस्थान्तरप्रहाणाभावेनैकरूपत्वान्न विनाशगर्भत्वमतस्तदस्तिशब्दवाच्यमेव, यत्सदास्त्येव तदस्तिशब्दवाच्यम्। सिद्धे 'शब्दार्थसंबन्धे' इत्यत्र सिद्धशब्दवदवधारणगर्भोऽयं शब्दः। तत्र हि सिद्ध एवेति व्याख्यातमन्भक्षो वायुभक्ष इत्यादि दृष्टान्तीकृत्य, तथा अत्रापीत्यर्थः। **अस्तिनास्ती**तिशब्दानां प्रवृत्तिनिमित्तमिदमेवेत्यस्मिन्नर्थे प्रमाणमाह—**यथोक्तमिति**। असदसत्सत्सत्त्वादिशब्दानां मिथ्यात्वामिथ्यात्वयोः प्रसिद्धिस्वारस्यमस्तीति शङ्कायां मिथ्यागर्भितत्वमपि दर्शयति—**देशेति**। **कर्मविशेषापेक्षयेति**। पालनरञ्जनादिसद्भावासद्भावाभ्यां राजत्वपितृत्वादिरूपेणास्तित्वं, नास्तित्वं च कर्मापेक्षम्। औपाधिकास्तित्वयोगिनि वस्तुनि स्वाभाविकास्तित्वयोगित्ववुद्धिविषयत्वं न परमार्थ इत्यर्थः। अपरमार्थत्वगर्भास्त्यर्थोपेतत्वादचितो नास्त्यसत्यादिशब्दवाच्यत्वमित्युक्तम्, आत्मनः स्वाभाविकास्तित्वयोगात्—तत्र तद्बुद्धिविषयत्वमपरमार्थ इत्याह—**आत्मन एवेति**। पदशो दशश्लोक्यामुक्तमर्थं श्रोतुरनुवादप्रकारेण दृढयति—**श्रोतुश्चेति**। **प्रधानतः** श्लोकयोरितिवद्भावप्रधानविद्वेषः प्राधा-

चैतत्त्रैलोक्यं समवस्थितम् । परमार्थश्च मे प्रोक्तो यथा ज्ञानं प्रधानतः ॥' (वि. पु. २।१३।२) **इत्यनुभाषणाच्च । 'ज्योतींषि विष्णुः'** (वि. पु. २।१२।३८) इत्यादिसामानाधिकरण्यस्यात्मशरीरभाव एव निबन्धनं, चिदचिद्वस्तुनोश्चास्तिनास्तिशब्दप्रयोगनिबन्धनं, ज्ञानस्याकर्मनिमित्तस्वाभाविकस्वरूपत्वेन प्राधान्यम्, अचिद्वस्तुनश्च तत्तत्कर्मनिमित्तपरिणामित्वेनाप्राधान्यम्—इति प्रतीयते । यदुक्तं—**निर्विशेषब्रह्मविज्ञानादेवाविद्यानिवृत्तिं** वदन्ति श्रुतय–इति, तदसत् ; **'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्'** (श्वे.३।८), **'तमेव विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय'** (तै. आ. ३।१३।१), **'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि । न तस्येशे कश्चन । तस्य नाम महद्यशः । य एनं विदुरमृतास्ते भवन्ति'** (म. ना. १।८-१०-११) इत्याद्यनेकवाक्यविरोधात् । **ब्रह्मणः** सविशेषत्वादेव सर्वाण्यपि वाक्यानि सविशेषज्ञानादेव मोक्षं वदन्ति । शोधकवाक्यान्यपि **सविशेषमेव ब्रह्म** प्रतिपादयन्तीत्युक्तम् । तत्त्वमस्यादिवाक्येषु सामानाधिकरण्यं न निर्विशेषवस्त्वैक्यपरं; तत्त्वंपदयोः सविशेषब्रह्माभिधायित्वात् । तत्पदं हि सर्वज्ञं सत्यसंकल्पं जगत्कारणं ब्रह्म परामृशति । **'तदैक्षत बहु स्याम्'** (छा. ६।२।३) इत्यादिषु तस्यैव प्रकृतत्वात् । तत्समानाधिकरणं त्वंपदं चाचि-

---

न्येनेत्यर्थः । **प्राधान्य**मुत्कर्षः । अनुभाषणश्लोकपूर्वार्धफलितमर्थमाह—**ज्योतींषीति** । तदेकधार्यद्रव्यत्वं हि शरीरलक्षणम्, अतो **विष्ण्वाधार**मित्यनेनात्मशरीरभावः सिद्धः । उत्तरार्धफलितमर्थमाह—**चिदचिदिति** । ज्ञानप्राधान्यं कण्ठोक्तं, तेनाचिद्वस्तुनोऽप्राधान्यस्यार्थसिद्धत्वादाह—**अचिद्वस्तुनश्चेति । प्राधान्याप्राधान्ये** उत्कर्षापकर्षौ तौ चापरिणामिस्वपरिणामित्वलक्षणौ, न मिथ्यात्वामिथ्यात्वलक्षणौ; धर्मिणि सति हि प्राधान्याप्राधान्ये, प्रतीतिमात्रसिद्धं हि मिथ्या, अतो न तत्राप्राधान्यशब्दः स्वरस इत्यभिप्रायः । **इत्यविद्यायाः स्मृतिपुराणसिद्धत्वनिरासः ॥ इति प्रमाणानुपपत्तिः ॥**

अथ निर्विशेषब्रह्मात्मैक्यज्ञानस्य निवर्तकत्वपरत्वेन परोक्तश्रुतीनामतदर्थत्वं वक्तुं परोक्तमनुवदति—**यदुक्तमिति** । परिहरति—**तदसदिति** । तत्र ज्ञानस्य निर्विशेषवस्तुविषयत्वं तेनात्मैक्यविषयत्वं च परिहरिष्यन् प्रथमं निर्विशेषवस्तुविषयत्वं व्युदस्तितुमुपादत्ते—**वेदाहमिति** । अनेन विग्रहादिविशिष्टविषयज्ञानमेवोपायः, नान्य इत्युक्तम् । एतत्समानार्थत्वादाह—**सर्वे निमेषा इति** । तत्र हि 'अद्भ्यः संभूतो हिरण्यगर्भ इत्यृचा'विति प्रतीकोपादानं कृतम् । अनेन विशेषणेन **विद्युच्छब्दश्च** व्याख्यातो भवति । **विद्युतः** विद्युद्गुणादित्यर्थः; आदित्यवर्णमित्येनैनैकार्थ्यात् । **न तस्येशे कश्चन** इत्यनेन उपायभूतं ज्ञानान्तरं नास्तीति फलितम् । अधिकक्षेत्र्यन्तराभावात्–उक्ताकारविशिष्टपुरुषवेदनस्योपायत्वं दर्शयति—**य एनं विदुरिति** । एषामन्येषामप्यादिशब्दगृहीतानां च वाक्यानामुपादानम्–अनेकवाक्यविरोधप्रदर्शनाय । ननु—**सदेवैकमेवेत्यादिकारणवाक्येषु** निर्विशेषस्य प्रतिपन्नत्वात्–तज्ज्ञानमेव साक्षान्मोक्षोपाय इति–सगुणज्ञानस्योपायत्वं तद्व्यवधानेन स्यात् । यद्वा, सगुणज्ञानोपायत्वपरवाक्येऽपि न सगुणत्वे तात्पर्यं, वस्तुमात्रमेव लक्ष्यत इति चेत्, तत्राह—**ब्रह्मण इति** । सद्विद्यादिष्वपि सगुणविषयत्वोपपादनात्, यथावस्थितस्वरूपविषयज्ञानस्यैव मोक्षोपायत्वात्—तान्यपि सविशेषज्ञानोपायत्वपराणीत्यर्थः । तर्हि शोधकवाक्यैर्विरोध इत्यत्राह—**शोधकेति** ॥

एवं ज्ञानस्य निर्विशेषवस्तुविषयत्वं तद्विरुद्धवचनोदाहरणेन प्रतिक्षिप्तम्, अथ तत्त्वमस्यादिसामानाधिकरण्यान्यथानुपपत्त्या—**निर्विशेषज्ञानमेवोपाय** इति शङ्कायां तस्य जीवपरैक्यविषयत्वं व्युदस्यति—**तत्त्वमस्यादीति** । शोधकवाक्येषु सामानाधिकरण्यमतद्व्यावृत्तिमुखेन वस्त्वैक्यपरं, तत्त्वमस्यादिषु जीवब्रह्मणोः सामानाधिकरण्यमन्वयमुखेनोपलक्षितवस्त्वैक्यपरम्, अचिद्ब्रह्मणोस्तु **सर्वं खल्विदं ब्रह्मे**त्यादावतात्त्विकरूपारोपणेन सामानाधिकरण्यं, **ज्योतींषि विष्णु**रित्यादौ बाधार्थम्–इति चतुर्धा हि परैः सामानाधिकरण्यं तत्र तत्राभ्युपेतं, तत्र तत्त्वमस्यादिवाक्येऽन्वयमुखेन वस्तुमात्रपरत्वं, गत्यभावे बाधार्थत्वं चाशङ्क्य निराक्रियते, तत्र प्रथमं वस्त्वैक्यपरत्वं दूषयितुमाह—**न निर्विशेषवस्त्वैक्यपरमिति** । कुत इत्यत्राह—**तत्त्वमिति** । तच्च कथमित्यत्राह—**तत्पदं हीति** । हिर्हेतौ सर्वज्ञत्वादिगुणकप्रतिपादनं कथमित्यत्राह—**तदैक्षतेति** । तच्छब्दस्य प्रकृतसर्वाकारविशिष्टवस्तुपरामर्शित्वं व्युत्पत्तिसिद्धं, यथा—शुक्ला शोभनाक्षी मदीया पूर्णशृङ्गा घटोधी गौस्तामानयेति । ननु—गौस्तिष्ठति तामानयेत्यादावानयनादिक्रियानर्हस्थित्यादिविशेषणविधुरवस्तुपरामर्शित्वं दृश्यते तच्च मुख्यं, नैवम्; आनयनसमकालान्वययोग्येनापि स्थित्यादिविशेषणेन पूर्वकालवैशिष्ट्यस्य विवक्षितत्वात्; अन्यथा धावतोऽपि गोपिण्डस्यानयनादिप्रसङ्गः । **विशेषणं विशेष्ये वस्तुनि** यथान्वयार्हं तथाऽन्वितस्य तस्यापरित्यागो हि विवक्षितत्वं,

द्विशिष्टजीवशरीरकं ब्रह्म प्रतिपादयति; प्रकारद्वयावस्थितैकवस्तुपरत्वात्सामानाधिकरण्यस्य। प्रकारद्वयपरित्यागे प्रवृत्तिनिमित्तभेदासंभवेन सामानाधिकरण्यमेव परित्यक्तं स्यात्, द्वयोः पदयोर्लक्षणा च। सोयं देवदत्त इत्यत्रापि न लक्षणा; भूतवर्तमानकालसंबन्धितयैक्यप्रतीत्यविरोधात्। देशभेदविरोधश्च कालभेदेन परिहृतः। 'तदैक्षत बहु स्याम्' (छा. ६।२।३) इत्युपक्रमविरोधश्च। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा च न घटते। ज्ञानस्वरूपस्य निरस्तनिखिलदोषस्य सर्वज्ञस्य समस्तकल्याणगुणात्मकस्याज्ञानं, तत्कार्यानन्तापुरुषार्थाश्रयत्वं च न संभवति। बाधार्थत्वे च सामानाधिकरण्यस्य तत्त्वंपदयोर-

---

प्रकृतसर्वविशेषणेष्वेकस्यापि परित्यागे प्रकृतत्वमेव हीयेतः शुक्ला शोभनाक्षी मदीया पूर्णगुज्ञा घटोऽयी गौस्तामानयेत्युक्ते शौक्ल्येतरसमस्तविशेषणान्वितव्यक्त्यानयनेऽपि प्रकृतव्यक्तेरानीतत्वाभावात्; अतः सविशेषे प्रकृते निर्विशेषस्य प्रकृतत्वं दूरोत्सारितम्। न च प्रकृतसर्वविशेषणपरित्यागेऽपि धर्म्यैक्येन प्रकृतत्वसिद्धिः; सर्वाकारप्रहाणे प्रतिसंधानानर्हत्वात्। न ह्यपरके घटोऽस्ति तमानयेत्युक्ते घटत्वाविवक्षायां मृन्मात्रस्य सिद्धिः प्रकृतत्वसिद्धिः। कथमेकाकारपरित्यागेऽप्यसंभवत्प्रकृतत्वं सर्वाकारपरित्यागे संभवति, अङ्गुलीयकत्वप्रहाणेपि कनकं प्रतिसंधीयत इति चेत्, सत्यं, प्रत्यक्षेण तच्छब्दस्तु प्रकृताकारप्रहाणे प्रतिसन्धानमेव जनयितुं न शक्नोति, अत एव हि यदङ्गुलीयकं तदानयेत्युक्ते कनकमात्रं नानीयते, अतः प्रकृतसर्वाकारप्रहाणे प्रतिसन्धानानर्हस्य वस्तुनः प्रकृतत्वमेव नास्तीति—तच्छब्दस्य वस्तुमात्रपरत्वं लाक्षणिकं स्यात्। तत्पदोपस्थापितसार्वज्ञ्यादीनां, त्वंपदोपस्थापिताज्ञत्वादीनां च विरोधान्निर्विशेषपरत्वमिति चेत्, तत्राह—**तत्समनाधिकरणमिति**। घटस्य शुक्ल इत्यादिव्यधिकरणवाक्येषु धर्मवाचिपदस्य धर्मिपर्यन्तत्वाभावात् तद्व्यावृत्त्यर्थं **तत्समानाधिकरण**मित्युक्तम्। **अचिद्विशिष्टजीवशरीरकमिति**। अज्ञत्वादिगुणानां सर्वज्ञत्वादिगुणके परमात्मनि विरोधः सद्वारकतया परिहृत इत्यर्थः। **त्वंपदप्रवृत्तिनिमित्तसंबोधनीयार्थस्वरूपांमुख्यविशेषप्रयोजकोपलक्षणाभिप्रायेणाचिद्विशिष्टजीवेत्युक्तम्**। समानाधिकरणत्वे सति कथं त्वंपदं जीवविशिष्टब्रह्मपरमित्यत्राह—**प्रकारद्वयेति**। **प्रकारद्वयावस्थितं** प्रकारद्वयविशिष्टम्। प्रकृततत्त्वंपदप्रवृत्तिनिमित्तपरः **प्रकारद्वय**शब्दो न्यूनत्वनिवर्तकः, न तु प्रकारत्रित्वादिव्यवच्छेदपरः। तदुपपादयति—**प्रकारद्वयपरित्याग इति**। दूषणान्तरमाह—**द्वयोरिति**। अविरोधेन मुख्यतया निर्वाहे संभवति एकस्यापि पदस्य **लक्षणा न वृत्ता**, विरोधे सत्यपि एकपदलक्षणयैवाविरोधः सिध्यतीति पदद्वयलक्षणाऽनुपपन्नेत्यर्थः। ननु—पदद्वयलक्षणा न दूषणं; 'सोऽयं देवदत्त' इत्यादिषु दृष्टत्वात्, तत्र हि देशकालविशिष्टकारे देशकालान्तरान्वयविरोधाल्लाक्षणिकमेव पदद्वयं तत्राह—**सोऽयमिति**। किमेकस्य देशद्वयसंबन्धे विरोधः, उत कालद्वयसंबन्ध इति विकल्पमभिप्रेत्याह—**भूतेति**। न हि विशिष्टाकारे विशेषणान्तरान्वयः, अपि तु विशेष्यमात्रे, अतः कालद्वयसंबन्धो न विरुद्धः, यदि विरुद्धः तर्हि बौद्धोक्तं क्षणिकत्वमेवापद्येत। अनेककालसाध्यधर्मविधानं, फलप्राप्तिश्च नोपपद्येयातामिति भावः। देशभेदेति यद्येकस्य देशद्वयसंबन्धविरोधः, तर्हि—विष्णुक्रमणतीर्थस्नानादिविधिर्नोपपद्यते, प्रत्यभिज्ञाविरोधश्चेति भावः। यौगपद्यं कथं संभवतीति चेत्, उच्यते—देशद्वयसंबन्धस्य, कालद्वयसंबन्धस्य वा न युगपद्भावः, तत्प्रतिपत्तेरेव हि यौगपद्यं, प्रतिपत्तिस्तु देशद्वयकालद्वयसंबन्धं क्रमभाविनमेव दर्शयति, अतो न विरोधः; अन्यथाऽतीतानागतविषयज्ञानेष्वतीतानागतविषययोर्वर्तमानत्वं ज्ञानस्यातीतानागतत्वं वा प्रसज्येदिति। दूषणान्तरमप्याह—**तदैक्षतेति**। उपक्रमाधिकरणेन ह्युपक्रमप्राबल्यमुक्तमिति भावः। उपक्रमोपक्रमैक्यस्य प्रतिपन्नत्वान्नोपक्रमविरोधः; एकविज्ञानेन सर्वविज्ञानप्रतिज्ञावाक्यं हि 'तदैक्षत बहु स्या'मिति वाक्यात् पूर्वमित्यत्राह—**एकविज्ञानेनेति**। तत्र निमित्तत्वोपादानत्वतदनुगुणसार्वज्ञ्यसर्वशक्तित्वादिगुणसिद्धेरित्यर्थः। विशिष्टमेव कारणं तदेव स्थूलावस्थं कार्यमिति द्रव्यान्तरत्वाभावात्—कारणज्ञानेन कार्यज्ञानमुपपद्यते, मृत्पावादिनस्तु कारणज्ञाने कार्यस्य[1] विषयतयान्तर्भावोऽप्रसिद्धेरविरोधः, सत्यविषयज्ञाने मिथ्यार्थस्य विषयत्वायोगात्—मिथ्यात्वेनेत्यभ्याहारश्च स्यात्, अनन्तर्भावे त्वज्ञाते ज्ञातत्वव्यवहारो न मुख्यः स्यात्, अतोऽस्मत्पक्ष एव प्रतिज्ञावाक्यं स्वरसम्। श्रुत्यन्तरविरोधमाह—**ज्ञानस्वरूपस्येति**। **ज्ञानस्वरूपस्य, सर्वज्ञस्ये**त्यनेन धर्मिधर्मभूतज्ञाने विवक्षिते। सर्वज्ञस्याज्ञत्वं, निरस्तनिखिलदोषस्य समस्तकल्याणगुणात्मकस्यानन्तापुरुषार्थाश्रयत्वमिति विरोधः। **ज्ञानस्वरूपस्ये**त्यनेन विरोधानुपपत्तिश्च सूचिता॥

इत्थं सामानाधिकरण्यस्य निर्विशेषवस्त्वैक्यपरत्वं दूषितम्, अथ बाधार्थत्वं दूष्यते—**बाधार्थत्वे चेति**। 'रज्जुः सर्प' इत्येवंरूपं बाधार्थं सामानाधिकरण्यमेव नास्ति; सामानाधिकरण्यस्यैकस्मिन्विशेष्ये प्रकारद्वयोपस्थापकतया बाधार्थत्वविरो-

---

१ कार्यज्ञानस्य का. मु. पु.।

धिष्ठानलक्षणा, निवृत्तिलक्षणा चेति लक्षणाद्वयस्त एव दोषाः। इयांस्तु विशेषः—'नेदं रजत'मितिवद-प्रतिपन्नस्यैव बाधस्यागत्या परिकल्पनं, तत्पदेनाधिष्ठानातिरेकिधर्मानुपस्थापनेन बाधानुपपत्तिश्च। अधिष्ठानं तु प्राक्तिरोहितमतिरोहितस्वरूपं तत्पदेनोपस्थाप्यत इति—चेन्न; प्रागधिष्ठानाप्रकाशे तदाश्रयभ्रम-बाधयोरसंभवात्। भ्रमाश्रयमधिष्ठानमतिरोहितमिति चेत्, तदेवाधिष्ठानस्वरूपं भ्रमविरोधीति तत्प्रकाशे सुतरां न तदाश्रयभ्रमबाधौ। अतोऽधिष्ठानातिरेकिपारमार्थिकधर्मतत्तिरोधननानभ्युपगमे भ्रान्तिबाधौ

घात्, अतः पदद्वयमुख्यार्थत्वेऽभिमते बाधार्थं सामानाधिकरण्यं न सिध्येत्। **सर्प**शब्देन नञर्थं लक्षयित्वा असर्पो रज्वरिति निर्वाहं दृष्टान्तवाक्यस्याशङ्क्य, दार्ष्टान्तिकवाक्यस्य ततोऽप्यधिकदूषणमाह—**बाधार्थत्वे चेति। त्वं**तत्पदयोरित्यत्र न क्रमविवक्षा। **तत्**पदमधिष्ठानमात्रं लक्षयति, **त्वं**पदं जीवभावनिवृत्तिं लक्षयति। यद्वा, **त्वं**पदेनाधिष्ठानलक्षणा, **तत्**पदेन निवृत्तिलक्षणा। **आदि**शब्देन सामानाधिकरण्यलक्षणहानिः, उपक्रमविरोधः, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानुपपत्तिः, श्रुत्यन्तरविरोधश्चेति दूषणानि विवक्षितानि। उक्तदृष्टान्तात्, उपलक्ष्यसामानाधिकरण्याच्च—दूषणमत्राधिकमित्याह—**इयांस्तु विशेष इति**। बाधार्थत्वे विशेषो न पूर्वोक्तदूषणहानिः, अपि तु तैः सह वक्ष्यमाणाधिकदूषणद्वयापात एव विशेष इत्यर्थः। अधिकं दूषणमाह—**नेदं रजतमितिवदप्रतिपन्नस्यैव बाधस्यागत्या परिकल्पनमिति**। 'शुक्तिरेव रजत'मित्यत्र प्रमाणान्तरेण 'नेदं रजत'मिति बाधस्य प्रतिपन्नत्वाद्बाधकल्पनम्, अत्र बाधस्याप्रतिपन्नत्वेऽप्यगत्या बाधकल्पनमित्यर्थः। **तत्**पदेनाधिष्ठानातिरेकिधर्मानुपस्थापनेन बाधानुपपत्तिश्चेति—'शुक्तिरेव रजत'मित्यत्र शुक्तित्वरूपं विरुद्धधर्मं शब्द एवोपस्थापयति अतस्तत्र बाधकल्पनम्, अत्र त्वधिष्ठानमात्रं लक्षयता **तत्**पदेन शुक्तित्ववद्विरुद्धधर्मानुपस्थापनात्—बाधकल्पनमनुपपन्नमित्यर्थः। विरोधपरिहारार्थं लक्षणा चेत्, अन्यतरपदलक्षणैव विरोधपरिहारायालं, तदा सविशेषत्वप्रसङ्ग इति **वार्थ**सिद्धः। प्रमाणान्तरेण बाधस्य प्रतिपन्नत्वात्, शब्देन विरुद्धधर्मोपस्थापनाच्च—बाधकल्पनम्, अत्र तूभयाभावात्तदनुपपन्नमित्युक्तम्। तत्र विरुद्धाकारोपस्थापनं शङ्कते—**अधिष्ठानं त्विति**। तदधिष्ठानमतिरोहितस्वरूपं यथा भवति तथोपस्थाप्यत इति क्रियाविशेषणम्। अप्रकाशितविरोधिप्रकाशनं हि बाधकल्पनं, न तु धर्मोपस्थापनमेव बाधकल्पनमिति नियमोऽस्ति, अतस्तत्पदेन प्रागप्रकाशितविरोध्यधिष्ठानस्वरूपप्रकाशनाद्बाधकल्पनमित्यर्थः। अत्राह—**नेति**। किं विरोधिरूपमधिष्ठानं प्रकाशते, उत नेति विकल्प्य, अप्रकाशपक्षे दूषणमाह—**अधिष्ठानेति। तदाश्रये**त्याश्रय**शब्दो विषयपरः। यद्वा, तदधिष्ठानकभ्रमबाधयोरित्यर्थः। प्रकाशपक्षं शङ्कते—**भ्रमेति। भ्रमाश्रयमधिष्ठान**मित्यत्र पाठो निरीक्षणीयः। **आश्रय**शब्दो विषयपरः। **भ्रमाश्रय**मित्यत्र भ्रमस्याश्रयणं—विषयीकरणं यत्रेति वैयधिकरण्येन वा, भ्रम आश्रय आश्रयणीयः संबन्धनीयो येनेति सामानाधिकरण्येन वा कथंचित् बहुव्रीहित्वमपि निर्वोढुं शक्यम्। आरोप्याकाराधिकरणभूतमधिष्ठानमिति **वार्थ**ः। भ्रमाश्रयत्वायातिरोहितमिति चेदित्यर्थः। दूषयति—**तदेवेति**। किमिदमधिष्ठानं विरोधिरूपम्, उताविरोधीति—विकल्पाभिप्रायेण विरोधीति पक्षे दूषणमुक्तम्, अविरोधित्वपक्षे बाधकल्पनानुपपत्तिः, भ्रमानुच्छेदश्चेति दूषणं स्पष्टमिति न तदुक्तम्। **अत इति। पारमार्थिक**शब्दस्यायमभिप्रायः—भ्रमविरोध्याकारस्यापारमार्थिकत्वे अध्यस्तरूपमेव सत्यं स्यात्, **यथा**—शुक्तित्वापारमार्थ्ये रजतत्वं सत्यं भवतीति—यदिदं चोद्यम्। विरोध्याकारस्यापारमार्थ्येऽपि भ्रमनिवृत्तिरुपपद्यते, यथा—पलाशपुष्पविषयदावभ्रमवतो भ्रमरस्य वृन्तविषयभ्रमरभ्रमेण पलाशपुष्पं श्लिष्यतः पलाशपुष्पविषयदावभ्रमः, वृन्तविषयभ्रमरभ्रमश्च निवृत्त इति। यथाहुः—'भ्रमरी भ्रमरभ्रमेण वृन्ते यददावभ्रममाश्लिषत्पलाश'मिति, तदयुक्तं; तत्रापि परमार्थविरोध्याकारेणैव भ्रमविषयनिवृत्तेः। दावत्वविरोधी पलाशपुष्पत्वाकारः परमार्थः, भ्रमरत्वविरोधी वृन्तत्वाकारश्च परमार्थः; अपरमार्थत्वे दावत्वं, भ्रमरत्वं च सत्यं स्यात्। शुक्तित्वे अपरमार्थे रजतत्वमिव वृन्तविषयभ्रमरभ्रमेण दावत्वभ्रमनिवृत्तिरिति चेत्, ततः किं, दावत्वबुद्धिनिवृत्तिर्भ्रमरत्वस्य सत्यत्वप्रतिपत्तिकृता, ततश्चासत्ये सत्यत्वविषयभ्रमान्तरं तिष्ठति, तन्निवृत्तिरप्यसत्यविषयसत्यत्वभ्रमान्तरेणेति—भ्रमपरम्परया निःशेषाविद्यानिवृत्त्यनुपपत्तिः। किंच—दावत्वविषयधीनिवृत्तावपि दावत्वनिवृत्तिर्न भ्रमरभ्रमेण, अपि तु परमार्थपुष्पत्वाकारेणैव; अन्यथा परमार्थरजते अपरमार्थशुक्तित्वबुद्ध्या रजतधीनिवृत्त्या—रजतस्यापि शुक्तित्वप्रसङ्गात्। भ्रमान्तरेण भ्रमान्तरनिवृत्तावनवस्था च स्यात्; निवर्तकभ्रमान्तरस्यापि निवर्तकान्तरापेक्षत्वात्, यथा—रज्वविषयसर्पभूदलनाम्बुधाराभ्रमपरम्परायाः। किंच भ्रमरभ्रमनिवृत्त्यनन्तरं निवर्तकापारमार्थ्यज्ञानादापतद्दावभ्रमः परमार्थपलाशपुष्पत्वग्रहणेनैव प्रतिनिवृत्तः, अतो निःशेषाविद्यानिवृत्तिलक्षणमोक्षवादिना भ्रमपरम्परापर्यवसानार्थमन्ततो गत्वा परमार्थाकारोऽभ्युपगन्तव्यः—रज्वत्ववत्। चरमभ्रमः स्वयमेव न स्यादिति—चेन्न; स्वयं स्वबाधकत्वे कर्मकर्तृविरोधप्रसङ्गात्। किंच—बाधकस्य सत्यात्मकत्वात्, बाध्यस्य मिथ्यात्वात्—एकस्यैव निवर्त्यनिवर्तकत्वाभ्युपगमे—तस्यैव मिथ्यात्वं, सत्यत्वं चेति विरोधः स्यात्। किंच प्रपञ्चोऽपि बाधकानपेक्षः स्वयमेव स्वात्मानं निवर्तयेत्, स्वयं नाशे विनाशस्यावश्यान्तरूपलादविद्या सूक्ष्मरूपेण स्थिता स्यात्, नाशकल्पकाविद्यान्तरं च स्यात्। परमार्थविरुद्ध-

दुरुपपादौ । अधिष्ठाने हि पुरुषमात्राकारे प्रतीयमाने तदतिरेकिणि पारमार्थिके राजत्वे तिरोहिते सत्येव व्याघत्वभ्रमः । राजत्वोपदेशेन च तन्निवृत्तिर्भवति, नाधिष्ठानमात्रोपदेशेन; तस्य प्रकाशमानत्वेनानुपदेश्यत्वात्, भ्रमानुपमर्दित्वाच्च । जीवशरीरकजगत्कारणब्रह्मपरत्वे मुख्यवृत्तं पदद्वयम् । प्रकारद्वयविशिष्टैकवस्तुप्रतिपादनेन सामानाधिकरण्यं च सिद्धम् । निरस्तनिखिलदोषस्य समस्तकल्याणगुणात्मकस्य ब्रह्मणो जीवान्तर्यामित्वमप्यैश्वर्यमपरं प्रतिपादितं भवति । उपक्रमानुकूलता च । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तिश्च; सूक्ष्मचिदचिद्वस्तुशरीरस्यैव ब्रह्मणः स्थूलचिदचिद्वस्तुशरीरत्वेन कार्यत्वात् । **'तमीश्वराणां परमं महेश्वरम्'** (श्वे. ६।७), **'पराऽस्य शक्तिर्विविधैव श्रूयते'** (श्वे. ६।८), **'अपहतपाप्मा'** (छा. ८।१।५-८।७।१), **'सत्यकामः सत्यसंकल्पः'** (छा. ८।१।५-८।७।१), इत्यादिश्रुत्यन्तराविरोधश्च । **'तत्त्वमसि'** (छा. ६।८।७) इत्यत्रोद्देश्योपादेयविभागः कथमिति चेत्, नात्र किंचिदुद्दिश्य किमपि विधीयते । **'ऐतदात्म्यमिदं सर्वम्'** (छा. ६।८।७) इत्यनेनैव प्राप्तत्वात्; अप्राप्ते हि शास्त्रमर्थवत् । इदं सर्वमिति सजीवं जगन्निर्दिश्यैतदात्म्यमिति तस्यैष आत्मेति तत्र

धर्मतत्तिरोधानाभावे—भ्रमबाधासंभवं दृष्टान्तेनोपपादयति—**अधिष्ठाने हीति** । अत्र राजकुमारसमाधिर्भगवतो भाष्यकारस्य ॥

एवं बाधार्थत्वं दूषितम्, अथ स्वपक्षे इमानि दूषणानि न सन्तीत्याह—**जीवशरीरकेति । मुख्यवृत्तमि**त्यनेन लक्षणाहानिरुक्ता । **प्रकारद्वये**त्यनेन सामानाधिकरण्यसिद्धिः । **निरस्तनिखिलदोषस्ये**त्यादिना तत्पदोक्तगुणाविरोधः, **उपक्रमानुकूलता चेति** 'सदेव सोम्येदं, तदैक्षते'त्युपक्रमाविरोध उक्तः । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तिः कथमित्याह—**सूक्ष्मेति** । विशिष्टं कारणं तदेव कार्यमिति **प्रतिज्ञोपपत्ति**रित्यर्थः । श्रुत्यन्तराविरोधमाह—**तमीश्वराणामिति** । वाक्यं चेदुद्देश्योपादेयविभागवत्, उद्देश्यं ह्यवगतम्, उपादेयं विधेयमनवगतम्, अत्र तत्पदं नोद्देश्यसमर्पणपरं; सार्वज्ञ्यादिगुणकत्वस्य प्रत्यक्षाद्यगोचरत्वात् । **त्वं**शब्दस्य चान्तर्यामिपरत्वे सत्युद्देश्यसमर्पकत्वमनुपपन्नम्; अन्तर्यामिणः प्रत्यक्षाद्यविषयत्वात्, तस्मात् **त्वं**शब्देन जीवमात्रमुद्दिश्य तस्य **तत्**पदेन ब्रह्मभावो विधीयत इत्यभ्युपगन्तव्यं, तत्र विरोधान्निर्विशेषवस्त्वैक्यपरं सामानाधिकरण्यं भवतीत्यभिप्रायेण चोदयति—**तत्त्वमसीत्यत्र उद्देश्योपादेयविभागः कथमिति चेदिति** । परिहरति—**नात्रेति** । प्रमाणान्तरागोचरार्थस्य कथमविधानमित्यपेक्षायां—न केवलं प्रत्यक्षाद्यवगतार्थविषयमेव वाक्यमनुवादकम्, अपि तु वाक्यान्तरप्रतिपन्नार्थविषयमप्यनुवादकम्—इत्यभिप्रायेण वाक्यान्तरप्राप्ति दर्शयति—**ऐतदात्म्यमिति** । अस्मिन्नेव प्रकरणे प्रथमप्रतिपन्ननामरूपव्याकरणश्रुत्यैव परमात्मशरीरभूतचिदचिद्वाचकशब्दानां परमात्मपर्यन्तामिधायित्वं च ज्ञातमिति भावः । ततः किमित्यत्राह—**अप्राप्ते हीति** । अप्रतिपन्नार्थविषयं शास्त्रमज्ञातज्ञापनरूपप्रयोजनवदित्यर्थः । अतस्तदेवोद्देश्योपादेयविभागवत्, न तु प्रकृतनिगमनरूपं वाक्यम्, अतोऽस्य निगमनवाक्यस्य प्रतिपन्नार्थविषयत्वान्नोद्देश्योपादेयविभागवत्त्वमिति भावः । ननु—निगमनवाक्यस्याप्युद्देश्योपादेयविभागवत्त्वं प्रतीयते, यथा—'तस्माच्छब्दोऽनित्यः, तस्मादयमग्निमा'नित्यत्र शब्दपर्वताद्युद्देशेन अनित्यत्वाग्निमत्त्वादिकं हि विधेयतया प्रतीयते, नैतद्युक्तं; प्रतिपादितार्थविषयस्य निगमनवाक्यस्याप्रतिपन्नार्थविषयत्वव्याघातात् । प्रतीतिस्तु विधायकवाक्यस्योद्देश्योपादेयसमर्पकपदप्रत्यभिज्ञानात्, निर्देशे प्रथमचरमभावादिसारूप्याच्च—उद्देश्योपादेयविभागवत्त्वभ्रान्तिरेव । 'यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षण'मिति हि नीतिविदः । ननु—सर्वत्रोद्देश्यानुगुणा तिङ्विभक्तिः, अतएव हि युष्मदस्मदोः पदान्तरसामानाधिकरण्येन, परस्परसामानाधिकरण्येन च प्रयोगेषूद्देश्यानुगुणा मध्यमोत्तमपुरुषव्यवस्था दृश्यते—'त्वं भूतानामधिपतिरसि, अहमस्मि प्रथमजा ऋतस्य' तथा 'यदग्ने स्यामहं त्वं त्वं वा स्या अहं स्युष्टे सत्या इहाशिष' इत्यादिषु । **अग्ने अहं त्वं यदि स्यां** त्वमिव देवता स्यां, **त्वमहं यदि स्याः** अहमिवार्थी स्याः, तदा **ते** तवाशिषः **सत्याः स्युरि**त्यर्थः । तस्मात्**तत्त्वमसी**त्यत्रापि मध्यमपुरुषप्रयोगात् **त्वं**पदस्योद्देश्यसमर्पकत्वं, **तत्**पदस्योपादेयसमर्पकत्वमकामेनापि स्वीकार्यं, नैवं; पदद्वयावगतार्थस्य पूर्ववाक्यप्राप्तत्वादेव । तर्हि मध्यमनिर्देशः कथमिति चेत्, उच्यते—**तत्त्वं**पदयोरुभयोरपि प्रयुक्तत्वात्, उद्देश्योपादेयविभागाभावाच्च—प्रथममध्यमपुरुषयोरविशेषेण प्राप्तौ—निगमनवाक्यस्य प्रापकवाक्यानुरोधित्वस्य न्याय्यत्वात्, तत्र च 'इदं सर्वमिति निर्दिष्टजगदन्तर्गतचिद्विशेषविशिष्टपरमात्मवाचिन**स्त्वं**पदस्य प्रापकवाक्यस्थोद्देश्यवाचिपदवाच्यैकदेशविषयत्वात्तदनुरोधेन मध्यमनिर्देश इति । ननु—'ऐतदात्म्यमिदं सर्वं'मित्यत्रेते ब्रह्मानुप्रवेशमुक्त्वा **तत्त्वमसी**ति जीवब्रह्मणोः स्वरूपैक्यमुच्यत इति शङ्कायामाह—**इदं सर्वमिति सजीवं जगन्निर्दिश्येति । सर्व**शब्दो नाचेतन-

प्रतिपादितम् । तत्र च हेतुरुक्तः । **'सन्मूलाः सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः'** (छा. ६।८।४) इति, **'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्तः'** (छा. ३।१४।१) इतिवत् । तथा श्रुत्यन्तराणि च ब्रह्मणः, तद्व्यतिरिक्तस्य चिदचिद्वस्तुनश्च शरीरात्मभावमेव तादात्म्यं वदन्ति । **'अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा'** (तै. आ. ३।११।२), **यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरः । यं पृथिवी न वेद । यस्य पृथिवी शरीरम् । यः पृथिवीमन्तरो यमयति । स त आत्मान्तर्याम्यमृतः'** (बृ. ३।७।३), **'य आत्मनि तिष्ठन्नात्मनोऽन्तरः । यमात्मा न वेद । यस्यात्मा शरीरम् । य आत्मानमन्तरो यमयति । स त अत्मान्तर्याम्यमृतः'** (बृ. ३।७।२२) **'यः पृथिवीमन्तरे संचर'**न्नित्यारभ्य **'यस्य मृत्युः शरीरम् । यं मृत्युर्न वेद । एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः'** (ना. २), **'तत्सृष्ट्वा तदेवानुप्राविशत् । तदनुप्रविश्य सच्च त्यच्चाभवत्'** (तै. २।६।१) इत्यादीनि । अत्रापि **'अनेन जीवेनात्मनानुप्रविश्य**

मात्रपरः; संङ्कोचकाभावेऽपि स्वारस्यभङ्गायोगात्, 'सन्मूलाः सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा' इति पूर्ववाक्ये **सर्व**शब्देन प्रजानां विशेषितत्वात्, प्रजाशब्दस्य चाचित्संसृष्टचेतनविशेषपरत्वात्, 'इदं सर्वमसृजते'त्यादिवाक्यान्तरे विज्ञानाविज्ञानशब्दवाच्यचिदचिदात्मकस्य जगतः **सर्व**शब्देन निर्देशाच्चेति भावः । **ऐतदात्म्य**मिति पदं व्याचष्टे—**तस्यैष आत्मेति । इदं सर्वमिति** । पदद्वयमुद्देश्यसमर्पकम् । **ऐतदात्म्य**मेतदात्मकत्वं विधेयम् । विशिष्टस्य ब्रह्मणः कारणतया प्रकृतत्वेऽपि-**एत**च्छब्दः चिदचिद्विलक्षणविशेष्यांशपरः, अर्थवशात् तदात्मकत्वं—मृदात्मको घट इतिवत् स्वरूपैक्यकृतं स्यादित्यत्राह—**तत्र च हेतुरुक्त इति । सदायतना** इत्यनेन आधाराधेयभाव उक्तः, अनेन शरीरशरीरिभावः सिद्धः; चेतनेन यावदात्मभावितया धार्यत्वं हि शरीरम् । अस्मिन्वाक्ये हेतुत्वमप्रकटमिति तद्बैशद्यायाह—**सर्वं खल्विति** । अत्रापि प्राणनेन सदायतनत्वं फलितं; **सन्मूला** इत्यादिवाक्येनैकार्थ्यात् । तत्र हि **सन्मूला** इति **तज्जत्वं, सत्प्रतिष्ठा** इति **तल्लयत्वं, सदायतना** इति **तदनत्वं** चोच्यते, तच्चान्तःप्रविश्य प्रशासनेन धारकतया स्थितिहेतुत्वम्; 'अन्तः प्रविष्टः शास्ता जनानां, एतस्य वा अक्षरस्य प्रशासने गार्गि सर्वमिदं विधृतं तिष्ठती'त्यादिश्रुतेः । एवं निष्कृष्टब्रह्मस्वरूपस्योपादानलयस्थानत्वायोगात्, सर्वस्य **तदनत्वो**क्त्या च चिदचिच्छरीरकत्वं सिद्धम् । अतः **सर्व**शब्दः कार्यावस्थचिदचिच्छरीरकपरमात्मपरः । ब्रह्मशब्दस्यासङ्कोचेन स्वरूपगुणैर्निरवधिकबृहत्त्ववाचित्वात्, निष्कृष्टब्रह्मणः कारणत्वानुपपत्तिरूपार्थसामर्थ्याच्च—**ब्रह्म**शब्दः कारणावस्थचिदचिद्विशिष्टपरः । एवमुभयावस्थचिदचित्प्रकारिणो ब्रह्मण एकत्वं सामानाधिकरण्यप्रतिपाद्यमिति—कार्यकारणावस्थप्रकार्यैकत्वमस्य वाक्यस्यार्थः । चिदचित्प्रकारित्वं प्रातिपदिकबोध्यम् । अवस्थाद्वयविशिष्टवस्त्वेकत्वं सामानाधिकरण्यबोध्यमिति न वाक्यभेदः, अतो यथोक्त एवार्थः । अथ **सर्वं खल्वि**ति वाक्यप्रतिपन्नस्य तादात्म्यस्य शरीरशरीरिभावनिबन्धनत्वं नियन्तृत्वनियाम्यत्वादिना शरीरशब्देन विशदयितुं श्रुतिवाक्यनि दर्शयति—**तथेति । अन्तः प्रविष्टः शास्तेत्येतत् सर्वात्मक**शब्दव्याख्यानरूपम् । अनेन शरीरात्मभाव उक्तः । अन्तःप्रविश्य नियाम्यत्वं हि शरीरत्वं तत्सृष्टीकरणार्थमुदाहरति—**यः पृथिव्यामिति । यः पृथिव्यां, य आत्मनी**ति पर्यायद्वयेन चेतनाचेतनयोर्भगवन्तं प्रति शरीरत्वमुक्तम् । **आत्मनि तिष्ठन्नि**त्युक्ते-'वेद्यामग्निस्तिष्ठति, तिले तैलं तिष्ठती'तिवद् बहिरबहिःस्थितिसाधारण्यात्तद्वैशद्यार्थमाह—**आत्मनोऽन्तर इति । अन्तरो यमयती**त्यनेन शरीरलक्षणमुक्तं, तस्मात्तन्नियाम्यं तच्छरीरमित्यर्थः । नच—'शिलापुत्रकस्य शरीर'मितिवदयं निर्देशः; अपवादकाभावे व्यतिरेकनिर्देशस्वारस्यभङ्गायोगात्, **यस्य पृथिवी शरीर**मिति व्यतिरेकनिर्देशस्वारस्यभङ्गाभावस्य प्रकरणसिद्धत्वात्, तदपवादकाभावे—तत्राप्यौपचारिकत्वाश्रयणायोगात्, अधिकरणाधिकर्तव्यभाव-व्याप्यव्यापकभाव-अङ्गाङ्गिभाव-नियाम्यनियन्तृभावरूपविरुद्धधर्मैः स्वारस्यभङ्गस्यार्थमपोदितत्वाच्च । **यं पृथिवी न वेदे**ति दृष्टान्तार्थं, यथा अचेतनं न वेत्ति, तथा चेतनोऽपीति भावः । **य आत्मनी**ति पर्यायेण परिशुद्धात्मनो भगवच्छरीरत्वमुच्यते; नक्षत्रचन्द्रादित्यादीनामचित्संसृष्टचेतनविशेषाणां परमात्मशरीरत्वस्य पृथगुक्तत्वात्, 'यः सर्वेषु भूतेषु तिष्ठ'न्नित्यनुक्तानामपि संसृष्टजीवानां परमात्मशरीरत्वस्य पृथगुक्तत्वाच्च । **नच-भूत**शब्दः पृथिव्यादिचिन्मात्रपरः; 'यस्य पृथिवी शरीरं, यस्यापः शरीर'मित्यादिना पृथिव्यादीनां भूतानां पृथगुक्तत्वात् । **यमात्मा न वेदे**तीयत्तया वेदननिषेधः, भगवत्प्रसादेन विना तज्ज्ञानस्य शक्यत्वनिषेधो वा क्रियते । कारणावस्थमपि भगवतः शरीरं, शरीरी च नारायणाख्यो देवताविशेष इति ज्ञापयितुमाह—**यः पृथिवीमन्तरे संचरन्निति** । मृत्युस्तमःशब्दवाच्या प्रकृतिः; तत्रैव तमःशब्दस्थाने मृत्युशब्दपाठात् । शरीरशरीरिभावस्तत्तन्नामभाक्त्वनिर्वाहक इत्याह—**तत्सृष्ट्वेति** । न केवलं श्रुत्यन्तरानुरोधादैतदात्म्यशब्दार्थो निश्चीयते, स्वप्रकरणवाक्यादपीत्याह—**अत्रापीति** । अनेन

नामरूपे व्याकरवाणि' (छा. ६।३।२) इति ब्रह्मात्मकजीवानुप्रवेशेनैव सर्वेषां वस्तुत्वं, शब्दवाच्यत्वं च प्रतिपादितम्। **'तदनुप्रविश्य सच्च त्यच्चाभवत्'** (तै. २।६।१) इत्यनेनैकार्थ्यात्—जीवस्यापि ब्रह्मात्मकत्वं ब्रह्मानुप्रवेशादेवेत्यवगम्यते। अतश्चिदचिदात्मकस्य सर्वस्य वस्तुजातस्य ब्रह्मतादात्म्यमात्मशरीरभावादेवेति निश्चीयते। तस्माद्ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य तच्छरीरत्वेनैव वस्तुत्वात्—तस्य प्रतिपादकोऽपि शब्दस्तत्पर्यन्तमेव स्वार्थमभिदधाति। अतः सर्वशब्दानां लोकव्युत्पत्त्यवगततत्तत्पदार्थविशिष्टब्रह्माभिधायित्वं सिद्धमिति—**'ऐतदात्म्यमिदं सर्वम्'** (छा. ६।८।७) इति प्रतिज्ञातार्थस्य

जीववाचिशब्दस्य परमात्मपर्यन्तत्वमपि श्वेतकेतुनाऽवगतमिति सिद्धम्। **जीवेनात्मना** जीवशरीरकेण मया, 'व्याघ्रेण भूत्वा बहवो मयात्ता' इतिवत्। **नामरूपे** इति पदं व्याचष्टे—**वस्तुत्वं शब्दवाच्यत्वं चेति**। तत्तद्देवादिवस्तुत्वं, देवादिशब्दवाच्यत्वं चेत्यर्थः। अचिद्ब्रह्मणोस्तादात्म्यमनुप्रवेशकृतमस्तु, जीवब्रह्मणोस्तु स्वरूपैक्यकृतमेव स्यात्: जीवेन मयेति श्रवणादित्यत्राह—**तदनुप्रविश्येति**। ननु—जीवमनुप्रविष्टस्यापि ब्रह्मणो नामवाच्यत्वं न व्याकरणात् सिध्यति; नामरूपव्याकरणश्रुतेर्नामवाच्यत्वप्रतिपादनपरत्वाभावात्, यथा—रूपव्याकरणं रूपनिष्पादनमात्रं, न तु स्वस्य तद्वोध्यत्वापादनम्, एवं—नामव्याकरणमपि शब्दसृष्टिरेव, न तु तद्वोध्यत्वापादनमिति, नैवं; 'तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत' इति समानवाक्य **इदं**शब्दवाच्यजगदात्मकब्रह्मणः प्रलयदशायामुपसंहृतनामरूपस्य सृष्टिदशायां नामरूपाभ्यां व्याकृतत्वश्रवणात्। **नामरूपाभ्या**मितीत्थंभावे तृतीया, नामरूपाभ्यां विशिष्टमक्रियतेत्यर्थः। नच—नामकर्तृत्वमेव नामविशिष्टत्वं, न तु नामवाच्यत्वमिति वक्तुं युक्तं; संज्ञासंज्ञिसंबन्धव्युत्पादके, नामोच्चारयितरि च—पुरुषे घटादिनामविशिष्टत्वाप्रसिद्धेः। नामवाच्यस्यैव हि नामविशिष्टत्वाप्रसिद्धिः, उच्चारयितुः शब्दोपादानत्वाभावन्नामविशिष्टत्वाप्रसिद्धिः। कृत्स्नोपादानस्य तु ब्रह्मणः शब्दोपादानत्वायोगात्—रूपविशिष्टत्ववन्नामविशिष्टत्वोपपत्तिरिति—चेन्नः नभसि घटादिनामविशिष्टत्वाप्रसिद्धेः। न हि घटादिनामविशिष्टत्वे कथिते नभसो नामित्वं स्वरसतः प्रतीयते, वाच्यत्वेन शब्दसंबन्धिन्येव हि नामित्वप्रतीतिः स्वारस्यम्। नच—लक्षणादिवृत्त्यापि तत्तन्नामबोध्यत्वं ब्रह्मणः संभवतीति वाच्यं; लक्षणागौणवृत्तिगोचरयोः कूलमाणवकयोर्गङ्गापदाभिपदापेक्षया नामित्वाप्रसिद्धेः। ननु—श्येनशब्दस्य यागविशेषं प्रति गौणनामत्वं निर्णीतं, सत्यं, तदगत्याश्रितं; प्राणहारित्वगुणसाम्यात् प्रयोगान्यथासिद्धेः। 'यथा वै श्येनो निपत्यादत्त' इति हि श्रुतिः। मुख्यस्यैव हि शब्दस्य नामत्वप्रतीतिः स्वतःप्राप्ता, अत्र तु स्वतःप्राप्तस्य मुख्यत्वस्यापवादाभावान्न तत्प्रहाणं युक्तम्, अतोऽनेन वाक्येन नामवाच्यत्वं शब्दस्वारस्यादवगम्यते, एतदैकार्थ्यान्**नामरूपे व्याकरवाणी**त्यत्रापि ब्रह्मपर्यन्तं नामरूपव्याकरणमेव विवक्षितम्। किंच—न तावद्वर्णसृष्टिप्रतिपादनशङ्कापि भवितुमर्हति: **नाम**शब्दस्य वर्णमात्रपर्यायत्वाभावात्। ब्रह्मव्यतिरिक्तसमस्ततत्तत्पदार्थस्वरूपनिष्पादनस्य रूपव्याकरणोक्तिसिद्धत्वेन—गगनासाधारणरूपशब्दनिष्पादनस्यापि रूपव्याकरणोक्तयैव सिद्धत्वात्—तत्प्रतिपादनवैयर्थ्यं च स्यात्। नच **रूप**शब्दस्य गोबलीवर्दन्यायेन सङ्कोचः; सङ्कोचकस्य नामव्याकरणनिर्देशस्यान्यथासिद्धत्वात्। अतोनिष्पाद्यमानतत्तद्रूपवाचकशब्दव्युत्पादनमेव नामव्याकरणं स्यात्, तत्र **बहु स्या**मित्यनेन वक्ष्यमाणबहुत्वस्य ब्रह्मविशेषणत्वावगमात्, अस्मिन्वाक्येऽपि व्याकरणस्यानुप्रवेशपूर्वकत्वप्रतिपादनाच्च—व्याक्रियमाणरूपस्य ब्रह्मविशेषणत्वमवगम्यते, अतो ब्रह्मविशेषणरूपसमभिव्याहारात्—नाम्नोऽपि ब्रह्मविशेषणत्वमवगम्यते। नाम्नो विशेषणत्वं वाचकतयैवेत्युपपादितम्। कृत्स्नस्य रूपस्य ब्रह्मविशेषणत्वावगमात्, तद्रूपप्रवृत्तिनिमित्तकत्वाच्च—नाम्नां ब्रह्मविशेषणत्वं तस्य वाचकतयैवेत्यवगम्यते। वक्ष्यमाणबहुत्वविषयस्य **बहु**शब्दस्योपक्रमे ब्रह्मपर्यन्तत्वेन प्रयोगदर्शनात्—उपक्रमोक्तबहुलावान्तरमिदारूपतत्तद्रूपवाचिनां च नाम्नां ब्रह्मवाचकतया तद्विशेषणत्वमित्यवगम्यते। **तत्तेज ऐक्षत, ता आप ऐक्षन्ते**ति प्रकरणे तेजःप्रभृतिशब्दानां परमात्मविषयतया प्रयोगदर्शनाच्च—नाम्नां ब्रह्मविशेषणत्वं तद्वाचकतयेत्यवगम्यते। 'वचसां वाच्यमुत्तमं, हरिरखिलागिरुदीर्यते तयैकः, नताः स्मः सर्ववचसां प्रतिष्ठा यत्र शश्वती'त्यादिस्मृतिस्वारस्याच्च—नामवाच्यत्वमवगम्यते। ततश्च **नामरूपे व्याकरवाणी**ति श्रुतिः चिदचिद्विशिष्टस्य ब्रह्मणस्तन्नामवाच्यत्वमेव प्रतिपादयतीति सिद्धम्। **ऐतदात्म्य**शब्दार्थव्याख्यानं निगमयति—**अत इति**। शरीरवाचिशब्दानां शरीरिपर्यन्तत्वं निगमयति—**तस्मादिति**। तस्मादुदाहृतवाक्यैः शरीरशरीरिभावप्रतिपादनात्, तस्य तत्तन्नामभाक्त्वनिर्वाहकत्वाच्चेत्यर्थः। ननु—न तत्पर्यन्तामिधानमुपपद्यते; लोके तत्तद्वस्तुमात्रपर्यन्तत्वेन व्युत्पन्नतया व्युत्पत्तिभङ्गप्रसङ्गात्, ब्रह्मण एकत्वेन द्वित्वबहुत्वानुपपत्तेश्चेत्यत्राह—**अतः सर्वशब्दानामिति। लोकव्युत्पत्ति**शब्दस्यायं भावः—नात्र व्युत्पत्तिविरोधः; व्युत्पन्नार्थापरित्यागात्। ब्रह्मणो लौकिकप्रमाणागोचरतया—तत्पर्यन्तव्युत्पत्त्यभावः, न त्ववाचकतयेति सोऽन्यथासिद्धः। यथा—लिङादेरपूर्ववाचित्वं वेदव्युत्पत्त्याऽवगम्य लोकतो व्युत्पत्त्यभावपरिहारः **कार्य**वाक्यार्थवादिभिरुच्यते—तद्वत् तत्पदार्थविशिष्टशब्देन ब्रह्मणोऽपि द्वित्वबहुत्वादिकं सद्वारकमुपपन्नमित्युक्तं भवति। **तत्त्वमसी**त्यस्योपसंहारवाक्यत्वमाह—**इत्यैतदात्म्यमिति**। सामानाधिकरण्येन विशेष उपसंहार इति वैयधिकरण्येन प्रतिज्ञा-

'तत्त्वमसि' (छा. ६।८।७) इति सामानाधिकरण्येन विशेषेणोपसंहारः। अतो निर्विशेषवस्त्वैक्यवादिनः, भेदाभेदवादिनः, केवलभेदवादिनश्च—वैयधिकरण्येन, सामानाधिकरण्येन च ब्रह्मात्मभावोपदेशाः सर्वे परित्यक्ताः स्युः। एकस्मिन्वस्तुनि कस्य तादात्म्यमुपदिश्यते, तस्यैवेति चेत्, तत्स्ववाक्येनैवावगतमिति—न तादात्म्योपदेशावसेयमस्ति किंचित्। कल्पितभेदनिरसनमिति चेत्, तत्तु न सामानाधिकरण्यतादात्म्योपदेशावसेयमित्युक्तम्। सामानाधिकरण्यं तु ब्रह्मणि प्रकारद्वयप्रतिपादनेन विरोधमेवावहेत्। भेदाभेदवादे तु ब्रह्मण्येवोपाधिसंसर्गोत्तत्प्रयुक्तजीवगतदोषा ब्रह्मण्येव प्रादुःष्युरिति—निरस्तनिखिलदोषकल्याणगुणात्मकब्रह्मात्मभावोपदेशा हि विरोधादेव परित्यक्ताः स्युः। स्वाभाविकभेदाभेदवादेपि—ब्रह्मणः स्वत एव जीवभावाभ्युपगमाद्गुणवद्दोषाश्च स्वाभाविका भवेयुरिति—निर्दोषब्रह्मतादात्म्योपदेशो विरुद्ध एव। केवलभेदवादिनां चात्यन्तभिन्नयोः केनापि प्रकारेणैक्यासंभवा-

---

तस्य सामानाधिकरण्येनोपसंहारः, सामान्येन प्रतिज्ञातस्य विशेष उपसंहार इत्यर्थः। **तदैक्षते**त्यादिना तच्छब्दार्थः प्रतिपन्नः, **ऐतदात्म्य**मित्यादिना जीवस्य ब्रह्मात्मकत्वं प्रतिपन्नम्, **अनेन जीवेने**त्यादिना जीववाच्यशब्दानां ब्रह्मपर्यन्तत्वंच प्रतिपन्नमिति—नात्रोद्देश्योपादेयविभागः। अयं ह्यप्राप्तार्थप्रतिपादकवाक्यानां, न तु निगमनवाक्यानां; तेषां प्राप्तविषयत्वात्। निगमनं चोक्तार्थप्रतिष्ठार्थत्वादपेक्षितं दृश्यते, तस्मान्निगमनवाक्येऽस्मिन्नुद्देश्योपादेयविभागमुखेन चोद्यस्य नावकाश इति परिहार उक्तो भवति। यत्र ह्यप्राप्तार्थपरवाक्ये जगद्ब्रह्मणोः सामानाधिकरण्यं तत्र ब्रह्मणस्तत्तद्रूपनामभाक्त्वं विधेयं ज्ञातव्यम्॥

एवं भेदश्रुतिषटकश्रुत्यविरोधार्थं **तत्त्वमसी**ति वाक्यसामानाधिकरण्यं शरीरशरीरिभावेनोपपादितं, शरीरवाचिशब्दानां शरीरिपर्यन्तामिधानं जातिगुणपदयोर्व्यक्तिगुणिपर्यन्ताभिधानवत् संभवतीत्याकृत्यधिकरणन्यायेनोपपिपादयिषुः शरीरवाचिशब्दानां आकृत्यधिकरणन्यायविषयतानिरूपणरूपस्य 'अंशो नानाव्यपदेशा'दित्यधिकरणस्य पूर्वपक्षभूतेष्वर्थेषु दूषणमाह—**अत इति। अतः** जगद्ब्रह्मणोः श्रुतिभिः शरीरशरीरिभावप्रतिपादनात्, तस्य च तत्तन्नामभाक्त्वनिर्वाहकत्वाच्चेत्यर्थः। 'भेदाभेदवादिशब्देनौपाधिक-स्वाभाविकभेदाभेदवादिनोर्द्वयोरपि तत्त्रेणोक्तिः। केवल**भेद**शब्देन स्वपर्यवसितभेदो विवक्षितः। तद्वादिनश्च वैशेषिकादयः। वैयधिकरण्यं च—'अस्यैष आत्मे' त्येवंरूपत्वादुपदेशस्य। ब्रह्मात्मभावोपदेशपरित्यागः कथमिति शङ्कायां मृषावादिपक्षे तदनुपपत्तिं वक्तुमाह—**एकस्मिन्निति**। शङ्कते—**तस्यैवेति**। प्रतिवक्ति—**तदिति। स्ववाक्येन सत्यंज्ञान**मित्यादिना स्ववाक्येन-स्वरूपपरवाक्येन। प्रतिपन्नादधिकार्थप्रतिपत्तिरस्ति, न वा। प्रथमे—सविशेषत्वं, द्वितीये—तादात्म्योपदेशवैयर्थ्यमिति भावः। पुनः शङ्कते—**कल्पितेति**। दूषयति—**तदिति**। प्रकारद्वयोपस्थापकत्वादिति भावः। **सामानाधिकरण्यतादात्म्येति**। सामानाधिकरण्येन तादात्म्योपदेशावसेयमित्यर्थः। न केवलमसाधकत्वं, विरुद्धमपीत्याह—**सामानाधिकरण्यं त्विति**। औपाधिकभेदाभेदवादे तदनुपपत्तिमाह—**भेदाभेदेति**। क्लेशकर्माद्यस्पृष्टः सार्वज्ञ्यादिगुणको हीश्वरः, अतः **ईश्वरस्य** निर्दोषस्य तदनर्हानीश्वरतादात्म्यव्याघातादीश्वरतादात्म्योपदेशो विरुद्ध इत्यर्थः। **परित्यक्ताः स्युः** परित्यागः फलित इत्यर्थः। स्वाभाविकभेदाभेदपक्षे तदनुपपत्तिमाह—**स्वाभाविकेति**। गुणवद्दोषाश्च स्वाभाविका भवेयुरिति—ब्रह्मण ईश्वरांशेन सार्वज्ञ्यादिगुणा इव जीवांशेन दोषाश्च स्वाभाविका भवेयुः। 'अनादिर्भगवान् कालो नान्तोऽस्य द्विज विद्यते। अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसंयमा' इति संसारप्रवाहानन्त्येन दोषा नित्याः **स्युरित्यर्थः**। यद्वा, तत्तद्दोषसंबन्धार्हत्वं स्वाभाविकं स्यादित्यर्थः। ततः किमित्यत्राह—**इति निर्दोषेति**। सद्ब्रह्मात्मादिशब्दानां **नारायण**शब्दपर्यवसायित्वेनेश्वरातिरिक्तवस्तुनिषेधादिभिः—ईश्वरस्यैव ब्रह्मत्वं सिद्धं कृत्वा, **निरवद्यं निरञ्जन**मित्यादिश्रुत्यर्क्तं ब्रह्मणो निर्दोषत्वं चाभिप्रेत्य निर्दोषब्रह्मतादात्म्योपदेशविरोध उक्तः। निर्दोषश्रुतिविरोधः फलितः। तर्हि—निर्दोषश्रुतिविरोध इति वक्तव्ये किमर्थं **निर्दोषब्रह्मतादात्म्योपदेशो विरुद्ध** इत्युक्तम्, उच्यते—हेयानर्हतादात्म्यं हि पुरुषार्थः, स्वरूपैक्ये च ब्रह्मणो हेयार्हत्वात्—हेयार्हब्रह्मतादात्म्यधीर्न हेयापहा तत्तादात्म्यानुभवोऽप्यपुरुषार्थश्चेत्युपायत्वप्राप्यत्वविरोधात्—तादात्म्योपदेशपरवाक्यस्य प्रयोजनपर्यवसानं न स्यात्; न ह्यसिना छिद्यमानस्य, कालाग्निना दह्यमानस्य च पुरुषस्योपासनमुपासकानर्थं परिहरति। नच तत्तादात्म्यधीः कस्यचित्पुरुषार्थः—तद्वदिति ज्ञापनाय **तादात्म्योपदेशो विरुद्ध** इत्युक्तम्। स्वनिष्ठभेदपक्षं दूषयति—**केवलेति। अत्यन्तभिन्नयोः** प्रकारप्रकारिभावरहितयोरित्यर्थः। **केनापि प्रकारेण** विशेष्यांशतोऽप्यैक्यासिद्धिरित्यर्थः॥

देव ब्रह्मात्मभावोपदेशा न संभवन्तीति सर्ववेदान्तपरित्यागः स्यात्। निखिलोपनिषत्प्रसिद्धं कृत्स्नस्य ब्रह्मशरीरभावमातिष्ठमानैः कृत्स्नस्य ब्रह्मात्मभावोपदेशाः सर्वे सम्यगुपपादिता भवन्ति। जातिगुणयोरिव द्रव्याणामपि शरीरभावेन विशेषणत्वेन 'गौरश्वो मनुष्यो देवो जातः पुरुषः कर्मभिरिति सामानाधिकरण्यं लोकवेदयोर्मुख्यमेव दृष्टचरम्। जातिगुणयोरपि द्रव्यप्रकारत्वमेव 'खण्डो गौः, शुक्लः पट' इति सामानाधिकरण्यनिबन्धनम्। मनुष्यत्वादिविशिष्टपिण्डानामप्यात्मनः प्रकारतयैव पदार्थत्वा'न्मनुष्यः पुरुषः षण्डो योषिद्वात्मा जात' इति सामानाधिकरण्यं सर्वत्रानुगतमिति—प्रकारत्वमेव सामानाधिकरण्यनिबन्धनं, न परस्परव्यावृत्ता जात्यादयः। स्वनिष्ठानामेव हि द्रव्याणां कदाचित्कचिद्द्रव्यविशेषणत्वे मत्वर्थीयः प्रत्ययो दृष्टः—दण्डी कुण्डलीति, न पृथक्प्रतिपत्तिस्थित्यनर्हाणां द्रव्याणाम्। तेषां विशेषणत्वं सामानाधिकरण्यावसेयमेव। यदि—'गौरश्वो मनुष्यो देवः पुरुषो योषित्पण्ड आत्मा कर्मभिर्जात' इत्यत्र 'खण्डो मुण्डो गौः, शुक्लः पटः कृष्णः पट' इति जातिगुणवदात्मप्रकारत्वं मनुष्यादिशरीराणामिष्यते, तर्हि—जातिव्यक्त्योरिव प्रकारप्रकारिणोः शरीरात्मनोरपि नियमेन सहप्रतिपत्तिः स्यात्, न चैवं दृश्यते। न हि नियमेन गोत्वादिवदात्माश्रयतयैवात्मना सह मनुष्यादिशरीरं पश्यन्ति। अतो मनुष्य आत्मेति सामानाधिकरण्यं लाक्षणिकमेव। नैतदेवं; मनुष्यादिशरीराणामप्यात्मैकाश्रयत्वं, तदेकप्रयोजनत्वं, तत्प्रकारत्वं च जात्यादितुल्यम्। आत्मैकाश्रयत्वमात्मविश्लेषे शरीरविनाशादवग-

---

एवं पूर्वपक्षचतुष्टयेऽप्यनुपपत्तिमुक्त्वा स्वपक्षे वैषम्यमाह—**निखिलेति**। **सम्यक्छब्देन** मुख्यत्वं विवक्षितं, कथं मुख्यत्वमित्यत्राह—**जातिगुणयोरिति**। दण्डादिव्यावृत्त्यर्थमाह—**शरीरभावेन विशेषणत्वेनेति**। कथं मुख्यमेव दृष्टचरमित्युच्यते, अमुख्यत्वेऽपि हि प्रयोगः संभवति, अमुख्यत्वं च शरीरस्य द्रव्यत्वात्, न हि दण्डकुण्डलादिशब्दानां विशेष्यपर्यन्ताभिधानं दृष्टं, तस्मादद्रव्यत्वे सति विशेषणत्वं, जातिगुणयोरन्यतरत्वे सति विशेषणत्वं वा मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्ये प्रयोजकमिति—शरीरवाचिशब्दस्य विशेष्यपर्यन्ताभिधानममुख्यमित्यत्राह—**जातिगुणयोरपीति**। **एव**कारेण जातिगुणयोरन्यतरत्वादेः प्रयोजकत्वव्युदासः। ततः किमित्यत्राह—**मनुष्यत्वादीति**। अत्र **प्रकार**शब्दो विशेषणमात्रपरः। **एव**कारेण दण्डकुण्डलादिव्यावृत्तिरभिप्रेता। **सामानाधिकरण्यमनुगतमितीति**। सामानाधिकरण्यस्यानुगतत्वात्—अनुगतमेव तत्प्रयोजकं वाच्यमित्यर्थः। जातित्वगुणत्वादेः प्रयोजकत्वं किं न स्यादित्यत आह—**न परस्परेति**। **परस्परव्यावृत्ताः** परस्परानानुयायिनः। **जात्यादयः** जातित्वादयः। अयमभिप्रायः—गङ्गायां घोष इत्यादिषु प्रवाहकूलयोर्गङ्गापदप्रवृत्तिनिमित्तभूतस्यानुयायिन आकारस्यादर्शनात्—तत्र लाक्षणिकत्वं युक्तम्, अत्रतु—यत्र यत्र विशेष्यपर्यन्ताभिधायित्वेन प्रयोगो दृष्टचरः तत्र तत्र प्रयोगेष्वनुवृत्ताकारदर्शनात्—अननुगताकारप्रयोजकलाभ्रयणेन कल्पिलाक्षणिकत्वं वक्तुमयुक्तम्; अन्यथा अद्रव्यत्वे सति विशेषणत्वं विशेष्यपर्यन्ताभिधाने प्रयोजकमित्यपि न वक्तव्यम्। जातित्वं, गुणत्वं वा प्रयोजकमस्तु, अन्यल्लाक्षणिकं स्यात्, न च तथा भवदभिमतं; जातिगुणवाचिनामुभयेषामपि हि शब्दानां विशेष्यपर्यवसायिलेन प्रयोगदर्शनात्, तस्माच्छरीरवाचिशब्दानामपि विशेष्यपर्यन्ताभिधायिलेन प्रयोगदर्शनात्, प्रयोगेषु सर्वेष्वनुवृत्तैकाकारदर्शनाच्च—अननुवृत्ताकारान्तरस्य प्रयोजकत्वकल्पनेनान्यतरस्यामुख्यत्वकल्पनाया अयुक्तत्वात्—इदमपि सामानाधिकरण्यं जातिगुणवाचिशब्दानामिव मुख्यमेवेति। ननु—प्रकारभूतद्रव्यवाचिपदानां मत्वर्थीयप्रत्ययनिरपेक्षविशेष्यपर्यन्ताभिधायित्वं दण्डादिशब्दानां तथात्वादर्शनादनुपपन्नम्—इति शङ्कायां, प्रकारतयैवेति पूर्वमभिप्रेतं विवृणोति—**स्वनिष्ठानामेव हीति**। अपृथक्सिद्धप्रकारवाचित्वमेव मत्त्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यप्रयोजकमित्यर्थः। यत्र यत्र नियतप्रकारत्वं तत्र तत्र सहोपलम्भनियमो दृष्टः, शरीरे तु सहोपलम्भनियमाभावादपृथक्सिद्धविशेषणत्वमनुपपन्नं—तस्मात्सामानाधिकरण्यं लाक्षणिकमित्यभिप्रायेण चोदयति—**यदि गौरश्व इति**। पक्षे व्यापकविपर्ययं दर्शयति—**न चैवमिति**। तद्विवृणोति—**न हीति**। ततः किमित्यत्राह—**अत इति**। परिहरति—**नैतदेवमिति**। सहोपलम्भनियमस्य नियतप्रकारताप्रयोजकत्वे दूषणं वक्ष्यन्, प्रथमं शरीरस्यापृथग्विशेषणत्वं संप्रतिपन्नमिति दर्शयति—**मनुष्यादीति**। आत्मैकाश्रयत्वतदेकार्थत्वयोरन्यतरान्वितं प्रकारत्वमपृथक्सिद्धविशेषणत्वमित्यर्थः। यद्वा, **प्रकारत्व**शब्देन प्रकारतयैव प्रतीतिर्विवक्षिता; उत्तरत्र प्रकारत्वविवरणे आत्मविशेषणतयैव प्रतीतेरिति वक्ष्यमाणत्वात्। तेन विशेष्यप्रतिपत्तिसंभवे—**दण्डकुण्डलादिवत्पृथगवस्थितत्वेन** प्रतिपन्नत्वाभावः फलितः। **तदेकाश्रयत्वं, तदेकप्रयोजनत्वं,** विशेष्यप्रतीतिसंभवे पृथक्स्थितत्वेनाप्रतीतत्वं चापृथक्सिद्धविशेषणत्वे प्रयोजकमित्यर्थः। तेषु त्रिष्वात्मैकाश्रयत्वं पक्षे दर्शयति—**आत्मैकाश्रयत्व-**

म्यते। आत्मैकप्रयोजनत्वं च तत्तत्कर्मफलभोगार्थतयैव सद्भावात्। तत्प्रकारत्वमपि देवो मनुष्य इत्यात्मविशेषणतयैव प्रतीतेः। एतदेव हि गवादिशब्दानां व्यक्तिपर्यन्तत्वे हेतुः। एतत्स्वभावविरहादेव दण्डकुण्डलादीनां विशेषणत्वे दण्डी कुण्डलीति मत्त्वर्थीयः प्रत्ययः। देवमनुष्यादिपिण्डानामात्मैकाश्रयत्व-तदेकप्रयोजनत्व-तत्प्रकारत्वस्वभावादेवो मनुष्य आत्मेति लोकवेदयोः सामानाधिकरण्येन व्यवहारः। जातिव्यक्त्योर्नियमेन सहप्रतीतिरुभयोश्चाक्षुषत्वात्। आत्मनस्त्वचाक्षुषत्वाच्चक्षुषा शरीरग्रहणवेलायामात्मा न गृह्यते। पृथग्ग्रहणयोग्यस्य प्रकारतैकस्वरूपत्वं दुर्घटमिति मा वोचः;; जात्यादिवत्तदेकाश्रयत्व-तदेकप्रयोजनत्व-तद्विशेषणत्वैः शरीरस्यापि तत्प्रकारतैकस्वभावत्वावगमात्। सहोपलम्भनियमस्त्वेकसामग्रीवेद्यत्वनिबन्धन इत्युक्तम्। यथा—चक्षुषा पृथिव्यादेर्गन्धरसादिसंबन्धित्वं स्वाभाविकमपि न गृह्यते, एवं—चक्षुषा गृह्यमाणं शरीरमात्मप्रकारतैकस्वभावमपि न तथा गृह्यते; आत्मग्रहणे चक्षुषः सामर्थ्याभावात्। नैतावता शरीरस्य तत्प्रकारत्वस्वभावविरहः;; तत्प्रकारतैकस्वभावत्वमेव सामानाधिकरण्यनिबन्धनम्। आत्मप्रकारतया प्रतिपादनसमर्थस्तु शब्दः सहैव प्रकारतया प्रतिपादयति। ननु च—शाब्देपि व्यवहारे शरीरशब्देन शरीरमात्रं गृह्यत इति—नात्मपर्यन्तता शरीरशब्दस्य, नैवम्;

मिति। तदेकप्रयोजनत्वं दर्शयति—**आत्मैकेति**। नच—दुःखैकफलनारकशरीरेष्वव्याप्तिः; दुःखस्याप्रयोजनत्वेऽपि तेषां पापक्षयरूपप्रयोजनहेतुत्वात्। नच—पश्वादिप्रीतिहेतुषु मृत्यादिदेहेषु तदेकप्रयोजनत्वादतिव्याप्तिः शङ्कनीया; तत्प्रयोजनसाधनत्वेन विना स्थित्यभावस्य विवक्षितत्वात्। क्रयविक्रयार्हस्य तदेकप्रयोजनत्वं हि न सिध्यति; तत्कर्मफलभोगार्थतयैव सद्भावादिति ह्युक्तम्। अत**स्तदेकप्रयोजन**शब्दस्याप्ययमेवार्थः। अथ तत्प्रकारत्वं दर्शयति—**तत्प्रकारत्वमपीति**। विशेष्यप्रतीतिसिद्धौ तत्पृथक्सिद्धत्वेन प्रतीत्यभाव**स्तत्प्रकारत्व**शब्देन विवक्षित इत्यर्थः। पञ्चमीनिर्देश औपचारिकः। यद्वा, तत एव तत्प्रकारत्वेनोक्तमित्यर्थः। अथवा, पृथक्स्थितत्वप्रतीत्यभावे प्रतीतिविशेषो हेतुतयोदाहियते। एतत्तदेकाश्रयत्वादित्रितयं सपक्षेऽपि दर्शयति—**एतदेवहीति**। विपक्षव्यावृत्तत्वं दर्शयति—**एतत्स्वभावेति**। ईदृशप्रकारत्वमेव पक्षे मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यहेतुरित्याह—**देवमनुष्यादीति**। सहोपलम्भनियमस्यान्यथासिद्धिमाह—**जातिव्यक्त्योरिति**। सहोपलम्भनियमस्तदेकसामग्रीवेद्यत्वप्रयुक्तः; न त्वपृथक्सिद्धविशेषणत्वप्रयुक्त इत्यर्थः। **चाक्षुषत्व**प्रदर्शनार्थमुक्तम्। उपाधेरपक्षस्थत्वं दर्शयति—**आत्मनस्त्विति**। एकसामग्रीवेद्यत्वमपृथक्सिद्धविशेषणत्वे प्रयोजकमिति तदभावान्नापृथक्सिद्धविशेषणत्वमित्याशङ्क्याह—**पृथग्ग्रहणेति**। **स्वरूपं** धर्मः प्रकारत्वमेव धर्मो यस्य तत्**प्रकारतैकस्वरूपम्**। **एक**शब्देन कदाचिदप्रकारत्वस्य व्युदासः, ततश्च दण्डकुण्डलादिवैषम्यम्। किमपृथक्सिद्धविशेषणत्वे प्रयोजकान्तराभावादेकसामग्रीवेद्यत्वं प्रयोजकमुच्यते, उतास्मानुयायिलिङ्गादिदमपि प्रयोजकमुच्यते—इति विकल्पमभिप्रेत्य, प्रथमं शिरः प्रतिवदति—**जात्यादीति**। **प्रकारतैकस्वभावत्वावगमा**दित्यत्र **स्वभाव**शब्देनैव प्रकारत्वनियमे सिद्धेऽप्येक-शब्दप्रयोग एकसामग्रीवेद्यतास्वभावत्वव्यावृत्त्यर्थः। यदि तदेकाश्रयत्वादिरेवापृथग्विशेषणत्वे प्रयोजकः, कथं तर्हि जात्यादौ सहोपलम्भनियम इत्यत्राह—**सहोपलम्भेति**। अनेन पूर्वं चाक्षुषत्वोक्तिरेकसामग्रीवेद्यत्वप्रदर्शनार्थेति स्पष्टम्। अथ पूर्वोक्तविकल्पे द्वितीयशिरसि चापृथग्विशेषणत्वप्रयोजकतयोच्यमानमिदं-किं मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यप्रयोगविषयेषु सर्वेष्वनुयायि, उत भवदभिमतजातिगुणेष्वेवानुयायीति विकल्योऽभिप्रेतः। तत्र न प्रथमः; देहात्मनोरेकसामग्रीवेद्यत्वाभावात्। ततश्चानुगतप्रयोजकसद्भावात्-अपृथग्विशेषणत्वस्याप्यनुगतत्वेन—सामानाधिकरण्यप्रयोगाणां सर्वेषां मुख्यत्वे संभवत्यननुगतमाकारं प्रयोजकत्वेनाङ्गीकृत्यापृथग्विशेषणत्वमपि सङ्कुचितं कृत्वा तद्द्वारा सामानाधिकरण्यप्रयोगाणाममुख्यत्वाश्रयणमनुपपन्नमित्यर्थसिद्धम्। **प्रकारतैकस्वभावत्वावगमा**दित्यत्रैक**शब्देनैकसामग्रीवेद्यतास्वभावत्वस्य व्युदस्तत्वात्। अथ परोभिमतस्थलानुयायिलिङ्गे द्वितीयशिरसि गन्धादौ व्यभिचारेण दूषणं वदन्, एकसामग्रीवेद्यत्वस्यापृथग्विशेषणत्वाव्यापकत्वमाह—**यथेति**। न त्वचाक्षुषत्वापि गन्धस्य पृथिवीनियतप्रकारत्वहानिः। **एवं**शब्दो यथाशब्दप्रतिनिर्देशरूपः। कस्मादग्रहणमित्यत्राह—**आत्मग्रहण इति**। व्यापकत्वाभावफलमाह—**नैतावतेति**। **एतावता** चक्षुषा ग्रहणाभावमात्रात्। न तत्प्रकारत्वस्वभावहानिः; एकसामग्रीवेद्यत्वस्यापृथग्विशेषणताव्यापकत्वाभावात्, तदेकाश्रयत्वादिप्रयोजकान्तरसद्भावाच्चेति भावः। ततः किमित्यत्राह—**तत्प्रकारतेति**। **एक**शब्द एकसामग्रीवेद्यतास्वभावत्वव्युदासपरः। **एव**कारः सहोपलम्भनियमव्युदासार्थः। अपृथग्विशेषणत्वे सति शरीरस्य केनापि प्रमाणेन तत्त्वथोपलभ्येतेत्यत्राह—**आत्मेति**॥

शब्दोऽपि न शरीरपर्यन्तामिधायीति चोदयति—**ननु चेति**। परिहरति—**नैवमिति**। इमौ चोद्यपरिहारौ आकृत्य-

आत्मप्रकारभूतस्यैव शरीरस्य पदार्थविवेकप्रदर्शनाय निरूपणात्—निष्कर्षकशब्दोयं—यथा गोत्वं शुक्लत्वमाकृतिर्गुण इत्यादिशब्दाः। अतो गवादिशब्दवद्देवमनुष्यादिशब्दा आत्मपर्यन्ताः। एवं देवमनु-

---

धिकरणेऽपि समानाविलमिप्रायेणाह—**यथा गोत्वमिति**। निष्कर्षकशब्दानां विशेष्यपर्यन्तामिधायित्वाभावे—चेतनाचेतनवाचिनः शब्दा न ब्रह्मपर्यन्तामिधायिनो भवन्ति; 'यस्यात्मा शरीरं, यस्य पृथिवी शरीरम्' इत्यादिष्वात्मादिशब्दानां निष्कर्षकशब्दत्वावगमादिति चेत्, उच्यते—निष्कर्षकशब्दो द्विविधः—वैवक्षिकनिष्कर्षकः, नियतनिष्कर्षकश्चेति—तत्र शरीरादिशब्दा नियतनिष्कर्षकाः, आत्मादिशब्दा वैवक्षिकनिष्कर्षकाः—गोत्वादिशब्दवत्, शुक्लादिशब्दवच्च। प्रयोगस्य व्यवस्थापकत्वात्—निष्कर्षकानिष्कर्षकविभागोऽपि हि प्रयोगाधीनः, तद्वदयमपि विभागस्तन्मूलः। ननु—शुक्लादिशब्दा नियतनिष्कर्षका एव, गुणिपर्यन्तता तु—'गुणवचनेभ्यो मतुपो लुग्वक्तव्य' इति स्मरणात्, मैवं: जातिवाचिशब्दवदपृथक्सिद्धविशेषणवाचित्वाविशेषात् शुक्लादिशब्दानां, प्रत्ययस्तु द्विशब्दस्थद्वित्वनिवत् प्रकृत्यनतिरिक्तार्थत्वेऽतिरिक्ततया शब्दसाधुत्वाय, स्वरविशेषाय च भवति। तत एव हि 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वती'ति नैघण्टुकाः। यतः स्वतो गुणिपर्यन्तानामेव गुणवाचिपदानां लिङ्गस्वरार्थं मतुब्लोपस्मरणं, न तु गुण्यभिधानशक्तिविरहिणां गुण्यभिधानार्थम्, अत एव हि रागपदस्य रक्तपदतुल्यतया प्रयोगाभावः, अतः शुक्लादिशब्दा वैवक्षिकनिष्कर्षकाः। नियतनिष्कर्षकाणामपि तथात्वं प्रतियोगिविशेषापेक्षं, न तु सार्वत्रिकं: 'रसोऽहमप्सु कौन्तेय प्रभाऽस्मि शशिसूर्ययोः, पुण्यो गन्धः पृथिव्यां चे'ति गन्धादिशब्दानामपि परमात्मपर्यन्ततया प्रयोगात्। अतः पृथिव्याद्यपेक्षयैव गन्धादिशब्दानां नियतनिष्कर्षकत्वम्॥

शरीरवाचिशब्दानां शरीरिपर्यन्ततां निगमयति—**अतो गवादीति। आत्मपर्यन्ताः** आत्मपर्यन्तशक्तयः। शरीरवाचिशब्दैरात्मबोधनं शक्तिनिबन्धनतया मुख्यमित्यर्थः। ननु—यद्यपि शरीरवाचिशब्दा आकृतिनयगोचराः, तथापि तैः शरीरिबोधनं लाक्षणिकं; गवादिशब्दैरपि व्यक्तिबोधनस्य लाक्षणिकत्वात्। संबन्धानुपपत्तिभ्यां हि लक्षणा। जातिमात्रस्यानयनाद्यनर्हत्वात्, व्यक्तिसंबन्धाच्च—गवादिशब्दैर्व्यक्तिर्लक्षणया बोध्यते; प्रयोगे अन्यथासिद्धे शक्तिकल्पनानुपपत्तेः, नैवम्; अयुतसिद्धविशेषणवाचिशब्दत्वस्य विशेष्यलक्षणाप्रतिबन्धकत्वात्; अन्यथा जात्यादिशब्दानामपि संबन्धानुपपत्त्यविशेषेण क्वचिद्व्यक्तिपर्यन्तप्रयोगप्रसङ्गः। आकृतिरेव शब्दशक्तिविषयः, व्यक्तिबोधस्त्वर्थसामर्थ्यात्, प्रत्यभिज्ञायां संस्कारसचिवेन्द्रियवदर्थसामर्थ्यसचिवा शब्दशक्तिर्विशिष्टबोधसामग्री—इत्यपि न युक्तं; जात्यादिशब्दश्रवणेऽपि विशिष्टबोधप्रसङ्गादेव। न हि सत्यां सामग्र्यां कार्यानुदय उपपद्यते। ननु—गवादिशब्दा जातेर्व्यक्तिपरतन्त्रतारूपमभिदधति, अतस्तैर्व्यक्तिपर्यन्तबोधः, जात्यादिशब्दास्तु जातिस्वरूपमात्रम्, अतस्तैर्व्यक्तिपर्यन्तबोधाभावः, नैवं; जात्यादिशब्दैर्द्रव्यपारतन्त्र्याप्रतिपत्तौ द्रव्यविलक्षणतया जातिप्रतीत्यनुपपत्तेः। ननु—न जातेर्द्रव्यप्रकारतैकस्वभावत्वरूपपारतन्त्र्यबोधनं विवक्षितं, किंतु विशेषणान्तरान्वयकारकभावानर्हत्वरूपपारतन्त्र्यबोधनमिति; उच्यते—गवादिशब्दैस्तादृक्त्वबोधनमेकपदेन विशेष्याभिधाननिबन्धनं; न हि कुण्डलीत्युक्ते कुण्डलस्य रुचिरत्वादिविशेषणान्वयः, कुण्डलेन भूषित इतिवत्कारकभावश्च भवति। एवं च सति पारतन्त्र्यबोधनाद् व्यक्त्यबोधनेऽभ्युपगम्यमानेऽन्योन्याश्रयः स्यात्—पारतन्त्र्याबोधनाद्विशेष्याबोधनं, तदबोधनात्पारतन्त्र्याबोधनम्—इति। किंच गवादिशब्दानां विशेष्यबोधनशक्तिरहे—जात्यादिशब्दानामिव पारतन्त्र्यबोधनासामर्थ्यप्रसङ्गः; धर्मिबोधनासामर्थ्यव्यापकता जात्यादिशब्देषु दृष्टं पारतन्त्र्यबोधनासामर्थ्यं गवादिशब्देभ्यो निवर्तमानं स्वव्याप्यं धर्मिबोधनासामर्थ्यं कथं न निवर्तयेत्। द्रव्यांशे शक्तिर्माभूत्, जातेर्व्यक्तिपारतन्त्र्यमपि गवादिशब्दा बोधयेयुरिति—न वाच्यं; द्रव्यांशे शक्तिविरहिंतैर्जात्यादिशब्दैरपि द्रव्यपारतन्त्र्यबोधनप्रसङ्गात्। अतः शब्दशक्तिनिबन्धनैर्गवादिशब्दैर्द्रव्यप्रतीतिः। किंच—यदि जातिमात्रमेव मुख्यार्थः, तर्हि—अमुख्यभूतद्रव्यपर्यन्तप्रयोगादपि जातिमात्रे गवादिशब्दानां प्रचुरप्रयोगप्रसङ्गः; मुख्यार्थगुणसंबन्धिविषयप्रयोगादपि मुख्यार्थे प्रचुरप्रयोगदर्शनात्। गङ्गाग्निसिंहादिशब्दानां कूलमाणवकादिविषयप्रयोगादपि मुख्यार्थे प्रचुरप्रयोगो दृष्टः, न तु व्यक्तिनिष्ठा गौः व्यक्तिनिष्ठो महिष इति प्रयोगः। जातिरेव मुख्यार्थश्चेद्गवादिशब्दानां जातिमात्रविषयप्रयोगे—लतलादिनैरपेक्ष्यं च स्यात्; न हि गङ्गादिशब्दाः प्रवाहादिविषयप्रयोगे भावप्रत्ययान्ताः प्रयुज्यन्ते। प्रचुरप्रयोगाभावो, भावप्रत्ययापेक्षत्वं च गवादिशब्दानां व्यक्तौ निरूढलक्षणायोगादिति—चेन्न; प्रचुरप्रयोगानुगतिर्हि लक्षणया निरूढिः, ततश्च प्रचुरप्रयोगाभावात्प्रचुरप्रयोगाभाव इति परिहारो न घटते; प्रसङ्गस्य प्रसञ्जनीयाभावपरिहार्यत्वाभावात्; न ह्यग्निमत्त्वप्रसङ्गोऽग्न्यभावात्परिहियते। भावप्रत्ययानपेक्षलप्रसङ्गश्च दुष्परिहरः; शुक्लादिशब्दानां गुणिबोधने निरूढलक्षणाभ्युपगमेऽपि 'पटस्य शुक्ल' इति गुणमात्रपरप्रयोगे भावप्रत्ययानपेक्षत्वदर्शनात्। शुक्लादिशब्दानां हि लुप्तमतुवर्थलक्षणा परैरभ्युपगता, यथा—समासेषु प्रातिपदिकेनाप्रयुक्तविभक्त्यर्थलक्षणेष्यते। लक्षणायां निरूढिर्नाम—सर्वप्रयोगानुगतिरिति—चेन्न; गोशब्दे तदभावप्रसङ्गात्, अनुवृत्तो गोव्यवहार इति गोत्वमात्रेऽपि हि गोशब्दः क्वापि प्रयुज्यते। किंच—सर्वप्रयोगानुगता वृत्तिर्लक्षणैव न स्यात्—आकृतिविषयवृत्तिवत्। ननु—अनन्यथासिद्धा वृत्तिर्मुख्या, सत्यम्,

द्यादिपिण्डविशिष्टानां जीवानां परमात्मशरीरतया तत्प्रकारत्वाज्जीवात्मवाचिनः शब्दाः परमात्मपर्यन्ताः। अतः परस्य ब्रह्मणः प्रकारतयैव चिदचिद्वस्तुनः पदार्थत्वमिति तत्सामानाधिकरण्येन प्रयोगः । अयमर्थो वेदार्थसंग्रहे समर्थितः । इदमेव शरीरात्मभावलक्षणं तादात्म्यम्—'आत्मेतितूपगच्छन्ति ग्राहयन्ति

अनन्यथासिद्धिश्च दर्शिताः अयुतसिद्धविशेषणवाचिशब्दानां विशेष्यलक्षणासामर्थ्याभावस्योपपादितत्वात् । ननु—स्वपक्षे धर्मिवाचिपदानां भावप्रधाननिर्देशेषु मुख्यैकदेशे लक्षणाऽभिमता, अस्माकं तु गवादिशब्दानां व्यक्तौ लक्षणा, तत्र शक्तेर्विशेषणविशेष्यगोचरत्वकल्पने भवतां गौरवं स्यात् । स्यादेव, स तु नात्र दोषः; लाघवेन निर्वाहायोग्यस्थले गौरवस्य दोषत्वाभावात्—लक्षणाश्रयणानुपपत्तिर्हि दर्शिता । किंच—गामानयेत्यादिषु व्यक्तिप्रतीतिरर्थसामर्थ्याद्भवति चेत्, तर्हि—विवक्षिताया जातेः प्रतिसंबन्धिभूतं द्रव्यमुपसर्जनतया प्रतीयेत, ततश्च 'पुत्रः पितेतिवत् 'खण्डो गौरय'मिति सामानाधिकरण्यं न स्यात्; पुत्रमानयेत्यत्र हि ममेत्यनुक्तेऽप्यर्थवशाद्विवक्षितपुत्रप्रतिसंबन्धिपितृत्वेन प्रतीयमानो देवदत्तः पुत्रं प्रति गुणतया प्रतीयते, न तु विशेष्यत्वेन; प्रधानतया तदवच्छेदार्थलाभात्तस्य, गवादिशब्देषु तु द्रव्यमेव प्रधानतया प्रतीयते, गङ्गायां घोष इत्यत्र प्रवाहस्याविवक्षितत्वात्—कूलस्य तदुपसर्जनतया प्रतीत्यभावः, छत्रिणो गच्छन्तीत्यत्र त्वच्छत्रिणां छत्रिप्रतिसंबन्धितया प्रतीयमानत्वाभावात्—छत्रिगुणभावेन प्रतीत्यभावः, अतो विवक्षितार्थप्रतिसंबन्धितया प्रतीयमानत्वेऽपि प्रधानतया प्रतीयमानं द्रव्यं शब्दशक्त्यैव प्रतीयते—'अयं पुत्री'त्यत्र पुत्रिशब्देन प्रतीयमानपुत्रिवत् । किंच विशेष्यांशे शक्तिमता रूपिशब्देन रूपप्रतिपत्तिदर्शनात्, तद्रहितेन रूपशब्देन विशेष्यप्रतिपत्तिदर्शनाभावाच्च—शब्दविशेषोपश्लिष्टविशेष्यप्रतीतिरन्वयव्यतिरेकाभ्यां शब्दशक्तिनिबन्धनेत्यध्यवसीयते, अतो गवादिशब्दानां विशेष्यबोधकत्वं शक्तिनिबन्धनम् । ननु—व्यक्तीनामानन्त्यात्तासु संबन्धग्रहोऽनुपपन्नः; एकस्यां व्यक्तौ शब्दवाच्यता व्युत्पत्तिश्चेद् व्यक्त्यन्तरस्य गोशब्दवाच्यत्वं न स्यात्, नैवं; यत्र जातिस्तत्रायं शब्द इत्येवं रूपत्वाद्व्युत्पत्तेः, अतो वाच्यतानिमित्तस्यैकत्वात्प्रत्येकव्युत्पत्त्यनपेक्षा । युगपत्सर्वव्यक्तीनां वाच्यताव्युत्पत्तिरेकैकव्यक्तौ वाच्यतानिमित्तस्य पुष्कलत्वादेकैकव्यक्तेर्वाच्यत्वसिद्धिश्च घटते कथमनन्तानां व्यक्तीनां बुद्धावारोपणं शक्यमिति—चेत्, व्यक्तीनां शब्दवाच्यत्वं प्रतिषेधता त्वया व्यक्तयः प्रतिपन्नाः, न वा । न चेत्, तासु शब्दवाच्यत्वनिषेधोऽनुपपन्नः, लब्धरूपे क्वचित्किंचित्तादृगेव निषिध्यते । प्रतिपन्नाश्चेत् किं कतिपयव्यक्तयः प्रतिपन्नाः, उत सर्वाः । प्रथमे—सर्वव्यक्तीनां शब्दवाच्यत्वनिषेधायोगः । द्वितीये—त्वमिव सर्वे सर्वा व्यक्तीः प्रतिपद्येरन्, व्युत्पद्येरंश्च, अतो गवादिशब्दाः स्वशक्त्यैव व्यक्तिबोधकाः, तद्व्यच्छरीरवाचिशब्दानामपि स्वशक्त्यैव शरीरिपर्यन्तबोधकत्वं सिद्धम् ॥ एवं शरीरवाचिशब्दाः शरीरिपर्यन्ताः स्युस्ततः किं परमात्मचिदचिद्वाचिशब्दानां सामानाधिकरण्यस्येत्यत्राह—**एवमिति**। प्रयोजकाकारं वदन्निगमयति—**अत इति । एवं तत्त्वमसी**ति वाक्येन चिदचिच्छरीरकस्य कारणावस्थस्य कार्यावस्थस्य च ब्रह्मण एकत्वं प्रतिपादितम् । न च प्रकार्यैक्यं, कार्यकारणैक्यं चेत्यर्थभेदाद्वाक्यभेदः शङ्कनीयः; प्रकारित्वस्य पदवागम्यत्वात् । तत्पदं हि प्रकृतवाचकं, प्रकृतं हि सार्वज्ञ्यादिगुणकं जगच्छरीरकं कारणं—'तदैक्षत, एकमेव, बहु स्यां तत्तेजोऽसृजत, अनुप्रविश्य नामरूपे व्याकरवाणि, सदायतनाः सत्प्रतिष्ठा' इत्यादिश्रुतिपृत्लैकत्वानुप्रवेशपूर्वकनामरूपव्याकरणधारणश्रवणात् । अतस्तत्पदं सार्वज्ञ्यादिगुणकजगच्छरीरकब्रह्मपरं, त्वंपदं च कार्यावित्संसृष्टजीवविशेषविशिष्टब्रह्मपरम्, अत उभयावस्थस्य ब्रह्मणः चिदचित्प्रकारवत्त्वं पदावगतं, पदद्वयस्थसमानविभक्त्या कारणावस्थस्य कार्यावस्थस्य च ब्रह्मण एकत्वमवगम्यते, अतो न वाक्यभेदः । अतः कार्यकारणावस्थप्रकार्यैकत्वं **तत्त्वमसी**ति वाक्येन प्रतिपादितम् । परमात्मानं प्रति जगतः शरीरत्वं कथं, अस्मिन् सिद्धे शरीरत्वप्रयुक्ता दोषाः स्युः, उक्तस्यानुग्राहकस्य न्यायस्य किमनुग्राह्यं प्रमाणं, कथं व्युत्पत्तिविरोधपरिहार इति शङ्कायामाह—**अयमर्थ इति** । परेण स्वरूपैक्यपरत्वेनोदाहृतं सूत्रं, वाक्यकारवचनं च व्याचष्टे—**इदमेवेत्यादिना** । अत्रायमर्थः सङ्कलय्यानुसन्धेयः—मृषावादिभिः सामानाधिकरण्यनिर्वाहा बहुधा व्याकृताः, तत्र सामानाधिकरण्यस्यातद्व्यावृत्तिमुखेन वस्तुमात्रपरत्वं सत्यादिवाक्यनिरूपणेन निरस्तम् । व्यावृत्तीनामुपलक्षणतापक्षे—पदान्तरवैयर्थ्यात्, विशेषणत्वाभ्युपगमे—मुख्ये संभवति लाक्षणिकार्थस्वीकारायोगाच्च । **तत्त्वमसी**ति वाक्ये चान्वयमुखेन स्वरूपमात्रपरत्वे—तत्पदस्य प्रकृतपरामर्शित्वभङ्गः, पदद्वयलक्षणा, प्रवृत्तिनिमित्तभेदाभावात्—सामानाधिकरण्यलक्षणहानिः, उपलक्षणरूपप्रवृत्तिनिमित्ताश्रयणे पदान्तरवैयर्थ्यं, **तदैक्षते**त्यादुपक्रमविरोधः, श्रुत्यन्तरविरोधः उपक्रमोपक्रमविरोधः, तिरोधानाद्युपपत्तिरूपतर्कविरोधश्च—इति दूषणान्युक्तानि । बाधार्थत्वे च—स्वरूपलक्षणा, नञर्थलक्षणा चेति पदद्वयलक्षणादयो दोषाः । प्रत्यक्षेण बाधादर्शनात्—बाधपरत्वानुपपत्तिः, पदान्तरेण विरोधिधर्मानुपस्थानेन विरोधाभावात्—बाधकल्पनानुपपत्तिः—इत्यधिकं दूषणद्वयं चोक्तम् । तथा—**सर्वं खल्विदं ब्रह्मे**त्यत्र सामानाधिकरण्यस्य चातदाकारारोपणनिबन्धनत्वमयुक्तं; सर्वत्र—ब्रह्मत्वयोरेकाश्रयत्वाभावेन सामानाधिकरण्यलक्षणाभावात्, परमार्थतः ऐकाधिकरण्ये संभवत्यपरमार्थैक्यविषयत्वाश्रयणानुपपत्तेश्च । ऐक्यापारमार्थ्यं हि

सामानाधिकरण्ये वाक्यप्रामाण्यं हीयते; प्रतिपिपादयिषितस्यैक्यस्य मिथ्यात्वात्। एवमचिद्ब्रह्मणोः सामानाधिकरण्यं सत्यानृतयोरैक्याभावात्—अयुक्तम्। अन्तःकरणचिन्मात्रयोरैक्याभावात्—**ब्रह्माहं ब्रह्मासीति** सामानाधिकरण्यं न घटते। **अहंशब्दस्य** अन्तःकरणोपहितज्ञप्तिवाचित्वात्—तदुपपत्तिरिति चेन्न; **अहंशब्दस्यान्तःकरणोपहितज्ञप्तिवाचित्वाभावात्**। यथा—'अहमिच्छामि द्वेष्मी'तीच्छादेरहमर्थविशेषणतया व्यवहारादहंशब्दस्य नान्तःकरणोपहितेच्छादिवाचित्वम्, एवम्—'अहं जानामी'ति प्रयोगात्तदुपहितज्ञप्तिवाचित्वमप्यहंशब्दस्यानुपपन्नम्। न हि ज्ञप्तिरेव इच्छया विशेष्यते। ज्ञातृज्ञेयतदवच्छिन्नज्ञानातिरिक्तस्य कस्यचिज्ज्ञानस्य शशविषाणायमानस्य लौकिकबुद्ध्यगोचरत्वात्—न तद्विवक्षयाहंशब्दप्रयोगोपपत्तिः। अतोऽहं **ब्रह्मासीति** सामानाधिकरण्यमयुक्तम्। अन्तःकरणद्वयैक्याभावात्, अहमादिशब्दानां पूर्वोक्तन्यायेन तदुपहितज्ञप्तिवाचित्वाभावाच्च—**अहं मनुरभवमि**त्यादिसामानाधिकरण्यं चानुपपन्नम्। प्राणाद्यचेतनजीवयोरैक्याभावात्—'प्राणोऽस्मि प्रज्ञात्मा' अहमेवेदं सर्वं, मत्तः सर्वमहं सर्व'मित्यादि चायुक्तम्। 'अहं हरिः सर्वमिदं जनार्दन' इति जीवेश्वरवाचिनोः, अचिदीश्वरवाचिनोश्च शब्दयोः सामानाधिकरण्यमयुक्तं; जीवेश्वरयोः, पृथिव्यादीनां च चिन्मात्रे कल्पितत्वात्। न हि रज्वुकल्पित-सर्प-भूदलन-अम्बुधारावाचिनां शब्दानां मिथः सामानाधिकरण्यम्। **अहं हरिः सर्वमि**त्यादिशब्दानामध्यस्तवाचिनामधिष्ठानभूतब्रह्मपरत्वादेकार्थवृत्तित्वमिति—चेन्न; आकृतिवाचिनां व्यक्तिपर्यन्ततयैवाध्यस्तवाचिनां शब्दानामधिष्ठानवाचित्वेन व्युत्पत्त्यभावात्। न हि रजतशब्दस्य शुक्तिलाश्रयद्रव्यवाचित्वेन व्युत्पत्तिः, तदभावश्च शुक्तिशकलादौ रजतादिशब्दप्रवृत्तिनिमित्तभूतरजतत्वादेरभावात्। ननु—अध्यस्तवाचिनः शब्दा अधिष्ठाने मुख्यवृत्ताः; 'इदं रजत'मिति वृद्धव्यवहारमूलव्युत्पत्तिसद्भावादिति—चेत्, उच्यते; यदर्थविवक्षया शब्दप्रयोगोऽनन्यथासिद्धः तस्य तद्वाचित्वनिश्चयः, तत्रेदं वक्तव्यम्—अध्यस्तवाचिनः शब्दस्याधिष्ठानपर्यन्तत्वे—किं भ्रान्तप्रयोगो मूलम्, उत प्रबुद्धप्रयोगः। न प्रथमः; रजतपुरोवर्तिनोऽनध्यस्तत्वानधिष्ठानत्वबुध्यैव तत्र रजतशब्दप्रयोग इति—तस्याध्यस्तवाचिनोऽधिष्ठानपर्यन्तत्वासाधकत्वात्। न द्वितीयः; देवदत्तज्ञानादेवदत्तशब्दप्रयोगो देवदत्तशब्दस्य यज्ञदत्तवाचित्वे मूलं भवति। द्वितीये च—'रज्जुसर्प' इति प्रयोगः सर्पशब्दस्य प्रागनारोपितबुद्धमूलप्रयोगानुवादरूपत्वात्—आरोपितविषयशक्तिकल्पने मूलं न स्यात्। ननु—अप्रथक्सिद्धविशेषणवाचिशब्दानां विशेष्यपर्यन्तत्वमिष्टम्, अध्यस्तं चाधिष्ठानस्याप्रथग्विशेषणं; तस्मिन् सत्यवभासात्, तेन विना तदनवभासाच्चेति—चेन्न; अन्यत्र सतो विशेषणस्य पुरोऽवस्थितं प्रत्यप्रथक्सिद्ध्यभावात्, अध्यासपक्षे चाध्यस्तत्वाधिष्ठानत्वयोरवाभावात्, मृषावादिपक्षे मृद्विवर्तस्य घटादेः कनकं प्रतीवाविद्याख्यदोषविवर्तस्य रजतस्य पुरोऽवस्थितं प्रत्यप्रथग्विशेषणत्वायोगाच्चेति, अतो जीवेश्वरसामानाधिकरण्यमयुक्तम्। किं च—**तत्त्वमस्यादिवाक्येषु ब्रह्मवाचकपदसमभिव्याहृतं त्वमादिजीववाचिपदं—किं मुख्यार्थाप्रहाणेन** समानाधिकरणम्, उत तत्प्रहाणेन। प्रथमे—**वस्तुनः** सविशेषत्वं, दोषार्हतदनर्हयोरैक्यानुपपत्तिश्च। द्वितीये—जीवब्रह्मणोरैक्यं न सिध्येत्। जीवभावस्य मिथ्यात्वेनाधिष्ठानमात्रपारमार्थ्यं च न सिध्येत्; प्रकृत्यंशविवक्षितार्थैकत्वपरायाः समानंविभक्तेस्तदंविवक्षितार्थैकत्वप्रतिपादनासामर्थ्यात्, तदविवक्षितविशेषणमिथ्यात्वप्रतिपादनासामर्थ्याच्च। नहि 'प्रह्लष्टो जनपदः, अग्निर्माणवक' इत्यत्र जनपदप्रहर्षवतोरग्निमाणवकयोश्चैकत्वं, जनपदाग्नित्वयोर्मिथ्यात्वेन तदधिष्ठानमात्रपारमार्थ्यं च सिध्यति। जनपदशब्देन वाच्यबहिर्भूतो लक्ष्यते, **त्वं**शब्देन तु वाच्यैकदेशो लक्ष्यत इति तस्य तत्तादृविधानेऽधिष्ठानैक्यं, विरोधाज्जीवभावमिथ्यात्वं च सिध्यतीति—चेन्न; **त्वमादि**शब्दानां ज्ञातृपदसमानाधिकरणानां ज्ञप्तिवैयधिकरण्येन ज्ञप्तिवाचित्वासिद्ध्या वाच्यैकदेशलक्षणाया दुर्वचत्वात्। तत्सिद्धावपि नाधिष्ठानैक्यम्, इतराकारमिथ्यात्वं च सिध्येत्; नहि दूरस्थस्य पर्वतस्याग्रे ज्वलन्तमग्निं दृष्ट्वा पर्वतो ज्वालित इत्युक्ते पर्वताग्न्योरैक्यत्वं, सान्वादिप्रदेशांन्तरमिथ्यात्वेनाधिष्ठानमात्रपारमार्थ्यं च सिध्यति, अतो विवक्षितैकत्वजीवभावमिथ्यात्वसिद्धिः। अतः सर्वं सामानाधिकरण्यं मृषावादिनां विरुद्धम्। औपाधिकभेदाभेदपक्षेऽपि मुख्यया वृत्त्या सामानाधिकरण्यमनुपपन्नं; तथा हि—ईश्वर एव हि ब्रह्म तन्मते, जीवेश्वरयोः, अचिदीश्वरयोश्च क्रियाकर्मार्थहेत्वतदनर्हत्व-परिणामित्वापरिणामित्वलक्षणविरुद्धस्वभावयोगात्—तद्वाचिशब्दानां घटपटादिशब्दानामिव न सामानाधिकरण्यम्। भेदवदभेदस्यापि विषमानत्वात्तदुपपत्तिरिति—चेन्न; सत्यपि केनाप्याकारेणैक्ये प्रवृत्तिनिमित्तभावाभावलक्षणे विशेष्यांशभेदे प्रतीयमाने समानविभक्तेरेकत्वप्रतिपादनासामर्थ्यात्। यतः प्रथमपदप्रतिपन्नविशेष्यात्पदान्तरविशेष्यस्यांशतोऽपि भेदासहमभिन्नत्वमेव सामानाधिकरण्यावबोध्यम्, तत एव हि खण्डमुण्डयोर्व्यक्तिजात्यात्मनां, घटशरावयोः कार्यकारणरूपेण, गोपुच्छयोरेकदेशैकदेशिभावेन, भिन्नत्ववदभिन्नत्वेऽप्युपगम्यमानेऽपि खण्डो मुण्डो घटः शरावो गौः पुच्छमिति सामानाधिकरण्याभावः। ननु—चिदचितोर्नैकदेशत्वात् शुक्लः कृष्णो रक्तश्चायं पट इतिवत् 'व्यक्तं विष्णुस्तथाव्यक्तं पुरुषः काल एव चे'त्यादिसामानाधिकरण्यमुपपद्यते, नैवम्; एकदेशैकदेशिभावे सत्यप्यङ्गुलिः पुरुष इति सामानाधिकरण्यादर्शनात्। ननु—शुक्लादिशब्दतुल्यत्वं किं न स्यात्; उच्यते—पटस्यांशभेदे शुक्लादिशब्दानां पटशब्दश्रवणात्प्राक्षिप्तः सामानाधिकरण्याभावे च सत्यपि शौक्ल्यादीनामप्रथक्सिद्धविशेषणतया शुक्लादिशब्दैर्विशेष्यपर्यन्तैः सह चित्रशब्देनेवामिहितादिशेष्यात्पटशब्दाभिहितविशेष्यस्यांशतोऽप्यनतिरेकात् सामानाधिकरण्यम्। इत्यादीन्यनेकदे-

च' (ब्र. सू. ४।१।३) इति वक्ष्यति। 'आत्मेत्येव तु गृह्णीयात्' (बो.वृत्तिः) इति च वाक्यकारः। अत्रेदं तत्त्वम्—अचिद्वस्तुनः, चिद्वस्तुनः, परस्य च ब्रह्मणो भोग्यत्वेन, भोक्तृत्वेन, चेशितृत्वेन च स्वरूपविवेकमाहुः काश्चन श्रुतयः—'अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया संनिरुद्धः। मायां

शवां छेदनाद्यर्हाणामेकदेशिनं प्रत्यपृथक्सिद्धविशेषणत्वं नास्ति; छेदनादावपीन्द्रियाणामविनाशित्वात्, तत्तद्दोलकस्याप्रच्युतस्वरूपत्वाच्च। एवं सति छिन्नहस्तादिवत् मृतशरीरस्याप्यप्रच्युतस्वरूपोपलम्भादात्मानं प्रति तस्यापृथक्सिद्धिर्न स्यादिति—चेन्न; शरीराख्यसंघातशैथिल्यानन्तरमेव आत्मोत्क्रमणात्पश्चाच्छरीरबुद्धेर्दग्धपटे पटबुद्धिन्यायेन भ्रान्तिरूपत्वात्। हस्तादीनां तु छेदनदशायामशिथिलावशानां पश्चाच्छैथिल्यमिति विशेषः, अतस्तद्वाचिशब्दानां हस्तादिमात्रवाचिलाद्धस्तावयवसंघाद्वात्मकस्यैकदेशिनो हस्तादिमात्रातिरेकानतिरेकलक्षणमेकत्वं प्रमाणविरुद्धतया समानविभक्तिर्न प्रतिपादयितुं शक्नोति। ननु—हस्तलादयो धर्माः शौक्ल्यादिवदपृथक्सिद्धाः घटस्येव शरीरादेरेकदेशे वर्तन्ते, अतः शुक्लः कृष्णः पट इतिवद्धस्तः पादो मनुष्य इति युक्तं वक्तुं, युक्त्यनभिज्ञलालोको न प्रयुङ्क्ते; उच्यते—युक्त्यनभिज्ञो विज्ञेऽपि शुक्लादिशब्दान् विशेष्यपर्यन्तान् प्रयुङ्क्ते, न तु हस्तादिशब्दानेकदेशिपर्यन्तान्, अतोऽभिज्ञानभिज्ञप्रयोगानुगुण्यं व्यवस्थापकं वक्तव्यं, तद्भूमः—केचित्पृथक्सिद्धधर्माः कस्यचिदेकदेश एव नियमेन वर्तन्ते, एकदेशे चान्यत्र वा केचिदनियमेन वर्तन्ते, तत्र नियतैकदेशवृत्तिधर्मवाचिनः शब्दास्तदेकदेशभूतद्रव्यमात्रे वर्तन्ते, एकदेशलप्रतीत्युत्पादननियमादेकदेशतयैव हस्तादयः प्रतीयन्ते, एकदेशवृत्तिनियमरहितधर्मवाचिनः शब्दा एकदेशलप्रतीतिनियममपहाय विशेष्ये वर्तन्ते, अतः शुक्लादिशब्दैरेकदेशलं हित्वा तदाश्रयमात्रोपस्थापनात्, तदुपस्थापिताश्रयात्पटत्वाश्रयस्यानतिरेकात्—पटशब्दस्य सामानाधिकरण्यं युक्तम्। एकदेशमात्रोपस्थापकैर्हस्तादिशब्दैरेकदेशिनोऽनुपस्थापितत्वेन—हस्तादिप्रातिपदिकप्रतिपन्नविशेष्यातिरेकात्—सामानाधिकरण्यमयुक्तम्। यदि क्वचित् सामानाधिकरण्यं विद्यते तत्र हस्तादिशब्दस्य तद्वति लक्षणया वा, मनुष्यादिशब्दस्य तदेकदेशलक्षणया वा, प्राधान्याद्यभिप्रायेणोपचारेण वा स्यात्। छिद्रमाकाशमित्यत्र लाकाशलस्य समुदायवृत्तिलाभावेन छिद्रे पुष्कलतयाऽनेकदेशलक्षणाजीवलचित्त्वाचित्त्वादिधर्माश्च लन्मते ब्रह्मणो नियतैकदेशवृत्तय इति—न तद्वाचिशब्दैरीश्वरवाचिशब्दानां मुख्यया वृत्त्या सामानाधिकरण्यम्। ननु—शिरः पाणिरुदरं पादश्च शरीरमिति दृश्यते प्रयोगः, सत्यं, प्रभूतकृत्स्नावयवोपादानेऽवयविनस्तदनतिरेकात्सामानाधिकरण्यसंभवः, प्रत्येकं सामानाधिकरण्यं तु एकदेशलक्षणाप्रसाङ्गादमुख्यमेव। एवं चिदचिद्विशेषवाचिशब्देष्वेकैकस्येश्वरवाचिपदसामानाधिकरण्यमयुक्तं स्यात्; एकदेशवाचिशब्दानामेकदेशिनि शक्त्यभावात्। 'व्यक्तं विष्णुस्थाऽव्यक्तं, ज्योतींषि विष्णुर्भुवनानि विष्णुः, भूतानि विष्णुर्भुवनानि विष्णु'रितिहि प्रत्येकसामानाधिकरण्यम्। अहंसर्वमित्यचिज्जीववाचिपदयोरपि तद्वदेव सामानाधिकरण्यमयुक्तम्। सर्वत्रामुख्यया वृत्त्या ब्रह्मोपस्थापनेन सामानाधिकरण्ये स एव दोषः; मुख्यसामानाधिकरण्ये संभवत्यमुख्यवृत्त्याश्रयणस्यान्याय्यत्वात्। स्वाभाविकभेदाभेदपक्षेऽपि भोक्तृभोग्यनियन्तृणां त्रयाणामपि ब्रह्मांशत्वाभ्युपगमात्—अचिज्जीवयोः, अचिदीश्वरयोः, जीवेश्वरयोश्च सामानाधिकरण्यं घटः शराव इतिवदनुपपन्नमित्येतदवस्थितम्। अंशतोऽपि विशेष्यभेदासहस्यैवामेदस्य सामानाधिकरण्यबोध्यत्वात्तेषां ब्रह्मसामानाधिकरण्यमपि विन्यम्। ब्रह्मवाचिपदानां सत्तद्रव्यत्वादिः साधारणाकारः प्रवृत्तिनिमित्तं चेत्तत्त्वमसीत्युक्ते सदसि द्रव्यमसीत्युक्तं स्यात्, तदानीमुपदेशवैयर्थ्यं; नहि कश्चिद्दहमसदहमद्रव्यमिति मन्यते। सदन्तरैकत्वमुपदेष्टव्यमिति—चेन्न; तस्य सामानाधिकरण्यबोध्यत्वाभावात्। सामानाधिकरण्यं हि पूर्वनिर्दिष्टस्य विशेषस्य पदान्तरोपस्थापितविशेषणान्वयमवगमयति, न तु तद्विशेषणान्वितवस्त्वन्तरैक्यं; न हि 'ब्राह्मणस्त्वमसी'त्युक्ते लंशब्दनिर्दिष्टस्य ब्राह्मणान्तरैक्यं प्रतिपादितं भवति, किंतु तस्य ब्राह्मणत्वविशेषणवैशिष्ट्यमेव। अतो विवक्षितैकलासिद्धेरुपदेशवैयर्थ्यमेव। यद्यं प्रविशेषासाधारणाकारः प्रवृत्तिनिमित्तं, तदा ब्रह्मादिशब्दानां तदितरांशवाचिपदसामानाधिकरण्ये विरोधः स्यात्। यदा निरतिशयबृहत्त्वं प्रवृत्तिनिमित्तं तदा तत्त्वमसीत्युक्ते निरतिशयबृहदसीत्युक्तं स्यात्, ततश्चाणोर्जीवस्य निरतिशयबृहत्त्वविरोधः। त्वं निरतिशयबृहद्वस्तुनोंऽश इत्यर्थश्चेत्, एकदेशलक्षणा; न हि ब्रह्मशब्दस्य बृहदेकदेशो मुख्यार्थः। एवमसाधारणाकारान्तरस्य प्रवृत्तिनिमित्तलेऽप्यनुपपत्तिर्द्रष्टव्या। अतः कुदृष्टित्रयप्रत्यनीकसामानाधिकरण्यं भाष्यकारपक्ष एव मुख्यम्। व्याख्यान्तरोक्तविरोधाद्भवदुक्तनिर्वाहस्य किं वैषम्यं, किंचात्मभेदे सिद्धे हि शरीरशरीरिभावः स एवं नास्ति; कार्यविशेषे ऐक्यप्रतिपादनात्, 'पुरुषस्याप्युभावेतौ लीयेते परमात्मनि, संकाशादात्मनस्तद्वदात्मानः प्रभवन्ति ह्यी'त्यादिभिर्विदितोत्पत्तिप्रलयप्रतिपादनात्, कार्यकारणयोरैक्यव्यत्वाच्च। न ह्येकमेव वस्तु शरीरं, शरीरि च भवति। तस्मात्स्वरूपपरिणामपक्षेणैव निर्वाहो वरम्—इति शङ्कापरिहारार्थं, सकलश्रुतीनां मुख्यार्थलज्ञापनार्थं, तेषु तेषु प्रदेशेषु विप्रकीर्णमुक्तानामर्थानां सङ्कलय्य प्रदर्शनेन सुग्रहलापादनार्थं चारभते—अत्रेदं तत्त्वमिति। भोग्यत्वेन भोक्तृत्वेन चेति चशब्दः श्रेयितव्यत्वेन तयोरेककोटिनिवेशात्। अस्मान्मायीत्यत्र मायाशब्दार्थं निष्कृष्टमुपादत्ते—मायां तु प्रकृतिमिति।

तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।' (श्वे. ४।९-१०), 'क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः ।' (श्वे. १।१०) अमृताक्षरं हर इति भोक्ता निर्दिश्यते। प्रधानमात्मनो भोग्यत्वेन हरतीति हरः। 'स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः ।' (श्वे. ६।९), 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' (श्वे. ६।१६), पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम् ।' (ना. १३।१), 'ज्ञाज्ञौ द्वावजावीशनीशौ' (श्वे. १।९), 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।' (श्वे. ६।१३), 'भोक्ता भोग्यं प्रेरितारं च मत्वा ।'(श्वे. १।१२); 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्योऽभिचाकशीति ।' (श्वे. ४।६), 'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ।' (श्वे. १।६); 'अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम्। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥' (तै. आ. ६।१० ना. १२।१), 'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥' (श्वे. ४।७) इत्याद्याः। स्मृतावपि 'अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्। जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥' (गी. ७।४-५), 'सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्। कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः। भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥' (गी. ९।७-८), 'मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्। हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥' (गी. ९।१०); 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि।' (गी. १३।१९), 'मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम्। संभवः सर्वभूतानां ततो भवति भारत ॥' (गी. १४।३) इति जगद्योनिभूतं

अन्यशब्दवाच्य आत्मेति स्पष्टमितुमाह—**क्षरं प्रधानमिति**। अर्थान्तरभ्रमहेतुलाद्धरशब्दं व्याचष्टे—**प्रधानमिति**। अत्र **व्यक्ताव्यक्तं भरते विश्वमीश** इति पूर्ववाक्ये श्रवणात्—धार्यत्वधारकत्वलक्षणभेदोऽपि सिद्धः। ईश्वरेश्रितव्यतारूपभेदं दर्शयति—**स कारणमिति**। करणाधिपाधिपशब्दव्याख्यानार्थमाह—**प्रधानेति**। **गुणेशः** गुणानां सत्त्वरजस्तमसां नियन्ता। अनन्येश्वरत्वं दर्शयति—**पतिमिति**। अनेन शेषशेषिलक्षणभेदोऽपि सिद्धः। नच **पा रक्षणे** इति धातोर्निष्पन्नत्वात्पतिशब्दो रक्षकवाची, न तु शेषिवाचीति वाच्यं; शेषिणि रूढत्वात्, अन्यथा **गमेर्डोसि**ति डोस्प्रत्ययान्तगमिधातोर्निष्पन्नत्वात् गोशब्दस्य मनुष्यादिवाचकत्वप्रसङ्गः। गतिमत्सु सर्वेषु प्रयोगाभावात्, तिष्ठत्यपि गवि प्रयोगात्—तत्र रूढिशक्त्याश्रय इति चेत्, एवं 'वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः। अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवी'दिति न्यायेन पितृसंरक्षके पुत्रेऽपि पित्राद्यपेक्षया पतिशब्दाप्रयोगात्, गृहाद्यरक्षकेऽपि स्वामिनि पतिशब्दप्रयोगाच्च—शेषिणि पतिशब्दो रूढः। तथा—'दासभूताः स्वतः सर्वे ह्यात्मानः परमात्मनः' तथा—'नन्तव्यः परमः शेषी शेषा नन्तार ईरिताः। नन्तृनन्तव्यभावोऽयं न प्रयोजनपूर्वकः' इति दासशेषशेषिशब्दप्रयोगो भगवच्छास्त्रेषु दृश्यते। पत्यादिशब्दाभावेऽपि 'व्रीहीन् प्रोक्षती'त्यादौ द्वितीयाश्रुत्या प्रोक्षणस्य व्रीह्यादिशेषत्ववत्—**यस्यात्मा शरीरमि**त्यादिना जगतः परमात्मशरीरत्वावगमात्, शरीरपारमार्थ्यस्य च 'संघातः परार्थत्वा'दित्यादिभिः प्रसिद्धत्वाच्च—जगद्ब्रह्मणोः शेषशेषिभावः सिद्धः, अतो यथोक्त एवार्थः[1]। मुक्तान्तरेणापि भेदसिद्धिं दर्शयति—**ज्ञाज्ञौ द्वावजाविति**। उत्पत्तिप्रलयाभावप्रतिपादनं दर्शयति—**नित्यो नित्यानामिति**। आत्मकारान्तरेण भेदमाह—**भोक्तेति**। भगवतोऽस्पृष्टदोषत्वं दर्शयति—**तयोरिति**। भेदज्ञानस्य मोक्षहेतुत्वमाह—**पृथगिति**। मुक्तौ भेदमाह—**अजामिति**। जीवेश्वरयोः स्वतो भेदं सविशेषत्वं च स्पष्टयितुमाह—**समान इति**। पृथक्त्वज्ञानस्य मोक्षोपायत्वपरस्य वाक्यद्वयस्य मध्ये **अजामेकामि**त्यादिवाक्यमुपात्तं; **समाने वृक्षे, अजामेकामि**ति प्रधानप्रसङ्गोपेतत्वसाम्यात्। **जुष्टं** प्रियमाणम्। **स्मृतावपीति**। **अष्टधा भिन्ना प्रकृतिर्मे**त्येनेन कारणावस्थायामपि भेदसिद्धिः। **मामिकां प्रकृतिं कल्पक्षये यान्ती**त्यत्रापि तथा। **प्रकृतिं स्वामवष्टभ्य विसृजामी**त्यत्रापि तत्सिद्धिः। **मयाऽध्यक्षेणे**त्यत्र तु स्वभावावशकरः, कारणावस्थायां भेदश्च सिध्यतः। **प्रकृतिमि**त्यत्रानादित्व-

---

[1] इतरः।

महद्ब्रह्म मदीयं प्रकृत्याख्यं भूतसूक्ष्ममचिद्वस्तु यत्तस्मिंश्चेतनाख्यं गर्भं यत्संयोजयामि ततो मत्कृताच्चिदचित्संसर्गादेवादिस्थावरान्तानामचिन्मिश्राणां सर्वभूतानां संभवो भवतीत्यर्थः । एवं भोक्तृभोग्यरूपेणावस्थितयोः सर्वावस्थावस्थितयोश्चिदचितोः परमपुरुषशरीरतया तन्नियाम्यत्वेन तदपृथक्स्थितिं परमपुरुषस्य चात्मत्वमाहुः काश्चन श्रुतयः—'यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरः । यं पृथिवी न वेद । यस्य पृथिवी शरीरम् । यः पृथिवीमन्तरो यमयति' (बृ. ३।७।३) इत्यारभ्य 'य आत्मनि तिष्ठन्नात्मनोऽन्तरः यमात्मा न वेद । यस्यात्मा शरीरम् । य आत्मानमन्तरो यमयति । स त आत्मान्तर्याम्यमृतः' (बृ. ३।७।२२) इति । तथा—'यः पृथिवीमन्तरे संचरन्यस्य पृथिवी शरीरं यं पृथिवी न वेदे'त्यारभ्य 'योऽक्षरमन्तरे संचरन् यस्याक्षरं शरीरं यमक्षरं न वेद, यो मृत्युमन्तरे संचरन्यस्य मृत्युः शरीरम् । यं मृत्युर्न वेद । एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः' (ना. २) अत्र मृत्युशब्देन तमःशब्दवाच्यं सूक्ष्मावस्थमचिद्वस्त्वभिधीयते; अस्यामेवोपनिषदि—'अव्यक्तमक्षरे लीयते । अक्षरं तमसि लीयत' इति वचनात् । 'अन्तःप्रविष्टः शास्ता जनानां सर्वात्मा' (तै. आ. ३।११।२) इति च । एवं सर्वावस्थावस्थितचिदचिद्वस्तुशरीरतया तत्प्रकारः परमपुरुष एव कार्यावस्थकारणावस्थजगद्रूपेणावस्थित इतीममर्थं ज्ञापयितुं काश्चन श्रुतयः कार्यावस्थं, कारणावस्थं च जगत्स एवेत्याहुः—'सदेव सोम्येदमग्र आसीत् । एकमेवाद्वितीयम्' (छा. ६।२।१), 'तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोऽसृजत' (छा. ६।२।३) इत्यारभ्य 'सन्मूलाः सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' (छा. ६।८।४), 'ऐतदात्म्यमिदं सर्वम् । तत्सत्यम् । स आत्मा । तत्त्वमसि श्वेतकेतो' (छा. ६।८।७) इति, तथा 'सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदं सर्वमसृजत' (तै. २।६।१) इत्यारभ्य 'सत्यं चानृतं च सत्यमभवत्' (तै. २।६।१) इत्याद्याः । अत्रापि श्रुत्यन्तरसिद्धश्चिदचितोः, परमपुरुषस्य च स्वरूपविवेकः स्मारितः—'हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' (छा. ६।३।२) इति । 'तत्सृष्ट्वा तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभवत् । विज्ञानं चाविज्ञानं च । सत्यं चानृतं च सत्यमभवत्' (तै. २।६।१) इति च । अनेन जीवेनात्मनानुप्रविश्येति जीवस्य ब्रह्मात्मकत्वं तदनुप्रविश्य सच्च त्यच्चाभवत् । विज्ञानं चाविज्ञानं चेत्यनेनैकार्थ्यादात्मशरीरभावनिबन्धनमिति विज्ञायते । एवंभूतमेव नामरूपव्याकरणं

कण्ठोक्तिः । ममेत्यत्रापि कारणावस्थायां भेदसिद्धिः । उदाहृतस्मृतिवचनेषु व्याख्येयांशं व्याचष्टे—जगद्योनीति । जगद्योनिशब्देन त्रिगुणं तज्जगद्योनिरिति वचनं स्मर्यते । कार्यावस्थाव्यावृत्त्यर्थं भूतसूक्ष्ममित्युक्तम् ॥

एवं चिदचिदीश्वरभेदे सति कथमेकत्वावधारणमुपपद्यत इति शङ्कायां, घटकश्रुतीरुक्तारयति—एवमिति । यः पृथिवीमन्तरे संचरन्निति सुबलोपनिषदि श्रूयते । मरणयमादिव्यावृत्त्यर्थं मृत्युशब्दं व्याचष्टे—अत्रेति । लीयत इति वचनात् क्रमप्रत्यभिज्ञानादित्यर्थः । यस्याव्यक्तं शरीरं यस्याक्षरं शरीरं यस्य मृत्युः शरीरमिति क्रमो हि अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयत इति क्रमेण सङ्गच्छते । तमस एकीभावमात्रं श्रुतं, न लयः । तमस्त्वप्रहाणाभावात्—कार्यानुपयुक्ततमःशरीरके देवे कार्योपयुक्तस्य तस्यैकीभावः । मृत्युसंज्ञस्य तमसः शरीरत्वश्रवणात्—विशेषभूततमसा तमस एकीभावो युक्त । सर्वात्मत्वविवरणायाह—अन्तःप्रविष्ट इति । अनेनापि शरीरात्मभावः फलितः । अन्तःप्रविश्य नियाम्यत्वं हि शरीरत्वम् । अन्तःप्रवेशशास्तित्वाभ्यां नृपगगनव्यावृत्तिरित्यपि शरीरलक्षणं मायाकारायितेत्यम् । भेदश्रुतिघटकश्रुत्यविरोधेनैक्यवाक्यानामर्थमाह—एवमिति । घटकतयोपात्तं सन्मूला इति । अत्रापीति छान्दोग्यप्रकरणे, तैत्तिरीयप्रकरणे चेत्यर्थः । हन्ताहमित्यादि छान्दोग्ये, तत्सृष्ट्वेत्यादि तैत्तिरीये । जीवेनात्मनेत्यस्य व्याख्यानार्थमाह—अनेनेति । अनुप्रवेशश्रवणाभावेऽपि सामान्येनोक्तं नामरूपव्याकरणमनुप्रवेशपूर्वकनामरूपव्याकरणे पर्यवस्यति; सामान्यविशेषन्यायादित्याह—एवं भूतमेवेति । यद्वा, सर्वशाखाप्रत्यभिज्ञान्यायेन क्वचिदनुक्त-

'तद्धेदं तर्ह्यव्याकृतमासीत्। तन्नामरूपाभ्यां व्याक्रियत' (बृ. १।४।७) इत्यत्राप्युक्तम्। अतः कार्यावस्थः, कारणावस्थश्च स्थूलसूक्ष्मचिदचिद्वस्तुशरीरः परमपुरुष एवेति कारणात्कार्यस्यानन्यत्वेन कारणविज्ञानेन कार्यस्य विज्ञाततयैकविज्ञानेन सर्वविज्ञानं च समीहितमुपपन्नतरम्। 'हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' (छा. ६।३।२) इति तिस्रो देवता इति सर्वमचिद्वस्तु निर्दिश्य तत्र स्वात्मकजीवानुप्रवेशेन नामरूपव्याकरणवचनात्सर्वे वाचकाः शब्दा अचिज्जीवविशिष्टपरमात्मन एव वाचका इति—कारणावस्थपरमात्मवाचिना शब्देन कार्यवाचिनः शब्दस्य सामानाधिकरण्यं मुख्यवृत्तम्। अतः स्थूलसूक्ष्मचिदचित्प्रकारं ब्रह्मैव कार्यं, कारणं चेति—ब्रह्मोपादानं जगत्। सूक्ष्मचिदचिद्वस्तुशरीरकं ब्रह्मैव कारणमिति ब्रह्मोपादानत्वेपि संघातस्योपादानत्वेन चिदचितोर्ब्रह्मणश्च स्वभावासंकरोप्युपपन्नतरः। यथा—शुक्लकृष्णरक्ततन्तुसंघातोपादानत्वेपि चित्रपटस्य तत्तत्तन्तुप्रदेश एव शौक्ल्यादिसंबन्ध इति—कार्यावस्थायामपि न सर्वत्र वर्णसंकरः, तथा—चिदचिदीश्वरसंघातोपादानत्वेपि जगतः कार्यावस्थायामपि भोक्तृत्वभोग्यत्वनियन्तृत्वाद्यसंकरः। तन्तूनां पृथक्स्थितियोग्यानामेव पुरुषेच्छया कदाचित्संहतानां कारणत्वं, कार्यत्वं च, इह तु चिदचितोः सर्वावस्थावस्थितयोः परमपुरुषशरीरत्वेन तत्प्रकारतयैव पदार्थत्वात्तत्प्रकारः परमपुरुषः सर्वदा सर्वशब्दवाच्य इति विशेषः। स्वभावभेदः, तदसंकरश्च तत्र चात्र च तुल्यः। एवं च सति परस्य ब्रह्मणः कार्यानुप्रवेशेऽपि स्वरूपान्यथाभावाभावादविकृतत्वमुपपन्नतरम्। स्थूलावस्थस्य नामरूपविभागविभक्तस्य चिदचिद्वस्तुन आत्मतयावस्थानात्कार्यत्वमप्युपपन्नतरम्। अवस्थान्तरापत्तिरेव हि कार्यता। निर्गुणवा-

---

स्यान्यतो ग्राह्यत्वात्, क्वचिज्ज्ञातोऽनुप्रवेशः कार्योपयिकतया अपेक्षितत्वादन्यत्रापि स्वीकार्य इत्याह—**एवमिति। एवंभूत**शब्दोऽनुप्रवेशपूर्वकत्वपरः। अनेन नामरूपव्याकरणश्रुत्युपपादनेन—जीवानामुत्पत्तिप्रलयौ नामरूपव्याकरणतदभावौ, न तु स्वरूपनिष्पत्तिविनाशावित्युक्तं भवति। अनेन पूर्वोक्तशङ्का च परिहृता। कालविशेषोक्तमैक्यं नामरूपव्याकरणाभावमात्रं, न तु स्वरूपैक्यमित्यवगमात्॥

अथ सर्वश्रुतीनाम् अस्मिन्नर्थे मुख्यत्वं दर्शयन्, प्रथममेकविज्ञानेन सर्वविज्ञानं परमतेऽनुपपन्नमिति प्रागुक्तं स्वमत उपपन्नमित्याह—**अत इति**। कार्यकारणयोरैक्यप्रतिपादनात्, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानात्, सामानाधिकरण्याच्चेति त्रिधा ह्यद्वैतप्रतीतिः, तत्र पूर्वोक्तद्वयमस्मदुक्तप्रकारेणोपपन्नमित्यत्र इत्यादिभाष्येणोक्तं भवति। विशिष्टं कारणं तदेव कार्यमिति **कारणात्कार्यस्यानन्यत्वम्**, अतः कार्यकारणैक्यपराणां श्रुतीनां तयोरेकद्रव्यत्वमेव प्रतिपाद्यं, न तु विशिष्टत्वनिषेधः; तस्य विहितत्वात्। एकविज्ञानेन सर्वविज्ञानमपि एवमेव, यथा—मृत्पिण्डेन तत्कार्यज्ञानेऽपि पिण्डगतरूपादिनिषेधो न कृतः स्यात्—तद्वत्। **उपपन्नतरमिति। तरप्**प्रत्ययेन मुख्यत्वं सर्वत्रापि विवक्षितम्॥

एवं सद्विद्योपक्रमगतस्यैकविज्ञानेन सर्वविज्ञानस्य मुख्यत्वमुक्तम्, अथ तदुपसंहारगतस्य तत्त्वमसीति सामानाधिकरण्यस्य मुख्यत्वमाह—**अहमिमा इति**। उपादानत्वस्वभावासङ्करौ कथमुपपद्येते इत्यत्राह—**अतः स्थूलेति**। भाव्यवस्थाविशेषत्वतः प्रागवस्थायोगो ह्युपादानत्वम्, अतोऽवस्थाविशेषौ **स्थूलसूक्ष्म**शब्दाभ्यां दर्शितौ। अनेन कालविशेषावच्छिन्नैकत्वावधारणं नामरूपविभागाभावमिप्रायमिति फलितम्। उपादानत्वेऽपि स्वभावासङ्करमाह—**सूक्ष्मेति**। दृष्टान्तेनेममर्थमुपपादयति—**'यथेति**। ननु—शुक्लकृष्णादितन्तवः कारणावस्थायामपि भिन्नाः, न च तेष्वन्यतमं प्रत्यन्यतमस्य कारणत्वम्, अतस्तत्र स्वभावासङ्करः, अत्र तु विश्वस्य सङ्घातोपादानत्वेऽपि कारणावस्थायां परमात्मैक एव स्वशब्देन श्रूयते, न तु चेतनाचेतनौ। किंच—परमात्मनः प्रागेकत्वं, तस्मादितरयोर्द्वयोरुत्पत्त्यादिकं च श्रूयते अतो न स्वभावासङ्कर इत्याह—**तन्तूनामिति**। नहि तन्तुष्वन्योन्यगुणप्रधानभावोऽस्तीति—न तत्रान्यतमवाचिना शब्देन समुदाय उच्यते, अत्र तु सर्वकारणस्य भगवतः सर्वशब्दवाच्यत्वमुपपन्नमित्यन्यतमवाचिशब्देनापि विशिष्टमेवोच्यत इति—विशिष्टस्यैव कारणत्वात् प्रागपि भेदोऽस्तीति—स्वभावासङ्कर उपपन्न इत्यर्थः। केनाकारेण साधर्म्यमित्यत्राह—**स्वभावेति**। रुमागतेतरपदार्थानां लवणत्वापत्तिवत् ब्रह्मणोऽन्यथाभावमाशङ्क्याह—**एवं चेति। तर्ह्यु**पादानत्वमेव अनुपपन्नमित्यत्राह—**स्थूलावस्थस्येति**। आत्मतयाऽवस्थानात् कथं कार्यत्वमित्यत्राह—**अवस्थेति**। अविकारश्रुतीनां प्रकृतिगतस्वरूपान्यथाभावरूपविकासे ब्रह्मणि नास्तीत्यर्थः। कार्यावस्थचिदचिन्नियमनरूपावस्थान्तरापत्तिर्ब्रह्मणः कार्यत्वमिति—कार्यत्ववादिनीनां श्रुतीनामर्थः। न हि

दाश्च परस्य ब्रह्मणो हेयगुणासंबन्धादुपपद्यन्ते। **'अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः'** (छा.८।१।५) इति हेयगुणान्प्रतिषिध्य, **'सत्यकामः सत्यसंकल्पः'** (छा. ८।१।५) इति कल्याणगुणान्विदधतीयं श्रुतिरेवान्यत्र सामान्येनावगतं गुणनिषेधं हेयगुणविषयं व्यवस्थापयति। ज्ञानस्वरूपं ब्रह्मेति वादश्च—सर्वज्ञस्य सर्वशक्तेरखिलहेयप्रत्यनीककल्याणगुणाकरस्य ब्रह्मणः स्वरूपं ज्ञानैकनिरूपणीयं, स्वयंप्रकाशतया ज्ञानस्वरूपं चेत्यभ्युपगमादुपपन्नतरः। **'यः सर्वज्ञः सर्ववित्'** (मु. १।१।९), **'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।'** (श्वे. ६।८), **'विज्ञातारमरे केन विजानीयात्'** (बृ. २।४।१४) इत्यादिका ज्ञातृत्वमावेदयन्ति। **'सत्यं ज्ञानम्'** (तै. २।१।१) इत्यादिकाश्च ज्ञानैकनिरूपणीयतया, स्वप्रकाशतया च ज्ञानस्वरूपताम् **'सोऽकामयत बहु स्याम्'** (तै. २।६।१), **'तदैक्षत बहु स्याम्'** (छा. ६।२।३), **'तन्नामरूपाभ्यां व्याक्रियत'** (बृ. १।४।७) इति ब्रह्मैव स्वसंकल्पाद्विचित्रस्थिरत्रसरूपतया नानाप्रकारमवस्थितमिति—तत्प्रत्यनीकाब्रह्मात्मकंवस्तुनानात्वमतत्त्वमिति—तत्प्रतिषिध्यते—**'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति'** (बृ. ४।४।१९), **'नेह नानास्ति किंचन'** (बृ. ४।४।१९), **'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, यत्र त्वस्य सर्वमात्मैवाभूत्, तत्केन कं पश्येत्, तत्केन कं विजानीयात्'** (बृ. २।४।१४) इत्यादिना, न पुनः **'बहु स्यां प्रजायेय'**.(तै. २।६।१, छा. ६।२।३) इत्यादिश्रुतिसिद्धं स्वसंकल्पकृतं ब्रह्मणो नानानामरूपभाक्त्वेन नानाप्रकारत्वमपि निषिध्यते। **'यत्र त्वस्य सर्वमात्मैवाभूत्'** (बृ. २।४।१४) इत्यादिनिषेधवाक्यादौ च तत्स्थापितं—**'सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेद'** (बृ. २।४।६), **'तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः'** (बृ. २।४।१०) इत्यादिना। एवं चिदचिदीश्वराणां स्वरूपभेदं स्वभावभेदं च वदन्तीनां, कार्यकारण-

---

कारणावस्थनियमनं कार्यावस्थनियमनं भवति। तत्तवदस्थचिदचिन्नियमनरूपविशेषा एव ब्रह्मणोऽद्वारकावस्थाः, स्वरूपान्यथाभावज्ञानसङ्कोचादिरूपविकारास्तु सद्वारकावस्था इत्यर्थः। यथा—ग्राहकग्रहणेन संनिधिसमाम्नातेषु वस्तुषु परमापूर्वत्वेषतयाऽवगतेषु यामन्यादेरद्वारकशेषत्वं, प्रोक्षणादेः सद्वारकशेषत्वं च मुख्यमेवावगम्यते, तथा—'बहुस्या'मिति ग्राहकग्रहणेन सर्वावस्थासु परमात्मीयतयाऽवगतासु स्वरूपान्यथाभावज्ञानसङ्कोचादिरूपसद्वारकावस्थायाः, तत्तन्नियमनरूपाद्वारकावस्थायाश्च परमात्मीयत्वं मुख्यमेवेति भावः। **निर्गुणेति, अपहतपाप्मेत्यादि** चात्र किंचिद्विवृतम्। **श्रुतिरेवेति।** मतान्तरोक्तनिर्वाहेषु श्रुतहानिरश्रुतकल्पनं चास्ति, अत्र तु निर्वाहः श्रौत एव, श्रुतानुगुण्येति—वैषम्यमिति भावः॥

अथार्थगुणनिषेधपरत्वेन परामृशतानां श्रुतीनामर्थमाह—**ज्ञानस्वरूपमिति। सर्वज्ञस्ये**त्यादिपदानि मङ्गलगुणविशेषविधाभिवाक्यस्मरणार्थानि। **तद्गुणसारत्वा**दित्यादिसूत्रसिद्धमेवात्र निर्वाहद्वयमुक्तम्। ईश्वरस्य ज्ञातृत्वात् ज्ञानैकनिरूपणीयत्वमुक्तं; ज्ञातृर्हि ज्ञानं निरूपकम्। **तरपो** मुख्यत्वमर्थः। ज्ञानस्वरूपत्वज्ञानगुणकत्वपराः श्रुतीर्दर्शयति—**यः सर्वज्ञ इति। ज्ञानस्वरूपताम्** उभयथापि ज्ञानव्यपदेशयोग्यताम्। ज्ञानगुणकत्वस्य, ज्ञानस्वरूपत्वस्य च विहितत्वादुभयमप्युपपन्नमित्यर्थः। ज्ञानस्य ज्ञानाश्रयत्वानुपपत्तिचोद्यपरिहारः पूर्वमेव कृतः। भेदनिषेधश्रुतीनामर्थमाह—**सोऽकामयतेति। विचित्रस्थिरत्रसरूपतया** विचित्रस्थिरत्रसशरीरतया। **अब्रह्मात्मकेति।** ब्रह्मान्तर्यामिकत्वरहितत्वमुक्तम्। विहितव्यतिरिक्तवस्तुनानात्वमित्यर्थः। यद्वा, **स्थिरत्रसरूपतया** स्थिरत्रसात्मकत्वात्। **अब्रह्मात्मकेति। अब्रह्मभूतमित्यर्थः।** तथा सति कार्यकारणभेदनिषेधः कृतः स्यात्। ऐक्यश्रुतीनां प्रकार्यैक्यपरत्वात्—ऐक्यश्रुतिशेषभूतभेदनिषेधोऽपि तदनुरोधेन प्रकारिभेदनिषेध एव भवितुमर्हतीत्यर्थः। निषेधसामान्यं हि विशेषविधाने दृष्टे तद्व्यतिरिक्तविषयं दृष्टं—'न हिंस्या'दित्यादिषु विशेषविधानं सामान्यनिषेधो बाधते चेत्, वैधहिंसाया अधर्मत्वप्रसङ्गस्तत्परिहारमेवाह—**न पुनरिति।** उक्तमर्थमुपक्रमोपसंहारावुपपादयति—**यत्र त्वस्येति। योऽन्यत्रात्मन इति। अन्यत्रे**त्यत्र **त्वं विनाचिदचिद्वर्गमम्।** ब्रह्मणः पृथग्भूतं—तदविनाभावरहितं नास्तीत्यर्थः। भेदविशेषनिषेधदर्शनात्—सामान्येन भेदनिषेधोऽपि तत्रैव पर्यवस्यति—'छागो वा मध्यवर्ण्यो'दिति न्यायादिति भावः॥

इतरव्यावृत्तिमित्रेणापि निर्वाहप्रकाराः कृताः, तत्र को विशेष इत्यत्राह—**एवमिति।** असदुक्तनिर्वाहः श्रुतिमिरे-

भावं कार्यकारणयोरनन्यत्वं च वदन्तीनां सर्वासां श्रुतीनामविरोधः, चिदचितोः परमात्मनश्च सर्वदा शरीरात्मभावं, शरीरभूतयोः कारणदशायां नामरूपविभागानर्हसूक्ष्मदशापत्तिं, कार्यदशायां च तदर्हस्थूलदशापत्तिं वदन्तीभिः श्रुतिभिरेव ज्ञायत इति—ब्रह्माज्ञानवादस्यौपाधिकब्रह्मभेदवादस्यान्यस्याप्यपन्यायमूलस्य सकलश्रुतिविरुद्धस्य न कथंचिदप्यवकाशो दृश्यते । चिदाचिदीश्वराणां पृथक्स्वभावतया तत्तच्छ्रुतिसिद्धानां शरीरात्मभावेन प्रकारप्रकारितया श्रुतिभिरेव प्रतिपन्नानां श्रुत्यन्तरेण कार्यकारणभावप्रतिपादनं, कार्यकारणयोरैक्यप्रतिपादनं च ह्यविरुद्धम् । यथा—आग्नेयादीन्षड् यागानुत्पत्तिवाक्यैः पृथगुत्पन्नान्समुदायानुवादिवाक्यद्वयेन समुदायद्वयत्वमापन्नान्दर्शपूर्णमासाभ्यामित्यधिकारवाक्यं कामिनः कर्तव्यतया विदधाति, तथा—चिदचिदीश्वरान्विविक्तस्वरूपस्वभावान् **'क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः ।'** (श्वे. १।१०), **'प्रधानक्षेत्रज्ञपतिर्गुणेशः'** (श्वे. ६।१६) **'पतिं विश्वस्यात्मेश्वरम्, आत्मा नारायणः परः'** (ना.१३।१) इत्यादिवाक्यैः पृथक्प्रतिपाद्य, **'यस्य पृथिवी शरीरं यस्यात्मा शरीरं यस्याव्यक्तं शरीरं यस्याक्षरं शरीरम् । एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः'** (ना. २) इत्यादिभिर्वाक्यैश्चिदचितोः सर्वावस्थावस्थितयोः परमात्मशरीरतां, परमात्मनस्तदात्मतां च प्रतिपाद्य, शरीरिभूतपरमात्मामिधायिभिः **सद्ब्रह्मात्मादिशब्दैः** कारणावस्थः, कार्यावस्थश्च परमात्मैक एवेति पृथक्प्रतिपन्नं वस्तुत्रितयं **'सदेव सोम्येदमग्र आसीत्'** (छा. ६।२।१), **'ऐतदात्म्यमिदꣳसर्वम्'** (छा. ६।८।७), **'सर्वं खल्विदं ब्रह्म'** (छा. ३।१४।१) इत्यादिवाक्यं प्रतिपादयति । चिदचिद्वस्तुशरीरिणः परमात्मनः परमात्मशब्देनाभिधाने हि नास्ति विरोधः । यथा मनुष्यपिण्डशरीरकस्यात्मविशेषस्य 'यमात्मा सुखी'त्यात्मशब्देनाभिधान इत्यलमतिविस्तरेण । यत्पुनरिदमुक्तं—ब्रह्मात्मैकत्वविज्ञानेनैवाविद्यानिवृत्तिर्युक्तेति, तदयुक्तम्; बन्धस्य पारमार्थिकत्वेन ज्ञाननिव-

---

र्वोक्तः, श्रुत्यनुगुणश्च; तत्कृतनिर्वाहः श्रुतिविरुद्धः, अश्रुतः, तर्काभासमूलश्चेत्यर्थः । **अपन्यायमूलस्य सकलश्रुतिविरुद्धस्येति** सर्वत्रान्वेति । **अन्यस्येति** स्वाभाविकभेदाभेदं, स्वनिष्ठभेदं चाह । इममर्थं वैदिकदृष्टान्तेनोपपादयति—**चिदचिदीश्वराणामिति । आग्नेयः** अग्नीषोमीयोपांशुयाजौ, ऐन्द्रौ द्वौ, ऐन्द्राग्नश्चेति षड् यागाः । **उत्पत्तिवाक्यमिति** प्रथमप्रतिपत्तिजनकं वाक्यम् । **पृथगुत्पन्नान्** पृथक्प्रतिपादितान् । **उत्पत्तिवाक्यैः** 'यदाग्नेयोऽष्टाकपाल'श्चाऽमावास्यायां च पौर्णमास्यां चाच्युतो भवती'त्येवमादिभिः । **समुदायानुवादिवाक्यद्वयेन** 'य एवं विद्वान् पौर्णमासीं यजते, य एवं विद्वानमावास्यां यजत' इत्येताभ्यां । **दर्शपूर्णमासाभ्यामिति ।** खर्गसाधनत्वाकारेणैकीकृत्य तत्कर्तव्यतया विदधातीत्यर्थः । तथात्रार्थप्रतिपादनं दर्शयति—**तथेति । शरीरिभूतेति । कारणावस्थः, कार्यावस्थश्च परमात्मैक एवेति** वचनभङ्ग्या पृथक्प्रतिपन्नं षष्ठुत्रयं प्रतिपादयतीत्यर्थः । आग्नेयादिसमुदाये अन्यतमवाचिभिः शब्दैः समुदायाभिधानं न दृष्टम्, अत्र तु परमात्मवाचिशब्देन समुदायाभिधानं कथमित्यत्राह—**चिदचिद्वस्त्विति ।** दृष्टान्तमाह—**तथेति ।** तत्र अन्योन्यं प्रकारप्रकारिभावाभावादन्यतमवाचिशब्देन न समुदायाभिधानम्, अत्र तु तथाभावादुपपन्नम् । कथम्, उच्यते; अर्थसामर्थ्यात्, शब्दसामर्थ्याच्च—चिदचितोरपृथक्सिद्धप्रकारत्वात्, निष्कृष्टब्रह्मणः कारणत्वानुपपत्त्या च—प्रकारिवाचिशब्देन विशिष्टोपस्थापनसिद्धिः, **सद्ब्रह्म**शब्दौ विशिष्टस्य सत्त्ववृहत्त्वयोगाद्विशिष्टोपस्थापनसमर्थौ, **आत्म**शब्दश्च व्याप्तिरूपप्रवृत्तिनिमित्तस्य व्याप्यसापेक्षत्वात्—विशिष्टोपस्थापक इति । यद्वा, 'अक्षरात् संभवतीह विश्वं, यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते, आत्मन आकाशः संभूत' इत्यादिषु परमात्मवाचिभिः शब्दैः कारणमुच्यते, तेषां विशेषणभूतचिदचिदभिधाने शक्तिर्नास्ति, लक्षणायां स एव दोषः, अतः सर्वत्र स्वरूपपरिणाम एव स्वरसप्राप्त इत्यत्राह—**चिदचिदिति ।** श्रुत्यन्तरबलेन स्वरूपविकारासंभवात्—कार्योपयुक्तमनुक्तमपि विशेषणं पृथदाज्यनयादर्थस्वभावेन सन्निधापितमनुसंधेयमिति भावः । तदेव लोकप्रयोगेणापि दृढयति—**यथेति ।** 'अयमात्मा सुखी'त्यात्मविशेषस्य सुखित्वविधाने-शरीररहितस्यात्मनो वैषयिकसुखासंभवात्तदंशसुखोपयुक्तमनुष्यादिपिण्डविशिष्टत्वमर्थतः सिध्यति—तद्वदिति भावः । **इति निवर्तकानुपपत्तिः ॥**

निवर्त्यनुपपत्तिं वक्तुमनुवदति—**यत्पुनरिति ।** दूषयति—**तदयुक्तमित्यादिना ।** प्रपञ्चस्य ज्ञानबाध्यत्वं, ज्ञानस्वरूपविषयत्वमुभयमपि परामृशति, तत्र प्रथमं ज्ञानबाध्यत्वानुपपत्तिमाह—**बन्धस्येति ।** सर्वप्रमाणानुगुणं शास्त्रमार्ग्यमुप-

त्वत्वाभावात् । पुण्यापुण्यरूपकर्मनिमित्तदेवादिशरीरप्रवेशतत्प्रयुक्तसुखदुःखानुभवरूपस्य बन्धस्य मिथ्यात्वं कथमिव शक्यते वक्तुम् । एवंरूपबन्धनिवृत्तिर्भक्तिरूपापन्नोपासनप्रीतपरमपुरुषप्रसादलभ्यैति पूर्वमेवोक्तम् । भवदभिमतस्यैक्यज्ञानस्य यथावस्थितवस्तुविपरीतविषयस्य मिथ्यारूपत्वेन बन्धविवृद्धिरेव फलं भवति । 'मिथ्यैतदन्यद्द्रव्यं हि नैति तद्द्रव्यतां यतः ।' (वि. पु. २।१४।२७) इति ज्ञानात्, 'उत्तमः पुरुषस्त्वन्यः' (गी. १५।१७), 'पृथगात्मानं प्रेरितारं च मत्वा' (श्वे. १।६) इति जीवात्मविसजातीयस्य तदन्तर्यामिणो ब्रह्मणो ज्ञानं परमपुरुषार्थलक्षणमोक्षसाधनमित्युपदेशाच्च । अपि च भवदभिमतस्यापि निवर्तकज्ञानस्य मिथ्यारूपत्वात्तस्य निवर्तकान्तरं मृग्यम् । निवर्तकज्ञानमिदं स्वविरोधि सर्वं भेदजातं निवर्त्य क्षणिकत्वात्स्वयमेव विनश्यतीति—चेन्न; तत्स्वरूप-तदुत्पत्ति-विनाशानां काल्पनिकत्वेन विनाशतत्कल्पनाकल्पकरूपाविद्याया निवर्तकान्तरमन्वेषणीयम् । तद्विनाशो ब्रह्मस्वरूपमेवेति चेत्, तथा सति—निवर्तकज्ञानोत्पत्तिरेव न स्यात्; तद्विनाशे तिष्ठति तदुत्पत्त्यसंभवात् । अपि च चिन्मात्रब्रह्मव्यतिरिक्तकल्पनिषेधविषयज्ञानस्य कोऽयं ज्ञाता, अध्यासरूप इति—चेन्न; तस्य

पादयति—**पुण्यापुण्येति** । प्रतीतिमात्रसिद्धस्य हेतुहेतुमद्भावनियमोऽनुपपन्नः; परमार्थस्यैवार्थक्रियाकारित्वात्, उत्पत्तिमत्त्वाच्च । असत्यस्य हेतुलासंभवम्, उत्पत्त्यसंभवं च प्रागुपपादितमुपजीव्योक्तम् । न हि प्रतीतिमात्रसिद्धमन्यत्र विद्यमानं वस्त्वन्तरं किमप्युत्पादयति, नापि स्वयमिदानीमुत्पद्यते । किंच—अपरमार्थस्य भ्रान्तिज्ञानसामग्रीव्यतिरिक्तहेतुसापेक्षत्वं च न दृष्टम् । न च—अङ्कुरादिसामग्येव भ्रमसामग्रीः शिरश्शिखरगतमृत्सलिलबीजसंबन्धेन अपवरकगतस्याङ्कुरभ्रमप्रसङ्गात् । न च—पदार्थानामर्थक्रियाकारित्वम्, उत्पत्तिमत्त्वं च मिथ्येति वाच्यं; ज्ञानबाध्यत्वाभावात् । किंच—मिथ्यात्वे पापकरणेऽपि न प्रायश्चित्तापेक्षा, मिथ्येति बुद्धिरेवालमिति भावः । भवतापि ज्ञाननिवर्त्यत्वमविद्याया वक्तव्यं, तच्च सत्यत्वे कथमुपपद्यत इत्यत्राह—**एवं रूपेति** । परमार्थस्य ज्ञाननिवर्त्यत्वं दृष्टद्वारा नोपपद्यते, अपिलदृष्टद्वारा, यथा—सत्यसर्पदष्टविषस्योपासादप्रीतगरुडप्रसादान्निवृत्तिः, न तु मिथ्येतिज्ञानात्—तयेत्यर्थः । प्रपञ्चस्य ज्ञानानिवर्त्यत्वमुक्तम्; ऐक्यज्ञानस्योपायत्वानुपपत्तिमाह—**भवदभिमतस्येति** । तत्त्वज्ञानं हि मोक्षोपायः, भिन्नविषयस्याभेदज्ञानस्यातत्त्वज्ञानरूपत्वाद्विपरीतफलत्वमित्यर्थः । अद्वैतस्यातथ्यत्वे प्रमाणमाह—**मिथ्यैतदिति** । ऐक्यस्यातात्त्विकत्वकण्ठोक्तिर्दर्शिता । ऐक्यस्यासत्यत्वं यथा फलति तथा भेदज्ञानस्यैव मोक्षसाधनत्वमाह—**उत्तम इति** । स्मृतिवचसोः संगत्यर्थं श्रुतेः पश्चादुपादानम् ॥

ऐक्यज्ञानस्य निवर्तकत्वे प्रमाणविरोध उक्तः, अथ तर्कविरोधमाह—**अपि चेति** । दावानलविषनाशकविषदृष्टान्तामिप्रायेण शङ्कते—**निवर्तकज्ञानमिति** । निवर्तकज्ञानं, तद्विनाशश्च किं ब्रह्मव्यतिरिक्तम्, उत स्वरूपमिति विकल्पमभिप्रेत्याह—**नेति** । ब्रह्मव्यतिरिक्तत्वात्—घटादेरिव विनाशस्य काल्पनिकत्वं, यथा—स्वाप्नपदार्थस्वरूपतदुत्पत्तिस्थितीनां काल्पनिकत्वानाञ्च काल्पनिकः,—तयेति भावः । **विनाशकल्पनाकल्पकरूपाविद्याया इति** । **विनाशः** कल्प्यः, तद्विषयभ्रमबुद्धिः **कल्पना, कल्पको** भ्रमाश्रयादिः । एवंरूपाविद्याया इत्यर्थः । स्वरूपपक्षं दूषयति—**तथासतीति** । पूर्वस्मिन् पक्षे दूषणं प्रकारान्तरेणाप्युक्तं वेदार्थसंग्रहे—'भावरूपस्य नाशो ह्युत्तरावस्थाप्राप्तिः सा चात्रानुपपन्ना; ब्रह्मव्यतिरिक्तस्यावस्थावतोऽन्यस्य स्थित्यभ्युपगमे अद्वैतहानिप्रसङ्गा'दिति । भावान्तरं ह्यभावः । घटस्य प्रागभावः पिण्डलादिपूर्वावस्था, प्रध्वंसः कपालाद्युत्तरावस्था, इतरेतराभावोऽप्यस्य गोत्वाभावोऽश्वत्वं, गोरप्यश्वत्वाभावो गोत्वम् । संसर्गाभावे कथं भावरूपत्वं, यदि महीमात्रमेव, तर्हि—घटसंसर्गे सत्यपि संसर्गाभावः स्यात् । यद्यतिरिक्तः, तर्हि—अभावोऽङ्गीकृत इति, उच्यते—भवत्पक्षे अभावाश्रयस्य यद्वैलक्षण्यं तदेव संसर्गाभावः, यदि महीमात्रमेव अभावाश्रयः, तर्हि—भावाश्रयभूतलेऽप्यभावाश्रयत्वप्रसङ्गः, तत्रापि महीमात्रसद्भावात् । यदि केनचिद्विशेषेण विशिष्टं भूतलमभावाश्रयः, स एव विशेषः संसर्गाभाव इति । कालविशिष्टत्वे सति देशविशेषत्वमेव, स च विशेषः । तदानीमेव घटसहितप्रदेशान्तरव्यावृत्त्यर्थं **देशविशेषत्वमित्युक्तं, तस्यैव** देशस्य **कालान्तरे** घटसहितस्य व्यावृत्त्यर्थं **कालविशेषविशिष्टत्वे सतीत्युक्तम्** । यथाहुः—**'संसर्गाभावमेवं विदुरिह सुधियो भावमेवं त्वभावं मन्वानाः कुम्भवद्भूतलत इतरभूभागभेदस्वभावः । यस्तत्तत्कालभेदव्यतिकरितगृहप्राङ्गणादिप्रदेशः कुम्भाभावाश्रयोऽन्यैरगणि स इह नः काधिकस्योपलम्भः'** इति । कालस्वरूपस्यान्तरत्वात्कर्मनाशे वदतस्तवापि चोद्यं तुल्यमिति—चेन्न; कर्म ह्यसत्पक्षे भगवत्प्रीतिरूपं, तत्र यः संसारफलानुगुणः सङ्कल्पः तद्विनाशार्थं कर्म, यस्तु मोक्षानुगुणः सङ्कल्पः स एव पूर्वस्य नाशः इत्युपपन्नमेव—'धातुः प्रसादान्महिमानमीश' मित्यादिभिः ॥

अथ निवर्तकज्ञानस्य ज्ञानत्वमुपपादयति—**अपि चेति** । न हि स्वरूपभूतज्ञानस्य ज्ञानान्तरापेक्षा, अतस्तदावृत्त्यर्थं

निषेध्यतया निवर्तकज्ञानकर्मत्वात्–तत्कर्तृत्वानुपपत्तेः । ब्रह्मस्वरूपमेवेति चेत्, ब्रह्मणो निवर्तकज्ञानं प्रति ज्ञातृत्वं–किं स्वरूपम्, उताध्यस्तम् । अध्यस्तं चेत्–अयमध्यासः, तन्मूलाविद्यान्तरं च निवर्तकज्ञानाविषयतया तिष्ठत्येव । निवर्तकज्ञानान्तराभ्युपगमे—तस्यापि त्रिरूपत्वाज्ज्ञात्रपेक्षयानवस्था स्यात् । ब्रह्मस्वरूपस्यैव ज्ञातृत्वे अस्मदीय एव पक्षः परिगृहीतः स्यात् । निवर्तकज्ञानस्वरूपं, स्वस्य ज्ञाता च ब्रह्मव्यतिरिक्तत्वेन स्वनिवर्त्यान्तर्गतम्–इति वचनं भूतलव्यतिरिक्तं कृत्स्नं देवदत्तेन च्छिन्नम्—इत्यस्यामेव च्छेदनक्रियायामस्य च्छेत्तुः, अस्याश्छेदनक्रियायाश्च च्छेद्यानुप्रवेशवचनवदुपहास्यम् । अध्यस्तो ज्ञाता स्वनाशहेतुभूतनिवर्तकज्ञाने स्वयं कर्ता च न भवति; स्वनाशस्यापुरुषार्थत्वात् । तन्नाशस्य ब्रह्मस्वरूपत्वाभ्युपगमे—भेददर्शनतन्मूलाविद्यादीनां कल्पनमेव न स्यात्—इत्यलमनेन दिष्टहतमुद्गरामिघातेन । तस्मादनादिकर्मप्रवाहरूपाज्ञानमूलत्वाद्बन्धनस्य तन्निवर्हणमुक्तलक्षणज्ञानादेव । तदुत्पत्तिश्चाहरहरनुष्ठीयमानपरमपुरुषाराधनवेषात्मयाथात्म्यबुद्धिविशेषसंस्कृतवर्णाश्रमोचितकर्मलभ्या । तत्र केवलकर्मणामल्पास्थिरफलत्वम्, अनभिसंहितफलपरमपुरुषाराधनवेषाणां कर्मणामुपासनात्मकज्ञानोत्पत्तिद्वारेण ब्रह्मयाथात्म्यानुभवरूपानन्तस्थिरफलत्वं च कर्मस्वरूपज्ञानादृते न ज्ञायते । केवलाकारपरित्यागपूर्वकयथोक्तस्वरूपकर्मोपादानं च न संभवतीति—**कर्मविचारानन्तरं** तत एव हेतोर्ब्रह्मविचारः कर्तव्य इति–

कृत्स्ननिषेधविषयज्ञानस्येत्युक्तम् । प्रमाणजन्यज्ञानं हि साश्रयमेव दृष्टम् । ज्ञाता किं ब्रह्मव्यतिरिक्तः, उतानतिरिक्तः—इति विकल्पाभिप्रायेणाह—**चिन्मात्रेति** । प्रथमं धर्मिप्रश्नः **कोऽयमिति** । ब्रह्मव्यतिरिक्तपक्षे दूषणमाह—**नेति** । कर्मकर्तृत्वविरोधादिति भावः । निवर्त्यत्वे सति हि कर्मकर्तृत्वविरोधः, अतस्तत्परिहारार्थं स्वरूपपक्षं श्रयते—**ब्रह्मेति** । ज्ञातृत्वधर्मविकल्पोऽयम् । **किं स्वरूपमिति** स्वरूपं–स्वाभाविकमित्यर्थः । पाश्चात्यतेन बुद्धिस्थतया अध्यासपक्षं दूषयति—**अध्यस्तं चेदिति** । निवर्तकज्ञानाविषयतया तिष्ठत्येवेति—ज्ञातृत्वाध्यासस्य, तन्मूलाविद्यान्तरस्य च निवृत्तौ निवर्तकान्तरसापेक्षत्वात्, निवर्तकान्तरस्य च भवद्भिरनभ्युपगमात्–तदुभयं तिष्ठत्येवेति निःशेषाविद्यानिवृत्तिर्न स्यादित्यर्थः । निवर्तकज्ञानान्तराभ्युपगमे तस्यापि कस्यचित्कंचित्प्रति सिद्धिरूपतया—ज्ञात्रपेक्षतयानवस्था स्यादित्याह—**निवर्तकज्ञानान्तरेति** । आर्थं शिरो दूषयति—**ब्रह्मस्वरूपस्येति** । निरुपाधिकस्यैव ब्रह्मस्वरूपस्याभ्युपगम्यमानं ज्ञातृत्वं स्वाभाविकमिति भवतामपि सिद्धान्तः स्यादित्यर्थः । ब्रह्मव्यतिरिक्तस्य, ज्ञातुर्निवर्तकज्ञानस्य च ब्रह्मव्यतिरिक्तस्वरूपोपाधिकोडीकारबलेन प्रपञ्चतन्मूलाविद्यानिवर्तकज्ञानेनैव निवृत्तिर्भविष्यतीत्याशङ्क्य व्याघातेन दूषयति—**निवर्तकज्ञानस्वरूपमिति** । ज्ञातुरपि निवृत्तकज्ञाननिवर्त्यत्वे निवर्तकज्ञानार्थं श्रवणादौ प्रवृत्तिश्च न स्यादित्याह—**अध्यस्तो ज्ञातेति** । ज्ञातृत्वाश्रयं परमपुरुषार्थरूपब्रह्मस्वरूपत्वात् नापुरुषार्थतेत्याशङ्क्याह—**तन्नाशस्येति** । पूर्वपक्षनिराकरणमुपसंहरति—**इतीति** । एवं ब्रह्मव्यतिरिक्तकृत्स्नमिथ्यात्वनिराकरणेन बन्धस्य सत्यत्वसिद्धेः–तन्निवृत्तिः कर्मसापेक्षोपासनात्मकज्ञानादेवेति—**कर्मविचारस्य** पूर्ववृत्तत्वं युक्तमित्याह—**तस्मादिति** । **तस्मात्** साधनचतुष्टयस्य ब्रह्मविचारं प्रति पूर्ववृत्तत्वे–वस्तुसामर्थ्यं नाम हेतुरुक्तः, तच्च निर्विशेषब्रह्माध्यस्तमिथ्याभूतप्रपञ्चस्य कर्मनिरपेक्षज्ञाननिवर्त्यत्वं, तच्चानुपपन्नम्–इत्युपपादनेन वस्तुसामर्थ्यसिद्धेरित्यर्थः । स्वरूपानादित्वव्यावृत्त्यर्थं **प्रवाह**शब्दः । अनिर्वचनीयव्यावृत्त्यर्थः **कर्म**शब्दः । **उक्तलक्षणज्ञानादेव** उपासनात्मकादेव । तदुत्पत्तिर्वर्णाश्रमोचितकर्मलभ्याऽस्तु, ततः किमुपासनादिस्वरूपज्ञानं प्रति प्रस्तुतकर्मविचारपूर्ववृत्तत्वमेत्याह—**तदेति** । कर्मविचारादेव तस्मात्पास्थिरफलत्वज्ञानं फलितमिति भावः । **अनभिसंहितफलेति** । **यजेन दानेनेत्यादिकर्मविनियोजकवाक्यार्थज्ञानस्य** पदार्थज्ञानपूर्वकत्वात्–पदार्थभूतकर्मस्वरूपाख्यविशेष्यज्ञानादृते उपासनद्वाराऽनन्तस्थिरफलत्वरूपं विशेषणं च न ज्ञायत इति भावः । ततः किमित्यत्राह—**केवलेति** । **केवलाकारः** आत्मयाथात्म्यबुद्धिसंस्कारशून्याकारः । हानार्थमुपादानार्थं च हि कस्यचित् ज्ञानं, तत्र फलद्वारा कर्म त्याज्यं, स्वरूपेणोपादेयम्, उभयार्थं ज्ञानं कर्मविचारादृते न सिध्यति, तस्मात्कर्मविचारनिवृत्तौ तज्ज्ञानफलं हानमुपादानं च न संभवतीत्यर्थः । **अथातःशब्दार्थं** निगमयति—**इति कर्मविचारानन्तरमिति** । **ब्रह्मविचारः कर्तव्य** इत्यनेन **ब्रह्मजिज्ञासाशब्दार्थं** उक्तः । विचारस्य कर्तव्यतायां नास्तीव विवादः, शाब्द आर्थं इत्येतावदेव हि वैषम्यम्, **अथातःशब्दार्थ एव खलीव विवादः, अतोऽथात** इत्येतावदुपात्तम् । एवं सूत्रस्याक्षरयोजना कृता । **इति निवृत्त्यनुपपत्तिः** ॥

अथ तात्पर्यार्थं उच्यते—**तत्रेत्यादिना** । अक्षरयोजनायां परेणान्यथोक्तोऽक्षरार्थश्च निरस्तः । तन्निरसनक्रमश्च एव परेणान्यथोक्तस्तात्पर्यार्थोऽपि निरस्तः । परेण हि प्रपञ्चस्य सत्यत्वेन ज्ञाननिवर्त्यत्वाभावात्—ज्ञानाय ब्रह्मविचारो वाक्यस्य

अथात इत्युक्तम्। तत्र पूर्वपक्षवादी मन्यते—वृद्धव्यवहारादन्यत्र शब्दस्य बोधकत्वशक्त्यवधारणासंभवात्—व्यवहारस्य च कार्यबुद्धिपूर्वकत्वेन कार्यार्थं एव शब्दस्य प्रामाण्यमिति—कार्यरूप एव वेदार्थः। अतो न वेदान्ताः परिनिष्पन्ने परे ब्रह्मणि प्रमाणभावमनुभवितुमर्हन्ति। न च पुत्रजन्मादिसिद्धवस्तु-

---

बीय–इति पूर्वपक्षं कृत्वा, प्रपञ्चस्य मिथ्यात्वेन ज्ञाननिवर्त्यत्वात् ज्ञानाय स आरम्भणीय–इति सिद्धान्तितं, तच्च पूर्वं निरस्तम्। अथ सूत्रकाराभिप्रेतां तन्निरसनीयशङ्कामुत्थापयन्, तदभिप्रेतं तत्परिहारं च वक्तुमारभते—**तत्रेत्यादिना**। कर्मब्रह्मविचारानन्तरं तत एव हेतोर्ब्रह्मविचारः कर्तव्य इत्युक्ता, सिद्धवस्तुनि शब्दव्युत्पत्तिसंभवात् ब्रह्मविचारः कर्तव्य—इति वचनं व्याहतमिति परिचोदनं पूर्वमीमांसानभिज्ञकृतम्; **अथातो धर्मजिज्ञासे**त्यत्राध्ययनानन्तरं तत एव हेतोर्धर्मविचारः कर्तव्य इत्युक्त्वा, प्राभाकरैरध्ययनस्याचार्याधिकारकलात्र धर्मविचारः कर्तव्य इति पूर्वपक्षं कृत्वा, अर्थबोधाधिकारलात्कर्तव्य इति सिद्धान्तितम्। भाट्टैस्त्वध्ययनस्य स्वर्गार्थलात्र धर्मविचारः कर्तव्य इति पूर्वपक्षं कृत्वा, अर्थज्ञानार्थलात्स कर्तव्य इति सिद्धान्तितं, तच्च व्याहतं भवत्पक्षे; तत्र हि सूत्राक्षराणि योजयित्वा तात्पर्यार्थ उक्तः, अत्राप्यक्षरार्थमुक्त्वा तात्पर्यार्थ उच्यत इत्युपपन्नम्। अक्षरयोजनायां ब्रह्मविचारारम्भे विशिष्टे हेतुरुक्तः—कर्मणोऽल्पास्थिरफललनिर्णयविशिष्टानन्तस्थिरफलापातप्रतीतिः। अनन्तस्थिरफलापातप्रतीतिर्नास्ति चेन्, अल्पास्थिरफल एव तृप्तः स्यात्। अल्पास्थिरफललनिर्णयो नास्ति चेत्, न निर्वेदः स्यादिति विशिष्टो हेतुः। अत्रापातप्रतीतिः संभावितप्रामाण्या विवक्षिता, तादृशी हि सा प्रवृत्तिहेतुः। तत्र ब्रह्मज्ञानस्यानन्तस्थिरफलापातप्रतीतेः प्रामाण्यसंभवनाऽनुपपन्ना; सिद्धवस्तुनि शब्दस्य बोधकलनिश्चयाभावादिति—विशिष्टहेतौ विशेष्यांशासिद्धिमाशङ्क्य, सिद्धवस्तुनि व्युत्पत्तिसंभवादनन्तस्थिरफलापातप्रतीतिरस्तीति परिहियते। अत्र पूर्वपक्षवादी प्राभाकरः सूत्रकारैर्भविष्यदृशंनवेदित्वात्, कैश्चिदनुक्तवेऽपि संभाव्यमानानां प्रतिकूलपक्षाणाम् आशङ्क्य निरसनीयत्वाच्च एवं पूर्वपक्षीकरणं युक्तम्। यद्वा, जैमिनिमतं हीदं–चोदनालक्षणोऽर्थ इंव वेदप्रतिपाद्य–इति, चोदना च क्रियायां प्रवर्तकं वचनं, तामाशङ्क्य सिद्धवस्त्वपि वेदप्रतिपाद्यमिति सूत्रकारैः साधयितुं युज्यते; अक्षरयोजनायां ब्रह्मविचारः कर्तव्य इत्युक्तत्वात्, **ब्रह्मविचारारम्भो न युक्त** इति पूर्वपक्षसमाप्तावुक्तत्वात्, **ब्रह्मविचारारम्भो युक्त इति स्थितमिति** सिद्धान्तस्योपसंहृतत्वाच्च। दीपे कण्ठोक्तौ–विषयः, संशयश्चेहार्थसिद्धौ। **ब्रह्मविचार** इत्युक्तत्वात् ब्रह्ममीमांसा विषय इति सिद्धम्। **आरम्भो न युक्त** इति चोक्तत्वात्–संशयसिद्धिः—ब्रह्ममीमांसा किमारम्भणीया, उतानारम्भणीयेति। तदर्थं चिन्त्यते—किं वेदान्ता ब्रह्मणि प्रमाणम्, उत नेति। तदर्थं परीक्ष्यते–शब्दस्य सिद्धवस्तुबोधनसामर्थ्यावधारणं संभवति, नेति। तदर्थं विचार्यते—किं वृद्धव्यवहारादन्यत्र शब्दार्थसंबन्धावधारणं संभवति, नेति। वृद्धव्यवहारे च–शब्दस्य सिद्धवस्तुबोधकलावधारणं संभवति, नेति च। न संभवतीति पूर्वः पक्षः, संभवतीति सिद्धान्तः। यदा व्यवहारादन्यत्र न व्युत्पत्तिः; व्यवहारे च शब्दस्य सिद्धरूपार्थबोधकलावधारणं न संभवति, तदा शब्दस्य सिद्धवस्तुबोधनसामर्थ्याभावात्—वेदान्तानामपि ब्रह्मणि परिनिष्पन्नरूपे प्रामाण्याभावनिश्चयवतः पुरुषस्यानन्तस्थिरफलापातप्रतीतेः प्रामाण्यसंभावनाया असिद्धेः–विशिष्टहेत्वभावात्–अनारम्भणीयेति—पूर्वपक्षे फलफलिभावः। राद्धान्ते तु—यदा व्यवहारादन्यत्र व्युत्पत्तिः, व्यवहारे सिद्धवस्तुपरत्वावधारणं च संभवति, तदा शब्दस्य सिद्धरूपार्थे सामर्थ्यात्–वेदान्तानामपि ब्रह्मणि परिनिष्पन्नरूपे प्रामाण्यात्—प्रमाण्याभावनिश्चयरहितपुरुषस्यानन्तस्थिरफलरूपा ब्रह्मविषयापातप्रतीतिप्रामाण्यसंभावनासिद्धेः—विशिष्टहेतुसिद्ध्या—ब्रह्ममीमांसाऽऽरम्भणीयेति—विचाराणां फलफलिभावः। पूर्वपक्षमुपक्षिपति—**तत्रेति**। पूर्वं सृष्टावाद्युक्तं सूत्रतात्पर्यं व्युदस्तं, तद्वार्त्तिं सूचयति—**तत्र**शब्देन। **तत्र** प्रपञ्चसत्यत्वे स्थिते सतीत्यर्थः। पूर्वपक्षमुपपादयति—**वृद्धव्यवहारादिति**। **वृद्धो** व्युत्पन्नः प्रयोज्यः, प्रयोजकश्च। तयोर्व्यवहारो वाचिकः, कायिकश्च। व्यवहारादन्यत्र शक्त्यवधारणं मा भूत्, ततः किमित्यत्राह—**व्यवहारस्य चेति**। कार्यधीपूर्वकलफलमाह—**कार्यार्थ एवेति**। ततः फलितमाह—**कार्यरूप इति**। वेदस्य शब्दात्मकलात्, शब्दस्य च व्युत्पत्त्यपेक्षत्वादिति भावः। ततः किमित्यत्राह—**अत इति**। **अतः** वेदार्थस्य कार्यरूपत्वादित्यर्थः। **न प्रमाणभावमनुभवितुमर्हन्ति** प्रामाण्यसंभावना च नास्ति; अंयोग्यत्वादित्यर्थः। प्रथमव्युत्पत्तिर्हि व्यवहारादन्यत्र न संभवति; न हि घटोऽस्तीत्युक्ते प्रवृत्त्यभावे सति तस्य बोधकत्वं ज्ञायते। बालानभिज्ञादिशब्दप्रयोगानन्तरं प्रयोज्यस्य प्रवृत्तिं दृष्ट्वा प्रवृत्तेः कार्यबुद्धिपूर्वकत्वं जानन् व्युत्पित्सुरयं शब्दः कार्यरूपार्थं बोधक इति निश्चिनोति, तत्र बहुषु प्रयोगेष्वनुवृत्तशब्दस्य अनुवृत्तार्थेन संबन्धं, व्यावृत्तशब्दस्य व्यावृत्तार्थेन संबन्धं गृहीत्वा आवापोद्वापाभ्यां तत्तच्छब्दविशेषैः शब्दविशेषसंबन्धं निश्चिनोतीति—प्रथमव्युत्पत्तिः कार्यार्थ एव। न हि प्रथमत एवायं शब्दोऽयमर्थं, एतुके–'अस्य शब्दस्यायमर्थः' इत्येतदाकाङ्क्षापदानामप्यर्थप्रतीतिः। एवं कार्यार्थ एव व्युत्पत्तिं कृतवतः पुरुषस्यायं शब्दोऽयमर्थः इति पश्चाच्छिक्षितेऽपि, प्रथमं कार्यार्थपरतया व्युत्पन्नकतिपयपदसममिव्याहारदर्शनात्प्रथमव्युत्पन्नपदेषु तत्तच्छब्दार्थसंबन्धग्रहणात्–सर्वे शब्दाः कार्यार्थपरा एवेति लक्ष्यन्ते। अतो 'अ एव लौकिकास्त एव वैदिका'

विषयवाक्येषु हर्षहेतूनां कालत्रयवर्तिनामर्थानामानन्त्यात्सुलभसुखप्रसवादिहर्षहेत्वर्थान्तरोपनिपातसंभावनया च प्रियार्थप्रतिपत्तिनिमित्तमुखविकासादिलिङ्गेनार्थविशेषबुद्धिहेतुत्वनिश्चयः। नापि व्युत्पन्नेतरपदविभक्त्यर्थस्य पदान्तरार्थनिश्चयेन, प्रकृत्यर्थनिश्चयेन वा शब्दस्य सिद्धवस्तुन्यभिधानशक्तिनिश्चयः; ज्ञातकार्याभिधायिपदसमुदायस्य तदंशविशेषनिश्चयरूपत्वात्तस्य। न च सर्पाद्गीतस्य 'नायं सर्पो रज्जुरेवे'ति शब्दश्रवणसमनन्तरं भयनिवृत्तिदर्शनेन सर्पाभावबुद्धिहेतुत्वनिश्चयः; अत्रापि 'निश्चेष्टं निर्विषमचेतनमिदं व'स्त्वित्याद्यर्थबोधेषु बहुषु भयनिवृत्तिहेतुषु सत्सु विशेषनिश्चयायोगात्। कार्यबुद्धिप्रवृत्तिव्याप्तिबलेन शब्दस्य प्रवर्तकार्थावबोधित्वमवगतमिति—सर्वपदानां कार्यपरत्वेन सर्वैः पदैः कार्यस्यैव विशिष्टस्य प्रतिपादनात्—नान्यान्वितस्वार्थमात्रे पदशक्तिनिश्चयः। इष्टसाधनतावुद्धिस्तु कार्यबुद्धिद्वारेण प्रवृत्तिहेतुः, न स्वरूपेण। अतीतानागतवर्तमानेष्टोपायबुद्धिषु प्रवृत्त्यनुपलम्भेः। इष्टोपायो हि मत्प्रयत्नादृते न सिध्यति, अतो मत्कृतिसाध्य इति बुद्धिर्यावन्न जायते तावन्न प्रवर्तते। अतः कार्यबुद्धिरेव प्रवृत्तिहेतुरिति प्रवर्तकस्यैव शब्दवाचितया कार्यस्यैव वेदवेद्यत्वात्, परिनिष्पन्नरूपब्रह्मप्राप्तिलक्षणानन्तस्थिर-

---

इति न्यायाद्वेदान्ताः सिद्धवस्तुनि न बोधका भवन्तीत्यर्थः। वेदान्तानां संस्कृतशब्दत्वात्—भाषान्तरेण प्रथमं व्युत्पन्नस्य संस्कृते शब्दे 'अस्य शब्दस्यायमर्थ' इति व्युत्पाद्यमाने प्रथममेव सिद्धवस्तुनि व्युत्पत्तिः स्यादिति—चेन्न; कार्यैकपरत्वेन प्रथमव्युत्पन्नभाषान्तरशब्दानां पर्यायत्वेन व्युत्पाद्यमानत्वात्, संस्कृतशब्दा अपि कार्यार्थपरत्वेनैव हि व्युत्पन्नाः स्युः। सिद्धवस्तुनि व्युत्पत्तेर्भट्टैरुक्तमुदाहरणं व्युदस्यति—**न चेति। कालत्रयवर्तिनामिति** पञ्जिकायामुक्तं, तदत्रामिप्रेतम्। देशकालयोग्यतादिभिः पुत्रजन्म जानातीत्यत्राह—**सुलभेति।** सुलभसुखप्रसवादिनाऽन्यथासिद्धिर्नयविवेकोक्ता। **आदि**शब्देन पित्राद्यनिष्टाभावः, भाविसंमृज्यादिकं च विवक्षितम्। **व्युत्पत्तिर्नाम**—शब्दस्यार्थविशेषैः सह संबन्धग्रहणं न त्वर्थमात्रेण—इत्येवं दूषणमुक्तम्॥

नैयायिकादिभिरुक्तमुदाहरणं व्युदस्यति—**नापीति।** व्युत्पन्नेतरपदस्य पदान्तरार्थनिश्चयोदाहरणमिदं—'कः कूजती'ति प्रश्नस्य 'पिकः कूजती'ति केनचिदुक्ते व्युत्पन्न**कूजति**शब्देन व्युत्पित्सुना [1]पिकशब्दार्थो ज्ञायते। व्युत्पन्नेतरपदविभक्त्यर्थस्य प्रकृत्यर्थनिश्चयोदाहरणमिदं—'काष्ठैः स्थाल्यामोदनं पचती'त्युक्ते व्युत्पन्नविभक्तिपचतिशब्दार्थेन व्युत्पित्सुना काष्ठादिप्रकृत्यर्थो ज्ञायत इति। **ज्ञातेति।** इदानीं श्रुते अस्मिन्वाक्ये पूर्वं कार्यपरतया व्युत्पन्नवाक्यस्थकतिपयपददर्शनात्—अवयमपि पदसमुदायः कार्याभिधायीति ज्ञायत इत्यभिप्रायेण **ज्ञातकार्याभिधायिपदसमुदायस्ये**त्युक्तम्। **तदंशविशेषः** कार्यांशविशेषः। कार्यं ह्यनेककारकविशिष्टं; तस्य कार्यस्य विशेषणांशनिश्चयरूपत्वात्। **तस्य** पदान्तरार्थनिश्चयस्य, प्रकृत्यर्थनिश्चयस्य चेत्यर्थः। यद्वा, **तदंशविशेषः**—कार्याभिधायिपदसमुदायांशविशेषः। मृषावादिभिरुक्तमुदाहरणं दूषयति—**न चेति।** वाचस्पतिनोक्तमर्थमाशङ्क्य परिहरति—**कार्येति।** तेन सत्येवं सिद्धवस्तुनि प्रामाण्यमुपपादितं—सर्वशब्दानामर्थोऽनुयायी वक्तव्यः, किं कार्यरूपार्थाभिधायित्वमनुयायि, उत कार्यान्वितस्वार्थाभिधायित्वम्, उत कारकान्वितस्वार्थाभिधायित्वम्। प्रथमे—कारकपदेषु व्यभिचारः; तेषां कार्याभिधायित्वाभावात्। द्वितीये—लिङादिषु व्यभिचारः; तेषां कार्यान्वितस्वार्थाभिधायित्वाभावात्। तृतीये च—कारकपदेषु व्यभिचारः; तेषां कारकान्वितस्वार्थाभिधायित्वाभावात्। तस्मादन्यान्वितस्वार्थाभिधायित्वं पदानामनुयायीति वक्तव्यमन्विताभिधानवादिना। अन्यान्वितत्वं सिद्धवस्तुनोऽपि स्यादिति—कार्यरूपार्थ एव व्युत्पत्तिरिति निर्बन्धोऽनुपपन्न—इतीमामाशङ्कामभिप्रेत्य परिहरति—**कार्यबुद्धीति। कार्यबुद्धिप्रवृत्तिव्याप्तिबलेने**ति उत्तरत्र **सर्वपदानां कार्यपरत्वेने**त्यनेनान्वयः; शब्दप्रयोगानन्तरं प्रवृत्तिदर्शनात्, शब्दस्य प्रवर्तकार्थावबोधकत्वात्, कार्यबुद्धेः प्रवृत्तेश्च। व्याप्तिबलेन प्रवर्तकस्य च तस्य कार्यरूपत्वात्—सर्वैः पदैः कार्यमेव विशिष्टं प्रतिपाद्यते। तस्मात् नान्यान्वितस्वार्थमात्रे पदशक्तिनिश्चयः, अपि तु विशिष्टकार्यांशविशेषे पदशक्तिनिश्चय इत्यर्थः। ननु—कार्यमेव प्रवर्तकं चेत्प्रवर्तकस्य शब्दार्थत्वात्—सर्वशब्दानां कार्यपरत्वं स्यात्, तन्न; इष्टसाधनतावुद्धेः प्रवर्तकत्वात्—इति माष्टोक्तमर्थमाशङ्क्याह—**इष्टसाधनतेति।** स्वप्रयोजनोपायः परेण साध्यते चेत्—तत्रापि न प्रवृत्तिरिति—वर्तमानाया अपीष्टसाधनतावुद्धेरप्रवर्तकत्वं दृष्टम्, अतः कार्यबुद्धिः प्रवृत्तेर्व्याप्येत्यर्थः। ननु—कार्यबुद्धिरपि प्रवृत्तिं व्यभिचरति; निर्वैनस्य द्विजस्य यागकर्तव्यतावुद्धिमत्त्वेऽपि प्रवृत्तेरभावात्, नैवं; 'ममैवायं साधयितुं शक्य'मिति बुद्धिर्हि कार्यबुद्धिः, न

---

१ पिकः शब्दार्थो का. मु. पु.।

फलापातापप्रतिपत्तेः, 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति' (आ. सू. श्रौ. ८।१।१) इत्यादिभिः कर्मणामेव स्थिरफलत्वप्रतिपादनाच्च—कर्मफलाल्पास्थिरत्वंब्रह्मज्ञानफलानन्तस्थिरत्वज्ञानहेतुको ब्रह्मविचारारम्भो न युक्त इति। अत्रामिधीयते—निखिललोकविदितशब्दार्थसंबन्धावधारणप्रकारमपनुद्य सर्वशब्दानामलौकिकैकार्थावबोधित्वावधारणं प्रामाणिका न बहुमन्वते। एवं किल बालाः शब्दार्थसंबन्धमवधारयन्ति—मातापितृप्रभृतिभिरम्बा-तात-मातुलादीन्, शशि-पशु-मृग-नर-पक्षि-सर्पादीं'श्चैनमवेहीमं चावधारये'त्यभिप्रायेणाङ्गुल्या निर्दिश्य निर्दिश्य तैस्तैः शब्दैस्तेषु तेष्वर्थेषु बहुशः शिक्षिताः शनैः शनैः तैस्तैः शब्दैरेव तेषु तेष्वर्थेषु स्वात्मनां बुद्ध्युत्पत्तिं दृष्ट्वा शब्दार्थयोः संबन्धान्तरादर्शनात्, संकेतयितृ-

---

तस्याः प्रवृत्तिव्यभिचारः। निर्धनस्य हि नैवंविधा प्रतिपत्तिः, किं तु यागः कदाचित्कर्तव्यः अर्थादिलाभादनुष्ठाने सति फलप्राप्तिरस्तीति, अतो न दोषः। ततः किमित्यपेक्षायामुपपादितहेतुगरीरं वदन्, शङ्कान्तरं च परिहरन्, पूर्वपक्षं निगमयति—**अत इत्यादिना**। ब्रह्मविचारारम्भे विशिष्टो हेतुरुक्तः, तत्र विशेष्यांशस्यानन्तस्थिरफलापातप्रतीतिरूपस्य असिद्धिरुक्ता, अत्र चोक्तमापादितम्। मन्त्रार्थवादेषूपासनविशिष्टभूतेष्वनन्तस्थिरफलापातप्रतीतिसिद्धेः—न विशेष्यांशासिद्धिरिति—विशिष्ट एव हेतुरित्येतदाशङ्क्याह—**अक्षय्यं ह वा इति**। अयमर्थः—यदि मन्त्रार्थवादेष्वनन्तस्थिरफलप्रतीत्या ब्रह्मविचारारम्भः, तर्हि पूर्वभागेऽपि 'अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवती'त्यादिभिरनन्तस्थिरफलापातप्रतीत्या—अल्पास्थिरफललनिर्णयरूपविशेषणांशासिद्धेः—ब्रह्मविचारारम्भो न युक्त इति विशिष्टहेतौ विशेषणविशेष्ययोरन्यतरांशासिद्ध्यभिप्रायेण—कर्मफलाल्पास्थिरत्व-ब्रह्मज्ञानफलानन्तस्थिरत्वज्ञानहेतुक इत्युक्तम्। **इत्यधिकरणपूर्वपक्षः**॥

अत्रामिधीयत इति। अस्मिन्पूर्वपक्षे सूत्रकारैः परिहारोऽभिधीयत इत्यर्थः। **निखिलेति**। अन्यथावदता भवतापि वक्ष्यमाणप्रकारेणैव शब्दव्युत्पत्तिः कृतेति **निखिललोक**शब्दस्य भावः। **प्रामाणिकाः** प्रमाणेनार्थं स्वीकुर्वन्त इत्यर्थः। कथं संबन्धावधारणमित्यत्राह—**एवं किलेति। मातापितृप्रभृतिभिरिति**। अयं भावः—यदा स्वयमेव बालो व्युत्पत्तिक्षमो भवति तदानीमप्येनं वृद्धैरुपाध्यायादिभिर्व्युत्पादयितुं श्रद्धधाना मातामित्रादयो न हि स्वयं व्युत्पत्तिक्षमदशायामुपेक्षन्ते, अपि लक्षरशिक्षाद्युपयोगिनीः शिक्षाः प्रथमत एव स्वबुद्धिपूर्वकं कुर्वन्तीति। **अम्बातात**प्रभृतिः सप्रतियोगिकः शब्दगणः, **शशिपशुप्रभृतिरप्रतियोगिकः** शब्दगण इति विभागः। असंबन्धिशब्दव्युत्पत्तेः पूर्वमेवाम्बातातादिशब्दव्युत्पत्तिर्दृश्यते, सा च तदमिमतशब्दार्थसंबन्धग्रहणे तु नोपपद्यते; न हि कंचित्प्रति पिता अन्यस्यापि पिता भवति। तस्माद् व्युत्पित्सोर्मातापित्रादिषु अन्यैस्तत्तच्छब्दप्रयोगासंभवात्—प्रथममम्बादिशब्दार्थव्युत्पत्तिस्वन्मते न संभवति, अतो बुद्धिपूर्वमेव प्रथमव्युत्पत्तिरिति ज्ञापनार्थं कोटिद्वयं शब्देषु दर्शितम्। यादृच्छिकवृद्धव्यवहारेणानन्तशब्दव्युत्पत्त्यनुपपत्तिश्च, सर्वलोकसंप्रतिपन्नव्युत्पत्तिप्रकाराप्रहवश्च। **एनमवेहि इमं चाऽवधारयेति। एवं** बोधकं शब्दम्, **इमं** बोध्यमर्थं च **अवेहीत्यर्थः। बहुश इति**। यावदङ्गुलिनिर्देशशब्दप्रयोगसाहचर्यदर्शनजनितवासनाभूयस्त्वोदयेन स्वयमेव तत्तदर्थेषु तत्तच्छब्दान् प्रयोक्तुम्, अर्थमात्रदर्शनेन शब्दं स्मर्तुं, शब्दमात्रश्रवणेनार्थं स्मर्तुं च क्षमा भवन्ति तावदित्यर्थः। **शिक्षिता**स्तैस्तैः शब्देषु तेषु तेष्वर्थेषु उत्पादितज्ञानाः। एवं तर्ह्यङ्गुल्या निर्दिष्टेष्वर्थेष्वमी शब्दाः सङ्केतिताः इति मन्वेरन् इति चेत्, यद्वा लिङ्गवज्जन्यजनकभावादिसंबन्धान्तरोद्बोधका इति मन्येरन्निति चेत्, अत्राह—**संबन्धान्तरादर्शनात्सङ्केतयितृपुरुषाज्ञानाच्चेति**। अयमर्थः—यादृच्छिकव्युत्पत्तावपि तुल्यं चोद्यं, शब्दप्रयोगानन्तरं प्रयोज्यप्रवृत्तिं दृष्टवतो व्युत्पित्सोरियं शङ्का भवति, एतच्छब्दप्रयोगादनन्तरमस्य प्रवृत्तिः—किं जन्यजनकभावादिसंबन्धात्, उत सङ्केतादिति। तत्र संबन्धान्तरशङ्का तदर्शनादेव न जायत इति चेत्, बुद्धिपूर्वकव्युत्पत्तावप्ययं परिहारः समानः। सङ्केतबुध्युत्पत्तिश्च नोपपद्यते—किमेतेऽसन्मातापित्रादयः सङ्केतयन्ति, उत पूर्वमेव कश्चित्सङ्केतितवानिति। न तावत्प्रथमः पक्षः; अनेकैः पुरुषैस्तेष्वेवार्थेष्वेकरूपशब्दप्रयोगदर्शनात्। नापि द्वितीयः; अनेन पूर्वं सङ्केतिताः शब्दा इति सङ्केतयितुः पुरुषस्याज्ञानात्—इति परिहारस्यापि वक्तव्यः, सोऽस्माकमपि समानः। सर्वप्रमाणानां बोधकत्वे अविशिष्टेऽपि—प्रत्यक्षस्य वैशद्यं सत्तया ज्ञानजनकत्वम्, अनुमानागमौ तु ज्ञाततया ज्ञापकौ, तत्रानुमानं जन्यजनकभावादिसंबन्धान्तरज्ञानेन बोध्यविषयबोधजनकं, शब्दस्तु बोध्यबोधकभावरूपसंबन्धज्ञानादेव बोध्यं बोधयति। एवं संबन्धान्तरशङ्का, सङ्केतितृशङ्का च निरस्ता; संबन्धान्तरामावात्, सङ्केतयितृपुरुषाज्ञानाच्च। बोध्यबोधकभाव एव संबन्ध इति बालैर्ज्ञातुं शक्यमिति चेत्, तत्तापि तुल्यम्। किंच—शब्दोच्चारणानन्तरं प्रयोज्यवृद्धस्य प्रवृत्तिं दृष्ट्वा प्रवृत्तेश्च—कार्यबुद्धिपूर्वकत्वमनुमाय 'यदनन्तरं यद्भवति तत्तस्य कार्यमिति न्यायाच्छब्दोच्चारणेन कार्यबुद्धिरस्य जातेति—कार्यरूपशब्दार्थ इति बोद्धुं बालैरतीव न शक्यते।

---

१ शब्दोच्चारणानन्तरं प्रवृत्तेश्च का. सु. पु.। २ इति यावच्छब्दो का. सु. पु.।

पुरुषाज्ञानाच्च—तेष्वर्थेषु तेषां शब्दानां प्रयोगो बोधकत्वनिबन्धन इति निश्चिन्वन्ति । पुनश्च 'व्युत्पन्नेतरशब्देष्वस्य शब्दस्यायमर्थ' इति पूर्ववृद्धैः शिक्षिताः सर्वशब्दानामर्थमवगम्य परप्रत्यायनाय तत्तदर्थावबोधिवाक्यजातं प्रयुञ्जते । प्रकारान्तरेणापि शब्दार्थसंबन्धावधारणं सुशकं; केनचित्पुरुषेण हस्तचेष्टादिना 'पिता ते सुखमास्त इति देवदत्ताय ज्ञापयेति प्रेषितः कश्चित्तज्ज्ञापने प्रवृत्तः 'पिता ते सुखमास्त' इति शब्दं प्रयुङ्क्ते, पार्श्वस्थोऽन्यो व्युत्पित्सुर्मूकवच्चेष्टाविशेषज्ञस्तज्ज्ञापने प्रवृत्तमिमं ज्ञात्वानुगतस्तज्ज्ञापनाय प्रयुक्तमिमं शब्दं श्रुत्वायं शब्दस्तदर्थबुद्धिहेतुरिति निश्चिनोतीति—कार्यार्थ एव व्युत्प-

---

अशक्यत्वं दृश्यते च; न हि बाला उक्तप्रकारेण कार्यार्थपरत्वं शब्दस्य निश्चिन्वन्ति । अतो बालैर्दुरवगमत्वाच्चायं भवत्पक्ष एवातीव प्रसजति । कालपरिपाकाज्ज्ञायत इति चेत्, अयं परिहारोऽसत्पक्षे मुसङ्गत इति । **पुनश्चेति । अस्य शब्दस्यायमर्थ इति** व्युत्पत्तिश्चेत्, अन्विताभिधानभङ्गप्रसङ्ग इति—चेन्न; प्रातिस्विकव्युत्पत्तेः समुदायज्ञानार्थत्वात् । न हि काव्यादिषु वाक्यार्थज्ञानोपयोगित्वेन संपाद्यमानं पदार्थज्ञानं वाक्यार्थज्ञानविरोधि, न व्याकरणशिक्षा च पदार्थज्ञानविरोधिनी । एवं तैस्तैः पदैः परस्परान्वितस्वार्थाभिधानव्युत्पत्तेः—प्रतिपदमर्थव्युत्पत्तिर्न विरोधिनी, अपि तु उपयुक्तैव—यथा भवत्पक्षे आवापोद्वापरूपेण प्रतिपदार्थव्युत्पत्तिर्वाक्यार्थज्ञानोपयोगित्वान्न विरोधिनी—तद्वत् । भवत्पक्षे तु प्रातिस्विकव्युत्पत्तिः पश्चाद्भाविनी, अत्र तु पूर्वभाविनीति विशेषः । वाक्यार्थज्ञानोपयोगित्वं समानं; शब्देनान्वयपर्यन्ताभिधानं चान्वितामिधानं, प्रातिस्विकव्युत्पत्तावपि तत्रैव व्युत्पत्तिः क्रियत इति—न विरोधः । अभिहितान्वयपक्षे अर्थानां परस्परान्वयबोधनयोग्यत्वं, शब्दानां स्वार्थबोधनशक्तिः, शब्दैरपि परस्परान्वययोग्यत्वेन अर्थाभिधानम्—इति त्रयमपि कल्पनीयम् । अन्विताभिधानपक्षे तु शब्दानां स्वार्थबोधनशक्तेरेवान्वयपर्यन्तलाभ्युपगमात्—कल्पनालाघवमस्तीति स एवात्र स्वीकृतः, अन्विताभिधानभङ्गप्रसङ्गश्च परिहृतः । **अस्य शब्दस्य अयमर्थ इत्यत्राप्ययमर्थ** इति बुध्यस्वेति ह्युक्तं भवति, तस्मात्कार्यार्थ एव व्युत्पत्तिरिति चेत्, एवं तर्हि—यादृच्छिकव्युत्पत्तावपि सिद्धवस्तुन्येव व्युत्पत्तिः स्यात्; प्रयोज्यवृद्धस्य कार्यबुद्धिर्जातेति हि व्युत्पित्सुर्जानाति । शब्दबोध्यत्वं कार्यस्यैव, न वुद्धेः; बुद्धिर्हि शब्दजन्या, न तु शब्दवाच्येति चेत्, अत्रापि शब्दबोध्यत्वं तत्तत्पदार्थस्यैव, न वुद्धेः; न हि घटबुद्धिर्घटशब्दवाच्या, अपि तु तज्जन्या, वाच्यस्तु घट एव इति तुल्यः परिहार—इत्यभिप्रेत्य **एनमवेहीमं चावधारये**त्यभिप्रायेणाङ्गुल्या **निर्दिश्ये**त्युक्तम् । **तत्तदर्थावबोधिवाक्यजातं प्रयुञ्जत इति** । यादृच्छिकव्युत्पत्तौ कतिपयशब्दानां कार्यार्थपरत्वेन व्युत्पत्तिदर्शनात्—व्युत्पादकाः पुरुषा अपि कार्यार्थ एव व्युत्पत्तिं कृतवन्तो 'गामानये'त्यादिवाक्यं प्रयुञ्जत इति चेत्, अनेकशब्दानां सिद्धवस्तुपरत्वेन व्युत्पत्तिदर्शनात्—व्युत्पादकाः पुरुषा अपि तथैव व्युत्पत्तिं कृत्वा तत्तदर्थविवक्षया शब्दान् प्रयुञ्जते । व्युत्पत्तिदर्शनं, प्रयोगदर्शनमपि हि उभयत्राविशिष्टमिति भावः ॥

एवं बुद्धिपूर्वकव्युत्पत्त्या शब्दानां सिद्धवस्तुपरत्वमुक्तं यादृच्छिकव्युत्पत्तावपि सिद्धार्थेऽपि व्युत्पत्तिरस्तीत्याह—**प्रकारान्तरेणापीति** । शब्दनिरपेक्षं तत्तदर्थज्ञानं चेष्टादिना संभवतीति दर्शयति—**मूकवदिति** । परोक्षयादृच्छिकव्युत्पत्तौ व्युत्पित्सुव्यतिरेकेण पुरुषद्वयापेक्षा, गवाद्यपेक्षा च, अस्यां तु व्युत्पित्सुव्यतिरेकेण पुरुषत्रयापेक्षेति वैषम्यम् । किंच—'पुत्रस्ते जात' इत्यादिवाक्यस्य, 'गामानये'त्यादिवायक्स्य च वैषम्यं दुरुपपादं; कालत्रयवर्तिहर्षहेतुबाहुल्यसंभावनया हि पुत्रजन्मवाक्ये व्युत्पत्तेरशक्यत्वमुक्तं, तत्र; सन्निहितं पुत्रजन्म दृष्ट्वा तज्ज्ञापनाय प्रवृत्ते पुरुषे ज्ञाते, पश्चाच्च जातकर्मादौ दृष्टे, ततः पूर्वमनुल्लसितमुखत्वादसंभावितपुत्रजन्मादिविज्ञानस्य पुरुषस्यैतद्वाक्यश्रवणानन्तरभाविनो मुखविकासस्यातीतागामिहर्षहेत्वन्तरश्रवणमूलत्वशङ्कानुदयात् । न हि सन्निहितहेतुपरित्यागेनादृष्टहेतुशङ्का क्वियमधिरोहति । सुलभसुखप्रसवादिहेत्वन्तरशङ्का स्यादिति—चेन्नैवं; सुलभादिमात्रस्य हर्षहेतुत्वायोगात् । न खल्वन्यदीयपुत्रजन्मादयनुबन्धिसुलभत्वादीना हर्षहेतुत्वम्; अतः स्वपुत्रजन्मविशेषणीभूतानां सुलभत्वादीनामेव हर्षहेतुत्वम्; अतः स्वपुत्रजन्मन्यज्ञाते सुलभत्वादीनां हर्षहेतुत्वायोगात्—अस्य वाक्यस्य स्वपुत्रजन्मज्ञापकत्वमवश्यं विदितं स्यात् । प्रागेव पुत्रजन्मज्ञानसंभवादस्य वाक्यस्य सुलभत्वादिपरत्वशङ्का स्यादिति—चेन्नैवं; ततः पूर्वं मुखविकासादिविरहेण प्रागेव पुत्रजन्मज्ञानशङ्कानुदयात् । अतः पुत्रजन्मनः सन्निहितत्वात्, पूर्वं मुखविकासाभावाच्च—प्रायमिकमुखविकासहेतोरस्य वाक्यस्य पुत्रजन्मज्ञापकत्वं व्युत्पित्सुर्मन्यते । तत्रैवं शङ्का संभवति—किं पुत्रजन्मादिमात्रज्ञापकमिदं वाक्यम्, उत सुलभत्वादिविशिष्टपुत्रजन्मज्ञापकमिति । ईदृशशङ्काप्रस्तुतं 'गामानये'त्यादिवाक्यस्यापि तुल्यं; किमिदं वाक्यं गवानयनमात्रप्रतिपादकम्, उत पुरोवर्तिनि पिण्डे ये शुक्लादिविशेषा दृश्यन्ते तैर्विशिष्टगवानयनप्रतिपादकमिति शङ्कोपपत्तेः । प्रयोगमेदेनावापोद्वापमुखेन शङ्कापाकरणमुभयत्र तुल्यम् । पुत्रजन्मवाक्यादपि गवानयनादिवाक्यस्य अनेकार्थान्तरशङ्काप्रस्तुतं सुतरां दृश्यत इति—अर्थविशेषावधारणमतीव कर्तुमशक्यं; गामानयेति

त्तिरिति निर्बन्धो निर्निबन्धनः । अतो वेदान्ताः परिनिष्पन्नं परं ब्रह्म, तदुपासनं चापरिमितफलं बोधयन्तीति तन्निर्णयफलो ब्रह्मविचारः कर्तव्यः । कार्यार्थत्वेऽपि वेदस्य ब्रह्मविचारः कर्तव्य एव । कथम्, **'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'** (बृ. २।४।५), **'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः'** (छा. ८।७।१), **'विज्ञाय प्रज्ञां कुर्वीत'** (बृ. ४।४।२१), **'दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम्। तद्वाव विजिज्ञासितव्यम्'** (छा. ८।१।१), **'तत्रापि दहं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम्'** (ना. १२।३) इत्यादिभिः प्रतिपन्नोपासनविषयकार्याधिकृतफलत्वेन **'ब्रह्मविदाप्नोति परम्'** (तै. २।१।१) इत्यादिभिर्ब्रह्मप्राप्तिः श्रूयत इति—ब्रह्मस्वरूपतद्विशेषणानां दुःखासंभिन्नदेशविशेषरूपस्वर्गादिवत्, रात्रिसत्रप्रतिष्ठादिवत्, अपगोरणशतयातनासाध्यसाधनभाववच्च—कार्योपयोगितयैव सिद्धेः । गामानयेत्यादिष्वपि वाक्येषु न कार्यार्थे व्युत्पत्तिः; भवदभिमतकार्यस्य दुर्निरूपत्वात् । कृतिभावभावि कृत्युद्देश्यं हि भवतः कार्यं, (कृतियत्नाधीनसत्ताकं)

शब्दप्रयोगानन्तरं व्यापारान्तरविधुरं गवि समानीतायामपि 'गां संदर्शय, गां पुरः स्थापय, गां देहि, गां विक्रीणीही'त्यादनेकार्थशङ्काहेतुत्वात्—प्रयोज्यवृद्धप्रवृत्तेः । किंच—गामानयेत्यादिशब्दप्रयोगानन्तरं समानयनात्पूर्वमेव उत्थान-उपरिवास-आच्छादन-दण्डग्रहण-यादृच्छिकजनसंभाषण-गमनादयवान्तरव्यापाराश्च बहवो यस्य पुरुषस्याद्यव्युत्पत्तावुपलभ्यन्ते तस्य तेष्वन्यतमार्थवाचकशङ्का गामानयेति वाक्यस्य जायते, पश्चाद्गवानयनमपि यादृच्छिकं कृतं स्यात्, न तु वाक्यप्रेरितत्वात्—इति च शङ्का संभवति । अतो नार्थविशेषसंबन्धावधारणसंभव इति—बहुभिः प्रयोगैरर्थविशेषनिश्चयोऽन्वयव्यतिरेकाभ्यामिति चेत्, एवमेव 'पुत्रस्ते जात' इत्यादिवाक्यस्य अर्थविशेषनिश्चयः सुतरां संभवति ॥ एवं सिद्धवस्तुनि शब्दव्युत्पत्त्युपपत्त्युपपादनेन वेदान्तानां परब्रह्मपरत्वमुपपन्नमित्याह—**अतो वेदान्ता इति ।** अथ 'कार्यार्थपरत्वमभ्युपगम्य ब्रह्मविचारस्य कर्तव्यतामाह—**कार्यार्थत्वेपीति ।** कार्यार्थत्वाभ्युपगमेऽपि स्तावकत्वसिद्धिहेतुत्वेन, फलसाधनत्वेन च प्रकारद्वयेन सिद्धवस्तुनि तात्पर्यमुत्तरत्रोपपादयिष्यते, अत्र तु प्रकारान्तरेणोपपाद्यते । अनन्तस्थिरफलापातप्रतीतेः सिसाधयिषितत्वात्—फलत्वेन तात्पर्यकथनमत्रोचितमिति फलतया सिद्धिरत्रोच्यते । अनेकवाक्योपादानमुपासने तात्पर्यातिशयज्ञापनार्थम्, उपसर्गविशेषसन्निवेशयोगायोगेऽप्यर्थभेदो नास्तीति ज्ञापनार्थं च । **उपासनविषयकार्याधिकृतेति ।** उपासनावच्छिन्नकृतिसाध्यापूर्वाधिकृतस्य । विशिनष्टि हि विषय उच्यते । **ब्रह्मस्वरूपतद्विशेषणानामिति । विशेषणानि** गुणाः, **विभूतयश्च । विधिवाक्योक्तस्य** फलस्यार्थवादोक्तविशेषणे **तात्पर्यमस्तीति** ज्ञापनार्थं **दुःखासंभिन्नदेशविशेषरूपस्वर्गादिवदित्युक्तम् ।** 'यस्मिन्नोष्णं न शीतं नार्तिरिति श्रुतिः । स्वर्गोऽप्यफलं विधिगतं, विशेषणं च । अन्यत्र फलस्य विधिवाक्यगतत्वाभावेऽपि, अन्यपरार्थवादोक्तफले विध्यपेक्षिते तात्पर्यमस्तीति दर्शयितुं **रात्रिसत्रप्रतिष्ठावदित्युक्तम् ।** 'रात्रीरूपेयात् प्रतितिष्ठन्ति ह वा एते य एता रात्रीरुपयन्ती'ति हि श्रुतिः । 'प्रतिष्ठाकाम उपेया'दिति वचनाभावेऽपि अर्थवादोक्तफले तात्पर्यमङ्गीकृतमित्यर्थः । विधेयोपकारके विधिविरोधिनि फलेऽपि तात्पर्यमस्तीतिं ज्ञापनार्थम् **अपगोरणशतयातनासाध्यसाधनभाववच्चेत्युक्तम् ।** 'तस्माद्ब्राह्मणायं नार्पगुरेत योऽवगुरते शतेनायातया'दिति हि श्रुतिः । अनेन मोक्षोपायविरोधिफलेऽपि तात्पर्यं सिद्धमित्यभिप्रायः । अनुयायिहेतुः **कार्योपयोगितयैव सिद्धे**रित्युक्तः । उपासनाविषयकार्योपयोगित्वात् फलभूतब्रह्मस्वरूपे, तद्विशेषणे गुणादौ, विधिविरोधिनि फले, संसारहेयत्वादौ च विवक्षा कार्यत्वमर्थः । प्रवर्तकवाक्येषि न लदमिमतसिद्धिरित्याह—**गामिति । कार्यार्थे** प्राधान्येन लदमिमते कृत्युद्देश्यलक्षणकार्यार्थे । कुत इत्याह **भवदिति ।** स्वेदश्रमादावपि कृतिसाध्यत्वात्तद्व्यावृत्त्यर्थं क्रियाकार्येऽप्युद्देश्यत्वमङ्गीकार्यं; तदुद्देश्यत्वस्य दुर्निरूपतया—तल्लक्षणकार्यस्य दुर्निरूपत्वादित्यर्थः । दुर्निरूपत्वं कथमित्याह—**कृतीति । कृतिभावभावीति । कृतिव्यान्तरप्रयत्नः**, तत्सद्भवानन्तरभावि कृतिसाध्यत्वं, भावोऽर्थादिष्वस्तीति तद्व्यावृत्त्यर्थं **कृत्युद्देश्यत्वमित्युक्तम् । कृत्युद्देश्यत्वं कृतिप्रधानत्वमित्यर्थः ।** कार्यस्य कृतिसाध्यत्वम्, इष्टत्वं, कृत्युद्देश्यत्वम्—इति त्रयमपि भवन्मतेऽभ्युपगतम् । इष्टत्वकृतिसाध्यत्वे फलभावार्थसाधारणे । कृतिप्रधानत्वं ह्याकारद्वयविलक्षणं फलभावार्थव्यावर्तकं वर्ण्यते, यथा टीकायामुक्तं—'कार्यमर्थं प्रतिपादयतो वेदस्य प्रामाण्य'मिति । अत्रार्थशब्देन प्राधान्यं विवक्षितं—यथा पञ्चिकायां 'कार्यमर्थं प्रधानतया प्रतिपादयतो वेदस्य प्रामाण्यं; तत्रैव प्रामाण्यशब्दव्युत्पत्तेः, व्युत्पत्त्यायत्तत्वात्तस्ये'ति । प्रकरणपञ्चिकायां—'कृतिसाध्यं प्रधानं यत्तत्कार्यमभिधीयत' इति । तत्र तृतीयाकारतयाऽभिमतं कृत्युद्देश्यत्वं कृतिसाध्यत्वेष्टत्वाकारयोरन्यतराकारे पर्यवसतीत्यभिप्रायेण दूषयितुमाह—**कृत्युद्देश्यत्वं चेति ।** पाणिन्युक्तप्रकारेण कर्मत्वं विवृणोति

कृत्युद्देश्यत्वं च कृतिकर्मत्वं, कृतिकर्मत्वं च कृत्या प्रामुमिष्टतमत्वम्, इष्टतमं च सुखं, वर्तमानदुःखस्य तन्निवृत्तिर्वा । तत्रेष्टसुखार्थिना पुरुषेण स्वप्रयत्नादृते यदि तदसिद्धिः प्रतीता ततः प्रयत्नेच्छुः प्रवर्तते पुरुष इति—न क्वचिदपीच्छाविषयस्य कृत्यधीनसिद्धित्वमन्तरेण कृत्युद्देश्यत्वं नाम किंचिदप्युपलभ्यते । इच्छाविषयस्य प्रेरकत्वं च प्रयत्नाधीनसिद्धित्वमेव; तत एव प्रवृत्तेः । न च पुरुषानुकूलत्वं कृत्युद्देश्यत्वम्; यतः सुखमेव पुरुषानुकूलम् । न च दुःखनिवृत्तेः पुरुषानुकूलत्वं; पुरुषानुकूलं सुखं तत्प्रतिकूलं दुःखमिति हि सुखदुःखयोः स्वरूपविवेकः । दुःखस्य प्रतिकूलतया तन्निवृत्तिरिष्टा भवति, नानुकूलतया । अनुकूलप्रतिकूलान्वयविरहे स्वरूपेणावस्थितिर्हि दुःखनिवृत्तिः । अतः सुखव्यतिरिक्तस्य क्रियादेरनुकूलत्वं न संभवति । न सुखार्थतया तस्याप्यनुकूलत्वम्; दुःखात्मकत्वात्तस्य । सुखार्थतयापि तदुपादानेच्छामात्रमेव भवति । नच कृतिं प्रति शेषित्वं कृत्युद्देश्यत्वम्; भवत्पक्षे शेषित्वस्यानिरूपणात् । नच परोद्देशप्रवृत्तकृतिव्याप्यर्हत्वं शेषत्वमिति—तत्प्रतिसंबन्धी शेषीत्यवगम्यते; तथा सति कृतेरशेषत्वेन तां प्रति तत्साध्यस्य शेषित्वाभावात् । नच परोद्देशप्रवृत्त्यर्हतायाः शेषत्वेन परः शेषी; उद्देश्यत्वस्यैव निरूप्यमाणत्वात्, प्रधानस्यापि भृत्योद्देशप्रवृत्त्यर्हत्वदर्शनाच्च । प्रधानस्तु भृत्यपोषणेऽपि स्वोद्देशेन प्रवर्तत इति—चेन्न; भृत्योपि हि प्रधानपोषणे स्वोद्देशेनैव प्रवर्तते । कार्यस्वरूपस्यैवानिरूपणात्—कार्यप्रतिसंबन्धी शेषः, तत्प्रतिसं-

---

कृतिकर्मत्वं चेति । इष्टतमत्वं च कार्ये नास्तीत्याह—**इष्टतमं चेति** । **कृतिकर्मत्वं** नाम—प्रवर्तकत्वमित्यत्राह—**तत्रेति** । तदपीष्टस्य स्वप्रयत्नसाध्यत्वमेवेत्यर्थः । **आदि**शब्देन दुःखनिवृत्तिरुच्यते । **स्वप्रयत्नादृते यदी**त्यादेरयं भावः—कृतिसाध्यत्वातिरेकिकृतिकर्मत्वं नाम इष्टतमत्वे पर्यवस्यतीति **प्रयत्नेच्छुः** चिकीर्षुः **प्रवर्तते,** आन्तरप्रयत्नमिच्छन् स तमुत्पादयतीत्यर्थः । इष्टतमस्यैव रूपद्वयमस्ति—इच्छाविषयत्वं, प्रेरकत्वं चेति, तत्र प्रेरकत्वं कृत्युद्देश्यत्वमित्यत्राह—**इच्छाविषयस्येति** । कुत इत्यत्राह—**तत एवेति** । पुरुषानुकूलत्वं कृत्युद्देश्यत्वमित्यत्राह—**न चेति** । सुखमेव पुरुषानुकूलमिति न वाच्यं; सुखव्यतिरिक्तस्यापि अनुकूलत्वदर्शनादित्यत्राह—**न च दुःखनिवृत्तेः पुरुषानुकूलत्वमिति** । न हि दुःखनिवृत्तिः सुखं भवतीत्यर्थः । एतदुपपादयति—**पुरुषानुकूलमिति** । तर्हि दुःखनिवृत्तेरिच्छाविषयत्वं कथमित्यत्राह—**दुःखस्येति** । खत इष्टत्वम्—अनुकूलत्वं, न लिष्टान्तरहेतुतया, अनिष्टनिवृत्तिरूपतया वा इष्टत्वम् । एवं खतोऽनिष्टत्वं—प्रतिकूलत्वं न त्वनिष्टान्तरहेतुतया, इष्टनिवृत्तिरूपतया वाऽनिष्टत्वम् । अतो दुःखनिवृत्तेरिष्टत्वं—दुःखस्य प्रतिकूलत्वात्, नानुकूलत्वादित्यर्थः । दुःखनिवृत्तेरनुकूलाभावमुपपादयति—**अनुकूलप्रतिकूलेति । स्वरूपेणावस्थितिः** सुखनिवृत्तिरूपा, दुःखनिवृत्तिरूपा च । अनुकूलप्रतिकूलान्वयविरहरूपायां स्वरूपेणावस्थितौ दुःखनिवृत्त्यंशस्य सामानाधिकरण्येन व्यपदेशः । दुःखनिवृत्तिरेव सुखं चेत्, दुःखनिवृत्तौ सुखनिवृत्तिर्न स्यात्, तदा सुषुप्तावपि सुखान्वयप्रसङ्गः । अन्यतरनिवृत्तिरन्यतरसंयोगश्चेत्, तर्हि स्वापेऽपि दुःखसुखानन्वयः प्रसजेदिति भावः । अपूर्वस्यानुकूलत्वमेवेत्यत्र दृष्टान्तामिप्रायेण **क्रियादे**रित्यादिशब्देन प्रयत्नो विवक्षितः । सुखसाधनत्वादनुकूलत्वमित्यत्राह—**नेति** । कुत इत्यत्राह—**दुःखात्मकत्वादिति । तस्य** क्रियादेः । प्रतिकूलरूपतया भासमानं वा, तद्विषयज्ञानं वा दुःखं, न तद्व्यतिरिक्तमात्मगुणान्तरम्—इत्यमिप्रेत्य **दुःखात्मकत्वा**दित्यं हेतुरुक्तः । **सुखार्थतयेति** । न हि दण्डचक्रादिर्घटो भवतीत्यर्थः । असुखार्थात्सुखार्थस्य किं वैषम्यमित्यत्राह—**सुखार्थतयापीति** । कृतिशेषित्वं-कृत्युद्देश्यत्वमिति पक्षं दूषयति—**न चेति । अनिरूपणात्** दुर्निरूपत्वादित्यर्थः । परोद्देशप्रवृत्तकृतिव्याप्यर्हत्वं शेषत्वमिति पक्षमनूद्य दूषयति—**न च परोद्देशप्रवृत्त्येत्यादिना,** न च परोद्देशेन प्रवृत्त्यर्हतायां इति । उत्पत्तिश्च प्रवृत्तिव्यापारः, अतः **प्रवृत्त्यर्हत्वम्** उत्पत्त्यर्हत्वं, परोद्देशप्रवृत्त्यर्हतायाः शेषत्वरूपतयेत्यर्थः । **उद्देश्यस्यैव निरूप्यमाणत्वादिति** । अयमर्थः—कृत्युद्देश्यत्वं-कृतिशेषित्वं, शेषित्वं च-शेषप्रतिसंबन्धित्वं, शेषत्वं-परोद्देशप्रवृत्त्यर्हत्वमित्युक्ते सत्युद्देश्यत्वं नाम-उद्देश्यत्वमित्युक्तं भवतीत्यात्माश्रयः; उद्देश्यत्वनिरूपणोपयुक्तस्य शेषत्वनिरूपणस्योद्देश्यत्वनिरूपणसापेक्षत्वादिति । किं परोद्देशप्रवृत्त्यभोगव्यवच्छेदो विवक्षितः, उतान्ययोगव्यवच्छेद इति विकल्पे, प्रथमे शिरसि—राजन्यतिव्याप्तिमाह—**प्रधानस्यापीति** । अत्रोद्देश्यशब्देनं प्रयोजनमात्रमभिसन्धिर्विवक्षितः । तत्परिहारमुखेन द्वितीयं शिरः—**सङ्गते—प्रधानस्त्विति** । परोद्देशेन प्रवृत्त्यन्ययोगव्यवच्छेदो विवक्षितः, स तु प्रधानस्य नास्ति; स्वोद्देशेनापि तस्य प्रवृत्तेः, अतो नातिव्याप्तिरित्यर्थः । परिहरति—**नेति** । मृत्येष्वव्याप्तिमाह—**भृत्योऽपि हीति** । कार्यप्रतिसंबन्धित्वं शेषत्वमिति पक्षं दूषयति—**कार्यस्वरूपस्येति** । कार्यस्वरूपे निरूप्यमाणे फलभावार्थविलक्षणाकारेण तन्निरूपणार्थं **कार्यत्वं कृत्युद्देश्य-**

त्वमित्युक्तम्। उद्देश्यत्वं-शेषित्वं, शेषित्वं च-शेषप्रतिसंबन्धित्वं, शेषत्वं च-कार्यप्रतिसंबन्धित्वमित्युक्ते सत्यात्माश्रयः स्यात्, कार्यनिरूपणोपयुक्तशेषत्वनिरूपणस्य कार्यनिरूपणसापेक्षत्वादित्यर्थः। भाष्यकाराभिमतं शेषत्वलक्षणं स्वीकृत्य 'कृत्युद्देश्यत्वसमर्थनमपि दुःशकं; तथा हि—'परगतातिशयाधानेच्छयोपादेयत्वमेव यस्य स्वरूपं स शेषः, परश्च शेषी'ति भगवान् भाष्यकारो वेदार्थसंग्रहे शेषशेषिलक्षणममाषिष्ट। **शेषः परार्थत्वा**दिति शेषशेषिभावलक्षणपरस्य जैमिनीयसूत्रस्य परैरन्यथाव्याख्यातत्वात्तद्व्यावृत्त्यर्थं तत्र सूत्रस्यार्थोऽनेन लक्षणग्रन्थेन यथावत्प्रदर्श्यते। अस्यार्थ उच्यते—अन्यस्य प्रयोजनमेव यस्य परमप्रयोजनं स शेषः, अन्यः शेषीति वाक्यार्थः। अत्र **पर**शब्दोऽन्यपर्यायः। **परातिशय**शब्दयोः कर्मधारयसङ्घानिवृत्त्यर्थौ गतशब्दः। तेन स्वगतातिशयाधायके शेषिण्यतिव्याप्तिव्युदासः। **अतिशय**शब्दः प्रतिकूलेतराकारपरः, निकृष्टेतराकारपरो वा। तेन परगतविनाशाधायकशस्त्राग्निकल्पकादीनां विनाश्यं प्रति शेषत्वव्युदासः। नच दुःखहेतुषु यातनाशरीरेष्वव्याप्तिः; तेषामपि दुःखजननद्वारा पापक्षयलक्षणातिशयहेतुत्वात्। न चानुत्पन्नेऽपूर्वे वीह्यादिभिरतिशयाधानायोद्यातेष्वव्याप्तिः; सत्ताव्यमस्यातिशयरूपत्वात्, निकर्षात्मकधर्मेतराकारोद्यातिशयः। नन्वु—मानसंबन्धार्हं वा व्यवहारार्हं वत्स्वरूपं तदेव सदिति भवन्मतं, सत्ताजात्यभावात्तत्कथं स्वरूपमेवाकार इत्युच्यते, न; स्वरूपस्यैव सत्तारूपत्वेऽपि तल्लाभस्याकारलोपपत्तेः, सत्तालाभो ह्यतिशय इत्युक्तम्। सत्तालक्षणस्वरूपस्य च लाभो नाम-प्रथमक्षणसंबन्धः। स्वरूपस्याविद्यमानत्वेऽपि धीस्थतया परातिशयाधानव्यवहार उपपन्नः। **इच्छ्येते**तिपदेन परगतातिशयस्य इच्छाविषयतया प्रयोजनत्वमवगम्यते। **इच्छा**पदस्य च निरुपपदत्वात्-साक्षादेवेच्छाविषयत्वमभिप्रेतम्। साक्षादिच्छाविषयश्च परमप्रयोजनम्; अवान्तरप्रयोजनस्य हि तदर्थतयेष्टत्वमिति—न साक्षादिच्छाविषयत्वम्। अतः परमप्रयोजनज्ञापकेनेच्छ्येते पदेन **परार्थत्वा**दित्यर्थशब्दो व्याख्यातो भवति। अर्थ्यत इत्यर्थः इष्यत इति यावत्। निरुपपदश्चार्थशब्दः स्वतः परमप्रयोजनपरः। अनेन स्वातिशयाधायके मृत्वादौ लक्षणस्याव्याप्तिशङ्काव्युदासः; मृत्योर्हि स्वालङ्कारादिकमपि स्वाभ्यतिशयाय भवतीति हि स्वबुद्ध्या स्वातिशयमाधत्ते, अतो मृत्वेन स्वातिशयाधानस्य परातिशयः परमप्रयोजनमिति—नाव्याप्तिः। **उपादेयत्वं** स्वीकार्यत्वं, व्यवहर्तव्यत्वमिति यावत्। इच्छा-स्वीकारौ यथायोग्यं संभवतः। शेषशेषिणोरुभयोः, अन्यतरस्मिन् वा संभवतश्चेदिच्छा-स्वीकारौ तद्गतौ स्तः, यथा—राजभृत्यराजतद्धनादौ। उभयमचेतनं चेत्, उभयव्यतिरिक्तचेतनगताविच्छा-स्वीकारौ, यथा—प्रभाप्रभावद्यागतदज्ञादिके। **उपादेयत्वमु**पादातुमर्हत्वम्। तेनाकिंचित्करदशायामव्याप्तिपरिहारः। **एव**कारेण कदाचित्त्वार्थनिरपेक्षपरप्रयोजनसाधकेषु प्रकृष्टकृपाप्रेहान्वितेष्वतिव्याप्तिव्युदासः। अथवा, केनचिदाकारेणोपहितस्य शेषत्वे सति तदनुपहितस्य शेषत्वव्यावृत्त्यर्थं **एव**कारः; अनुपहितस्य प्रयोजनान्तरसाधकत्वेन परातिशयैकप्रयोजनत्वाभावात्। **स्वरूपं** स्वं रूपम्-असाधारणधर्मः, निरूपकधर्म इत्यर्थः। नच—**निरूपक**शब्दस्य व्युत्पादनार्थत्वात्-व्यावर्त्यधर्मापेक्षा। परातिशय एव परमप्रयोजनं यस्य स परं प्रति शेष इति लक्षणमुक्तं भवति। यतः परातिशयस्यैव परमप्रयोजनसाधायकत्वं लक्षणम्, अत एव परगतातिशयाधानायोगान्ययोगव्यवच्छेदविकल्पेन राजन्यभृत्ययोरतिव्याप्त्यव्याप्तिप्रसञ्जनमसत्पक्षे नावतरति; परातिशयमात्राधायकत्वस्य लक्षणत्वाभावात्। नच-द्वारशेषिणतस्वातिशयस्य परमशेषिगतातिशयं प्रति प्रयोजकत्वे सत्यपि तस्य परमप्रयोजनत्वाभावात्-द्वारशेषिणं प्रति शेषभूतवस्तुनि लक्षणस्याव्याप्तिः शङ्कनीया; शेषभूतवस्तुगतातिशयापेक्षया शेषिगतातिशयस्य पारम्यमात्रस्य विवक्षिततया—परमशेषिगतातिशयरूपपरमप्रयोजनत्वस्य व्युदसनीयत्वाभावात्। ततश्च द्वारशेषिगतातिशयस्य शेषभूतवस्तुगतातिशयान्तराधायकत्वेन प्रयोजनत्वं **परम**शब्दव्युदसनीयम्। नन्वु—**पुरुषस्य कर्मार्थत्वा**दिति पुरुषस्य कर्मशेषत्वं कर्ममीमांसायां राद्धान्तितम्। पुरुषश्च स्वर्गकाम इति—तस्य परातिशयनिष्पादनमेव परमप्रयोजनं न भवतीत्यव्याप्तिरिति—चेत्; तस्य कर्तृलोपहितवेषेण शेषत्वात्, उपहितस्य कर्मनिष्पादनैकप्रयोजनत्वाच्च—कर्मशेषतोपपत्तेः। नन्वु—एतल्लक्षणमसंभवहतं; न खलु चेतयमानः कश्चित्परगतातिशयं स्वस्य परमप्रयोजनं मत्वा प्रवर्तते, किंतु परप्रयोजनमपि स्वप्रयोजनार्थं मत्वा हि प्रवर्तते, उच्यते—नैवमसंभवः; अचेतनेषु परातिशयैकप्रयोजनत्वदर्शनात्। यद्यपि, चेतनस्वारस्येन स्वप्रयोजनमेव परमप्रयोजनं मन्यते, तथापि न लक्षणस्य हानिः; अन्यथासिद्धिशैथिल्यैः परातिशयनिष्पादनैकप्रयोजनतया प्रतिपत्तुं शक्यत्वात्। **इच्छा-स्वीकारौ यथासंभवमिति** गुरुम्। तथा-प्रतिपत्तियोग्यत्वमनिष्टसंपर्कवर्जनीयं स्वयमपि मृत्वो जानाति, अपि च परातिशयस्य परमप्रयोजनत्वादिः स्वरसतश्चेतनस्यापि संभवति; प्रकृष्टकृपाप्रेहान्वितेषु तदर्शनात्। तथा हि स्वार्थनिरपेक्षा परदुःखहिष्णुता। [illegible] पर इति विवक्षितः। अर्थादिकामनया परदुःखं विषयविशेषादुःखानुवृत्तिरनिष्टा स्यादिति तदनुदासाय स्वार्थानपेक्षत्वम्। यद्यपि कृपया परं रक्षतः शास्त्रादिदमदृष्टं, तथाप्यदृष्टासंबन्धिनिरहितस्यैव परदुःखदर्शनानन्तरमनुपपत्तिदर्शनात्, तत्प्रकाशनायाप्यदृष्टासंबन्धिपराहितदर्शनाच्च—स्वार्थानपेक्षता युक्ता। परदुःखदर्शनचलितकारुण्यस्य दुःखनिवृत्तिप्रकारत्व-तत्प्रवृत्तिरिति—न स्वार्थानपेक्षमिति चेत्, ईदृशं स्वार्थकलं शेषस्वाभ्यति। तदि स्वार्थानपेक्षं न भवति, किंतु तत्प्रवृत्त्यैव; परदुःखज्ञानजदुःखनिवृत्तौ, परात्युदयज्ञानजप्रीतिमत्त्वं च विना स्वार्था-

बन्धी शेषीत्यप्यसंगतम्। नापि कृतिप्रयोजनत्वं कृत्युद्देश्यत्वम्; पुरुषस्य कृत्यारम्भप्रयोजनमेव हि कृतिप्रयोजनं, स चेच्छाविषयः, तस्मादिष्टत्वातिरेकिकृत्युद्देश्यत्वानिरूपणात्—कृतिसाध्यताकृतिप्रधानत्वरूपं कार्यं दुर्निरूपमेव। नियोगस्यापि साक्षादिच्छाविषयभूतसुखदुःखनिवृत्तिभ्यामन्यत्वात्—तत्साधनतयैवेष्टत्वं, कृतिसाध्यत्वं च। अत एव हि तस्य क्रियातिरिक्तता; अन्यथा क्रियैव कार्यं स्यात्। स्वर्गकामपदसमभिव्याहारानुगुण्येन लिङ्गादिवाच्यं कार्यं स्वर्गसाधनमेवेति—क्षणभङ्गिकर्मातिरेकि स्थिरं

नपेक्षत्वस्य विवक्षितत्वात्, तथा मित्रादिषु स्नेहप्रकर्षाच्च—स्वार्थानपेक्षा प्रवृत्तिर्बन्धुविषयस्नेहमहानिकरी प्राणव्ययकरी च दृश्यते। संबन्धविशेषान्वितेषु प्रीतिः **स्नेहः**। यस्य विपाकाः—अस्थानभयशङ्कित्वं, दोषानवभासो, दोषेऽपि गुणबुद्धिरित्यादयः। स्निग्धश्च जनः स्वसत्तामनपेक्ष्य पुत्रादिदुःखनिवृत्त्यर्थे प्रवर्तमानो दृश्यते, तच्च तद्दुःखासहत्वकृतम्। यस्य च दुःखातिशयदर्शनं स्वसत्तानपेक्षतामापादयेत् स च निरतिशयप्रीतिविषयः; परानर्थनिमित्ताप्रीतितारतम्यस्य तद्विषयप्रीतितारतम्यनिबन्धनत्वात्। यश्च निरतिशयप्रियः तदभ्युदयोऽपि निरतिशयप्रियः; तत्प्रीतितारतम्यस्य तत्संबन्धिप्रीतितारतम्यहेतुत्वात्। तदभ्युदयश्च परमप्रयोजनं भवति; स्वप्रीतिहेतुभूतस्वगतार्थान्तरसाधनत्वनैरपेक्ष्येण स्वेच्छाविषयत्वात्। अतः कृपया, स्नेहेन वा परदुःखासहिष्णुत्वदर्शनात्—परप्रयोजनस्य परमप्रयोजनत्वं सिद्धमिति न शेषलक्षणस्यासंभवः। नच—परमप्रयोजनरूपपरातिशयाधायकत्वस्य मित्रादिष्वपि संभवात्—लक्षणस्यातिव्याप्तिः शङ्कनीया; तेषां परातिशयैकप्रयोजनत्वनियमाभावात्। तद्धि तेषामाकारविशेषोपहितरूपेण वा, यावज्जीवं वा पुरुषविशेषं प्रति न नियतं, पुरुषमेदेनाप्यनियतं च, भृत्येषु तु तन्नियतं; शेषिविशेषनियमाभावेऽपि यंकंचित्प्रति पारार्थ्यं भृत्यादेर्यावदात्मभावीति। यदीदृक्त्वं न दृश्यते तेषां न मृत्वलम्। यद्वा, यद्यपि गर्भदासादयः स्वेषां परार्थैकप्रयोजनत्वमजानन्तः शेषिण्यतिशयाधानमपि स्वार्थं मन्यन्ते, तथापि 'स्थूलोऽहं'मित्यात्मनो देहादभिन्नत्वबुद्धिवत्सा भ्रान्तिरिति—न लक्षणाव्याप्तिः; स्वार्थत्वबुद्धेरात्मनः स्थूलत्वस्येव इव प्रमाणबाधितत्वात्। नच—स्वार्थत्वभ्रान्तिमात्रेण पारार्थ्यहानिः; न ह्यात्मनः 'स्थूलोऽहं'मिति भ्रान्त्या देहवैलक्षण्यहानिः। एवं चिदचितोरपि स्वातन्त्र्यबुद्धेः श्रुतिबाधितत्वात्—न लक्षणाव्याप्तिः। न खलु व्रीह्यादीनां यागीयत्वाज्ञानेऽपि यागशेषत्वहानिः। स्वातन्त्र्याभिमानवतः परमप्रयोजनरूपं परगतातिशयं नियमेनानापादयतः कथं लक्षणवत्त्वमिति—चेन्न; एतद्बुद्ध्या तथात्वानवगमेऽपि वस्तुतः परमात्मलीलोपकरणतया परमात्मनि लीलारसरूपातिशयस्य नियमेन सिद्धेः। तत्त्वज्ञैरीश्वरपरिकरत्वेन नियमेन ज्ञायमानत्वं चास्य किंचित्कारः। तेन एतत्परिकरवत्तया ज्ञायमानत्वरूपातिशयः परस्य सिध्येत्। तदुक्तं 'नीतिविद्भिः—'मनागुपकारिता सर्वस्यास्यैव तत्परिकरत्वेन ज्ञायमानत्वा'दिति। शेषभूतवस्त्वाहितलीलारसाद्यतिशयभात्त्वं न परमात्मनोऽवाप्तसमस्तकामत्वविरोधि; इच्छायां सत्यामभिमतविनियोगानुगुणपरिकरसंपत्तिर्ह्यवाप्तसमस्तकामत्वं, यथाह भगवान् भाष्यकारो वेदान्तसारे—**'अस्यात्मतृप्तस्यावाप्तसमस्तकामत्वं हि सदाऽभिमतसकलभोगोपकरणसद्भाव'** इति। अतो यथोक्तशेषलक्षणमुपपन्नम्। एवमस्मदुक्तं शेषलक्षणमङ्गीकृत्य **कृतिं प्रति शेषित्वं कृत्युद्देश्यत्वमिति** परैर्वक्तुं न शक्यते; विकल्पासहत्वात्। किं त्वया द्वारशेषित्वं कृत्युद्देश्यत्वमभिमतम्, उत परमशेषित्वम्। प्रथमे—भावार्थस्यापि कृतिशेषित्वं स्यात्; तस्य कृतिसाध्यत्वात्। द्वितीये—स्वर्गस्य कृतिं प्रति शेषित्वं स्यात्; कृतिसाध्यापूर्वस्यापि स्वर्गसाधनत्वात्। अतः कृतिशेषित्वरूपं कृत्युद्देश्यत्वं फलभावार्थविलक्षणाकारेण न सिध्यति॥ अथ कृतिप्रयोजनत्वं कृत्युद्देश्यत्वमिति पक्षं दूषयति—**नापीति।** नहि कृतिर्नाम चेतयमाना काचित्प्रयोजनवती, तस्मात्कृतिप्रयोजनं नाम कृतिमत्पुरुषप्रयोजनमित्यर्थः। ततः किमित्यपेक्षायां तच्चेष्टत्वे पर्यवस्यतीत्याह—**स चेति। कृतिसाध्यताकृतिप्रधानत्वरूपं कार्यं दुर्निरूपमेवेति। कृतिप्रधानत्व**शब्देन खेदादिव्यावृत्तिः। **कृतिसाध्यता**शब्देन आत्मव्यावृत्तिः। तस्य हि कृतिशेषित्वमस्ति, विशिष्टस्य लक्षणत्वात्तत्र विशेष्ये दुर्निरूपे सति विशिष्टमेवासिद्धमित्यर्थः॥

एवं तृतीयाकाररूपं प्रयोजनत्वं दूषितम्, अथ स्वतइष्टत्वरूपं प्रयोजनत्वं, तत्प्रयुक्तकृतिसाध्यत्वं च दूषयति—**नियोगस्यापीति। इषिः** इच्छा, अत्रेच्छाविषयभूतार्थान्तरसाधनत्वविरहेणेष्टत्वं स्वतइष्टत्वं विवक्षितं, तत्सुखस्य दुःखनिवृत्तेश्च समानं, स्वतइष्टत्वं, स्वतइष्टत्वप्रयुक्तकृतिसाध्यत्वं च तयोरेव, तस्मात्स्वतइष्टत्व–तत्प्रयुक्तकृतिसाध्यत्वे तत्तत्साधनतयेष्टस्य नियोगस्य न सिध्यत इत्यर्थः। साधनतयेष्टत्वमुपपादयति—**अत एव हीति।** साधनत्वेन सिध्यनङ्गीकारे वालर्थ एव कार्यं स्यादित्याह—**अन्यथेति।** एतद्विवृणोति—**स्वर्गकामेति। अत इति।** स्वर्गकामपदान्वयात्पूर्वं धात्वर्थमात्रस्यैव कार्यतापत्तेः, तदन्वये तत्साधनतयैव प्रतिपत्तेश्चेत्यर्थः। प्रथममनन्यार्थतया प्रतिपन्नस्य कार्यस्यानन्यार्थत्वनिर्वहणाय अपूर्वमेव पश्चात्स्वर्गसाधनं भवतीति। अयमर्थः—यथा स्वप्राधान्यनिर्वहणायानुजीविनामभिमतं प्रभुः प्रददाति—तद्वदपूर्वमपि स्वयं प्रधानतया प्रतिपन्नं स्वप्राधान्यनिर्वहणाय स्वं साधयतः पुरुषस्य स्वर्गं ददातीति। यथा पञ्चिकायाम्—'आत्म

स्वर्गसाधनमपूर्वमेव कार्यमिति—स्वर्गसाधनतोल्लेखेनैव ह्यपूर्वव्युत्पत्तिः । अतः प्रथममनन्यार्थतया प्रतिपन्नस्य कार्यस्यानन्यार्थत्वनिर्वहणायापूर्वमेव पश्चात्स्वर्गसाधनं भवतीत्युपहास्यं; स्वर्गकामपदान्वितकार्याभिधायिपदेन प्रथममप्यनन्यार्थतानभिधानात्, सुखदुःखनिवृत्तितत्साधनेभ्योऽन्यस्यानन्यार्थस्य कृतिसाध्यताप्रतिपत्त्यनुपपत्तेश्च । अपि च—किमिदं नियोगस्य प्रयोजनत्वं, सुखवन्नियोगस्याप्यनुकूलत्वमेवेति चेत्—किं नियोगः सुखम् । सुखमेव ह्यनुकूलम् । सुखविशेषवन्नियोगापरपर्यायं विलक्षणं सुखान्तरमिति चेत्—किं तत्र प्रमाणमिति वक्तव्यम् । स्वानुभवश्चेत्—न; विषयविशेषानुभवसुखवन्नियोगानुभवसुखमिदमिति भवतापि नानुभूयते । शास्त्रेण नियोगस्य पुरुषार्थतया प्रतिपादनात्पश्चात्तु भोक्ष्यत इति चेत्—किं तन्नियोगस्य पुरुषार्थत्ववाचि शास्त्रं, न तावल्लौकिकं वाक्यम्; तस्य दुःखात्मकक्रियाविषयत्वाम्—तेन सुखादिसाधनतयैव कृतिसाध्यतामात्रप्रतिपादनात् । नापि वैदिकम्; तेनापि स्वर्गादिसाधनतयैव कार्यस्य प्रतिपादनात् । नापि नित्यनैमित्तिकशास्त्रम्; तस्यापि तदभिदायित्वं स्वर्गकामवाक्यस्थापूर्वव्युत्पत्तिपूर्वकमित्युक्तनीत्या तेनापि सुखादिसाधनभूतकार्याभिधानमवर्जनीयम् । नियतैहिकफलस्य कर्मणोऽनुष्ठितस्य फलत्वेन तदानीमनुभूयमानान्नाद्यरोगतादिव्यतिरेकेण नियोगरूपसुखानुभवानुपलब्धेश्च—नियोगः सुखमित्यत्र न किंचन प्रमाणमुपलभामहे । अर्थवादादिष्वपि स्वर्गादिसुखप्रकारकीर्तनवत्—नियोगरूपसुखप्रकारकीर्तनं भवतापि न दृष्टचरम् । अतो विधिवाक्येष्वपि धात्वर्थस्य कर्तृव्यापार-

---

सिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये । कुर्वत्स्वर्गादिकमपि प्रधानं कार्यमेव न' इति । **उपहास्यं** समीपस्थैरपि हास्यम् । अत इत्युक्तमर्थं विवृणोति—**स्वर्गकामेति** । प्राधान्येन कार्यप्रतिपत्तिः–किमेकपदश्रवणवेलायाम्, उत स्वर्गकामपदान्वितवेलायाम्–इति विकल्पममिप्रेत्य, प्रथमे पक्षे दूषण**मन्यथा क्रियैव कार्यं स्या**दित्यनेनोक्तं भवति । तस्मिन्नेव पक्षेऽभ्युपगमेन दूषणान्तरंच—**एक**पदेन कार्यमनन्यार्थप्रतिपन्नमस्तु, तथाप्यन्वितामिधानदशायां प्रतिपन्न एवार्थः सम्यगर्थः, अतो नानन्यार्थत्वमिति । द्वितीयकल्पे दूषणमुच्यते—**स्वर्गकामपदान्वितेति** । स्वर्गकामपदान्वितलिङादिना तत्साधनतयैवाभिधानात्—प्रथममनन्यार्थतया प्रतिपन्नमिति न वक्तुं युक्तमित्यर्थः । व्युत्पत्तिदशायामपूर्वस्य साधनतया व्युत्पत्तिः, अभिधानदशायां तु अनन्यार्थं स्थायिकार्यमित्येव प्रतीयत इति शङ्कायाम्, अपूर्वव्युत्पत्तिमतोऽपि पुरुषस्य **एक**पदश्रवणवेलायामनन्यार्थत्वप्रतीत्यनुपपत्तिमाह—**सुखेति** । 'न निर्विशेषं सामान्य'मिति न्यायात्–साध्यमिति सामान्येनाभिधीयमानमपि विशेषनिष्ठतया प्रतीयते, सुखं दुःखनिवृत्तिः, तत्साधनं वा त्रीण्येव कृतिसाध्यानि, तस्मादेषु त्रिषु अन्यतमेन साध्येन भवितव्यं, तत्र सुखत्वदुःखनिवृत्तित्वायोगात्—तत्साधनतयैव साध्यमिति प्रतीयते । कृतिर्हि त्रिष्वन्यतममेव गोचरयति; तथा दर्शनात् । दर्शनानुरोधेन च अभ्युपगन्तव्यं; कृतेः क्रियातिरिक्तगोचरत्वादर्शनेनहि—कृत्यपूर्वयोर्घटकत्वेन भावार्थौ निवेशितः । तस्मात्त्रिषु अन्यतमलाभावे साध्यमिति प्रतीतिरेव न स्यादित्यर्थः । किं चान्वितामिधानवादिना—स्वर्गकामपदान्वित एव लिङादिः कार्यमिदधाति—इति वक्तव्यं, तदानीं तत्संनिधानबलेन तत्साधनतयैव प्रतीतिः स्यादिति—नानन्यार्थतया प्रतिपत्तिरिति । सुखेत्यादेरेवं वार्थः—सुखदुःखनिवृत्त्यन्यत्वात्सतइष्टतया कृतिसाध्यत्वमयुक्तं, तत्साधनादन्यतया परम्परयेष्टत्वेन कृतिसाध्यत्वमप्ययुक्तमिति । पूर्वं तृतीयाकाररूपं प्रयोजनत्वं निरस्तम्, अथ स्वतइष्टत्वरूपप्रयोजनत्वं च सुखदुःखनिवृत्त्यन्यत्वान्निरस्तम् । इदानीं स्वत इष्टत्वसिद्धये, अनन्यार्थत्वद्रढिम्ने च संभावनीयं सुखरूपप्रयोजनत्वं दूषयितुमुपक्रमते—**अपि चेति । किमिदं नियोगस्य प्रयोजनत्वमिति** । किं क्षेपे । शङ्कते—**सुखवदिति** । अनुकूलत्वं सुखेतरस्वानुपपन्नं मन्यमानः पृच्छति—**किमिति** । अभिप्रेतं विवृणोति—**सुखमेव हीति** । पुनः शङ्कते—**सुखविशेषवदिति । नियोगापरपर्यायं** पर्यायशब्दबाहुल्यसंभवादपरशब्दः । **सुखान्तरमिति** । यथा—भौमसुखाद्विलक्षणं स्वर्गादिसुखं संभाव्यते, तथा—**ततोऽपि विलक्षणं** सुखान्तरमिदमित्यर्थः । प्रमाणाभावं वक्तुमाह—**किं तत्रेति** । चन्दनादिसुखं हि स्वानुभवसिद्धम्, अतः स्वानुभवो लौकिकवाक्यं, वेदे च काम्यविधिवाक्यं, नित्यनैमित्तिकवाक्यम्, अर्थवादाश्च यथाक्रमं नियोज्यस्य सुखरूपतां प्रति प्रमाणानि न भवन्तीत्युच्यते—**स्वानुभवश्चेदित्यादिना । तस्य दुःखात्मकक्रियाविषयत्वात्तेन सुखसाधनतयैव कृतिसाध्यतामात्रप्रतिपादनादिति** । दुःखात्मकस्य सुखादिसाधनभूतधात्वर्थमात्रस्य कर्तृव्यापारप्रतिपादनादित्यर्थः । **नियतैहिकफलस्ये**त्यादिना योग्यानुपलब्धिरुच्यते । **नियतैहिकफलस्य कर्मणः** अप्रस्तुतप्रतिबन्धकस्य कर्मण इत्यर्थः । अनेनान्त्येष्टिसापेक्षपरमापूर्व्याद्यावृत्तिः ॥

अथ कृतिसाध्यत्वं दूषयति—**अतो विधिवाक्येष्वपीति** । किं व्युत्पत्तिसिद्धत्वाद्धात्वर्थातिरिक्तोऽर्थः स्वीक्रियते,

साध्यतामात्रं शब्दानुशासनसिद्धमेव लिङादेर्वाच्यमित्यध्यवर्मीयते । धात्वर्थस्य यागादेरप्यादिदेवनान्तर्यामिपरमपुरुषसमाराधनरूपता, समाराधितात्परमपुरुषात्फलसिद्धिश्चेति **'फलमत उपपत्तेः'** (ब्र. ३।२।३७) इत्यत्र प्रतिपादयिष्यते । अतो वेदान्ताः परिनिष्पन्नं परं ब्रह्म बोधयन्तीति—**ब्रह्मोपासनफलानन्त्यं, स्थिरत्वं च सिद्धम्** । चातुर्मास्यादिकर्मस्वपि केवलस्य कर्मणः क्षयिफलत्वोपदेशादक्षयफलश्रवणं **'वायुश्चान्तरिक्षं चैतदमृतम्'** (बृ. २।३।३) इत्यादिवदपेक्षिकं मन्तव्यम् । अतः केवलानां कर्मणामल्पास्थिरफलत्वात्, ब्रह्मज्ञानस्यानन्तस्थिरफलत्वाच्च—तन्निर्णयफलो ब्रह्मविचारारम्भो युक्त इति स्थितम् । इति प्रथमं जिज्ञासाधिकरणम् ॥ १ ॥[1]

किं पुनस्तद्ब्रह्म यज्जिज्ञास्यमुच्यत इत्यत्राह—

(द्वितीयं जन्माद्यधिकरणम्) **(२) जन्माद्यस्य यतः ॥ १।१।२ ॥**

उत पुरुषार्थतासिध्यर्थम्, उत सुखसाधनत्वलक्षणव्यवहितपुरुषार्थत्वसिध्यर्थम्—इति विकल्पं हृदि निधाय, प्रथमद्वितीयपक्षयोरुत्तरमाह—**अत इति** । अयमर्थः उक्तप्रकारेण धात्वर्थातिरिक्ते व्युत्पत्त्यभावात्, तथाविधस्य स्वतःपुरुषार्थत्वाभावाच्चेति । **कर्तृव्यापारः** प्रयत्नः । शब्दशास्त्रस्वारस्यमप्यत्रपक्षे विद्यत इत्याह—**शब्दानुशासनसिद्धमेवेति** । साधनत्वसिद्ध्यर्थं क्रियातिरिक्तार्थस्वीकार इत्यत्राह—**धात्वर्थस्य चेति** । **'यज देवपूजादा'**दिति हि धातुरिति भावः । प्रकृतब्रह्मविचारारम्भहेतुः सिद्ध इत्याह—**अत इति** । सिद्धवस्तुनि बुद्धिपूर्वकं यदृच्छया वाद्यव्युत्पत्तिसंभवात्, अन्यथापि विधिशेषतया सिद्धेश्चेत्यर्थः । अथ विशेषणांशासिद्धिं परिहरति—**चातुर्मास्यादीत्यादिना** । कर्मणामावृत्तिविधानाच्च—क्षयफलत्वमवगतमिति सिद्धमित्यनुसंधेयम् । 'तद्यथेह कर्मचितो लोकः क्षीयत'इत्यादिवाक्यान्यमिप्रेत्याह—**क्षयिफलत्वोपदेशादिति** । अक्षयफलश्रवणनिर्वाहमाह—**वायुश्चेति** । नहि चातुर्मास्यादिवाक्येषु अक्षयफलश्रवणमर्थवादोक्तत्वात् त्यज्यते, अपि तु कर्मणामावृत्तिविधानात्, क्षयिफलत्वोपदेशाच्च । तस्मात्कर्मणां क्षयिफलत्वनिर्णयः सिद्धः, अतो हेतोर्विशेषणांशः सिद्धः । अधिकरणार्थमुपसंहरति—**अत इति** । अस्याधिकरणस्य ब्रह्ममीमांसा विषयः, सा किमारम्भणीया, उत न—इति संशयः, सिद्धवस्तुनि शब्दव्युत्पत्तिर्नास्तीति विचारः, अस्तीति निश्चयः, आरम्भः प्रयोजनम्—इत्यधिकरणाङ्गपञ्चकम् । यथाहुः—**विषयः संशयश्चैव विचारो निर्णयस्तथा । प्रयोजनेन सहितमेतत्स्यादङ्गपञ्चक'मिति । परीक्ष्य लोकानित्यादिवाक्यं** प्रथमसूत्रस्थन्यायसिद्धार्थानुवादपूर्वकं गुरूपसदननियमविधिपरः **गुरुमेवाभिगच्छेदि**त्युक्तत्वात् । रागतः प्रवृत्तौ सत्यां विधेयाभावात्—अस्य सूत्रस्य वाक्यत्वं न घटते । उद्देश्योपादेयविभागवद्धि वाक्यं, विधेयं ह्युपादेयमिति—न वाच्यम्; अज्ञातज्ञापकत्वात्, प्रागज्ञातं वाक्यज्ञाप्यं ह्युपादेयम् । रागतो ब्रह्मविचारे प्रवृत्तस्यापि सिद्धवस्तुनि व्युत्पत्तिर्नास्तीति वाक्येनानारम्भणीयत्वं ज्ञायते, तंप्रति सिद्धवस्तुनि व्युत्पत्तिसंभवात्—आरम्भणीयत्वज्ञापनमज्ञातज्ञापनमेवेति—उद्देश्योपादेयविभागवत्त्वं सूत्रस्य; अत्र हि रागतः प्रवृत्तिमतः पूर्वपक्षहेतुना निवृत्तौ प्रसक्तायाम्—अप्रतिपन्नस्तत्परिहारो विधीयते ॥ इति प्रथमं जिज्ञासाधिकरणम् ॥ १ ॥

(२) जन्माद्यस्य यतः ॥ १।१।२ ॥

अथ शास्त्र-काण्ड-द्विक-अध्याय-पाद-पेटिका-अधिकरणरूपसंबन्धिभेदेन सप्तविधासु सङ्गतिषु सङ्गत्यन्तराणां **सप्तधादधिकरणसङ्गति**माह—**किं पुनरिति । शास्त्रसङ्गतिर्हि** वेदार्थविचाररूपतया—स्पष्टतरा १, वेदान्तार्थविचाररूपत्वात्—**काण्डसङ्गतिः २**, कारणविषयत्वात्—**द्विकसङ्गतिः ३**, कारणविषयवाक्यतर्करूपत्वात्—**अध्यायसङ्गतिः ४**, अयोगव्यवच्छेदविश्रान्तेः—**पादसङ्गतिः ५**, शास्त्रारंभार्थत्वात्—**पेटिकासङ्गतिः ६** । अतोऽवान्तरसङ्गतिः **किंपुनरि**त्यादिभाष्येणोच्यते । **जिज्ञास्यं** विचार्यम् । सकलेतरपुरुषार्थतत्साधनपरित्यागपूर्वकं प्राप्यत्वेन, उपायत्वेन च यज्जिज्ञास्यमुक्तमित्यर्थः । प्राप्यतया, प्रापकतयापि हि ब्रह्म आपाततः प्रतिपन्नम् । अनेन **जिज्ञास्य**मिति पदेन प्रणव-वेद-प्रधानाद्यौपचारिकार्वाचीनब्रह्मशब्दार्थव्यावृत्तिः । तच्च व्यावर्तकस्य लक्षणस्य वक्तव्यतयापि हि सिध्यति । **ब्रह्म**शब्दवाच्यं स्वरूपेण गुणैश्च निरतिशयबृहत्त्वयोगि; 'बृहति बृंहयति, बृहत्त्वाद्बृंहणत्वाच्च ब्रह्मेति परिपठ्यते' इति श्रुतिस्मृतिनिर्वचनात् । तत्र-'ब्राह्मणो वै सर्वा देवताः, न किरिन्द्र त्वदुत्तरः, अग्निः सर्वा देवताः, एक एव रुद्रः, सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः । जनिता अग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः, आपो वा इदꣳसर्वं'मित्यादिभिर्ब्राह्मणाग्नीन्द्रादीनामपि समाभ्यधिकरहित-

---

१ तत्र सूत्रम्—१. **अथातो ब्रह्मजिज्ञासा ॥१।१।१॥** अस्यायमर्थः—**अथ** कर्मविचारानन्तरं, **अतः** कर्मविचारादेव हेतोः, **ब्रह्मजिज्ञासा** ब्रह्मविचारः, कर्तव्यः—इति ।

जन्मादीति सृष्टिस्थितिप्रलयम्। तद्गुणसंविज्ञानो बहुव्रीहिः। **अस्याचिन्त्यविविधविचित्ररचनस्य**

लप्रतीतेरर्थतत्त्वं व्याकुलम्। अतस्तेषु तापत्रयातुरजिज्ञास्यं तद् ब्रह्म किं लक्षणकमित्यर्थः। सर्वेषां समाभ्यधिकराहित्ये प्रतीतेऽपि तद्व्याहतम्, अन्यपरवाक्यावगतं चेत्यनादरणीयम्। तत्त्वप्रधानेषु सृष्टिप्रलयप्रकरणेषु यदेव निरतिशयवृहदुक्तं तदेव जिज्ञास्यमित्यभिप्रायेणाह—**यतो वा इमानी**त्यादिश्रुतिरितीममर्थं हृदि निधाय सूत्रकारेण **जन्मादि**सूत्रं प्रणीतमित्यभिप्रायवतोक्तं—**किं पुनस्तद्ब्रह्म यज्जिज्ञास्यमुच्यत इति,** न हि किं पुनर्ब्रह्मेत्युक्तम्। सूत्रमुपादत्ते—**जन्माद्यस्य यत इति। प्रथमपदं व्याचष्टे—जन्मादीति। सृष्टिस्थितिप्रलयमिति।** अन्यत्पदद्वयं वाक्यार्थयोजनायां व्याख्यास्यते। प्रथमपदव्याख्यानस्य समासार्थनिर्णयार्थं वाक्यान्तरसापेक्षत्वेन वाक्यार्थयोजनायामन्तर्भावयितुमशक्यत्वात्–तस्य पृथग्व्याख्यानम्। **सृष्टिस्थितिप्रलय**मित्यत्र **सृष्टि**शब्दः उत्पत्तिपरः; 'सृष्टिस्थित्यन्तकालेषु, सृष्टिस्थित्यन्तकरणी'मित्यादिप्रयोगात्। प्रयोज्यप्रयोजकव्यापारवाचिशब्दानां व्यतिकरेण प्रयोगो ब्रह्मण एव **निमित्तोपादानत्वा**भिप्रायनिबन्धनः। **सृष्टिस्थितिप्रलय**मिति समाहारार्थे द्वन्द्वः। एकस्मिन्कार्ये अन्योन्यसापेक्षतया तुल्यनिष्पादकत्वेनान्वय इतरेतरयोगः, यथा—दर्शपौर्णमासयोः स्वर्गं प्रति। अत्र समुदितविवक्षा। अयमेव समुदायविवक्षायां समाहारः, तत्कृतमेकवचनत्वं, नपुंसकत्वं च, अतोऽत्र **सृष्टिस्थितिप्रलय**मिति समाहारे द्वन्द्वः कृतः, वाक्यार्थयोजनायां **सृष्टिस्थितिप्रलया** इति इतरेतरयोगे द्वन्द्वः कृतः, उभयोरपि फलैक्यात्—**जन्मादी**त्यत्रेतिकरणेन तत्रैकवचने तात्पर्यं गम्यते। तत्र पदार्थयोजनायां **सृष्टिस्थितिप्रलय**मित्येकवचनान्तपदेन सौत्रपदस्यैकवचनमनुसृतम्। तत्राप्येकवचनं सृष्टिस्थितिप्रलयानां समुदायो लक्षणं, न त्वेकैकमिति ज्ञापनार्थम्। समुदायस्य लक्षणत्वं श्रुतिस्वारस्यादवसीयते—'यतो वा, इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति' इत्यत्र हि न प्रतिवाक्यं **तद्ब्रह्मे**त्युक्तम्, अन्यथैकतरलक्षणवैयर्थ्यं च स्यात्। ननु नेदं समुदितमपि लक्षणं; व्यावर्त्याभावात्, नहि जगदुत्पत्तौ निमित्तोपादानभूतं स्थित्यादिकारणत्वव्यवच्छेद्यं किमपि वस्त्वस्तीति चेत्, सत्यं, व्यवच्छेद्यं नेष्यते, तथापि श्रुत्यनुसारात्सूत्रकारेणैवमुक्तम्। श्रुतिश्च **तद्विजिज्ञासस्वेति विधित्सितोपासनोपयोगिनिरतिशयवृहत्त्वविपरीतावृहत्त्वशङ्काव्यवच्छेदार्थं** समुदायमाह। शङ्कितव्यवच्छेदेनापि हि सप्रयोजनत्वं स्यात्: लक्ष्याकारविपरीतशङ्कानिराकरणेन विना लक्ष्याकारनिश्चयायोगात्। न च जन्मादिष्वेकैककारणत्वं लक्ष्याकारविपरीतशङ्कानिराकरणक्षमं; तथाहि—उत्पत्तिकारणत्वेऽभिहितेऽपि स्थित्यादिकारणत्वं न चेत्, तदनुगुणज्ञानशक्तिविरहात्, स्थितिप्रलयकारणभूतवस्त्वन्तरसद्भावाच्च—जन्ममात्रकारणस्य निरतिशयवृहत्त्वं न स्यात्। मुक्तैर्लयान्तर्भावात्, मोक्षप्रदतयोपास्यस्यैव प्राप्यत्वाच्च—मोक्षप्रदत्वव्याप्यत्वानुगुणैर्गुणैश्च वृहत्त्वं न सिध्यति। अतो जन्मकारणत्वमात्रस्य समस्तवस्तुव्यवच्छेदक्षमत्वेऽपि जन्मादिसमुदायकारणत्वस्यैव निरतिशयवृहत्त्वोपयुक्तत्वात्–सृष्टिस्थितिप्रलयसमुदायकारणत्वं लक्षणमिति ज्ञापितम्। समुदायस्य लक्षणत्वमिहाविवक्षितं; **जन्मादीति** बहुव्रीहेरन्यपदार्थप्रधानत्वेन जन्मतोऽन्तर्भूतत्वादित्याह—**तद्गुणेति।** बहुव्रीहिर्द्विविधः—तद्गुणसंविज्ञानः, अतद्गुणसंविज्ञानश्च। तत्र प्रथमस्योदाहरणं—'सर्वादीनि सर्वनामानि–लम्बकर्णमानये'त्यादि। द्वितीयस्योदाहरणं–'चित्रगुमानये'ति। **तच्छब्देन** विशेष्यं, **गुण**शब्देन विशेषणं च विवक्षितम्। **सम**मित्येकीकरणेऽविशेषेण विशेषणं, विशेष्यं चैककार्यान्वितत्वेन सह ज्ञापयतीत्यर्थः। एवमपि बहुव्रीहेर्नान्यपदार्थप्रधानत्वभङ्गः; स्वपदवाच्यविशिष्टसमुदायस्य तत्समुदायिनो वाऽन्यपदार्थतया विवक्षितत्वोपपत्तेः। समासस्थपदवाच्यस्यापि विशिष्टसमुदायान्तर्गतत्वाकारेण ह्यन्यपदार्थत्वं युज्यते; स्वपदमात्रस्य तेनाकारेण तद्वाचकत्वाभावात्। **अस्ये**ति व्याख्येयपदोपादानम्। **अचिन्त्ये**त्यादिना तद्व्याचष्टे। **अस्ये**तिपदस्य **जगत** इत्येतावन्मात्रे वक्तव्ये किमर्थो विस्तर इति चेत्, सूत्रकारविवक्षितार्थकथनार्थः, तद्विवक्षा च श्रुतिविवक्षया। श्रुतिविवक्षा च कथं ज्ञायत इति चेत्, उच्यते—'यतो वा इमानि भूतानि जायन्त' इत्यत्र **भूत**शब्देन कार्यवर्गेऽभिहितेऽपि **इमानी**ति पदं कार्यवर्गस्य धर्मिग्राहकप्रमाणसिद्धाकारविशेषपरं, तत्र जगत आभासतापरत्वं ब्रह्मणो जिज्ञास्यतानुपयोगीति वैचित्र्यपरमि**मानी**ति पदम्। ईदृशकार्यनिष्पादनानुगुणगुणोत्कर्षं ब्रह्मेति ज्ञापनार्थं श्रुतिवाक्य**स्ये**दंशब्देन निर्दिशतः सूत्रकारस्यापीयमेव विवक्षा। **जगतः—इमानी**ति श्रुतौ बहुवचने सत्यपि सौत्रमेकवचनं कृत्स्नस्य भुवनस्यैककार्यतावशेषेणैककर्तृकत्वज्ञापनार्थं, **भूत**शब्दस्य देवादिचतुर्विधभूतमात्रपरत्वव्यावर्तनेन भवनक्रियायोगिकृत्स्नकार्यसमुदायात्मकजगद्विषयत्वज्ञापनार्थं च। अत एव हि भाष्ये **जगत** इत्युक्तम्। तत्र कार्यवर्गस्य चिदचिदात्मकत्वात्तत्प्रमाणसिद्धचिदचिद्वैचित्र्य**मचिन्त्ये**त्यादिपदद्वयेनाह। ननु—**ग्रहाधिकरणे 'ग्रहं संमार्ष्टी'** त्यत्र उद्देश्यगतविशेषणे विवक्षाभावादेकवचने तात्पर्याभाव उक्तः, तेन न्यायेन प्रसिद्धवनिर्देशस्यतावाऽनुवादरूप**स्येदं**शब्दस्योद्देश्यविशेषविशेषणे तात्पर्याभावेनैवं व्याख्यातव्यम्, मैवं; ग्रहाधिकरणे ह्युद्देश्यविशेषमात्रविवक्षा न निषिद्धा, अपि त्वनुवादस्य मूलभूतप्रापकवाक्योक्तार्थविरुद्धविशेषणे हि तात्पर्याभाव उक्तः। उत्पत्तिवाक्यसिद्धस्य ग्रहबहुत्वस्य विरुद्धं ह्येकत्वम्; अन्यथा 'अष्टवर्षं ब्राह्मणमुपनयीते'त्यत्राप्यष्टवर्षत्वादिविशेषणे तात्पर्याभावप्रसङ्गात्। अत्र तु—प्रापकवाक्येषु जगद्वैचित्र्यमेव स्पष्टम्। यद्वा, यत्र प्रयुक्तस्य शब्दस्यार्थविवक्षायामन्वयानुपपत्त्यान-

नियतदेशकालफलभोगब्रह्मादिस्तम्बपर्यन्तक्षेत्रज्ञमिश्रस्य जगतः। यतः यस्मात्सर्वेश्वरान्निखिलहेयप्रत्यनीकस्वरूपात्सत्यसंकल्पाज्ज्ञानानन्दाद्यनन्तकल्याणगुणात्सर्वज्ञात्सर्वशक्तेः परमकारुणिकात्परस्मात्पुंसः। सृष्टिस्थितिप्रलयाः प्रवर्तन्ते **तद्ब्रह्म**–इति सूत्रार्थः। 'भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि

र्थक्यं तत्रोद्देश्यविशेषणविवक्षा तत्रतत्राश्रीकृता, तस्मादेवं व्याख्यातुं युक्तम्। तत्राचिदंशवैचित्र्यमाह—**अचिन्त्येत्यादिना पदेन**। जीवकर्तृकतया चिन्तयितुमशक्यत्वम् **अचिन्त्यत्वम्**। आकाशवाय्वादिभेदेन **विविधत्वम्**। प्रत्येकं तत्तद्व्यष्टिबाहुल्येन **विचित्रत्वम्**। ईदृशरचनस्येत्यर्थः। अत्र **रचना** संस्थानम्। अथ चिद्वैचित्र्यमाह—**नियतेति**। 'अस्मिन्देशे अस्मिन्काले इदं फलमनेन भोक्तव्य'मिति नियमो ब्रह्मादिपिपीलिकान्तानामविशेषेण भवतीः ब्रह्मणोऽपि हि स्वमानपरिमितवर्षशतादधिकं जीवितुम्, अण्डान्तरे प्रवेष्टुम्, अण्डाधिपत्यादधिकं फलं भोक्तुमशक्यम्। एवं चिदचिद्वैचित्र्यकथनेन–क्षेत्रज्ञमात्रस्य कर्तृत्वानुपपत्तिः सूचिता। तृतीयं पदमुपादत्ते—**यत इति**। ननु पूर्वपदस्य श्रुतिविवक्षानुसारेण व्याख्यानं कृतम्, अत्र तु तादृशपदश्रवणाभावेऽपि कथमनेकविशेषणोक्तिः, उच्यते—**यतो येन** यदिति प्रसिद्धवस्निर्देशो हि प्रापकवाक्यसापेक्षः, तत्र प्रापकवाक्येषु जगत्कारणत्वजिज्ञास्यत्वोपयोगियादृशविशेषणविशिष्टो यो धर्मिविशेष उक्तः तादृशविशेषणविशिष्टः स एवात्र श्रुतौ **यच्छब्देन** विवक्षित इति—सूत्रकारामिप्राय इति कृत्वा—तत्तद्विशेषणविशिष्टतद्धर्मिविशेषपरत्वं सौत्रस्य **यतः**शब्दस्योक्तम्। **यत** इत्यत्र तसिप्रत्ययस्य सार्वविभक्तिकत्वाद्विभक्त्यन्तरशङ्का स्यात्, तेन **जगज्जन्मादयो यत्र भवन्ती**ति देशकालादिवदधिकरणत्वमेव ब्रह्मलक्षणमित्यपि शङ्कितुं शक्यम्, एवं तसिलोऽप्येकद्विबहुवचनसाधारणत्वात्, कारणवाक्येषु सद्ब्रह्माद्यनेकशब्दैरभिधानाच्च—कारणानेकत्वशङ्का स्यादिति—तदुभयव्युदासार्थं **यस्मा**दित्युक्तम्। उपायतयोपेयतयापि जिज्ञास्यत्वे, कारणत्वे चोपयुक्तानि तत्तत्प्रापकवाक्यसिद्धान्येतच्छ्रुतिविवक्षितानि विशेषणानि दर्शयति—**सर्वेत्यादिना**। 'तिस्रो मूर्तयोऽशा ब्रह्मांशा' इति यादवप्रकाशपक्षः। प्रधानपुरुषयोः कारणत्वं केषांचिन्मतम्। ईदृशन्यूनाधिकतत्त्वव्यवच्छेदार्थं 'तमीश्वराणां परमं महेश्वरं, स कारणं करणाधिपाधिप' इत्यादिश्रुत्यनुसारेण सर्वेश्वरादित्युक्तम्। कारणवाक्यशेषभूतशोधकवाक्यसिद्धजिज्ञास्यत्वोपयोगिनं चिदचिद्भावर्तकाकारमाह—**निखिलहेयप्रत्यनीकस्वरूपादिति**। **निखिल**शब्देनाचिद्गतहेयाः—षड्भावविकाराः, चिद्गतहेयाः—क्लेशकर्मविपाकाशयाश्च विवक्षिताः। हेयार्हत्वे सति तद्वियुक्तत्वं व्युदस्यते—**प्रत्यनीक**शब्देन। प्रत्यनीकश्चेज्जगदुपादानत्वादिकं नोपपद्यते। **स्वरूपादिति**। अद्वारकहेयसंबन्धो व्युदस्तः, न तु सद्वारक इत्यर्थः। हेयप्रत्यनीकत्वे विशेषणांशेऽपि हेयासंभवः; तत्संबन्धविरोधिनित्वात्, स्वप्रतिकूलोत्पादकत्वायोगाच्चेत्यत्राह—**सत्यसङ्कल्पादिति**। स्वसङ्कल्पानुरूपं हेयसंबन्धं, संश्रितेषु तद्वियोगं च कर्तुं समर्थः। नच—हेयं सर्वेशीश्वरापेक्षया हेयं; तत्सङ्कल्पनिवर्त्यत्वेन–तल्लीलारसावहत्वादिति भावः। **सत्यसङ्कल्पत्वं** हेयप्रत्यनीकत्वोपपादकं, कारणत्वजिज्ञास्यत्वोपयोगि च। **हेयप्रत्यनीकात्, सत्यसङ्कल्पा**दिति पदद्वयेनापहतपाप्मेत्यादिवाक्यं स्मारितम्। जिज्ञास्यत्वोपयोगिनीं धर्मिस्वरूपस्य कल्याणगुणैकतानतामाह—**ज्ञानेति। आनन्दत्वं** स्वानुकूलत्वम्। **आदि**शब्देन सत्यत्वम्, अनन्तत्वं च विवक्षितम्। **हेयप्रत्यनीकत्वं** पूर्वमुक्तम्। **ज्ञानानन्दे**ति भावप्रधानो निर्देशः–'द्वेकयोर्दिवचनैकवचने' इतिवत्। ज्ञानत्वानन्दत्वसत्यत्वानि न प्रादेशिकानि इत्यनन्तशब्दार्थः। **आदि**शब्देनानन्यस्य गृहीतत्वेऽपि–सर्वव्यापित्वस्य कालानन्त्यकथनं, नित्यत्वस्य सार्वत्रिकत्वकथनं, सर्ववस्तुसामानाधिकरण्यार्हत्वस्य च नित्यत्वकृत्स्नप्रवेशवृत्तित्वकथनमपि न्यविरुद्धम्। **कल्याणत्व**मन्येषामनुभवितृणामप्यनुकूलत्वम्। ज्ञानत्वादयः कल्याणगुणा यस्य तस्मादित्यर्थः। यथा—प्रभाश्रये दीपे प्रभां विना आश्रयांशस्यैव चतुरङ्गुलस्वरूपवत्त्वोन्मत्तवलत्वादिगुणाः, तथा—ब्रह्मणोऽपि ज्ञानत्वानन्दत्वसदेकरूपत्वानि स्वरूपस्य गुणाः। धर्मिणः, धर्मस्य च ज्ञानत्वे–व्यक्तिभेदादविरोधः। धर्मधर्मिणोः साधारणाकारो **ज्ञानत्वानन्दत्वादिः**। यथा—नरस्यैव सतो राज्ञो 'नराः परिकरा' इत्युक्ते व्यक्तिभेदादविरोधः, नरत्वं चोभयसाधारणाकारस्तद्वत्। धर्मभूतज्ञानवत्तामाह—**सर्वज्ञादिति। सर्वज्ञत्वं** निमित्तत्वोपयोगि। **सर्वशक्तित्व**मुपादानत्वोपयोगि; अनेन चिदचिच्छरीरकत्वमप्यभिप्रेतं भवति; अन्यथोपादानत्वायोगात्। किंच—**सर्वज्ञत्व**मुपासकापेक्षिततत्प्रतिबन्धतन्निरसनप्रकारज्ञानोपयोगि। **सर्वशक्तित्वं** तद्विरोधिनिरसनोपयोगि। **परमकारुणिकत्वं** च जिज्ञास्यत्वकारणत्वोपयोगि; प्रलयदशायामसत्कल्पं चेतनजातं निरीक्ष्य दयया हि सृष्टिः। संश्रितसौलभ्यं च दयैव, यथा—'माता पिता भ्राता निवासः शरणं सुहृद्गतिर्नारायण' इति। ईदृशेश्वर उपायभूतः, उपेयमन्यदित्यत्राह—**परस्मादिति**। अत्र माता पितेत्यनुसंधेयम्। देवताविशेषनिर्णयार्थमाह—**पुंस इति**। कारणवाक्येषु 'छागो वा मन्त्रवर्णा'दिति सूत्रन्यायात्सद्ब्रह्मात्मादिसामान्यशब्दानां पुरुषनारायणादिविशेषपर्यवसायित्वात्–सर्वश्रुतीनां नारायण एव पर्यवसानभूमिरिति 'यतो वा इमानि भूतानी'त्यादिश्रुतेर्हृदयमिति सूत्रकारस्य भाव—इति भाष्यकारादिप्रायः। **पुंस** इत्यनेन कारणभूतस्य वसुनन्निपाद्विभूतिमत्त्वमपि सूचितं; पुरुषसूक्ते–'त्रिपादस्यामृतं दिवी'ति श्रवणात्। **सूत्रार्थ**

भगवो ब्रह्म' (तै. ३।१।१) इत्यारभ्य **'यतो वा इमानि भूतानि जायन्ते। येन जातानि**

इति। अक्षरार्थः, तात्पर्यार्थश्चेत्यर्थः। ननु—यदीश्वरो लिलक्षयिषितः तर्हि तदसाधारणसर्वज्ञत्वादिप्रतिपादकसत्यज्ञानादिवाक्यानादरेण जन्मादिकारणत्वं किमर्थं सूत्रितम्, उच्यते—गुणैः स्वरूपस्य लक्ष्यमाणत्वे-तदपेक्षया बहिष्ठाया विभूतेरुपास्यानन्तर्भावः प्रतीयेत, सर्गादिविषयभूतया तु विभूत्या स्वरूपे लक्ष्यमाणे—तन्नियमनधारणाद्यपेक्षितत्वादेव गुणानन्तर्भावो न शक्यशङ्कः, अतो गुणानामिव विभूतेश्च जिज्ञास्यान्तर्भावज्ञापनार्थं जन्मादिलक्षणं सूत्रितम्। विभूतेश्च जिज्ञास्यान्तर्भाव **उपासात्रैविध्य-तत्कतुन्याया**भ्यां सेत्स्यति। ननु—एवमपि कृत्स्नविभूतेर्जिज्ञास्यान्तर्भावो न सिध्यति; त्रिपाद्विभूतेर्जन्माद्यसृष्टत्वात्, नैवं; तस्या जन्माद्यसृष्टत्वेऽपि **यत्प्रयन्ती**ति प्रलयवाक्यस्थयच्छब्दनिर्दिष्टे मुक्तप्राप्ये ब्रह्मण्यन्तर्भावसिद्धेः। तथा हि—**प्रयन्ती**त्येतदविशेषेणात्यन्तिकलयरूपमोक्षमपि प्रतिपादयति, **यच्छब्देन** मुक्तप्राप्यतयापि ब्रह्म निर्दिष्टं भवति, प्राप्याकारविशिष्टं च ब्रह्म प्रमाणान्तरसिद्धमिहानूद्यते, प्रमाणान्तराणि च विभूतिद्वयविशिष्टं ब्रह्म प्राप्यं वदन्ति, प्राप्याकारस्य चोपास्यत्वं तत्कतुन्यायसिद्धं, तदेवं लक्षणान्तर्भूतेन लयांशेनोपलक्षितायास्त्रिपाद्विभूतेरपि जिज्ञास्यान्तर्भावसिद्धिः सूत्रिता भवति। ननु—**यत** इतिसूत्रपदस्थायाः पञ्चम्या उपादानार्थत्वात्—ब्रह्मोपादानमिति निमित्तान्तरसङ्गावान्—'उपादानं तु भगवान्निमित्तं तु महेश्वर' इत्युक्त्वोमातीतपक्षावकाशः प्रसजेत्, नैवं; **यत** इति पञ्चम्या हेतुमात्रविषयत्वात्। हेत्वर्थत्वं च जनिस्थितिलयसाधारणत्वादवगम्यते, न तु 'जनिकर्तुः प्रकृति'रित्यपादानसंज्ञाविधानवत् स्थितिकर्तुर्लयस्थानस्य च अपादानसंज्ञाविधानं दृश्यते, तस्मादियं हेतौ पञ्चमी, ततश्च निमित्तोपादानयोरुभयोरपि हेतुत्वाविशेषाद्य **यत** इति पदेनोभयविधकारणत्वमपि क्रोडीकृतं भवति। **यतो वा इमानी**त्यादि वाक्यं; **यत** इति पदस्योभयविषयत्वात्—सौत्रपदस्याप्युभयविषयत्वोपपत्तेः। ननु—**यतो वा इमानी**त्यादिवाक्ये **यतो येन** यदिति **यच्छब्दस्या**वृत्तत्वात् **यत** इति पदस्य जनिस्थितिलयसाधारण्यं नास्तीति—तत्र **यत** इति पञ्चम्युपादानमात्रविषया; जायन्त इत्यनेनैवान्वयात्। पञ्चम्यर्थो हि 'जनिकर्तुः प्रकृति'रित्येव प्रतीयते। किंच—हेतुमात्रविषयाया अपि सौत्रपदपञ्चम्याः श्रुतिवाक्यस्थपञ्चम्यभिहितोपादानरूपहेतुविशेषे पर्यवसानं स्यात्; सूत्रस्य श्रुत्यैकार्थ्योपपत्तेः। अतः श्रुतिसूत्रयोरुभयोरपि पञ्चम्या उपादानमात्रविषयत्वात्-ब्रह्मोपादानं, न तु निमित्तमपीति, नैवम्; श्रुतौ **यत** इति पदस्य जनिस्थितिलयसाधारणत्वाभावेऽपि यच्छब्दस्यानुवादरूपत्वात्, अनुवादस्य च प्रापकवाक्यसापेक्षतया तद्विरुद्धार्थपरत्वासंभवात्, प्रापकवाक्येषु च 'एकमेवाद्वितीयं, तदैक्षत, बहु स्यां, तत्तेजोऽसृजते'त्युपादानभूतस्यैव ब्रह्मणो निमित्तान्तरं निषिध्याहमेव जगद्रूपेण **बहु स्या**मिति सङ्कल्पमुक्त्वा यथासङ्कल्पं तत्कर्तृकसृष्टेश्च प्रतिपादनात्—तदनुवादिनि लक्षणवाक्ये **यत** इति पदमुभयविषयं; श्रुत्यनुविधायित्वात्, जन्मस्थितिलयसाधारणत्वाच्च। सौत्रं च **यत** इति पदमुभयविषयमेवेति—निमित्तान्तरवादो वेदविरुद्धत्वादनादरणीय एवेति। एवं तर्हि प्रकृत्यधिकरणपौनरुक्त्यं स्यादिति—चेन्न; तत्र हि निमित्तोपादानैक्यस्य श्रुतिप्रतिपाद्यत्वं समर्थ्यते, अत्र तु निमित्तोपादानैक्यसिद्धवत्कारेण तस्योभयविधकारणत्वस्य लक्षणत्वानुपपत्तिः परिहियत इति वैषम्यात्। ननु—ईश्वर एव ब्रह्म चेत्**सत्यज्ञानादि** लक्षणत्वेन वक्तव्यं, न तु **जन्मादि**; ईश्वरस्य सर्वविधकारणत्वायोगात्, निमित्तकारणमुपादानं चैकमेव हि वेदान्तेषु मतं, तस्मादीश्वरादतिरिक्तं ब्रह्माभ्युपगच्छतो भेदाभेदवादिनोऽनुकूलमिदं जन्मादिलक्षणकथनं, नैवं; चिदचिद्विशिष्टतया, सत्यसङ्कल्पतया चेश्वरस्यैव **बहु स्या**मिति ईक्षणक्षमत्वेन—सर्वविधकारणत्वोपपत्तेः। सन्मात्रस्य, चिन्मात्रस्य च सत्यसङ्कल्पत्वायोगात्, ईश्वरस्य च ब्रह्मांशतयाऽध्यस्ततया चाग्निमतस्यांशान्तराध्यस्तान्तरसमानाधिकरणशब्दवाच्यत्वायोगाच्च—भेदाभेदपक्षे, मृषावादिपक्षे च **बहु स्या**मिति सङ्कल्पपूर्वकारणत्वं न घटत इति—एतल्लक्षणं परेषामेवानुपपन्नम्। किंच—बुभुत्सितस्य लक्षणं वाच्यं, बुभुत्सितं चोपास्यम्, ईश्वर एवोपास्यः प्राप्यश्च, उपासनं च विशिष्टविषयम्; उपासात्रैविध्यस्य वक्ष्यमाणत्वात्, प्राप्तिश्च विशिष्टविषया; यथोपासनभाविलात्तस्याः, **जन्मादि** चोपास्यलक्षणं; **तद्विजिज्ञासस्वे**ति प्रतिपादनात्, **सत्यज्ञानादि** विशेष्यांशस्य लक्षणं, न तु विशिष्टस्य, अतो विशिष्टस्योपास्यत्वात्-जिज्ञास्यब्रह्मलक्षणं जन्मादेव; **यत** इत्यस्यानुवादरूपत्वात्, **विजिज्ञासस्वे**ति जिज्ञास्यत्ववचनाच्च, जिज्ञास्यलोपयोगिशोधकवाक्यार्थश्च यच्छब्दे गर्भितः, तस्मात् **यस्मा**दित्यादिविशेषणान्युक्तानि। **इति जन्मादिसूत्रार्थवर्णनम्॥**

अथ जन्मादीनां लक्षणत्वे तत्र जन्मनोऽन्तर्भावेऽपि तत्रापि समुदितस्य लक्षणत्वे च किं ते प्रमाणमित्याकाङ्क्षायां सूत्रकारैर्यत्तेनाभिप्रेतां श्रुतिं दर्शयति—**भृगुरिति।** शास्त्रं प्रणाव्या विषयः। **यतो वा इमानी**त्यादि सूत्रे उदाहर्तव्येऽपि अर्थवादरूपतात्पर्यलिङ्गज्ञापनार्थं, प्रकरणस्य ब्रह्मपरत्वेनानन्यपरत्वज्ञापनार्थं च **भृगुर्वा** इत्यादि उदाहृतम्। अग्नीन्द्रादिवत्तु सर्वोत्कृष्टत्वाऽज्ञानप्रतीतेषु सर्वेषां सर्वोत्कृष्टत्वस्यानुपपन्नत्वेन तत्त्वस्य दुर्निश्चयतया निरतिशयबृहत्त्वाश्रयव्यक्तिविशेषजिज्ञासया **हे अधीहि भगवो ब्रह्मेति** प्रश्नः। तत्र व्यक्तिविशेषस्य लक्षणमुच्यते—**यतो वा इति। यतो येन** यस्मिन् **यद्वृत्तयोगात्कारणत्वमनूद्यते। तद्ब्रह्मेति** कारणस्य ब्रह्मत्वं विधीयते। तेन कारणत्वस्य ब्रह्मलक्षणत्वं सिद्धं भवति।

जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्म' (तै. ३।१।१) इति श्रूयते, तत्र संशयः—किमस्माद्वाक्याद्ब्रह्म लक्षणतः प्रतिपत्तुं शक्यते, न वेति। किं प्राप्तं, न शक्यमिति। न तावज्जन्मादयो विशेषणत्वेन ब्रह्म लक्षयन्ति; अनेकविशेषणव्यावृत्तत्वेन ब्रह्मणोऽनेकत्वप्रसक्तेः। विशेषणत्वं हि व्यावर्तकत्वम्। ननु—'देवदत्तः श्यामो युवा लोहिताक्षः समपरिमाण' इत्यत्र विशेषणबहुत्वेऽप्येक एव देवदत्तः प्रतीयते—एवमत्राप्येकमेव ब्रह्म भवति, नैवम्; तत्र प्रमाणान्तरेणैक्यप्रतीतेः—एकस्मिन्नेव विशेषणानामुपसंहारः; अन्यथा तत्रापि व्यावर्तकत्वेनानेकत्वमपरिहार्यम्,

---

तद्विजिज्ञासस्वेति न विचारस्योपासनस्य वा विधिः; विचारात्मकं ज्ञानं रागतः प्राप्तत्वान्न विधेयम्, उपासनात्मकस्य तु ज्ञानस्य **ब्रह्मविदाप्नोतीति** प्राकरणिकवाक्यान्तरसिद्धत्वात्, उपक्रमे **अधीहि भगवो ब्रह्मेति** प्रश्नस्य तत्त्वपरत्वेनोपायविषयत्वाभावाच्च—नोपासनात्मकज्ञानमिह विधेयम्। अतो **विजिज्ञासस्वेति** उपदिश्यमानार्थे अवधानार्थं, सन्देहनिवृत्त्यर्थं वोक्तं 'या गन्धवती तां पृथिवीं विद्धी'तिवत्। अतः कारणत्वस्य ब्रह्मलक्षणत्वमेवास्य वाक्यस्य विधेयम्। यथा—'यत्र सारसः स देवदत्तकेदार' इत्युक्ते सारससंबन्धस्य देवदत्तकेदारलक्षणत्वमुक्तं स्यात्—तद्वत्। देवदत्तकेदारो बुभुत्सितो धीस्थः, सारससंबन्धश्च दृष्टः, तस्य देवदत्तकेदारलक्षणत्वं ह्यज्ञातम्, अतस्तदेव वाक्यस्य विधेयम्। एवं निरतिशयबृहत्त्वं बहुष्वर्थेष्वापाततः प्रतीतम्। कारणत्वं च प्रापकवाक्यावगतं; तस्य निरतिशयबृहद्वस्तुलक्षणत्वमनवगतमिति—तदत्र विधेयम्। लक्षणस्य च सजातीयविजातीयव्यावर्तनस्वभावात्—अन्येषां निरतिशयबृहत्त्वशङ्काव्युदासः फलितः। अतो **नारायणा**दिविशेषशब्दवाच्यवस्तुविशेषस्यैव निरतिशयबृहत्त्वसिद्धिः। अत एव हि **परमात्पुंस** इत्युक्तम्। ननु प्रापकवाक्यैरेव कारणभूतवस्तुविशेषस्य निरतिशयबृहत्त्वं ज्ञायत इति—किमनेन लक्षणवाक्येनेति—चेन्न; अस्मादीनामपि कर्मभागवाक्यैः सर्वोत्कृष्टत्वावगमात्—तेषु बृहत्त्वशङ्काव्युदासाय कारणवाक्यानामपि तद्वदन्यपरत्वाभावेन तत्त्वपरत्वज्ञापनपरत्वादस्य वाक्यस्य॥

अथ श्रुतिरेव लक्षणं प्रतिपादयति चेत्किं सूत्रेणेति शङ्कायां—सूत्रतात्पर्यार्थं विवक्षुः, संशयं दर्शयिष्यन्, श्रुतिगतहेतुनैव संशयोत्पत्तिं दर्शयति—**तत्रेति। तत्र** तादृश इत्यर्थः। पूर्वपक्षानुगुणेन विशेषणबहुत्वेन, सिद्धान्तानुगुणेनैकवचनान्तरब्रह्मशब्दैक्येन च विशिष्टत्वं संशयहेतुत्वेनाभिप्रेत्य **तत्रेत्युक्तम्**। संशयस्वरूपं दर्शयति—**किमस्मादिति। ब्रह्ममीमांसा** किमारम्भणीया, उतानारम्भणीयेति प्रथमविचारः। तदर्थं वेदान्ता ब्रह्मणि प्रमाणम्, उत नेति द्वितीयविचारश्च चतुःसूत्रीसाधारणः; सिद्धस्वरूपं ब्रह्म न शास्त्रं प्रतिपादयतीत्याशङ्क्य **तच्छास्त्रप्रमाणकत्वं ब्रह्मणः संभवत्येवेति** समन्वयाधिकरणोपक्रमे तस्याधिकरणस्य शास्त्रारम्भहेतुभूतप्रामाण्यसमर्थनार्थत्वस्य भाष्यकारैरेव वक्ष्यमाणत्वात्। तथा चाहुः—**'व्युत्पत्त्यभावः प्रतिपत्तिदौःस्थ्यमन्येन सिद्धत्वमथाफलत्वम्। एतानि वै सूत्रचतुष्टयेनाऽनारम्भमूलानि निराकृतानी'ति**। अतस्तद्विचारयुगलमत्रार्थसिद्धमित्यभिप्रेत्यैतदधिकरणासाधारणं संज्ञावशरीरं दर्शयन्—**किमस्मादिति। यतो वा इमानी**त्यादिवाक्यं ब्रह्म लक्षणतः प्रतिपादयितुं शक्नोति, उत नेति संशयः। तदर्थं संसृज्यते—किं सृष्ट्यादीनां विशेषणत्वेनोपलक्षणत्वेन च ब्रह्मलक्षणत्वं संभवति, नेति। तदर्थं विशेषणपक्षे—किं विशेषणमेदेन विशेष्यभेदोऽस्ति, उत नेति। तदर्थं—किं विशेषणस्य विशेषणत्वं स्वाश्रयसर्वधर्मव्यावर्तकतया, उत विरोधिधर्मव्यावर्तकतयेति। उपलक्षणपक्षे—किमाकारान्तरप्रतिपत्तिरस्ति, उत नास्तीति। सर्वधर्मव्यावर्तकतया विशेषणत्वम्, आकारान्तरप्रतिपत्तिश्च नास्तीति—पूर्वः पक्षः, विरोधिधर्मव्यावर्तकतयैव विशेषणत्वम्, आकारान्तरप्रतिपत्तिश्चास्तीति सिद्धान्तः। सर्वधर्मव्यावर्तकतया विशेषणत्वे विशेष्यभेदप्रसङ्गेन जन्मादीनां विशेषणत्वायोगात्, आकारान्तरप्रतिपत्त्यभावे चोपलक्षणत्वायोगात्—उभयथापि लक्षणत्वासंभवात्—इदं वाक्यं ब्रह्म लक्षणतः प्रतिपादयितुं न शक्नोतीति लक्षणदौःस्थ्ये—ब्रह्मणि शास्त्रप्रामाण्यासंभवात्—तद्विचारोऽनारम्भणीय इति पूर्वपक्षे फलितम्। विरोधिधर्मव्यावर्तकतयैव विशेषणत्वे—विशेष्यभेदाभावात्, जन्मादीनां विशेषणत्वोपपत्तेराकारान्तरप्रतिपत्तिसद्भावात्, उपलक्षणत्वोपपत्तेश्च उभयथापि लक्षणत्वसंभवात्—इदं वाक्यं ब्रह्म लक्षणतः प्रतिपादयितुं शक्नोतीति लक्षणसौष्ठवेन ब्रह्मणि शास्त्रप्रामाण्योपपत्तेः—तद्विचारस्यारम्भणीयत्वं सिद्धान्ते फलितम्। तत्र पूर्वपक्षमुपपादयितुं प्रतिजानीते—**न शक्यमिति**। जन्मादीनां ब्रह्मलक्षणत्वं—किं विशेषणतया, उपलक्षणतया वेति विकल्पमभिप्रेत्य प्रथमं दूषयति—**न तावदिति। कथं** विशेषणत्वेन लक्षयन्तीत्यत्राह—**अनेकेति। अनेकत्वप्रसक्तिः**, व्यावर्तकत्वं वा कथमित्यत्राह—**विशेषणत्वं हीति**। विशेष्यतेऽनेनेति निर्वचनानुसारेण **भेदकं विशेषणं**, भेद्यं विशेष्यमिति प्रसिद्धेः, 'खण्डो मुण्डः पूर्णशङ्खः, नीलं शुक्लं पीतम्, अजो गजो महिष' इत्यादिषु तथा दर्शनाच्च—इति भावः। सिद्धान्तिच्छायया चोदयति—**नन्विति। परिहरति—नैवमिति। उपसंहारः पर्युदसानम्।**

अत्र त्वनेकेनैव विशेषणेन लिलक्षयिषितत्वाद्ब्रह्मणः प्रमाणान्तरैणैक्यमनवगतमिति—व्यावर्तकभेदेन ब्रह्मबहुत्वमवर्जनीयम्। ब्रह्मशब्दैक्यादत्राप्यैक्यं प्रतीयत इति–चेन्न; अज्ञातगोव्यक्तेः जिज्ञासोः पुरुषस्य खण्डो मुण्डः पूर्णशृङ्गो गौरित्युक्ते गोपदैक्येपि खण्डत्वादिव्यावर्तकभेदेन गोव्यक्तिबहुत्वप्रतीतेः—ब्रह्म व्यक्तयोपि बह्वयः स्युः। अत एव लिलक्षयिषिते वस्तुन्येषां विशेषणानां संभूय लक्षणत्वमनुपपन्नम्। नाप्युपलक्षणत्वेन लक्षयन्ति; आकारान्तराप्रतिपत्तेः। उपलक्षणानामेकेनाकारेण प्रतिपन्नस्य केनचिदाकारान्तरेण प्रतिपत्तिहेतुत्वं हि दृष्टं—'यत्रायं सारसः स देवदत्तकेदार' इत्यादिषु। ननु च—**'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै. २।१।१) इति प्रतिपन्नाकारस्य जगज्जन्मादीन्युपलक्षणानि भवन्ति, न; इतरेतरप्रतिपन्नाकारापेक्षत्वेन–उभयोर्लक्षणवाक्ययोरन्योन्याश्रयणात्, अतो न लक्षणतो ब्रह्म प्रतिपत्तुं शक्यत–इति। एवं प्राप्तेऽभिधीयते—जगत्सृष्टि-स्थिति-प्रलयैरुपलक्षणभूतैर्ब्रह्म प्रतिपत्तुं शक्यते, न चोपलक्षणो-

---

अन्यथा प्रमाणान्तरेणैक्यप्रतिपत्त्यभावे सति इत्यर्थः। **तत्रापि** देवदत्तादावपि। पक्षे वैषम्यमाह—**अत्र त्विति। प्रमाणान्तरेणैक्यमनवगत**मिति वदतोऽयं भावः—**एकमेवाद्वितीय**मित्यादिभिरपि नैकत्वनिश्चयः; तत्राप्येकत्वादिविशेषणभेदेन बहुत्वापत्तेः, **एक**मित्यादिपदानामेको व्रीहिरित्यादिवन्निर्वाहसंभवाच्च—इति॥

ननु—न केवलं प्रमाणान्तरेणैवैक्यप्रतीतिः, शाब्दी च विद्यते, तस्यां सत्यां धर्मिबहुत्वं न स्यात्, अत्र चैकवचनान्तधर्मिवाचिपदैक्यं विशेष्यैक्यज्ञापकमिति **शङ्कते—ब्रह्मशब्देति। तद्ब्रह्म तद्ब्रह्मे**ति मुहुर्मुहुरुक्तिर्वा, तानि ब्रह्माणीति बहुवचनं वा नास्तीति भावः। परिहरति—**नेति**। तत्कथमित्यत्राह—**अज्ञातेति**। एकवचनान्तधर्मिवाचिपदैक्यं विशेषणबहुत्वाधीनं विशेष्यबहुत्वं न बाधते; 'खण्डो मुण्डः पूर्णशृङ्गो गौ'रित्यत्र बहुत्वप्रतीतेः। एकवचनान्तधर्मिवाचिपदैक्यं स्वतो विशेष्यैक्यप्रतिपादकम्। खण्डादिषु प्रत्यक्षबाधात् बहुत्वप्रतीतिरिति–चेन्न; अप्रत्यक्षेष्वपि गोषु खण्ड इत्यादिवाक्ये प्रयुक्ते बहुत्वप्रतीतेः। तस्माद्विशेषणबहुत्वं चेद्विशेष्यभेदापादकमित्यभिप्रायेणोक्तम्—**अज्ञातगोव्यक्तेरिति। अज्ञातगोव्यक्तेः** प्रत्यक्षेणादृश्यमानगोव्यक्तेरित्यर्थः। खण्डो मुण्ड इत्यादिवाक्यप्रयोगासंभवव्युदासाय **जिज्ञासो**रित्युक्तम्। गोसामान्यज्ञाने सत्यदृष्टगोव्यक्तित्वात्–जिज्ञासासंभवात् प्रयोगसंभवः। सृष्टिस्थितिप्रलयः किं प्रत्येकं लक्षणम्, उत संभूयेति विकल्पमभिप्रेत्य प्रत्येकपक्षे दूषणमुक्तम्। संभूयेति पक्षे दूषणमाह—**अत एवेति। अत एव** विशेषणभेदस्य स्वतो विशेष्यभेदापादकत्वादित्यर्थः। उपलक्षणपक्षं दूषयति—**नापीति**। कुत इत्यत्राह—**आकारान्तरेति**। व्यापकनिवृत्त्या व्याप्यनिवृत्तिरिति भावः। व्यापकत्वमेवोपपादयति—**उपलक्षणानामिति**। उपलक्षणेनोपलक्ष्यप्रतिपत्तौ—उपलक्षणम्, उपलक्ष्याकारः, पूर्वप्रतिपन्नाकारश्चेत्याकारत्रयमवर्जनीयं; संप्रतिपन्नस्थलेषु तदर्शनात्, यथा—सारससंबन्ध उपलक्षणं, देवदत्तसंबन्धित्वमुपलक्ष्यं, केदारत्वं पूर्वप्रतिपन्नाकारः। अतोऽत्र तृतीयाकारप्रतिपत्त्यभावादुपलक्षणत्वमनुपपन्नमित्यर्थः। 'शाखाग्रे चन्द्र' इत्यत्र कथमाकारत्रयमिति चेत्, उच्यते—कालविशेषे देशविशेषसंबन्ध उपलक्ष्याकारः, शाखाग्रमुपलक्षणं, शाखाचन्द्रयोश्च ऋजुप्रदेशवर्तित्वं संबन्धः, स च संबन्धो वाक्यावगतः, आदित्यादित्यावर्तकं **चन्द्र**शब्दबोध्यं चन्द्रसंस्थानं तृतीयाकारः, केदारत्वाद्याकारः प्रत्यक्षप्रतीतः, चन्द्रत्वं तु पूर्वमनुभूतत्वाद्धीस्थम्। 'कुत्र चन्द्र'इति बुभुत्सायामेवं 'कश्चन्द्र' इति बुभुत्सायां शब्दवाच्यत्वमुपलक्ष्यम्। स्वारसिकेन वा, शब्दोत्थापितबुभुत्सामूलेन वा प्रत्यक्षेण प्रतीतो वक्तादिः पूर्वप्रतिपन्नाकारः। अनेन निर्विशेषवस्तुवादे तूपलक्षणत्वमपि नोपपद्यत इत्युक्तं भवति। तृतीयाकारप्रतिपत्तिरस्तीति चोदयति—**ननु चेति**। दूषयति—**नेति**। सत्यत्वादयः किं विशेषणतया लक्षणभूताः, उतोपलक्षणतया। पूर्वस्मिन्कल्पे दूषणमुक्तम्—अन्यत्र चाकारान्तरप्रतिपत्त्यपेक्षायां वाक्यान्तरेण चेदनवस्था, स्वेन चेदात्माश्रय इति। अतो **यतो वा इमानी**त्यादिवाक्येन आकारान्तरप्रतिपत्तिर्वक्तव्या, ततश्चान्योन्याश्रय इति भावः। **अत इति**। विशेषणत्वोपलक्षणत्वायोगादित्यर्थः। **इति जन्माद्यधिकरणपूर्वपक्षः॥**

सिद्धान्तमवतारयति—एवं प्राप्तेऽभिधीयत इति। एवं सूत्रकारमभिप्रेते पूर्वपक्षे **प्राप्ते** तदभिप्रेतस्तत्परिहार **उच्यत इत्यर्थः**। ज्ञाप्यबहिर्भूतो ज्ञाप्यप्रतीत्युपाय उपलक्षणं, ज्ञाप्यान्तर्भूतो ज्ञाप्यप्रतीत्युपायो विशेषणम्। न चैकस्य ज्ञाप्यज्ञापकत्वविरोधः, घटादेरिन्द्रियसंयोगप्रतिसंबन्धिनेन ज्ञानोत्पत्तिहेतुत्वस्य विषयत्वस्य च दर्शनात्। एवं शब्दतो धीस्थतया स्वविशिष्टप्रतीतौ हेतुभूतं विशेषणमिति—उभयथापिलक्षणत्वोपपत्तिं वक्ष्यन्, 'एकानेकस्वरूपाय स्थूलसूक्ष्मात्मने नमः' इतिवच्चरमोक्तमुपलक्षणपक्षं बुद्धिस्थतया प्रथमुपपादयितुं प्रतिजानीते—**जगदिति**। ननु—उपलक्षणपक्षेऽनुपपत्तिरुक्तेत्यत्राह—**न चेति। आकारान्तर**माकारविशेषः। स चोपलक्षणोपलक्ष्याकारातिरिक्त इति–अपौनरुक्त्यम्। पृथक् तृतीयाकारं

पलक्ष्याकारव्यतिरिक्ताकारान्तराप्रतिपत्तेर्ब्रह्मणोऽप्रतिपत्तिः। उपलक्ष्यं ह्यनवधिकातिशयबृहत्, बृंहणं च; बृहतेर्धातोस्तदर्थत्वात्। तदुपलक्षणभूताश्च जगज्जन्मस्थितिलयाः। यतो येन यदिति प्रसिद्धवन्निर्देशेन—यथाप्रसिद्धि जन्मादिकारणमनूद्यते। प्रसिद्धिश्च 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्। तदैक्षत बहु स्यां प्रजायेयेति। तत्तेजोऽसृजत' (छा. ६।२।२-३) इत्येकस्यैव सच्छब्दवाच्यस्य निमित्तोपादानरूपकारणत्वेन। तदपि संदेवेदमग्र,, एकमेवासीदित्युपादानतां प्रतिपाद्याद्वितीयमित्यधिष्ठात्रन्तरं प्रतिषिध्य तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्येकस्यैव प्रतिपादनात्। तस्माद्यन्मूला जगज्जन्मस्थितिलयास्तद्ब्रह्मेति जन्मस्थितिलयाः स्वनिमित्तोपादानभूतं वस्तु ब्रह्मेति लक्षयन्ति। जगन्निमित्तोपादानताक्षिप्तसर्वज्ञत्वसत्यसंकल्पत्वविचित्रशक्तित्वाद्याकारबृहत्त्वेन प्रतिपन्नं ब्रह्मेति च जन्मादीनां तथाप्रतिपन्नस्य लक्षणत्वेन—नाकारान्तराप्रतिपत्तिरूपानुपपत्तिः। जगज्जन्मादीनां विशेषणतया लक्षणत्वेऽपि न कश्चिद्दोषः।

दर्शयितुमाकारद्वयं विवक्षन् पूर्वमुपलक्ष्याकारमाह—**उपलक्ष्यं हीति**। अथर्वशिरसि 'बृहति बृंहयति तस्माद्बृच्यते परं ब्रह्मे'ति, श्रीमति वैष्णवे पुराणे च—'बृहत्त्वाद्बृंहणत्वाच्च ब्रह्मेति परिपठ्यते' इत्यादिनिर्वचनप्रसिद्धियोतको **हि**शब्दः। आकारत्रयपृथक्त्वद्योतनार्थश्चशब्दः. तत्र तत्र ज्ञेयाः। कथं निरतिशयबृहत्त्वबृंहणत्वप्रतिपत्तिरित्यत्राह—**बृहतेरिति**। मनिन्प्रत्ययान्तस्य रूढिसहकृतस्य बृहतिधातोस्तदर्थत्वादित्यर्थः। यद्वा, **ब्रह्मशब्देन** बृहत्त्वबृंहणत्वाकृतिः **कथमित्यत्राह—बृहतेरिति**। बृहत्त्वस्य स्वरूपतो गुणतश्च विवक्षितत्वात्-बृंहणत्वरूपगुणो बृहत्वमपि बालव्युत्पत्तिगतमिति भावः। **उपलक्षणाकारमाह—तदुपलक्षणेति**। ननु—सारसस्य केदारेणेव जन्मादीनां ब्रह्मणा सह संबन्धो वक्तव्यः, किंच—ब्रह्मण उपादानत्वे बाह्यमत इव निमित्तान्तराधिष्ठेयताप्रसङ्गेन सत्यसङ्कल्पत्वादिगुणान्वयलक्षणबृंहणत्वासिद्धिश्च स्यादिति—एतच्छङ्कद्वयं परिहरन्, तृतीयाकारोपस्थापकं वाक्यं चावतारयति—**यतो येनेत्यादिना**। कुत्र कथं प्रसिद्धिरित्यत्राह—**प्रसिद्धिश्चेति**। तच्च कथमित्यपेक्षायां तत्प्रतिपादनं पदानामन्वयमुखेन दर्शयति—**तदपीति**। **तन्निमित्तोपादानस्वरूपकारणत्वम्**। उपादानत्वाधिष्ठात्रन्तरनिवारणायोरुपादनं **तदैक्षत बहु स्याम्, असृजतेति**। रामकृष्णादिरूपेण बहुभवनव्यावृत्त्यर्थं जगद्रूपेण बहुभवनमिति दर्शितं **तत्तेजोऽसृजतेत्यनेन**। अत्र फलितं संबन्धमाह—**तस्मादिति**। यथा—उपलक्षणेन सारसेनाधिकरणत्वेन संबन्धित्वं केदारस्य, यथा—चन्द्रदेवस्य शाखायाश्च ऋजुभावः संबन्धः, तथा—ब्रह्मण उपलक्षणभूतजन्मादिभिर्हेतुहेतुमद्भावः संबन्ध इत्युक्तं भवति; यथाप्रसिद्धानुवादरूपतया वाक्यस्य। निमित्तान्तरशङ्का चार्थात्परिहृता भवति॥

एवं तृतीयाकारस्याक्षेपकमुपलक्षणसंबन्धात्मकं **निमित्तोपादानरूपकारणत्वमुक्तम्**, अथ तदाक्षिप्तं तृतीयाकारमाह—**जगदिति**। **यतःशब्दस्मारितकारणवाक्येषु** हि सार्वज्ञ्याद्यवगमः, **अतो जगन्निमित्तोपादानताऽऽक्षिप्तेत्युक्तम्**। गुणानामपरिच्छिन्नतया तद्विशिष्टस्य **ब्रह्मशब्दवाच्यतायोग्यत्वेऽपि पृथगाकारबृहत्त्वेनेत्युक्तम्**। **यः सर्वज्ञ** इत्यादिवाक्यावगतसार्वज्ञ्यादीनामुपलक्षणत्वाभावात्-वान्योन्याश्रयः, विशेषणबहुत्वं तु न विशेष्यभेदापादकमिति वदन्त इति न विरोधः। उपलक्षणपक्षानुपपत्तिपरिहारमुपसंहरति—**इति चेति**। **इति च** अतश्चेत्यर्थः। **उपलक्ष्यं हीत्यादिभाष्यस्यैवं वा योजना—अनवधिकातिशयशब्देन** ह्यात्पर्यम्। उपलक्ष्यमनवधिकातिशयबृहत्त्वं, बृंहणत्वं च। निरवधिकबृहत्त्वं च स्वरूपतो गुणतो विभूतिश्चानवधिकबृहत्त्वम्। बृहत्त्वबृंहणत्वविशेष उपलक्ष्य इत्युक्तं भवति। ततश्चोपलक्ष्याकारैकदेशभूतं बृहत्त्वबृंहणत्वमात्रं पूर्वप्रतिपन्नाकारो भवतीति फलितं; लोके तथा दर्शनात्। देवदत्तकेदारत्वं **ह्युपलक्ष्यं**, न च देवदत्तसंबन्धिलमात्रं; घटपटादिष्वतिप्रसङ्गात्। तदेकदेशभूतकेदारत्वमात्रेण च पूर्वप्रतिपत्तिः, तस्मादुपलक्ष्यैकदेशभूतबृहत्त्वबृंहणत्वाकारेण पूर्वप्रतिपत्तिः। अनवधिकातिशयबृहत्त्वकं बृंहणत्वमुपलक्ष्यमित्यभिप्रायेण **ह्यनवधिकातिशयबृहद् बृंहणं चेत्युक्तम्**। बृहत्त्वबृंहणत्वविशेषस्योपलक्ष्यत्वात्—बृहत्त्वबृंहणत्वमात्रं पूर्वप्रतिपन्नाकार इत्यर्थसिद्धमिति हिशब्देन सूचितम्। **कथं तत्प्रतिपत्तिरित्यत्राह—बृहतेर्धातोरिति**। बृहत्त्वमात्रं पूर्वप्रतिपन्नाकारं इत्यध्याहृतेन वाक्येन तदर्थत्वादिति पञ्चम्या अन्वयः। यद्वा **न चेत्यादिपूर्ववाक्येनान्वयः**। उपलक्षणाकारमाह—**तदुपलक्षणेति**। तृतीयाकारमन्वयमपि विवक्षुस्तत्प्रतिपादकं वाक्यमवतारयन्नुपलक्षणस्योपलक्षेण संबन्धं वदन्निमित्तान्तरशङ्कां च व्युदस्यति—**यतो येनेत्यादिना**। पूर्ववदर्थः। विवक्षितमन्वयं तृतीयाकारमाह—**जगदिति**। इदानीं चतुरस्तृतीयकारान्तरसमुच्चये। यथा—केदारत्वं सारसाधिकरणसंबन्धित्वोपयोगि, तथा—सर्वज्ञत्वादयोऽप्यनवधिकातिशयबृहत्त्वबृंहणत्वजन्मादिकारणत्वोपयोगिनः॥

इति जन्माद्यधिकरणसिद्धान्ते उपलक्षणपक्षस्य निर्दुष्टत्वम्॥

ननु विशेषणतया लक्षणत्वमुपपद्यते—जगज्जन्मादीनामिति। कथं न दोषः, अपवादकप्रमाणाभावान्न विशेषण-

लक्षणभूतान्यपि विशेषणानि स्वविरोधिव्यावृत्तं वस्तु लक्षयन्ति । अज्ञातस्वरूपे वस्तुन्येकस्मिँल्लिलक्षयिषितेऽपि परस्पराविरोध्यनेकविशेषणलक्षणत्वं न भेदमापादयति; विशेषणानामेकाश्रयतया प्रतीतेरेकस्मिन्नेवोपसंहारात् । खण्डत्वादयस्तु विरोधादेव गोव्यक्तिभेदमापादयन्ति, अत्र तु कालभेदेन जन्मादीनां न विरोधः । **'यतो वा इमानि भूतानि जायन्ते'** (तै. ३।१।१) इत्यादिकारणवाक्येन प्रतिपन्नस्य जगज्जन्मादिकारणस्य ब्रह्मणः सकलेतरव्यावृत्तं स्वरूपमभिधीयते—**'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै. २।१।१) इति । तत्र **सत्य**पदं निरुपाधिकसत्तायोगि ब्रह्माह । तेन विकारास्पदमचेतनं, तत्संसृष्टचेतनश्च व्यावृत्तः; नामान्तरभजनार्हावस्थान्तरयोगेन तयोर्निरुपाधिकसत्तायोगरहितत्वात् । **ज्ञान**पदं नित्यासंकुचितज्ञानै-

---

भेदस्य विशेष्यभेदावहत्वं दोषत्वेन ह्युक्तमित्यत्राह—**लक्षणभूतान्यपीति** । **लक्षणभूतानि** व्यावर्तकभूतानीत्यर्थः । यद्वा, लक्षणभूतानां विशेषणानां सजातीयविजातीयव्यावर्तनस्वभावत्वेऽपीत्यर्थः । **स्वविरोधिव्यावृत्तं** नियतभिन्नाश्रयविशेषणाश्रयाद् व्यावृत्तं, न त्वविरुद्धविशेषणाश्रयाद् व्यावृत्तमित्यर्थः । अयं ग्रन्थः पक्षविषयः । बहुलापवादकप्रमाणाभावे सति विशेषत्वमेव विरोधित्वमित्यत्राह—**अज्ञातेति** । अयं तु सपक्षविषयः, 'देवदत्तः श्यामो युवे'त्याद्युदाहरणमत्राभिप्रेतम् । अप्रत्यक्षविषयेऽप्येकवचनान्तधर्मिवाचिपदैक्यादिशेष्यैक्यं प्रतीयत इत्यर्थः । अत्र विशेष्यैक्यव्यवस्थापकं किमित्यपेक्षायां सपक्षे विशेष्यैक्यमुपपादयति—**विशेषणानामिति** । शब्दस्वारस्याद्विशेषणानामेकाश्रयान्वयप्रतीतेः—अविरुद्धविशेषणानामेकाश्रयवृत्तित्वोपपत्तेरित्यर्थः । अविरुद्धविशेषणत्वं विशेष्यैक्यव्यवस्थापकमित्युक्तं भवति । यद्वा, **अज्ञातस्वरूप** इत्यपि ग्रन्थः पक्षविषयः, पूर्वस्मिन् ग्रन्थे विशेषणानां विरुद्धविशेषणाश्रयात्—स्वाश्रयभेदकत्वमुक्तम् । अप्रत्यक्षत्वे सति भिन्नविशेषणत्वमेव भेदकत्वमित्यत्राह—**अज्ञातेति** । तत्राप्यविरुद्धविशेषणभेदो न विशेष्यभेदक इत्यर्थः । कुत इत्याह—**विशेषणानामिति** । 'देवदत्तः श्यामो युवा लोहिताक्षः' इत्यादावविरुद्धविशेषणानामेकाश्रयत्वदर्शनात्—पक्षीकृतेऽप्येकस्मिन्नेव विशेषणानामन्वयोपपत्तेरित्यर्थः । अविरुद्धविशेषणानां विशेष्यभेदानापादकत्वमुक्तं, विपक्षभूतखण्डादिषु बहुलनियामकमाह—**खण्डत्वादयस्त्विति** । ततः पक्षस्य वैषम्यमाह—**अत्रत्विति** । **कालभेदेन**त्यस्यायमभिप्रायः—विशेष्यब्रह्मबहुत्वेऽपि जगज्जन्मादीनां यौगपद्यव्याघातात्—कालभेदेनाविरोध आश्रयणीयः, विशेष्यैक्येऽपि तथैवाविरोध इति । अत्रायमर्थोऽनुसन्धेयः—विशेषणबहुत्वं स्वत एव विशेष्यभेदापादकं; 'खण्डो मुण्ड' इत्यादिषु दर्शनात् । 'देवदत्तः श्यामो युवे'त्यादिषु प्रत्यक्षबाधादैक्यप्रतीतिः, तस्मात्प्रत्यक्षागोचरे ब्रह्मणि विशेषणबहुत्वायत्तं विशेष्यबहुत्वमवर्जनीयम् । ननु—एकवचनान्तधर्मिवाचिपदैक्यस्य स्वतो विशेष्यैक्यपरत्वं 'देवदत्तः श्यामो युवे'त्यादिषु दृष्टम्, 'खण्डो मुण्ड'इत्यादिषु प्रत्यक्षबाधाद्बहुत्वप्रतीतिः, अतः प्रत्यक्षागोचरे ब्रह्मणि एकवचनान्तधर्मिवाचिपदैक्यादैक्यं सिद्धमेव, मैवं; विशेषणभेदायत्तं विशेष्यबहुत्वमेकवचनान्तधर्मिवाचिपदैक्यं न बाधते, अपितु प्रत्यक्षमेव बाधते; अदृश्यमानगोव्यक्तेः पुरुषस्य 'खण्डो मुण्ड' इत्यादिवाक्यप्रयोगे सत्येकवचनान्तधर्मिवाचिपदैक्येपि बहुत्वप्रतीतेः—इति हि पूर्वपक्षस्थितिः, तत्रोत्तरमुच्यते—**अज्ञातेत्यादिना** । एकवचनान्तधर्मिवाचिपदैक्यं बहुत्वं बाधत एव, अदृश्यमानेऽपि देवदत्ते 'देवदत्तः श्यामो युवे'त्यादिवाक्यप्रयोगे विशेषणबहुत्वे सत्यपि विशेष्यैक्यप्रतीतेः । एवं प्रत्यक्षाप्रत्यक्षविभागविधुरबहुत्वप्रतीतिः, ऐक्यप्रतीतिश्च भवतः । अत्र तु बहुत्वैक्ययोः को निर्णायक इति चेत्, नियतभिन्नाश्रयदृष्टविशेषणबहुत्वं विशेष्यैक्यविरोधि, अनियतभिन्नाश्रयदृष्टविशेषणबहुत्वं नैक्यविरोधीति ॥

अथ सत्यज्ञानादीनां लक्षणत्वोपपत्तिं, पूर्वोक्तान्योन्याश्रयपरिहारं चाह—**यतो वा इति** । लक्षणवाक्येनानेन कारणत्वमेव लक्षणत्वेनोक्तमित्यस्य कारणवाक्यत्वम् । **आदि**शब्देन **सदेवेत्या**दीनि कारणत्वप्रापंकवाक्यानि गृह्यन्ते । ननु—**लक्षणभूतेनैव** जन्मादिकारणत्वेन ब्रह्मणः सजातीयविजातीयव्यावृत्तिः सिद्धा; अन्यथा तस्य लक्षणत्वायोगात्, तत्कथं सत्यादिवाक्येन सकलेतरव्यावृत्तमभिधानोक्तिः, उच्यते—व्यावृत्तिर्द्विविधा—व्यक्त्यन्तरेष्वसंभावितधर्मयोगरूपा, तत्तज्जातीयसाधारणधर्मान्वयरूपा च, तत्र विलक्षणधर्मयोगे व्यक्त्यन्तरेभ्योऽन्यत्वं सिध्यति, न त्वतज्जातीयत्वं; तज्जातीयत्वव्यञ्जकधर्मान्वयाधीनतज्जातीयत्वशङ्काया अनपगमात् । तदनन्वये तु तज्जातीयताव्यावृत्तिः सिध्यति, यथा—घटस्य संस्थानविशेषेण खेतरसमस्तवैलक्षण्ये सिद्धेऽपि पृथिवीत्वव्यवस्थापकगन्धवत्त्वयोगात्—पृथिवीजातीयत्वं नाशेति, तदयोगादवादिषु तज्जातीयत्वापगमः, एवं जगत्कारणत्वरूपविलक्षणधर्मान्वये सत्यपि ब्रह्मणोऽचिज्जातीयत्वजीवजातीयत्वशङ्काऽवतिष्ठते इति—तज्जातीयताव्यावृत्तिः **सत्यज्ञानादि**वाक्येन प्रतिपाद्यत इति—तस्य सकलेतरव्यावृत्तस्वरूपबोधकतयोक्तियुक्तेति । कथं व्यावृत्तस्वरूपाभिधानमित्यत्राह—**तत्रेति** । केनापि परिणामविशेषेण तत्तदवस्थस्य सत्ता सोपाधिकसत्ता, अतो **निरुपाधिकसत्ता** निर्विकारत्वम् । सत्यपदव्यावर्त्यमाह—**तेनेति** । कथमित्यत्राह—**नामान्तरेति** । निरुपपदं **सत्य**पदमसङ्कोचात्

काकारमाह। तेन कदाचित्सकुचितज्ञानत्वेन मुक्ता व्यावृत्ताः। **अनन्त**पदं देशकालवस्तुपरिच्छेदरहित-

---

स्वरूपतो धर्मतश्चैकरूपत्वं ज्ञापयतीति—अचित्तसंसृष्टजीवव्यावृत्तिः। **ज्ञान**शब्दार्थमाह—**ज्ञानपदमिति**। 'इदानीमस्मिन् विषय' इत्याद्युपपदरहितं **ज्ञानं**पदं नित्यत्वमसङ्कुचितत्वं च ज्ञानस्य दर्शयति। **नित्यासङ्कुचितज्ञानत्व**मेवाकारो यस्य तन्नित्यासङ्कुचितज्ञानैकाकारं, तेन ब्रह्मणः कदाचित्कचिदपि प्रदेशे जडत्वव्यावृत्तिः। नित्यासङ्कुचितज्ञानत्वमद्वारकं, धर्मद्वारकं च परमात्मन आकारो भवति; 'आत्मज्योतिः सम्राडिति होवाच, ब्रह्मणा विपश्चिता, विज्ञातारमरे केन विजानीयात्' इत्यादिभिः स्वरूपस्य, धर्मस्य च ज्ञानत्वावगमात्। **ज्ञान**शब्दासङ्कोचेन सद्द्वारकाद्वारकज्ञानाकारत्वसिद्धिः। ननु—अस्य **ज्ञान**शब्दस्य, किं प्रवृत्तिनिमित्तं, विषयावगाहिज्ञानाख्यद्रव्यत्वं चेत्, अपर्यवसानात् ज्ञानधर्मकत्वमुक्तं स्यात्, न तु ज्ञानस्वरूपतां। स्वप्रकाशतारूपं ज्ञानत्वं प्रवृत्तिनिमित्तं चेत्, ज्ञानस्वरूपत्वमुक्तं स्यात्, नतु ज्ञानधर्मकत्वम्। ततश्च **तद्गुणसारत्वा**दिति सूत्रविरोधश्च। नच—गवादिशब्दानां परमात्मपरत्वे गोलसंस्थानपिण्डजीवानामिव द्वारद्वारिभावात्—ज्ञानाख्यद्रव्यज्ञानत्वगुणयोर्द्वयोरपि प्रवृत्तिनिमित्तत्वं घटते। न हि धर्मभूतज्ञानं स्वरूपभूतज्ञानगतज्ञानत्वगुणे समवैति, येन द्वारद्वारिभावः स्यात्। धर्मभूतज्ञाने, स्वरूपे चानुगतं ज्ञानत्वमेव प्रवृत्तिनिमित्तं चेत्, **गो**शब्देन खण्डमुण्डपिण्डद्वयवत् ज्ञानव्यक्तिद्वयमुक्तं स्यादिति—द्वारद्वारिभावेनानभिधानात्—तयोर्ज्ञानयोर्न धर्मिभावप्रतीतिः। ज्ञानत्वगुणविशेषितज्ञानद्रव्यविशिष्टतया, ज्ञानत्वगुणविशिष्टतया च स्वरूपस्याभिधाने—शब्दस्य युगपद् व्यापारभेदः प्रसजेत्, अतो **ज्ञान**पदेन स्वरूपतो धर्मतश्च ज्ञानाकारत्वमात्मनो न सिध्येत्, उच्यते—**ज्ञान**शब्दस्य स्वप्रकाशतारूपं ज्ञानत्वं प्रवृत्तिनिमित्तम्। नच **तद्गुणसारत्वा**दिति सूत्रविरोधः; धर्मभूतज्ञानद्रव्याभिधानेऽपि ज्ञानत्वस्य प्रवृत्तिनिमित्तत्वात्। स्वरूपस्य च ज्ञानत्वं **प्रकाशवच्चावैयर्थ्या**दिति सूत्रितम्। नच—सद्वारकमद्वारकं च स्वरूपस्याभिधानेऽपि शब्दस्य युगपद् व्यापारभेदः; साक्षाद्वा, परंपरया वेति विशेषणमनपेक्ष्य ज्ञानत्वमात्रस्य प्रवृत्तिनिमित्तत्वे सति शब्दशक्त्यसङ्कोचात्, साक्षात्प्रणाड्या च ज्ञानत्वविशिष्टतावगमेन ज्ञानधर्मकत्वज्ञानस्वरूपत्वसिद्धेः। नच—द्वारद्वारिभावेनानभिधानात् खण्डमुण्डव्यक्त्योरिव धर्मधर्मिभावासिद्धिः; 'आत्मज्योतिः सम्राड्, ब्रह्मणा विपश्चिता, अत्रायं पुरुषः स्वयं ज्योतिर्भवति, एष हि द्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुष' इत्यादिभिः परमात्मनो जीवस्य च, ज्ञानधर्मकत्वस्य ज्ञानस्वरूपत्वस्य च सिद्धेः, **ज्ञान**शब्दस्य चासङ्कोचेन ज्ञानात्मनोर्विशेषणांशे विशेष्यांशे च ज्ञानत्वैशिष्ट्यबोधनसामर्थ्याच्च। यथा—'सपरिकरो राजा दृष्टः, सपरिच्छदं गृहं क्रीतं, सवत्सा गौः क्रीते'त्यादौ विशेषणांशस्य विशेष्यांशस्य च दृष्टत्वक्रीतत्वान्वय एकव्यापारेण शब्देन बोध्यते—तद्वत्। नच विशेषणांशे विशेष्यांशे वा दृष्टत्वक्रीतत्वान्वयश्चार्थः; विशेषणांशविशेष्यांशयोरन्यतरेण विनान्यतरस्य दृष्टत्वक्रीतत्वान्वयप्रतीत्यनुपपत्त्यभावात्। नहि प्रवाहस्य घोषं प्रति वासवत् विशेषणांशेन विना विशेष्यांशस्य दृष्टत्वक्रीतत्वादिकमनुपपन्नम्। नच—दर्शनक्रयादियोग्यतालक्षणेनार्थसमर्थ्येन विशेषणांशस्य तदन्वयप्रतीतिः; मण्डपक्षेत्रगोदोहनादीनां दर्शनक्रयादियोग्यानामपि तदन्वयप्रतीतेः। तदप्रतीतिश्च बुभुत्सायां सत्यां सन्देहोदयात्सिद्धा। नच—समभिव्याहारबलात् विशेषणांशस्य तदन्वयसिद्धिः; 'धार्मिको राजा दृष्ट' इत्यत्र धर्मस्य दृष्टत्वाप्रतीतेः। नहि धर्मश्चक्षुर्विषयः। योग्यत्वे सति समभिव्याहारबलात्तदन्वयसिद्धिरिति चेत्; तर्हि विशेषणांशेऽपि तदन्वयस्य शाब्दत्वमुक्तं स्यात्। नह्याकाङ्क्षासन्निधियोग्यतान्वयेन प्रतिपन्नत्वं शाब्दत्वं निवारयति। ननु—'सपरिकरो राजा दृष्ट' इत्यादिषु विशेषणांशस्य विशेष्यांशस्य च शब्देनोपस्थापनात्—तत्र विशेषणांशेऽपि विधित्सिताकारान्वय उपपन्नः, अत्रतु तदभावात्—उभयत्र विधित्सिताकारान्वयानुपपत्तिरिति, नैवं; **ब्रह्म**शब्देनैव विशिष्टवस्तूपस्थापनात्। तथाहि—**तद्विजिज्ञासस्वे**ति मुमुक्षोर्विज्ञास्यतयोक्तं **ब्रह्म तदैक्षते**त्यादीनि वाक्यानि सत्यसङ्कल्पादिविशिष्टं कारणं वदन्ति, तच्छोधनप्रवृत्त**सत्यादि**वाक्यगत**ब्रह्म**शब्दः सत्यसङ्कल्पतादिविशिष्टकारणविषयः। बृंहणत्वमपि हि **ब्रह्म**शब्दार्थः। तच्च स्वसङ्कल्पेनाचेतनस्य स्थूलपरिणामहेतुत्वं, चेतनानां **स चान्तर्न्याय कल्पते** इत्युक्तज्ञानबृंहत्त्वे हेतुत्वं च, ततश्च सत्यसङ्कल्पत्वादिविशिष्टार्थोपस्थापक**ब्रह्म**शब्दप्रतिपन्नविशिष्टवस्तुविशेषकत्वात्—ज्ञानपदमसङ्कुचितशक्तितया विशेष्यांशे विशेषणांशे च स्वप्रवृत्तिनिमित्तभूतज्ञानत्वान्वयं प्रतिपादयति। 'सपरिकरो राजा दृष्ट' इत्यादिषु पदान्तरसमभिव्याहृतशब्देन विशिष्टोपस्थापनम्, अत्र तु स्वोपजीव्यवाक्यान्तरस्थनिर्वचनसापेक्षब्रह्मशब्देनेति भिदा। विशिष्टवस्तुन्युपस्थापिते सति विशेषणांशस्य विशेष्यांशस्य च विधित्सिताकारान्वयित्वं तुल्यम्। स्वोपजीव्यवाक्यान्तरसापेक्षशब्देन विशिष्टवस्तुन्युपस्थापिते विधित्सिताकारस्योभयान्वयित्वं च दृष्टम्। यथा—'सानुचरो राजा समागतः मया च स सत्कृत' इति, 'सवत्सा गौः स्थिता सा च दत्ते'ति। अतः परमात्मनो **ज्ञान**शब्देन ज्ञानधर्मकत्वज्ञानस्वरूपत्वाभिधानं युक्तम्। आनन्दादिशब्देष्वप्येष एव न्यायः स्वतः प्रवर्तते, प्रमाणान्तरविरोधे सति तु निवर्तते, अतो यथोक्तार्थ उपपन्नः। अतः साक्षात्प्रणाड्या च निर्ज्ञांसङ्कुचितज्ञानैकाकारत्वं दर्शयत्र ज्ञानपदेन मुक्तव्यावृत्तिसिद्धिमाह—**तेनेति**। **अनन्त**पदस्यार्थमाह—**अनन्तेति**। 'इहेदं नान्यत्रे'ति परिच्छेत्तुमशक्यत्वं **देशापरिच्छेदः**। 'इदमिदानीं नान्यदे'ति परिच्छेदायोग्यत्वं **कालापरिच्छेदः**, न तु देशकालाभावौ। एवं वस्त्वपरिच्छेदोऽपि न वस्त्वन्तराभावः, किंतु **'इदमिदं न भव-**

स्वरूपमाह । **सगुणत्वात्स्वरूपस्य**—स्वरूपेण गुणैश्चानन्त्यम् । तेन पूर्वपदद्वयव्यावृत्तकोटिद्वयविलक्षणाः **सातिशयस्वरूपस्वगुणा** नित्याः व्यावृत्ताः; विशेषणानां व्यावर्तकत्वात् । ततः **'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै. २।१।१) इत्यनेन वाक्येन जगज्जन्मादिनावगतस्वरूपं ब्रह्म सकलेतरवस्तुविसजातीयमिति लक्ष्यत इति—नान्योन्याश्रयणम् । अतः सकलजगज्जन्मादिकारणं निरवद्यं सर्वज्ञं सत्यसंकल्पं सर्वशक्ति ब्रह्म लक्षणतः प्रतिपत्तुं शक्यत—इति सिद्धम् ॥ ये तु—निर्विशेषं वस्तु जिज्ञास्यम्—इति वदन्ति तन्मते **ब्रह्मजिज्ञासा, जन्माद्यस्य यत** इत्यसंगतं स्यात्; 'निरतिशयबृहत्, बृंहणं च ब्रह्मे'ति निर्वचनात्, **'तच्च ब्रह्म जगज्जन्मादिकारण'मिति वचनाच्च** । एवमुत्तरेष्वपि सूत्रगणेषु, सूत्रोदाहृतश्रुतिगणेषु चेक्षणाद्यन्वयदर्शनात्सूत्राणि, सूत्रोदाहृताः श्रुतयश्च न तत्र प्रमाणम् । तर्कश्च साध्यधर्माव्यभिचारिसाधनधर्मा-

---

ती'ति परिच्छेदानर्हत्वमेव । सर्ववस्तुसामानाधिकरण्यार्हत्वं वस्त्वपरिच्छेद इति यावत् । ब्रह्मव्यतिरिक्ते भावरूपाज्ञानतत्कार्यजातेऽङ्गीकृते सति वस्त्वन्तराभावरूपो वस्त्वपरिच्छेदः परस्यानुपपन्नः । सत्यवस्त्वन्तराभावः स इति चेत्, तर्हि स्वनिष्ठवस्त्वन्तराभावः स इत्यभ्युपगमो वरं; प्रमाणान्तराविरोधात् । सत्यवस्त्वन्तराभावो हि तत्तद्धर्मिग्राहकप्रमाणविरुद्धः । गुणतोऽप्यनन्त्यमाह—**सगुणत्वादिति** । गुणानां देशकालापरिच्छेदौ विद्येते, 'नतूत्कलक्षणवस्तुपरिच्छेदाभावः'; स तु स्वरूपस्यैव । यद्वा प्रकारान्तरेण वस्तुपरिच्छेदाभावमाह—**सगुणत्वादिति** । 'इदमिय'दिति वस्तुस्वभावतः परिच्छेदाभावो **वस्त्वपरिच्छेदः** । यथा—तुल्यकालवे तुल्यपरिमाणत्वेऽपि दशवर्णस्वर्णापेक्षया षड्वर्णस्वर्णं, तदपेक्षया कलधौताद्रि चापकृष्टं सोऽपकर्षो वस्तुपरिच्छेदः, तत्तदपेक्षया गुरुलोष्ठवलंक्षपवित्रत्वादिमिर्दशवर्णसुवर्णादिकं प्रकृष्टं, तस्य प्रकर्षस्य निरतिशयत्वं वस्त्वपरिच्छेदः । ईदृशवस्त्वपरिच्छेदः स्वरूपस्य गुणानां च युज्यते; तेषामपि हेयप्रत्यनीकत्वादिस्वभावोत्कर्षस्य निरवधिकत्वात् । समाश्रयाधिकरणहेतुनिदानभूतो गुणैर्निरतिशयप्रकर्षो वस्तुपरिच्छेद इत्युक्तं भवति । सर्ववस्तुसामानाधिकरण्यार्हत्वं चास्मिन्नन्तर्गतं; तद्धि सर्वशरीरकत्वं, तच्च नियमनधारणशेषित्वकाष्ठेति । **अनन्त**पदव्यवच्छेद्यमाह—**तेनेति । सातिशयस्वरूपस्वगुणा इति** । स्वरूपमणुत्वात्**सातिशयम्** । ज्ञानव्यतिरिक्तैश्वर्यादिगुणाश्च जगद्व्यापारानर्हतया **सातिशयाः** । ज्ञानं च नित्यं सर्वगतमपि तथात्वस्य परमात्मनित्येच्छाधीनत्वात्—**सातिशयम्**; अपराधीनत्वरूपस्यातिशयस्य परस्मिन् विद्यमानत्वात् । स्वाभाविकत्वेऽपि गुणानां **सातिशयत्व**मिति ज्ञापनार्थं **स्व**शब्दः । एवं व्यावृत्तिकथनस्य हेतुमाह—**विशेषणानामिति** । अन्योन्याश्रयस्य परिहृतत्वं दर्शयति—**तत इति । ततः** एवं व्यावृत्तिसिद्धेः । **अवगतस्वरूपमवगतासाधारणाकारम्** । जन्मादिकारणत्वं ह्यसाधारणाकारः तल्लक्षणकत्वेनावगतमित्यर्थः । 'वस्तु विशेष्यस्वरूपं ब्रह्मे'ति वा पाठः । कारणतया लक्षितस्य ब्रह्मणः कारणत्वशङ्कितदोषव्यावर्तकत्वात्—शोधकवाक्यानां लक्षणवाक्यपूर्वकत्वमस्ति, नतु तस्य शोधकवाक्यपूर्वकत्वमिति—नान्योन्याश्रयणमित्यर्थः । सूत्रकारैः **सत्यज्ञाना**दीनां लक्षणत्वेनानुक्तिनिदानं च अनेनैव दर्शितं भवति । विशेष्यांशस्य लक्षणं **सत्यज्ञाना**दि, न तु विशिष्टस्य; विशिष्टस्यैवोपास्यत्वात्, प्राप्यत्वाच्च । **जिज्ञास्यब्रह्म**लक्षणं **जन्माद्ये**वेति सूत्राकाराभिप्रायः । जगत्कारणं ब्रह्म जिज्ञास्यमित्युक्ते—कारणत्वशङ्कितदोषव्यावर्तकतया तच्छेषभूतः शोधकवाक्यार्थश्चास्मिन्सूत्रे सूत्रकारेणाभिप्रेतः; जिज्ञास्यत्वानुगुण्यस कारणत्वस्यैव लक्षणतया विवक्षितत्वात् । स्वरूपेण हेयासदस्य **जिज्ञास्यत्वानुपपत्त्या जिज्ञास्यतायाः** शोधकवाक्यार्थसापेक्षत्वात्, सत्यज्ञानादिवाक्यविषयसूत्रान्तराभावात्, **प्राज्ञवत्, प्रकाशवच्च, प्रकाशादिवच्चे**ति सूत्राणां सत्यादिवाक्यं दृष्टान्ततयोपजीव्यार्थान्तरोपपादनपरत्वाच्च—**सत्यज्ञानादि**वाक्यार्थश्चात्रामिप्रेत इत्यभिप्रायेण—भाष्यकारैर्**निखिलहेयप्रत्यनीकस्वरूपा**दित्यादिविशेषणमुक्तम् । अधिकरणार्थमुपसंहरति—**अत इति । अतः** जन्मादीनां विशेषणतया, उपलक्षणतया च लक्षणत्वोपपत्तेः । जिज्ञास्यत्वोपयोगिशोधकवाक्यावगताकारविशिष्टमेवं कारणं वस्तु **यतो वा इमानी**त्यादिवाक्येऽर्थलब्धमित्यभिप्रायेणाह—**निरवद्यमिति** । सर्वज्ञत्वादिगुणजातं कारणत्वाक्षिप्तं **यत** इत्यत्रानूद्यत इत्यभिप्रायेण तदुक्तिः । **इति जन्माद्यधिकरणसिद्धान्ते विशेषणत्वपक्षस्य निर्दुष्टत्वम्** ॥

अस्य सूत्रद्वयस्य निर्विशेषवादिपक्षासङ्गतिमाह—**येत्विति** । आद्यसूत्रासङ्गतिमुपपादयति—**निरतिशयेति** । **अथवैष्णवे** श्रीविष्णुपुराणे चोक्तं निर्वचनमभिप्रेतं, न निर्विशेषं ब्रह्मेति निरुक्तमिति भावः । द्वितीयसूत्रासङ्गतिं विवृणोति—**तच्चेति । ब्रह्म** जगतोऽप्यासो **यत** इति लिलक्षयिषितमिति भावः । एवं सूत्रासङ्गतिकथनेन तद्विषयवाक्यासङ्गतिरपि फलिता । **उत्तरेषां** सूत्राणां तत्तद्विषयवाक्यानामपि निर्विशेषपक्षानानुगुण्यमाह—**एवंमिति । सूत्रगणेष्विति** । नैकैकं सूत्रं, वाक्यं वा विरुद्धम्, अपितु तत्तद्विकरणशरीरं, तत्तद्विषयवाक्यजातं च विरुद्धमिति भावः । तर्कानुगुण्यमाह—**तर्कश्चेति । तर्कशब्दोऽनुमानपरः**, प्रमाणानुग्राहकतर्कपरो वा । परामिमतयोजनायामपि निर्विशेषवस्तुसिद्धिमाह—

न्वितवस्तुविषयत्वात्—न निर्विशेषवस्तुनि प्रमाणम्। जगज्जन्मादिभ्रमो यतस्तद्ब्रह्मेति स्वोत्प्रेक्षापक्षेऽपि—न निर्विशेषवस्तुसिद्धिः; भ्रममूलमज्ञानमज्ञानसाक्षि ब्रह्मेत्यभ्युपगमात्। साक्षित्वं हि प्रकाशैकरसत्वोच्यते, प्रकाशत्वं तु जडाव्यावर्तकं स्वस्य परस्य च व्यवहारयोग्यतापादनस्वभावेन भवति, तथासति सविशेषत्वं, तदभावे—प्रकाशतैव न स्यात्, तुच्छतैव स्यात्॥ इति द्वितीयं जन्माद्यधिकरणम्[1] ॥ २ ॥

जगज्जन्मादिकारणं ब्रह्म वेदान्तवेद्यमित्युक्तं, तदयुक्तं;
तद्धि न वाक्यप्रतिपाद्यम्; अनुमानेन सिद्धेः—इत्याशङ्क्याह—

(तृतीयं शास्त्र० अ०) (३) **शास्त्रयोनित्वात्॥ १।१।३॥**

शास्त्रं यस्य योनिः कारणं—प्रमाणं तच्छास्त्रयोनि, तस्य भावः शास्त्रयोनित्वं, तस्मात्।

जगज्जन्मादीति। स्वोत्प्रेक्षापक्षेऽपीति। अयमभिप्रायः—'यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्, तदात्मानं स्वयमकुरुत, कटकमुकुटकर्णिकादिभेदैः, आत्मकृतेः परिणामा'दिति श्रुतिस्मृतिसूत्रेषु परिणामवचनतदनुगुणदृष्टान्ततदुपपादनानि दृश्यन्ते, नतु विवर्तानुगुणं किमपि दृश्यते। नहि 'यथा सौम्यैकेन शुक्तिशकलेन सर्वं रजतजातं विज्ञातं स्या'दिति श्रुतिः, 'विवर्ता'दिति सूत्रं वा दृश्यते। तस्माज्जगज्जन्मादिभ्रमो यतस्तद्ब्रह्मेत्ययमर्थः स्वयमार्जितः, नतु श्रुतिसिद्ध इति—परोत्प्रेक्षितपक्षे तन्निर्विशेषवस्तुसिद्धिमुपपादयति—**भ्रममूलमिति। ततः किमित्यत्राह—साक्षित्वं हीति।** ततोऽपि किमित्यत्राह—**प्रकाशत्वं त्विति। प्रकाशत्वं** प्रकाशशब्दवाच्यत्वम्। **व्यवहारयोग्यतापादनस्वभावेनेति।** व्यवहारयोग्यतापादनमेव स्वभावः, तेन **भवति।** स्वपरव्यवहारयोग्यतापादनरूपस्वभाव एव **प्रकाशत्वमि**त्यर्थः। तथाऽभ्युपगमे सविशेषपरत्वमाह—**तथेति।** अनभ्युपगमे दूषणमाह—**तदभाव इति। इति परमते सूत्र-द्वयासांगत्योपपादनम्॥ इति द्वितीयं जन्माद्यधिकरणम्॥ २ ॥**

(३) शास्त्रयोनित्वात् ॥ १ । १ । ३ ॥

अथावान्तरसङ्गतिमाह—**जगज्जन्मादीति।** कथमयुक्तमित्यत्राह—**तद्धीति।** सामान्येन शब्दप्रतिपाद्यत्वे सिद्धे हि शब्दैर्विशेषरूपवेदान्तवेद्यत्वसिद्धिरिति भावः। तच्च कुतः, न हि प्रत्यक्षेण तदीक्ष्यत इत्यत्राह—**अनुमानेनेति।** ननु—ईश्वरानुमाननिरासार्थं नेदमधिकरणमारम्भणीयं; साधकबाधकप्रमाणान्तरगोचरस्य शास्त्रेण प्रतिपादनायोगाद्धि तन्निरासः। नचायमपेक्षितः; अनुमानेन कर्तृमात्रे सिद्धेऽपि तदप्रतिपन्नस्य निमित्तोपादानैक्यस्य, गगनादिसर्गस्य च प्रतिपादनोपपत्तेः। अनुमानविरुद्धांशं न शास्त्रं प्रतिपादयतीति—तत्प्रतिपादनायानुमाननिरास इति—चेन्न; आगमविरोधस्यैवानुमानदूषणतयाऽनुमानेनागमप्रतिबन्धयोगादिति, उच्यते—शास्त्रं हि साधकान्तरसिद्धं बाधकान्तरबाधितं च न प्रतिपादयति, यथाहुः—'असन्निकृष्टवाचा च द्वयमत्र जिहासितम्। तादृष्येण परिच्छित्तिस्तद्विपर्ययतोऽपि वे'ति। तत्र निमित्तत्वोपादानत्वे च शास्त्रेण प्रतीयेते तत्र निमित्तमात्रस्यानुमानसिद्धत्वात्तदुक्तिरनुवादः स्यात्, अनुवादस्य प्रमाणान्तरसिद्धिसापेक्षत्वात्—निमित्तानुवादोऽनुमानसापेक्ष एव भवति, अनुमानं चामूर्तद्रव्येतरनिष्ठोपादानव्यतिरिक्तकर्तृकत्वव्याप्तिमूलमिति—धर्मिग्राहकानुमानविरोधेन निमित्तोपादानैक्यं, गगनाद्युत्पत्तिं च शास्त्रं न प्रतिपादयितुमलम्। एवं कारणवाक्यनामंशे प्राप्तविषयत्वात्, अंशान्तरे बाधितविषयत्वाच्च निमित्तोपादानैक्यादिकं न सिध्येदिति—तत्सिद्धये निमित्तमात्रानुमाननिरासार्थमिदमधिकरणमारम्भणीयमिति। ननु—अनुमानवादिभिरपि ईश्वरस्यागमगम्यत्वमङ्गीकृतम्, आगमानुग्राहकतया च अनुमानमुच्यते इति—न तन्निरासो युक्त इति चेत्, परतःप्रामाण्यवादिभिर्नैवं वक्तुं युक्तम्; अनुमानस्य शास्त्रानुग्राहकत्वे शास्त्रमेव प्राधान्येनेश्वरे प्रमाणं भवति। अनुग्राह्यं हि प्रधानम्। ईश्वरप्रोक्ततया च तैर्वेदप्रामाण्यमङ्गीक्रियते, अत ईश्वरे सिद्धे तत्प्रणीतत्वाद्वेदप्रामाण्यसिद्धिः, तत्सिद्धावीश्वरसिद्धिरित्यन्योन्याश्रयः स्यात्। ननु—महाजनपरिग्रहाद्वेदप्रामाण्यं, वेदादीश्वरसिद्धिरिति नान्योन्याश्रय इति—चेन्न; तत्परिग्रहस्य भ्रान्तिमूलत्वव्युदासार्थं निर्दोषलक्षणमूलत्वं वाच्यं, निर्दोषलक्षणं च गुणवद्गुणकलक्षणादित्यन्योन्याश्रयः स्यादेव। आप्तोक्तत्वमनुमानतः सिद्धमिति नान्योन्याश्रय इति चेत्, तत एकानुमानाद्वेदवक्तृत्वेनेश्वरसिद्धेः किं वेदेनेति शास्त्रवैयर्थ्यपरिहाराय तन्निरासः कार्य इति—**अधिकरणारम्भो युक्तः। शास्त्रयोनित्वात्॥** व्याख्यात्रन्तरासंमतषष्ठीतत्पुरुषयोजनाव्यावृत्त्यर्थमाह—**शास्त्रं यस्येति। योनिशब्दस्योपादानपरत्वव्यावृत्त्यर्थं कारणमित्यत्र-परत्वमाह—कारणमिति।** कथं सर्वकारणस्य ब्रह्मणः शास्त्रं कारणमिति शङ्क्याह्युत्पत्तिकारणपरत्वव्यावृत्त्यर्थमाह—**प्रमाण-**

---

१ तत्र सूत्रम् १.—**जन्माद्यस्य यतः॥** १।१।२॥ अस्यायमर्थः—**अस्य** जगतः, **जन्मादि** जन्मस्थितिलयाः, **यतः** यस्माद्ब्रह्मणः, भवन्ति तद्ब्रह्मेति॥

ब्रह्मज्ञानकारणत्वाच्छास्त्रस्य तद्योनित्वम्। ब्रह्मणोऽत्यन्तातीन्द्रियत्वेन प्रत्यक्षादिप्रमाणाविषयतया—ब्रह्मणः शास्त्रैकप्रमाणत्वात्—उक्तस्वरूपं ब्रह्म **'यतो वा इमानि भूतानि जायन्ते'** (तै. ३।१।१) इत्यादि वाक्यं बोधयत्येवेत्यर्थः। ननु—शास्त्रयोनित्वं ब्रह्मणो न संभवति; प्रमाणान्तरवेद्यत्वाद्ब्रह्मणः। अप्राप्ते तु शास्त्रमर्थवत्। किं तर्हि तत्र प्रमाणम्, न तावत्प्रत्यक्षम्; तद्धि द्विविधम्—इन्द्रियसंभवं, योगसंभवं चेति। इन्द्रियसंभवं च—बाह्यसंभवम्, आन्तरसंभवं चेति द्विधा। बाह्येन्द्रियाणि विद्यमानसंनिकर्षयोग्यस्वविषय-बोधजनकानीति—न सर्वार्थसाक्षात्कारतन्निर्माणसमर्थपुरुषविशेषविषयबोधजनकानि। नाप्यान्तरम्; आन्तरसुखदुःखादिव्यतिरिक्तबहिर्विषयेषु तस्य बाह्येन्द्रियानपेक्षप्रवृत्त्यनुपपत्तेः। नापि योगजन्यम्; भावनाप्रकर्षपर्यन्तजन्मनस्तस्य विशदावभासत्वेपि पूर्वानुभूतविषयस्मृतिमात्रत्वात्—न प्रामाण्यमिति—कुतः

मिति। कारणवाचिनो **योनि**शब्दस्य कथं प्रमाणवाचित्वमित्यत्राह—**ब्रह्मज्ञानेति**। उत्पादक इव ज्ञापकेऽपि **हेतु**शब्दः प्रयुज्यते तद्वद्धेतुत्वामिप्रायेण **योनि**शब्दप्रयोगसंभव इति भावः। प्रमाणान्तरवेद्यत्वाद् ब्रह्म न **शास्त्रवेद्य**मिति पूर्वपक्षे सति—**शास्त्रवेद्यत्व**मिति सिद्धान्तहेतोः साध्यविशिष्टत्वं स्यादिति शङ्कां परिहरन् पञ्चम्यन्तस्य हेतुवाचिपदस्य साध्यवाचिपदान्वयं च दर्शयति—**अत्यन्तेति**। ब्रह्मणः स्वरूपेणेन्द्रियसंबन्धो नास्ति, नच तल्लिङ्गस्य, नापि लिङ्गलिङ्गस्य चेत्यभिप्रायेणोक्तम्—**अत्यन्तातीन्द्रियत्वेनेति**। अतएवहि **प्रत्यक्षादिप्रमाणाविषयतये**त्युक्तम्। यद्वा, व्यक्तिरूपेण दृष्टत्वं, व्याप्यौपयिकं दृष्टसजातीयत्वं च नास्तीति भावः। **इन्द्रियप्रत्यक्ष**शब्दयोः करणतत्फलभूतज्ञानविवक्षया भिन्नार्थता। **शास्त्रैकप्रमाणत्वा**दिति **अब्भक्ष** इतिवदधारणगर्भः **शास्त्रयोनि**शब्द इति भावः। ततश्च प्रमाणान्तराविषयत्वं सिध्यतीति प्रमाणान्तरागोचरतया शब्देन प्रतिपादयितुं योग्यत्वात्—ब्रह्म **यतो वा इमानी**त्यादिवाक्यविशेषो बोधयतीत्युक्तं भवति। पूर्वस्मिन्सूत्रे यत्साध्यं तदेवास्मिन्सूत्रे मुखभेदेन साध्यत इत्येवकारामिप्रायः। अत्रापि **यतो वा इमानी**त्यादिवाक्यद्वारा शास्त्रं विषयः, संशयोऽप्यर्थसिद्धः, साधारणविचारद्वयमनुसन्धेयम्। **यतो वा इमानी**त्यादिवाक्यं किं ब्रह्मणि प्रमाणम्, उत नेति संशयः, तदर्थं किं ब्रह्म मानान्तरागोचरं, न वेति। तदर्थं किं सामान्यतो दृष्टमनुमानं जीवविलक्षणमवयमयति, नेति। यदाऽवगमयति तदा मानान्तरागोचरत्वात्—**यतो वा इमानी**त्यादिवाक्यं न ब्रह्म प्रतिपादयतीति—वेदान्तानां ब्रह्मणि प्रामाण्याभावात्—तद्विचारानारम्भः पूर्वपक्षे फलितः। राद्धान्ते तु—सामान्यतो दृष्टानुमानस्य जीवविलक्षणे प्रमाणत्वाभावेन—ब्रह्मणो मानान्तरागोचरत्वात्—**यतो वा इमानी**त्यादिवाक्यं ब्रह्मणि प्रमाणमिति—सर्ववेदान्तवाक्यानां तत्र प्रामाण्यात्—तद्विचारस्यारम्भणीयत्वं फलितम्। **इति शास्त्रयोनि-सूत्रार्थवर्णनम्॥**

सूत्राक्षरयोजनायां संग्रहेणोक्तमर्थमसहमानः पूर्वपक्षी चोदयति—**नन्विति**। **शास्त्रयोनित्वं** शास्त्रप्रमाणकत्वम्। प्रमाणान्तरवेद्यत्वे कथं शास्त्रयोनित्वानुपपत्तिरित्यत्राह—**अप्राप्ते तु शास्त्रमर्थवदिति**। **तु**शब्दोऽवधारणे—'स्युरेव तु पुनर्वै चेत्यवधारणवाचिन' इति हि नैघण्टुकाः, वैपम्ये वा। अवुभुत्सितग्राहित्वेनायत्नसाध्यत्वात् प्रत्यक्षस्य ज्ञाताप्रयोजनबोधकत्वं न दूषणं, शास्त्रस्य तु बुभुत्सितग्राहित्वेन यत्नसाध्यत्वात् ज्ञाताप्रयोजनबोधकत्वं दूषणं, तथा सति बह्वयौष्ण्यवायसदन्तसङ्ख्यावाक्येष्विव श्रवणादिप्रवृत्त्यनुपपत्तेः। अस्मिन् पूर्वपक्षे सिद्धान्त्येकदेशी मीमांसकश्चोदयति—**किं तर्हीति**। ईश्वरानुमाननिरासेन सिद्धान्तित्वम्, ईश्वरमात्रानभ्युपगमेनैकदेशित्वम्। **किं तर्हि** न किंचिदित्यर्थः। कथमित्यत्राह—**न तावदिति**। सर्वस्यापि प्रत्यक्षस्यासामर्थ्यं दर्शयितुं तस्य द्वैविध्यमाह—**तद्धीति**। प्रथमस्यापि द्वैविध्यमाह—**इन्द्रिय-संभवमिति। आन्तरसंभवं चेति आन्तर**शब्देन मनो विवक्षितम्। प्रथमेऽनुपपत्तिमाह—**बाह्येन्द्रियाणीति**। देशसंनिकर्षं विशिषता **विद्यमान**शब्देन कालसंनिकर्षश्च सिद्धः। **योग्य**शब्देन स्वभावसन्निकर्ष उक्तः। अनेन धर्मोधर्मादिव्यावृत्तिः। **स्व**शब्देन चक्षुरादिकं प्रति शब्दादिव्यावृत्तिः। यद्वा, स्वविषयशब्देनैवातीन्द्रियस्येन्द्रियान्तरविषयस्य च व्यवच्छेदः। **योग्य**शब्देन तु तत्तदिन्द्रियप्रतिनियतरूपादिजातीयेऽप्यनुद्भवादिवशादयोग्यस्य व्यवच्छेदः। द्वितीयं प्रतिवक्ति—**नापीति। मनश्च** न तद्विषयबोधजनकमित्यर्थः। **आन्तरसुखदुःखा**दीत्यत्रान्तर**शब्द आत्मतद्धर्मपरः; तद्ग्राहित्वादेव हि मनसोऽप्यान्तरत्वम्। सुखदुःखादी**त्यान्तरशब्दविवरणम्। **आदि**शब्देनेच्छाद्वेषादेरात्मनश्च संग्रहः। **व्यतिरिक्ते**त्यनेन रूपादीनां **बहिष्ट्व**मेवेत्युपपादितम्। योगजन्यस्यानुपपत्तिं दर्शयितुमाह—**नापि योगेति**। योगिप्रत्यक्षं—किं पूर्वानुभूतानधिकविषयं प्रमाणम्, उत अनुभूताधिकविषयम्—इति विकल्पमभिप्रेत्यानधिकविषयत्वे दूषणमाह—**भावनेति**। अनधिकविषयतया **स्मृतिमात्रत्वाच्च प्रमाणत्वमिति** प्रमाणावान्तरविशेषत्वं दूरोत्सारितमित्यर्थः। अनधिकविषयत्वमुपपादयति—

प्रत्यक्षता; तदतिरिक्तविषयत्वे कारणाभावात् । तथा सति तस्य भ्रमरूपता । नाप्यनुमानं विशेषतो दृष्टं, सामान्यतो दृष्टं वा । अतीन्द्रिये वस्तुनि संबन्धावधारणविरहात्—न विशेषतो दृष्टम् । समस्तवस्तुसाक्षात्कारतन्निर्माणसमर्थपुरुषविशेषनियतं सामान्यतो दृष्टमिति न लिङ्गमुपलभ्यते । ननुच—जगतः कार्यत्वं तदुपादानोपकरणसंप्रदानप्रयोजनाभिज्ञकर्तृकत्वव्याप्तम्, अचेतनारब्धत्वं जगतश्चैकचेतनाधीनत्वेन व्याप्तं, सर्वं हि घटादिकार्यं तदुपादानोपकरणसंप्रदानप्रयोजनाभिज्ञकर्तृकं दृष्टम, अचेतनारब्धमरोगं स्वशरीरमेकचेतनाधीनं च, सावयवत्वेन जगतः कार्यत्वम; उच्यते—किमिदमेकचेतनाधीनत्वं, न तावत्तदायत्तोत्पत्तिस्थितित्वं; दृष्टान्तो हि साध्यविकलः स्यात् । न ह्यरोगं स्वशरीरमेकचेतनायत्तोत्पत्तिस्थिति; तच्छरीरस्य भोक्तृणां भार्यादिसर्वचेतनानामदृष्टजन्यत्वात्तदुत्पत्तिस्थित्योः । किंच—शरीरावयविनः स्वावयवसमवेततारूपा स्थितिरवयवसंश्लेषविशेषव्यतिरेकेण न चेतनमपेक्षते । प्राणनलक्षणा तु स्थितिः पक्षत्वाभिमते स्थितिजलधिमहीधरादौ न संभवतीति—पक्षसपक्षानुगतामेकरूपां स्थितिं नोपलभामहे । तदायत्तप्रवृत्तित्वं तदधीनत्वमिति चेन्; अनेकचेतनसाध्येषु गुरुतररथशिलामहीधरादिषु व्यभिचारः । चेतनमात्राधीनत्वे—सिद्धसाध्यता । किंच—उभयवादिसिद्धानां जीवानामेव लाघवेन कर्तृत्वाभ्युपगमो युक्तः । न च जीवानामुपादानाद्यनभिज्ञतया कर्तृत्वासंभवः; सर्वेषामेव चेतनानां पृथिव्याद्युपादानयागाद्युपकरणसाक्षात्कारसामर्थ्यात्, यथा—इदानीं पृथिव्यादयो, यागादयश्च प्रत्यक्षमीक्ष्यन्ते ।

तदतिरिक्तविषयत्वे कारणाभावादिति । कारणमिन्द्रियसंबन्धः, प्रमितिकारणाभावान्न प्रामाण्यमित्यर्थः । अधिकविषयत्वे दूषणमाह—**तथा सतीति** । इन्द्रियसंबन्धाभावेऽप्यनुभूताधिकविषयत्वे तस्य दोषमूलत्वेन भ्रान्तित्वमेवेत्यर्थः । द्विविधानुमानागोचरत्वमाह—**नापीत्यादिना । नियतं** व्याप्तम् । सिद्धान्तिच्छायया चोदयन्तं वादिनं पूर्वपक्ष्येकदेशी चोदयति—**ननु चेति** । नैयायिकैकदेशिभिरुक्तानुमानवक्तृत्वात्-पूर्वपक्ष्येकदेशित्वम् । **संप्रदानं** भोक्ता, **प्रयोजनं** विनियोगः । •एककर्तृकत्वसिद्ध्यर्थमनुमानान्तरमाह—**अचेतनेति** । उपादानाद्यभिज्ञकर्तृकत्वे दृष्टान्तमाह—**सर्वं हीति** । एकचेतनाधीनत्वे च दृष्टान्तमाह—**अचेतनेति** । रुग्णपरशरीरव्यावृत्त्यर्थं**अरोग-स्व**शब्दौ । कार्यत्वे सिद्धेष्वुपादानाद्यभिज्ञकर्तृकत्वसिद्धिरित्यत्राह—**सावयवत्वेनेति** । अनेनाचेतनारब्धत्वहेतोश्चासिद्धिशङ्कापरिहारोऽपि फलितः ॥

एवं पूर्वपक्ष्येकदेशिनोक्तमर्थं सिद्धान्त्येकदेशी दूषयति—**उच्यत इत्यादिना** । बुद्धिस्थत्वात्पाश्चात्यमनुमानं दूषयति—**किमिदमिति** । एकचेतनाधीनत्वं नाम—किं तदायत्तोत्पत्तिस्थितित्वम्, उत तदायत्ततत्प्रवृत्तित्वम्—इति विकल्प्य, प्रथमेऽपि तदायत्तोत्पत्तिस्थितित्वं नाम—किं तदिच्छाधीनोत्पत्तिस्थितित्वम्, उत तददृष्टाधीनोत्पत्तिस्थितित्वम्—इति विकल्पोऽभिप्रेतः । तेषां विकल्पानां क्षेपार्थः **किंशब्दः** । तत्र तदिच्छाधीनोत्पत्तिस्थितित्वं न दृष्टमिति—साध्यवैकल्यदूषणं प्रसिद्धमिति बुद्ध्वा द्वितीयं शिरो दूषयति—**दृष्टान्तो हीति** । साध्यविकलत्वं विवृणोति—**न हीति** । कुत इत्यत्राह—**तच्छरीरस्येति** । यद्वा, **न तावदि**त्यादिग्रन्थस्तद्विच्छाधीनोत्पत्तिस्थितित्व-तददृष्टाधीनोत्पत्तिस्थितित्वयोः साधारणः, तत्रेच्छाधीनत्वपक्षे साध्यवैकल्यं स्फुटमिति तददृष्टाधीनत्वपक्षे साध्यवैकल्यं विवृणोति—**नं हीति** । उत्पत्तिस्थिती हि सह दूषिते, अथ स्थितिं पृथग्विकल्प्य दूषयितुमाह—**किंचेति । स्वावयवसमवेततारूपा स्थितिरि**त्युक्तिर्वैशेषिकादिमतानुसारेण । **न चेतनमपेक्षत इति** । चेतनापेक्षा हि स्वरूपतो वा स्यात्, अदृष्टद्वारेण वा, इच्छाद्वारेण वा । तत्र स्वरूपमात्रमकिंचित्करं; तत्सद्भावेऽपि विनाशदर्शनात् । अदृष्टाधीनत्वे प्रागेवोत्तरं दत्तमिति—इच्छाधीनत्वपक्षोऽनेन दूषितः । चेतनेच्छां नापेक्षत इत्यर्थः । आविनाशकालादशिथिलत्वलक्षणा **स्थिति**रप्यनेन दत्तोत्तरेत्यभिप्रायेण तदनुक्तिः । अथोक्तप्रकारविकल्पदूषणनिरस्तमपि शिरोऽन्तरं दूषणान्तरसद्भावादुपादाय दूषयति—**प्राणनेति । प्राणनलक्षणा** पञ्चवृत्तिप्राणसहितत्वलक्षणा । **नोपलभामह इति** । कालात्ययापदेश इत्यर्थः । तदायत्तप्रवृत्तित्वमेकचेतनाधीनत्वमिति पक्षं शङ्कते—**तद्राय-त्तेति** । अचेतनारब्धत्वहेतोरनैकान्त्यमाह—**अनेकेति । अनेकचेतनसाध्येषु** अनेकचेतनप्रवर्त्येष्वित्यर्थः । चेतनैकत्वाविवक्षायां सिद्धसाध्यत्वमाह—**चेतनमात्रेति** ॥

एवमेकचेतनाधीनत्वं व्युदस्तं, कार्यत्वहेतोर्लाघवतर्कमुखेन सिद्धसाध्यतामाह—**किंचेति । उभयवादिसिद्धानामिति** लाघवस्य हेतुरुक्तः । 'क्लृप्तकल्प्यविरोधि तु युक्तः क्लृप्तपरिग्रहे' इति ह्याहुः । संभवन्त्यां गतौ हि लाघवतर्कः, गत्यन्तरासंभवे लधिककल्पनं न दोषायेत्यत्राह—**न चेति** । कुत इत्यत्राह—**सर्वेषामिति** । पूर्वकाले चेतनानां साक्षात्कारसामर्थ्यं दृश्यमाननीत्योपपादयति—**यथेति । इदानीमिति** । एवं पूर्वकालेऽपीति भावः । धर्माधर्मसाक्षात्काराभावात्कर्तृत्वासं-

उपकरणभूतयागादिशक्तिरूपापूर्वादिशब्दवाच्यादृष्टसाक्षात्काराभावेपि चेतनानां न कर्तृत्वानुपपत्तिः; तत्साक्षात्कारानपेक्षणात्कार्यारम्भस्य। शक्तिमत्साक्षात्कार एव हि कार्यारम्भोपयोगी। शक्तेस्तु ज्ञानिमात्रमेवोपयुज्यते, न साक्षात्कारः। नहि कूलालादयः कार्योपकरणभूतदण्डचक्रादिवत्तच्छक्तिमपि साक्षात्कृत्य घटमणिकादि कार्यमारभन्ते, इह तु चेतनानामागमावगतयागादिशक्तिविशेषाणां कार्यारम्भोनानुपपन्नः। किंच—यच्छक्यक्रियं, शक्योपादानादिविज्ञानं च तदेव तदभिज्ञकर्तृकं दृष्टं, महीमहीधरमहार्णवादि त्वशक्यक्रियमशक्योपादानादिविज्ञानं चेति—न चेतनकर्तृकम्। अतो घटमणिकादिसजातीयशक्यक्रियशक्योपादानादिविज्ञानवस्तुगतमेव कार्यत्वं बुद्धिमत्कर्तृपूर्वकत्वसाधने प्रभवति। किंच—घटादिकार्यमनीश्वरेणाल्पज्ञानशक्तिना सशरीरेण परिग्रहवताऽनाप्तकामेन निर्मितं दृष्टमिति—तथाविधमेव चेतनं कर्तारं साधयन्नयं कार्यत्वहेतुः सिषाधयिषितपुरुषसार्वज्ञ्यसर्वैश्वर्यादिविपरीतसाधनाद्विरुद्धः स्यात्। न चैतावता सर्वानुमानोच्छेदप्रसङ्गः; लिङ्गिनि प्रमाणान्तरगोचरे लिङ्गवलोपस्थापिता विपरीतविशेषास्तत्प्रमाणप्रतिहतगतयो हि निवर्तन्ते, इह तु सकलेतरप्रमाणाविषये लिङ्गिनि निखिलनिर्माणचतुरेऽन्वयव्यतिरेकावगताविनाभावनियमा धर्माः सर्व एवाविशेषेण प्रसज्यन्ते, निवर्तकप्रमाणाभावात्तथैवावतिष्ठन्ते, अत आगमादृते कथमीश्वरः सेत्स्यति। अत्राहुः—सावयवत्वादेव जगतः कार्यत्वं न प्रत्याख्यातुं शक्यते। भवन्ति च प्रयोगाः—विवादाध्यासितं भूभूधरादि कार्यं; सावयवत्वात्—घटादिवत्। तथा—विवादाध्यासितमवनिजलधिमहीधरादि कार्यं; महत्त्वे सति क्रियावत्त्वात्—घटवत्।

भवमाशङ्क्याह—**उपकरणेति। यागादिशक्तिरूपेति।** यागादिजन्यस्वात्मातिशयरूपेत्यर्थः। कुत इत्यत्राह—**तत्साक्षात्कारेति।** तर्हि घटादिनिर्माणे मृदादिसाक्षात्कारनियमः कथमित्यत्राह—**शक्तिमदिति। शक्तिमच्छब्देन** शक्तिसंबन्ध्युच्यते। जन्यजनकभावस्य च संबन्धविशेषरूपत्वात्—शक्तिरूपादृष्टजनकयागादिषु **शक्तिमच्छब्दप्रयोगः**। शक्तेरपि अपेक्षितत्वसाम्यात्—तत्साक्षात्कारोऽपेक्षितः; अन्यथाऽनवगतवस्तुशक्तयोऽपि पुरुषास्तैस्तत्कार्यं कुर्युरित्यत्राह—**शक्तेस्त्विति। तुशब्दः** शक्तिमत इव शक्तेरपि ज्ञातव्येऽपि विशेषद्योतनार्थः। शक्तिसाक्षात्कारानुपयोगमुपपादयति—**न हीति।** शक्तिसाक्षात्कारानपेक्षत्वेऽपि शक्तिज्ञानमात्रमपेक्षितं, तच्च दण्डचक्रादिष्वन्वयव्यतिरेकवशात्सिध्यति, यागादौ तु कथमित्यत्राह—**इहत्विति॥**

एवं सिद्धसाधनत्वमुक्तम्, अथ कार्यत्वहेतोरुपाधिद्वयेन सोपाधिकत्वमाह—**किंचेति।** साधनाव्यापकत्वमाह—**महीधरेति।** साध्यसमव्यापत्वमाह—**अत इति।** सोपाधिकत्वे सति साध्येन हेतोर्व्याप्त्यासिद्धिः स्यादित्युपाधेर्दूषणत्वम्। अदृष्टवज्जीवकर्तृकत्वव्यावृत्त्यर्थं **बुद्धिमत्कर्तृपूर्वकत्वसाधन** इत्युक्तम्। अथ कार्यत्वहेतोर्विशेषविरुद्धत्वमाह—**किंचेति। अनीश्वरेण** कर्मवश्येन। **परिग्रहवता** उपकरणवतेत्यर्थः। सर्वानुमानोच्छेदमाशङ्क्याह—**न चेति।** कथमित्यत्राह—**लिङ्गिनीति।** पक्षेऽपि तथा स्यादित्यत्राह—**इह त्विति। तुशब्दो**ऽमिप्रेतं वैषम्यमाह—**निवर्तकेति।** सिद्धान्त्येकदेशिमतमुपसंहरति—**अत इति।** सिध्यति चैतन्नागमादृते मानमित्यर्थः। **अतः** सिद्धसाधनत्व-सोपाधिकत्व-विरुद्धत्वैर्दूषितत्वादित्यर्थः। **इत्येतदधिकरणपूर्वपक्षे सामान्यतः मीमांसकेन ब्रह्मणः प्रत्यक्षानुमानावगम्यत्वनिरासः॥**

अथ साक्षात्पूर्वपक्षिणं प्रस्तौति—**अत्राहुरिति।** कार्यत्वहेतोः स्वरूपासिद्धिमाशङ्क्य व्युदस्यति—**सावयवत्वादेवेति। सावयवत्वादेवेति** पूर्वं प्रस्तुतादेवेत्यर्थः। अनेन हेत्वन्तरसद्भावोऽपि सूचितः। एवं कण्ठोक्त्यभिप्रायेण च सिद्धान्हेदून् प्रयोगतो विवृणोति—**भवन्तीति।** विवादाध्यासितपदविवरणं **भूभूधरादि**पदम्। **आदि**शब्दोपात्तव्यक्तिसंग्राहकं **विवादाध्यासित**पदम्। यद्वा, पक्षीकृतेष्वेव संप्रतिपन्नाशव्यवच्छेदाय **विवादाध्यासित**शब्दः। सन्ति हि खातपूरणनिष्पाद्याः पृथिव्यंशाः, सगरसुतादिनिष्पाद्याः समुद्रांशाः, अब्रादिनिष्पाद्याः पर्वतादयश्च। प्रलयेऽपि जलधेरवस्थानात्, सर्वाभावेऽपि सृष्टशरीरावस्थानाच्च—तयोरकार्यत्वशङ्काद्योतनाय प्रतिज्ञावाक्यावतैनेन **जलधितनु**शब्दोपादानम्। द्वितीयतृतीयप्रयोगयोर्मध्ये **महत्त्व**पदेन परमाणुव्यावृत्तिः। **क्रियावत्त्व-मूर्तत्व**शब्दाभ्यां गगनादिव्यावृत्तिः। **अवनिमहीधरशब्दमध्ये जलधिशब्दनिवेशः**—तद्वत्तयोरपि कम्पसद्भावज्ञापनार्थः। प्रसिद्धो ह्युत्पातादौ भूभूधरकम्पः। ननु—तनुपक्षीकारो न युक्तः; अस्मदादिशरीरे सिद्धसाधनात्, ईश्वरशरीरे लाश्रयासिद्धेः, नैवं, तनोर्विशेषतः पक्षीकारनिर्बन्धाभावात्, **तदुपादानं तु खपक्षसंप्रतिपन्नेश्वरशरीरस्यापि** कार्यताज्ञापनार्थम्। यद्वा, **सावयवत्वादेवे**त्यादेरयमाशयः—न

तनुभुवनादि कार्यं; महत्त्वे सति मूर्तत्वात्—घटवदिति । सावयवेषु द्रव्येष्विदमेव क्रियते नेतरदिति—कार्यत्वस्य नियामकं सावयवत्वातिरेकि रूपान्तरं नोपलभामहे । कार्यत्वप्रतिनियतं शक्यक्रियत्वं, शक्योपादानादिविज्ञानत्वं चोपलभ्यत इति—चेन्न; कार्यत्वेनानुमितेऽपि विषये ज्ञानशक्ती कार्यानुमेये इति—अन्यत्रापि सावयवत्वादिना कार्यत्वं ज्ञातमिति—ते च प्रतिपन्ने एवेति—न कश्चिद्विशेषः । तथा हि—घटमणिकादिषु कृतेषु कार्यत्वदर्शनानुमितकर्तृगततन्निर्माणशक्तिज्ञानः पुरुषोऽदृष्टपूर्वं विचित्रसंनिवेशं नरेन्द्रभवनमालोक्यावयवसंनिवेशविशेषेण तस्य कार्यत्वं निश्चित्य तदानीमेव कर्तुस्तज्ज्ञानशक्तिवैचित्र्यमनुमिनोति । अतस्तनुभुवनादेः कार्यत्वे सिद्धे सर्वसाक्षात्कारतन्निर्माणादिनिपुणः कश्चित्पुरुषविशेषः सिध्यत्येव । किंच—सर्वचेतनानां धर्माधर्मनिमित्तेऽपि सुखदुःखोपभोगे चेतनानधिष्ठितयोस्तयोरचेतनयोः फलहेतुत्वानुपपत्तेः—सर्वकर्मानुगुणसर्वफलप्रदानचतुरः कश्चिदास्थेयः; वर्धकिनानधिष्ठितस्य वास्यादेरचेतनस्य देशकालाद्यनेकपरिकरसंनिधानेऽपि यूपादिनिर्माणसाधनत्वादर्शनात् । बीजाङ्कुरादेः पक्षान्तर्भावेण तैर्व्यभिचारापादनं श्रोत्रियवेतालानामनभिज्ञताविजृम्भितम् । तत एव सुखादिभिर्व्यभिचार-

---

सावयवत्वादुत्पत्तिमत्त्वं प्रसाध्य ततः सकर्तृकत्वं साध्यते, अपितु सावयवत्वेनैव कृतिसाध्यत्वरूपं कार्यत्वं साध्यते, कृतिश्च न निराश्रयेति—तदाश्रयः कर्ता सामान्यतः सिध्यतीति ।'ननु—एवं तर्हि कार्यत्वात्सकर्तृकत्वे साध्ये हेतोः साध्याविशिष्टता स्यात् । न कृतिसाध्यत्वं हेतुः; उपादानाद्यभिज्ञसमर्थकर्तृकत्वं साध्यमिति वैषम्यात्, अत एव ह्युत्तरत्र **क्रियत** इत्युक्तं, नोत्पद्यत इति, **कार्यत्वं निश्चित्य तदानीमेव कर्तुस्तज्ज्ञानशक्तिवैचित्र्यमनुमिनोती**त्यादि च । एवंच कृतिसाध्यत्वलक्षणे साध्ये शरीरस्यापि विवादास्पदत्वात्पक्षतोपपत्तिः । अथ सोपाधिकत्वं सामान्येन प्रतिक्षिपति—**सावयवेष्विति । सावयवत्व**मुपलक्षणम् । महत्त्वे सति क्रियावत्त्वं, महत्त्वे सति मूर्तत्वं च सावयवत्वसमानाश्रयं तत्समव्याप्तमिति—तयोरप्युपाधिपरिहारसिद्धिः । **रूपान्तरम्** आकारान्तरम् । उपाधिं शङ्कते—**कार्यत्वेति** । परिहरति—**नेति** । कार्यत्वेनानुमते सपक्षे, अन्यत्र पक्षे सपक्षेऽपि घटादौ कार्यत्वानुमेये ज्ञानशक्तौ—तद्वत् पक्षेऽपि कार्यत्वस्य प्रतिपन्नत्वात्—ज्ञानशक्ती अनुमीयेते इति—नाशक्यक्रियत्वमशक्यज्ञानत्वं चेत्यर्थः । तथैव दर्शयति—**तथा हीति** । किं तदकर्तुरपि शक्यक्रियत्वं शक्योपादानादिज्ञानत्वमुपाधिः, उत तत्तत्कर्तुः शक्यक्रियत्वं शक्योपादानादिज्ञानत्वम् । प्रथमे कल्पे—सपक्षानुयायित्वाभावान्नोपाधित्वम् । द्वितीये कल्पे—पक्षेऽपि विद्यमानत्वान्नोपाधित्वम् । सर्वसपक्षानुयायी पक्षेष्वविद्यमानो ह्युपाधिरित्यभिप्रायः । **कर्तुस्तज्ज्ञानशक्तिवैचित्र्य**मित्यनेनाभिप्रेतोऽयं विकल्पः । ततः किमित्यत्राह—**अत इति । अतः** सावयवत्वादिहेतोर्निरुपाधिकत्वादित्यर्थः । एवं सावयवत्वात्कृतिसाध्यत्वरूपे कार्यत्वे साध्ये शक्यक्रियत्वादिक उपाधिः परिहृतः । अनेनोत्पत्तिमत्त्वात्सकर्तृकत्वे साध्ये—उत्पत्तिमत्त्वहेतुरपि निरुपाधिको भवति, सावयवत्वादुत्पत्तिमत्त्वे साध्ये तु उपाधेर्दूर्वादौ व्यभिचारश्च सिद्धः । नहि दूर्वादिरुत्पद्यमानोऽस्मदादेः शक्यक्रियः ॥

सिद्धसाधनलनिरासार्थं, अनुमानान्तरप्रदर्शनार्थं चाह—**किंचेति । धर्माधर्मनिमित्तेऽपीति** । सिद्धसाधनलशङ्कासूचनम् । **अनधिष्ठितयोरनुपपत्ते**रित्यन्वयव्यासिस्थैर्ये व्यतिरेकव्याप्युक्तिः । दृष्टान्तमाह—**वर्धकिनेति** । वास्यादेर्यूपाद्यकरणत्वस्य चेतनव्यतिरिक्तसहकार्यन्तराभावप्रयुक्तत्वशङ्काव्यावृत्त्यर्थं **देशकालाद्यनेकपरिकरसन्निधानेऽपी**त्युक्तम् । **धर्माधर्मौ** स्वसाक्षात्कारिचेतनविशेषाधिष्ठितावेव कार्यकरौ; अचेतनत्वात्—वास्यादिवदित्यनुमानशरीरम् । जीवैर्धर्माधर्मसाक्षात्कारतत्पूर्वकतदधिष्ठानायोगात्—जीवविलक्षणसिद्धिः । अनधिष्ठितस्य कार्यकरत्वायोगात्, जीवैः साक्षात्कारतत्पूर्वकाधिष्ठानायोगाच्च—सिद्धसाधनं च परिहृतम् । कर्तुरभावे कार्यानुपपत्तिप्रसङ्गरूपस्य विपक्षे बाधकतर्कस्य पुरुषसुखादिप्रयोजकादृष्टेन कार्योत्पत्त्युपपत्तिरिति याऽन्यथासिद्धिः साध्यनैनैव परिहृता भवति । अचेतनस्याप्यनधिष्ठितस्य बीजादेरङ्कुरोत्पादकत्वदर्शनाद्व्यभिचार इति शङ्कां परिहरति—**बीजाङ्कुरेति** । कार्यत्वहेतोरङ्कुरादौ व्यभिचारशङ्कापरिहारश्चाङ्कुरशब्दोपादानेन फलितः । चेतनानभिसंहितपुलकाद्युत्पादकैश्चेतनानधिष्ठितैः स्वयमचेतनैः सुखादिभिरचेतनहेतोर्व्यभिचारमाशङ्क्य परिहरति—**तत एवेति । आदि**शब्देन दुःखादिकं चेतनानधिष्ठितं, सुखाद्युत्पादकं मनःप्रभृति च विवक्षितम् । एतेन खेच्छामन्तरेणोत्पाद्यमानैः सुखदुःखविशेषैः, तत्कार्यैश्च पुलकाङ्गकम्पादिभिः कार्यत्वहेतोर्व्यभिचारश्च परिहृतो भवति । लाघवन्या-

---

१ खेतरसमस्तसंसारिचेतनसुखदुःखोपभोगसाधनत्वात् इत्यधिकम् का. मु. पु. ।

वचनमपि तथैव। न च लाघवेनोभयवादिसंप्रतिपन्नक्षेत्रज्ञानामेवेदृशमधिष्ठातृत्वकल्पनं युक्तम्; तेषां सूक्ष्मव्यवहितविप्रकृष्टदर्शनाशक्तिनिश्चयात्। दर्शनानुगुणैव हि सर्वत्र शक्तिकल्पना। नच क्षेत्रज्ञवदीश्वरस्याशक्तिनिश्चयोऽस्ति। अतः प्रमाणान्तरतो न तत्सिद्ध्यनुपपत्तिः। समर्थकर्तृपूर्वकत्वनियतकार्यत्वहेतुना सिध्यन्स्वाभाविकसर्वार्थसाक्षात्कारतन्नियमनशक्तिसंपन्न एव सिध्यति। यत्तु—अनैश्वर्याद्यापादनेन धर्मविशेषविपरीतसाधनत्वमुन्नीतं—तदनुमानवृत्तानभिज्ञत्वनिबन्धनं; सपक्षे सहदृष्टानां सर्वेषां, कार्यस्याहेतुभूतानां च धर्माणां लिङ्गिन्यप्राप्तेः। एतदुक्तं भवति—केनचित्किंचित्कियमाणं स्वोत्पत्तये कर्तुः स्वनिर्माणसामर्थ्यं स्वोपादानोपकरणज्ञानं चापेक्षते, नत्वन्यासामर्थ्यमन्याज्ञानं च; हेतुत्वाभावात्। स्वनिर्माणसामर्थ्यस्वोपादानोपकरणज्ञानाभ्यामेव स्वोत्पत्तावुपपन्नायां संबन्धितया दर्शनमात्रेणाकिंचित्करस्यार्थान्तराज्ञानादेर्हेतुत्वकल्पनायोगादिति। किंच—क्रियमाणवस्तुव्यतिरिक्तार्थाज्ञानादिकं किं सर्वविषयं क्रियोपयोगि, उत कतिपयविषयम्। न तावत्सर्वविषयम्; न हि कुलालादिः क्रियमाणव्यतिरिक्तं किमपि न विजानाति। नापि कतिपयविषयम्; सर्वेषु कर्तृषु तत्तदज्ञानाशक्त्यनियमेन सर्वेषामज्ञानादीनां व्यभिचारात्। अतः कार्यत्वस्यासाधकानामनीश्वरत्वादीनां लिङ्गिन्यप्राप्तेरिति—न विपरीतसाधनत्वम्। कुलालादीनां दण्डचक्राद्यधिष्ठानं शरीरद्वारेणैव दृष्टमिति—जगदुपादानोपकरणाधिष्ठानमीश्वरस्यानुपपन्नमिति—चेन्नः संकल्पमात्रेणैव परशरीरगतभूतवेतालगरुडाद्यपगमविनाशदर्शनात्। कथमशरीरस्येश्वरस्य परप्रवर्तनरूपः संकल्प इति—चेन्, न शरीरापेक्षः संकल्पः; शरीरस्य संकल्प-

---

येन हेतोरन्यथासिद्धेः सिद्धसाधनत्वमाशङ्क्य परिहरति—**न चेति**। कुत इत्याकाङ्क्षायामीदृशशब्दाभिप्रेतं हेतुं विवृणोति—**तेषामिति**। एकेन्द्रियकल्पनस्य लाघवेऽप्येकेन्द्रियस्य शब्दादिसकलविषयग्रहणाशक्तेर्ह्यनेकेन्द्रियकल्पनं, तस्माल्लाघवार्थमशक्तस्य कार्यकरत्वकल्पनमयुक्तमिति भावः। तदेवोपपादयति—**दर्शनेति**। उपपन्नमेव हि कल्पनीयम्। नच जीवानां सूक्ष्मव्यवहितादिदर्शनशक्तिर्दृष्टेति भावः। शक्तिमत्साक्षात्कार एवापेक्षितो, नतु शक्तिसाक्षात्कार इतीदमपि प्रत्युक्तं भवति—**सूक्ष्मव्यवहितेत्यादिना**। शक्तिमतामपि परमाण्वादीनां क्षेत्रज्ञेन तत्साक्षात्कारासिद्धेरीश्वरे न तथाऽनुपपत्तिरित्याह—**न चेति**। अवान्तरानुमानैरीश्वरसिद्धिं निगमयति—**अत इति**। व्याप्तिबलात्कार्यानुगुणज्ञानशक्तिमान् कर्ता सिध्यतु, तस्य कथं क्षेत्रज्ञवैलक्षण्यं, ज्ञानं हि देहेन्द्रियादिसापेक्षमिति शङ्कायां पक्षधर्मतावलात्सिद्धमर्थमाह—**समर्थेति**। अस्माभिर्विकल्पे कर्मानुगुणपरिमितज्ञानशक्तिमत्त्वं स्यादिति तद्व्युदासार्थः **स्वाभाविकसर्वार्थसाक्षात्कार**शब्दः॥

अथ कार्यत्वहेतोर्विरुद्धत्वं व्युदस्यति—**यत्त्वित्यादिना**। कथमित्यत्राह—**सपक्ष इति**। किं सहदर्शनमात्राच्छरीरादिप्राप्तिः, उत हेतुत्वात्। नाद्यः; अतिप्रसङ्गात्। न द्वितीयः; हेतुत्वासिद्धेरित्यभिप्रायः। कार्यस्याहेतुभूतानामिति व्याख्यभावोऽप्यभिप्रेतः। ननु—सर्वसपक्षेषु सहदृष्टत्वात्कार्यहेतुत्वं च कल्प्यं, तथा सति कथं कतिपयप्राप्तिः, कतिपयाप्राप्तिश्चोच्यत इत्यत्राह—**एतदुक्तमिति**। विशेषविरोधं परिहर्तुमपेक्षितानपेक्षितांशविवेकमाह—**केनचिदिति**। सपक्षे सहदृष्टत्वाज्ज्ञानादेरपि हेतुत्वं कल्प्यतामित्यत्राह—**स्वनिर्माणेति। अकिंचित्करस्येति**। अनन्यथासिद्धान्वयव्यतिरेकाभ्यां हि हेतुत्वनिश्चयः, तत्र ज्ञानशक्तिनिर्वर्त्याकिंचित्कारादधिकः कश्चित्तदन्याज्ञानासामर्थ्यनिवर्त्यः किंचित्कारो दृष्टश्चेत्सादनन्यथासिद्धिः। न चाधिकः किंचित्कारो दृष्टः, न च कल्प्यः; अज्ञानासामर्थ्यहेतुव्यतिरेके कार्यनिवृत्त्यभावात्। स्वविषयसामर्थ्योपादानादिज्ञानाभ्यां विना यथा कार्यानुदयः, तथान्यासामर्थ्याज्ञानाभ्यां विना कार्यानुदयो न दृष्टः, अतो न तस्य हेतुत्वं कल्प्यम्। नहि सति भावमात्रं हेतुत्वं, किंतु सत्येव भाव इति भावः। **अकिंचित्करत्वमेव** विकल्पमुखेनोपपादयति—**किंचेति। सर्वेष्विति**। नहि कुड्यादिनिर्माणानुगुणज्ञानसामर्थ्याभावो घटनिष्पत्तिहेतुः; तदनुगुणज्ञानसामर्थ्यवतोऽपि घटादिनिष्पादकत्वदर्शनादित्यर्थः। यत्तु—सपक्षे सहदृष्टत्वेन लिङ्गिनि प्राप्तिविपरीतविशेषाणां धर्मिग्राहकप्रमाणप्रतिहतानां निवृत्तिः, न इतरेषाम्—इति, इदमपि **कार्यत्वस्यासाधकाना**मित्यनेन प्रत्युक्तं; साध्यानुपयोगित्वेनान्यथासिद्धानां सहदृष्टानामपि धर्माणां व्यतिरेकाभावेन व्याप्तिशून्यत्वादप्राप्तेः॥

सहदृष्टेष्वपि कार्यानुपयोगिनां प्राप्तिर्न स्यात्; शरीरं हि कार्योपयोगीति शङ्कते—**कुलालादीनामिति**। परिहरति—**नेति**। कथमित्यत्राह—**सङ्कल्पेति**। पुनः शङ्कते—**कथमिति**। परिहरति—**नेति**। क्व हेतुरित्यत्राह—**मन**

हेतुत्वाभावात्। मन एव हि संकल्पहेतुः। तदभ्युपगतमीश्वरेऽपि; कार्यत्वेनैव ज्ञानशक्तिवन्मनसोपि प्राप्तत्वात्। मानसः संकल्पः सशरीरस्यैव; सशरीरस्यैव समनस्कत्वादिति—चेन्न; मनसो नित्यत्वेन देहापगमेपि मनसः सद्भावेनानैकान्तिकत्वात्। अतो विचित्रावयवसंनिवेशविशेषतनुभुवनादिकार्यनिर्माणे पुण्यपापपरवशः परिमितशक्तिज्ञानः क्षेत्रज्ञो न प्रभवतीति निखिलभुवननिर्माणचतुरोऽचिन्त्यापरिमितज्ञानशक्त्यैश्वर्योऽशरीरः संकल्पमात्रसाधनपरिनिष्पन्नानन्तविस्तारविचित्ररचनप्रपञ्चः पुरुषविशेष ईश्वरोऽनुमानेन सिध्यति, अतः प्रमाणान्तरावसेयत्वाद्ब्रह्मणः—नैतद्वाक्यं ब्रह्म प्रतिपादयति। किंच—अत्यन्तभिन्नयोरेव मृद्द्रव्यकुलालयोर्निमित्तोपादानत्वदर्शनेन, आकाशादेर्निरवयवद्रव्यस्य कार्यत्वानुपपत्त्याच—नैकमेव ब्रह्म कृत्स्नस्य जगतो निमित्तमुपादानं च प्रतिपादयितुं शक्नोतीति। एवं प्राप्ते ब्रूमः—यथोक्तलक्षणं ब्रह्म जन्मादिवाक्यं बोधयत्येव। कुतः, शास्त्रैकप्रमाणकत्वाद्ब्रह्मणः। यदुक्तं—सावयवत्वादिना कार्यं सर्वं जगत्, कार्यं च—तदुचितकर्तृविशेषपूर्वकं दृष्टमिति—निखिलजगन्निर्माणतदुपादानोपकरणवेदनचतुरः कश्चिदनुमेय—इति, तदयुक्तं; महीमहार्णवादीनां कार्यत्वेप्येकदैवैकेन निर्मिता इत्यत्र प्रमाणाभावात्। न चैकस्य घटस्येव सर्वेषामेकं कार्यत्वं, येनैकदैवैकः कर्ता स्यात्; पृथग्भूतेषु कार्येषु कालभेदकर्तृभेददर्शनेन कर्तृकालैक्यनियमादर्शनात्। नच—क्षेत्रज्ञानां विचित्रजग-

---

एवेति। तत्किमस्तीत्यत्राह—**तदिति**। कुत. इत्यत्राह—**कार्यत्वेनेति**। ईश्वरस्य मनःसंबन्धोच्छिन्नैकदेशिमतेन। पुनः शङ्कते—**मानस इति**। परिहरति—**नेति। अनैकान्तिकत्वात्** व्याप्त्यभावात्, अशरीरेऽपि मनःसंबन्धस्य विद्यमानत्वाद्व्याप्त्यनैकान्त्यम्। मनसो नित्यत्वेऽपि चेतनस्य कार्यकरत्वे शरीरसंबन्धसापेक्षत्वमस्ति; मनसि नित्ये सत्यपि मुक्तात्मनः कार्यकरत्वाभावात्। नहि मुक्तात्मनो बुद्धिसुखदुःखादिकं मनो जनयतीति चोद्यमस्ति। अत्र मीमांसकं प्रति प्रतिबन्धा परिहारं हृदि निधाय, पक्षधर्मतावलं दर्शयन्नीश्वरसिद्धिं निगमयति—**अतो विचित्रावयवेति। अशरीरः, संकल्पमात्रसाधनपरिनिष्पन्नानन्तविस्तारविचित्ररचनप्रपञ्च** इत्याभ्यां पदाभ्यां प्रतिबन्धा परिहारामिप्रायो ज्ञातः। विभुद्रव्यसंयोगिनः परिस्पन्दनवतो घटादेः स्पर्शवत्त्वनियमेऽपि, विभुद्रव्यसंयोगिनः परिस्पन्दनवतोऽपि मनसो न स्पर्शवत्त्वमङ्गीक्रियते। अयं प्राभाकरं प्रति परिहारः। महिमगुणशालिनस्तैजसस्य रूपोपलम्भनियमे दृष्टेऽपि चक्षुषि रूपोपलम्भो नाङ्गीकृतः, कार्यारम्भकस्य सावयवत्वव्याप्तिः परमाणुषु भग्ना, तस्मादनेकविरोधपरिहारायैकव्याप्तिभङ्गो न्याय्यः, अतो मनसः कार्यकरत्वे शरीरसंबन्धसापेक्षत्वं भोगसाधनमनस्त्वप्रयुक्तमित्यङ्गीकार्यमिति भावः। एवं साधकान्तरसिद्धत्वाज्जगत्कारणवस्तुनि शास्त्रस्याप्रामाण्यं निगमयति—**अतः प्रमाणेति**। निमित्तोपादानैक्यस्य गगनादिसृष्टेश्चानुमानाविषयत्वेन शास्त्रस्याधिकविषयत्वाद्ब्रह्मणि प्रामाण्यमाशङ्क्य तत्र बाधकान्तरबाधितत्वाच्छास्त्राप्रामाण्यमुच्यते—**किंचेति**। निमित्तमात्रमनुवदतः शास्त्रस्यानुमानसापेक्षत्वात्—तद्विरुद्धनिमित्तोपादानैक्यं न शास्त्रं प्रतिपादयति। पक्षीकृतेषु क्षित्यादिषु द्रव्येषु सावयवत्वस्यैव कार्यत्वप्रयोजकतया—निरवयवद्रव्यस्याकार्यत्वं पूर्वमेव प्रतिपन्नमिति पश्चाच्छास्त्रं निरवयवद्रव्योत्पत्तिं न प्रतिपादयति। श्रुतिलिङ्गादिष्वपि पौर्वापर्यं हि प्राबल्यदौर्बल्यहेतुरिति भावः। पूर्वपक्षसमाप्तावितिशब्दः॥ **इत्येतदधिकरणपूर्वपक्षे नैयायिकेन ब्रह्मणोऽनुमानगम्यत्वसमर्थनम्॥**

सिद्धान्तं वक्तुमुपक्रमते—**एवं प्राप्त इति**। परमसाध्यं प्रतिजानीते—**यथोक्तेति**। आकाङ्क्षापूर्वकं हेतुमाह—**कुत इति। शास्त्रैकप्रमाणकत्वात्** शास्त्रेतरप्रमाणागोचरत्वादित्यर्थः। हेत्वसिद्धिं परिहर्तुं पूर्वपक्षमनुभाषते—**यदुक्तमिति**। दूषयति—**तदयुक्तमिति**। पक्षधर्मतावलात् क्षेत्रज्ञवैलक्षण्यं वदता किं विपुलतरकार्याणां कर्तृकालैक्यानियममन्तर्भाव्य तदुच्यते, उत विपुलत्वमात्रेण, उतातीन्द्रियोपादानादिदर्शनवशात्, अथवा शरीरानपेक्षसृष्टिवशादिति विकल्पमभिप्रेत्य, प्रथमं दूषयति—**महीति**। एकदैवैकेन निर्मितत्वाभावमुपपादयति—**न चैकस्येत्यादिना**। एकं कार्यत्वं घटादेरिव युगपदेककर्तृकत्वस्यायोग्यमिति शङ्काद्योतकमेकमिति पदम्। कार्यत्वस्यैकत्वं नाम—एकसामग्रीपूर्वकत्वं, तत्सिद्ध्यर्थमेकस्यैवेत्युक्तम्। न ह्येका व्यक्तिरनेकसामग्रीसाध्या; एककार्यावच्छिन्नस्य सर्वस्य हेतोरेकसामग्रीत्वात्। एकत्वेऽप्यनेककर्तृकगोपुरादिव्यवच्छेदार्थमेकदैवैकेत्यन्वययोग्यत्वं घटशब्देन विवक्षितम्। एकघटस्यैकं कार्यत्वं यादृशं दृश्यते तादृशं परिमितैकावयविनिष्ठं कार्यत्वमेवैकदैवैककर्तृत्वसंभावनापादकं, तच्च महीमहीधरादीनां न दृश्यत इत्यर्थः। **स्यादिति** संभावितत्वमात्रमुच्यते। न ह्येकघटस्याप्येककर्तृकत्वनियमः; अनेकैरप्येकघटनिष्पादनसंभवात्। ततः किमित्यपेक्षायां बहुषु विपुलेषु च कार्येषु तद्विपर्ययमाह—**पृथग्भूतेष्विति। पृथग्भूतेष्वित्यत्र** विपुलत्वमपि गर्भितम्; **एकघटस्यैवेति** पूर्वमुक्तेः। बहुषु, विपुलेषु

न्निर्माणशक्त्या कार्यत्वबलेन तदतिरिक्तकल्पनायामनेककल्पनानुपपत्तेश्चैक एव कर्ता भवितुमर्हति; क्षेत्रज्ञानामेवोपचितपुण्यविशेषाणां शक्तिवैचित्र्यदर्शनेन, तेषामेवातिशयितादृष्टसंभावनया च तत्तद्विलक्षणकार्यहेतुत्वसंभवात्, तदतिरिक्तात्यन्तादृष्टपुरुषकल्पनानुपपत्तेश्च। नच—युगपत्सर्वोत्पत्तिः, सर्वोच्छित्तिश्च प्रमाणपदवीमधिरोहतः; अदर्शनात्, क्रमेणैवोत्पत्तिविनाशदर्शनाच्च। कार्यत्वेन सर्वोत्पत्तिविनाशयोः कल्प्यमानयोः दर्शनानुगुण्येन कल्पनायामपि विरोधाभावाच्च। अतो बुद्धिमदेककर्तृकत्वे साध्ये—कार्यत्वस्यानैकान्त्यं, पक्षस्याप्रसिद्धविशेषणत्वं, साध्यविकलता च दृष्टान्तस्य; सर्वनिर्माणचतुरस्यैकस्याप्रसिद्धेः। बुद्धिमत्कर्तृकत्वमात्रे साध्ये—सिद्धसाधनता। सार्वज्ञ्यसर्वशक्तियुक्तस्य कस्यचिदेकस्य साधकमिदं कार्यत्वं किं युगपदुत्पद्यमानसर्ववस्तुगतम्, उत क्रमेणोत्पद्यमानसर्ववस्तुगतम्। युगपदुत्पद्य-

---

च कार्येषु कर्तृकालैक्यनियमादर्शनान्महाप्रादयोऽप्येकदैवैकेन निर्मिता इत्यत्र प्रमाणाभावः, **प्रमाणाभावात्तदयुक्तमि**त्यध्याहारेण ग्रन्थान्वयः। न च कार्यत्वमेव कर्तृकालैक्ये प्रमाणं; विकल्पासहत्वात्—किं कार्यत्वमात्रम्, उत विपुलकार्यत्वम्, उतासंभावितजीवकर्तृकं पक्षासाधारणकार्यत्वम्। प्रथमे—अनैकान्त्यम्। द्वितीये—विरुद्धत्वं; विपुलकार्येषु कालदैर्घ्यकर्तृबहुत्वदर्शनात्। यद्वा, अनैकान्त्यमेव। तृतीयेच—असाधारणानैकान्त्यमिति भावः। कार्यत्वबलेन कर्तरि कल्पनीये विपुलतरसूक्ष्मतरपक्षधर्मतावलात् क्षेत्रज्ञवैलक्षण्यं, लाघवन्यायतः कर्तुरेकत्वं च सिध्यतीति तत्राह—**न चेति। विचित्र**शब्देनासदाद्यशक्त्यर्थमतिविपुलत्वम्, अतिसूक्ष्मत्वं च विवक्षितम्। कुत इत्यत्राह—**क्षेत्रज्ञानामेवेति**। क्षेत्रज्ञातिरिक्ते कल्प्ये सति ह्यनेककल्पनादेककल्पनस्य न्याय्यत्वं, क्षेत्रज्ञानामेव कर्तृत्वोपपत्त्या तदतिरिक्तो न कल्पयितव्य इत्यर्थः। **उपचितपुण्यविशेषाणामि**ति सपक्षे शक्तिवैचित्र्योपपादनार्थमुक्तम्। **अतिशयितादृष्टसंभावनयेति** पक्षविषयमुक्तम्। 'सर्वेभ्यः कामेभ्यो ज्योतिष्टोम' इत्यादिभिः क्षिप्रादिसृष्ट्वानुगुणातिशयितादृष्टसंभावना क्षेत्रज्ञानामेव योगेन सूक्ष्मव्यवहितादिदर्शनं पराभ्युपेतम्, अस्मदादिषु देवेषु च ज्ञानशक्तिवैचित्र्यं दृश्यते। न च पक्षधर्मतावलमन्वयव्यतिरेकसिद्धान् धर्मान्निवर्तयितुमीष्टे; तस्यान्वयव्यतिरेकसिद्धधर्मप्रकर्षापकर्षमात्रहेतुत्वात्; इतरथा ज्ञानचिकीर्षयोरपि हानप्रसङ्गात्। **तदतिरिक्तेति**। 'धर्मिकल्पनातो वरं धर्मकल्पने'ति न्यायादीश्वरकल्पनाददृष्टविशेषकल्पनमेव वरमिति भावः। अचेतनत्वाच्चेतनाधिष्ठितावेव धर्माधर्मौ कार्यकरौ वास्यादिवदित्यनुपपन्नम्; ईश्वरज्ञानप्रयत्नादौ व्यभिचारेणान्यतरानैकान्त्यात्। अथ क्षेत्रज्ञस्य सर्गे शरीरसापेक्षत्वात्तस्य सर्वसंहारदशायां शरीराभावात्तदानीं शरीरानपेक्षः कर्ता जीवविलक्षणः स्यादित्यत्राह—**न चेति**। इदानीं क्रमेणोत्पत्तिविनाशौ दृश्येते, तदा तूत्पत्तिविनाशयौगपद्यकल्पनमित्यत्राह—**कार्यत्वेनेति**। अत्र **कार्यत्वं** कृतिसाध्यत्वं, तृतीया चेत्थंभावार्था। **विरोधाभावात्** व्याप्तिविरोधाभावादित्यर्थः। एवं परमतदूषणोपयुक्तार्थशिक्षा कृता, अथ फलितं दूषणं दर्शयति—**अत इति**। तदयुक्तमित्यारभ्योक्तार्थानां हेतुत्वपरोऽतःशब्दः। चलनादिषु तृणादेरिव क्रियाश्रयत्वमात्रलक्षणकर्तृत्वव्यावृत्त्यर्थो **बुद्धिमच्छब्दः**। किं बुद्धिमदेककर्तृकत्वं साध्यम्, उत सकर्तृकत्वमात्रम्। प्रथमेऽपि—किं सामान्यतो बुद्धिमदेककर्तृकत्वमात्रं साध्यम्, उत सर्वज्ञसर्वशक्त्येककर्तृकत्वमिति विकल्पमभिप्रेत्य, प्रथमे कल्पेऽनैकान्त्यम्; अनेककर्तृकरथगोपुरादिषु कार्यत्वस्य विद्यमानत्वादिति भावः। सर्वज्ञसर्वशक्तिकर्तृकत्वपक्षे दूषणमाह—**पक्षस्येति**। न ह्यग्निमत्त्वमिव सर्वज्ञसर्वशक्तिकर्तृकत्वमन्यत्र दृष्टम्। दृष्टान्तस्य साध्यविकलता; कार्येषु घटादिष्वदर्शनात्। अप्रसिद्धविशेषणत्व-साध्यवैकल्ये द्वे अप्युपपादयति—**सर्वेति। सर्वनिर्माणचतुरस्येत्युक्तत्वादिदं** दूषणद्वयं सर्वज्ञसर्वशक्तिकर्तृकत्वपक्षस्येति ज्ञायते। पूर्वस्मिन्नेव पक्षे चेत्, अप्रसिद्धविशेषणत्वं न घटते; न ह्येककर्तृकत्वमप्रसिद्धम्। सकर्तृकत्वमात्रपक्षे दूषणमाह—**बुद्धिमदिति**। सिद्धसाधनत्वं वेदान्तिना न वक्तव्यं; क्षेत्रज्ञकर्तृकत्वानभ्युपगमादिति—चेन्न; क्षेत्रज्ञानामपि द्वारकर्तृत्वाभ्युपगमात्। समष्टितत्त्वेषु न द्वारकर्तेति चेत्, नच तत्पक्षीकरणं; लौकिकप्रमाणाविषयत्वात्। आगमेन सिद्धानां तेषामपि पक्षीकार इति चेत्, तेन कर्तापि सिद्ध इति—**सिद्धसाधनतेति**।

मुखान्तरेण दूषयितुं हेतुं विकल्पयति—**सार्वज्ञ्येति**। अयमभिप्रायः—कर्तृमात्रव्याप्येन कार्यत्वमात्रेण न कर्तृविशेषसिद्धिरिति प्रागेवोक्तम्, अतः पक्षविशेषाधीनेन कार्यत्वविशेषेण कर्तृविशेषः साध्यः; कुम्भादिकार्यविशेषेण हि कुलालादिकर्तृविशेषानुमानं, न तु कार्यत्वमात्रेण, अतः पक्षाधीनः कार्यत्वविशेषो निरूप्यत इति—**किं युगपदिति**। पक्षप्रकर्षाधीनं हेतुवैशिष्ट्यं द्वेधा संभवेत्—परिदृश्यमानमह्यादिविपुलकार्याणां युगपदुत्पत्त्या वा, क्रमभाविनां त्रिकालवर्तिनां कार्याणामानन्त्येन वा। तत्र कीदृशेन पक्षप्रकर्षेण हेतुविशेषो विवक्षित इत्यर्थः। प्रथमं दूषयति—**युगपदिति**। कृत्स्नप्रलयासिद्धेः **भूभूधराद्यी**नां युगपदुत्पत्तौ प्रमाणाभावात्तन्निबन्धनं कर्तृवैलक्षण्यसाधकहेतुवैलक्षण्यं न सिद्धमित्यर्थः। द्वितीयं दूषयति—

मानसर्ववस्तुगतत्वे—कार्यत्वस्यासिद्धता। क्रमेणोत्पद्यमानसर्ववस्तुगतत्वेऽनेककर्तृकत्वसाधनाद्विरुद्धता। अत्रापि एककर्तृकत्वसाधने प्रत्यक्षानुमानविरोधश्च, शास्त्रविरोधश्च; 'कुम्भकारो जायते रथकारो जायत' इत्यादिश्रवणात्। अपिच—सर्वेषां कार्याणां, शरीरादीनां च सत्त्वादिगुणकार्यरूपसुखाद्यन्वयदर्शनेन सत्त्वादिमूलत्वमवश्यमाश्रयणीयम्। कार्यवैचित्र्यहेतुभूताः कारणगता विशेषाः सत्त्वादयः, तेषां कार्याणां तन्मूलत्वापादनं तद्युक्तपुरुषान्तःकरणविकारद्वारेण, पुरुषस्य च तद्योगः कर्ममूल इति—कार्यविशेषारम्भायैव ज्ञानशक्तिवत्कर्तुः कर्मसंबन्धः कार्यहेतुत्वेनैवावश्याश्रयणीयः; ज्ञानशक्तिवैचित्र्यस्य च कर्ममूलत्वात्। इच्छायाः कार्यारम्भहेतुत्वेऽपि विषयविशेषविशेषितायास्तस्याः सत्त्वादिमूलत्वेन कर्मसंबन्धोऽवर्जनीयः। अतः क्षेत्रज्ञा एव कर्तारो न तद्विलक्षणः कश्चिदनुमानात्सिध्यति। भवन्ति च प्रयोगाः—तनुभुवनादि क्षेत्रज्ञकर्तृकम्; कार्यत्वात्—घटवत्। ईश्वरः कर्ता न भवति; प्रयोजनशून्यत्वात्—मुक्तात्मवत्। ईश्वरः कर्ता न भवति; अशरीरत्वात्—तद्वदेव। नच—क्षेत्रज्ञानां स्वशरीराधिष्ठाने व्यभिचारः; तत्राप्यनादेः सूक्ष्मशरीरस्य सद्भावात्। विमति-

---

क्रमेणेति। यद्यप्येकैकेन कुलालादिना जन्मसहस्रेणाप्यनन्तकार्यनिष्पादनसंभवः, तथापि तत्तज्जन्मसमानकालकुविन्दादिकृतानां कार्याणां तत्कर्तृकत्वाभावात्—सर्वकार्याणामेककर्तृकत्वं नास्ति, अतस्तत्काल्यवर्तिसमस्तवस्तुनिष्ठत्वविशेषितं कार्यत्वं कर्तृभेदेनैव व्याप्तमिति कर्त्रैक्यसाधने विरुद्धमित्यर्थः। **अत्राप्येककर्तृकत्वसाधन इति।** विशिष्टकार्यताव्याप्यकतयाभिमतस्य घटपटरथादिषु दृष्टस्य भिन्नकर्तृकत्वस्य प्रतिक्षेप इत्यर्थः। भिन्नकर्तृकतया प्रत्यक्षसिद्धेषु प्रत्यक्षविरोधः। अन्यत्र द्वीपान्तरवर्तिघट एतद्व्यतिरिक्तकुलालकर्तृकः; एतद्व्यापारागोचरहेतुकत्वे सति घटत्वात्—संप्रतिपन्नकुलालान्तरोत्पादितघटवत्। द्वीपान्तरवर्तिघटहेतूनां दण्डादीनामेतद्व्यापारागोचरत्वमेतस्य तत्र गमनाभ्यवनिर्णयात्। अत एवमादिभिरनुमानैर्विरोधः। शास्त्रविरोधमुपपादयति—**कुम्भकारेति। कुम्भकारो जायते रथकारो जायत** इत्यर्थोपादानं, न तु पाठक्रमः। न हि कुम्भरथयोरेककर्तृकत्वे कुम्भकाररथकारयोरुत्पत्तिः पृथग्वक्तव्या; एकसंज्ञात्वेन पुनरुक्तिप्रसङ्गादिति भावः॥

प्रकारान्तरेण विरुद्धत्वमाह—**अपि चेति।** सुखादेः सत्त्वादिगुणकार्यत्वं शास्त्रदृष्टमिति—तच्छास्त्रप्रामाण्यवादिनाऽङ्गीकार्यमिति मत्वाऽनिष्टमापादयति, न तु पराभ्युपगमात्। **सुखादि**शब्देन सुखदुःखमोहा विवक्षिताः। **सुखाद्यन्वयः** शरीरादीनां सुखादिहेतुत्वावस्थान्वयः। **सत्त्वादिमूलत्वं** सत्त्वादिगुणकद्रव्योपादानत्वमित्यर्थः। के ते सत्त्वादयः, कथं च तेषां सुखादिहेतुत्वमित्यत्राह—**कार्यवैचित्र्येति। कारणगता विशेषाः कारण**शब्दो निमित्तोपादानसाधारणः। ततः किं कर्तुर्गुणवश्यत्वस्थेत्यत्राह—**तेषां कार्याणामिति।** पुरुषेण कार्याणां **तन्मूलत्वापादनं** सत्त्वादिगुणयुक्तस्वकीयान्तःकरणविकारद्वारेणेत्यर्थः। ततः किमित्यत्राह—**पुरुषस्य चेति।** कार्यानुपयोगिनो हि धर्मा न प्रामुवन्तीति पूर्वपक्षिणोक्तं, सत्त्वादीनां तु कार्योपयोगित्वात्तदधीन; कर्मसंबन्धोऽवर्जनीय इति भावनाह—**ज्ञानशक्तिवदिति।** सुखदुःखमोहादीनां सत्त्वरजस्तमोहेतुकत्वं शास्त्रसिद्धं, सुखादिहेतुभूतशरीराद्युपादानस्य, निमित्तस्य च कर्तुः सत्त्वादिगुणान्वयश्च शास्त्रसिद्धः—'निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः। कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यते' इत्यादिभिरुद्घोष्यते। अतः सत्त्वादिगुणकं शरीराद्युपादानं द्रव्यं सत्त्वादिगुणान्वयविकृतान्तःकरणः पुरुषोऽधितिष्ठति, गुणान्वयश्च कर्ममूल इति—कर्मवश्यत्वप्रसङ्ग इत्यर्थः। हेत्वन्तरेणापि कर्मसंबन्धमाह—**ज्ञानेति।** न ज्ञानशक्तिवैचित्र्याद् विचित्रसर्गः, अपि तु इच्छामात्रादिति चेत्तत्राह—**इच्छाया इति।** विषयविशेषविशेषिताया इच्छायाः सर्गस्थेमादिविषयत्वं, तत्रापि विचित्रसर्गादिविषयत्वं च सत्त्वादिमूलत्वेन कर्ममूलमित्यर्थः। एवं कर्तृक्षेत्रज्ञलयोर्व्याप्तिदर्शनान्न तद्विलक्षणसिद्धिरित्यत्राह—**अत इति॥**

प्रतितर्कीनाह—**भवन्ति चेति। तनुभुवनादीति।** इदं प्रत्यनुमानं, प्रतितर्को वा, अन्ये प्रतितर्का एव। कार्यत्वे—क्षेत्रज्ञकर्तृकत्वप्रसङ्गः, कर्तृत्वे—सापेक्षत्वप्रसङ्गः, कर्तृत्वे सशरीरत्वप्रसङ्ग इत्यर्थः। अशरीरत्वहेतोर्व्यभिचारमाशङ्क्य परिहरति—**न चेति। अनादेः** बीजाङ्कुरवत् प्रवाहानादेरित्यर्थः। अधिष्ठानं देहेन प्रथमसंबन्धश्चेत्, सूक्ष्मस्थूलशरीरप्रवाहानादितया परिहृतः, यथा—बालशरीरविशिष्टेन युवशरीरपरिग्रहः—तद्वदेव। अधिष्ठानं प्रेरणं चेत्, स्वपरनिर्वाहकन्यायात्परिहृतः। शरीरव्यतिरिक्तप्रेरणस्य शरीरापेक्षा, न शरीरस्येति हि शरीरत्वप्रयुक्तं शरीरान्तरनिरपेक्षप्रेरणत्वम्। तथा—जगत ईश्वरशरीरत्वे सशरीरत्वात्—कर्मवश्यत्वप्रसङ्गः। यथा—देहः स्वज्ञानोत्पत्तौ करणं कर्म च भवति, यथाच—घटः स्वविषय-

विषयः कालो न लोकशून्यः; कालत्वात्—वर्तमानकालवदिति । अपि च—किमीश्वरः सशरीरोऽशरीरो वा कार्यं करोति, न तावदशरीरः; अशरीरस्य कर्तृत्वानुपलब्धेः । मानसान्यपि कार्याणि सशरीरस्यैव भवन्ति; मनसो नित्यत्वेऽप्यशरीरेषु मुक्तेषु तत्कार्यादर्शनात् । नापि सशरीरः, विकल्पासहत्वात् । तच्छरीरं किं नित्यम्, उतानित्यम् । न तावन्नित्यम्; सावयवस्य तस्य नित्यत्वे—जगतोऽपि नित्यत्वाविरोधादीश्वरासिद्धेः । नाप्यनित्यम्; तद्व्यतिरिक्तस्य तच्छरीरहेतोस्तदानीमभावात् । स्वयमेव हेतुरिति—चेन्न; अशरीरस्य तदयोगात् । अन्येन शरीरेण सशरीर इति—चेन्न; अनवस्थानात् । स किं सव्यापारो, निर्व्यापारो वा । अशरीरत्वादेव—न सव्यापारः । नापि निर्व्यापारः कार्यं करोति—मुक्तात्मवत् । कार्यं जगदिच्छामात्रव्यापारकर्तृकमित्युच्यमाने पक्षस्याप्रसिद्धविशेषणत्वं, दृष्टान्तस्य च साध्यहीनता । अतो दर्शनानुगुण्येनेश्वरानुमानं दर्शनानुगुण्यपराहतमिति—शास्त्रैकप्रमाणकः परब्रह्मभूतः सर्वेश्वरः पुरुषोत्तमः । शास्त्रं तु—सकलेतरप्रमाणपरिदृष्टसमस्तवस्तुविसजातीयं सार्वज्ञ्यसत्यसंकल्पत्वादिमिश्रानवधिकातिशयापरिमितोदारगुणसागरं निखिलहेयप्रत्यनीकस्वरूपं प्रतिपादयतीति—न प्रमाणान्तरावसितवस्तुसाधर्म्यप्रयुक्तदोषगन्धप्रसङ्गः । यत्तु—निमित्तोपादानयोरैक्यम्, आकाशादेर्निरवयवस्य द्रव्यस्य कार्यत्वं चानुपलब्धशक्यप्रतिपादनम्—इत्युक्तं, तदप्यविरुद्धमिति **'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्'** (ब्र. सू. १।४।२३), **'न वियदश्रुतेः'** (ब्र. सू. २।३।१) इत्यत्र प्रतिपादयिष्यते । अतः प्रमाणान्तरागोचरत्वेन शास्त्रैकविषयत्वात्—**'यतो वा इमानि भूतानि'**

ज्ञानोत्पत्तौ स्वसत्तया हेतुः, पश्चाद्विषयश्च भवति, तथा—स्वविषयप्रेरणेऽपि शरीरमिति—न कर्मकर्तृविरोधः । नचाङ्कुरादौ शरीरस्य योग्यानुपलब्धिः; पिशाचसिद्धादिशरीरवददृश्यत्वोपपत्तेः, देशान्तरस्थेन वा शरीरेण सङ्कल्पद्वारा विषादेरिव प्रेरणोपपत्तेश्च । प्रतितर्कान्तरमाह—**विमतिविषय इति** । अत्र सूर्यपरिवृत्तिसङ्ख्याविशेषावच्छेदात्—पूर्वत्वेन परत्वेन च कालस्य पक्षीकृतत्वात्—नाश्रयासिद्धिरिति ॥

अनुमानं मुखान्तरेण दूषयति—**अपि चेत्यादिना** । दूषणं वक्तुं विकल्पयति—**किमिति** । धीस्थं चरमशिरो दूषयति—**न तावदिति** । अशरीरस्य मनसा कर्तृत्वं स्यादिति प्रागुक्तं दूषयति—**मानसानीति** । कुत इत्यत्राह—**मनस इति** । **अपि**शब्देन स्वपक्षे नित्यत्वान्भ्युपगमः सूचितः । सशरीरत्वपक्षं दूषयति—**नापीति** । विकल्पासहत्वं विवरितुं विकल्पयति—**तदिति** । प्रथमं दूषयति—**न तावदिति । जगतः** भूभूधरादेः । द्वितीयं दूषयति—**नापीति** । हेतुमाह—**तद्व्यतिरिक्तस्येति । तच्छरीरहेतोः** शरीरान्तरस्याभावादित्यर्थः । दूषणपरिहाराय परोक्तं शङ्कते—**स्वयमेवेति । स्वयं**शब्द ईश्वरपरः । परिहरति—**नेति । तदयोगात्** हेतुत्वायोगात् । पुनः शङ्कते—**अन्येनेति** । अनवस्थया दूषयति—**नेति** । प्रामाणिकपरम्परा न दोष इति चेत्, शरीरत्वप्रयुक्तकर्मवश्यत्वं स्यादिति भावः । कर्मवश्यत्वप्रसङ्गस्य प्रागुक्तत्वात्—इहाप्यनवस्थादूषणस्य कर्मवश्यत्वप्रसङ्गपर्यन्तमभिप्रेतमित्यवगम्यते ॥

मुखान्तरेण विकल्प्य दूषयति—**स किमिति** । अशरीरस्य निर्व्यापारत्वे, निर्व्यापारस्य कार्याकरणे च दृष्टान्तो **मुक्तात्मा । व्यापारश्च** प्रयत्नो विवक्षितः । इच्छाविशेषणस्य हेतुत्वे हि गुणवश्यताप्रसङ्गः पूर्वमुक्तः, इच्छामात्रमेव व्यापार इत्यत्राह—**कार्यं जगदिति । मात्र**शब्देन सत्त्वादिगुणान्वयतन्मूलकर्मसंबन्धव्यावृत्तिः । ननु—कर्मवश्यत्वादिकं न कर्तुः प्रसज्यनीयम्; अव्यापकत्वात् । नहि त्वत्पक्षेण वाऽस्मत्पक्षेण वा व्याप्तिः ईश्वरे त्वया मयापि तदनभ्युपगमात्, नैवम्; आगमादृतेऽपीश्वरः सिध्यतीति वदन्तं प्रत्यागममसन्तं कृत्वाऽस्मदादिभिरुच्यमानत्वात् । यदीश्वरप्रतिपादकागमबलान्मदुक्तव्याप्तिभङ्गेनेश्वरानुमानं स्याप्यते, तदानीमनुमानस्यागमानपेक्षप्रामाण्याप्तिद्धिरित्यप्राप्ताप्राप्तिलभागमस्य सिध्येत् । यद्वा, अलौकिकप्रमाणैकवेद्यत्वाभावे सति कर्तृत्वस्य कर्मवश्यत्वाद्व्याप्यत्वात्—शास्त्र–योगि–मुक्त–ईश्वर–प्रत्यक्षाण्यलौकिकशब्दोक्तानीति । अनुमानदूषणमुपसंहरति—**अत इति** । परस्य ब्रह्मण ईश्वरानतिरिक्तज्ञापनार्थः **सर्वेश्वर**शब्दः । अनेन 'तमीश्वराणां परमं महेश्वरं'मिति श्रुतिः स्मारिता भवति । देवताविशेषनिर्णयार्थं 'महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तक' इति श्रुतिस्मारणार्थः **पुरुषोत्तम**शब्दः ॥

उक्तदोषात्तदानीमपि प्रामुमुक्षुरित्यत्राह—**शास्त्रं त्विति** । सर्वविजातीयत्वं दर्शयति—**सार्वज्ञ्येति । सार्वज्ञ्यसत्य-**

(तै. ३।१।१) इत्यादिवाक्यमुक्तलक्षणं ब्रह्म प्रतिपादयतीति सिद्धम् ॥ इति तृतीयं शास्त्रयोनित्वाधिकरणम्[१] ॥ ३ ॥

यद्यपि—प्रमाणान्तरागोचरं ब्रह्म, तथापि—प्रवृत्तिनिवृत्तिपरत्वाभावेन सिद्धरूपं ब्रह्म न शास्त्रं प्रतिपादयतीत्याशङ्क्याह—

(चतुर्थं समन्वयाधिकरणम्) **(४) तत्तु समन्वयात् ॥ १।१।४ ॥**

प्रसक्ताशङ्कानिवृत्त्यर्थस्तुशब्दः। **तत्** शास्त्रप्रमाणकत्वं, ब्रह्मणः संभवत्येव। कुतः, **समन्वयात्।** परमपुरुषार्थतयान्वयः समन्वयः; परमपुरुषार्थभूतस्यैव ब्रह्मणोऽभिधेयतयान्वयात्। एवमेव समन्वितो

सङ्कल्पत्वादिमिश्रशब्दो ब्रह्मविशेषणं, गुणविशेषणं वा; तद्वितरूपत्वादन्येषां गुणानाम्। एकैकम**नवधिकातिशया** गुणा **अपरिमिता** निःसंख्या इत्यर्थः ॥ **इति ब्रह्मणोऽनुमानगम्यत्वनिरसनपूर्वकं शास्त्रयोनित्वसमर्थनम् ॥** इति तृतीयं शास्त्रयोनित्वाधिकरणम् ॥ ३ ॥

(४) तत्तु समन्वयात् ॥ १।१।४ ॥

यथा—मृत्तिकाया घटनिष्पादनशक्तत्वेऽपि कुलालस्य निर्माणशक्तौ सत्यामपि दण्डचक्रपरिकरापेक्षाऽस्त्येव, तथा—शब्दस्य परिनिष्पन्नब्रह्मप्रतिपादनशक्तत्वेऽपि, ब्रह्मणोऽपि शब्देन प्रतिपत्तुं शक्यत्वेऽपि बुभुत्साख्यपरिकरापेक्षा प्रमित्युत्पादने विद्यते। यत्नसाध्यत्वात्—बुभुत्साऽपेक्षिता, साचाज्ञातत्वपुरुषार्थत्वप्रयुक्ता, तत्रावान्तरपेटिकारूपेण प्रथमेन सूत्रद्वयेन शब्दद्वारकमर्थद्वारकं च शक्तिमत्त्वं प्रतिपादितम्। अथ सूत्रद्वयान्तरमवान्तरपेटिकान्तरं बुभुत्साहेतुनिरूपणपरं, तत्र प्रथमेन तृतीयसूत्रेणाज्ञातत्वरूपो बुभुत्साहेतुरुक्तः, अथ प्रयोजनत्वरूपो बुभुत्साहेतुरुच्यते चतुर्थेन। अर्थे प्रतिपन्ने हि प्रयोजनाप्रयोजनत्वचिन्ता, प्रतिपत्तिश्च लक्षणत इति—**जन्मादि**सूत्रं द्वितीयमभूत्। जन्मादिकं लक्षणं चेन्मानान्तरात्तत्सिद्धिः स्यादिति शङ्कायाः संगतत्वात्—**शास्त्रयोनित्वा**दिति सूत्रं तृतीयमभूत्। अज्ञातत्वेऽप्यप्रयोजने बुभुत्साऽनुदयात् प्रयोजनरूपत्वमत्र निरूप्यत इति—क्रमोऽयमेव। तत्रावान्तरसङ्गतिमाह—**यद्यपीति।** अज्ञातत्वं नाम बुभुत्साहेतुर्यद्यप्यस्तीत्यर्थः। **प्रयोजनं** सुखं, दुःखनिवृत्तिश्च। शास्त्रस्य **तत्पर्यवसायित्वं** तदुपायप्रवृत्तिनिवृत्तिबोधनद्वारा, तच्च न सिद्धपरत्वेऽस्ति; तस्य प्रवृत्तिनिवृत्तिरूपत्वाभावात्। तस्मात्प्रयोजनपर्यवसायित्वाभावेन बुभुत्साख्यपरिकराभावात्—सिद्धे शास्त्रं न प्रमितिं जनयतीत्यर्थः। एवं शङ्कायां सूत्रमुदाहरति—**तत्तु समन्वयादिति।** इहापि साधारणविचारद्वयमर्थसिद्धं, ब्रह्मणः शास्त्रप्रमाणकत्वं संभवति, नेति द्वितीयविचारः। तदर्थं प्रवृत्तिनिवृत्तिरूपप्रयोजनशून्यानां वेदान्तवाक्यानां ब्रह्मपरतयाऽन्वयः संभवति, नेति। तदर्थं किं शब्दस्य प्रामाण्यं—प्रवृत्तिनिवृत्तिपरतया, उत पुरुषार्थपरतयेति। शब्दस्य प्रवृत्तिनिवृत्तिपरतयैव प्रामाण्ये—ब्रह्मणः सिद्धरूपस्य शास्त्रप्रमाणकत्वाभावात्तद्विचारानारम्भः। शब्दस्य पुरुषार्थपरतयैव प्रामाण्ये—पुरुषार्थभूतब्रह्मणः शास्त्रप्रमाणकत्वात्तद्विचारस्यारम्भणीयत्वमिति—फलितम्। एवमर्थसिद्धौ विषयसंशयावभिप्रेत्य सूत्रं व्याचिख्यासुः, तत्र वाक्यार्थयोजनायामेव पदयोजनामन्तर्भावयिष्यन् पृथग्व्याख्येयं **तु**शब्दं व्याचष्टे—**प्रसक्तेति।** सर्वेषां सूत्राणां तत्तच्छङ्कायामवतारणेऽप्यस्मिन् सूत्रे **तु**शब्दः प्रदर्शनार्थः। **तदिति** व्याख्येयं पदम्। तद्व्याचष्टे—**शास्त्रप्रमाणकत्वं ब्रह्मण इति। संभवत्येवेति।** एतत्तुशब्दफलितम्। हेतुपदस्याकाङ्क्षां दर्शयति—**कुत इति। समन्वय**शब्दस्योत्तरत्र विस्तरेण व्याख्यास्यमानत्वादिदानीं सङ्क्षेपेण व्याचष्टे—**परमपुरुषार्थतयेति।** कस्य केन कीदृशोऽन्वय इत्यपेक्षायामाह—**परमेति।** शास्त्रेण **परमपुरुषार्थभूतस्य ब्रह्मणोऽभिधेयतयाऽन्वया**दित्यर्थः। शास्त्रस्य धीस्थत्वाच्छास्त्रेणेति कण्ठोक्त्यभावः। ब्रह्म शास्त्रप्रमाणकमिति प्रतिज्ञाते सति पक्षनिष्ठतया हेतोर्वक्तुमुचितत्वात्—समन्वयो ब्रह्मकर्तृकतया व्याख्यातः, नतु शास्त्रकर्तृकतया ॥

कथं तथाविधान्वय इत्यपेक्षायामेतदुपपादयति—**एवमिति। इव**शब्द एवार्थः, एवमेवेत्यर्थः। **औपनिषदः पदसमुदायः परमपुरुषार्थभूते ब्रह्मणि प्रतिपादकत्वेन समन्वित एव हीत्यर्थः। पदसमुदायो** वाक्यमित्यर्थः। औपनिषदवाक्यबहुत्वेऽपि तेषां वाक्यैकवाक्यभावेनैकार्थपरतयैकराशिल्व्यञ्जनायैकवचनम्। **समन्वित** इति

---

[१] अत्र सूत्रम् १—**शास्त्रयोनित्वात् १।१।३ ॥** अस्यायमर्थः—**शास्त्रं योनिः**—कारणं यस्य तत् **शास्त्रयोनि,** तस्य भावः शास्त्रयोनित्वं, तस्मादिति।

ह्मोपनिषदः पदसमुदायः—**'यतो वा इमानि भूतानि जायन्ते'** (तै. ३।१।१·), **सदेव सोम्येदमग्र आसीत् । एकमेवाद्वितीयम् । तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोऽसृजत'** (छा. ६।२।२–३), **'ब्रह्म वा इदमेकमेवाग्र आसीत्'** (बृ. १।४।१०), **'आत्मा वा इदमेक एवाग्र आसीत्'** (ऐ.१।१), **'तस्माद्वा एतस्मादात्मन आकाशः संभूतः'** (तै. २।१।१), **'एको ह वै नारायण आसीत्'**

वाक्यकर्तृकत्वेनोक्तिः फलितार्थाभिप्राया, न तु सूत्रयोजनाभिप्राया । ब्रह्मणि समन्वितानामित्युत्तरत्राप्येवमेव प्रतिपत्तिक्रमानुरोधेन प्रथमं लक्षणवाक्यमुपादत्ते—**यतो वा इति ।** अथ प्रापकं कारणवाक्यमाह—**सदेवेत्यादिना । सच्छब्दस्य** बृहद्बृहत्साधारणत्वाद्विशेषकवाक्यमुपादत्ते—**ब्रह्म वा इति । यत्कारणं तद्ब्रह्मेति** लक्षणवाक्येनोक्ते, सतः कारणत्वं च कथिते—तस्य सतो ब्रह्मत्वं सिद्ध्यतीति—न बृहत्त्वनिश्चयो **ब्रह्म वा** इति वाक्याधीन इति—चेन्न; लक्षणवाक्यस्य कारणवाक्यानुवादिलेन प्रापकवाक्योपजीवित्वात् । उपजीव्येषु प्रापकवाक्येष्वेव विशेषनिर्धारणज्ञापनार्थं हि **ब्रह्म वा** इति वाक्यमुपात्तम् । **सद्ब्रह्म**शब्दयोरीक्षणान्वयलिङ्गादविद्यावृत्तवस्तुपरलेऽपि—तयोः शब्दयोः साधारणतया शब्दसामर्थ्यादविद्यावृत्तिनिश्चयस्तत्र नास्तीति—शब्दशक्त्यैव विशेषज्ञापनार्थ**मात्मा वा** इति वाक्योपादानम् । **ब्रह्म**शब्दस्य **साधारणत्वं** नाम—बहुष्वर्थेषु प्रयुज्यमानत्वं, नतु प्रवृत्तिनिमित्तसाधारण्यम् । प्रवृत्तिनिमित्तभूतस्य निरतिशयबृहत्त्वस्य भगवद्व्यतिरिक्तागामित्वसन्देहसहत्वं वा । नहि स्वारसिकात्मशब्दैकार्थ्ये प्रतिपन्ने सति निरतिशयबृहत्त्वस्याविद्गामित्वसन्देहः । सद्विद्यायां **स आत्मे**त्यात्मशब्द उपसंहारस्थ इति—उपक्रमस्थेनै**वात्म**शब्देन विशेषनिश्चयार्थ**मात्मा वा** इति वाक्यमुपात्तम् । **यतो वा इमानी**त्यादिप्रकरण एव 'आनन्दाद्येव खल्विमानि भूतानि जायन्ते' इत्या**नन्द**शब्देन कारणे निर्दिष्टेऽपि—'यदेष आकाश आनन्दो न स्या'दि**त्याकाश**शब्दसामानाधिकरण्यात्—आनन्दशब्देनाविद्यावृत्तिनिश्चयः प्रतिबद्ध इत्यभिप्रायेण—अविद्यावृत्तेः सुखेन प्रतिपत्त्यर्थ**मात्मा वा** इति वाक्योपादानम् । सर्वशाखाप्रत्ययन्यायेन विनापि प्रकरणादेव **ब्रह्म**शब्द आत्मपर इति ज्ञापनार्थम्, एतदधिकरणापेक्षितानन्दरूपताप्रति पादकप्रकरणस्थतया तज्ज्ञापनार्थं चोपादत्ते—**तस्माद्वा एतस्मादात्मन इति ।** 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति हि तत्र प्रकृतम्, 'अन्योऽन्तर आत्मा आनन्दमयः, आनन्दं ब्रह्मणो विद्वा'निति च तत्र वक्ष्यते ॥

अथ 'छागो वा मञ्चवर्णा' दिति न्यायात्सामान्यशब्दानां देवताविशेषे पर्यवसानं दर्शयति—**एको ह वा इति ।** 'सेयं देवतैक्षत, यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवम्, स ईशेऽस्य जगतो नित्यमेव नान्यो हेतुर्विद्यत ईशनायै, ईशानो भूतभव्यस्य, तमीश्वराणां परमं महेश्वर'मित्यादिषु श्रुतानां देवतादिशब्दानां पूर्वपूर्वापेक्षया विशेषशब्दानामपि साक्षात्कारणवाक्यस्थत्वाभावात्, तेषु च रूढिमतामपि देवतादिशब्दानां व्यक्तिविशेषे रूढत्वाभावाद्, **ईशादि**शब्दानां च 'जगत ईशो नान्यो हैतुर्विद्यते ईशनायै'ति समभिव्याहृतषष्ठ्यन्तपदनिर्देशा**दि**सिरवयवार्थविवक्षायाः स्फुटतरत्वेन निमग्नरूढितया साधारणत्वाच्च—चरमविशेषशब्दप्रदर्शनेन तेषामपि तत्पर्यवसानमर्थसिद्धं स्यादित्यभिप्रायेण च, **सेयं देवते**त्यादिवाक्यान्यनादृत्य **एको ह वै नारायण** इत्यादिवाक्यमुदाहृतम् । **हिरण्यगर्भा**दयः शब्दा **आकाश**प्राणा**दि**शब्दवदयोग्यार्थाः, **शिवा**दिशब्दाश्च बहुर्थेषु प्रयोगात्साधारणा इति—**स**दादिशब्दवन्न विशेषोपस्थापनक्षमा इत्यभिप्रायः । 'वचनानि त्वपूर्वत्वात्, विधिस्तु धारणेऽपूर्वत्वा'दिति न्यायेन 'यदाग्नेयोऽष्टाकपालः, उपरि हि देवेभ्यो धारयति' इति वाक्यंवदिदं महोपनिषद्वाक्यमप्यप्राप्तार्थोपस्थापकत्वात्, **आकाशप्राणा**दिवाक्यवदयोग्यार्थोपस्थापकत्वाभावाच्च—अनन्यापेक्षं स्वार्थं प्रतिपादयति । 'न सन्न चासच्छिव **एव** केवल' इति वाक्यविरोधादिदं वाक्यमयोग्यार्थमिति—चेन्न; **सदेव सौम्येद**मिति वाक्यविरोधेन **न सन्न चास**दित्यादिवाक्यस्यायोग्यार्थत्वप्रसङ्गात् । साधारणस्य **सच्छब्द**स्य शिवपर्यवसानाविरोधात्—नात्रायोग्यार्थत्वमिति चेत्, तर्हि **शिव**शब्दस्य च बहुष्वर्थेषु प्रयोगात्—साधारणस्य **नारायण**पर्यवसानाविरोधात्—नात्रायोग्यार्थत्वम् । **ब्रह्मशिवयो**र्हि कार्यत्वमिन्द्रादीनामिव बह्वीभिः श्रुतिभिः प्रतिपाद्यते, यजुषि—'अजस्य नाभावध्येकमर्पितं यस्मिन्निदं भुवनमधिश्रितं विश्वकर्मा त्वजनिष्ट देवः, स प्रजापतिरेकः पुष्करपर्णे समभवत्, तस्माद्विराडजायत विराजोऽधि पुरुषः', महोपनिषदि—'तत्र ब्रह्मा चतुर्मुखोऽजायत', सुबालोपनिषदि—'अद्भ्यः पृथिवी तदण्डमभवत् तत्संवत्सरमात्रमुषिला द्विधाऽकरोदधस्ताद्भूमिमुपरिष्टादाकाशं मध्ये पुरुषो दिव्यः सहस्रशीर्षा पुरुष' इत्यारभ्य 'सोऽग्रे भूतानां मृत्युमसृजत तस्य ब्रह्माऽभिमेत् सो ब्रह्माणमेवाविवेशे'ति, अत्र परमपुरुषात्मनः पुरुषो ब्रह्मा समुत्पन्न इति श्रुतेः **पुरुष**शब्दद्वयश्रवणात्, मृत्युभयवत्त्वश्रवणाच्च । श्वेताश्वतरे—'वेदाहमेतं पुरुषं महान्तं, महान्प्रभुर्वै पुरुषः सत्त्वस्येष प्रवर्तकः, यो ब्रह्माणं विदधाति पूर्वं'मिति च हिरण्यगर्भोत्पत्तिरवगम्यते । तथा महोपनिषदि 'त्र्यक्षः शूलपाणिः पुरुषोऽजायत', सुबालोपनिषदि 'ललाटात्क्रोधजो रुद्रोऽजायत', बृहदारण्यके—'ब्रह्म वा इदमेकमेवाग्र आसीत् तदेकं सन्नव्यभवत् तच्छ्रेयो रूपमत्यसृजत क्षत्रं यान्येतानि देवक्षत्राणि.इन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान' इति,

तथा शतपथे—'अभूद्वा इदं प्रतिष्ठे'त्यारभ्य 'भूतानां च प्रजापतिः संवत्सरादीक्षियत भूतानां पतिर्गृहपतिरासीदुषाः पत्नी'त्यादिकमुक्त्वा 'भूतानां पतिः संवत्सर उषसि रेतोऽसिञ्चत् संवत्सरे कुमारोऽजायत सोऽरोदीत् तं प्रजापतिरब्रवीत् कुमार किं रोदिषि यच्छ्रमात्तपसोऽधिजातोऽसीति सोऽब्रवीत् अनपहतपाप्मा वा अहमस्मि अविहितनामा नाम मे नेहि पाप्मनोऽपहत्या इति तमब्रवीत् रुद्रोऽसीति तदस्य तन्नामाकरोत् अग्निस्तद्रूपमभवत्' इत्यारभ्य शर्वपशुपतिप्रभृतिनामकरणं, पृथिवीसलिलादिमूर्तिप्रदानं चोक्तम्। रुद्रवाक्यादेवानपहतपाप्मत्वं च तस्य श्रुतम्। तत्रैव शतरुद्रीयब्राह्मणे—'प्रजापतेर्विस्रस्ता देवता उदक्रामन् तमेक एव देवो न जहान्महामन्युरेव सोऽस्मिन्नन्तर्हितोऽतिष्ठत् सोऽरोदीत् तस्य यान्यश्रूणि प्रास्कन्दन् तान्यस्मिन्मन्यौ प्रातिष्ठन् स एष शतशीर्षा रुद्रः समभव'दिति, अत्र प्रजापतेः क्रुद्धस्य क्रोधजाश्रुसंभवत्वं मन्युरूपस्य रुद्रस्यामिहितम्। क्रोधस्य चाश्रुहेतुत्वं प्रसिद्धं—'तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नास्रबिन्दवः। दीमाभ्यामिव दीपाभ्यां सार्चिषः स्नेहबिन्दव' इति। तथा शैलालिब्राह्मणे—'प्रजापतिर्वै प्रजाकामः स तपोऽतप्यते'त्यारभ्य 'अग्निवाय्वादिचन्द्राणामुत्पत्तिं, तेषां रेतःस्कन्दनं चोक्त्वा 'स प्रजापतिर्हिरण्मयं चमसमकरोदिषुमात्रमूर्ध्वमेव तिर्यञ्चं तस्मिन् रेतः समसिञ्चत् तन उदतिष्ठत् सहस्राक्षः सहस्रपात् तत्सहस्रेण प्रतिहिताभिः स प्रजापति पितरमभ्यायच्छत् तमब्रवीत् कथमभ्यायच्छसीति नाम मे कुर्वित्यब्रवीत् न वा इदमविहितेन नाम्ना अन्नमत्स्यामीति शर्वो वै ललमित्यब्रवीत् भव एवेति यद्भव' इत्यारभ्य भवशर्वादिनामकरणं, सलिलादिमूर्तिप्रदानं चोक्त्वा 'स एषोऽष्टनामाऽष्टधा विहितो महादेव' इति नामाष्टकमूर्त्यष्टकवत्त्वं प्रजापतिना विहितमिति स्पष्टतरमुक्तम्। 'तलवकारिणां कर्मारम्मे—'इदं कर्म करिष्यामि तन्मे समृद्ध्यतां तन्म उपपद्यतां विरूपाक्षाय दन्ताजये ब्रह्मणः पुत्राय ज्येष्ठाय श्रेष्ठायामोघाय कर्माधिपतये नम' इति, तथा छन्दोगानां च कर्मारम्मे—'तस्मै विरूपाक्षाय दन्ताजये तुद्राय विश्ववेदाय सहस्राक्षाय ब्रह्मणः पुत्राय नम' इति च मन्त्रद्वयेन रुद्रस्य ब्रह्मपुत्रत्वममिहितम्। घृतसूक्ते च—'यो ब्रह्मा ब्रह्मण उज्जहार प्राणेश्वरः क्रुत्तिवासाः पिनाकी'ति ब्रह्मणः उद्भूतत्वं रुद्रस्योक्तम्। **उज्जहार** उद्भूवेत्यर्थः। अतो हिरण्यगर्भादीनां कार्यत्वावगमेन तद्वाचिशब्दानामयोग्यार्थत्वात्—नारायण एव **सदा**दिशब्दाः पर्यवस्यन्ति। ननु—'हिरण्यगर्भः समवर्तताग्रे, न सन्न चासच्छिव एव केवलः, एको ह वै नारायण आसीन्, ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे संप्रसूयन्ते' इति त्रयाणामपि देवानां कारणत्वकार्यत्वयोरविशेषेण श्रवणात्, अयोग्यत्वशङ्कायाञ्चिष्वपि तुल्यत्वात्, जन्मन ऐच्छिकत्वेनायोग्यत्वपरिहारस्य त्रिष्वपि सुवचत्वात्, कारणैकत्वावधारणस्यानुरोद्धव्यत्वात्, रुद्रेरपरित्यागस्य स्वतःप्राप्तत्वाच्च—त्रयाणामप्यैक्याश्रयणेन परमकारणमभ्युपगन्तव्यं, नैवं; त्रयाणामविशेषेण कार्यत्वश्रवणाभावादेव—त्रिष्वप्ययोग्यत्वशङ्कायास्तुल्यत्वाभावात्, तस्य हि प्रकरणस्योपक्रमे **कश्च ध्येय** इति ध्येयविधिपरत्वमवगतमिति—कार्यत्वमनूद्यते, अनुवादश्च प्रापकानुरोधेन स्यात्, लक्ष्मीपतिविषय उत्तरनारायणानुवाके भगवदुत्पत्तिरवतारूपा श्रूयत इति—अस्मिन्वाक्ये भगवदवतारानुवादः, ब्रह्मशिवयोस्त्ववतारश्रुत्यभावादिन्द्रवरुणादितुल्योत्पत्तिरनूद्यते इति—नाविशेषेण कार्यत्वश्रवणम्। किंचोत्पत्तिश्चेत्कर्माधीनदेहसङ्गतिरित्युत्सर्गसिद्धं, तच्च ब्रह्मशिवयोरनपोदितं, नारायणे त्ववतारश्रुत्याऽपोदितम्। 'प्रजापतिर्देवानसृजत ते पाप्मना सन्दिता अजायन्त' इति प्रजापतिसृष्टानां देवानां सामान्येन पापसंबन्धः श्रुतः। विशेषतो रुद्रस्यानपहतपाप्मत्वं शतपथे स्ववाक्यादेव दर्शितम्। 'एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्योदेव एको नारायणः तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम एष हि सर्वेभ्यः पाप्मभ्य उदितः, अपहतपाप्मा विजरो विमृत्युः, स उत्तमः पुरुष' इति पुण्डरीकाक्षस्याकर्मकृतविग्रहवत्त्वं चोक्तम्। एवं वैषम्यस्य स्फुटत्वेन उत्पत्तिसाम्यशङ्काया दूरविध्वस्ततया—योग्यार्थनारायणादिशब्दानामिवायोग्यार्थब्रह्मशिवादिशब्दानां रूढिपरित्यागाभावोऽनुपपन्नः। यदि—रुद्रस्य परमकारणत्वं, तदुत्पत्तेरवतारूपत्वं चास्तिकतमैर्भवद्भिरुच्यते, तर्हि—भवतामिन्द्रे कः प्रद्वेषः, 'इन्द्रो मायाभिः पुरुरूप ईयते, ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे संप्रसूयन्त' इति कारणत्वकार्यत्वे हि ब्रह्मशिवयोरिवेन्द्रस्यापि श्रूयेते, अत इन्द्रस्य परमकारणत्वं, तदुत्पत्तेः परमकारणभूतेन्द्रावतारूपत्वं चाश्रित्येन्द्रशब्दस्य योग्यार्थत्वं किमिति नाभ्युपगम्यते। 'प्रजापतिरिन्द्रमसृजते'ति तस्य सृज्यत्वश्रवणात्, लाङ्गूलधरूपब्रह्महत्याऽभिभूतत्वश्रवणात्, तत्प्रायश्चित्तादिश्रवणाच्च—इति चेत्, इन्द्रस्य जन्मवृत्तापकर्षयोगः कृष्णस्य वसुदेवगृहजन्मकालयवननिमित्तपलायनवल्लीला किं न स्यात्। इन्द्रस्य परमकारणवस्त्वैक्ये सति उत्तरनारायणप्रतिपाद्यत्वं, तस्मिन्सति जन्मवृत्तापकर्षसंयोगस्य लील्यत्वं, तस्मिन्सति **इन्द्र**शब्दस्य योग्यार्थत्वं, तस्मिन्सति इन्द्रस्य परमकारणवस्त्वैक्यम्—इति चक्रकाश्रयप्रसङ्गात्। एकस्मिन्नेव वाक्ये सोमवरुणयमादिवत् सृज्यत्वप्रतीतेश्च—नैवमिति चेत्, तर्हि रुद्रस्य परमकारणवस्त्वैक्ये सति उत्तरनारायणप्रतिपाद्यान्तर्भावः, तेन जन्मकर्मापकर्षस्य लीलात्व, तेन शिवादिशब्दानां योग्यार्थत्वं, तेन परमकारणवस्त्वैक्यमिति चक्रकप्रसङ्गात्, सोमवरुणादिवत्तस्मिन्नेव वाक्ये सृज्यत्वसंहार्यत्वश्रवणाच्च—शिवादिशब्दानामयोग्यार्थत्वं दुष्परिहरम्। भगवज्जन्मनोऽवतारूपत्वे तु न चक्रकप्रसङ्गः; 'तस्माद्विराडजायते'ति कारणतयोक्तस्य परमपुरुषस्य महापुरुषशब्देनोत्तरनारायणे प्रत्यभिज्ञातस्य लक्ष्मीपतेरजायमान इत्यादिवाक्येनावतारस्य प्रतिपादितत्वात्। कार्यकारणविषयशिवादिशब्दानां भिन्नार्थत्वान्नायोग्यार्थत्वमिति चेत्, किंकार्यविषयशिवादिशब्दानां प्रसिद्धरुद्रपरत्वम्, उत

(मं. १), **'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै. २।१।१), **'आनन्दो ब्रह्म'** (तै.३।६।१) इत्येवमादिः। नच—व्युत्पत्तिसिद्धपरिनिष्पन्नवस्तुप्रतिपादनसमर्थानां पदसमुदायानामखिलजगदुत्पत्तिस्थितिविनाशहेतुभूताशेषदोषप्रत्यनीकापरिमितोदारगुणसागरानवधिकातिशयानन्दस्वरूपे ब्रह्मणि समन्वितानां प्रवृत्तिनिवृत्तिरूपप्रयोजनविरहादन्यपरत्वं; स्वविषयावबोधपर्यवसायित्वात्सर्वप्रमाणानाम्। नच—प्रयोजनानुगुणा प्रमाणप्रवृत्तिः; प्रयोजनंहि प्रमाणानुगुणम्। नच—प्रवृत्तिनिवृत्त्यन्वयविरहिणः प्रयोजनशून्यत्वं; पुरुषार्था-

---

कारणविषयाणाम्। प्रथमे—प्रसिद्धरुद्रस्याकाशादिवत्सृज्यत्वात्–तद्व्यतिरिक्तविषयशिवादिशब्दानां योग्यार्थनारायणपदोपस्थापितविशेषपरत्वमवर्जनीयम्। कारणविषयशिवादिशब्दाः प्रसिद्धरुद्रपराः, कार्यविषयास्तु तदतिरिक्तविषया इति चेत्, कारणेन्द्रशब्दः प्रसिद्धेन्द्रपरः, कार्यविषयेन्द्रशब्दस्तदतिरिक्तपर इति किं न स्यात्। वृत्रवधादिकर्तरि इन्द्रशब्दव्युत्पत्तिरिति चेत्, व्यक्षशूलपाण्यादिशब्दपर्यायत्वेन शिवादिशब्दव्युत्पत्तेः, 'व्यक्षः शूलपाणिः पुरुषोऽजायत, उमापतिः पशुपतिः श्रीकण्ठो ब्रह्मणः सुतः। उक्तवानिदमव्यग्रो ज्ञानं पाशुपतं शिव' इति शूलपाण्यादिशब्दानां कार्यविषयतया प्रयोगाच्च—कारणविषयशिवादिशब्दानां प्रसिद्धरुद्रपरत्वमयुक्तम्। कारणविषयाणां नारायणादिशब्दानां प्रसिद्धविष्णुपरत्वं तु युक्तं; अवतीर्णस्य कारणस्य च धर्म्यैक्यप्रमाणस्य दर्शितत्वात्–अर्थभेदाभावात्। अर्थभेदे सतिहि कार्यकारणविषयनारायणादिपदेषु कस्य प्रसिद्धार्थता, कस्य नदतिरिक्तविषयतेति विचारसंभवः, कार्यकारणभूतरुद्रधर्म्यैक्ये त्विन्द्रधर्मैक्य इव चक्रकापत्तिरवर्जनीयेत्युक्तम्, अतः कार्यकारणविषयशिवादिशब्दानामर्थभेदाङ्गीकारेण कारणविषयशिवादिशब्दाः प्रसिद्धेतरार्थविषया इति नारायणमेवाभिदधति; नारायणादिशब्दानां प्रसिद्धार्थस्य योग्यतयाऽर्थभेदाभावात्, धर्म्यैक्यस्य प्रमाणप्रतिपन्नत्वाच्च। अतो महोपनिषत्प्रतिपादिते नारायण एव **सद्ब्रह्मा**दिशब्दाः पर्यवस्यन्तीति भावः। अथ कारणतया निर्दिष्टस्य ब्रह्मणः शङ्कितदोषव्यावर्तकं शोधकवाक्यमाह—**सत्यमिति**। उक्तगुणविभूत्यादिविशिष्टस्य ब्रह्मणः पुरुषार्थत्वज्ञापनायाह—**आनन्दो ब्रह्मेति**। आनन्दत्वं ह्यनुकूलत्वं, अनुकूलत्वं च स्वत इष्टत्वं, तदपीष्टसाधनत्वनिवर्त्यप्रातिकूल्याभ्यां विनापीष्टत्वं, तच्च विषयगतं, तद्विषयज्ञानस्यार्थ्यनुकूलत्वात्—आनन्दत्वम्। भगवतो मुक्तानां निरतिशयभोग्यत्वेनानुकूलतया स्वरूपतो धर्मतश्चानन्दत्वं, स्वविषयज्ञानस्य स्वरूपस्य च स्वात्मानं प्रत्यनुकूलत्वाच्चानन्दत्वम्। **इत्येवमादिः—औपनिषदः पदसमुदाय** इति पूर्वेणान्वयः। **इति समन्वयसूत्रार्थोपपादनम्॥**

एवमन्वितेषु वाक्येषु प्रस्तुतपुरुषार्थत्वोपयोगित्वेन कोऽर्थः प्रतिपन्नः, स च किमापातप्रतिपन्नः, उत तात्पर्यभूमिः। न प्रथमः; तस्य तात्त्विकत्वनिश्चयत्वायोगात्। न द्वितीयः; प्रवृत्तिनिवृत्त्यभावेन तदयोगात्—इति शङ्कायां प्रवृत्तिनिवृत्त्यन्वयः प्रामाण्यव्यापकः अतस्तद्व्याप्यं प्रामाण्यं तद्विरहे न सिध्यतीति किमुच्यते, किं वा प्रवृत्तिनिवृत्त्यन्वयः प्रयोजनव्यापकः, प्रयोजनं च प्रामाण्यव्यापकमिति—प्रवृत्तिनिवृत्त्यन्वयविरहे तद्व्याप्यप्रयोजनाभावात्–तद्व्याप्यं प्रामाण्यं न सिध्यतीत्युच्यत इति विकल्पमभिप्रेत्य प्रवृत्तिनिवृत्त्यन्वयस्य प्रामाण्यव्यापकत्वं नास्तीत्याह—**न चेति। व्युत्पत्तिसिद्धेति**। प्रथमसूत्रार्थानुवादः। सिद्धवस्तुनोऽपुरुषार्थत्वान्न शास्त्रं प्रतिपादयितुं शक्नोति, प्रतिपन्नेऽपि न तत्र तात्पर्यं; सिद्धव्युत्पत्त्यभावादिति न वाच्यं; सिद्धे वस्तुनि व्युत्पत्त्युपपादनादिति भावः। प्रमाणान्तरगोचरत्वप्रयुक्तान्यपरत्वशङ्काव्युदासाय उदाहृतकारणवाक्यप्रतिपन्नमर्थमाह—**अखिलेति**। शोधकवाक्यप्रतिपन्नं, कारणवाक्यैश्च सिद्धमर्थमाह—**अशेषेति**। सांख्याभिमतप्रकृतिपुरुषपरत्वं दुर्वचमिति भावः। पुरुषार्थपरत्वाभावादन्यपरत्वव्युदासायाह—**आनन्दस्वरूपेति। अन्यपरत्वं** तात्पर्याभावः–ब्रह्मणि प्रामाण्याभाव इत्यर्थः। प्रवृत्तिनिवृत्त्यन्वयविरहे कथं प्रामाण्यमित्यत्राह—**स्वविषयेति**। प्रमाणानि हि स्वस्वविषयावबोधे पर्यवस्यन्ति, न तु प्रवृत्तिनिवृत्त्योरित्यर्थः। अथ प्रवृत्तिनिवृत्त्यन्वयस्य प्रयोजनव्यापकत्वमभ्युपगम्य प्रयोजनस्य प्रामाण्यव्यापकत्वाभावमाह—**न च प्रयोजनेति**। तदुपपादयति—**प्रयोजनं हीति**। हिशब्दो हेतौ। यद्वा, प्रयोजनस्य प्रामाण्यव्यापकत्वाभावप्रसिद्धिर्हिशब्दाभिप्रेता, यथा तन्त्रटीकायां—'न हि लोष्टं पश्यतस्तद्दर्शनं निष्प्रयोजनमिति सुवर्णदर्शनता कल्प्येते'ति, तथा—हेतुत्वमर्थसिद्धम्। प्रयोजनव्यापकत्वं प्रवृत्तिनिवृत्त्यन्वयस्यास्तु तेन तन्निवृत्तौ प्रयोजनमेव निवर्तेत, न तु प्रामाण्यं; प्रयोजनस्य प्रामाण्यव्यापकत्वाभावादित्यर्थः। **न चेत्**यत्र **च**शब्दो व्यापकद्वयनिषेधसमुच्चये, यथा–प्रवृत्तिनिवृत्त्यन्वयस्य प्रामाण्यव्यापकत्वमयुक्तं, तथा—प्रयोजनस्य च प्रामाण्यव्यापकत्वमयुक्तमित्यर्थः। प्रत्यक्षादिषु प्रयोजनस्य प्रामाण्यव्यापकत्वाभावेऽपि, शास्त्रे प्रयोजनस्य प्रामाण्यव्यापकत्वमस्तीति शङ्कायां—प्रयोजनव्याप्यत्वं शास्त्रप्रामाण्यस्यास्तु तथापि प्रयोजनस्य प्रवृत्तिनिवृत्त्यन्वयव्याप्यत्वं नास्तीत्याह—**न च प्रवृत्तीति। वाक्यस्ये**त्यध्याहारः। कृत

---

१ स्वविषयज्ञानस्याप्यनुकूलत्वादानन्दत्वं भगवतो मुक्तानां निरतिशयभोग्यत्वेनानुकूलतया इत्यधिकं का. मु. पु.। २ °त्वं दुर्वचं इतिभावः। पुरुषार्थत्वाभावशङ्का° इत्यधिकं का. मु. पु.।

न्वयप्रतीतेः। तथा—स्वरूपपरेष्वपि 'पुत्रस्ते जातः, नायं सर्पः' इत्यादिषु हर्षभयनिवृत्तिरूपप्रयोजनवत्त्वं दृष्टम्। अत्राह—न वेदान्तवाक्यानि ब्रह्म प्रतिपादयन्ति; प्रवृत्तिनिवृत्त्यन्वयविरहिणः शास्त्रस्यानर्थक्यात्। यद्यपि—प्रत्यक्षादीनि वस्तुयाथात्म्यावबोधे पर्यवस्यन्ति, तथापि—शास्त्रं प्रयोजनपर्यवसाय्येव। न हि लोकवेदयोः प्रयोजनरहितस्य कस्यचिदपि वाक्यस्य प्रयोग उपलब्धचरः। न हि किंचित्प्रयोजनमनुद्दिश्य वाक्यप्रयोगः, श्रवणं वा संभवति, तच्च प्रयोजनं प्रवृत्तिनिवृत्तिसाध्येष्टानिष्टप्राप्तिपरिहारात्मकमुपलब्धम्—'अर्थार्थी राजकुलं गच्छेत्, मन्दाग्निर्नाम्बु पिबेत्, स्वर्गकामो यजेत, न कलञ्जं भक्षयेद्'इत्येवमादिषु। यत्पुनः—सिद्धवस्तुपरेष्वपि 'पुत्रस्ते जातः, नायं सर्पो रज्जुरेषे'त्यादिषु हर्षभयनिवृत्तिरूपपुरुषार्थान्वयो दृष्ट—इत्युक्तं, तत्र किं—पुत्रजन्माद्यर्थात्पुरुषार्थावाप्तिः, उत तज्ज्ञानादिति विवेचनीयम्। सतोऽप्यज्ञातस्यार्थस्य पुरुषार्थत्वेन तज्ज्ञानादिति चेत्, तर्ह्यसत्यप्यर्थे ज्ञानादेव पुरुषार्थः सिध्यतीत्यर्थपरत्वाभावेन—प्रयोजनपर्यवसायिनोपि शास्त्रस्य नार्थसद्भावे प्रामाण्यम्। तस्मात्सर्वत्र प्रवृत्तिनिवृत्तिपरत्वेन, ज्ञानपरत्वेन वा प्रयोजनपर्यवसानमिति—कस्यापि वाक्यस्य परिनिष्पन्ने वस्तुनि तात्पर्यासंभवात्—न वेदान्ताः परिनिष्पन्नं ब्रह्म प्रतिपादयन्ति। अत्र कश्चिदाह—वेदान्तवाक्यान्यपि कार्यपरतयैव ब्रह्मणि प्रमाणभावमनुभवन्ति। कथम्, निष्प्रपञ्चमद्वितीयं ज्ञानैकरसं

इत्यत्राह—**पुरुषार्थान्वयप्रतीतेरिति**। इदं पक्षविषयं प्रवृत्तिनिवृत्तिरूपफलाभावेऽपि पुरुषार्थभूतस्यैव ब्रह्मणोऽभिधेयतान्वयप्रतीतेरित्यर्थः। **न चेत्यत्र च**शब्दो व्याप्यत्वनिषेधद्वयसमुच्चये, यथा—प्रामाण्यस्य प्रवृत्तिनिवृत्त्यन्वयव्याप्यत्वं नास्ति, तथा—प्रयोजनस्यापि प्रवृत्तिनिवृत्त्यन्वयव्याप्यत्वं नास्तीत्यर्थः। प्रामाण्यस्य प्रवृत्तिनिवृत्त्यन्वयव्याप्यत्वाभावः **स्वविषयावबोधे**त्यादिना सिद्धः। सपक्षत्वाभिमते लौकिकेऽपि सिद्धपरवाक्ये पुरुषार्थान्वयं दर्शयति—**तथेति**। यथा प्रवृत्तिपरत्वं निवृत्तिपरत्वं वा न प्रयोजनपर्यवसायित्वं, किंतु पुरुषार्थपरत्वमेव, तथा—प्रवृत्तिनिवृत्तिपरत्वं सिद्धवस्तुपरत्वं वा न प्रयोजनपर्यवसायित्वम्, अपितु साध्येन वा सिद्धेन वा पुरुषार्थेनान्वितत्वमेव वाक्यस्य प्रयोजनपर्यवसायित्वमित्युक्तं भवति; पुरुषार्थान्वयप्रतीतेरित्युक्तत्वात्॥ **इत्येतत्सूत्रार्थपर्यवस्थापनम्॥**

एवं सूत्राक्षरयोजनार्थं संक्षेपेणार्थ उक्तः, अथ तात्पर्यार्थं वक्तुं पूर्वपक्षं विस्तरेणावतारयति—**अत्राहेति**। एतावत्यधिकरणार्थे उक्ते लब्धस्वदृष्यप्रसङ्गः पूर्वपक्ष्याहेत्यर्थः। ब्रह्मणः शास्त्रप्रतिपाद्यत्वाभावं प्रतिजानीते—**न वेदान्तेति**। सौत्र**तच्छब्देन शास्त्रयोनित्वस्य** परामृष्टत्वात्–पूर्वपक्षिणा तदभावोऽपि प्रतिज्ञात इति हि ज्ञायते। प्रतिज्ञातमुपपादयति—**प्रवृत्तिनिवृत्त्यन्वयविरहिण इति**। तदन्वयाभावे प्रतिपादनमेव न पूर्यतेति भावः। तथाच वार्तिकं—'यावत्खलु प्रमातृणां प्रवर्तननिवर्तने। शब्दा न कुर्वते तावन्न निराकाङ्क्षबोधन'मिति। **शास्त्रस्येति**। शासनाद्धि शास्त्रं, शासनं च प्रवर्तननिवर्तनात्मकं, तत्र वार्तिकं—'प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्रं तूपपादयत' इति पूर्वोक्तं प्रमाणानां स्वविषयावबोधित्वमाशङ्क्य तत्प्रमाणविशेषे व्यवस्थापयन्, शास्त्रस्य प्रयोजनपर्यवसानावश्यंभावमाह—**यद्यपीति**। तदुपपादयति—**नहीति**। न केवलमनुपलब्धिरेव, अनुपपत्तिरप्यस्तीत्याह—**न किंचिदिति। किंचित्** स्वसंबन्धि परसंबन्धि वा, अल्पं प्रभूतं वा। वाक्यप्रयोगादेर्यत्नसाध्यत्वात्, यत्नस्य च प्रयोजनेन विनाऽनुपपन्नत्वादित्यर्थः। वाक्यानां प्रयोजनपर्यवसायित्वादेव हि पुनरुक्तेः प्रयोजनाभावादूषणत्वं, निष्प्रयोजनवाक्यप्रयोगः, तच्छ्रवणं वाऽनुपपन्नं स्यात्। ततः किं प्रस्तुतस्य प्रयोजनपर्यवसायिनां वाक्यानां प्रवृत्तिनिवृत्तिपरत्वस्य, सिद्धपरत्वेऽपि हि प्रयोजनपर्यवसायित्वमुपपद्यत इत्यत्राह—**तत्रेति**। प्रवृत्तिनिवृत्तिपरत्वेन लोकवेदयोः प्रयोगं दर्शयति—**अर्थार्थीत्यादिना**। प्रवृत्तिनिवृत्तिपरत्वाभावेऽपि प्रयोजनपरं वाक्यं दृष्टमिति शङ्कायां सिद्धपरत्वेनोक्तं वाक्यं दूषयितुमनुवदति—**यत्पुनरिति**। विकल्पयति—**तत्रेति**। प्रथमकोट्यनुपपत्त्या द्वितीयशिरोऽभ्युपगमं शङ्कते—**सतोऽपीति**। दूषयति—**तर्हीति**। तस्मादिति पूर्वपक्षोपसंहारः। **इत्येतदधिकरणपूर्वपक्षिणा मीमांसकेन स्वमतोपपादनम्॥**

जरन्नायावादिपक्षौ द्वौ विद्येते—तत्रैको निष्प्रपञ्चीकरणनियोगवादः, अन्यो ध्याननियोगवादः। एतन्मतद्वयं, ध्याननियोगवादिमुखेन शाङ्करादिमतं च दूषितवन्तमधिकरणपूर्वपक्षिणं प्रति सिद्धान्तं वक्ष्यन्, इदानीं निष्प्रपञ्चीकरणनियोगवादं प्रस्तौति—**अत्र कश्चिदाहेति**।'तं प्रतिजानीते—**वेदान्तेति**। कार्यपरस्य वाक्यस्य सिद्धवस्तुनि प्रमाणभावः कथमित्यभिप्रेत्य—**कथमिति**। उत्तरमाह—**निष्प्रपञ्चमिति। कुर्यादित्यत्रेति**शब्दः प्रकारवचनः। निष्प्रपञ्चीकरणविधिना ब्रह्मणः कोऽन्व-

ब्रह्मानाद्यविद्यया सप्रपञ्चतया प्रतीयमानं निष्प्रपञ्चं कुर्यादिति—ब्रह्मणः प्रपञ्चप्रविलयद्वारेण विधिविषयत्वमिति। कोऽसौ द्रष्टृदृश्यरूपप्रपञ्चप्रविलयद्वारेण साध्यज्ञानैकरसब्रह्मविषयो विधिः, **'न दृष्टेर्द्रष्टारं पश्येः, न मतेर्मन्तारं मन्वीथाः'** (बृ. ३।४।२) इत्यादिः। द्रष्टृदृश्यभेदशून्यं दृशिमात्रं ब्रह्म कुर्यादित्यर्थः। स्वतःसिद्धस्यापि ब्रह्मणो निष्प्रपञ्चतारूपेण कार्यत्वमविरुद्धमिति, तदयुक्तम्; नियोगवाक्यार्थवादिनाहि—नियोगः, नियोज्यविशेषणं, विषयः, करणम्, इतिकर्तव्यता, प्रयोक्ता च वक्तव्यः। तत्र हि नियोज्यविशेषणमनुपादेयम्। तच्च—निमित्तं, फलमिति द्विधा। अत्र किं नियोज्यविशेषणं, तच्च किं निमित्तं फलं वेति विवेचनीयम्। ब्रह्मस्वरूपयाथात्म्यानुभवश्चेन्नियोज्यविशेषणं, तर्हि न तन्निमित्तम्; जीवनादिवदस्यासिद्धत्वात्। निमित्तत्वे च तस्य—नित्यत्वेनापवर्गोत्तरकालमपि जीवननिमित्ताग्निहोत्रादिवन्नित्यं तद्विषयानुष्ठानप्रसङ्गः। नापि फलम्; नैयोगिकफलत्वेन स्वर्गादिवदनित्यत्वप्रसङ्गात्। कश्चात्र नियोगविषयः, ब्रह्मैवेति—चेन्न; तस्य नित्यत्वेनाभव्यरूपत्वात्, अभावार्थत्वाच्च। निष्प्रपञ्चं ब्रह्म साध्यमिति चेत्, साध्यत्वेऽपि फलत्वमेव। अभावार्थत्वान्न विधिविषयत्वम्।

य इत्यपेक्षायामन्वयमाह—**ब्रह्मण इति**। विषयत्वेनान्वय इत्यर्थः। सिद्धस्वरूपस्य ब्रह्मणो विधिविषयत्वानुपपत्तिशङ्कापरिहारार्थं **प्रपञ्चप्रविलयद्वारेणे**त्युक्तम्। अत्र सिद्धस्य साध्यत्वमाकारभेदादविरुद्धमिति गर्भितम्। इह लिङादिशब्दः समाख्यौ, **कथमिति**प्रश्नोत्तरत्वेनेत्थमिति वार्थः। विधिः दर्शयितुमाकाङ्क्षामुत्थापयति—**कोऽसाविति**। कतिपयनाशेऽप्यशक्यस्य विश्वप्रपञ्चनाशनविधिरशक्य इत्यभिप्रायः। **विधिः** विधिवाक्यम्। आविधिकस्य प्रपञ्चस्य बुद्धिनिवृत्तिमात्ररूपो विलयः शक्य इत्यभिप्रायेण वाक्यमुपादत्ते—**न दृष्टेरिति**। दृष्टिव्यतिरिक्तावशेषाज्ञेयनिषेधोऽपि फलितः; **आदि**शब्दोपात्तश्रुत्यन्तरैः कण्ठोक्तश्च। आत्यन्तिकनिवृत्तेरसिद्धत्वाद्विधेयत्वं च युक्तमिति भावः। **शून्य**शब्देनात्यन्तिकनिवृत्तिर्विवक्षिता। **मात्र**शब्देन द्रष्टृदृश्यकल्पकाविद्यानिवृत्तिः। तत एव ह्यात्यन्तिकलसिद्धिः। सिद्धस्य ब्रह्मणो विधेयत्वं कथमिति शङ्कायां **प्रपञ्चप्रविलयद्वारेणे**ति पूर्वविवक्षितमर्थं विस्तरेणाह—**स्वतः सिद्धस्यापीति**। यद्वा, पूर्वं भावार्थव्यतिरिक्तस्य विधिविषयत्वानुपपत्तिः परिहृता, इह तु **स्वतःसिद्धस्ये**त्यादिना प्रपञ्चविलयद्वारेण सिद्धरूपस्यापि विधिविषयत्वानुपपत्तिः परिहृतेति भिदा। भावार्थादन्यत्वं स्वर्गादेरप्यस्ति न तस्य सिद्धत्वं; साध्यं हि तत्। **इत्येतदधिकरणपूर्वपक्षिण उपरि निष्प्रपञ्चीकरणनियोगत्रादिनः प्रत्यवस्थानम्॥**

अधिकरणपूर्वपक्षी मीमांसकस्यं दूषयति—**तदयुक्तमिति**। कथमित्यत्राह—**नियोगेति**। विशिनष्टि विषय इति व्युत्पत्त्या **विषयो** यागादिः। कृतिसाध्यापूर्वप्रतीतिवेलायां कृत्यवच्छेदकत्वेन स विषयः। स एव कार्यनिष्पत्तौ करणं **वक्तव्यः**, न त्वया वक्तुं शक्यमिति भावः। प्रथमं नियोज्यविशेषणं दूषयितुमाह—**तत्रेति**। **तत्र** तेषु वक्तव्येषु। **नियोज्यविशेषणमनुपादेयम्** उपादेयविधेयं तद्व्यतिरिक्तमित्यर्थः। विकल्प्य दूषयितुं विशेषणद्वैविध्यमाह—**तच्चेति**। ततः किमित्यत्राह—**अत्रेति**। **अत्र** निष्प्रपञ्चीकरणनियोगे। नियोज्यविशेषणस्वरूपं शङ्कते—**ब्रह्मस्वरूपेति**। निमित्ततां दूषयति—**तर्हीति**। कृत इत्यत्राह—**जीवनादिवदिति**। 'यावज्जीवमग्निहोत्रं जुहोती'त्यत्र जीवनस्य सिद्धत्वाद्यथा निमित्तत्वं, न तथेत्यर्थः। पुत्रजन्मादिवद्यदा सिध्येत्तदा निमित्तत्वं भविष्यतीत्यत्राह—**निमित्तत्वे चेति**। अपवर्गोत्तरकालमपि वानुष्ठानप्रसङ्गः; यावन्निमित्तमनुष्ठाननियमाभावात्। परिकरशून्येषु तन्नियमाभावो दृष्टः, तस्मात्करणकलेवरविरहेण न तदानीमनुष्ठानमिति चेत्, हन्त स्वदूषणमेव स्वयमाविष्करोषि, तथा हि—सप्रपञ्चतयाऽनुभवस्य यथार्थानुभवरूपत्वाभावात्—अपवर्गोत्तरभाव्येव यार्थार्थ्यानुभवः, तदानीं करणकलेवराभावेऽपि विषयानुष्ठानं शक्यं न वा। अशक्यत्वे—विधेयत्वमेव न स्यात्, अतः शक्यमिति वक्तव्यम्, अतो निमित्तस्य नित्यत्वात्, नैमित्तिकस्य नित्यं शक्यत्वाच्च—नित्यं तदनुष्ठानप्रसङ्ग इति भावः। फलतया विशेषणत्वे दूषणमाह—**नापीति**॥

नियोगविषयानुपपत्तिं वक्तुमाह—**कश्चेति**। शङ्कते—**ब्रह्मैवेति**। दूषयति—**नेति**। हेतुमाह—**तस्येति**। **अभव्यरूपत्वात्** असाध्यत्वात्, अभावार्थत्वाच्च। भावार्थः कर्मशब्दाः—क्रियारूपत्वाभावादित्यर्थः। साध्यत्वं फलस्यास्तीति तद्व्यावर्तकं **भावार्थत्वं**, तदुभयाभावादिति यावत्। निष्प्रपञ्चताकारेण साध्यत्वं शङ्कते—**निष्प्रपञ्चमिति**। प्रतिवदति—**साध्यत्वेऽपीति**।—**फलत्वमेवेति**। विषयत्वं चेत् फलव्यतिरिक्तत्वं स्यात्, फलव्यतिरिक्तत्वाभावाद्विषयत्वमयुक्तमिति तात्पर्यम्। हेत्वन्तरं कण्ठोक्त्या दर्शयन् विषयत्वं दूषयति—**अभावार्थत्वाच्च विधिविषयत्वमिति**।

साध्यत्वं च कस्य, किं—ब्रह्मणः, उत प्रपञ्चनिवृत्तेः। न तावद्ब्रह्मणः; सिद्धत्वादनित्यत्वप्रसक्तेश्च। अथ प्रपञ्चनिवृत्तेः; न तर्हि ब्रह्मणः साध्यत्वम्। प्रपञ्चनिवृत्तिरेव विधिविषय इति—चेन्न, तस्याः फलत्वेन विधिविषयत्वायोगात्। प्रपञ्चनिवृत्तिरेव हि मोक्षः, स च फलम्। अस्य च नियोगविषयत्वे—नियोगात्प्रपञ्चनिवृत्तिः, प्रपञ्चनिवृत्त्या नियोग इतीतरेतराश्रयत्वम्। अपिच—किं निवर्तनीयः प्रपञ्चो मिथ्यारूपः, सत्यो वा। मिथ्यारूपत्वे ज्ञाननिवर्त्यत्वादेव नियोगेन न किंचित्प्रयोजनम्। नियोगस्तु निवर्तकज्ञानमुत्पाद्य तद्द्वारेण प्रपञ्चस्य निवर्तक इति चेन्, तत्त्ववाक्यादेव जातमिति—न नियोगेन प्रयोजनम्। वाक्यार्थज्ञानादेव ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य मिथ्याभूतस्य प्रपञ्चस्य बाधितत्वात्—सपरिकरस्य नियोगस्यासिद्धिश्च। प्रपञ्चस्य निवर्त्यत्वे—प्रपञ्चनिवर्तको नियोगः किं ब्रह्मस्वरूपमेव, उत तद्व्यतिरिक्तः। यदि ब्रह्मस्वरूपमेव निवर्तकं, निवर्तकस्य नित्यतया निवर्त्यप्रपञ्चसद्भाव एव न संभवति, नित्यत्वेन नियोगस्य विषयानुष्ठानसाध्यत्वं च न घटते। अथ ब्रह्मस्वरूपव्यतिरिक्तः, तस्य कृत्स्नप्रपञ्चनिवृत्तिरूपविषयानुष्ठानसाध्यत्वेन प्रयोक्ता च नष्ट इति—आश्रयाभावादसिद्धिः। प्रपञ्चनिवृत्तिरूपविषयानुष्ठानेनैव ब्रह्मस्वरूपव्यतिरिक्तस्य कृत्स्नस्य निवृत्तत्वात्—न नियोगनिष्पाद्यं मोक्षाख्यं फलम्। किंच—प्रपञ्चनिवृत्तेर्नियोगकरणस्येतिकर्तव्यताभावात्, अनुपकृतस्य च करणत्वायोगान्न करणत्वम्। कथमितिकर्तव्यताभाव इति चेत्, इत्थम्—अस्येतिकर्तव्यता भावरूपा, अभावरूपा वा। भावरूपा च करणशरीरनिष्पत्ति—तदनुग्रहकार्यभेदभिन्ना, उभयविधा च न संभवति। न हि मुद्गरा-

---

विशिष्टस्य विषयत्वानुपपत्तिरुक्ता, अथ विशेष्यांशस्य, विशेषणांशस्य च विषयत्वानुपपत्तिं च वक्ष्यन् विकल्पयति—**साध्यत्वं चेति**। यद्वा, विशिष्टस्य साध्यत्वाभ्युपगमेन विषयत्वं दूषितम्, अथ विशिष्टस्य साध्यत्वं दूषयितुं विकल्पयति—**साध्यत्वं चेति**। विशिष्टस्य साध्यत्वानुपपत्तिर्हि विशेषणस्य, विशेष्यस्य, उभयस्य च साध्यत्वानुपपत्त्या स्यात्, तत्र उभयस्येति विकल्पानुक्तिः शिरोद्वयेन तुल्यदूषणत्वात्। प्रथमं दूषयति—**न तावदिति**। कुत इत्यत्राह—**सिद्धत्वादनित्यत्वप्रसक्तेश्चेति**। सिद्धत्वान्न साध्यत्वं, साध्यत्वाङ्गीकारे तु—भावरूपत्वे सति साध्यत्वादनित्यत्वप्रसक्तेश्चेत्यर्थः। द्वितीयं शङ्कते—**अथेति**। दूषयति—**न तर्हीति**। प्रपञ्चनिवृत्तेः साध्यत्वे ब्रह्मणः साध्यत्वाभावान्न विधिविषयत्वमित्यर्थः। प्रपञ्चनिवृत्तेर्विधिविषयत्वमाशङ्क्य दूषयति—**प्रपञ्चेत्यादिना**। तस्याः फलत्वमुपपादयति—**प्रपञ्चनिवृत्तिरेव हीति**। प्रपञ्चनिवृत्तिर्मोक्षोऽस्तु ततः किं विषयत्वानुपपत्तेरित्यत्राह—**स चेति**। प्रपञ्चनिवृत्तेर्मोक्षरूपत्वात्, मोक्षस्य च फलत्वात्—फलभूतायाः न विषयत्वमित्यर्थः। दूषणान्तरमाह—**अस्य चेति**। **अस्या** इति वक्तव्येऽपि फलत्वविवक्षयाऽस्येत्युक्तिः। फलत्वं विषयत्वं चेत्याकारद्वयाभ्युपगमे—प्रपञ्चनिवृत्तिः। फलत्वात्—नियोगसाध्या, विषयत्वात्प्रपञ्चनिवृत्त्या—नियोगसिद्धिः—इत्यन्योन्याश्रय इत्यर्थः॥

निष्प्रपञ्चीकरणपक्षे मुखान्तरेण दूषणमाह—**अपि चेति**। यद्वा नियोगविषयदूषणेनान्योन्याश्रयेण नियोगश्च दूषितो भवति। मुखान्तरेणापि नियोगं दूषयति—**अपि चेति**। दूषयितुं विकल्पयति—**किमिति**। प्रथमं दूषयति—**मिथ्येति**। साफल्यं शङ्कते—**नियोगस्त्विति**। दूषयति—**तदिति**। **स्ववाक्यात्** प्रपञ्चमिथ्यात्वब्रह्मनिर्विशेषत्वपरवाक्यादित्यर्थः। नियोगस्य निष्फलत्वदूषणोक्त्या—नियोज्यविशेषणं च दूषितं भवति; नियोगसाध्यफलस्यैव फलतया नियोज्यविशेषणत्वात्, इह तदयोगाच्च। दूषणान्तरमाह—**वाक्यार्थज्ञानादेवेत्यादिना**। पूर्वं विकल्पितशिरोद्वये द्वितीयं शिरो दूषयितुमाह—**प्रपञ्चस्येति**। प्रपञ्चस्य सत्त्वे न नियोगनिवर्त्यत्वमित्यर्थः। **किमित्यादिना** विकल्प्य प्रथमं दूषयति—**यदीत्यादिना**। द्वितीयं दूषयितुं तदभ्युपगमं शङ्कते—**अथेति**। दूषयति—**तस्येति**। **तस्येत्यादिना नष्ट** इत्यन्तेन प्रयोक्तृदूषणं च कृतं भवति। **प्रपञ्चनिवृत्ती**त्यादिना प्रपञ्चसत्त्वेऽपि फलाभावोक्तिमुखेन नियोगो दूषितः। करणम्, इति कर्तव्यतां च दूषयति—**किंचेति**। इतिकर्तव्यताया अभावं विवरीतुमाह—**कथमिति**। प्रतिवक्ति—**इत्थमिति**। भावरूपत्वपक्षे द्वैविध्यमाह—**भावरूपा चेति**। करणशरीरनिष्पत्तिरवघातवत्प्रोक्षणवच्च—दृष्टादृष्टार्थतया द्विधेति चाभिप्रेतम्। ततः किमित्यत्राह—**उभयविधेति**। **उभयविधा** निष्पादिका, अनुग्राहिका च। निष्पादकपक्षे प्रथमं दृष्टार्थत्वे दूषणमाह—**न हीति**। कृत्स्नप्रपञ्चनिवृत्तिरूपकरणशरीरनिष्पादिकाभावरूपा दृष्टार्था न संभवतीत्यर्थः। **अदृष्टार्थाऽस्तु चेत्, प्रपञ्चसत्त्वप्रसङ्गः, अप्रामाणिकत्वं चेति स्फुटमिति**—न कण्ठोक्तम्। **अथानुग्रहं दूषयति**—

मिघातादिवत्कृत्स्नप्रपञ्चस्य निवर्तकः कोपि दृश्यत इति—दृष्टार्था न संभवति । नापि निष्पन्नस्य करणस्य कार्योत्पत्तावनुग्रहः संभवति; अनुग्राहकांशसद्भावेन कृत्स्नप्रपञ्चनिवृत्तिरूपकरणस्वरूपासिद्धेः । ब्रह्मणोऽद्वितीयत्वज्ञानं प्रपञ्चनिवृत्तिरूपकरणशरीरं निष्पादयतीति चेन्, तेनैव प्रपञ्चनिवृत्तिरूपो मोक्षः सिद्ध इति—न करणादिनिष्पाद्यमवशिष्यत इति पूर्वमेवोक्तम् । अभावरूपत्वे चाभावादेव न करणशरीरं निष्पादयति । नाप्यनुग्राहकः । अतो निष्प्रपञ्चब्रह्मविषयो विधिर्न संभवति । अन्योऽप्याह—यद्यपि वेदान्तवाक्यानां न परिनिष्पन्नब्रह्मस्वरूपपरतया प्रामाण्यं, तथापि ब्रह्मस्वरूपं सिध्यत्येव । कुतः, ध्यानविधिसामर्थ्यात् । एवमेव हि समामनन्ति—**'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'** (बृ. २।४।५), **'य आत्माऽपहतपाप्मा सोन्वेष्टव्यः स विजिज्ञासितव्यः'** (छा. ८।७।१), **'आत्मेत्येवोपासीत'** (बृ. १।४।७), **'आत्मानमेव लोकमुपासीत'** (बृ. १।४।१५) इति । अत्र ध्यानविषयो हि नियोगः स्वविषयभूतं ध्यानं ध्येयैकनिरूपणीयमिति—ध्येयमाक्षिपति । स च ध्येयः स्ववाक्यनिर्दिष्ट आत्मा । स किंरूप इत्यपेक्षायां तत्स्वरूपविशेषसमर्पणद्वारेण **'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै. २।१।१), **'सदेव सौम्येदमग्र आसीत् । एकमेवाद्वितीयम्'** (छा. ६।२।१) इत्येवमादीनां वाक्यानां ध्यानविधिशेषतया प्रामाण्यमिति विधिविषयभूतध्यानशरीरानुप्रविष्टब्रह्मस्वरूपेऽपि तात्पर्यमस्त्येव । अत **'एकमेवाद्वितीयम्'** (छा. ६।२।१), **'तत्सत्यं स आत्मा' तत्त्वमसि श्वेतकेतो** (छा. ६।८।७), **नेह नानास्ति किंचन'** (बृ. ४।४।१९) इत्येव-

---

नापीति । तदसंभवमुपपादयति—**अनुग्राहकेति** । अनुग्राहकोहि करणानन्तरभावी, कृत्स्नप्रपञ्चनिवृत्तिरूपकरणानन्तरमनुग्राहकः तिष्ठति चेत्, करणमेव न सिद्धं स्यात्, यदा करणसिद्धिः न तदानीमनुग्राहको विद्यत इत्यनुग्राहकासंभव इत्यर्थः । इतिकर्तव्यतासद्भावमुखेन करणसिद्धि शङ्कते—**ब्रह्मण इति** । दूषयति—**तेनैवेति** । **करणादिनिष्पाद्यं** करणनिष्पाद्यो नियोगः, नियोगनिष्पाद्यं फलमित्यादिशब्दार्थः । करणं चेत्स्वकार्यकरं स्यात् तदभावात्करणत्वमयुक्तमित्यर्थः । अथाभावरूपेतिकर्तव्यतां दूषयति—**अभावरूपत्व इति** । **अभावादेव** अभावरूपेतिकर्तव्यताया अप्रामाणिकत्वादेवेत्यर्थः । निवृत्तिरूपशमादीनां नाभावरूपेतिकर्तव्यतात्वं; तेषां ज्ञाननिष्पादकत्वेन प्रपञ्चनिवृत्तिरूपकरणनिष्पादकत्वायोगादिति भावः । **अत्राभावादेवेत्येवकारेण** पूर्वमदृष्टार्थभावरूपेतिकर्तव्यताया अप्रामाणिकत्वस्याभिप्रेतत्वं गम्यते । दूषणमुपसंहरति—**अत इति** । **विधिर्नियोगः**—निष्प्रपञ्चीकरणविषयो नियोग इत्यर्थः । अतः प्रवर्तकवाक्येनैव ब्रह्मस्वरूपसिद्धिरिति वक्तुं न शक्यमिति फलितम् । **इति समन्वयाधिकरणपूर्वपक्षिणा निष्प्रपञ्चीकरणनियोगवादिनिरसनम् ॥**

अथ ध्याननियोगवादिपक्षमुपक्षिपति—**अन्योऽप्याहेति** । ब्रह्मणि वेदान्तवाक्यानां स्वांतक्येन प्रामाण्याभावमङ्गीकृत्याह—**यद्यपीति** । तर्हि कथं तत्सिद्धिरित्याह—**तथापीति** । व्याघातामिप्रायेणाह—**कुत इति** । हेतुमाह—**ध्यानविधीति** । ध्यानविधिः कः, तस्य सामर्थ्यं कथमित्यत्राह—**एवमेव हीति** । यथा वाक्यानां ध्यानपरत्वेऽपि परिनिष्पन्नं सिध्यति, तथैवेत्यर्थः । ध्यानविधिवाक्यान्याह—**आत्मा वा इति** । **निदिध्यासितव्य** इत्युपासनमुक्तम् । **द्रष्टव्य** इति तस्य दर्शनरूपत्वम् । **विजिज्ञासितव्य** इति सामान्यशब्दः । **आत्मेत्यैक्योपासनमुक्तम्** । **आत्मानमिति** स्वस्य जगत्तादात्म्योपासनसामर्थ्यं दर्शयति । **अत्रेति** । ध्येयमाक्षिप्तमस्तु तद् ब्रह्मेति कथं ज्ञायत इत्यत्राह—**स च ध्येय इति** । आकाङ्क्षायां सन्निहितमेव योग्यं चेत्, तत्परित्यक्तुं न युक्तं; गामानयेत्यादिषु हि तथा दृष्टमिति भावः । स्वरूपमात्रप्रतिपादकानां कारणशोधकवाक्यानामपि विध्यपेक्षितसमर्पकत्वेनैव प्रामाण्यमित्यत्राह—**स किं रूप इति** । शोधितस्वरूपस्य ध्येयत्वात्**सत्यादि**वाक्यं प्रथममुपात्तं, तदनुगुणार्थतया **सदेवे**ति कारणवाक्यं पश्चादुदाहृतम् । **ध्यानशरीरानुप्रविष्ट इति** । 'अर्थेनैव विशेषो हि निराकारतया धिया'मिति भावः । **अस्त्येवेति** । स्ववाक्यप्रतिपन्नस्वर्गादिफलविषयस्य 'यस्मिन्नोष्ण'मित्यादिवाक्यस्येव विधिशेषतया प्रामाण्यमिति भावः । ध्येयब्रह्मस्वरूपं हि ध्यानशरीरानुप्रविष्टं, प्रपञ्चमिथ्यात्वस्यं ध्यानशरीरानुप्रवेशात्कथं भेदनिषेधे तात्पर्यमित्यत्राह—**अत इति** । **अतः** विधिशेषभूतस्य सिद्धार्थे तात्पर्यस्य सद्भावात् । अद्वितीयं ब्रह्म ध्येयं, भेदनिषेधश्रुतयश्च ब्रह्मणोऽद्वितीयत्वपराः, ब्रह्मणोऽद्वितीयत्वमेव भेदमिथ्यात्वमिति—ध्यानशरीरानुप्रविष्टे भेदनिषेधे तात्पर्यमस्तीत्यर्थः । भेदग्राहिप्रमाणविरोधात्—न शास्त्रमद्वितीयं ब्रह्म प्रतिपादयति—'आदित्यो यूप'

मादिभिर्ब्रह्मस्वरूपमेकमेव सत्यं तद्व्यतिरिक्तं सर्वं मिथ्येत्यवगम्यते। प्रत्यक्षादिभिः, भेदावलम्बिना च कर्मशास्त्रेण भेदः प्रतीयते। भेदाभेदयोः परस्परविरोधे सत्यनाद्यविद्यामूलत्वेनापि भेदप्रतीत्युपपत्तेः—अभेद एव परमार्थ इति निश्चीयते। तत्र ब्रह्मध्याननियोगेन तत्साक्षात्कारफलेन निरस्तसमस्ताविद्याकृत-विविधभेदाद्वितीयज्ञानैकरसब्रह्मभावरूपो मोक्षः प्राप्यते। न च वाक्यार्थज्ञानमात्रेण ब्रह्मभावसिद्धिः; अनुपलब्धेः, विविधभेददर्शनानुवृत्तेश्च। तथा सति श्रवणादिविधानमनर्थकं स्यात्। अथोच्येत—रज्जुरेषा न सर्पः इत्युपदेशेन सर्पभयनिवृत्तिदर्शनाद्रज्जुसर्पवद्ब्रह्मस्य च मिथ्यारूपत्वेन ज्ञानबाध्यतया—तस्य वाक्यजन्यज्ञाननैव निवृत्तिर्युक्ता, न नियोगेन। नियोगसाध्यत्वे मोक्षस्यानित्यत्वं स्यात्—स्वर्गादिवत्। मोक्षस्य नित्यत्वं हि सर्ववादिसंप्रतिपन्नम्। किंच—धर्माधर्मयोः फलहेतुत्वं स्वफलानुभवानुगुणशरीरोत्पादनद्वारेणेति—ब्रह्मादिस्थावरान्तचतुर्विधशरीरसंबन्धरूपसंसारफलत्वमवर्जनीयम्। तस्मान्न धर्मसाध्यो मोक्षः। तथा च श्रुतिः—**'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति। अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः'** (छा. ८।१२।१) इति। अशरीरत्वरूपे मोक्षे धर्माधर्मसाध्य-प्रियाप्रियविरहश्रवणात्—न धर्मसाध्यमशरीरत्वमिति विज्ञायते। नच—नियोगविशेषसाध्यफलविशेष वद्ध्याननियोगसाध्यमशरीरत्वम्; अशरीरत्वस्य स्वरूपत्वेनासाध्यत्वात्। यथाहुः श्रुतयः—**'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्। महान्तं विभुमात्मानं मत्वा धीरो न शोचति॥'** (का. १।२।२२), **'अप्राणो ह्यमनाः शुभ्रः'** (मु. २।१।२), **'असङ्गो ह्ययं पुरुषः'** (बृ. ४।३।१५) इत्याद्याः। अतोऽशरीरत्वरूपो मोक्षो नित्य इति न धर्मसाध्यः। तथा च श्रुतिः—**'अन्यत्र धर्मादन्यत्राधर्मा-**

इत्यादिवदिति शङ्कां परिहर्तुं प्रत्यक्षादिभिर्विरुद्धप्रतीतिमभ्युपगच्छति—**प्रत्यक्षादिभिरिति**। शङ्कां परिहरति—**भेदाभेद-योरिति**। भेदप्रतीतेरन्यथासिद्धत्वात्—अन्यथासिद्धशास्त्रावगतमैक्यं तात्त्विकमित्यर्थः। तर्हि विषयः करणं प्रयोक्ता फल-मित्यादि वक्तव्यम्। नियोगनिवर्त्यत्वे—प्रपञ्चसत्यत्वप्रसङ्गः; नित्यप्राप्तत्वात्। ब्रह्मभावो न फलमित्याह—**तत्रेति**। **ध्याननियोगेने**ति ध्यानस्य विषयत्वमुक्तम्। नियोगान्मोक्षश्चेत्, न ज्ञानान्मोक्ष इति शङ्कां व्युदस्यति—**तत्साक्षात्का-रफलेनेति**। नियोगस्योपायत्वं ज्ञानद्वारकमित्यर्थः। **निरस्ते**त्यादिना अविद्यानिवृत्तिः फलमित्युक्तम्। तदेवं फलतया नियोज्यविशेषणम्। उपासकः प्रयोक्ता, शमादिरितिकर्तव्यतेत्यादयस्माकं सिद्धमिति भावः। वाक्यार्थज्ञानमात्रा-न्मोक्षवादिनं दूषयति—**न चेति**। प्रत्यक्षविरोधमाह—**अनुपलब्धेर्विविधभेददर्शनानुवृत्तेश्चेति**। शास्त्र-विरोधमाह—**तथा च सतीति**। **इति समन्वयाधिकरणपूर्वपक्षिण उपरि ध्याननियोगवादिनः प्रत्यवस्थानम्॥**

अथ साक्षान्मायावादिना स्वमतं पश्चाद्विवक्षता प्रथमं ध्याननियोगवादिपक्षस्य प्रतिक्षेपमाशङ्कते—**अथोच्येतेति**। बन्धस्य ज्ञानमात्रनिवर्त्यत्वं सोपपत्तिकमाह—**रज्जुरेवेति**। निवर्त्यमिथ्यात्वं द्व्युभयसंमतम्, अत एव नियोगनैरपेक्ष्यमाह—**नेति**। अन्यथाऽनिष्टमाह—**नियोगेति**। मोक्षानित्यत्वस्य तदनिष्टतामाह—**मोक्षस्येति**। नियोगो विपरीतफलप्रदश्चेत्याह—**किंचेति**। **द्वारेणे**त्यन्तेन प्रसञ्जनीय-प्रसञ्जकयोर्व्याप्तिर्दर्शिता। **अवर्जनीय**मित्यन्तेन प्रसङ्गः। ततः किमित्याह—**तस्मादिति**। **तस्मा**त्संसारफलत्वप्रसङ्गात्। व्यापकस्य संसारफलत्वस्य निवृत्त्या—व्याप्यं धर्मसाध्यत्वं च निवृत्तमित्यर्थः। मोक्षस्याशरीरत्वरूपश्रुत्या च नियोगसाध्यत्वमाह—**तथा चेति**। अशरीरत्वरूपमोक्षे धर्माधर्मफलरूपप्रियाप्रियसंब-न्धविरहश्रवणान्मोक्षस्य धर्मसाध्यत्वाभावः फलित इत्याह—**इत्यशरीरत्वरूपेति**। एवं नियोगसाध्यत्वे मोक्षस्य धर्माधर्मफलसंबन्धराहित्यश्रवणानुपपत्तिरिति श्रुत्यर्थापत्तिरुक्ता भवति। यथा—नियोगविशेषस्य पापनिवृत्तिः फलमुच्यते, तद्वत्—नियोगविशेषस्य बन्धनिवृत्तिफलत्वं संभवतीत्यत्राह—**न चेति**। **नियोगविशेष-फलविशेष**शब्दाभ्यां प्राय-श्चित्तपापक्षपणे विवक्षिते। कुत इत्याह—**अशरीरत्वस्येति**। अशरीरत्वस्य स्वरूपत्वे श्रुतिमाह—**यथाहुरिति**। **अप्राण इति**। प्राणमनःसंबन्धाभावादशरीरत्वं सिद्धं; सशरीरस्य हि प्राणमनःसंबन्ध इति भावः। **अतोऽशरीरत्वस्या-त्मस्वरूपत्वावगमादित्यर्थः**। न केवलं कर्मफलसंबन्धविरहात्, शरीरत्वस्य स्वाभाविकत्वाच्च—नियोगसाध्यत्वाभावः सिद्धः. अपितु कण्ठोक्तश्रेत्याह—**तथा च श्रुतिरिति**। **अन्यत्र धर्मात्** धर्मादन्यत्र—धर्मेण विना। अनेन धर्मसंबन्धरा

दन्यत्रास्मात्कृताकृतात् । अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद ॥' (का. १।२।१४) इति । अपि च—उत्पत्तिप्राप्तिविकृतिसंस्कृतिरूपेण चतुर्विधं हि साध्यत्वं मोक्षस्य न संभवति । न तावदुत्पाद्यः; मोक्षस्य ब्रह्मस्वरूपत्वेन नित्यत्वात् । नापि प्राप्यः; आत्मस्वरूपत्वेन ब्रह्मणो नित्यप्राप्तत्वात् । नापि विकार्यः; दध्यादिवदनित्यत्वप्रसङ्गादेव । नापि संस्कार्यः; संस्कारो हि दोषापनयनेन वा, गुणाधानेन वा साधयति । न तावद्दोषापनयनेन; नित्यशुद्धत्वाद्ब्रह्मणः । नाप्यतिशयाधानेन; अनाधेयातिशयस्वरूपत्वात् । नित्यनिर्विकारत्वेन स्वाश्रयायाः, पराश्रयायाश्च क्रियाया अविषयतया—न निघर्षणेनादर्शादिवदपि संस्कार्यत्वम् । नच देहस्थया स्नानादिक्रियया आत्मा संस्क्रियते, किं त्वविद्यागृहीतस्तत्संगतोऽहंकर्ता । तत्फलानुभवोऽपि तस्यैव । न चाहंकर्तैवात्मा; तत्साक्षित्वात् । तथा च मन्त्रवर्णः—**'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्योऽभिचाकशीति ।'** (मु. ३।१।१), **'आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ।'** (का. १।३।४), **'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥'** (श्वे. ६।११), **'स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् । कविर्मनीषी'** (ई. ८) इति चाविद्यागृहीतादहंकर्तुरात्मस्वरूपमनाधेयातिशयं नित्यशुद्धं निर्विकारं निष्कृष्यते । तस्मादात्मस्वरूपत्वेन न साध्यो मोक्षः । यद्येवं किं वाक्यार्थज्ञानेन क्रियत इति चेत्, मोक्षप्रतिबन्धनिवृत्तिमात्रमिति ब्रूमः । तथा च श्रुतयः—**'त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि'** (प्र. ६।८), **'श्रुतं ह्येवमेव भगवद्दृशेभ्यस्तरति शोकमात्मविदिति । सोऽहं भगवः शोचामि । तं मा भगवाञ्छोकस्य पारं तारयतु'** (छाः

हित्यमुक्तम् । संबन्धश्च साध्यसाधनभाव इति भावः । अत्र **कृताकृत**शब्देन क्रियमाणमुच्यते । **भूतभव्य**शब्दाभ्यां भूतभविष्यती ॥

मुखान्तरेण मेक्षस्य नियोगसाध्यत्व दूषयति—**अपि चेति** । साध्यत्वस्य वैविध्यं वदंस्तदसंभवमाह—**उत्पत्तीति । मोक्ष**शब्देन किं निवृत्तावियं स्वरूपं विवक्षितम्, उताविद्यानिवृत्तिरिति विकल्पे, स्वरूपस्य विवक्षितत्वे—चतुर्विधसाध्यत्वानुपपत्तिमाह—**न तावदित्यादिना । निवृत्तेरुत्पाद्यत्वेऽप्यनाशित्वं प्रध्वंसाभावरूपत्वा**दिति वक्ष्यते । **संस्कारोहीत्यादि** । अत्र **नित्यशुद्ध**शब्देन परमार्थदोषानन्वयोऽभिप्रेतः । नित्यशुद्धस्य निर्विशेषस्य वस्तुनो दोषापनयनगुणाधानरूपसंस्कारविषयत्वं नित्यशुद्धस्नानाधेयातिशयाभ्यां नास्तीत्युक्तम्, अथ क्रियाविषयत्वाभावात्—संस्कारविषयत्वाभाव उच्यते—**नित्येत्यादिना** । निर्विकारत्वेन क्रियाविषयत्वाभावः कथम्, इत्थं—यद्यत्क्रियाविषयभूतं तद्धि सविकारं दृष्टं, यदा दर्पणो हस्ततलादिषु निघृष्यते तदा दर्पणाश्रया क्रिया, यदा दर्पणे पाणिर्निघृष्यते तदा पाण्याश्रया क्रियेति—स्वाश्रयपराश्रयक्रियवयोर्दर्पणोदाहरणम् । क्रियाविषयत्वाभावेऽपि संस्कार्यत्वं दृष्टमित्यत्राह—**न चेति** । तर्हि कः संस्क्रियत इत्यत्राह—**किं त्विति । अविद्यागृहीतः** अविद्याकल्पितः । तेनातिशयाधानानुगुणविकारित्वं सूचितम् । यद्वा, **अविद्यागृहीत** इति शुद्धशुद्धादिभ्रमवत्तया शुद्धिसापेक्षत्वं दर्शितम् । अहंकर्तुरपि देहाद्विलक्षणत्वात्कथं देहगतस्नानादिभिस्वस्यातिशय इत्यत्राह—**तंत्सङ्गत इति । तत्सङ्गतः** देहसङ्गतः । आत्मनः फलभोक्तृत्वात्स एव संस्कार्य इत्यत्राह—**तत्फलेति** । फलभोक्ताऽहमर्थश्चेत्स एवात्मेत्यत्राह—**न चाहमिति** । हेतुमाह—**तदिति** । यो यस्य साक्षी स हि न तद्भवतीति भावः । साक्षित्वे मानमाह—**तथा चेति । तयोरन्य** इत्यादेरयमर्थः—अहंकारज्ञात्मनोरेकः फलभोक्ता, **अन्योऽनश्नन्निति** । अहंकर्तैव भोक्तेति स्पष्टं दर्शयति—**आत्मेन्द्रियेति । आत्मा** देहः; देहादिसंबद्धस्यैव भोक्तृत्वात् । आत्मनोऽशरीरस्याप्राणस्यामनस्त्वादिश्रवणात्, **अनश्नन्नि**त्यभोक्तृत्वश्रवणाच्च—भोक्तुर्विलक्षण आत्मेत्यभिप्रायः । यद्वा, **आत्म**शब्दः संविदात्मपरः, ततश्च तद्युक्तस्य भोक्तृत्वात्—**तस्य** भोक्तृत्वं नास्तीत्यहंकारस्यैव भोक्तृत्वमित्यभिप्रायः । **एको देव** इत्यत्र **केवल**शब्देन फलान्वयराहित्यं विवक्षितमिति तस्यात्रोपयोगः । **निर्गुणः** अगुणवत्त्वात्तादभोक्तृत्वार्थः । **साक्षी** अहंकारे व्याप्रियमाणे स्वयं साक्षिमात्रतयाऽवस्थानात्—न भोक्तेति भावः । **स पर्यगादिति । शुक्रम्** अविद्याराहितं, वासनारहितं वा । **शुद्धमपापविद्धं** कर्मफलरहितं, कर्मरहितं च । **पर्यगात्** गत्यर्था बुद्ध्यर्थाः, अमन्यतेत्यर्थः । उदाहृतश्रुतिप्रतिपन्नाकारोपेतमात्मस्वरूपं वदति—**अविद्येति । अहंकर्तुर्निष्कृष्यत** इत्यन्वयः । मुक्तेरसाध्यत्वं निगमयति—**तस्मादिति । ज्ञानवैयर्थ्यं शङ्कते—यद्येवमिति । परिहरति—मोक्षेति ।** प्रतिबन्धनिवृत्तेरेव साध्यत्वं श्रुतिसिद्धमाह—**तथा चेति ।**

७।१३) । **'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनत्कुमारः'** (छा. ७।२६।२) इत्याद्याः । तस्मान्नित्यस्यैव मोक्षस्य प्रतिबन्धनिवृत्तिर्वाक्यार्थज्ञानेन क्रियते । तन्निवृत्तिस्तु साध्यापि प्रध्वंसाभावरूपा न विनश्यति । **'ब्रह्म वेद ब्रह्मैव भवति'** (मु. ३।२।९), **'तमेव विदित्वाति मृत्युमेति'** (श्वे. ३।८) इत्यादिवचनं मोक्षस्य वेदनानन्तरभावितां प्रतिपादयन्नियोगव्यवधानं प्रतिरुणद्धि । न च—विदिक्रियाकर्मत्वेन वा, ध्यानक्रियाकर्मत्वेन वा कार्यानुप्रवेशः: उभयविधकर्मत्वप्रतिषेधात्—**'अन्यदेव तद्विदितादथो अविदितादधि ।'** (के. १।१।३) **'येनेदं सर्वं विजानाति तत्केन विजानीयात्'** (बृ. २।४।१४) इति, **'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।'** (के. १।१।४) इति च । न चैतावता शास्त्रस्य निर्विषयत्वम्; अविद्यापरिकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य । न हीदंतया ब्रह्म विषयीकरोति शास्त्रम्, अपि त्वविषयं प्रत्यगात्मस्वरूपं प्रतिपादयदविद्याकल्पितज्ञातृज्ञेयविभागं निवर्तयति । तथा च शास्त्रं—**'न दृष्टेर्द्रष्टारं पश्येः, न मतेः'** (बृ. ३।४।२) इत्येवमादि । नच—ज्ञानादेव बन्धनिवृत्तिरिति श्रवणादिविध्यानर्थक्यम्; स्वभावप्रवृत्तसकलेतरविकल्पविमुखीकरणद्वारेण वाक्यार्थावगतिहेतुत्वात्तेषाम् । नच—ज्ञानमात्राद्बन्धनिवृत्तिर्न दृष्टेति वाच्यम: बन्धस्य मिथ्यारूपत्वेन ज्ञानोत्तरकालं स्थित्यनुपपत्तेः । अत एव न शरीरपातादूर्ध्वमेव बन्धनिवृत्तिरिति वक्तुं युक्तम् । न हि मिथ्यारूपसर्पनिवृत्तिः रज्जुयाथात्म्यज्ञानातिरेकेण सर्पविनाशमपेक्षते । यदि शरीरसंबन्धः पारमार्थिकस्तर्हि तद्विनाशापेक्षा, स तु ब्रह्मव्यतिरिक्ततया न पारमार्थिकः । यस्य तु बन्धो न निवृत्तस्तस्य ज्ञानमेव नजातमित्यवगम्यते; ज्ञानकार्यादर्शनात् । तस्माच्छरीरस्थितिर्भवतु वा, मा वा, वाक्यार्थज्ञानसमन-

---

प्रतिबन्धनिवृत्तेः साध्यत्वं निगमयति—**तस्मादिति** । प्रतिबन्धनिवृत्तेः साध्यत्वेनानित्यत्वं स्यादित्याह—**निवृत्तिस्त्विति** । अयं परिहारो नियोगसाध्यत्वपक्षेऽपि तुल्य इति—चेन्न; **नियोगसाध्यत्वे प्रपञ्चसत्यत्वं स्यादित्यभिप्रेतमित्युक्तत्वात्** । नियोगसाध्यत्वपक्षे श्रुतिस्वारस्यहानिमाह—**ब्रह्मेति** । श्रुतिस्वारस्यमेव विलम्बं न सहत इति भावः । कथं नियोगव्यवधानप्रतिरोधः, विधिशेषतया हि ब्रह्मणः सिद्धिः, तत्सिद्ध्यर्थं नियोगः स्वीकार्य इति शङ्क्यां—नियोगविशेषत्वं विदिकर्मत्वेन, ध्यानकर्मत्वेन चोभयथापि न संभवतीत्याह—**न च विदीति । वेदनं** ज्ञानम् । **उपासनं** ज्ञानविशेषः । अत्र **वेदन**शब्दो निष्प्रपञ्चीकरणज्ञानविशेषे विश्राम्यति; विवक्षावशात्, अतो निष्प्रपञ्चीकरणनियोगवादस्यापि दूषणं फलितम् । विद्युपासिकर्मत्वाभावे श्रुतिमाह—**अन्यदिति । विदितात्** ज्ञेयात् । **अविदितात्** ज्ञातुरित्यर्थः । **अन्यदेवेति** । विदिकर्मत्वनिषेधः । **तदेवेति** ध्यानकर्मत्वनिषेधः ॥

विदिकर्मत्वाभावे शास्त्रवेद्यत्वासिद्ध्या शास्त्रस्य निर्विषयत्वमाशङ्क्य परिहरति—**न चेति । ब्रह्म वेद, ब्रह्मविदित्यादिभिर्ब्रह्मणो वेद्यत्वं प्रतीयत इत्यत्राह—नं हीदंतयेति । इदंतया** प्रमेयतया । **अपि त्विति** । प्रत्यगात्मस्वरूपं निर्विशेषमविषयतया प्रतिपादयतीत्यर्थः । शास्त्रस्य भेदनिवृत्तिपरत्वं दर्शयति—**तथाचेति** । ज्ञानादेव बन्धनिवृत्तिश्चेन्, शास्त्रप्रत्यक्षविरोधः स्यादित्याशङ्क्य शास्त्रविरोधं तावत्परिहरति—**नच ज्ञानादिति । श्रवणादिविध्यानर्थक्यमिति** । श्रवणमननयोरपि विधेयत्वं पूर्वपक्षिणोक्तमिति न विरोधः । कुत इत्यत्राह—**स्वभावेति । स्वभावप्रवृत्त**शब्देनानादिप्रवृत्तत्वं विवक्षितम् । अथ प्रत्यक्षविरोधं परिहरति—**न च ज्ञानमात्रादिति** । कथमित्यत्राह—**बन्धस्येति** । कथं स्थित्यनुपपत्तिः; बन्धो ह्यनुवर्तत इति शङ्का **यस्य तु बन्ध** इत्यादिना परिहरिष्यते । उक्तादेव हेतोः शरीरपातानपेक्षत्वमाह—**अत एवेति । दृष्टान्तेनोपपादयति—न हीति** । दृष्टान्ते दर्शितमर्थं व्यतिरेकमुखेन दार्ष्टान्तिके विवृणोति—**यदीति** । पारमार्थिकत्वविपर्ययमाह—**स त्विति** । विप्रतिपन्नमपारमार्थिकः ब्रह्मव्यतिरिक्तत्वात्—शुक्तिरूप्यवदिति भावः । ज्ञानोत्तरकालस्थितिरनुपपन्ना चेत्कथं बन्धस्यानुवृत्तिरित्यत्राह—**यस्य त्विति** । यस्य ज्ञानिवृत्तोऽनिवृत्त इति प्रतीतिः तस्य ज्ञानमेव न जातं; तत्कार्यादर्शनादिति—कार्याभावस्य कारणाभावसामान्यव्याप्यत्वाभावेऽपि सामग्र्यभावव्याप्यत्वाद्भ्रमनिवृत्तिं प्रति तत्त्वज्ञानस्य सामग्रीत्वात्तदभावेन ज्ञानाभावः कल्प्यत इति—न प्रत्यक्षविरोध इत्यर्थः । ज्ञानोत्पत्त्यनन्तरं बन्धनिवृत्तिं निगमयति—**तस्मादिति । शरीरस्थितिर्भवतु वा, मा वेति** । दग्धपटे पटप्रतिभास-

---

१ नहीदंतया इत्यादिः अथ प्रत्यक्षविरोधं परिहरति इत्यन्तः पाठो का. मु. पु. न दृश्यते ।

न्तरं मुक्त एवासौ। अतो न ध्याननियोगसाध्यो मोक्ष इति—न ध्यानविधिशेषतया ब्रह्मणः सिद्धिः, अपि तु **'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै. २।१।१), **'तत्त्वमसि'** (छा. ६।८।७), **'अयमात्मा ब्रह्म'** (बृ. २।५।१९) इति तत्परैरेव पदसमुदायेन सिध्यतीति, तदयुक्तं; वाक्यार्थज्ञानमात्राद्बन्धनिवृत्त्यनुपपत्तेः। यद्यपि मिथ्यारूपो बन्धो ज्ञानबाध्यः, तथापि बन्धस्यापरोक्षत्वात्—न परोक्षरूपेण वाक्यार्थज्ञानेन स बाध्यते; रज्ज्वादावपरोक्षसर्पप्रतीतौ विद्यमानायां 'नायं सर्पो रज्जुरेवे'त्याप्तोपदेशजनितपरोक्षसर्पविपरीतज्ञानमात्रेण भयानिवृत्तिदर्शनात्। आप्तोपदेशस्य तु भयनिवृत्तिहेतुत्वं वस्तुयाथात्म्यापरोक्षनिमित्तप्रवृत्तिहेतुत्वेन। तथा हि—रज्जुसर्पदर्शनभयात्परावृत्तः पुरुषो 'नायं सर्पो रज्जुरेवे'त्याप्तोपदेशेन तद्वस्तुयाथात्म्यदर्शने प्रवृत्तस्तदेव प्रत्यक्षेण दृष्ट्वा भयान्निवर्तते। नच—शब्द एव प्रत्यक्षज्ञानं जनयतीति वक्तुं युक्तम्; तस्यानिन्द्रियत्वात्। ज्ञानसामग्रीष्विन्द्रियाण्येव ह्यपरोक्षसाधनानि। नच—अस्यानभिसंहितफलकर्मानुष्ठानमृदितकषायस्य श्रवणमननिदिध्यासनविमुखीकृतबाह्यविषयस्य पुरुषस्य वाक्यमेवापरोक्षज्ञानं जनयति; निवृत्तप्रतिबन्धे तत्परेऽपि पुरुषे ज्ञानसामग्रीविशेषाणामिन्द्रियादीनां स्वविषयनियमातिक्रमादर्शनेन तदयोगात्।

वत् शरीरप्रतिभासोऽनुवर्तेत वा, निवर्तेत वेत्यर्थः। **मुक्त एवासाविति**। बन्धस्य च्छिन्नमूलतया दग्धपटवदकार्यकर इति भावः। बन्धनिवृत्तेर्नियोगनैरपेक्ष्यसाधकहेतुभिर्विधिशेषतया न ब्रह्मणः सिद्धिरित्यत्राह—**अत इति**। **अतः** वाक्यार्थज्ञानमात्रसाध्यत्वात्। तर्हि ब्रह्मणः कथं सिद्धिरित्यत्राह—**अपि त्विति**। **तत्परैरेवेति** भेदनिषेधपरैर्वाक्यैर्निर्विशेषतया सिध्यतीत्यर्थः। यद्वा, सिद्धरूपार्थपरैरेवेत्यर्थः। **सिध्यतीति**। ब्रह्मेत्यर्थलब्धम्। **इति ध्याननियोगवादिन उपरि शंकरेण दूषणाभिधानम्॥**

एतद्ध्याननियोगवादी दूष्यति—**तदयुक्तमित्यादिना**। कुत इत्यत्राह—**वाक्यार्थेति**। प्रपञ्चमिथ्यात्ववादिना ज्ञानाद्बन्धनिवृत्त्यनुपपत्तिः कथमुच्यत इत्यत्राह—**यद्यपीति**। ज्ञाननिवर्त्यलोपगमेऽपि वैषम्यमाह—**तथापीति**। परोक्षज्ञानस्यापरोक्षभ्रमाबाधकत्वे दृष्टान्तमाह—**रज्ज्वादाविति**। **आदि**शब्देन भूदलनादि गृह्यते। **सर्पविपरीतज्ञानं** रज्जुज्ञानम्। तेन भयानिवृत्तिश्चेदाप्तोपदेशानर्थक्यं स्यादित्यत आह—**आप्तोपदेशस्येति**। अनेन प्रथमसूत्रे **प्रबलप्रमाणबाधितत्वेन भयादिकार्यं तु निवर्तत** इति भाष्यार्थो ज्ञायते। आप्तोपदेशस्य भयादिकार्यनिवृत्तिहेतुत्वं वस्तुयाथात्म्यापरोक्षस्य निमित्तप्रवृत्तिद्वारकमिति हि तस्य भाष्यस्यार्थः। इममर्थं दृष्टान्तेन दर्शयति—**तथा हीति**। अस्यापरोक्षज्ञानमेव तादृशभ्रमविरोधि, शब्द एवापरोक्षज्ञानं जनयतीत्याशङ्क्याह—**न चेति**। हेतुमाह—**तस्येति**। व्याप्तिं दर्शयति—**ज्ञानेति**। नच—अनिन्द्रियत्वेऽप्यालोकादेरपरोक्षज्ञानजनकत्वं दृष्टमिति—हेतोर्व्यभिचारः; इन्द्रियप्रधानकसामग्र्यननुप्रविष्टत्वस्य विवक्षितत्वात्। एतच्च **ज्ञानसामग्रीष्विन्द्रियत्वेनेवं** सूचितम्। **ज्ञानसामग्रीषु** सपरिकरास्विन्द्रियलिङ्गशब्दसदृशानुपपत्त्यनुपलब्धिष्वित्यर्थः। इन्द्रियाण्येवेति। आलोकादिसहकृतानीति शेषः। इन्द्रियमेव योगिनो व्यवहितादिकं ज्ञापयति, तथा विवक्षितपुरुषविशेषस्य वाक्यमपरोक्षज्ञानं जनयतीत्याशङ्क्य परिहरति—**न चेति। अस्य** पुरुषस्य। हेतुमाह—**निवृत्तेति। अनभिसंहितेत्यादि** पदद्वयं हृदि निधाय विशेषणद्वयमाह—**निवृत्तप्रतिबन्धे तत्परेऽपीति। स्वविषयनियमातिक्रमादर्शनेनेत्यत्र विषय**शब्दः साध्यपरः—स्वसाध्यज्ञानानतिक्रमदर्शनेनेत्यर्थः। शब्दसाध्यं ज्ञानं परोक्षमेव, शब्दस्तु स्वसाध्यं परोक्षज्ञानं नातिक्रामतीति यावत्। मनसः परोक्षापरोक्षज्ञानसाधारणहेतुत्वात्, शब्दस्य तु लिङ्गस्येव परोक्षज्ञानमात्रहेतुत्वात्—न योगिमनसः साम्यमिति भावः। ननु—शब्देनाप्यपरोक्षज्ञानं जायते; 'दशमस्त्वमसी'ति वाक्येन 'दशमोऽहं'मित्यपरोक्षज्ञानोत्पत्तिदर्शनादिति, तन्न; उपदेशानन्तरं शीघ्रभाविप्रत्यक्षसामग्रीजन्येन ज्ञानेन पूर्वज्ञानस्य भेदग्रहेण प्रत्यक्षत्वारोपात्। 'तदा ह्युपदेशात्पूर्वभाविनवकपरिसङ्ख्यानजनितसंस्कारवशेनाविलम्बिता ह्यपेक्षाबुद्धिर्जायते, यथा—'घटोऽय'मित्युक्ते घटं पश्यतोऽपरोक्षप्रतीतिरिन्द्रियजन्या, न तु 'घटोऽय'मिति वाक्यजन्या, वाक्यं त्वापरोक्ष्यनिमित्तचक्षुर्व्यापारहेतुः, तथा—'दशमस्त्वमसी'ति वाक्यं 'दशमोऽहं'मिति बुद्धिनिमित्तस्य पूर्वावस्थापेक्षणीयवस्तुप्रतिसन्धानस्य हेतुः, न त्वपरोक्षावभासहेतुः; तत्तत्प्रतीतिसामग्रीव्यवहितस्य वाक्यस्य तत्तत्सामग्रीलाभाभावात्। विमतं प्रत्यक्षज्ञानं न वाक्यजन्यं; प्रत्यक्षज्ञानत्वात्—अनुपदिष्टवाक्यस्य 'दशमोऽहं'मिति प्रत्ययवत्। विमतं वाक्यं न प्रत्यक्षज्ञानजनकं वाक्यत्वात्—सम्प्रतिपन्नवदिति। एवं सामग्रीशैथिल्येनान्यथासिद्ध्या परिहारो **वस्तुयाथात्म्यापरोक्षनिमित्तमवृत्तिहेतुत्वेनेति** भाष्येणाभिप्रेतः। नच—वाक्यजन्येऽपि ज्ञाने विशेष्यभूताहमर्थे प्रत्यक्षतमात्रेण विशिष्टा-

नच ध्यानस्य वाक्यार्थज्ञानोपायता; इतरेतराश्रयत्वात्—वाक्यार्थज्ञाने जाते तद्विषयध्यानं, ध्याने निर्वृत्ते वाक्यार्थज्ञानमिति। न चं ध्यान–वाक्यार्थज्ञानयोर्भिन्नविषयत्वम्; तथा सति ध्यानस्य वाक्यार्थज्ञानोपायता न स्यात्। न ह्यन्यध्यानमन्यज्ञानौन्मुख्यमुत्पादयति। ज्ञातार्थस्मृतिसंततिरूपस्य ध्यानस्य वाक्यार्थज्ञानपूर्वकत्वमवर्जनीयं; ध्येयब्रह्मविषयज्ञानस्य हेत्वन्तरासंभवात्। नच—ध्यानमूलं ज्ञानं वाक्यान्तरजन्यं, निवर्तकज्ञानं तत्त्वमस्यादिवाक्यजन्यमिति—युक्तम्; ध्यानमूलमिदं वाक्यान्तरजन्यं ज्ञानं, तत्त्वमस्यादिवाक्यजन्यज्ञानेनैकविषयं, भिन्नविषयं वा? एकविषयत्वे—तदेवेतरेतराश्रयत्वम्। भिन्नविषयत्वे—ध्यानेन तदौन्मुख्यापादनासंभवः। किंचि—ध्यानस्य ध्येयध्यात्राद्यनेकप्रपञ्चापेक्षत्वात्—निष्प्रपञ्चब्रह्मात्मैकत्वविषयवाक्यार्थज्ञानोत्पत्तौ दृष्टद्वारेण नोपयोग इति—वाक्यार्थज्ञानमात्रादविद्यानिवृत्तिं वदतः श्रवणमननिदिध्यासनविधीनामानर्थक्यमेव। यतो वाक्यादापरोक्ष्यज्ञानासंभवाद्वाक्यार्थज्ञानेनाविद्या न निवर्तते, तत एव जीवन्मुक्तिरपि दूरोत्सारिता। का चेयं जीवन्मुक्तिः, सशरीरस्यैव मोक्ष इति चेत्, 'माता मे वन्ध्ये'तिवदसंगतार्थं वचः; यतः सशरीरत्वं वन्ध्योऽशरीरत्वमेव मोक्ष इति त्वयैव श्रुतिभिरुपपादितम्। अथ सशरीरत्वप्रतिभासे वर्तमाने यस्यायं प्रतिभासो मिथ्येति प्रत्ययस्तस्य सशरीरत्वनिवृत्तिरिति, न; मिथ्येति प्रत्ययेव सशरीरत्वं निवृत्तं चेत्कथं सशरीरस्य मुक्तिः, अजीवतोपि मुक्तिः सशरीरत्वमिथ्याप्रतिभासनिवृत्तिरेवेति—कोऽयं जीवन्मुक्तिरिति विशेषः। अथ सशरीरत्व-

---

नुप्रविष्टविशेषणांशस्यापि प्रत्यक्षतेति वाच्यम्, अहंस्मरामाधिकृतशब्दोल्लिखितप्रतीतेरपरोक्षत्वनियमश्च नास्ति; सुखदुःखाद्यनुमितपुण्यपापस्य पुरुषस्य 'पुण्यकृदहं पापकृदह'मित्यादिप्रतीतेः—पुण्यपापयोरापरोक्ष्यादर्शनात्। धर्मिप्रत्यक्षतामात्रेण धर्मप्रत्यक्षत्वे—लैङ्गिके 'पर्वतोऽग्निमा'निति ज्ञाने अग्नेरपि प्रत्यक्षत्वप्रसङ्गः। तदेतदखिलं **स्वविषयनियमातिक्रमादर्शनेन तदयोगादि**त्यत्राभिप्रेतम्॥

एवं शब्दस्यापरोक्षज्ञानहेतुत्वं दूषितम्, अथ ध्यानस्य वाक्यार्थज्ञानोपायतामन्योन्याश्रयणेन दूषयति—**न चेत्यादिना**। अन्योन्याश्रयणपरिहाराय ध्यानपूर्वकभावविज्ञानमर्थान्तरविषयमिति भिन्नविषयताश्रयणमयुक्तमित्याह—**न च ध्यानेति**। कुत इत्यत्राह—**तथा सतीति**। कथमुपायत्वहानिरित्यत्राह—**न ह्यन्यध्यानमिति**। एकविषयत्वेऽपि निवर्तकस्य वाक्यार्थज्ञानस्य ध्यानापेक्षा स्यात्, ध्यानस्य वाक्यार्थज्ञानापेक्षा कथमित्यत्राह—**ज्ञातार्थेति**। ध्यानहेतुभूतं ज्ञानं हेत्वन्तरजन्यं, नतु ध्यानं पश्चाद्भाविवाक्यजन्यज्ञानमूलम्—इत्येवं ध्यानवाक्यार्थज्ञानयोः सामग्रीभेदेनान्योन्याश्रयणपरिहारमाशङ्क्य सामग्रीभेदो न संभवतीत्याह—**ध्येयेति**। **हेत्वन्तरासंभवात्** ब्रह्मणः प्रत्यक्षाद्यगोचरत्वादिति भावः। तत्परिहाराय वाक्यभेदमाशङ्क्य तथा वक्तुमयुक्तमित्याह—**न चेति**। विकल्प्य दूषयति—**ध्यानमूलमिति**। **एकविषयत्वे तदेवेतरेतराश्रयत्वमिति**। वाक्यान्तरेण ज्ञानोत्पत्तौ तस्य तत्त्वमस्यादिवाक्यजन्यज्ञानतुल्यविषयत्वात्—तस्यापि ज्ञानस्य निदिध्यासनापेक्षा स्यात्, ध्यानस्य च वाक्यार्थज्ञानापेक्षा स्यादित्यन्योन्याश्रयत्वमित्यर्थः। वाक्ययोर्भिन्नविषयत्वे दूषणमाह—**भिन्नेति**। ध्यानस्य च वाक्यार्थज्ञानविरोधित्वमेवेत्याह—**किंचेति**। **ध्यात्रादी**त्यादिशब्देन शमादिर्गृह्यते। **दृष्टद्वारेणेति**। अदृष्टद्वारेणोपयोगस्त्वत्यन्तमीरुभिः परैर्निरसनीयद्वैतवासनायाः सत्यत्वप्रसङ्गभयात्परित्यक्त इति ध्याननियोगवादिनोऽभिप्रायः। वाक्यार्थज्ञानमात्रादविद्यानिवृत्तिनिरासेन जीवन्मुक्तिनिरासः सिध्यतीत्याह—**यत इति**। **दूरोत्सारिता** वाक्यादपरोक्षज्ञानसंभवेऽपि व्याघातादिना जीवन्मुक्तिरुत्सारिता, वाक्यादापरोक्ष्यासंभवादूरोत्सारितेति भावः॥ **का चेयमिति**। किंशब्दः क्षेपे, विकल्पाभिप्रायेण प्रश्नपरो वा। तत्स्वरूपं शङ्कते—**सशरीरस्येति**। व्याहतिमाह—**मातेति**। व्याहतिमुपपादयति—**यत इति**। व्याहतिपरिहारार्थं तन्मतं शङ्कते—**अथेति**। **सशरीरत्वनिवृत्तिरिति** निर्देशेन सशरीरत्वस्य छिन्नमूलता जीवन्मुक्तिवादिनाऽभिप्रेता। दूषयति—**नेति**। शरीरस्य सत्यत्वानभ्युपगमात् तस्य प्रध्वंसरूपा स्वरूपनिवृत्तिरनभिमता, अतः प्रतिभासनिवृत्तिर्वा, प्रतिभासतात्त्विकताभिमाननिवृत्तिर्वा विवक्षिता स्यादित्यभिप्रायेण प्रथमकल्पमनूद्याभिमतासिद्ध्या दूषयति—**मिथ्येतीति**। **सशरीरत्वं** सशरीरत्वप्रतिभासः; अनन्तरग्रन्थे प्रतिभासनिर्देशात्। **कथं सशरीरस्य मुक्तिरिति**। सशरीरस्य मुक्तिरुक्ता भवतीत्यर्थः। तदेवोपपादयति—**अजीवतोऽपीति**। **मिथ्याप्रतिभास**शब्देन भ्रान्तिज्ञानं विवक्षितम्। जीवदजीवन्मुक्त्योर्विशेषाभावान्न सशरीरस्य मुक्तिरुक्ता स्यादित्यर्थः। द्वितीयं शिरः शङ्कते—**अथेति**। अत्र पूर्वं सशरी-

प्रतिभासो बाधितोऽपि यस्य द्विचन्द्रज्ञानवदनुवर्तते स जीवन्मुक्त इति—चेन्न; ब्रह्मव्यतिरिक्तसकलवस्तुविषयत्वाद्बाधकज्ञानस्य। कारणभूताविद्याकर्मादिदोषः सशरीरत्वप्रतिभासेन सह तेनैव बाधित इति—बाधितानुवृत्तिर्न शक्यते वक्तुम्, द्विचन्द्रादौ तु तत्प्रतिभासहेतुभूतदोषस्य बाधकज्ञानभूतचन्द्रैकत्वज्ञानाविषयत्वेनाबाधितत्वात्—द्विचन्द्रप्रतिभासानुवृत्तिर्युक्ता। किंच—**'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये'** (छा. ६।१४।२) इति सद्विद्यानिष्ठस्य शरीरपातमात्रमपेक्षते मोक्ष इति वदन्तीयं श्रुतिर्जीवन्मुक्तिं वारयति। सैषा जीवन्मुक्तिरापस्तम्बेनापि निरस्ता—**'वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत्। बुद्धे क्षेमप्रापणम्। तच्छास्त्रैर्विप्रतिषिद्धम्। बुद्धे चेत्क्षेमप्रापणमिहैव न दुःखमुपलभेत। एतेन परं व्याख्यातम्'** (आ. ध. सू. २।९।२१।१३-१७) इति। अनेन ज्ञानमात्रान्मोक्षश्च निरस्तः। अतः सकलभेदनिवृत्तिरूपा मुक्तिर्जीवतो न संभवति। तस्माज्ज्ञाननिर्वीर्येण ब्रह्मापरोक्षज्ञानफलेनैव बन्धनिवृत्तिः। नच—नियोगस्साध्यत्वेन मोक्षस्यानित्यत्वप्रसक्तिः; प्रतिबन्धनिवृत्तिमात्रस्यैव साध्यत्वात्। किंच—न नियोगेन साक्षाद्बन्धनिवृत्तिः क्रियते, किंतु निष्प्रपञ्चज्ञानैकरसब्रह्मापरोक्षज्ञानेन। नियोगस्तु तदपरोक्षं ज्ञानं जनयति। कथं नियोगस्य ज्ञानोत्पत्तिहेतुत्वमिति चेत्, कथं वा भवतोऽनभिसंहितफलानां कर्मणां वेदनोत्पत्तिहेतुत्वम्। मनोनैर्मल्यद्वारेणेति चेत्, ममापि तथैव। मम तु निर्मले मनसि शास्त्रेण ज्ञानमुत्पाद्यते, तव तु नियोगेन मनसि निर्मले

रत्नप्रतिमाने **वर्तमान** इत्यादिग्रन्थाभिप्रेतार्थो विवृतो भवति। दूषयति—**नेति**। कथमित्यत्राह—**ब्रह्मेति**। **अविद्याकर्मादीत्यादि**शब्देन वासना गृह्यते। **तेनैव बाधितः** बाधकज्ञानेन बाधित इत्यर्थः। द्विचन्द्रज्ञानादौ हि बाधितानुवृत्तिर्दृष्टेत्यत्राह—**द्विचन्द्रज्ञानादाविति**। न हि रज्जुयाथात्म्यज्ञानेन शुक्तौ रजतभ्रमो निवर्तत इति भावः। प्रथमसूत्रे बाधितानुवृत्तिनिराकरणे दोषस्य पारमार्थिकत्वेन—ज्ञानबाध्यत्वाभावात्—भ्रमानुवृत्तिरुक्ता, अत्रतु चन्द्रैकत्वज्ञानाविषयत्वेन—दोषस्याबाधितत्वात्—द्विचन्द्रज्ञानानुवृत्तिरुक्तेति भिदा। जरन्मायावादिनोऽपि कृत्स्नमिथ्यात्वस्याभ्युपगतत्वादेवं वैषम्यमुक्तम्। जीवन्मुक्तेः श्रुतिविरोधमाह—**किंचेति**। स्मृतिविरोधमाह—**सैषेति**। **वेद**शब्देन त्रिवर्गसाधनकर्माण्युच्यन्ते। तत्फलमुच्यते—**इमं लोकममुं चेति**। **बुद्धे** वाक्यार्थज्ञाने जाते सति, **क्षेमप्रापणं** मोक्षः, **तच्छास्त्रैर्विप्रतिषिद्धम्**। शास्त्रैरिति बहुवचनस्यायं भावः—वाक्यार्थज्ञानोत्तरभाव्युपासनविधिपरैः, 'एवं वर्तयन् यावदायुष'मित्याप्रयाणादनुवृत्तिपरैः, मोक्षस्य शरीरपातमात्रसापेक्षत्वपरैः, 'तयोर्ध्वमायन्नमृतत्वमेती'ति नाडीविशेषनिष्क्रमणपरैः, अर्चिरादिमार्गेण देशविशेषप्राप्तिपरैश्चानेकैः शास्त्रैर्विरोध इति। **विप्रतिषिद्धमिति**। विशेषेण प्रतिषिद्धम्। न तुल्यबलैः प्रतिरुद्धम्, अपितु प्रबलैः पराहतम्, प्राबल्यं च **'भूयसां स्यात् बलीयस्त्व'**मिति न्यायादिति भावः। प्रत्यक्षविरोधमपि स्मृतिरेवाह—**बुद्धे चेदिति**। **एतेन परं व्याख्यातम्—एतेन** शास्त्रप्रत्यक्षविरोधेन, औडुलोमिमतानुसारेणोक्तमन्यदपि व्याख्यातं, सर्वमप्यपास्तमित्यर्थः। यद्वा, यथा—इदानीं दुःखोपलब्धिः, तथा—प्रेत्यापीत्यर्थः। यद्वा, यथा—दुःखनिवृत्तिर्नोपलभ्यते, तथा—सुखनिवृत्तिरपि नेत्यर्थः। जीवन्मुक्तिनिरासार्थमुदाहृतेन वचनेन वाक्यार्थज्ञानमात्रान्मोक्षश्चार्थान्निरस्त इत्याह—**अनेनेति**। जीवन्मुक्तिनिरासमुपसंहरति—**अत इति**। जीवन्मुक्तिनिरासेन स्वमतस्थैर्यसिद्धिमाह—**तस्मादिति**। वाक्यार्थज्ञानमात्रान्मोक्षवादिनोक्तचोद्यपरिहारो ममापि तुल्य इत्याह—**न च नियोगेति**। नियोगनिवर्त्यत्वे प्रपञ्चस्य सत्यत्वं स्यादित्याशङ्क्याह—**किंचेति**। ध्याननियोगपक्षानुपपत्तिपरिहारस्य विवक्षितत्वात्—**किंच**शब्दप्रयोगः। नियोगस्य निवर्तकत्वं ज्ञानद्वारकमिति—न निवर्त्यसत्यत्वमित्यर्थः॥

नियोगस्य ज्ञानोत्पत्तौ किंचित्कारवुभुत्सया पृच्छति—**कथमिति**। न खलु ज्ञाने दृष्टः किंचित्कारो नियोगेन संभवति, अतः स वक्तव्य इति भावः। प्रतिबन्धं परिहरति—**कथं वेति**। **वेदनोत्पत्तिहेतुत्व**मिति च्छाद्वारा वेदनोत्पत्तिहेतुत्वमुत्प्रेक्षितं; **विविदिषन्ती**ति ह्युदाहरिष्यते। परिहारं शङ्कते—**मन इति**। तत्साम्यमाह—**ममापीति**। पुनराशङ्कते—**मम त्विति**। मनो हि साधारणकारणं, तस्मिन्सत्यसाधारणकारणमपेक्षितं तन्ममास्ति, त्वया तु वक्तव्यमिति चेदित्यर्थः। वैशेषिकाद्यभिमतमानसप्रत्यक्ष इव, प्रकृष्टादृष्टसहकृतमनोमात्रकारणके 'तन्सर्व धर्मवीर्येण यथावत्संप्रपश्यसी'त्यादिसिद्धे योगिप्रत्यक्ष इव च

---

१ °ज्ञानविषयाभूत°। २ विशेषेण इत्यादिः ग्रन्थस्तु इत्यन्तः पाठः का. सु. पु. न दृश्यते।

ज्ञानसामग्री वक्तव्येति चेत्, ध्याननियोगनिर्मलं मन एव साधनमिति ब्रूमः । केनावगम्यत इति चेन, भवतो वा कर्मभिर्मनो निर्मलं भवति निर्मले मनसि श्रवणमननविधिध्यासनैः सकलेतरविषय-विमुखस्यैव शास्त्रं निवर्तकज्ञानमुत्पादयतीति केनावगम्यते । **विविदिषन्ति यज्ञेन दानेन तपसा-नाशकेन'** (बृ. ४।४।२२), **'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'** (बृ. २।४।५), **'ब्रह्म वेद ब्रह्मैव भवति'** (मु. ३।२।९) इत्यादिभिः शास्त्रैरिति चेन्, ममापि **'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'**(बृ. २।४।५), **'ब्रह्मविदाप्नोति परम्'** (तै. २।१।१), **'न चक्षुषा गृह्यते नापि वाचा'** (मु. ३।१।८), **'मनसा तु विशुद्धेन । हृदा मनीषा मनसाभिक्लृप्तः'** (का. ६।९) इत्यादिभिः शास्त्रैर्ध्याननियोगेन मनो निर्मलं भवति, निर्मलं च मनो ब्रह्मापरोक्षज्ञानं जनयतीत्य-वगम्यत इति निरवद्यम् । **'नेदं यदिदमुपासते'** (के. ४) इत्युपास्यत्वं प्रतिषिद्धमिति चेन्. मैवं नात्र ब्रह्मण उपास्यत्वं प्रतिषिध्यते, अपि तु ब्रह्मणो जगद्वैरूप्यं प्रतिपाद्यते । यदिदं जगदुपासते प्राणिनो नेदं ब्रह्म, तदेव ब्रह्म त्वं विद्धि यद्वाचानभ्युदितं येन वागभ्युद्यत इति वाक्यार्थः । अन्यथा **'तदेव ब्रह्म त्वं विद्धि'**(के. ४) इति विरुध्यते, ध्यानविधिवैयर्थ्यं च स्यात् । अतो ब्रह्मसाक्षात्कार-फलेन ध्याननियोगेनैवापरमार्थभूतस्य कृत्स्नस्य द्रष्टृदृश्यादिप्रपञ्चरूपबन्धस्य निवृत्तिः । यदपि कैश्चि-दुक्तं—भेदाभेदयोर्विरोधो न विद्यत इति, तदयुक्तं; न हि शीतोष्णतमःप्रकाशादिवद्भेदाभेदावेकस्मिन्व-स्तुनि संगच्छेते । अथोच्येत—सर्वं हि वस्तुजातं प्रतीतिव्यवस्थाप्यं, सर्वं च भिन्नाभिन्नं प्रतीयते, कारणात्मना ज्ञात्यात्मना चाभिन्नं, कार्यात्मना व्यक्त्यात्मना च भिन्नम् । छायातपादिषु विरोधः सहान-

---

मन एवासाधारणकारणमिति परिहरति—**ध्यानेति** । मनोमात्रस्य साधारणकारणत्वेऽपि निर्मलनस्य मनोविशेषस्यासा-धारणकारणत्वं युक्तमिति भावः । तज्ज्ञापकं प्रश्नं शङ्कते—**केनेति** । ज्ञापकस्वारस्यलक्षणं स्वपक्षे वैषम्यं दर्शयितुं पृच्छति—**भवतो वेति** । निदिध्यासनेन विषयविमुखीकृतमनस्कस्य शास्त्रेण निवर्तकज्ञानोत्पत्तौ प्रमाणतया परामिमतानि श्रुति-वाक्यानि शङ्कते—**विविदिषन्तीति । ब्रह्म वेद ब्रह्मैव भवतीति वेदन**शब्देन वाक्यार्थज्ञानं विवक्षितमिति परामि-शन्नाः । मनसो ज्ञानसाधनत्वे प्रमाणं दर्शयति—**ममापीति । न चक्षुषे**त्यादिवाक्यं मनस एव साधनत्वे स्वरसं, **ब्रह्म वेदे**त्यत्र **वेदन**शब्दस्य वाक्यार्थज्ञानपरत्वं तु न स्वरसतः प्रतीयते । नच श्रुत्यन्तरैकार्थ्येन तत्परत्वेऽवगमः: वाक्यार्थ-ज्ञानस्योपायलक्षणोक्तिमच्छ्रुत्यन्तराभावादित्यभिप्रेतम् । मिथ्यात्वनिबन्धनाः सर्वे चोद्यपरिहाराः समानाः, परोक्षज्ञानस्या-प्यपरोक्षभ्रमनिवर्तकत्वं शास्त्रप्रत्यक्षविरोधौ श्रुतिस्वारस्यहानिश्च भवतां पक्षेऽधिकं दूषणमिति वैषम्यज्ञापनाय **कथ**मित्यादिना प्रतिबन्दीमुखेन तत्तच्छङ्कापरिहारः कृतः । **इति**शब्दो नानन्तरवाक्यशेषः, अपि तु प्रकरणशेषः ॥

उपास्यत्वप्रतिषेधं शङ्कते—**नेदमिति** । परिहरति—**नैवमिति** । तस्य वाक्यस्यैवं निर्वाहो न युक्त इत्यर्थः । उपास्य-त्वनिषेधः प्रतीयत इत्याह—**नात्रेति** । कस्तर्ह्यर्थ इत्यत्राह—**अपि त्विति** । कथं वैरूप्यप्रतिपादनमित्यत्राह—**यदिद-मिति । यदिदमुपासत** इत्यत्रेदमंशे निषेधस्य तात्पर्यमिति भावः । **मनो ब्रह्मेत्युपास्सीते**त्यादिना विहितप्रतीकोपा-सनोपास्यानिह परिच्छिन्नानि, नेदं ब्रह्म, किं त्वपरिच्छिन्नं तदेव परं ब्रह्मेत्यर्थः । अनेन **अन्यदेव तद्विदिता**दित्यादि-कमपि जगद्वैरूप्यपरमिति व्याख्यातं भवति । **यद्वाचानभ्युदितं** वक्तुमशक्यम्—अपरिच्छिन्नम् । **अन्यथे**ति स्वा-क्यविरोध उक्तः । **ध्यानविधिवैयर्थ्य**मिति वाक्यान्तरविरोध उक्तः । स्वपक्षमुपसंहरति—**अत इति ॥ इति ध्यान-नियोगवादिना शंकराभिहितस्वमतदूषणपरिहारः, जीवन्मुक्तिनिरासश्च ॥**

अथायमेव ध्याननियोगवादी भास्करमतं दूषयितुं तदभिमतं भेदाभेदविरोधमनुवदति—**यदपीत्यादिना** । प्रथमं संक्षेपेण दूषयति—**तदयुक्तमिति** । नियमेन भिन्नाधारत्वलक्षणः, सहानवस्थानलक्षणश्चेति विरोधो द्विधा । **आदि**शब्देन तृणदहनादेरिव नाश्यनाशकभावो विवक्षितः । तद्भेदाभेदयोरपि विरोधोऽस्तीत्याह—**न हीति** । अथ भेदाभेदमतं विस्तरेण अस्तौति—**अथोच्येतेति** । वक्ष्यमाणौपयिकमर्थं शिक्षयति—**सर्वं हीति** । शीतोष्णादिष्वपि विरोधः प्रती-त्यधीन इति भावः । ततः किमित्यत्राह—**सर्वं चेति** । कथं भिन्नाभिन्नत्वमित्यत्राह—**कारणात्मनेति** । पूर्वोक्तद्विवि-

वस्थानलक्षणो भिन्नाधारत्वरूपश्च, कार्यकारणयोर्जातिव्यक्त्योश्च तदुभयमपि नोपलभ्यते, प्रत्युतैकमेव वस्तु द्विरूपं प्रतीयते, यथा—मृदयं घटः, खण्डो गौः, मुण्डोगौरिति । न चैकरूपं किंचिदपि वस्तु लोके दृष्टचरम् । न च तृणादेर्ज्वलनादिवदभेदो भेदोपमर्दी दृश्यत इति—न वस्तुविरोधः; मृत्सुवर्णगवाश्वाद्यात्मनावस्थितस्यैव घटमुकुटखण्डवडवाद्यात्मना चावस्थानात् । न चाभिन्नस्य भिन्नस्य च वस्तुनोऽभेदो भेदश्चैक एवाकार इतीश्वराज्ञा । प्रतीतत्वादैकरूप्यं चेत्, प्रतीतत्वादेव भिन्नाभिन्नत्वमिति द्वैरूप्यमप्यभ्युपगम्यताम् । न हि विस्फारिताक्षः पुरुषो घटशरावखण्डमुण्डादिषु वस्तुपूपलभ्यमानेष्विदं मृदयं च घटः, इदं गोत्वमियं च व्यक्तिरिति विवेक्तुं शक्नोति, अपि तु मृदयं घटः, खण्डो गौरित्येव प्रत्येति । अनुवृत्तिबुद्धिवोध्यं कारणमाकृतिश्च, व्यावृत्तिबुद्धिवोध्यं कार्यं व्यक्तिश्चेति विविनक्तीति चेत्, नैवम्; विविक्ताकारानुपलम्भेः । नहि सुसूक्ष्ममपि निरीक्षमाणैरिदमनुवर्तमानमिदं च व्यावर्तमानमिति पुरोऽवस्थिते वस्तुन्याकारभेद उपलभ्यते । यथा—संप्रतिपन्नैक्ये कार्यविशेषे चैकत्वबुद्धिरुपजायते, तथैव—सकारणे ससामान्ये चैकत्वबुद्धिरविशिष्टोपजायते । एवमेव देशतः कालतश्चाकारतश्चात्यन्तविलक्षणेष्वपि वस्तुषु 'तदेवेद'मिति प्रत्यभिज्ञा जायते । अतो द्व्यात्मकमेव वस्तु प्रतीयत इति—कार्यकारणयोर्जातिव्यक्तयोश्चात्यन्तभेदोपपादनं प्रतीतिपराहतम् । अथोच्येत—मृदयं घटः खण्डो गौरितिवद् 'देवोहं मनुष्योह'मिति सामानाधिकरण्येनैक्यप्रतीतेः—आत्मशरीरयोरपि भिन्नाभिन्नत्वं स्यात्, अत इदं भेदाभेदोपपादनं निजसदननिहितहुतवहज्वालायत—इति । तदिदमनाकलितभेदाभेदसाधनसामानाधिकरण्यतदर्थयाथात्म्यावबोधविलसितम् । तथा हि—अबाधित एव प्रत्ययः सर्वत्रार्थं व्यवस्थापयति । देवाद्यात्माभिधानस्त्वात्मयाथात्म्यगोचरैः सर्वैः प्रमाणैर्बाध्यमानो रज्जुसर्पादिबुद्धिवन्नात्मशरीरयोरभेदं

धविरोधोपलम्भसुबलवैरूप्यं वक्तुमाह—**छायेति** । ततः किमित्यत्राह—**कार्येति** । अविरोधेनोपलब्धिमाह—**प्रत्युतेति** । उपलब्धिमभिनयेन दर्शयति—**यथेति** । अद्विरूपवस्त्वनुपलब्धिमाह—**न चेति** । नाश्यनाशकत्वलक्षणस्तृतीयविरोधो नास्तीत्याह—**न च तृणादेरिति** । **वस्तुविरोधशब्देन** नाश्यनाशकत्वलक्षणविरोधो विवक्षितः । तादृशविरोधाभावमुपपादयति—**मृत्सुवर्णेति** । जातिगतोऽभेदो व्यक्तिगतश्च भेद इति—कथमेकस्य भेदाभेदाविति शङ्कायां जातिव्यक्त्योः परस्परभेदाभेदावुपपादयति—**न चाभिन्नस्येति । अभिन्नस्य** जातेः । **भिन्नस्य** व्यक्तेरित्यर्थः । जातेरभेद एवाकारः; व्यक्तेर्भेद एवाकार इति किमीश्वराज्ञया स्वीक्रियते, नहि प्रमाणतर्कानादरेण हठात्कश्चिदर्थः स्वीकार्यः—इति भावः । प्रतीतिबलादभ्युपगमं शङ्कते—**प्रतीतत्वादिति** । तथा स्वमतस्याभ्युपगन्तव्यतामाह—**प्रतीतत्वादेवेति** । लदुक्तादेवेत्येवकारामिप्रायः—**द्वैरूप्यमपीति** । अनिष्टमपीत्यपिशब्दस्यामिप्रायः । प्रतीतत्वमेवोपपादयति—**न हीति** । इयं जातिरियं व्यक्तिरिति विविक्ते ह्यत्राभेदोऽत्र च भेद इति वक्तुं युक्तं, न तथा विविच्यत इत्यर्थः । तर्हि कथं प्रतीतिरित्यत्राह—**अपि त्विति** । एकमेव वस्तु जात्यात्मना व्यक्त्यात्मना च भिन्नमभिन्नं च प्रतीयत इत्यर्थः । **मृदयं घट** इत्यनेन मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यप्रत्ययो भेदाभेदसाधकयुक्तिरुक्ता भवति । अनुवृत्तिव्यावृत्तिभ्यां विवेकं शङ्कते—**अनुवृत्तीति** । परिहरति—**नैवमिति** । विविक्ताकारानुपलब्धिं विवृणोति—**न हि सुसूक्ष्ममपीति** । विविक्ताकारोपलम्भे सति ह्यस्मिन्नंशेऽनुवृत्तिबुद्धिबोध्यत्वम्, अस्मिन्नंशे व्यावृत्तिबुद्धिबोध्यत्वमिति ज्ञातुं शक्यमित्यर्थः । **आकारभेदोऽशभेदः** । तर्हि कथमुपलम्भ इत्यत्राह—**यथा संप्रतिपन्नेति । विशेषो** व्यक्तिः, यथा—कार्यैकत्वं व्यक्त्येकत्वं च संप्रतिपन्नं, तथा—कार्यकारणयोश्च जातिव्यक्त्योश्चैकत्वबुद्धिर्जायत इत्यर्थः । **एकत्वबुद्धिरित्यनेन एक**शब्दानुविद्धप्रत्यय उक्तो भवति । **सहोपलम्भनियमः** प्रथमपिण्डग्रहणे अंशभेदेनाग्रहणं चार्थादुक्तं भवति; **न विवेक्तुं शक्नोतीत्युक्तेः** । एवं जातिव्यक्त्योरन्योन्यं भेदाभेद उक्तः, अथ पिण्डानां परस्परभेदाभेद उच्यते—**एवमेवेति** । देशकालवैलक्षण्यं स्पष्टम् । **नीलत्वखण्डत्वादि**राकारवैलक्षण्यम् । **अत्यन्तभेदः** अभेदसहो भेद इत्यर्थः । अत्र चोद्यमाशङ्कते—**अथोच्येतेति** । देहात्मनोः सङ्घव्यात्मनैकत्वेऽभिमतेऽपि देहरूपेण, आत्मरूपेण वा तयोरैक्यस्याप्रामाणिकत्वात्—तयोर्भिन्नाभिन्नत्वमनिष्टमिति भावः । परिहरति—**तदिदमिति** । अबाधितं सामानाधिकरण्यं भेदाभेदसाधकम्, अबाधितश्च भेदाभेदस्तत्त्वमित्यजानतोक्तमित्यर्थः । तदुपपादयति—**तथा हीति** । परिहारौपयिकमर्थं शिक्षयति—**अबाधित इति** । ततः किमित्यत्राह—**देवादीति** । जातिव्यक्त्योरपि तथा स्यादित्यत्राह—**खण्ड इति** । एवं लौकिकार्थानां भेदाभेद उक्तः,

साधयति । खण्डो गौर्मुण्डो गौरिति सामानाधिकरण्यस्य न केन चित्कचिद्बाधो दृश्यते, तस्मान्नातिप्रसङ्गः । अत एव जीवोऽपि ब्रह्मणो नात्यन्तभिन्नः, अपि तु ब्रह्मांशत्वेन भिन्नाभिन्नः, तत्राभेद एव स्वाभाविको भेदस्त्वौपाधिकः । कथमवगम्यत इति चेत्, **'तत्त्वमसि'** (छा. ६।८।७), **'नान्योऽतोऽस्ति द्रष्टा'** (बृ. ३।७।२३), **'अयमात्मा ब्रह्म'** (बृ. २।५।१९) इत्यादिभिः श्रुतिभिः, **'ब्रह्मेमे द्यावापृथिवी'** इति प्रकृत्य **'ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा उत । स्त्रीपुंसौ ब्रह्मणो जातौ स्त्रियो ब्रह्मोत वा पुमान् ॥'** इत्याथर्वणिकानां संहितोपनिषदि ब्रह्मसूक्तेऽभेदश्रवणाच्च, **'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।'** (श्वे. ६।१३) **'ज्ञाज्ञौ द्वावजावीशनीशौ'** (श्वे. १।९), **क्रियागुणैरात्मगुणैश्च तेषां संयोगहेतुरपरोऽपि दृष्टः ।'** (श्वे. ५।१२) **प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः ।'** (श्वे. ६।१६), **'स कारणं करणाधिपाधिपः'** (श्वे. ६।९), **तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्योऽभिचाकशीति ।'** (श्वे. ४।६), **'य आत्मनि तिष्ठन्'** (बृ. ३।७।२२), **'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्'** (बृ. ४।३।२१), **'प्राज्ञेनात्मनान्वारूढ उत्सर्जन्याति'** (बृ. ४।३।३५), **'तमेव विदित्वाति मृत्युमेति'** (श्वे. ३।८) इत्यादिभिर्भेदश्रवणाच्च—जीवपरयोर्भेदाभेदावश्यांश्रयणीयौ । तत्र **'ब्रह्म वेद ब्रह्मैव भवति'** (मु. ३।२।९) इत्यादिभिर्मोक्षदशायां जीवस्य ब्रह्मस्वरूपापत्तिव्यपदेशात्, **'यत्रत्वस्य सर्वमात्मैवाभूत्, तत्केन कं पश्येत्'** (बृ. २।४।१४) इति तदानीं भेदेनेश्वरदर्शननिषेधाच्च—अभेदः स्वाभाविक इत्यवगम्यते । ननुच—**'सोश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता'** (तै. २।१।१) इति सहश्रुत्या तदानीमपि भेदः प्रतीयते, वक्ष्यति च—**'जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च'** (ब्र. सू. ४।४।१७), **'भोगमात्रसाम्यलिङ्गाच्च'** (ब्र. सू. ४।४।२१) इति, नैतदेवं; **'नान्योऽतोऽस्ति द्रष्टा'** (बृ. ३।७।२३) इत्यादिश्रुतिशतैरात्मभेदप्रतिषेधात् । **'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता'** (तै. २।१।१) इति सर्वैः कामैः सह ब्रह्माश्नुते, सर्वगुणान्वितं ब्रह्माश्नुत इत्युक्तं भवति; अन्यथा ब्रह्मणा सहेत्यप्राधान्यं ब्रह्मणः प्रसज्येत । **'जगद्व्यापारवर्जम्'** (ब्र. सू. ४।४।१७) इत्यत्र मुक्तस्य भेदेनावस्थाने सत्यैश्वर्यस्य न्यूनताप्रसङ्गो वक्ष्यते; अन्यथा **'संपद्याविर्भावः स्वेन शब्दात्'** (ब्र. सू. ४।४।१)

तदुपजीव्य वैदिकेष्वऽप्यर्थेषु जीवब्रह्मणोर्भेदाभेदमाह—**अत एवेति** । अतः भेदाभेदयोरविरुद्धत्वादित्यर्थः । **ब्रह्मांशत्वेनेत्यत्रांशो नानाव्यपदेशा**दिति सूत्रं स्मारितम् । **अचिद्ब्रह्मणोर्भेदाभेदः स्वाभाविक** इति भास्करयादवयोरुभयोरप्यभिमतं, **चिद्ब्रह्मणोस्तु भेदाभेदौ स्वाभाविकौ**इति यादवमतव्यावृत्त्यर्थमाह—**तत्रेति । कथमिति** । भेदाभेदद्वावे, तत्राभेदस्यैव स्वाभाविकत्वे च किं प्रमाणमित्यर्थः । अभेदस्य स्वाभाविकत्वेन प्राधान्यात् प्रथमम**न्यथा चेति** सूत्रांशविषयवाक्यमाह—**तत्त्वमसीति । दाशकितवेत्यादांशविषयमाह—ब्रह्मेम इति । नानाव्यपदेशा**दित्यंशस्य विषयमाह—**नित्यो नित्यानामिति । क्रियागुणैरात्मगुणैश्चेति । क्रियागुणाः** संसारहेतुगुणाः, **आत्मगुणाः** मोक्षहेतुगुणाः, तैः संयोगहेतुभिरित्यर्थः । अत्र भेदस्यौपाधिकत्वं कथमवगम्यत इत्यत्राह—**तत्रेति** । तत्स्वरूपापत्तिव्यपदेशः, भेदनिषेधश्च अभेदस्यानौपाधिकलक्षापकावित्यर्थः । मुक्तौ भेदनिषेधादेव भेदस्यौपाधिकत्वमप्यर्थसिद्धम् । मुक्तौ भेदं दर्शयंश्चोदयति—**ननु चेति । सह**शब्दो भोक्तृसाहित्यपर इति चोदयितुरभिप्रायः । भोग्यसाहित्यबुद्ध्या परिहरति—**नैतदिति** । भेदप्रतीतिं परिहरिष्यन्मुक्तौ भेदस्य श्रुतिविरुद्धतां दर्शयति—**नान्य इति** । भेदप्रतीतिं परिहरति—**सोऽश्नुत इति । सोश्नुत**इति वाक्येनोक्तं **भवतीत्यन्वयार्थः** । **ब्रह्मणा सह गुणानश्नुते** गुणांश्च ब्रह्म चानुभवतीति । किं ब्रह्म पृथग्भूतोऽश्नुते, उताप्रथग्भूत इत्यपेक्षायां तद्वाक्यान्तरावगम्यम्, अतो नात्र भेदप्रतीतिरिति भावः । एतदुपपादयति—**अन्यथेति** । अप्राधान्यं भोक्तन्तरापेक्षया दोषः; भोग्यभूतस्वगुणापेक्षया तु न दोष इति भावः । परोदाहृतसूत्रस्य स्वाभिमतमर्थमाह—**जगदिति** । ब्रह्मणो मुक्तस्य च भेदे सति जगद्व्यापारवर्जत्वप्रसङ्गात्—न भेद इति सूत्रार्थ इत्यर्थः । तदुपपादयति—**अन्यथेति** । अभेदस्य स्वाभाविकत्वं निगमयति—**तस्मादिति** । मुक्तौ भेदनिषेधादर्थसिद्धं

इत्यादिभिर्विरोधात् । तस्माद्भेद एव स्वाभाविकः, भेदस्तु जीवानां परस्माद्ब्रह्मणः, परस्परं च बुद्धीन्द्रियदेहोपाधिकृतः । यद्यपि ब्रह्म निरवयवं सर्वगतं च तथाप्याकाश इव घटादिना बुद्ध्याद्युपाधिना ब्रह्मण्यपि भेदः संभवत्येव । नच—भिन्ने ब्रह्मणि बुद्ध्याद्युपाधिसंयोगः, बुद्ध्याद्युपाधिसंयोगाद्ब्रह्मणि भेद इतीतरेतराश्रयत्वम् ; उपाधेस्तत्संयोगस्य च कर्मकृतत्वात्, तत्प्रवाहस्य चानादित्वात् । एतदुक्तं भवति—पूर्वकर्मसंबद्धाज्जीवात्सबद्ध एवोपाधिरुत्पद्यते, तद्युक्तात्कर्म । एवं बीजाङ्कुरन्यायेन कर्मोपाधिसंबन्धस्यानादित्वान्न दोष इति । अतो जीवानां परस्परं ब्रह्मणा चाभेद एव स्वाभाविकः, भेदस्त्वौपाधिकः । उपाधीनां पुनः परस्परं ब्रह्मणा चाभेदवद्भेदोऽपि स्वाभाविकः; उपाधीनामुपाध्यन्तराभावात्, तदभ्युपगमेऽनवस्थानाच्च । अतो जीवकर्मानुरूपं ब्रह्मणो भिन्नाभिन्नस्वभावा एवोपाधय उत्पद्यन्त—इति । अत्रोच्यते—अद्वितीयमच्चिदानन्दब्रह्मध्यानविषयविधिपरं वेदान्तवाक्यजातमिति—वेदान्तवाक्यैरभेदः प्रतीयते, भेदावलम्बिभिः कर्मशास्त्रैः प्रत्यक्षादिभिश्च भेदः प्रतीयते, भेदाभेदयोः परस्परविरोधादनाद्यविद्यामूलतयापि भेदप्रतीत्युपपत्तेरभेद एव परमार्थ इत्युक्तम् । तत्र यदुक्तं—भेदाभेदयोरुभयोरपि प्रतीतिसिद्धत्वान्न विरोध—इति, तदयुक्तं; कस्माच्चित्कस्यचिद्विलक्षणत्वं हि तस्मात्तस्य भेदः, तद्विपरीतत्वं चाभेदः, तयोस्तथाभावातथाभावरूपयोरेकत्र संभवमनुन्मत्तः को ब्रवीति । कारणात्मना जात्यात्मना चाभेदः, कार्यात्मना व्यक्त्यात्मना च भेद इत्याकारभेदादविरोध—इति चेन्न; विकल्पासहत्वात् । आकारभेदादविरोधं वदतः किमेकस्मिन्नाकारे भेद आकारान्तरे चाभेद इत्यभिप्रायः, उताकारद्वययोगिवस्तुगतावुभावपीति । पूर्वस्मिन्कल्पे—व्यक्तिगतो भेदो जातिगतश्चाभेद इति नैकस्य द्व्यात्मकता । जातिर्व्यक्तिरिति चैकमेव वस्त्विति चेत्, तर्ह्याकारभेदादविरोधः परित्यक्तः स्यात् । एकस्मिंश्च विलक्षणत्वतद्विपर्ययौ विरुद्धावित्युक्तम् । द्वितीयेतु कल्पे—अन्योन्यविलक्षणमाकारद्वयमप्रति-

---

भेदस्य औपाधिकत्वमेवकारेणाभिप्रेतम् । उपाधिः क इत्यपेक्षायामाह—**भेदस्त्विति** । औपाधिकत्वरूपवैषम्यपरस्तुशब्दः, सङ्गत्योतको वा । ब्रह्मणो विभुत्व-निरवयक्त्वाभ्यां जीवगत उपाधिर्ब्रह्मण्येवेति—तदसंसृष्टप्रदेशाभावात्—जीवेश्वरभेदो न संभवतीत्यत्राह—**यद्यपीति** । अन्योन्याश्रयमाशङ्क्याह—**न चेति** । ईश्वरांशे कर्मकृतबुद्ध्युपाधिसंबन्धाभावात्—उपाधिसंयोगस्य भेदपूर्वकत्वम् । प्रवाहानादितया परिहरति—**उपाधेरिति** । कथमुपाधिस्तत्संयोगकर्मणां प्रवाहानादित्वं, तेन चान्योन्याश्रयपरिहारः कथमिति शङ्कायां तद्विवृणोति—**एतदुक्तमिति । तद्युक्तात्कर्मेति** । कर्मवश्यत्वं हि जीवत्वम् । उपाधिना जीवत्वं, जीवभावादुपाध्यन्तरमित्यनादिरित्यर्थः । फलितमर्थमाह—**अत इति** । अविदंशे वैषम्यमाह—**उपाधीनां पुनरिति । पुनस्त्वर्थः** । वैषम्ये हेतुद्वयमाह—**उपाधीनामिति** । भिन्नाभिन्नत्वपक्षमुपसंहरति—**अतो जीवकर्मेति । इति ध्याननियोगवादिन उपरि भास्करेण प्रत्यवस्थानम्** ॥

अथ भेदाभेदपक्षं ध्याननियोगवादी दूषयति—**अत्रोच्यत इत्यादिना** । पूर्व.**यदपि कैश्चिदुक्तमिति** प्रकान्तस्य पक्षस्योत्थापकं सङ्गतिस्थलं दर्शयितुमाह—**अद्वितीयेति** । तत्सङ्गतिस्थलं दर्शयति—**तत्र यदुक्तमिति** । भेदाभेदविषयप्रतीतिं दूषयिष्यन् पूर्वं तयोर्विरोधमुपपादयितुं तत्स्वरूपमाह—**कस्माच्चिदिति । विलक्षणत्वमन्यत्वम्** । इदमिदं न भवति, इदमिदं भवतीति हि भेदाभेदविषयप्रतीतिः । ततः किमित्यत्राह—**तयोरिति । भेदाभेद** इति न कस्यचिद्धर्मस्य संज्ञा, लोकप्रसिद्ध्यनुगुणोऽर्थो **भेदाभेद**शब्दस्य स्वीकृतश्चेत्, भावाभावयोर्विरोधोऽवर्जनीय इत्यर्थः । किंच—अनेन क्वचिदपि विरोधो नास्तीति वक्तुं न शक्यम् ; त्रिविधविरोधोपलब्धेः । यदि भावाभावयोर्न विरोधः, तर्हि भिन्नाभिन्नत्वं भवति, न भवतीति खपरवचसोरपि विरोधाभावः स्यात् । परोक्तं पिण्डद्वयभेदाभेदस्याकारभेदादविरोधमनुवदति—**कारणात्मनेति** । विकल्प्य दूषयति—**नेत्यादिना । एकस्मिन्नाकार** इति **आकार**शब्दः पदार्थपरः । पूर्वस्मिन्कल्प इति । तत्र जातिव्यक्त्योः किं परस्परं भेदः, उत भेदाभेद—इति विकल्पत्रयमभिप्रेत्य प्रथमं शिरो दूषयति—**व्यक्तिगत इति** । द्वितीयमनुवदति—**जातिरिति** । दूषयति—**तर्हीति** । विरोधस्तिष्ठत्येवेत्यर्थः । तृतीयं दूषयति—**एकस्मिंश्चेति** । जातिर्व्यक्तिर्भवति न भवतीति भावाभावविरोधः स्थित एवेत्यर्थः । कण्ठोक्तपूर्वकल्पे द्वितीयं शिरो दूषयति—**द्वितीये तु कल्प इति** । अत्र तृतीयस्य जातिव्यक्तिव्यतिरिक्तस्य वस्तुनोऽप्रतिपन्नत्वं नामैकं दूषणमधिकं **तदिदमप्रतिपन्नं चेत्य-**

पन्नं च तदाश्रयभूतं वस्त्विति, त्रितयाभ्युपगमेऽपि त्रयाणामन्योन्यवैलक्षण्यमेवोपपादितं स्यान्न पुनरभेदः । आकारद्वयनिरूह्यमाणाविरोधं तदाश्रयभूते वस्तुनि भिन्नाभिन्नत्वमिति चेन्, स्वस्माद्विलक्षणं स्वाश्रयमाकारद्वयं स्वस्मिन्विरुद्धधर्मद्वयसमावेशनिर्वाहकं कथं भवेत्, अविलक्षणं तु कथंतराम् । आकारद्वयतद्वतोश्च व्यात्मकत्वाभ्युपगमे निर्वाहकान्तरापेक्षयानवस्था स्यात् । नच संप्रतिपन्नैक्यव्यक्तिप्रतीतिवत्ससामान्येपि वस्तुन्येकरूपा प्रतीतिरुपजायते; यत 'इदमित्थ'मिति सर्वत्र प्रकारप्रकारितयैव सर्वा प्रतीतिः, तत्र प्रकारांशो जातिः प्रकार्यंशो व्यक्तिरिति नैकाकारप्रतीतिः । अत एव जीवस्यापि ब्रह्मणो भिन्नाभिन्नत्वं न संभवति । तस्मादभेदस्यानन्यथासिद्धशास्त्रमूलत्वादनाद्यविद्यामूल एव भेदप्रत्ययः । ननु—एवं ब्रह्मण एवाज्ञत्वं तन्मूलाश्च जन्मजरामरणादयो दोषाः प्रादुःष्युः, ततश्च **'यः सर्वज्ञः सर्ववित्'** (मु. १।१।९), **'एष आत्माऽपहतपाप्मा'** (छा० ८।१।५) इत्यादीनि शास्त्राणि वाध्येरन, नैवम्; अज्ञत्वादिदोषणामपरमार्थत्वात् । मैवतस्तूपाधिब्रह्मव्यतिरिक्तं वस्त्वन्तरमनभ्युपगच्छतो ब्रह्मण्येवोपाधिसंसर्गस्तत्कृताश्च जीवत्वाज्ञत्वादयो दोषाः परमार्थत एव भवेयुः । न हि ब्रह्मणि निरवयवेऽच्छेद्ये संबध्यमाना उपाधयस्तच्छित्त्वा भित्त्वा वा संबध्यन्ते, अपितु ब्रह्मस्वरूपे संयुज्य तस्मिन्नेव स्वकार्याणि कुर्वन्ति । यदि मन्वीत—उपाध्युपहितं ब्रह्म जीवः, स चाणुपरिमाणः, अणुत्वं चावच्छेदकस्य मनसोऽणुत्वात्,

---

नेनाभिप्रेतम्। प्रतिपन्नत्वाभ्युपगमेऽपि दूषणमाह—**तृतीयाभ्युपगमेऽपीति। न पुनरिति**। अन्यथा त्रित्वाभावादित्यर्थः। अथ तृतीये वस्तुन्याकारद्वयेन भेदाभेदयोर्निर्वाह्यत्वेनाविरोधित्वं शङ्कते—**आकारद्वयेति**। इदमाकारद्वयं किं—स्वाश्रयेण भिन्नम्, उताभिन्नम्, उत भिन्नाभिन्नम्—इति विकल्पत्रयमभिप्रेत्य, प्रथमं शिरो दूषयति—**स्वस्मादिति। स्वशब्दत्रयमप्याश्रयपरं**; भेदाभेदयोरेकाश्रयत्वेन हि विरोधः । अविरोधनिर्वाहकाकारद्वयं हि न भेदाभेदयोराश्रयभूतम्, अतो न तद्विरोधनिर्वाहकम्। अग्निगतं पैङ्गल्यमौज्ज्वल्यं चाकारद्वयमग्नौ शीतोष्णरूपविरुद्धधर्मद्वयसमावेशनिर्वाहकं न भवतीत्यर्थः। द्वितीयं शिरो दूषयति—**अविलक्षणमिति**। पूर्वमाकारद्वये संभवति तस्य विरुद्धधर्मद्वयनिर्वाहकत्वायोग उक्तः, अत्र तु आकारद्वयमेव नास्तीति नितरां विरुद्धधर्मसमावेशायोग इत्यभिप्रायेण **कथंतरा**मित्युक्तम्। तृतीयं शिरो दूषयति—**आकारद्वयतद्वतोरिति**। आकारद्वयस्य, तदाश्रयस्य च भिन्नाभिन्नत्वनिर्वाहकमाकारद्वयान्तरमपेक्षितं, तस्यापि स्वाश्रयेण भिन्नाभिन्नत्वमस्ति चेत्तदविरोधनिर्वाहकाकारद्वयान्तरमपेक्षितम्—इत्यनवस्था स्यादित्यर्थः। अथ किं दृष्टेऽनुपपन्नामेति शङ्कायां भेदाभेदविषयां प्रतीतिं दूषयति—**न चेति**। हेतुमाह—**यत इति**। तस्यां प्रतीतौ प्रकारप्रकारिणौ विविच्य दर्शयति—**तत्रेति**। अनेनेदमपि परिहृतं—मत्त्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यं, सहोपलम्भनियमः, एकशब्दानुविद्धप्रत्ययः, प्रथमपिण्डग्रहणे जातिव्यक्त्योरभेदेन प्रतीतिश्चेति हेतुचतुष्टयम्। **अपृथक्सिद्धि**विशेषणत्वं मत्त्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यहेतुः। **अपृथक्सिद्धिश्च** प्रकारप्रकारिणोः संबन्धनियमादेवोपपन्ना, अतः प्रकारप्रकारिभावप्रतिपन्नभेदविरुद्धाभेदकल्पनाया अनवकाशः, संबन्धनियम एव सहोपलम्भनियमहेतुश्च। 'एकोऽयं गौ'रिति प्रत्ययोऽप्येकोऽयं दण्डी'तिवद्विशेष्यैक्यविषयः, न तु विशेषणविशेष्यैक्यविषयः। प्रथमपिण्डग्रहणेऽपि प्रकारप्रकारिभावात्—**भेदे**नैव प्रतीतिः। किंच—सहत्वमपि भेदसाधकं; द्वयोरेव हि साहित्यं, सहोपलम्भनियमश्च संप्रतिपन्ने भिन्ने अभिन्ने च न दृष्ट इति असाधारणानैकान्तिकत्वात्—नोभयसाधकः । भिन्नेष्वभिन्नेषु चादृष्टस्य भेदाभेदसाधकत्वेऽभ्युपगम्यमाने—नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं गन्धवत्त्वं पृथिव्या नित्यत्वानित्यत्वसाधकं स्यात् । किंच—साधननियमः साध्यनियमहेतुरिति—सहत्वनियमो भेदनियमहेतुरेव। 'अत्र जातिरत्र व्यक्ति'रिति प्रदेशभेदाग्रहणं जातेः पिण्डे व्याप्यवृत्तित्वात्। तच्च सहोपलम्भनियमान्तर्गतं; देशतः कालतश्चोपलम्भनियमो हि सहोपलम्भनियमः, अतो देशतः कालतश्च संबन्धनियमकृतः सहोपलम्भनियमः। किंच—सहोपलम्भनियमोऽसिद्धः; 'इदं रजत'मित्यत्र शुक्तिरजतजात्योर्व्यतिरेकेणाधिष्ठानभूतव्यक्तिप्रतीतेः, अतो नैक्यसाधकमिति—लौकिकवस्तुनि भेदाभेदयोर्विरुद्धत्वमुपजीव्य वैदिकेऽपि तत्सद्भावमाह—**अत एवेति**। भेदाभेदयोर्विरोधेनैकस्मिन्वस्तुनि तयोरनुपपन्नत्वादित्यर्थः। भेदाभेदनिरासमुपजीव्याभेदस्यैव तात्त्विकतामाह—**तस्मादिति**। दोषसंबन्धमुखेन चोदयति—**नन्विति**। अपरमार्थतया परिहरति—**नैवमिति**। परोक्तदोषः परस्यैवेत्याह—**भवतस्त्विति**। तदुपपादयति—**न हि ब्रह्मणीति**। अङ्गुल्यादेरिव छेदो न संभवतीत्यच्छेद्यत्वं ब्रह्मणः, तस्य हेतुर्निरवयवत्वम्। **भित्त्वा** अच्छिन्नत्वेऽपि पाणिपादादिवत्प्रतिनियतप्रदेशभेदेनेत्यर्थः। प्रदेशभेदेन, छेदनेन वा ब्रह्मणि संबन्धमुपाधयो नार्हन्ति; निरवयवत्वात्, अच्छेद्यत्वाच्चेत्यर्थः। निरवयवत्वेऽप्यच्छेद्यत्वेऽपि गगनवदुपहितानुपहितांशभेदेन सदोषत्वनिर्दोषत्वोपपत्तिं शङ्कते—**यदि मन्वीतेति**। उपाध्यवच्छेदाज्जीवभावः, जीवभावादुपाध्यवच्छेदः; कर्मणा जीवभावः, तस्मात्कर्म—**इति**

स चावच्छेदकोऽनादिः, एवमुपाध्युपहिते देशे संबध्यमाना दोषा अनुपहिते परे ब्रह्मणि न संबध्यन्त—इति। अयं प्रष्टव्यः—१ किमुपाधिना छिन्नो ब्रह्मखण्डोऽणुरूपो जीवः, २ उताच्छिन्न एवाणुरूपोपाधिसंयुक्तो ब्रह्मप्रदेशविशेषः, ३ उतोपाधिसंयुक्तं ब्रह्मस्वरूपम्, ४ अथोपाधिसंयुक्तं चेतनान्तरम्, ५ अथोपाधिरेवेति। अच्छेद्यत्वाद्ब्रह्मणः प्रथमः कल्पो न कल्पते। आदिमत्त्वं च जीवस्य स्यात्। एकस्य सतो द्वैधीकरणं हि च्छेदनम्। द्वितीये तु कल्पे—ब्रह्मण एव प्रदेशविशेष उपाधिसंबन्धादौपाधिकाः सर्वे दोषास्तस्यैव स्युः। उपाधौ गच्छत्युपाधिना स्वसंयुक्तब्रह्मप्रदेशाकर्षणायोगादनुक्षणमुपाधिसंयुक्तब्रह्मप्रदेशभेदात्क्षणे क्षणे बन्धमोक्षौ च स्याताम्। आकर्षणे च—अच्छिन्नत्वात्कृत्स्नस्य ब्रह्मण आकर्षणं स्यात्। निरंशस्य व्यापिन आकर्षणं न संभवतीति चेत्, तर्ह्युपाधिरेव गच्छतीति पूर्वोक्त एव दोषः स्यात्। अच्छिन्नब्रह्मप्रदेशेषु सर्वोपाधिसंसर्गे सर्वेषां च जीवानां ब्रह्मण एव प्रदेशत्वेनैकत्वप्रतिसंधानं स्यात्। प्रदेशभेदादप्रतिसंधाने च—एकस्यापि स्वोपाधौ गच्छति प्रतिसंधानं न स्यात्। तृतीये तु कल्पे—ब्रह्मस्वरूपस्यैवोपाधिसंबन्धेन जीवत्वापातात्तदतिरिक्तानुपहितब्रह्मासिद्धिः स्यात्। सर्वेषु च देहेष्वेक एव जीवः स्यात्। तुरीये तु कल्पे—ब्रह्मणोऽन्य एव जीव इति जीवभेदस्यौपाधिकत्वं परित्यक्तं स्यात्। चरमे—चार्वाकपक्ष एव परिगृहीतः स्यात्। तस्मादभेदशास्त्रबलेन कृत्स्नस्य भेदस्याविद्यामूलत्वमेवाभ्युपगन्तव्यम्। अतः प्रवृत्तिनिवृत्तिरूपप्रयोजनपरतयैव शास्त्रस्य प्रामाण्येऽपि ध्यानविधिशेषतया वेदान्तवाक्यानां ब्रह्मस्वरूपे प्रामाण्यमुपपन्नमिति। तदप्ययुक्तम्; ध्यानविधिशेषत्वेऽपि वेदान्तवाक्यानामर्थसत्यत्वे प्रामाण्यायोगात्। एतदुक्तं भवति—ब्रह्मस्वरूपगोचराणि वाक्यानि किं ध्यानविधिनैकवाक्यतामापन्नानि ब्रह्मस्वरूपे प्रामाण्यं प्रतिपद्यन्ते, उत स्वतन्त्राण्येव। एकवाक्यत्वे—ध्यानविधिपरत्वेन ब्रह्मस्वरूपे तात्पर्यं न संभवति। भिन्नवाक्यत्वे—प्रवृत्तिनिवृत्तिरूपप्रयोजनविरहादनवबोधकत्वमेव। नच वाच्यं—ध्यानं नाम स्मृतिसंततिरूपं, तच्च स्मर्तव्यैकनिरूपणीयमिति ध्यानविधेः स्मर्तव्यविशेषाकाङ्क्षायाम्—**'इदं सर्वं यदयमात्मा'** (बृ. २।४।६), **'अयमात्मा ब्रह्म सर्वानुभूः'** (बृ. २।५।१९), **'सत्यं ज्ञानमनन्तं ब्रह्म'** (तै. २।१।१) इत्यादीनि, स्वरूपतद्विशेषादीनि समर्पयन्ति, तेनैकवाक्य-

---

चान्योन्याश्रयपरिहारायानादिरित्युक्तम्। दूषयितुमाह—**अयं प्रष्टव्य इति**। विकल्पयति—**किमिति**। श्रुताव्यणुशब्दस्य सूक्ष्मपरत्वाभिप्रायसंभवात् तृतीयकल्पोदयः। चतुर्थपञ्चमौ कल्पावाभ्यां विकल्पाभ्यां विना गतिर्नास्तीत्यभिप्रायेण कृतौ, न तु पराभ्युपगत्या। ब्रह्मशब्दस्य जीवेऽप्युपचारवृत्तेः—चतुर्थकल्पः। उपाधिब्रह्मणोर्भिन्नाभिन्नत्वाभ्युपगमात्—पञ्चमः। प्रथमं शिरोदूषयति—**अच्छेद्यत्वादिति**। दूषणान्तरमाह—**आदिमत्त्वमिति**। तदुपपादयति—**एकस्य सत इति**। द्वितीयं दूषयति—**द्वितीये त्विति**। दूषणान्तरमाह—**उपाधाविति**। आकर्षणेन विना तत्परिहारासंभवात् तदाशङ्क्याह—**आकर्षणे चेति**। अनुपपत्त्या तदनभ्युपगममाशङ्क्य पूर्वोक्तदूषणेन व्युदस्यति—**निरंशस्येति**। दूषणान्तरमाह—**अच्छिन्नेति**। तत्परिहारमाशङ्क्याह—**प्रदेशभेदादिति**। तृतीयं शिरो दूषयति—**तृतीये त्विति**। **अनुपहितब्रह्मासिद्धिः स्यादिति**। निर्दोषमङ्गलगुणकलश्रुतीनामनुपहितब्रह्मविषयत्वं हि पराभ्युपेतम्। जीवेश्वरभेदाभावप्रसङ्गः, जीवानां परस्परभेदाभावप्रसङ्गश्चेत्यर्थः। चतुर्थपञ्चमौ दूषयति—**तुरीये त्वित्यादिना। चरम इति**। अविद्रव्यस्यैव चेतनत्ववचनात्—तस्य चेतनब्रह्मतादात्म्यानुपपत्तिश्चेत्यभिप्रायः। भेदाभेददूषणमुपसंहरन्स्वमतसिद्धिमाह—**तस्मादिति**। ध्यानविधिशेषतया ब्रह्मणः सिद्धिमुपसंहरति—**अत इति। इति ध्याननियोगवादिना भास्करमततिरस्कारः॥**

ध्याननियोगवादिपक्षं मीमांसको दूषयति—**तदप्ययुक्तमिति**। न केवलं निष्प्रपञ्चीकरणविधिवाद एवानुपपन्नः, इदमपि मतमनुपपन्नमित्यपिशब्दस्य भावः। कुत इत्यत्राह—**ध्यानेति**। ध्यानविधिशेषत्वे कथमर्थसत्यत्वे तात्पर्ययोगः विधिशेषत्वं हित्वा स्वातन्त्र्येण वा ब्रह्मणि प्रामाण्यं स्यादित्याह—**एतदुक्तमिति**। दूषयितुं विकल्पयति—**ब्रह्मस्वरूपेति**। प्रथमं शिरो दूषयति—**एकेति। एकवाक्यत्वं** महावाक्यैकत्वम्। द्वितीयं दूषयति—**भिन्नेति। अनवबोधकत्वं** दुःखसाध्यश्रवणादौ प्रवृत्त्ययोगात्। एकवाक्यत्वपक्षे विधिशेषतया ब्रह्मणः सिद्धिमाशङ्क्याह—**नच वाच्यमिति**। कुत इत्यत्राह—**ध्यानविधेरिति। नाम ब्रह्मेत्युपासीते**त्यादिषु दृष्टिविधिषु विशेष्यसत्यत्वेऽपि विशेषणसत्यत्वेन—विशि-

तामापन्नान्यर्थसद्भावे प्रमाणमिति; ध्यानविधेः स्मर्तव्यविशेषापेक्षत्वेऽपि **'नाम ब्रह्मेत्युपासीत'** (छां.३।१८।१) इत्यादिदृष्टिविधिवदसत्येनाप्यर्थविशेषेण ध्याननिर्वृत्त्युपपत्तेर्ध्येयसत्यत्वानपेक्षणात् । अतो वेदान्तवाक्यानां प्रवृत्तिनिवृत्तिप्रयोजनविधुरत्वाद्ज्ञानविधिशेषत्वेऽपि ध्येयविशेषस्वरूपसमर्पणमात्रपर्यवसानात्स्वातन्त्र्येऽपि बालातुरौद्युपच्छन्दनवाक्यवज्ज्ञानमात्रेणैव पुरुषार्थपर्यन्ततासिद्धेश्च परिनिष्पन्नवस्तुसत्यतागोचरत्वाभावाद्ब्रह्मणः शास्त्रप्रमाणकत्वं न संभवतीति प्राप्तम् । तत्र प्रतिपद्यते—**तत्तु समन्वयादिति** । **समन्वयः** सम्यगन्वयः पुरुषार्थतयान्वय इत्यर्थः । परमपुरुषार्थभूतस्यानवधिकातिशयानन्दस्वरूपस्य ब्रह्मणोऽभिधेयतयान्वयात्तच्छास्त्रप्रमाणकत्वं सिध्यत्येवेत्यर्थः । निरस्तनिखिलदोषगन्धनिरतिशयानन्दस्वरूपतया परमप्राप्यं ब्रह्म बोधयन्वेदान्तवाक्यगणः प्रवृत्तिनिवृत्तिपरतावरिहान्न प्रयोजनपर्यवसायीति ब्रुवाणो राजकुलवासिनः पुरुषस्य कौलेयककुलाननुप्रवेशेन प्रयोजनशून्यतां ब्रूते । एतदुक्तं भवति—अनादिकर्मरूपाविद्यावेष्टनतिरोहितपरावरतत्त्वयाथात्म्यस्वरूपावबोधानां देवासुरगन्धर्वसिद्धविद्याधरकिंनरकिंपुरुषयक्षरक्षःपिशाचमनुजपशुशकुनिसरीसृपवृक्षगुल्मलतादूर्वादीनां स्त्रीपुंनपुंसकभेदभिन्नानां क्षेत्रज्ञानां व्यवस्थितधारकपोषकभोग्यविशेषाणां, मुक्तानां, स्वस्य चाविशेषेणानुभवसंभवे स्वरूपगुणविभवचेष्टितैरनवधिकातिशयानन्दजनकं परं ब्रह्मास्तीति बोधयदेव वाक्यं प्रयोजनपर्यवसायि, प्रवृत्तिनिवृत्तिनिष्ठं तु यावत्पुरुषार्थान्वयबोधं न प्रयोजनपर्यवसायि । एवंभूतं परं ब्रह्म कथं प्राप्यत इत्यपेक्षायां—**'ब्रह्मविदाप्नोति परम्'** (तै. २।१।१), **'आत्मानमेव लोकमुपासीत'** (बृ. १।४।१५)

ष्टासत्त्वमवर्जनीयम्, इह च तथैवेत्यर्थः । सार्थसंग्रहं पूर्वपक्षमुपसंहरति—**अत इति** । ननु—प्रथमसूत्रे विधिशेषतया ब्रह्मणि प्रामाण्यसमर्थनम्, एतदधिकरणपूर्वपक्षे विधिशेषतया तत्सिद्धिप्रतिक्षेपश्च कथं घटते, इत्थं—तत्र हि फलत्वेन सिद्धिरुक्ता, फलतया सिध्यतः पारमार्थ्याभावे स्वर्गादेरप्यसत्त्वप्रसङ्गात्—तत्पारमार्थ्यं सिध्यतीति—फलतया तत्सिद्धिसमर्थनं साधीयः, अत्र तु ध्यानविधिकर्मत्वेन तत्सिद्धिर्भुदस्ता, न तु फलतया तत्सिद्धिरित्यविरोधः । एवमुपन्यस्तं पूर्वपक्षमभिप्रेत्य सूत्रकारेणैवैतत्सूत्रं प्रणीतमित्यत्राह—**तत्रेति** । **प्रतिपद्यते** सिद्धान्तः प्राप्नोति, ज्ञायत इति वार्थः । **समन्वय**शब्दं विस्तरेण व्याचष्टे—**समन्वय इत्यादिना** । कस्य केनान्वयः इत्यपेक्षां पूरयन् वाक्यार्थं योजयति—**परमेति** । परमपुरुषार्थत्वोपपादक**मनवधिके**ति पदम् । पुरुषेणार्थ्यत्वं हि **पुरुषार्थत्वम्** । आनन्दरूपतया पुरुषार्थत्वं, तस्यानवधिकातिशयत्वात्—परमपुरुषार्थत्वमिति भावः । स्वयमननुकूलस्य सुखसाधनस्यापि पुरुषार्थत्वमस्तीति तद्व्यावृत्तिर्**अनवधिके**त्यादिपदेन सिद्धा । तच्छब्दं व्याचष्टे—**शास्त्रप्रमाणकत्वमिति** । पूर्वपक्षव्यावर्तक**तु**शब्दलब्धमर्थमाह—**सिद्ध्यत्येवेति** । तत्त्वमस्यादिस्वरूपोपदेशपरवाक्यार्थज्ञानमात्रेणाविद्यानिवृत्तिं, तन्मुखेन वाक्यस्य प्रयोजनपर्यवसानं च वदतो मृषावादिनो ध्यानविध्यानर्थक्यं स्यात्; वाक्यार्थज्ञानोपयोगिलक्ष दूषितत्वात्, मीमांसकपक्षे ब्रह्मणोऽसिद्धिः—इत्युभयविधदोषास्पृष्टेनाकारेण वेदान्तवाक्यानां ब्रह्मणि प्रामाण्यमुपपिपादयिषुस्तत्र प्रथमं ब्रह्मणः स्वतः सर्वेषां सर्वप्रकारभोग्यत्वेन पुरुषार्थत्वाधिक्यं, प्रवृत्तिनिवृत्त्योर्दुःखात्मकत्वेन पुरुषार्थत्ववैकल्यं चाभिप्रयन् प्रवृत्तिनिवृत्तिपरत्वविरहवतः पुरुषार्थत्वपर्यवसानाभावनिबन्धनामप्रामाण्यशङ्कां परिहरति—**निरस्तेति** । **राजकुलवासी** राजकुलप्रसूतः, राजकुलान्तरक्रो वा । **कौलेयकाः** श्वानः, श्वोपजीविनो म्लेच्छा वा लक्ष्यन्ते । यद्यपि—वाक्यगणस्थाने राजकुलवासी पुरुषः प्रतीयते, तथापि—अर्थवशाद्वाक्यार्थप्रतिपत्तृपुरुषस्थाने तन्निर्देशः फलितः । स्वतोनिरवधिकपुरुषार्थपरवाक्यस्य प्रयोजनशून्यत्वकथनमनुपपन्नमित्यर्थः । ब्रह्मणः कथमनवधिकानन्दरूपतया पुरुषार्थत्वाधिक्यं, कथं च प्रवृत्तिनिवृत्त्योः पुरुषार्थत्ववैकल्यं, स्वरूपपरवाक्यस्य पुरुषार्थपर्यवसानं कुत्र दृष्टं, तथा सति कथं ध्यानविधिसाफल्यमित्याकाङ्क्षायामाह—**एतदुक्तमिति** । ब्रह्मणः पुरुषार्थताधिक्यमाह—**अनादीत्यादिना** । कर्मभिरनुभवप्रतिबन्धात्—क्षेत्रज्ञानां तस्य पुरुषार्थत्वज्ञानाभावः, न तु तत्र तद्वैकल्यादित्यभिप्रायेणोक्तम्—**अनादिकर्मेति** । **देवासुरा**दिपरिगणनं तेषां व्यवस्थितभोग्यत्वप्रदर्शनार्थम् । योग्यानुपलब्धिशङ्काव्युदासाया-**नुभवसंभव** इत्युक्तम् । तद्विषयज्ञानानुकूलत्वं हि तदनुकूलत्वेन विना न संभवति, अतोऽ**नवधिकातिशयानन्दजनकत्वो**क्त्या ब्रह्मणोऽनवधिकातिशयानुकूलत्वं सिध्यतीत्यानन्दत्वमुपपादितं भवति ॥ **स्वरूपेत्या**दिना सर्वप्रकारभोग्यत्वमुक्तं, तेन पुरुषार्थत्वाधिक्यं सिद्धम् । **प्रवृत्ती**त्यादिना प्रवृत्तिनिवृत्त्योः पुरुषार्थत्ववैकल्यमुक्तम् । इष्टसुखलवसाधनस्याप्युपादेयत्वात्, दुःखात्मकतया स्वतोभोग्यत्वाभावाच्च ध्यानादिविध्यानर्थक्यं परिहरति—**एवं भूतमिति** । परोक्षज्ञानस्यापि सुखरूपत्वात्—स्वरूपपराणि वाक्यानि पुरुषार्थपर्यवसायीन्येव । तदापरोक्ष्याकाङ्क्षिणस्तत्साधनज्ञापकत्वात्—ध्यानविधायकानि

इति वेदनादिशब्दैरुपासनं ब्रह्मप्राप्त्युपायतया विधीयते । यथा स्ववेश्मनि निधिरस्तीति वाक्येन निधिसद्भावं ज्ञात्वा तृप्तः सन्पश्चात्तदुपादाने च प्रयतते । यथा च कश्चिद्राजकुमारो बालक्रीडासक्तो नरेन्द्रभवनान्निष्क्रान्तो मार्गाद्भ्रष्टो नष्ट इति राज्ञा विज्ञातः स्वयं चाज्ञातपितृकः केनचिद्विजवर्येण वर्धितोऽधिगतवेदशास्त्रः षोडशवर्षः सर्वकल्याणगुणाकरस्तिष्ठ'न्पिता ते सर्वलोकाधिपतिर्गाम्भीर्यौदार्यवात्सल्यसौशील्यशौर्यवीर्यपराक्रमादिगुणसंपन्नस्त्वामेव नष्टं पुत्रं दिदृक्षुः पुरवरे तिष्ठती'ति केनचिदभियुक्ततमेन प्रयुक्तं वाक्यं श्रृणोति चेन्, तदानीमेवा'हं तावज्जीवतः पुत्रो मत्पिता च सर्वसंपत्समृद्ध' इति निरतिशयहर्षसमन्वितो भवति । राजा च स्वपुत्रं जीवन्तमरोगमतिमनोहरदर्शनं विदितसकलवेद्यं श्रुत्वाऽवाप्तसमस्तपुरुषार्थो भवति, पश्चात्तदुपादाने च प्रयतते, पश्चात्तावुभौ संगच्छेते चेति ।

वाक्यान्यपि न निष्फलानीत्यर्थः । इममर्थं दृष्टान्तेन दर्शयति—**यथेति** । एवं परोक्षज्ञानजनकस्यैव वाक्यस्य पुरुषार्थपर्यवसायित्वेऽपि फलविशेषापेक्षया ध्यानप्रवृत्तिर्युक्ता, यथा—'दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत, ज्योतिष्टोमेन स्वर्गकामो यजेत, अग्निहोत्रं जुहुयात्स्वर्गकाम' इत्यादिषु दर्शपौर्णमासादीनामेकैकस्य स्वर्गसाधनत्वेऽपि फलविशेषापेक्षया कर्मान्तरारम्भः, एकस्यैव कर्मण आवृत्तिश्चोपपद्यते । यथा—पुत्रजन्मश्रवणसंजातहर्षस्यापि पश्चात्तन्मुखापरोक्ष्यसुखाशया प्रवृत्तिरुपपद्यते, तथा—अत्रापीत्यभिप्रायः । अत्र **निधिराजकुमार**दृष्टान्तद्वयं चिदचिद्विभागादुक्तम्; उभयगतं भोग्यत्वं ब्रह्मण्यस्तीति ज्ञापनाय । 'तद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विन्देयु'रिति श्रुतिः । निधिरस्तीति वाक्यस्य पुरुषार्थपरत्वं दर्शयति—**तृप्तः सन्निति** । 'अविज्ञाताः कुमारकाः, भगवतोऽहं पुत्रः प्रेष्यः शिष्यश्च, माता पिता भ्राता, भूतानां योऽव्ययः पिता, एक इन्द्रो जगतो बभूव, राजाधिराजः सर्वेषा'मित्यादिश्रुतिस्मृत्यनुसारेण सर्वविधभोग्यत्वप्रदर्शनाय **राजकुमार** इति भगवति राजत्वं, चेतनेषु पुत्रत्वं, चोपवर्णितम् । अत्र कुशलवसमाधिर्द्रष्टव्यः । **बालक्रीडासक्त** इत्यनेन चेतनानां बाह्यविषयप्रावण्यं सूचितम् । **नरेन्द्रभवनान्निष्क्रान्त** इत्यनेन भगवत्सकाशबहिष्टत्वं दर्शितं, परमव्योमालाभश्च । **मार्गाद्भ्रष्ट** इत्यनेन कर्मज्ञानाद्युपायानन्वयः ख्यापितः । **द्विजवर्येण वर्द्धित** इत्यनेन भगवज्ज्ञाननिष्पत्तियोग्यतासिद्धिहेतुभूताध्ययनादिनिष्पादकाचार्यसंबन्धोऽभिप्रेतः । **षोडशवर्षः** भोक्तृत्वावस्थः, भोग्यत्वावस्थश्चेति भावः । **सर्वकल्याणगुणाकरः** 'निर्वाणमय एवायमात्मा, ज्ञानमयोऽमल' इत्याद्युक्तैर्भगवदभिमतैर्गुणैः पूर्णता सूचिता । **पिता त** इत्यादिना भगवद्गुणगणाः सूचिताः । **गाम्भीर्यादय** उपासकं प्रति सौलभ्योपयुक्ता गुणाः । **शौर्यादयः** परत्वान्तर्गताः । **गाम्भीर्य** सम्प्रदानलाघवदीयमानगौरवानपेक्षत्वम् । **औदार्य** दातृप्रतिग्रहीतृविभागबुद्धिविरहेण प्राप्तं कृतमिति प्रतिपत्तिमत्त्वम् । आत्मात्मीयं दत्त्वापि 'ऋणं प्रवृद्धमिव म' इति स्थितिर्वा । **वात्सल्य** दोषेष्वपि गुणत्वबुद्धिः, यथा मातुर्वत्से । सुशीलं हि नाम महतो मन्दैः सह नीरन्ध्रेण संश्लेषस्वभावत्वं तद्वत्ता **सौशील्यं** । **शौर्य** शत्रुमध्ये स्वगृह इव प्रवेशनसामर्थ्यः 'शूरं भीरुं कविं जड'मिति भीरुत्वप्रतियोगि हि शौर्यम् । **वीर्यम**श्रान्तिः । **पराक्रमो** विक्रमणम् । अत्रानुक्तमपि **धैर्यम**नुसन्धेयं, तच्च शत्रुभिर्धर्षणे तृणवन्मन्यमानत्वम् । **दिदृक्षुरिति** । 'स महात्मा' 'सुदुर्लभ' इति भगवदभिप्रायः सूचितः । **पुरवर** इत्यनेन ब्रह्मपुराख्यशरीरान्तःस्थितिरभिप्रेता । त्रिपाद्विभूतिसंबन्धो वा । **अभियुक्ततम**शब्देन भगवज्ज्ञानप्रदो गुरुर्विवक्षितः । तस्येतरवैलक्षण्यं **केनचि**दित्यभिप्रेतम् । यदाऽध्ययनादिकारयिता गुरुरेव ब्रह्मोपदेष्टा संभवति तदाय**मभियुक्ततम**शब्दः पूर्वनिर्दिष्टद्विजवर्यमेवाभिधत्ते, तदसंभवे ब्रह्मोपदेष्टृपुरुषमात्राभिप्रायः । अत्र **केनचि**दित्यनेन पूर्वेणैव वान्येनैव वेति च तात्पर्यं ग्राह्यम् । **श्रृणोति चे**दित्यनेन भगवज्ज्ञानस्य दुर्लभत्वमभिप्रेतम् । **निरतिशयहर्षसमन्वितो भवती**त्यनेन वाक्यस्य पुरुषार्थपरत्वं दर्शितम् । राजा चेति । राजस्थानीयोऽप्युपासको विवक्षितः, अनेन सर्वविधभोग्यत्वस्य भगवति पुष्कलत्वात् गुणवत्पुत्रगतभोग्यत्वमपि तत्र विद्यत इति ज्ञापितम् । नहि भगवतो ज्ञानं परोक्षरूपम् । **अवाप्तसमस्तपुरुषार्थो भवती**त्यनेन च वाक्यस्य प्रयोजनपर्यवसायित्वं दर्शितम् । **राजा चे**त्यादिरन्यस्यापातप्रतिपन्नार्थोऽप्यविरुद्धः । ध्यानविधेरवैयर्थ्यं दृष्टान्तद्वयेनापि सिद्धमिति ज्ञापयितुमुक्तं—**पश्चात्तदुपादाने च प्रयतत** इति, **पश्चात्तावुभौ सङ्गच्छेतेचे**ति च । अत्र पूर्वमेवा'र्थार्थी राजकुलं गच्छेन्मन्दाग्निर्नाम्बु पिबे'दिति वाक्योदाहरणात्, इह निधिदृष्टान्तोपन्यासाच्च—अयमप्यर्थोऽर्थसिद्धः—किं क्रियोत्तीर्णकार्यपरतयैव वाक्यस्य प्रयोजनपर्यवसायित्वम्, उत क्रियाकार्यं वा तदुत्तीर्णं वा प्रवर्तकमर्थमभिदधत एव तात्पर्यावसायित्वमिति मतम् । न प्रथमः; 'अर्थार्थी राजानं सेवेते'त्यादीनां सप्रयोजनत्वात् । न द्वितीयः; निधिमद्भूभागलक्षणरत्नपरीक्षणपराणां शास्त्राणां प्रयोजनशालित्वात् । नच—तत्रापि खननदारणादिविधिपरत्वं वाक्यानां कल्प्यं; तयो रागप्राप्तत्वात्, खननादिप्रकारस्य लोकसिद्धत्वाच्च । अप्राप्ते हि शास्त्रमर्थवत् । दुष्टरत्नवर्जनमप्यनर्थजिहासाप्राप्तम् । वाक्यानि तु निधिमत्त्वगुणदोषज्ञापनमात्रपर्यवसादीनि, अतः 'प्रवर्तकार्थपरतयैव प्रयोजनपर्यवसान'मिति नियमो भग्न—इति ॥

यत्पुनः—परिनिष्पन्नवस्तुगोचरस्य वाक्यस्य तज्ज्ञानमात्रेणापि पुरुषार्थपर्यवसानाद्बालातुरादुपच्छन्दनवाक्यवन्नार्थसद्भावे प्रामाण्यमिति, तदसत्; अर्थसद्भावाभावे निश्चिते ज्ञातोऽप्यर्थः पुरुषार्थाय न भवति। बालातुरादीनामप्यर्थसद्भावभ्रान्त्यैव हर्षाद्युत्पत्तिः। तेषामेव तस्मिन्नेव ज्ञाने विद्यमाने यद्यर्थाभावनिश्चयो जायेत, ततस्तदानीमेव हर्षादयो निवर्तेरन्। औपनिषदेष्वपि वाक्येषु ब्रह्मास्तित्वतात्पर्याभावनिश्चये ब्रह्मज्ञाने सत्यपि पुरुषार्थपर्यवसानं न स्यात्। अतो **'यतो वा इमानि'** (तै. ३।१।१) इत्यादिवाक्यं निखिलजगदेककारणं निरस्तनिखिलदोषगन्धं सार्वज्ञ्यसत्यसंकल्पत्वाद्यनन्तकल्याणगुणाकरमनवधिकातिशयानन्दं ब्रह्मास्तीति बोधयतीति सिद्धम्। इति समन्वयाधिकरणम् ॥४॥ चतुःसूत्री समाप्ता।

अथ पूर्वपक्षिणोक्तमनुभाषते—**यत्पुनरिति**। वेदान्तवाक्यानां नार्थसद्भावे प्रामाण्यमस्तीति प्रतिज्ञा, तदर्थमर्थसद्भावाभावेऽपि **पुरुषार्थपर्यवसानादिति** हेतुर्विवक्षितः। दूषयति—**तदसदिति**। कुत इत्यत्राह—**अर्थसद्भावाभाव इति**। इदं वाक्यं पक्षविषयं, पक्षदृष्टान्तसाधारणं वा। हेतुत्वं गर्भितम्; अर्थसद्भावाभावनिश्चये सति पुरुषार्थपर्यवसानाभावादित्यर्थः। अर्थासद्भावेऽपि पुरुषार्थो दृश्यत इति शङ्कायां तत्रार्थासद्भावनिश्चयाभावमुपाधिमाह—**बालातुरादीनामिति**। तदेवोपपादयति—**तेषामेवेति**। ततः किमित्यपेक्षायां सपक्षे दर्शितमर्थं पक्षे स्फुटीकरोति—**औपनिषदेष्वपीति**। बालातुरादुपच्छन्दनवाक्येष्विवात्राप्यर्थसद्भावभ्रान्त्या पुरुषार्थपर्यवसानं स्यादिति चेत्, 'पयः पिब कषायं पिब शिखा वर्धिष्यते, पांसुषु लुठसि चेत्तव दन्ता उद्भिद्यन्ते' इत्यादीनां प्रवृत्तिनिवृत्तिपरवाक्यानामिव 'स्वर्गकामो यजेत, न कलञ्जं भक्षयेत्' इत्यादिवाक्यानामप्यर्थसद्भावभ्रान्त्या पुरुषार्थपर्यवसानं किं न स्यात्, अपौरुषेयत्वाद्वेदवाक्यस्य विप्रलिप्सामूलवाक्यस्येव भ्रामकतया पुरुषार्थपर्यवसानमयुक्तं, तथासति शास्त्रस्य निरूपकाधिगन्तव्यत्वात्—स्वपुत्रशिष्यादीनामध्यापनादौ प्रवृत्तिर्नोपपद्यत इति चेत्, अपौरुषेयत्वम्, अध्यापनादिप्रवृत्तिवैयर्थ्यं च वेदान्तवाक्येष्वपि तुल्यम्। कर्मविधीनां देहातिरिक्तात्मज्ञानसापेक्षत्वात्—वेदान्तवाक्यानां कर्मविधिशेषत्वेनाध्यापनादिप्रवृत्त्युपपत्तिरिति—चेन्न; असत्यपि देहात्मभेदे तत्सद्भावभ्रान्तिहेतुत्वशङ्कायां सत्यां तन्मुखेन प्ररोचनाऽनुपपत्त्या—विधिशेषतयाऽध्यापनाद्यनुपपत्तेः। तर्कानुगृहीतनिर्दोषश्रुतिसिद्धदेहात्मभेदस्तात्त्विक इति चेत्, तत्पुरुषार्थभूतस्य परमात्मनः प्रतिप्राद्यत्वेऽपि तुल्यम्। देहात्मभेदसाधकहेत्वन्तरसंवादान्न भ्रान्तिहेतुत्वनिश्चय इति चेत्, तर्हि तेनैव हेत्वन्तरेण देहात्मभेदः सिद्ध इति तज्ज्ञापनाय वेदान्तवाक्यानामनपेक्षित्वात्—विधिशेषतया तदध्यापनादिकं नोपपद्यते। एवं निरूपकाधिकार्यस्य शास्त्रस्यार्थसद्भावभ्रान्त्या पुरुषार्थपर्यवसानानुपपत्तौ प्रवर्तकवाक्यानां प्रतिबन्दीत्वमभिप्रेत्य **औपनिषदेष्वपीत्यादिभाष्यं** प्रवृत्तम्। उक्तस्य हेतोर्विपर्यये पर्यवसानं दर्शयन्नधिकरणार्थमुपसंहरति—**अत इति**। कारणवाक्यानामर्थमाह—**निखिलेति**। **निखिल**शब्दः परैर्निर्व्यूढयाऽभिमतानामाकाशादीनामपि कार्यलक्षणापनार्थः। **एक**शब्दो निमित्तोपादानैक्यद्योतकः। **यतो वा इमानी**त्यादिना वाक्येन शोधकवाक्यार्थश्च गर्भित इत्यभिप्रायेणाह—**निरस्तेति**। अत्र **निखिल**शब्देन चिदचिद्गताः क्लेशकर्मादयः, जन्मादयश्च विवक्षिताः। कदाचिद्दोषसंबन्धार्हत्वव्यावर्तकेन **गन्ध**शब्देन सदा तत्प्रत्यनीकत्वमुक्तं भवति। कारणत्वोपयिकान् गुणानाह—**सार्वज्ञ्येति**। एतदधिकरणसिद्धमर्थमाह—**अनवधिकेति**। **बोधयतीति**। अध्यापनाद्युपपत्तये पुरुषार्थपर्यवसानस्यापेक्षितत्वात्—प्रेक्षावदधिकार्यस्य शास्त्रस्यार्थसद्भावाभावनिश्चये सति पुरुषार्थपर्यवसानानुपपत्तेस्तदुपपत्त्यर्थं **प्रवर्तकवाक्यानामिवार्थसद्भावे प्रामाण्यमङ्गीकार्यमिति**—यथोक्तलक्षणं ब्रह्म **यतो वा इमानी**त्यादिवाक्यं प्रतिपादयतीत्यर्थः। **इति मीमांसकनिरसनेन समन्वयाधिकरणसिद्धान्तसमापनम्** ॥ इति समन्वयाधिकरणम् ॥ ४ ॥ चतुःसूत्री समाप्ता।

चतुःसूत्रीशेषः ॥ शास्त्रारम्भसिद्ध्यैषा चतुःसूत्री मृषावादिनां पक्षे न संगच्छते; तत्पक्षे विषय-प्रयोजनानुपपत्त्या शास्त्रस्यानारम्भणीयत्वात्। तथा हि—विषयः किं ब्रह्म, उत भेदमिथ्यात्वम्, उत जीवब्रह्मणोरैक्यम्। न प्रथमः; ब्रह्मणो वेद्यत्वानभ्युपगमात्, वेद्यत्वे घटादेरिवाननुभूतित्वप्रसङ्गस्य स्वोक्तत्वाच्च। व्यावहारिकं वेद्यत्वमस्तीति चेत्, घटस्यापि वेद्यत्वं व्यावहारिकमिति तद्वदेवाननुभूतित्वप्रसङ्गो दुर्वारः। वास्तववेद्यत्वाभावस्य ब्रह्मणि साध्यत्वे घटस्य व्यतिरेकदृष्टान्तत्वं न घटते; घटस्य वास्तववेद्यत्वाभावविरहाभावात्। अनुभूतिः परमार्थतो न वेद्या; अनुभूतित्वात्, यत्परमार्थतो वेद्यं तन्नानुभूतिः—यथा घट इत्युक्ते व्यतिरेकदृष्टान्तः साध्याव्यावृत्तो हि स्यात्। न हि घटः परमार्थतो वेद्यः। वेद्यत्वेऽननुभूतित्वप्रसङ्गमनाहत्य ब्रह्मणो वेद्यत्वाङ्गीकारेऽपि ब्रह्मणः शास्त्रविषयत्वमयुक्तं; प्रत्यक्षस्य सन्मात्रग्राहित्वमभ्युपगच्छतस्तव मते शास्त्रानर्थक्यप्रसङ्गात्। अप्राप्ते हि शास्त्रमर्थवत्। न द्वितीयः; इदंत्वादिलिङ्गेन भेदमिथ्यात्वमभिमन्यमानस्य तव शास्त्रानर्थक्यप्रसङ्गात्। तत्तद्धर्मि-

तत्र सूत्रम् १.—**तत्तु समन्वयात्** ॥ १।१।४ ॥ अस्यायमर्थः—**तुः** शङ्कानिवारणार्थः। **तत्** शास्त्रप्रमाणकत्वं, (ब्रह्मणः संभवत्येव) कुतः—**समन्वयात्** ब्रह्मणः परमपुरुषार्थतयान्वयात्, इति।

ग्राहकप्रत्यक्षादिप्रमाणविरुद्धस्य प्रपञ्चमिथ्यात्वस्य यूपादित्यैक्यस्येव शास्त्रेण प्रतिपादनायोगात्—शास्त्रस्य निर्विषयत्वं स्यात्। अप्राप्ते हि शास्त्रमर्थवत्। साधकस्येव बाधकस्याप्यगोचरत्वं ह्यप्राप्तत्वम्। ज्वालाभेदानुमानवैषम्यं च त्रिविधं प्रागेव प्रपञ्चितम्। प्रमाणान्तरविरोधश्च तात्पर्यलिङ्गमिति—तद्विरुद्धेऽर्थे तात्पर्यासंभवश्च प्रागेवोक्तः। अतो भेदमिथ्यात्वस्य विषयत्वमयुक्तम्। तृतीयश्च कल्पोऽनुपपन्नः; ब्रह्मणोऽपि वेद्यत्वप्रसङ्गात्। न हि घटपटयोरेकत्वमुच्यते शास्त्रेण, अपि तु जीवब्रह्मणोरेकत्वं तदानीं **ब्रह्म**शब्देन ब्रह्मण्यनवबोधिते कथं तस्य जीवस्य चैक्यं वक्तुं शक्यते। नहि जीव एव इत्युक्ते जीवब्रह्मणोरैक्यं सिध्यति—घट एव इत्युक्ते घटपटैक्यवत्। यदि, ऐक्योपदेशवाक्येष्व**यमात्मा ब्रह्मे**त्यादिषु ब्रह्मणः शब्दबोध्यत्वं सोढव्यं तर्हि, प्राधान्येन ब्रह्मण एव शास्त्रप्रतिपाद्यत्वं किमिति नाभ्युपगम्यते। **सर्वे वेदा यत्पदमामनन्ती**त्यारभ्य **तद्विष्णोः परमं पद**मित्यादिश्रुत्यस्वारस्यमेव तदनभ्युपगमफलम्। किंच—उपदिश्यमानमैक्यं किं ब्रह्मस्वरूपानतिरिक्तम्, उतातिरिक्तम्। अनतिरिक्तत्वे—स्वरूपवेद्यत्वपक्ष एव स्यात्। तथा चोपदेशवैयर्थ्यादिदोषप्रसङ्गः; स्वरूपमात्रस्य प्रतिपन्नत्वात्। अतिरिक्तत्वे—तत्किं परमार्थभूतम्, उतापरमार्थभूतम्। प्रथमे—निर्विशेषत्वभङ्गः। द्वितीये—ज्वालैक्यदेहात्मैक्यापारमार्थ्ये ज्वालाभेददेहात्मभेदपारमार्थ्यवज्जीवब्रह्मभेदपारमार्थ्यं स्यात्। किंच—जीवब्रह्मणोरैक्यं नाम—किमन्तःकरणस्य संविदश्चैक्यम्, उत संविदवच्छिन्नान्तःकरणस्य संविदश्च, उतान्तःकरणावच्छिन्नसंविदः केवलसंविदश्च। न प्रथमः; जडाजडयोरैक्यानुपपत्तेः। नापि द्वितीयतृतीयौ; विशिष्टैक्येऽभ्युपगम्यमाने—विशेषणत्वेन विशेष्यत्वेन वा तदन्तर्भूतस्यान्तःकरणस्यापि संविदैक्यप्रसङ्गात्। तयोश्चाजडत्वजडत्वाभ्यां, सत्यत्वानृतत्वाभ्यां चैक्यमयुक्तमित्युक्तम्। अन्तःकरणोपलक्षितज्ञस्यैक्यं विषय इति चेत्, तदुपलक्षिणज्ञस्यैः केनैक्यमुपदिश्यते—किं स्वात्मनैव, उत ज्ञस्यन्तरेण। न प्रथमः; उपदेशवैयर्थ्यात्। नहि कस्यचिद्वस्तुनः स्वस्मादभिन्नत्वमुपदेष्टव्यं; स्वस्माद्भेदप्रसङ्गाभावात्। ज्ञस्यन्तरेण चेत्, किं परमार्थतो भिन्नेन, उताभिन्नेन। न प्रथमः; अनभ्युपगमात्, अनुपपन्नत्वाच्च। अभिन्नेन चेत्—भेदप्रतीतिरस्ति वा, न वा। न चेत्, ऐक्योपदेशवैयर्थ्यम्। अस्ति चेत्, भेदमिथ्यात्वोपदेश एवैक्योपदेशः स्यात्। भेदमिथ्यात्वस्यानुमानसिद्धत्वाभिमानात्—शास्त्रस्य निर्विषयत्वं स्यात्, भेदपारमार्थ्ये दृश्यत्वानुपपत्तिः—इत्यादितर्कानुगृहीतं शास्त्रं भेदमिथ्यात्वे प्रमाणमिति—न शास्त्रस्य निर्विषयत्वमिति—चेन्न; धर्मभेदसिद्धिसात्वं न स्यादिति तर्कानुगृहीते 'न हिंस्या'दिति शास्त्रेण वैधपश्वालम्भनस्याधर्मत्वप्रतिपादनानुपपत्तिवत्—शास्त्रसिद्धभेदस्य शास्त्रेण मिथ्यात्वप्रतिपादनानुपपत्तेः, संबन्धिभेदभिन्नानां संयोगेच्छादीनामिव ज्ञप्तीनामपि परस्परभेदस्य प्रत्यक्षादिसिद्धत्वात्, तद्विरुद्धत्वादयोग्यस्य ज्ञप्तिभेदमिथ्यात्वस्य शास्त्रेण प्रतिपादनानुपपत्तेश्च। 'नाह खल्वयमेवं संप्रत्यात्मानं जानाम्ययमहमस्मीति, यदा सुप्तः स्वप्नं न कंचन पश्यति, प्राणेभ्यो देवा देवेभ्यो लोकाः' । **देवा** इन्द्रियाणि, **लोका** आलोकनानि संविदः। एवमादिशास्त्रसिद्धः, प्रत्यक्षादिसिद्धश्च कालतो विषयत आश्रयतश्च ज्ञप्तीनां परस्परभेदः। अन्तःकरणवृत्तिभेदविषया सा श्रुतिरिति—चेन्न; स्वाप्रश्रुतेर्वृत्तिगोचरत्वे सति संविदैक्यं, संविदैक्ये सति ज्ञप्तिभेदश्रुतेर्वृत्तिगोचरत्वमित्यन्योन्याश्रयप्रसङ्गात्, ज्ञातृज्ञेयावच्छिन्नतया प्रतीयमानस्य ज्ञानस्यान्तःकरणक्रियात्वे—त्रितयोत्तीर्णज्ञानस्य शशविषाणायमानत्वाच्च—तद्भेदमिथ्यात्वप्रतिपादनं शशविषाणभेदमिथ्यात्वप्रतिपादनतुल्यमिति—न शास्त्रस्य सविषयत्वसिद्धिः। संप्रतिपन्नज्ञानानामेव मिथो भेदस्य मिथ्यात्वं शास्त्रविरोधात्, प्रत्यक्षविरोधाच्च—पश्वालम्भनाधर्मत्ववत्, यूपादित्यैक्यवच्च न शास्त्रं प्रतिपादयितुं शक्नोति। अतः शास्त्रस्य विषयाभावादनारम्भणीयत्वम्॥

तथा प्रयोजनं च न घटते, तथा हि—प्रयोजनं द्विविधं—शास्त्रस्योपायभूतमवान्तरप्रयोजनं, तत्साध्यं परमप्रयोजनं चेति। तत्र बन्धनिवर्तकज्ञानसिद्धिरवान्तरप्रयोजनं, मोक्षस्तु परमप्रयोजनम्। तत्रेदानीमुपजायमानं वाक्यजन्यज्ञानमनिवर्तकमित्यविगीतम्। **वसिष्ठपराशरकृष्णद्वैपायना**दीनामप्युत्पन्नं ज्ञानमन्येषामुत्पत्स्यत इत्यत्यन्तासंभावितम्। तेषामुत्पन्नं चेत्, भेदप्रतिभासो न स्यात्। स निवर्तिष्यत इति चेत्, तत एव तदभिन्नानामन्येषामपि निवर्तिष्यत इति—न शास्त्रमारम्भणीयं स्यात्। प्रपञ्चस्य सत्यत्वादेव ज्ञाननिवर्त्यत्वाभावात्—अनिवर्तकं ज्ञानं नावान्तरफलमिति—न तदर्थं शास्त्रमारम्भणीयम्। परमप्रयोजनं च न सिध्यति; ज्ञातृज्ञेयभेदस्य सत्यस्य निवृत्तेरसंभावितत्वात्। किंच—शास्त्रश्रवणाधिकारो ज्ञप्तिमात्रस्य वा, ज्ञातुर्वा। न प्रथमः; ज्ञप्तिमात्रस्य श्रोतृत्वायोगात्। न द्वितीयः; ज्ञातुः स्वनाशस्यापुरुषार्थत्वेन श्रवणादौ प्रवृत्त्यनुपपत्तेः। यत्संबन्धि सुखं, दुःखनिवृत्तिश्च पुरुषार्थः स खलु अहमर्थः; 'अहं निर्दुःखः सुखी स्या'मिति हि प्रतीतिः। तस्य पुरुषार्थवतो नाशः कथं पुरुषार्थः, पुरुषार्थान्तरं वा कथमर्थयितुमस्यासंभावे पुरुषार्थो भवेत्। अथोच्येत—भवत्पक्षे बद्धस्य वा, मुक्तस्य वा शास्त्राधिकारः। प्रथमे—स्वनाशस्यापुरुषार्थत्वादप्रवृत्तिः। उपाधिविशिष्टस्य बद्धस्य तद्रूपनाशो हि स्वनाशः। द्वितीयेतु—मुक्तस्य शास्त्रानपेक्षत्वादनधिकारः। औपाधिकाकारविनाशो नापुरुषार्थः; दुःखविनिर्मुक्तस्वाभाविकरूपावस्थानादिति चेत्, तर्हि ज्ञातृत्वस्यौपाधिकत्वात्तन्निवृत्तौ स्वरूपं तिष्ठतीति नापुरुषार्थ इति, नैवं; संविदि वास्तवज्ञातृत्वानभ्युपगमात्, तदारोपे चान्यत्र तत्सिद्धेरवश्यंभावात्, अन्यस्य च ज्ञातुर्ज्ञप्तिधर्मत्वाभावात्। यदि ज्ञप्तिः स्वरूपं ज्ञाता तद्धर्मः, तदानीमियं प्रतिवन्दी स्यात्। 'अहं सुखी दुःखी'ति सुखदुःखवत् 'अहं जानामी'ति ज्ञानस्याहमर्थधर्मतया प्रतीतेः, अहमर्थस्य धार्मिण्यया प्रतीतेश्चाविगीतत्वात्—सुखदुःखनिवृत्त्योराश्रयस्य तस्य नाशोऽपुरुषार्थ एव। धार्मिणि नष्टे कस्य दुःखनि-

वृत्तिः पुरुषार्थः स्यात् । अचेतनप्रकृतिवद्बन्धमौपाधिकदुःखावहमिति—'मन्निमोऽहं'मिति प्रत्ययवतः पुरुषस्य मान्निम्यनिवृत्तिश्चनिवृत्तिर्नापुमर्थः अत्यन्तामिमतस्य धर्मिस्वरूपस्य स्थिनत्वात्, अनिष्टबन्धनिवृत्तेरनिष्टत्वाच्च । ननु—लौकिकप्रतीत्या वा, निरूपकप्रतीत्या वाऽहमर्थस्य स्वरूपत्वम् । प्रथमे—'स्थूलोऽहं कृशोऽहं'मिति लोकदृष्ट्या प्रतिपन्नत्वात्—स्थूलत्वादिविशिष्टदेहनिवृत्तिरप्यपुमर्थः स्यात् । द्वितीये स्थौल्यादिवदध्यस्तोऽहमर्थो ज्ञानाऽपि न स्वरूपमिति—न तन्नाशोऽपुरुषार्थः । नैवं; 'मम हस्तो मम पाद' इति लोकदृष्ट्याप्यहमर्थस्य देहव्यतिरेकप्रतीतेः, अहमर्थस्य वान्मत्वे—श्रुतिस्मृतिसूत्राणां प्रागेव दर्शिततया निरूपकप्रतीतावप्यहमर्थस्यैव स्वरूपताप्रतीतेश्च—अहमर्थनिवृत्तेर्देहनिवृत्तितुल्यलाभावेनापुरुषार्थत्वस्य दुर्निवारत्वात् । अतो विषयप्रयोजनाभावाच्छास्त्रस्यानारम्भणीयत्वं **मृषावादिनां** पक्षे स्थितम् ॥

पक्षाद्वाविनो नित्यानित्यविवेकादेः पूर्ववृत्तत्वायोगात्—**अथशब्दार्थः परोक्तोऽनुपपन्न** इति पूर्वमवोचैः, शास्त्रान्तरजन्यस्य नित्यानित्यविवेकस्य वेदान्तविरुद्धत्वात्, तेष्वेव मोक्षोपायोपदेशेन निराकाङ्क्षत्वाच्च—ब्रह्मविचारहेतुत्वाभावात्, नित्यानित्यविषयापातप्रतीतेस्तु उभयभागसाधारण्यात्—एकान्ततो ब्रह्मविचारहेतुत्वाभावात्, इतिहासपुराणयोः संशयविपर्ययग्रस्ततया तज्जन्यनित्यानित्यादिप्रतीतेः त्रिवर्गजिहासाजनकत्वाभावेन—ब्रह्मविचारं प्रति हेतुत्वाभावाच्च—**अतः**शब्दार्थोऽनुपपन्नः । यन्नित्यं तदुपादेयं यदनित्यं तद्धेयमिति विवेको नित्यानित्यवस्तुविवेक इत्युल्लेखणमप्ययुक्तं; वेदान्तेषु नित्यपुरुषार्थत्वप्रतिपादनावगमात्–वेदान्तारम्भः, तदारम्भात्–तेषु नित्यपुरुषार्थप्रतिपादनावगम इत्यन्योन्याश्रयप्रसङ्गात्, शास्त्रान्तरेष्वपि नित्यपुरुषार्थसंभावनया ब्रह्मविचारं प्रत्येकान्ततो हेतुत्वाभावात्, शास्त्रान्तरेषु तदभावस्य वेदान्तेषु तत्सद्भावनिश्चयस्य च तर्कपादाधीनत्वेन पूर्ववदन्योन्याश्रयप्रसङ्गात्, वेदान्ततदितरशास्त्रेषु नित्यपुरुषार्थसद्भावासद्भावयोर्गुरुवचनादवगम्यत्वे ब्रह्मोपासनस्यापि गुरुवचनादवगम्यत्वेन शारीरकमीमांसानैरपेक्ष्येण—तदनारम्भणीयत्वप्रसङ्गाच्च । जीवब्रह्मणोरैक्यस्य शास्त्रविषयत्वाङ्गीकारे ब्रह्मजिज्ञासापदं न संगच्छते; ब्रह्मणो जिज्ञास्यत्वं हि शब्दादवगम्यते, न जीवब्रह्मणोरैक्यस्य । यथा—धर्मजिज्ञासापदं धर्ममात्रस्य जिज्ञास्यतां वक्ति, न तु धर्माधर्मयोरैक्यस्य जिज्ञास्यत्वं, तद्वदेव हि ब्रह्मजिज्ञासापदम् ॥

निर्विशेषस्य वस्तुनो लक्षणोक्तिश्च न घटते; विशेषणतया लक्षणत्वे सविशेषत्वप्रसङ्गात्, उपलक्षणतया लक्षणत्वे पूर्वप्रतिपन्नाकारातिरिक्तस्योपलक्षणज्ञाप्यस्याकारान्तरस्याभावेनोपलक्षणवैयर्थ्यात्, तदभ्युपगमे सविशेषत्वप्रसङ्गाच्च । स्वरूपमेवोपलक्षणज्ञाप्यमिति चेत्, तत्स्वरूपं प्राक् प्रतिपन्नं, न वा । प्रतिपन्नं चेत्, उपलक्षणवैयर्थ्यम् । अप्रतिपन्नत्वे—स्वप्रकाशता न स्यात्, उपलक्षयितुमशक्यता च । केदारत्वाकारेणावगतस्य देवदत्तसंबन्धितया सारूप्येण ज्ञाप्यत्वं ह्युपलक्ष्यत्वम् । प्रागनवगता प्रपञ्चव्यावृत्तिरुपलक्ष्याकार इति—चेन्न; प्रपञ्चव्यावृत्तेः स्वरूपातिरिक्तत्वे—सविशेषत्वप्रसङ्गात्, अनतिरिक्तत्वे—तत्स्वरूपं प्रागेव भातमित्युपलक्षणवैयर्थ्यम् । किंच—कथं कारणत्वे लक्षणे सति प्रपञ्चव्यावृत्तिः, कारणत्वं नाम कार्यजगदध्यासाधिष्ठानत्वम्, अतोऽध्यस्तादनृतात्प्रपञ्चादधिष्ठानस्य ब्रह्मणः सत्यतया व्यावृत्तिरिति—चेन्नः घटाद्यधिष्ठानस्य मृद इव ब्रह्मणोऽप्यनृतत्वेन व्यावृत्तिप्रसङ्गात् । घटादिकारणस्यापि मृदादेः कारणान्ताध्यस्तत्वादसत्त्वं, कालत्रयवृत्तिकृत्स्नकार्याधिष्ठानस्य ब्रह्मणोऽन्याध्यस्तत्वाभावान्नासत्त्वमिति—चेन्न; **इदमग्र आसी**दितीदंशब्दवाच्यं कार्यमात्रं प्रत्यधिष्ठानत्वश्रवणेन—ब्रह्मणोऽपि कारणान्तराध्यस्तत्वाविरोधात्, बीजाङ्कुरन्यायेन प्रवाहानादित्वोपपत्तेश्च । कृत्स्नकार्यकारणस्य ब्रह्मणः कारणान्तरप्रतिषेधेनाकार्यत्वात्सत्त्वमिति—प्रपञ्चव्यावृत्तिरिति चेत्, तर्ह्यकार्यत्वमात्रेण जगद्व्यावृत्तिसिद्धेः कारणत्वोक्तिवैयर्थ्यात्—अकार्यत्वश्रुतिरेव लक्षणवाक्यत्वेनोदाहर्तव्या स्यात्, नतु **यतो वा इमानी**त्यादिश्रुतिः । अकार्यत्वश्रुतिरेव विवक्षितेति चेत्, तर्हि–'स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप' इत्यकार्यत्वश्रुतेः **करणाधिपाधिप**शब्दवाच्येश्वरविषयत्वात्—लक्ष्यवस्तुनो निर्विशेषत्वं न सिध्येत् । किंच—जगत्कारणत्वरूपलक्षणविशेषो लक्ष्यस्य निर्विशेषत्वविरोधी; सार्वज्ञ्यादिगुणाक्षेपकत्वात्तस्य । आक्षिप्तमपि सार्वज्ञ्यादिकं वस्तुमात्रोपलक्षणमिति—चेन्न; सार्वज्ञ्येन वस्तुन्युपलक्षिते सति सर्वशक्तित्वाद्युपलक्षणान्तरवैयर्थ्यात् । नहि शाखया चन्द्रे उपलक्षिते प्रासादाग्रेण प्रयोजनम् । सार्वज्ञ्येन निर्विशेषवस्तूपलक्षणं व्याहतं च; स्वेन सविशेषस्याश्रयस्य निर्विशेषत्वज्ञापनायोगात्, सर्वशक्तित्वादिविशेषान्तरराहित्यज्ञापनासामर्थ्याच्च । अतो लक्षणसूत्रं निर्विशेषपक्षे विरुद्धम् ॥

तृतीयं सूत्रमपि न घटते; निर्विशेषवस्तुनि तात्पर्यविषये सति कारणत्वाद्याक्षिप्तसार्वज्ञ्यादिसमर्थनं क्रोपयुज्यते । प्रसङ्गादपि न तत्समर्थनं न्याय्यं; निर्विशेषत्वविरोधात् । किंच—ऋग्वेदादिशास्त्रं स्वविषयादधिकविषयज्ञानवदुपादानकं; वाक्यत्वात्–इत्यनुमानमप्यसङ्गतम् । तथा हि—किमधिकविषयज्ञानवदुपादानकत्वं साध्यम्, उत तद्बहुकत्वम्, उत तदुच्चारितत्वम् । प्रथमे—दृष्टान्तः साध्यविकलः; आकाशगुणस्य शब्दस्य कालिदासाद्युपादानकत्वाभावात् । न द्वितीयः; वेदस्य पौरुषेयत्वप्रसङ्गात् । न तृतीयः; अनैकान्तिकत्वात् । नहि वैदिकमन्यद्वा वाक्यमुच्चारयतां बालादीनां तद्विषयादधिकविषयज्ञानमस्ति । **शास्त्रप्रमाणकत्वं सूत्रार्थ** इति च व्याख्या ब्रह्मणोऽनुभाव्यत्वमनभ्युपगच्छतां न घटते ॥

चतुर्थे च सूत्रे ब्रह्मणः प्राधान्येन शास्त्रयोनिसूत्रनिर्दिष्टत्वाभावात्—तच्छब्दस्य ब्रह्मपरत्वं न स्वारसिकम् । वेदान्तवाक्यानां

THE ACADEMY OF SANSKRIT RESEARCH MELKOTE (KARNATAKA STATE)

भ्रमनिवर्तकवाक्यार्थज्ञानजनकतया प्रयोजनपर्यवसायित्वं वाक्यार्थज्ञानमात्रेण बन्धनिवृत्तेः शास्त्रप्रत्यक्षविरोधविध्वस्तत्वात्—अनुपपन्नम् । तदन्यथासिद्धिप्रतिविधानं च पूर्वमेव कृतम् । किंच—कस्य भ्रमनिवृत्तिः—किं ज्ञस्तेः, उत चेतनस्य । न तावज्ज्ञस्तेः; तस्या अचेतनत्वेन भ्रमाश्रयत्वाभावात् । चेतनो हि भ्रान्त्याश्रयः । जडत्वं भ्रमाश्रयत्वे प्रयोजकमिति चेत्, तया जडत्वेनाभिमते ज्ञातरि भ्रमाश्रयत्वाभावेन—साध्यसमव्याप्त्यसिद्धेः । चेतनस्य भ्रमनिवृत्तिरपि भवत्पक्षे न पुरुषार्थः स्यात्; ज्ञातुरपि निवर्त्यकोटिनिविष्टत्वात्, तं प्रति स्वनाशस्यापुरुषार्थत्वाच्च । राज्ञः शत्रुनिवृत्तिरिव ज्ञप्तिस्वरूपस्यात्मनो ज्ञातृनिवृत्तिः पुरुषार्थ इति—चेन्न; ज्ञातुरेवात्मत्वात्, ज्ञातृधर्मतयाऽवगतस्य ज्ञानस्येच्छाद्वेषादेरिवात्मत्वाभावात् । आत्मत्वाभ्युपगमेऽपि—तस्य पुरुषार्थार्थियितृत्वाभावेन पुरुषार्थप्रतिसंबन्धित्वानुपपत्त्या ज्ञानं प्रति ज्ञातृनिवृत्तेः पुरुषार्थत्वायोगात् । पुरुषेणार्थनीयस्य हि पुरुषार्थत्वम् । ज्ञानस्यात्मत्वपुरुषार्थप्रतिसंबन्धित्वाभ्युपगमेऽपि तदपेक्ष्य ज्ञातृनिवृत्तेः पुरुषार्थत्वमयुक्तं; ज्ञानं प्रति ज्ञातुः दुःख-तद्धेतुष्वन्यतमत्वाभावात् । सुखदुःखभोक्तारं प्रति सुख-तद्धेतूनां दुःख-तद्धेतुनिवृत्तेरपि हि पुरुषार्थत्वम् । नहि ज्ञाता ज्ञप्तेर्दुःखरूपः । नच दुःखं जनयिता; ज्ञानस्य दुःखानुभवितृत्वायोगात् । प्रवृत्तिनिवृत्तिपरत्वेन प्रयोजनपर्यवसानं त्वयैवापास्तं ध्याननियोगवादप्रतिक्षेपे, अतोऽनुपपन्नं शास्त्रस्य लघुक्तं प्रयोजनपर्यवसायित्वम् ॥

यादवप्रकाशीयास्तु—दुःखत्रयाभिघाताज्ञानानन्तरं तदुपशमोपाये पुरुषप्रवृत्तेरेव हेतोः—ब्रह्मैव जिज्ञास्यं न तु प्रधानादीनि—इति प्रथमसूत्रार्थं वर्णयन्ति । अस्तु ब्रह्मणो जिज्ञास्यत्वं, नैतावता प्रधानादीनामजिज्ञास्यत्वं; तेष्वन्यतमस्यैव **ब्रह्म**शब्दार्थत्वात् । शास्त्रेण हि ब्रह्मानूद्य तज्ज्ञानं विधीयते । एकेन वाक्येनैकस्यार्थस्य विधानानुवादायोगात्—अनुवादः प्रमाणान्तरसापेक्षः, प्रमाणान्तरैश्च वादिभिः संभावितास्तत्त्वप्रकारविशेषाः सर्वे परिकल्पिता इति—तत्त्वान्तरोत्प्रेक्षा न शक्या, अतस्तेष्वन्यतमस्यैव ज्ञातव्यत्वविधानाय शास्त्रेणानुवादः क्रियते—इति शङ्कापरिहारार्थं **जन्मादि**सूत्रम् । सन्मात्रवपुषोऽनेकशक्तिशालिन एकस्मादद्वितीयाद्ब्रह्मणः कृत्स्नस्य चिदचित्प्रपञ्चस्य जन्मस्थितिलयं प्रतिपाद्यम् । अत ईदृशं तत्त्वं वाद्यन्तरैरपरिकल्पितमिति—तत्परिकल्पितार्थेभ्यन्यतमस्य **ब्रह्म**शब्दार्थत्वमिति सूत्रार्थमाहुः । एवं तर्हि प्रमाणान्तरासिद्धत्वात्—शास्त्रेणानुवादासंभव इति शङ्कायां—**शास्त्रयोनित्वादि**त्युच्यते । वेदान्तेष्वेव केनापि वाक्येन प्रतिपादितस्य वाक्यान्तरेणानुवाद उपपन्नः, प्रमाणान्तरानाघ्रातचरवस्तुप्रतिपादनक्षमत्वं शब्दमहिमा—इति सूत्रतात्पर्यं वदन्ति । तथापि—सिद्धे व्युत्पत्त्यभावात्, प्रवृत्तिनिवृत्तिविरहे वाक्यस्य प्रयोजनाभावाच्च—ब्रह्मणः शास्त्रप्रतिपाद्यत्वायोगशङ्कापरिहारपरं **समन्वय**सूत्रं व्याचक्षते । तत्र तावत्प्रथमसूत्रे दुःखत्रयाभिघातज्ञानस्य पूर्ववृत्तत्वं प्रागेव प्रतिक्षिप्तं; प्रत्यक्षादिना तज्ज्ञाने विवक्षिते तत्परिहारस्यायुर्वेदादिसिद्धत्वात्, स्वर्गादेरपि तापत्रयान्तर्भावज्ञानस्य च साङ्ख्यादिशास्त्रान्तराधीनत्वे—मोक्षोपायस्यापि तत्रैव सुलभतया वेदान्तैरपेक्ष्यात्, वेदेन तज्ज्ञानस्य कर्मविचारसापेक्षतया तत्पूर्ववृत्तत्वापातात्रेति । प्रधानादीनामजिज्ञास्यतापरत्वं च पूर्वमेव निरस्तं; श्रुत्यविरुद्धांशे साङ्ख्यादिशास्त्रस्य भवद्भिरङ्गीकृतत्वात्, विरुद्धांशे चाप्रामाण्यस्य विरोधाधिकरणन्यायसिद्धत्वात्, तत्तत्प्रमेयदौःस्थ्यस्य च तर्कपादे दर्शयिष्यमाणत्वात्, वेदान्तवाक्यानामतत्परत्वस्य ईक्षत्यधिकरणादिषु वक्ष्यमाणत्वाच्च—सूत्रस्य कृतकरत्वप्रसङ्गादिति । जन्मादिसूत्रस्य वाद्यन्तरापरिकल्पितप्रकारेणौपनिषदतत्त्ववैलक्षण्यात्—**ब्रह्म**शब्दस्य तत्परिकल्पितप्रधानाद्यन्यतमविषयत्वनिरासपरत्वं चायुक्तं; विशेषणभेदायत्तविशेष्यबहुत्वपरिहाराभावे सत्यद्वितीयवस्तुनः समस्तजगत्कारणत्वप्रतिपादनानुपपत्तेः । चिदचित्प्रपञ्चस्याद्वितीयकारणतया हि वाद्यन्तरकृततत्त्वेभ्य औपनिषदतत्त्ववैलक्षण्यं भवद्भिरुक्तम् । वेदान्तवेद्यत्वस्य लघुक्तप्रकारेण प्रधानादिवैलक्षण्यं चेक्षत्यधिकरणन्यायनैरपेक्ष्येण न सिध्यति; इह वक्ष्यमाणव्यतिरिक्तन्यायान्तरानुक्तेः, वक्ष्यमाणानुपपत्तीनां वक्ष्यमाणन्यायैर्विना परिहारायोगाच्च । वक्ष्यमाणोपजीवने च—तत एव तत्त्ववैलक्षण्यं, प्रधानादेरजिज्ञास्यत्वं च सिध्यतीति—कृतकरत्वं स्यात् । वाक्यान्तरेण प्रतिपादितस्य वाक्यान्तरेणानुवादसंभवपरत्वं च शास्त्रयोन्यधिकरणस्यायुक्तं; कृतकरत्वादेव । 'अग्निहोत्रं जुहोती'ति वाक्यान्तरेण विहितस्य होमस्य 'दध्ना जुहोती'ति वाक्यान्तरेणानुवादः पूर्वकाण्डे प्रसिद्धः । आग्नेयादिषट्कं तदुत्पत्तिवाक्यविहितं, 'य एवं विद्वान् पौर्णमासीं यजते, य एवं विद्वान् अमावास्यां यजत' इति वाक्याभ्यामनूद्यत इति च तत्र तत्र प्रसिद्धम् । अतो वाक्यभेदेन विधानानुवादसंभवो नात्र व्युत्पाद्यः । समन्वयसूत्रस्य च प्रवृत्तिनिवृत्तिपरत्वाभावेऽपि—शास्त्रस्य प्रयोजनवत्तात्प्रतिपादनपरत्वमिष्टं, सिद्धे व्युत्पत्तिप्रतिपादनपरत्वं लयुक्तं; प्रथमसूत्रेणैव सिद्धार्थव्युत्पत्तेः समर्थितत्वात्, तत्र च तत्समर्थनाभावेन लघुक्तार्थपरत्वे तत्सूत्रवैयर्थ्यस्योपपादितत्वाच्च; सिद्धवस्तुमात्रे शब्दशक्तिसमर्थनाभावे सति—सिद्धवस्तुवैलक्षण्यस्य तद्विधानानुवादस्य तत्प्रयोजनादिनिरूपणस्यानपेक्षितत्वेन—जन्मादिसूत्रत्रयोत्थानस्य तत्पूर्वकत्वावश्यंभावात्, वक्ष्यमाणोपजीवनेनोत्थाने प्रतिपत्तिक्रमसामञ्जस्याभावात्, आद्यसूत्रस्यापेक्षितविधेरनपेक्षितविधानपरत्वायोगाच्च । **अतो भाष्यकारोक्तार्थपरत्वमेव चतुःसूत्र्या उपपन्नम्** ॥ इति चतुःसूत्रीशेषः समाप्तः ॥

Accn. No 12966